O Lord of cosmic vitality, your inspiring voice resounds all through the thoughts and feelings of your devotees, the perceptors of your divine wisdom, who have tasted the sweetness of your favours. 3

O Lord, resplendent and the source of cosmic vitality, verily our songs and invocations are for you and your eternal order. May you come to us and nourish us with your blessings. 4

वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू । तावा यातमुप द्रवत् ॥५॥
॥४॥ वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम् । मक्ष्वित्था धिया नरा ॥६॥
मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीं साधन्ता ॥७॥
ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥८॥
कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसम् ॥९॥

váyav índraṣ ca cetathaḥ sutánām vājinīvasū | tấv ấ yātam úpa dravát || 5 ||

váyav índraṣ ca sunvatá ấ yātam úpa nishkritám | makshv itthấ dhiyấ narấ || 6 || mitrám huve pūtádaksham váruṇam ca riṣấdasam | dhíyam ghritácīm sấdhantā || 7 || riténa mitrāvaruṇāv ritāvridhāv ritasprisā | krátum brihántam āṣāthe || 8 || kaví no mitrấváruṇā tuvijātá urukshåyā | dáksham dadhāte apásam || 9 ||

(३) तृतीयं सूक्तम्

(१–१२) द्वादशर्चस्यास्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । (१–३) आद्यतृचस्याश्विनौ, (४–६) द्वितीयतृचस्येन्द्रः, (७–९) तृतीयतृचस्य विश्वे देवाः, (१०–१२) चतुर्थतृचस्य च सरस्वती देवताः । गायत्री छन्दः ॥

॥५॥ अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती । पुरुभुजा चनस्यतम् ॥१॥

3

Áṣvinā yájvarīr ísho drávatpāṇī ṣúbhas patī | púrubhujā canasyátam || 1 ||

O source of cosmic vitality and Lord-resplendent, law and order is abiding in this creation. You are, assuredly, aware of our devotional thoughts and emotions. May we always keep the light of love and dedication burning for you and for your eternal laws. 5

O source of cosmic vitality and Lord-resplendent, may you bless the devotee for his dedication. Only your blessings will enable him to realize his aspirations. 6

I invoke the lord the source of light and bliss. He is the dispeller of evil forces. Verily, with His blessings, the worshippers will be bestowed with happiness and wisdom in life. 7

O the source of light and bliss, you are the augmenter and dispenser of knowledge for every mortal man in this life. May you be pleased to fulfil the truthful aspirations of your devotees. May all their noble endeavours attain success. 8

O supreme Lord of cosmic enlightenment, may we attain prosperity through our selfless work and may we be strong to accomplish them. O Lord, you exist for the benefit of all of us—so we think. You are the refuge of multitudes. 9

3

O the twin faculties—mental and vital, O cherishers of the noble deeds, with which we all benefit, may you derive gains at the sacred cosmic creation with spontaneity and without reservation. 1

अश्विना पुरुदंससा नरा शवीरया धिया । धिष्ण्या वनतं गिरः ॥२॥
दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः । आ यातं रुद्रवर्तनी ॥३॥
इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥४॥
इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥५॥
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥६॥

áṣvinā púrudaṅsasā nárā ṣávīrayā dhiyā́ | dhíshṇyā vánataṃ gíraḥ || 2 || dásrā yuvákavaḥ sutā́ nā́satyā vriktábarhishaḥ | ā́ yātaṃ rudravartanī || 3 || índrā́ yāhi citrabhāno sutā́ imé tvāyávaḥ | áṇvībhis tánā pūtā́saḥ || 4 || índrā́ yāhi dhiyéshitó víprajūtaḥ sutā́vataḥ | úpa bráhmāṇi vāghátaḥ || 5 || índrā́ yāhi tū́tujāna úpa bráhmāṇi harivaḥ | suté dadhishva naṣ cánaḥ || 6 ||

ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वांसो दाशुषः सुतम् ॥७॥
विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः । उस्रा इव स्वसराणि ॥८॥
विश्वे देवासो अस्रिध एहिमायासो अद्रुहः । मेधं जुषन्त वह्नयः ॥९॥

ómāsaṣ carshaṇīdhrito víṣve devāsa ā́ gata | dāṣvā́ṅso dāṣúshaḥ sutám || 7 || víṣve deváso aptúraḥ sutám ā́ ganta tū́rṇayaḥ | usrā́ iva svásarāṇi || 8 || víṣve deváso asrídha éhimāyāso adrúhaḥ | médhaṃ jushanta váhnayaḥ || 9 ||

These twin faculties, mental and vital, lead to mighty acts, and guide our thoughts, expressions and actions, endowed with fortitude. May these faculties be always of service to us in our intellectual pursuits. 2

O twins, you are dispeller of evils. You are a protection for us from untruth and you are the inspirer of our organs of actions and perceptions, may you come and dwell within for achieving fulfilment of all that is knowable and enjoyable. 3

O soul, the lower self, of wonderful splendour, listen to us. All attainments of the vital and mental complex are meant for your acceptance. 4

O soul, you are apprehended by understanding, admired by the wise, and sought after by the seekers. May you accept and assimilate what comes out as the essence of a toiling and purposeful life. 5

O soul, the self, may you come in company with your faculties full of awareness and quick in acquirements; come, accept and assimilate the knowledge derived by the mind and senses. 6

May our entire group of sense organs, supporter of human life, bestower of rich rewards and giver of confidence, function perfectly in consonance with the inner self, the soul. 7

May our swift-moving senses, givers of happiness, bring functional perfection, as the solar rays diligently bring day-light. 8

May our entire sense-organs be free from decay. May they be full of cognitional activities and devoid of malice. They are capable of receiving and remitting the rays of divine knowledge. May they all be nourished to the full. 9

पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥१०॥
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥११॥
महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥१२॥

pāvakā́ naḥ sárasvatī vā́jebhir vājínīvatī | yajñám vashṭu dhiyā́vasuḥ || 10 || codayitrī́ sūnṛ́tānām cétantī sumatīnā́m | yajñám dadhe sárasvatī || 11 || mahó árṇaḥ sárasvatī prá cetayati ketúnā | dhíyo víṣva ví rājati || 12 ||

[अथ द्वितीयोऽनुवाकः ॥]

(४) चतुर्थं सूक्तम

(१–१०) दशर्चस्यास्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

॥७॥ सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥१॥
उप नः सवना गहि सोमस्य सोमपाः पिब । गोदा इद्रेवतो मदः ॥२॥
अथा ते अन्तमानां विद्याम सुमतीनाम् । मा नो अति ख्य आ गहि ॥३॥
परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम् । यस्ते सखिभ्य आ वरम् ॥४॥
उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत । दधाना इन्द्र इद्दुवः ॥५॥

4

Surūpakṛitnúm ūtáye sudúghām iva godúhe | juhūmási dyávi-dyavi || 1 || úpa naḥ sávanā́ gahi sómasya somapāḥ piba | godā́ íd reváto mádaḥ || 2 || áthā te ántamānām vidyā́ma sumatīnā́m | mā́ no áti khya ā́ gahi || 3 || párehi vígram ástṛitam índram pṛichā vipaṣcítam | yás te sákhibhya ā́ váram || 4 || utá bruvantu no nído nír anyátaṣ cid ārata | dádhānā índra íd dúvaḥ || 5 ||

May the divine speech, the fountain head of all faculties (mental and spiritual), the purifier and bestower of knowledge, the recompenser of worship, be the source of inspiration and accomplishment for all our organised benevolent acts. 10

O divine speech, you inspire those who delight in truth. You instruct them who are diligent. Please assist us in our efforts to perform the organised sacred acts. 11

This speech-divine sets in motion all the energies of the soul and intellect. It enlightens the wisdom of all who are seekers of truth. 12

4

Day by day we invoke the resplendent God, the inspirer of all beneficial works for our assistance, as a good milch-cow is called (by the milker) for milking. 1

O inherent source of bliss, you are the vital force behind the sense-organs; may you bless us in our daily duties and accept our devotional prayers. 2

You are always present in the thoughts of virtuous and rightminded devotees. May we all deserve your nearness. May we be not left behind while you reveal your glory to others. 3

O seeker of wisdom, go to the wise, and to the pious, free from blemishes. Go to the bestower or gifts. He will be your best friend. Invoke Him for enlightenment. 4

Let our preceptors earnestly direct us to God's devotion and exclaim : "O evils, depart henceforth from every place". 5

॥८॥ उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः । स्यामेदिन्द्रस्य शर्मणि ॥६॥
एमाशुमाशवे भर यज्ञश्रियं नृमादनम् । पतयन्मन्दयत्सखम् ॥७॥
अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः । प्रावो वाजेषु वाजिनम् ॥८॥
तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो । धनानामिन्द्र सातये ॥९॥
यो रायो३वनिर्महान्त्सुपारः सुन्वतः सखा । तस्मा इन्द्राय गायत ॥१०॥

utá naḥ subhágāñ arír vocéyur dasma krishṭáyaḥ | syāméd índrasya ṣármaṇi || 6 || ém āṣúm āṣáve bhara yajñaṣríyam nṛimádanam | patayán mandayátsakham || 7 || asyá pītvá ṣatakrato ghanó vṛitrāṇām abhavaḥ | právo vájeshu vājínam || 8 || tám tvā vájeshu vājínam vājáyāmaḥ ṣatakrato | dhánānām indra sātáye || 9 || yó rāyò 'vánir mahán supāráḥ sunvatáḥ sákhā | tásmā índrāya gāyata || 10 ||

(५) पञ्चमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

॥९॥ आ त्वेता नि षीदतेन्द्रमभि प्र गायत । सखायः स्तोमवाहसः ॥१॥
पुरूतमं पुरूणामीशानं वार्याणाम् । इन्द्रं सोमे सचा सुते ॥२॥
स घा नो योग आ भुवत्स राये स पुरंध्याम् । गमद्वाजेभिरा स नः ॥३॥

5

Á tv étā ní shīdaténdram abhí prá gāyata | sákhāya stómavāhasaḥ || 1 || purūtámam purūṇám íṣānam váryāṇām | índram sóme sácā suté || 2 || sá ghā no yóga á bhuvat sá rāyé sá púraṃdhyām | gámad vájebhir á sá naḥ || 3 ||

O Lord, the destroyer of evils, may even our adversaries say that having been blessed by you, they have become prosperous, and in this may we receive consolation for all. May we ever abide by the felicity of the resplendent Lord. 6

May we dedicate all our actions and essence thereof to our supreme Lord. He alone is the inspirer of all noble deeds. He alone is the giver of joy to mankind, the source of energy for the fulfilment of our aspirations and the bestower of divine bliss. 7

O Lord, the embodiment of total selfless actions, with all your nobility, you have become slayer of evil forces. May you defend all of us in the strifes and struggles of life. 8

O Lord, the embodiment of selfless actions, we invoke you in the grim battle of life to obtain success and true prosperity. 9

We sing the glory of that almighty, who is the soure of wsidom and the accomplisher of good deeds. Let us acclaim Him to be the friend of the dedicated and the best amongst all. 10

5

Let us all, O friends and devotees, assemble here and offer our congregational prayer to, and repeatedly sing the glory of the resplendent Lord. 1

Let us pour forth our heartfelt prayers in our sacred songs. Only He is the bestower of true happiness. Only He is the destroyer of evil forces. 2

May He be with us in the fulfilment of our noble desires and higher aspirations. May He come to us to give affluence, knowledge and blessings. 3

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः । तस्मा इन्द्राय गायत ॥४॥
सुतपाव्ने सुता इमे शुचयो यन्ति वीतये । सोमासो दध्याशिरः ॥५॥
॥१०॥ त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥६॥
आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः । शं ते सन्तु प्रचेतसे ॥७॥
त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो । त्वां वर्धन्तु नो गिरः ॥८॥
अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम् । यस्मिन्विश्वानि पौंस्या ॥९॥
मा नो मर्ता अभि द्रुहन्तनूनामिन्द्र गिर्वणः । ईशानो यवया वधम् ॥१०॥

yásya saṃsthé ná vriṇváte hárī samátsu ṣátravaḥ | tásmā índrāya gāyata || 4 || sutapávne sutá imé ṣúcayo yanti vītáye | sómāso dádhyāṣiraḥ || 5 ||

tvám sutásya pītáye sadyó vriddhó ajāyathāḥ | índra jyaíshṭhyāya sukrato || 6 || á tvā viṣantv āṣávaḥ sómāsa indra girvaṇaḥ | ṣáṃ te santu prácetase || 7 || tvắṃ stómā avīvṛidhan tvắm ukthá ṣatakrato | tvắṃ vardhantu no gíraḥ || 8 || ákshitotiḥ saned imáṃ vắjam índraḥ sahasriṇam | yásmin víṣvāni paúṅsyā || 9 || mắ no mártā abhí druhan tanū́nām indra girvaṇaḥ | íṣāno yavayā vadhám || 10 ||

(६) षष्ठं सूक्तम्

(१–१०) दशर्चस्यास्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । (१–३, १०) आद्यानां तिसृणां दशम्याश्चेन्द्रः, (४–९) चतुर्थ्यादिषण्णां मरुतः, तत्रापि (५, ७) पञ्चमीसप्तम्योश्चेन्द्रो देवताः । गायत्री छन्दः ॥

॥११॥ युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥१॥

6

Yuñjánti bradhnám arushám cárantam pári tasthúshaḥ | rócante rocaná diví || 1 ||

Let us sing to the glory of that supreme Self with intense devotion, whose adversaries, with all their strength, are unable to face the horses harnessed in His car, (i.e. unable to face the vigour of His opposition). 4

These heart-throbs, coming as prayers, are sweet expressions of our gratitude and devotion. Assuredly, they will fetch blessings from merciful God for our enlightenment and prosperity. 5

O resplendent Lord, you are the supreme accomplisher of all that is noble and beneficial. May you be pleased with our heartfelt prayers and extend your blessed hand to enfold us in your embrace. 6

O Lord of supreme intelligence, we approach you for acquiring a spark of your divine wisdom. May our earnest prayers reach you and bring forth blessings from you. 7

O supreme Self, these hymns extensively speak of your glory. O Lord of total selfless actions, may these verses magnify you. May our chanting of sacred hymns arouse affection for you. 8

May the supreme Self, the possessor of enternal knowledge, invincible vigour and strength, envelop us with blessings from all sides. 9

O supreme Lord, the only object of our devotion, may our fellow-brothers bear no malice towards us. May mortal men never hurt us. Keep us away from all adversaries, O merciful God. 10

6

Just as in the cosmos, the circumstationed planetary body derives light from the sun, similarly the mind and speedy vital forces derive light and life from the God-blessed inner soul. 1

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥२॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥३॥
आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियम् ॥४॥
वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः । अविन्द उस्रिया अनु ॥५॥

yuñjánty asya kā́myā hárī vípakshasā ráthe | sóṇā dhrishṇū́ nriváhasā || 2 || ketúṃ kriṇvánn aketáve péṣo maryā apeṣáse | sám ushádbhir ajāyathāḥ || 3 || ā́d áha svadhā́m ánu púnar garbhatvám eriré | dádhānā nā́ma yajñíyam || 4 || vīḷú cid ārujatnúbhir gúhā cid indra váhnibhiḥ | ávinda usríyā ánu || 5 ||

॥१२॥ देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः । महामनूषत श्रुतम् ॥६॥
इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥७॥
अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति । गणैरिन्द्रस्य काम्यैः ॥८॥
अतः परिज्मन्ना गहि दिवो वा रोचनादधि । समस्मिन्नृञ्जते गिरः ॥९॥
इतो वा सातिमीमहे दिवो वा पार्थिवादधि । इन्द्रं महो वा रजसः ॥१०॥

devayánto yáthā matím áchā vidádvasuṃ gíraḥ | mahā́m anūshata ṣrutáṃ || 6 || índreṇa sáṃ hí dríkshase saṃjagmānó ábibhyushā | mandū́ samānávarcasā || 7 || anavadyaír abhídyubhir makháḥ sáhasvad arcati | gaṇaír índrasya kā́myaiḥ || 8 || átaḥ parijmann ā́ gahi divó vā rocanā́d ádhi | sám asminn riñjate gíraḥ || 9 || itó vā sātím īmahe divó vā pár-thivād ádhi | índram mahó vā rájasaḥ || 10 ||

May they harness to the car of their human body of lovely highly-spirited, enduring and speedy compound faculties (mental and vital) to reach their destination. 2

O mortals, you owe your rise to eminence to that resplendent God who with the rays of the dawn awakens life in the lifeless and gives form to the formless. 3

Thereafter the compound faculties, inspired by the inner self for work and worship, resume to conceive their task as the mother conceives life in the embryo. 4

Aided by the speedy vital and mental faculties, may you traverse places difficult of access, and discover divine enlightenment as a cowherd recovers cows hidden in a cave. 5

Illustrious seekers of divine wisdom, conscious of the greatness of supreme Self, glorify the all-wise and self-resplendent God, in the same manner as the reciters of hymns do for enlightenment. 6

The vital powers, strengthened by the mental conciousness of the inner self, rejoice and shine with equal splendour. 7

This sacred rite is performed to adore the invincible power of the soul, along with the blameless, brilliant and aimable hosts of compound faculties (mental and vital). 8

Therefore, O compound faculties, may all of you come here whether from celestial space (knowledge-phase) or from far-off galaxies (bliss-phase) ; as in this rite we are reciting hymns in your adoration alone. 9

Verily, we seek the gift for light for inner-self ; may be it comes from this earthly region (physico-material-phase),or from this celestial space (knowledge-phase) or from the vast firmament (bliss-phase). 10

(७) सप्तमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः। इन्द्रो देवता। गायत्री छन्दः॥

॥१३॥ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥१॥
इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः ॥२॥
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥३॥
इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥४॥
इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणम् ॥५॥

7

Índram íd gāthíno bṛihád índram arkébhir arkíṇaḥ | índraṃ vá̄ṇīr anūshata || 1 || índra íd dháryoḥ sácā sámmiṣla á̄ vacoyújā | índro vajrí̄ hiraṇyáyaḥ || 2 || índro dīrgháya cákshasa á̄ sū́ryaṃ rohayad diví | ví góbhir ádrim airayat || 3 || índra vá̄jeshu no 'va sahásrapradhaneshu ca | ugrá ugrábhir ūtíbhiḥ || 4 || índraṃ vayáṃ mahādhaná índram árbhe havāmahe | yújaṃ vṛitréshu vajríṇam || 5 ||

॥१४॥ स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि । अस्मभ्यमप्रतिष्कुतः ॥६॥
तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः । न विन्धे अस्य सुष्टुतिम् ॥७॥
वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा । ईशानो अप्रतिष्कुतः ॥८॥
य एकश्चर्षणीनां वसूनामिरज्यति । इन्द्रः पञ्च क्षितीनाम् ॥९॥
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥१०॥

sá no vṛishann amúṃ carúṃ sátrādāvann ápā vṛidhi | asmábhyam ápratishkutaḥ || 6 || tuñjé-tuñje yá úttare stómā índrasya vajríṇaḥ | ná vindhe asya sushṭutím || 7 || vṛ́ishā yūthéva váṅsagaḥ kṛishṭī́r iyarty ójasā | ī́ṣāno ápratishkutaḥ || 8 || yá ékaṣ carshaṇīnā́ṃ vásūnām irajyáti | índraḥ páñca kshitīnā́m || 9 || índraṃ vo viṣvátas pári hávāmahe jánebhyaḥ | asmā́kam astu kévalaḥ || 10 ||

7

The chanters of the Sāman extol the resplendent Lord with songs, the reciters of the Ṛk with prayers, the priests of the Yajuṣ with divine verses. 1

The resplendent Lord the wielder of adamantine justice, is the co-ordinater of all elements. At His command all cosmic energies are harnessed to the richly-decorated aura and they come speedily to our help. 2

The resplendent Lord elevated the sun in the sky to render all things visible and charged the clouds with abundant waters. 3

O invincible resplendent Lord, may you, with insuperable defences, protect us in the struggles of hard life. 4

We invoke our ally, the resplendent Lord, for great prosperity and wisdom, and for protection against evil forces. 5

Therefore, O Lord, showerer of blessings and granter of all desires, may you break open the dark clouds of evil forces and comply with our requests. 6

In every succeeding danger and distress we invoke your help. Whatever our invocations, they are all for you, O resplendent Lord. We cannot find words to pay a befitting homage to you. 7

The mighty Lord invests men with His strength and showers His blessings on them and defends, as a bull defending a herd of kine. 8

God alone rules over men. The whole universe is His kingdom. He alone controls and directs our five cognizant senses. 9

We invoke God from anywhere. May He be exclusively our own. 10

[अथ तृतीयोऽनुवाकः ॥] (८) अष्टमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

॥१५॥ एन्द्र सानसिं रयिं सजित्वानं सदासहम् । वर्षिष्ठमूतये भर ॥१॥
नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै । त्वोतासो न्यर्वता ॥२॥
इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि । जयेम सं युधि स्पृधः ॥३॥
वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम् । सासह्याम पृतन्यतः ॥४॥
महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥५॥

8

Éndra sānasíṃ rayíṃ sajítvānaṃ sadāsáham | várshishṭham ūtáye bhara || 1 || ní yéna mushṭihatyáyā ní vṛitrá ruṇádhāmahai | tvótāso ny árvatā || 2 || índra tvótāsa á vayáṃ vájraṃ ghanā́ dadīmahi | jáyema sáṃ yudhí spṛídhaḥ || 3 || vayáṃ ṣū́rebhir ástṛibhir índra tváyā yujā́ vayám | sāsahyā́ma pṛitanyatáḥ || 4 || mahā́ñ índraḥ paráṣ ca nú mahitvám astu vajríṇe | dyaúr ná prathinā́ ṣávaḥ || 5 ||

॥१६॥ समोहे वा य आशत नरस्तोकस्य सनितौ । विप्रासो वा धियायवः ॥६॥
यः कुक्षिः सोमपातमः समुद्र इव पिन्वते । उर्वीरापो न काकुदः ॥७॥
एवा ह्यस्य सूनृता विरप्शी गोमती मही । पक्वा शाखा न दाशुषे ॥८॥
एवा हि ते विभूतय ऊतय इन्द्र मावते । सद्यश्चित्सन्ति दाशुषे ॥९॥

samohé vā yá ā́ṣata náras tokásya sánitau | víprāso vā dhiyāyávaḥ || 6 || yáḥ kukshíḥ somapā́tamaḥ samudrá iva pínvate | urvī́r ā́po ná kākúdaḥ || 7 || evā́ hy àsya sūnṛítā virapṣí gómatī mahī́ | pakvā́ ṣā́khā ná dāṣúshe || 8 || evā́ hí te víbhūtaya ūtáya indra mā́vate | sadyáṣ cit sánti dāṣúshe || 9 ||

8

O resplendent Lord, may you bless us with that spiritual wealth which is everlasting and which would lead us to victory and power, and protect us from evil forces. 1

Whereby, we, under your auspices, resolve our internal conflicts and become messenger of peace and prosperity in the world. 2

O almighty God, may we, armed with your powerful divine force, completely annihilate our inner vices in the struggles of life and be victorious. 3

O supreme God, may we with the aid of virtues, vigour, valour and sharp intellect, provided by you, conquer our enemies, however remote and hidden in our subconciousness. 4

Great is our God, greater than the greatest,—beyond our measure. He is boundless, much beyond the celestial space and is the source of all greatness. 5

May our wise and pious men attain their wishes in the struggles of their own personal life and secure prosperity for their descendents. 6

God has infinite powers and capacity to draw and discharge like oceans, He protects the entire objects of creation by His radiance. Like oceans He collects and like the sunrays, He disperses. 7

So, His bounteous gifts and divine wisdom and wealth are given to His devotees as spontaneously as ripe fruit from a loaded branch. 8

So, too, resplendent God, your magnificent gifts are readily bestowed on dedicated persons like me. 9

एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या । इन्द्राय सोमपीतये ॥१०॥

evā́ hy àsya kā́myā stóma ukthám̐ ca ṣáṅsyā índrāya sómapītaye || 10 ||

(९) नवमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

॥१७॥ इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ अभिष्टिरोजसा ॥१॥
एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने । चक्रिं विश्वानि चक्रये ॥२॥
मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे । सचैषु सवनेष्वा ॥३॥
असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत । अजोषा वृषभं पतिम् ॥४॥
सं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम् । असदित्ते विभु प्रभु ॥५॥

9

Índréhi mátsy ándhaso víṣvebhiḥ somapárvabhiḥ | mahā́ṅ abhishṭír ójasā || 1 || ém enam̐ sṛijatā suté mandím índrāya mandíne | cákrim̐ víṣvāni cákraye || 2 || mátsvā suṣipra mandíbhi stómebhir viṣvacarshaṇe | sácaishú sávaneshv ā́ || 3 || ásṛigram indra te gíraḥ práti tvā́m úd ahāsata | ájoshā vṛishabhám pátim || 4 || sám̐ codaya citrám arvā́g rā́dha indra váreṇyam | ásad ít te vibhú prabhú || 5 ||

॥१८॥ अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः । तुविद्युम्न यशस्वतः ॥६॥
सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत् । विश्वायुर्धेह्यक्षितम् ॥७॥

asmā́n sú tátra codayéndra rāyé rábhasvataḥ | túvidyumna yáṣasvataḥ || 6 || sám̐ gómad indra vā́javad asmé pṛithú ṣrávo bṛihát | viṣvā́yur dhehy ákshitam || 7 ||

Verily the chanted and recited praises of the devotees are to be directed to the resplendent Lord and repeated for the acceptance of our ecstatic devotion. 10

9

Come to us, resplendent God, with all your grandeur and majesty, to guide the sincere seeker of truth in his pursuit and accept his homage with delight. 1

May these ecstatic devotional songs so composed and loving invocations be offered to the rejoicing resplendent God, the accomplisher of all things. 2

O all-knowing, resplendent God, the seer of all, may we feel your grace in all our efforts. May you be pleased to take us in your communion. May you reciprocate our prayers. 3

Resplendent God, showerer of blessings and protector of your worshippers, I have sung to you the divine hymns with the hope that they would reach you. We invoke you for their acceptance. 4

Resplendent God, bestow on us your precious rare benefits, which would be enough and more than enough for us, and are thine and only thine. 5

Inspire us, resplendent God of mighty splendour, for the attainment of spiritual eminence, divinity and highest glory. 6

Resplendent God, the source of all universal life, give us farseeing vision and nourishment—the priceless gifts—which are extensive and inexhaustible. 7

अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम् । इन्द्र ता रथिनीरिषः ॥८॥
वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम् । होम गन्तारमूतये ॥९॥
सुतेसुते न्योकसे बृहद्बृहत एदरिः । इन्द्राय शूषमर्चति ॥१०॥

asmé dhehi

srávo brihád dyumnám sahasrasā́tamam | índra tā́ rathínīr íshah || 8 || vásor índram vásupatim gīrbhír grinánta rigmíyam | hóma gántāram ūtáye || 9 || suté-sute nyòkase brihád brihatá éd aríh | índrāya sūshám arcati || 10 ||

(१०) दशमं सूक्तम्

(१–१२) द्वादशर्चस्यास्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । इन्द्रो देवता । अनुष्टुप् छन्दः ॥

॥१०॥

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥१॥
यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वम् ।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥३॥
एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव ।
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥४॥

10

Gā́yanti tvā gāyatríṇó 'rcanty arkám arkíṇah | brahmáṇas tvā satakrata úd vaṅsám iva yemire || 1 || yát sā́noh sā́num ā́ruhad bhū́ry áspashṭa kártvam | tád índro ártham cetati yūthéna vrishṇír ejati || 2 || yukshvā́ hí kesínā hárī vríshaṇā kakshyaprā́ | áthā na indra somapā girā́m úpasrutim cara || 3 || éhi stómāñ abhí svarābhí griṇīhy ā́ ruva | bráhma ca no vaso sácéndra yajñám ca vardhaya || 4 ||

Resplendent God, grant us fame and wealth acquired in a thousand ways with skill and honest labour. 8

Through our sincere prayers, we invoke resplendent God, the revealer of divine knowledge, and the source of all wealth. The entire universe is embraced in His fold. He sustains and protects it. 9

Faithful and dedicated devotees sing out the glory of resplendent God, who is boundless, and is a dweller that surpasses all the limits of time and space. 10

10

O embodiment of total selfless actions, the chanters of the Sāma extol you with songs, the reciters of the Ṛk with prayers, the priests of the Yajuḥ with their prose and thereby elevate the honour of their family and descendants. 1

When your earnest seeker in his pursuit ascends rung by rung, God, you also assist him in his endeavour, enlighten his path and bless him for success. 2

O resplendent God and accepter of devotions, come to us and lead us with your splendid inspiring and vigorous revelations and virtues manifested in this wonderful world. 3

Come, resplendent God, lord of wealth, and attend to our hymns, respond to our prayers, propitious to our sacred performances and bestow upon us abundant food. 4

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
शक्रो यथा सुतेषु णो रारणत्सख्येषु च ॥५॥
तमित्सखित्व ईमहे तं राये तं सुवीर्ये ।
स शक्र उत नः शकदिन्द्रो वसु दयमानः ॥६॥

ukthám índrāya ṣáṅsyaṃ várdhanam purunishshídhe | ṣakró yáthā sutéshu ṇo rāráṇat sakhyéshu ca || 5 || tám ít sakhitvá īmahe táṃ rāyé táṃ suvírye | sá ṣakrá utá naḥ ṣakad índro vásu dáyamānaḥ || 6 ||

॥२०॥

सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः ।
गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥७॥
नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः ।
जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥८॥
आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः ।
इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥९॥
विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम् ।
वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् ॥१०॥

suvivṛítaṃ sunirájam índra tvádātam íd yáṣaḥ | gávām ápa vrajáṃ vṛidhi kṛiṇushvá rádho adrivaḥ || 7 || nahí tvā ródasī ubhé ṛighāyámāṇam ínvataḥ | jéshaḥ svàrvatīr apáḥ sáṃ gá asmábhyaṃ dhūnuhi || 8 || áṣrutkarṇa ṣrudhí hávaṃ nú cid dadhishva me gíraḥ | índra stómam imám máma kṛishvá yujáṣ cid ántaram || 9 || vidmá hí tvā vṛíshantamaṃ vájeshu havanaṣrútam | vṛíshantamasya hūmaha ūtíṃ sahasrasátamām || 10 ||

Let us sing such divine hymns as reveal and extol the one and only powerful God who can guide our children and friends and also be the repeller of our foes. 5

To Him alone we pray for friendship, for wealth and for valour; He alone is powerful, and He alone can protect us from injury and confer wealth on us. 6

O bounteous God, throw open the gates of knowledge and wealth, for only you can render them easy attainment and give us in abundance. 7

All the evil forces of the earth and celestial regions are ineffective in your presence. May you give strength to our noble efforts, mental or physical, to the fullest extent. 8

Omniscient God, you hear every word, even every heart-throb, however feebly expressed. Listen quickly to my invocations; accept my loving utterances as it were from a friend. 9

We know you, O generous giver of blessings. You respond to the call of devotees whenever they are in trouble. We invoke you for protection and you shower a thousand-fold bounties on us which protect us like the shield. 10

आ तू न॑ इन्द्र कौशिक मन्दसा॒नः सु॒तं पि॑ब ।
नव्य॒मायुः॒ प्र सू ति॑र कृ॒धी स॑हस्र॒सामृषि॑म् ॥११॥
परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वतः॑ ।
वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः ॥१२॥

á tū́ na indra kauṣika mandasānáḥ sutám piba | návyam ā́yuḥ prá sū́ tira kṛidhí sahasrasā́m ṛ́shim || 11 || pári tvā girvaṇo gíra imā́ bhavantu viṣvátaḥ | vṛiddhā́yum ánu vṛíddhayo júshṭā bhavantu júshṭayaḥ || 12 ||

(११) एकादशं सूक्तम्

(१–८) अष्टर्चस्यास्य सूक्तस्य माधुच्छन्दसो जेता ऋषिः । इन्द्रो देवता । अनुष्टुप् छन्दः ॥

॥२१॥

इन्द्रं॒ विश्वा॑ अवीवृधन्त्समु॒द्रव्य॑चसं॒ गिरः॑ ।
र॒थीत॑मं र॒थीनां॒ वाजा॑नां॒ सत्प॑तिं॒ पति॑म् ॥१॥
स॒ख्ये त॑ इन्द्र वा॒जिनो॒ मा भे॑म शवसस्पते ।
त्वाम॒भि प्र णो॑नुमो॒ जेता॑रम॒परा॑जितम् ॥२॥
पू॒र्वीरिन्द्र॑स्य रा॒तयो॒ न वि द॑स्यन्त्यू॒तयः॑ ।
यदी॒ वाज॑स्य॒ गोम॑तः स्तो॒तृभ्यो॒ मंह॑ते म॒घम् ॥३॥
पु॒रां भि॒न्दुर्युवा॑ क॒विरमि॑तौजा अजायत ।
इन्द्रो॒ विश्व॑स्य॒ कर्म॑णो ध॒र्ता व॒ज्री पु॑रुष्टु॒तः ॥४॥

11

Índram víṣvā avīvṛidhan samudrávyacasam gíraḥ | rathítamaṃ rathínāṃ vā́jānāṃ sátpatim pátim || 1 || sakhyé ta indra vājíno mā́ bhema ṣavasas pate | tvā́m abhí prá ṇonumo jétāram áparājitam || 2 || pūrvír índrasya rātáyo ná ví dasyanty ūtáyaḥ | yádī vā́jasya gómata stotṛíbhyo máṅhate maghám || 3 || purā́m bhindúr yúvā kavír ámitaujā ajāyata | índro víṣvasya kármaṇo dhartā́ vajrī́ purushṭutáḥ || 4 ||

Come quickly, O preceptor, the resplendent Lord, to accept our humble homage. Confer long life that merits commendation; may you give us spiritual vision to discern the deep meanings of the sacred hymns. 11

May our invocations spread far and wide; may they sing out your glory all round and may your blessed devotees dedicate their lives to making the world happy and prosperous. 12

11

All our praises magnify God, who is as vast as the ocean, and the most valiant leader of warriors to conquer evil forces and who is the protector of the virtuous. 1

Supported by your friendship, may we never be afraid of evil forces, O cherisher of strength and conqueror, the unconquered God. 2

The all merciful providence is showering wealth and wisdom from His treasury since eternity. It flows continuously and endlessly. His copious gifts will ever be made available to His faithful devotees. 3

The resplendent God, composer and dispenser of creation, is ever-young, ever-wise, ever-sustainer of all pious acts, and dispeller of evils. May we all obey Him and pay homage to His magnanimity. 4

त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् ।
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥५॥
तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन् ।
उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥६॥
मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः ।
विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥७॥
इन्द्रमीशानमोजसाभि स्तोमा अनूषत ।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥८॥

tvám valásya gómató 'pāvar adrivo bílam | tvám devá ábibhyushas tujyámānāsa āvishuḥ || 5 || távāhám ṣūra rātíbhiḥ práty āyam síndhum āvádan | úpātishṭhanta girvaṇo vidúsh ṭe tásya kārávaḥ || 6 || māyábhir indra māyínam tvám ṣúshṇam ávātiraḥ | vidúsh ṭe tásya médhirās téshām ṣrávāṅsy út tira || 7 || índram íṣānam ójasābhí stómā anūshata | sahásram yásya ratáya utá vā sánti bhúyasīḥ || 8 ||

[अथ चतुर्थोऽनुवाकः ॥]

(१२) द्वादशं सूक्तम्

(१–१२) द्वादशर्चस्यास्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः । अग्निर्देवता, तत्रापि (६) षष्ठ्या ऋच आद्यपादस्य निर्मथ्याहवनीयावग्नी देवते । गायत्री छन्दः ॥

॥२२॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥१॥
अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम् ॥२॥

12.

Agním dūtám vriṇīmahe hótāram viṣvávedasam | asyá yajñásya sukrátum || 1 || agním-agnim hávīmabhiḥ sádā havanta viṣpátim | havyavāham purupriyám || 2 ||

As the sun breaks open the dense dark clouds which obstruct the rays of the light, (or as concealed cattle is released from a cave by breaking open its doors), so God removes evil forces and brightens the path of virtuous devotees. Wise men can cast out fear when they have found God as their ally. 5

Attracted by your bounties, I again come, O mighty God, to you, singing your glory in full-throated voice. All right-minded faithful men come to you for your blessings, as they have known your munificence. 6

Resplendent God, let the deceitful and tyrannous people be defeated by honest people through their clever strategy. May they (the virtuous and honest) be rewarded by you with abundant wealth and food. 7

Even more, with full faith and enthusiasm than ever, may the reciters of sacred hymns sing the glories of God, the sovereign master of the universe whose bounties are thousands, beyond the counts. 8

12

We accept adorable God as the messenger of all virtues, presiding over our sacred performaces, and the source of all inspirations. We adore Him as we acclaim Him as the perfecter of benevolent deeds. 1

With dedicated noble deeds and invocations we offer homage to our lord of men, most enlightened and respendent Lord, beloved of many. Assuredly, He will respond to our offerings with a generous heart. 2

अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः ॥३॥
ताँ उशतो वि बोधय यदग्ने यासि दूत्यम् । देवैरा सत्सि बर्हिषि ॥४॥
घृताहवन दीदिवः प्रति ष्म रिषतो दह । अग्ने त्वं रक्षस्विनः ॥५॥
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः ॥६॥

ágne deváñ
ihá vaha jajñānó vriktábarhishe | ási hótā na ídyaḥ || 3 || táñ uṣató ví bodhaya yád agne yási dūtyàm | devaír á satsi barhíshi || 4 || ghrítāhavana dīdivaḥ práti shma ríshato daha | ágne tvám rakshasvínaḥ || 5 || agnínāgníḥ sám idhyate kavír grihápatir yúvā | havyaváḍ juhvàsyaḥ || 6 ||

॥२३॥ कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम् ॥७॥
यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति । तस्य स्म प्राविता भव ॥८॥
यो अग्निं देववीतये हविष्माँ आविवासति । तस्मै पावक मृळय ॥९॥
स नः पावक दीदिवोऽग्ने देवाँ इहा वह । उप यज्ञं हविश्च नः ॥१०॥

kavím agním úpa stuhi satyádharmāṇam adhvaré | devám amīvacátanam || 7 || yás tvám agne havíshpatir dūtám deva saparyáti | tásya sma prāvitá bhava || 8 || yó agním devávītaye havíshmāñ āvívāsati | tásmai pāvaka mriḷaya || 9 || sá naḥ pāvaka dīdivó 'gne deváñ ihá vaha | úpa yajñám havíṣ ca naḥ || 10 ||

Adorable God, may we see you manifested in Nature's glories, which reveal your presence to us; you alone are to be adored. 3

O adorable God, you are our messenger of Nature's divine glories; may we through you be the possessors of Nature's bounties. May you come to us with Nature's bounties. 4

Adorable God, we invoke you with our dedicated noble actions. Dispel our internal evil conflicts arising out of selfishness and ignorance. 5

Through the adorable God. the terrestrial and cosmic fires are also kindled. May we all sing the glory of God, who is ever-young and all-wise. He is the only guardian of virtuous devotees. He accepts earnest offerings and showers on us His blessings generously. 6

May we worship, the all-wise, the all-knowing and the supreme sustainer of eternal laws. He is the one who destroys evils, apparent or concealed, through His supreme goodness. 7

O adorable God, messenger of all virtues, may you be the protector of him, who serves you through his pious actions, and who dedicates his life to the service of mankind. 8

May you, O purifier, be propitious to him who approaches you through honest devotion and through pious mind dedicated to the well-being of the needy and saintly. 9

Adorable God, may you inspire enlightened devotees who have assembled for work and worship and impel them to make united efforts for good of mankind. 10

स नः स्तवान आ भर गायत्रेण नवीयसा । रयिं वीरवतीमिषम् ॥११॥
अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः । इमं स्तोमं जुषस्व नः ॥१२॥

sá na stávana á̧ bhara gāyatréṇa návīyasā | rayím̧ vīrávatīm ísham || 11 || ágne ṣukréṇa ṣocíshā víṣvābhir deváhūtibhiḥ | imám̧ stómam̧ jushasva naḥ || 12 ||

(१३) त्रयोदशं सूक्तम्

(१–१२) द्वादशर्चस्यास्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः । (१) आद्याया ऋच इध्मः समिद्धो वाग्निः, (२) द्वितीयायास्तनूनपात्, (३) तृतीयाया नराशंसः, (४) चतुर्थ्या इळः, (५) पञ्चम्या बर्हिः, (६) षष्ठ्या देवीर्द्वारः, (७) सप्तम्या उषासानक्ता, (८) अष्टम्या दैव्यौ होतारौ प्रचेतसौ, (९) नवम्यास्तिस्रो देव्यः सरस्वतीळाभारत्यः, (१०) दशम्यास्त्वष्टा, (११) एकादश्या वनस्पतिः, (१२) द्वादश्याश्च स्वाहाकृतयोऽग्निरूपा देवताः । गायत्री छन्दः (एतदाप्रीसूक्तम्) ॥

॥२४॥ सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते । होतः पावक यक्षि च ॥१॥
मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे । अद्या कृणुहि वीतये ॥२॥
नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये । मधुजिह्वं हविष्कृतम् ॥३॥
अग्ने सुखतमे रथे देवाँ ईळित आ वह । असि होता मनुर्हितः ॥४॥
स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः । यत्रामृतस्य चक्षणम् ॥५॥
वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः । अद्या नूनं च यष्टवे ॥६॥

13

Súsamiddho na á vaha deváñ agne havíshmate | hótaḥ pāvaka yákshi ca || 1 || mádhumantam̧ tanūnapād yajñám̧ devéshu naḥ kave | adyá kriṇuhi vītáye || 2 || nárāṣáñsam ihá priyám asmín yajñá úpa hvaye | mádhujihvam̧ havishkrítam || 3 || ágne sukhátame ráthe deváñ īḷitá á vaha | ási hótā mánurhitaḥ || 4 || striṇītá barhír ānusháġ ghritáprishṭham manīshiṇaḥ | yátrāmrítasya cákshaṇam || 5 || ví ṣrayantām ritavrídho dváro devír asaṣcátaḥ | adyá nūnám̧ ca yáshṭave || 6 ||

May we be inspired to sing your glory through our ever-fresh hymns. Bestow upon us ever increasing prosperity, food and progeny. 11

O adorable God, we invoke you at our place of work and worship, and may we feel your radiance of purity and benevolence; may you be pleased by our wide-ranging prayers. 12

13

O all purifying adorable God, thoroughly enlightened, may you bring down to us the bounties of Nature, and may we perform the fire-ceremony to receive these bounties. 1

O wise and adorable, your awareness purifies and protects each and every part of the human body. May our noble deeds bring to us the bounties of Nature, material and spiritual. 2

I invoke the most adorable Lord, the one praised by all people, the sweet-tongued, completely dedicated, and the giver of nature's gifts. 3

O adorable God, enlighten hither the sense-organs; accompanying the wonderfully convenient body-chariot. You are the guardian of the interests of men. 4

O wise devotees, may you offer your tender and affectionate regards to adorable God to attain divine bliss, whilst you pour out the nectar of clarified butter (in the fire-ceremony) and spread the grassy-seats. 5

May the doors of divine knowledge and selfless service be set open this day and this very moment, so that we perform our sacred work unhampered. 6

॥२५॥ नक्तोषासा सुपेशसास्मिन्यज्ञ उप ह्वये । इदं नो बर्हिरासदे ॥७॥
ता सुजिह्वा उप ह्वये होतारा दैव्या कवी । यज्ञं नो यक्षतामिमम् ॥८॥
इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदन्त्वस्रिधः ॥९॥
इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये । अस्माकमस्तु केवलः ॥१०॥
अव सृजा वनस्पते देव देवेभ्यो हविः । प्र दातुरस्तु चेतनम् ॥११॥
स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे । तत्र देवाँ उप ह्वये ॥१२॥

náktoshásā supéṣasāsmín yajñá úpa hvaye | idáṃ no barhír āsáde || 7 || tá sujihvá úpa hvaye hótāra daívyā kaví | yajñáṃ no yakshatām imám || 8 || íḷā sárasvatī mahí tisró devír mayobhúvaḥ | barhíḥ sīdantv asrídhaḥ || 9 || ihá tváshṭāram agriyáṃ viṣvárūpam úpa hvaye | asmákam astu kévalaḥ || 10 || áva srijā vanaspate déva devébhyo havíḥ | prá dātúr astu cétanam || 11 || sváhā yajñáṃ krinotanéndrāya yájvano grihé || tátra deváñ úpa hvaye || 12 ||

(१४) चतुर्दशं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः । विश्वे देवा देवताः । गायत्री छन्दः ॥

॥२६॥ ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये । देवेभिर्याहि यक्षि च ॥१॥
आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः । देवेभिरग्न आ गहि ॥२॥

14

Aíbhir agne dúvo gíro víṣvebhiḥ sómapītaye | devébhir yāhi yákshi ca || 1 || á tvā káṇvā ahūshata griṇánti vipra te dhíyaḥ | devébhir agna á gahi || 2 ||

May I admire the beauty of night and dawn, also at the time of this fire-ceremony; Nature has already provided them with a grassy-seat (as if, in the firmament). 7

I invoke both the sweet-tongued and eloquent divine poets, in order that they may bless and conduct the work of our fire-ceremony. 8

May the ever-glorious blissful virtues—*ila, saraswati, mahi* wisdom, speech and prosperity—occupy respectable places in our ceremony. 9

We invoke the supreme architect of this infinitely vast creation, who reveals His glory through splendid multifold manifestations. May He be solely ours. 10

O God, bestower of wealth of herbs and plants, we offer homage to you through our noble deeds and thoughts. May divine knowledge be our reward. 11

May we offer auspicious prayers to the resplendent Lord with the exclamation of SVAHA at the residence of the worshipper. We call also upon Nature's bounties to help us here. 12

14

May you be present with us, O mighty God, with all your Nature's bounties, whilst we adore you and pray, and may you bless those who pray with sweet emotional expressions and keep us away from selfish activities. 1

Adorable Lord, may you be with us for our enlightenment; the intellectuals extol your divine virtues. May you come to us along with Nature's bounties. 2

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान्मारुतं गणम् ॥३॥
प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः । द्रप्सा मध्वश्चमूषदः ॥४॥
ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः । हविष्मन्तो अरंकृतः ॥५॥
घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः । आ देवान्त्सोमपीतये ॥६॥

indravāyū́ bṛihaspá-
tim mitrā́gním pūshánam bhágam | ādityā́n mā́rutaṃ ganám || 3 || prá vo bhriyanta índavo matsarā́ mādayishṇávaḥ | drapsā́ mádhvaṣ camūshádaḥ || 4 || ī́ḷate tvā́m avasyávaḥ káṇvāso vṛiktábarhishaḥ | havíshmanto araṃkṛítaḥ || 5 || ghṛitápṛishṭhā manoyújo yé tvā váhanti váhnayaḥ | ā́ devā́n sómapītaye || 6 ||

॥२७॥ तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि । मध्वः सुजिह्व पायय ॥७॥
ये यजत्रा य ईड्यास्ते ते पिबन्तु जिह्वया । मधोरग्ने वषट्कृति ॥८॥
आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः । विप्रो होतेह वक्षति ॥९॥
विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥१०॥
त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि । सेमं नो अध्वरं यज ॥११॥

tā́n yájatrāñ ṛitāvṛídhó 'gne pátnīvatas kṛidhi | mádhvaḥ sujihva pāyaya || 7 || yé yájatrā yá ī́ḍyās té te pibantu jihváyā | mádhor agne váshaṭkṛiti || 8 || ā́kīṃ sū́ryasya rocanā́d víṣvān devā́ñ usharbúdhaḥ | vípro hótehá vakshati || 9 || víṣvebhiḥ somyám mádhv ágna índreṇa vāyúnā | píbā mitrásya dhā́mabhiḥ || 10 || tváṃ hótā mánurhitó 'gne yajñé-shu sīdasi | sémáṃ no adhvarám yaja ||

We invoke you, the supreme source of intellect, with names such as resplendent, the source of vitality, supreme Lord, surveyor, adorable, nourisher, gracious, and the light and the vital-complex. 3

In respectful regards of all divine virtues are poured forth in the fire-ceremony these devotional offerings in exhilarating and melodious tunes. 4

The wise and pious priests wishing to obtain the protection of God against worldly struggles, seated on well-spread grass cushions, in the fire-ceremony pray to you, O God, for their fulfilment, after having suppressed all selfish aspirations. 5

May the senses, fickle and swift as horses and smooth, commanded by a strong-willed mind, bring loyal devotees to this place of work and worship, so that they enjoy the devotional songs. 6

O God, may the truthful promoters and participants of the sacred duties, together with their wives, assemble here and enjoy the sweet elixir of devotional hymns. 7

Let these pious promoters, who deserve veneration, be blessed by you, O God, to hear sweet melodious devotional songs. 8

May the wise invoker of divine virtues inspire us with the glory of all luminaries that accompany the dawn. 9

May our soul, mind and heart drink this exhilarating spiritual nectar of devotion and be in commune with adorable God. 10

O enlightened priest, you have been assigned to invoke all godly virtues at the place of worship. May you supervise this work with dedication. 11

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः । ताभिर्देवाँ इहा वह ॥१२॥

yukshvá hy árushī ráthe haríto deva rohítaḥ | tábhir deváñ ihá vaha || 12 ||

(१५) पञ्चदशं सूक्तम्

(१–१२) द्वादशर्चस्यास्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः । (१) आद्याया ऋच इन्द्रः, (२) द्वितीयाया मरुतः, (३) तृतीयायास्त्वष्टा, (४) चतुर्थ्या अग्निः, (५) पञ्चम्या इन्द्रः, (६) षष्ठ्या मित्रावरुणौ, (७–१०) सप्तमीतश्चतसृणां द्रविणोदा अग्निः (११) एकादश्या अश्विनौ, (१२) द्वादश्याश्चाग्निर्देवताः (ऋतुदेवता एता.) । गायत्री छन्दः ॥

॥२८॥ इन्द्र सोमं पिब ऋतुना त्वा विशन्त्विन्दवः । मत्सरासस्तदोकसः ॥१॥
मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥२॥
अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना । त्वं हि रत्नधा असि ॥३॥
अग्ने देवाँ इहा वह सादया योनिषु त्रिषु । परि भूष पिब ऋतुना ॥४॥
ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु । तवेद्धि सख्यमस्तृतम् ॥५॥
युवं दक्षं धृतव्रत मित्रावरुण दूळभम् । ऋतुना यज्ञमाशाथे ॥६॥

15

Índra sómam píba ritúnā tvā viṣantv índavaḥ | matsarā́sas tádokasaḥ || 1 || márutaḥ píbata ritúnā potrā́d yajñám punītana | yūyáṃ hí shṭhā́ sudānavaḥ || 2 || abhí yajñám griṇīhi no gnā́vo néshṭaḥ píba ritúnā | tváṃ hí ratnadhā́ ási || 3 || ágne deváñ ihā́ vaha sādáyā yónishu trishú | pári bhūsha píba ritúnā || 4 || brā́hmaṇād indra rā́dhasaḥ píbā sómam ritū́ñr ánu | távéd dhí sakhyám ástritam || 5 || yuváṃ dákshaṃ dhṛitavrata mítrāvaruna dūḷábham || ritúnā yajñám āṣā́the || 6 ||

O Lord of universe, please harness your powerful red rays to the chariot of the sun and delegate him and other Nature's bounties to bring light and life to this earth. 12

15

Resplendent Lord, please accept our invocations and grant our prayers offered to you according to the seasons. May our prayers reach you and be accepted as if they are being welcomed in their own home. 1

Lord of vital orders, please accept our devotion and sacred acts performed according to seasons. May you grace the place of work and worship with your presence; for you are bountiful. 2

O selfless benefactor, the supreme architect, bless our sacred work and worship. Accept our offerings suitable for all occasions and seasons. May they be entirely dedicated to you. May they be possessed by you; as all the treasures of wealth and wisdom belong to you alone. 3

Lord of creation, please direct your Nature's bounties to assist us through our triad of intellect, heart and mind; please bless it with decorations (of wisdom), and may you lovingly accept our devotional songs. 4

Resplendent Lord, please come and accept these seasonal devotional prayers offered by your truly-dedicated devotees. We solicit your friendship as only your friendship is unbroken and ever-lasting. 5

O God, source of enlightenment and vigour, enforcer of laws of this universe, efficacious and propitious, please come and accept our homage offered to you according to the seasons. 6

॥२९॥ द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे । यज्ञेषु देवमीळते ॥७॥
द्रविणोदा ददातु नो वसूनि यानि शृण्विरे । देवेषु ता वनामहे ॥८॥
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥९॥
यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे । अध स्मा नो ददिर्भव ॥१०॥
अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥११॥
गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि । देवान्देवयते यज ॥१२॥

dravinodá drávinaso grā́vahastāso adhvaré | yajñéshu deváṁ īḷate || 7 || dravinodā́ dadātu no vásūni yā́ni srinviré | devéshu tā́ vanāmahe || 8 || dravinodā́ḥ pipīshati juhóta prá ca tishṭhata | neshṭrā́d ritúbhir ishyata || 9 || yát tvā turī́yam ritúbhir drávinodo yájāmahe | ádha smā no dadír bhava || 10 || ásvinā píbatam mádhu dī́dyagnī sucivrata | ritúnā yajñavāhasā || 11 || gā́rhapatyena santya ritúnā yajñanī́r asi | devā́n devayaté yaja || 12 ||

(१६) षोडशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

॥३०॥ आ त्वा वहन्तु हरयो वृषणं सोमपीतये । इन्द्र त्वा सूरचक्षसः ॥१॥

16

Ā́ tvā vahantu hárayo vríshanaṁ sómapītaye | índra tvā sū́racakshasaḥ || 1 ||

May our aspirants of wealth and wisdom, equipped with hard labour and learning, entreat the Lord of universe through devotional acts and prayers for getting material and spiritual prosperity. 7

May God, the bestower of all fortunes, grant wealth of every kind, ever-given to any one. May this wealth of ours be utilized for the benefit of the divines (i. e. for the welfare of humanity and not for self-gratification). 8

May those who seek and give true wealth and wisdom be firmly established in the world and command respect in their society. May they dedicate their work to God. 9

May you be generous to us, O benefactor, the prime cause of all the creation. We adore you, and invoke. Be with us and reveal your glory to us through your splendour. 10

The twin faculties—mental and vital—are accompanied and blessed by the brilliant wisdom of God, and they work through eternal laws. May our devotional offerings to God go to enrich these divine faculties. 11

ásthād rátham savitá citrábhānuḥ kṛishṇá rájāṅsi távishīṃ dádhānaḥ || 4 || ví jánāñ chyāváḥ ṣitipádo akhyan rátham híraṇyapraügaṃ váhantaḥ | ṣáṣvad víṣaḥ savitúr daívyasyopásthe víṣvā bhúvanāni tasthuḥ || 5 || tisró dyávaḥ savitúr dvá upásthāñ ékā yamásya bhúvane virāsháṭ | āṇíṃ ná ráthyam amṛítádhi tasthur ihá bravītu yá u tác cíketat || 6 ||

॥७॥ वि सुपर्णो अन्तरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः ।
क्वे३दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥७॥
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥८॥
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥९॥

ví suparṇó antárikshāṇy akhyad gabhīrávepā ásuraḥ sunītháḥ | kvèdánīṃ sū́ryaḥ káṣ ciketa katamáṃ dyáṃ raṣmír asyá tatāna || 7 || ashṭaú vy ákhyat kakúbhaḥ pṛithivyás trí dhánva yójanā saptá síndhūn | hiraṇyāksháḥ savitá devá ágād dádhad rátnā dāṣúshe vá́ryāṇi || 8 || híraṇyapāṇiḥ savitá vícarshaṇir ubhé dyávāpṛithiví antár īyate | ápámīvām bádhate véti sū́ryam abhí kṛishṇéna rájasā dyám ṛiṇoti || 9 ||

The many-rayed effulgent sun, having power to dispel darkness from the regions, comes mounted on a lofty, high-standing, well-decorated golden chariot, and furnished with golden yokes. 4

White beams,swift like the white-footed coursers, harnessed to the car with a golden yoke, have brought light to mankind. Men and all regions are ever in the close presence of this effulgent sun. 5

Three are the luminaries—two (terrestrial and celestial) are in the proximity of the effulgent sun, and the third one somewhere beyond the space for the liberated souls. These first two luminaries depend on the sun as a chariot upon the pin of its axle. Let him who knows (this truth) declare it (to others). 6

The solar ray illuminates the three regions (celestial, interspace and terrestrial), is deep-quivering, life-bestowing and is well-directed. Where now is the sun, the source of these radiations ? Who knows to what sphere his rays have extended ? 7

He (the sun) has lighted up the eight points of the horizon (east, north, west, south, and the four at corners), the three regions of the living beings, the seven galaxies. May the golden-eyed sun come hither. May he bestow worthy riches on the Nature's lover. 8

The gold-handed, all-beholding luminary travels between the two regions of heaven and earth, dispels diseases, and this, verily, is known as the sun, and it finally overspreads the sky, extending from the dark interspace to the celestial region. 9

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥१०॥
ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥११॥

híraṇyahasto ásuraḥ sunīthāḥ sumrilīkáḥ svávāñ yātv arvāñ | apasédhan rakshaso yātudhánān ásthād deváḥ pratidosháṃ griṇānáḥ || 10 || yé te pánthāḥ savitaḥ pūrvyáso 'reṇávaḥ súkritā antárikshe | tébhir no adyá pathíbhiḥ sugébhī ráksha ca no ádhi ca brūhi deva || 11 ||

[अथाष्टमोऽनुवाकः ॥] (३६) षट्त्रिंशं सूक्तम्

(१–२०) विंशत्यृचस्यास्य सूक्तस्य घौरः कण्व ऋषिः । (१–२०) प्रथमादिविंशत्यृचामग्निः, (१३–१४) त्रयोदशीचतुर्दश्योर्यूपो वा देवता । प्रगाथः (विषमर्चा बृहती, समर्चा सतोबृहती) छन्दः ॥

॥८॥ प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईळते ॥१॥
जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते ।
स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य ॥२॥
प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् ।
महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥३॥

36.

Prá vo yahvám purūṇáṃ viśáṃ devayatīnām | agníṃ sūktébhir vácobhir īmahe yáṃ sīm íd anyá īḷate || 1 || jánāso agníṃ dadhire sahovrídhaṃ havíshmanto vidhema te | sá tváṃ no adyá sumánā ihávitá bhávā vájeshu santya || 2 || prá tvā dūtáṃ vriṇīmahe hótāraṃ viśvávedasam | mahás te sató ví caranty arcáyo diví spriśanti bhānávaḥ || 3 ||

May the golden-handed, life-bestowing, well-guiding, exhilarating, and affluent sun be present with us at the place of worship. The solar radiations drive away worms and germs, particularly in the evening, if duly utilized. 10

O sun, your paths are set from olden days; they are free from dust, and well-determined in space. May you travel along these paths, unobstructed and preserve us day-to-day. O effulgent, may you bless us. 11

36

We implore with sacred hymns the adorable God, whom the sages who desire to lead divine life, have been worshipping from time immemorial, for the fulfilment of noble desires. 1

Men with dedication have recourse to the adorable God, the augmenter of vigour. We offer homage with reverence to you. O God, the liberal giver of food, be well-disposed to us here this day, and be our protector. 2

We adopt you, O adorable, as the messenger, and as an invoker of Nature's bounties; you are endowed with knowledge. Your flames, which are eternal and mighty, spread wide around, and your splendour touches the celestial regions. 3

देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते ।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥४॥
मन्द्रो होता गृहपतिरग्ने दूतो विशामसि ।
त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥५॥

devā́sas tvā váruṇo mitró aryamā́ sáṃ dūtám pratnám indhate | víṣvaṃ só agne jayati tváyā dhánaṃ yás te dadā́ṣa mártyaḥ || 4 || mandró hótā grihápatir ágne dūtó viṣā́m **asi** | tvé víṣvā sáṃgatāni vratā́ dhruvā́ yā́ni devā́ ákriṇvata || 5 ||

॥१०॥

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥६॥
तं घेमित्था नमस्विन उप स्वराजमासते ।
होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः ॥७॥
घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे ।
भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु ॥८॥
सं सीदस्व महाँ असि शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥९॥

tvé íd agne subhárge yavishṭhya víṣvam ā́ hūyate havíḥ | sá tvám no adyá sumánā utāparáṃ yákshi devā́n suvíryā || 6 || táṃ ghem itthā́ namasvína úpa svarā́jam āsate | hótrābhir agním mánushaḥ sám indhate titirvā́ṅso áti srídhaḥ || 7 || ghnánto vritrám ataran ródasī apá urú kshā́yāya cakrire | bhúvat káṇve vrísha dyumny ā́hutaḥ krándad áṣvo gávishṭishu || 8 || sáṃ sīdasva mahā́ñ asi ṣócasva devavítamaḥ | ví dhūmám agne arushám miyedhya srijá prasasta darṣatám || 9 ||

Nature's bounties as clouds, lightning and the sun kindle thee, O fire-divine, as their ancient messenger. The mortal man, who offers oblations to you, fire-divine, obtains from you universal wealth. 4

You, the fire-divine, are, the giver of delight, the invoker and messenger of Nature's bounties and our guardian in every home. The good and durable activities of Nature's bounties are all aggregated in you. 5

O youthful and auspicious fire (of the altar), whatever oblations are offered to you, may you, now or at any other time, carry them to the Nature's bounties (and disperse them thus on the surroundings far and wide). 6

All the earnest devotees, bright with your radiance, draw near you only, O the fire-divine. They with their devotional hymns enkindle you to win over the evil forces. 7

Under the command of the fire-within, the nature's bounties have destroyed the inner evil and made all regions, physical, mental and spiritual, worthy of stay of sublime ideas. May the fire-within, when invoked, be a benefactor to the intellect as the horse neighing in the midst of conflict for the recovery of cattle. 8

Come, O fire-within, be seated in the innermost chamber of our heart. O fire-within, let the smoke of ill-thoughts be dispersed, to enable us to see your spotless spiritual radiance. 9

यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥१०॥

yáṃ tvā devā́so mánave dadhúr ihá yáji-shṭhaṃ havyavāhana | yáṃ káṇvo médhyātithir dhanaspṛ́taṃ yáṃ vṛ́shā yám upastutáḥ || 10 ||

॥१०॥ यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ।
तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥११॥
रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम् ।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥१२॥
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥१३॥
ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह ।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः ॥१४॥
पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य ॥१५॥

yám agním médhyātithiḥ káṇva īdhá ṛtā́d ádhi | tásya présho dīdiyus tám imā́ ṛ́cas tám agníṃ vardhayāmasi || 11 || rāyás pūrdhi svadhāvó 'sti hí té 'gne devéshv ā́pyam | tváṃ vā́jasya śrútyasya rājasi sá no mṛḷa mahā́ñ asi || 12 || ūrdhvá ū shú ṇa ūtáye tíshṭhā devó ná savitā́ | ūrdhvó vā́jasya sánitā yád añjíbhir vāghádbhir vihváyāmahe || 13 || ūrdhvó naḥ pāhy áṅhaso ní ketúnā víśvaṃ sám atríṇaṃ daha | kṛdhí na ūrdhvā́ñ carátʰāya jīváse vidā́ devéshu no dúvaḥ || 14 || pāhí no agne rakshásaḥ pāhí dhūrtér árāvṇaḥ | pāhí ríshata utá vā jíghāṅsato bṛ́hadbhāno yávishṭhya || 15 ||

O disperser of the essences of oblations, Nature's bounties have accepted your supremacy for the benefit of man. Your supremacy has also been accepted by the performer of ceremony, the intelligent, and wealth-giver, the host of the guests, and your supremacy has also been accepted by other persons, powerful and pious, present in this fire ceremony. 10

The rays of that fire-within, whom mind has kindled having taken it out of truth pre-eminently shine. Him do these our hymns extol and him do we extol. 11

Bless us for prosperity and treasures, O fire-within, as the favour of Nature's bounties is acquired only through your devotion. All the sources capable of providing well-known nourishment work under your command. May we obtain happiness, for you are great. 12

Be up to protect us, like the sun capable of healing; please rise: you are the giver of food and we invoke you with devotion and earnestness. 13

Be up and may your knowledge protect us from the wrath of sin; consume every malignant spirit; raise us aloft to spiritual heights, so that we may pass through the world, and that we may live to convey our wealth (of oblations) to Nature's bounties. 14

Youthful and most resplendent fire-within, protect us from evil forces, and from the miserly malevolence within; protect us from ferocious animal instincts and from them who seek to destroy us. 15

११॥ घनेव विष्वग्वि जह्यराव्णस्तपुर्जम्भ यो अस्मध्रुक् ।
यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥१६॥
अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगम् ।
अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः साता उपस्तुतम् ॥१७॥
अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ॥१८॥
नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥१९॥
त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये ।
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ॥२०॥

ghanéva víshvag ví jahy árāvṇas tápurjambha yó asmadhrúk | yó mártyaḥ śíśīte áty aktúbhir mā́ naḥ sá ripúr īśata || 16 || agnír vavne suvī́ryam agníḥ káṇvāya saúbhagam | agníḥ prā́van mitrótá médhyātithim agníḥ sātā́ upastutám || 17 || agnínā turváśaṃ yáduṃ parāváta ugrā́devaṃ havāmahe | agnír nayan návavāstvam bṛihádrathaṃ turvī́tiṃ dásyave sáhaḥ || 18 || ní tvā́m agne mánur dadhe jyótir jánāya śáśvate | dīdétha káṇva ṛitájāta ukshitó yáṃ namasyánti kṛishṭáyaḥ || 19 || tveshā́so agnér ámavanto arcáyo bhīmā́so ná prátītaye | rakshasvínaḥ sádam íd yātumā́vato víśvaṃ sám atríṇaṃ daha || 20 ||

(३७) सप्तत्रिंशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य घौरः कण्व ऋषिः । मरुतो देवताः । गायत्री छन्दः ॥

॥१२॥ क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम् । कण्वा अभि प्र गायत ॥१॥
ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः । अजायन्त स्वभानवः ॥२॥

37

Krīḷáṃ vaḥ śárdho mā́rutam anarváṇaṃ rathesúbham | káṇvā abhí prá gāyata || 1 || yé pṛ́ishatībhir ṛishṭíbhiḥ sākáṃ vā́śībhir añjíbhiḥ | ájāyanta svábhānavaḥ || 2 ||

O inner fire, may we, with the aid of your spiritual flame, burn our vices and selfish motives as potters' ware with a hammer; let not a single vice, which is inimical to us, or a man who tries to malign our spiritual eminence with sharp weapons, prevail upon us. 16

The fire-within is solicited for conferring prosperity. May this fire enrich our wisdom. It has protected our fellow friends and also the host of the holy, who has recourse to him for riches and wisdom. 17

Along with the fire-within, we invoke from afar glory, diligence and fearlessness. Let the fire-within, also carry with it the progressiveness, leadership and vigour, to subdue the foe (the evil desires). 18

O fire-within, mind has detained you to give light to the entire sense organs and vital systems. Born out of the eternal law and satiated with the oblations, you have been kindled for the sake of enriching wisdom, revered by our people. .19

The flames of the fire-divine are luminous, powerful, and fearful, not to be approached. You ever assuredly and entirely consume the evil spirits and other destructive forces. 20

37

Sing forth, O intellectuals among men, the praises of the vital forces, sportive, separate from the senses, and shining in the chariot of the human body. 1

These vital forces, born together are by virtue of their nature self-luminous, and are speedy like spotted deers, and penetrating like spears, destructive like swords, and glittering like ornaments. 2

इहेव शृण्व एषां कशा हस्तेषु यद्वदान् । नि यामञ्चित्रमृञ्जते ॥३॥
प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे । देवत्तं ब्रह्म गायत ॥४॥
प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतम् । जम्भे रसस्य वावृधे ॥५॥

ihéva
srinva eshām kásā hásteshu yád vádān | ní yā́mañ citrám
riñjate || 3 || prá vaḥ sárdhāya ghríshvaye tveshádyumnāya
sushmíṇe | devắttam bráhma gāyata || 4 || prá saṅsā góshv
ághnyam krīḷám yác chárdho mā́rutam | jámbhe rásasya
vāvṛidhe || 5 ||

॥१३॥ को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः । यत्सीमन्तं न धूनुथ ॥६॥
नि वो यामाय मानुषो दध्र उग्राय मन्यवे । जिहीत पर्वतो गिरिः ॥७॥
येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः । भिया यामेषु रेजते ॥८॥
स्थिरं हि जानमेषां वयो मातुर्निरेतवे । यत्सीमनु द्विता शवः ॥९॥
उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत । वाश्रा अभिज्ञु यातवे ॥१०॥

kó vo várshishṭha ā́ naro divás ca gmás ca dhūtayaḥ |
yát sīm ántam ná dhūnuthá || 6 || ní vo yā́māya mā́nusho
dadhrá ugrā́ya manyáve | jíhīta párvato giríḥ || 7 || yéshām
ájmeshu prithiví jujurvā́ñ iva vispátiḥ | bhiyā́ yā́meshu ré-
jate || 8 || sthirám hí jā́nam eshām váyo mātúr níretave |
yát sīm ánu dvitā́ sávaḥ || 9 || úd u tyé sūnávo gíraḥ kā́-
shṭhā ájmeshv atnata | vāsrā́ abhijñú yā́tave || 10 ||

We hear the cracking of the whips in the hands of our internal vital forces. They are wonderfully brave and valorous in the fight which goes on in the human body. 3

Sing forth, O wise men, the sacred hymns in honour of your vital principles who are your strength, the destroyer of evils, the powerful and possessed of brilliant reputation. 4

Praise the sportive and restless might of the vital forces, who are born in the midst of the sense-organs, and whose strength is nourished by the milk of sentient desires. 5

Which of you, O brave vital forces, O agitators of the head and heart (heaven and earth), is the mightiest, since you disturb all around like the top of a tree ? 6

O vital forces, at your approach, man bends down to your fierce and effective power and takes shelter against some firm (buttress); even the strong rugged-jointed mountains yield before your might. 7

At whose forceful attack and persistence, even the earth gets badly shaken as a weak king gets frightened by the fierce attack of an enemy. 8

Stable is the birth-place of the vital forces. Vigour they get from their mother. Their strength is spread all over between the two regions—physical and mental. 9

These vital forces are the generators of speech and they spread out the waters of thoughts in their courses, so that the kine, the sense organs, may get into the knee-deep water to drink. 10

॥१४॥ त्यं चिद्घा दीर्घं पृथुं मिहो नपातममृध्रम् । प्र च्यावयन्ति यामभिः ॥११॥
मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन । गिरीँरचुच्यवीतन ॥१२॥
यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना । शृणोति कश्चिदेषाम् ॥१३॥
प्र यात शीभमाशुभिः सन्ति कण्वेषु वो दुवः । तत्रो षु मादयाध्वै ॥१४॥
अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम् । विश्वं चिदायुर्जीवसे ॥१५॥

tyáṃ cid ghā dīrghám prithúm mihó nápātam ámridhram | prá cyāvayanti yámabhiḥ || 11 || máruto yád dha vo bálaṃ jánāñ acucyavītana | giríñr acucyavītana || 12 || yád dha yánti marútaḥ sáṃ ha bruvaté 'dhvann á | sriṇóti kás cid eshām || 13 || prá yāta síbham āsúbhiḥ sánti káṇveshu vo dúyaḥ | tátro shú mādayadhvai || 14 || ásti hí shmā mádāya vaḥ smási shmā vayám eshām | vísvaṃ cid áyur jīvásc || 15 ||

(३८) अष्टात्रिंशं सूक्तम्

(१–१५) पञ्चदशर्चस्यास्य सूक्तस्य घौरः कण्व ऋषिः । मरुतो देवताः । गायत्री छन्दः ॥

॥१५॥ कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः । दधिध्वे वृक्तबर्हिषः ॥१॥
क्व नूनं कद्वो अर्थं गन्ता दिवो न पृथिव्याः । क्व वो गावो न रण्यन्ति ॥२॥
क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता । क्वो३ विश्वानि सौभगा ॥३॥
यद्यूयं पृश्निमातरो मर्तासः स्यातन । स्तोता वो अमृतः स्यात् ॥४॥
मा वो मृगो न यवसे जरिता भूदजोष्यः । पथा यमस्य गादुप ॥५॥

38

Kád dha nūnáṃ kadhapriyaḥ pitá putráṃ ná hástayoḥ | dadhidhvé vriktabarhishaḥ || 1 || kvà nūnáṃ kád vo árthaṃ gántā divó ná prithivyáḥ | kvà vo gávo ná raṇyanti || 2 || kvà vaḥ sumná návyāṅsi márutaḥ kvà suvitá | kvò vísvāni saúbhagā || 3 || yád yūyáṃ prisnimātaro mártāsaḥ syátana | stotá vo amrítaḥ syāt || 4 || má vo mrigó ná yávase jaritá bhūd ájoshyaḥ | pathá yamásya gād úpa || 5 ||

These illustrious vital powers drive before them in their course the long, vast and uninjurable rain-retaining clouds (of paralyzed sensations). 11

O vital powers, assuredly you possess mighty power; you can invigorate men; you can even animate rocks. 12

Wherever the vital powers operate, there is activity and clamour. Does any one hear them, when they speak ? 13

Come, O vital powers, with your swift and quick movements; intellectuals are ready to welcome you with their offerings; be pleased with them. 14

These offerings of noble deeds and thoughts are for your gratification. We are yours, that we may live our life in full. 15

38

O vital powers, fond of praise and always associated with our noble actions, when will you embrace us with both hands as a father his son? 1

Where indeed are you going and with what object? May you go up and high but not away from us. Which is the place where your glory is not sung? 2

O vital powers, may we know where are your newest favours shown? Where does your prosperity exist? Where are all your high felicities? 3

O vital powers, we know you are of divine origin (you are the sons of mother earth), but are now associated with mortals. May your admirers be immortal. 4

May your faithful devotee be never unwelcome to you, as a deer is never unwelcome in pasture, so that your devotee may not have fear of death. 5

॥१६॥ मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत् । पदीष्ट तृष्णया सह ॥६॥
सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः । मिहं कृण्वन्त्यवाताम् ॥७॥
वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ॥८॥
दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन । यत्पृथिवीं व्युन्दन्ति ॥९॥
अध स्वनान्मरुतां विश्वमा सद्म पार्थिवम् । अरेजन्त प्र मानुषाः ॥१०॥

mó shú naḥ párā-parā nírṛitir durhánā vadhīt | padīshṭá tríshṇayā sahá || 6 || satyáṃ tveshá ámavanto dhánvañ cid á rudríyāsaḥ | míhaṃ kriṇvanty avātám || 7 || vāṣréva vidyún mimāti vatsáṃ ná mātá sishakti | yád eshāṃ vrishṭír ásarji || 8 || dívā cit támaḥ kriṇvanti parjányenodavāhéna | yát pṛithivíṃ vyundánti || 9 || ádha svanán marútāṃ víṣvam á sádma párthivam | árejanta prá mánushāḥ || 10 ||

॥१७॥ मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु । यातेमखिद्रयामभिः ॥११॥
स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम् । सुसंस्कृता अभीशवः ॥१२॥
अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम् । अग्निं मित्रं न दर्शतम् ॥१३॥
मिमीहि श्लोकमास्ये पर्जन्य इव ततनः । गाय गायत्रमुक्थ्यम् ॥१४॥
वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम् । अस्मे वृद्धा असन्निह ॥१५॥

máruto vīḷupāṇíbhiṣ citrá ródhasvatīr ánu | yātém ákhidrayāmabhiḥ || 11 || sthirá vaḥ santu nemáyo ráthā áṣvāsa eshām | súsaṃskṛitā abhíṣavaḥ || 12 || áchā vadā tánā girá jaráyai bráhmaṇas pátim | agníṃ mitráṃ ná darṣatám || 13 || mimīhí ṣlókam āsyè parjánya iva tatanaḥ | gáya gāyatráṃ ukthyàm || 14 || vándasva márutaṃ gaṇáṃ tveshám panasyúm arkíṇam | asmé vṛiddhá asann ihá || 15 ||

Let not the most powerful and wicked evil impulses destroy us; let these malignant impulses die along with our evil desires. 6

Truly the bright, fierce and vigorous vital forces, cherished by the cosmic power, send down the rain on the inner realm like clouds raining without the aid of wind upon the desert. 7

The lightning in the inner realm reverbrates like a parent cow with full udder to feed her calf, and the rain of the inner realm is set free by the vital forces. 8

When they (vital powers) pour water, and inundate the earth of the inner realm, they spread forth gloom even in the day time, with water-laden clouds. 9

At the roar of vital forces, the lower impulses of man are shaken up; even the full set-up of the human complex trembles. 10

O vital powers, come with strong force and make the beautifully embanked rivers of life swift and speedy and unhindered. 11

May the fellies of your wheels (nerve-centres), may the car (body) and horses (sense-organs), and your fingers (your controls) be steady and disciplined. 12

May we glorify the adorable Lord, the supreme head of knowledge and who is affectionate to us like a praiseworthy friend, in complimentary terms, with the eternal, sacred hymns of the Vedas. 13

May you sing glory in your own voice, spread it out like a raining cloud; and chant through the sacred hymns of the Vedas. 14

Narrate the wonders of the glory of the vital forces that are bright, adorable and reverent. May they be exalted by our praises. 15

(३९) एकोनचत्वारिंशं सूक्तम्

(१–१०) दशर्चस्यास्य सूक्तस्य घौरः कण्व ऋषिः । मरुतो देवताः । प्रगाथः (विषमर्चा बृहती, समर्चा सतोबृहती) छन्दः ॥

॥१८॥

प्र यदि॒त्था प॑रा॒वतः॑ शो॒चिर्न मान॒मस्य॑थ ।
कस्य॒ क्रत्वा॑ मरुतः॒ कस्य॒ वर्प॑सा॒ कं या॑थ॒ कं ह॑ धूतयः ॥१॥
स्थि॒रा वः॑ स॒न्त्वायु॑धा परा॒णुदे॑ वी॒ळू उ॒त प्र॑ति॒ष्कभे॑ ।
यु॒ष्माक॑मस्तु॒ तवि॑षी॒ पनी॑यसी॒ मा मर्त्य॑स्य मा॒यिनः॑ ॥२॥
परा॑ ह॒ यत्स्थि॒रं ह॒थ नरो॑ व॒र्तय॑था गु॒रु ।
वि या॑थन व॒निनः॑ पृथि॒व्या व्याशाः॒ पर्व॑तानाम् ॥३॥
न॒हि वः॒ शत्रु॑र्विवि॒दे अधि॒ द्यवि॒ न भूम्यां॑ रिशादसः ।
यु॒ष्माक॑मस्तु॒ तवि॑षी॒ तना॑ यु॒जा रुद्रा॑सो॒ नू चि॑दा॒धृषे॑ ॥४॥
प्र वे॑पयन्ति॒ पर्व॑ता॒न्वि वि॑ञ्चन्ति॒ वन॒स्पती॑न् ।
प्रो आ॑रत मरुतो दु॒र्मदा॑ इव॒ देवा॑सः॒ सर्व॑या वि॒शा ॥५॥

39

Prá yád itthá parāvátaḥ socír ná mánam ásyatha | kásya krátvā marutaḥ kásya várpasā kám yatha kám ha dhūtayaḥ || 1 || sthirá vaḥ santv áyudhā paraṇúde vīḷú utá pratishkábhe | yushmákam astu távishī pánīyasī má mártyasya mayínaḥ || 2 || pára ha yát sthirám hathá náro vartáyatha gurú | ví yāthana vanínaḥ prithivyá vy áṣaḥ párvatanam || 3 || nahí vaḥ ṣátrur vividé ádhi dyávi ná bhúmyām risādasaḥ | yushmákam astu távishī tánā yujá rúdraso nú cid adhríshe || 4 || prá vepayanti párvatān ví viñcanti vánaspátīn | pró ārata maruto durmádā iva dévāsaḥ sárvayā visá || 5 ||

॥१९॥

उपो॒ रथे॑षु॒ पृष॑तीरयुग्ध्वं॒ प्रष्टि॑र्वहति॒ रोहि॑तः ।
आ वो॒ यामा॑य पृथि॒वी चि॑दश्रो॒दबी॑भयन्त॒ मानु॑षाः ॥६॥

úpo ráthesho príshatīr ayugdhvam práshṭir vahati róhitaḥ | á vo yámāya prithiví cid aṣrod ábībhayanta mánushāḥ || 6 ||

39

The cosmic vital powers come from afar, with the speed of light, awful vigour and shaking up everything. By whose endeavour? With whose blessings? To what place? For which purpose? 1

May your forces be strong and steady and firm for resisting and driving away the evils. May your might be admirable and beneficial and not destructive like that of a wicked one. 2

Powerful cosmic vital forces demolish what is stable, scatter what is ponderous, and make way through forests of earths and through the fissures of mountains. 3

You are the destroyer of foes; no adversary of yours is known either in the highest regions nor any on the earth. May your collected strength be quickly exerted, make your opponents weep and may you overcome your enemies O sons of the supreme Lord of vitality. 4

They make the mountains tremble, and shatter the forest-trees. Onward, O cosmic vital forces, proceed on with all your company, whither you will, and fight with evils as if intoxicated with vigour. 5

In order that your chariots may travel everywhere, you have harnessed in your wheels the fast revolving axle, as if it were a spotted-deer. Its resounding noise is heard on the earth, making every one tremble. 6

आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे ।
गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥७॥
युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते ।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥८॥
असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।
असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ॥९॥
असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम् ॥१०॥

á vo makshú tánāya káṃ rúdrā ávo vṛiṇīmahe | gántā nūnáṃ nó 'vasā yáthā purétthā káṇvāya bibhyúshe || 7 || yushméshito maruto mártyeshita ā́ yó no ábhva íshate | ví táṃ yuyota ṣávasā vy ójasā ví yushmákābhir ūtíbhiḥ || 8 || ásāmi hí prayajyavaḥ káṇvaṃ dadá praeetasaḥ | ásāmibhir maruta ā́ na ūtíbhir gántā vṛishṭíṃ ná vidyútaḥ || 9 || ásāmy ójo bibhṛithā sudānavó 'sāmi dhūtayaḥ ṣávaḥ | ṛishidvíshe marutaḥ parimanyáva íshuṃ ná sṛijata dvísham || 10 ||

(४०) चत्वारिंशं सूक्तम्

(१–८) अष्टर्चस्यास्य सूक्तस्य घौरः कण्व ऋषिः । ब्रह्मणस्पतिर्देवता । प्रगाथः (विषमर्चां बृहती, समर्चां सतोबृहती) छन्दः ॥

॥२०॥

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥१॥
त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते ।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥२॥

40

Út tishṭha brahmaṇas pate devayántas tvemahe | úpa prá yantu marútaḥ sudánava índra prāṣū́r bhavā sáeā || 1 || tvā́m íd dhí sahasas putra mártya upabrūté dháne hité | suvī́ryam maruta ā́ sváṣvyaṃ dádhīta yó va āeaké || 2 ||

O cosmic vital powers, we implore you for help and protection for the good of our posterity. Come instantly to protect us and to enlighten our frustrated men of intellect, as you have always been coming and doing. 7

In case a wicked adversary, instigated by any person assails us, withhold, from him nourishment, strength, and your assistance. 8

O most adorable and vigorous vital powers, you are constant supporters of highest wisdom; come to us with your all protective forces as the lightning flashes in the dark raining clouds. 9

O vital forces, commanded by the supreme Lord, you are the bounteous givers; you enjoy unlimited vigour. You possess undiminished strength. May you loose your punishing vigour, like an arrow, upon the furious destructive evils working against the seers and devotees. 10

40

Rise up, O high preceptor; we, your devotees solicit your nearness to us. May the charitable vital forces come to our help. May our resplendent God be eager to accept our devotional offerings. 1

We mortals invoke you for abundant wealth and wisdom. May the vital powers grant affluence to earnest devotees and give them eminent vigour and valour. 2

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥३॥
यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः ।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ॥४॥
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥५॥

praítu bráhmaṇas pátiḥ prá devy ètu sūnṛ́tā | áchā vīrám náryam paṅktírādhasaṃ devā́ yajñáṃ nayantu naḥ || 3 || yó vāghátc dádāti sūnáraṃ vásu sá dhatte ákshiti ṣrávaḥ | tásma íḷāṃ suvī́rām ā́ yajāmahe suprátūrtim anehásam || 4 || prá nūnám bráhmaṇas pátir mántraṃ vadaty ukthyàm | yásminn índro váruṇo mitró aryamā́ devā́ ókāṅsi cakriré || 5 ||

॥२१॥

तमिद्वोचेमा विदथेषु शंभुवं मन्त्रं देवा अनेहसम् ।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ॥६॥
को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम् ।
प्रप्र दाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयं दधे ॥७॥
उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ॥८॥

tám íd vocemā vidátheshu ṣambhúvam mántram devā anehásam | imā́ṃ ca vā́cam pratiháryathā naro víṣvéd vāmā́ vo aṣnavat || 6 || kó devayántam aṣnavaj jánaṃ kó vṛiktábarhisham | prá-pra dāṣvā́n pastyā̀bhir asthitāntarvā́vat ksháyaṃ dadhe || 7 || upa kshatrám pṛiñcītá hánti rā́jabhir bhayé cit sukshitíṃ dadhe | nā́sya vartā́ ná tarutā́ mahādhané nā́rbhe asti vajríṇaḥ || 8 ||

May the high preceptor come to us. May brilliant divine virtues come to us. May Nature's bounties lead us to glory and drive away every adversary, and help us in the cause, beneficial to man, and measures leading to respectable prosperity. 3

He, who gives nice presents to learned persons, wins undecaying fame. For him we invoke divine wisdom, the embodiment of virtues, to give us unconquerable strength, capable of inflicting injury (to our adversaries), whilst receiving none (from their side). 4

Verily, the high preceptor proclaims the sacred prayer in which the resplendent Lord along with Nature's bounties as clouds, lightning, dawn, and the sun, all of them have a respectable reference. 5

Let us recite the felicitous and faultless prayers at our sacred performances with references to Nature's bounties. Assuredly this prayer spoken with earnest devotions will be accepted by God and will have a generous response. 6

Who (except the high preceptor) could lead the person of devotion on the right path; who, except him, could arrange for the ritualistic details as spreading of the sacred grass? The performer of the sacred acts has proceeded with his assistants to dwellings well stocked with all precious things. 7

May the high preceptor concentrate his strength, shine with his splendour, and with his strength destory all evils. None can subjugate this person of powerful will. Since he has no encourager, nor a discourager, he firmly holds his principles while surrounded by conflicting struggles of life, big or small. 8

(४१) एकचत्वारिंशं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य घौरः कण्व ऋषिः । (१–३, ७–९) प्रथमान्तिमतृचयोर्वरुणमित्रार्यमणः,
(४–६) द्वितीयतृचस्य चादित्या देवताः । गायत्री छन्दः ॥

॥२२॥ यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा । नू चित्स दभ्यते जनः ॥१॥
यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः । अरिष्टः सर्व एधते ॥२॥
वि दुर्गा वि द्विषः पुरो घ्नन्ति राजान एषाम् । नयन्ति दुरिता तिरः ॥३॥
सुगः पन्था अनृक्षर आदित्यास ऋतं यते । नात्रावखादो अस्ति वः ॥४॥
यं यज्ञं नयथा नर आदित्या ऋजुना पथा । प्र वः स धीतये नशत् ॥५॥

41

Yáṃ rákshanti prácetaso váruṇo mitró aryamā́ | nū́ cit sá dabhyate jánaḥ || 1 || yám bāhúteva píprati pā́nti mártyaṃ rishā́ḥ | árishṭaḥ sárva edhate || 2 || ví durgā́ ví dvíshaḥ puró ghnánti rā́jāna eshām | náyanti duritā́ tiráḥ || 3 || sugáḥ pánthā anrikshará ā́dityāsa ṛitáṃ yaté | nā́trāvakhādó asti vaḥ || 4 || yáṃ yajñáṃ náyathā nara ā́dityā ṛijúnā pathā́ | prá vaḥ sá dhītáye naṣat || 5 ||

॥२३॥ स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना । अच्छा गच्छत्यस्तृतः ॥६॥
कथा राधाम सखायः स्तोमं मित्रस्यार्यम्णः । महि प्सरो वरुणस्य ॥७॥
मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम् । सुम्नैरिद्व आ विवासे ॥८॥
चतुरश्चिद्ददमानाद्बिभीयादा निधातोः । न दुरुक्ताय स्पृहयेत ॥९॥

sá rátnam mártyo vásu víṣvaṃ tokám utá tmánā | áchā gachaty ástṛitaḥ || 6 || kathā́ rādhāma sakhāya stómam mitrásyāryamṇáḥ | máhi psáro váruṇasya || 7 || mā́ vo ghnántam mā́ ṣápantam práti voce devayántam | sumnaír íd va ā́ vivāse || 8 || catúras cid dádamānād bibhīyā́d ā́ nídhātoḥ | ná duruktā́ya sprihayet || 9 ||

41

Never is he suppressed whom the wise heads of the state, surveyor and law-giver offer protection. 1

The man gets prosperous whom such persons take in their own arms, and whom they defend from the malignant. He overcomes all obstructions. 2

These officials and head of the state destroy strongholds of the enemies, and drive them away, and provide people with shelter against their evils and injuries. 3

O learned teachers and seers, now your path becomes easy and thornless for your intellectual pursuits. No pitfalls would now come on your way. 4

O learneds and seers, any noble action, which you perform in honest and straighforward way, will never meet failure. 5

A virtuous man is never vanquished. He easily gains the best treasures of the world. He is also rewarded with an offspring like himself. 6

How, my friends, shall we express our gratitude in laudable terms for the assistance we have received from officials, heads of the state and law-givers? 7

Never would I retaliate against him who assails or reviles the person devoted to righteousness. I shall rather invoke God to bless him with right understanding, so that he may also prosper. 8

May we not speak in abusive language, and may we refrain from the person who opposes the person favoured by the four (wisdom, force, wealth and health). 9

(४२) द्विचत्वारिंशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य घौरः कण्व ऋषिः । पूषा देवता । गायत्री छन्दः ॥

॥२४॥ सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात् । सक्ष्वा देव प्र णस्पुरः ॥१॥
यो नः पूषन्नघो वृको दुःशेव आदिदेशति । अप स्म तं पथो जहि ॥२॥
अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम् । दूरमधि स्रुतेरज ॥३॥
त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित् । पदाभि तिष्ठ तपुषिम् ॥४॥
आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे । येन पितॄनचोदयः ॥५॥

42

Sám pūshann ádhvanas tira vy áṅho vimuco napāt | sákshvā deva prá ṇas puráh || 1 || yó naḥ pūshann aghó vṛíko duḥṣéva ādídeṣati | ápa sma tám pathó jahi || 2 || ápa tyám paripanthínam mushīvánam huraseítam | dūrám ádhi srutér aja || 3 || tvám tásya dvayāvíno 'ghásaṅsasya kásya cit | padābhí tishṭha tápushim || 4 || á tát te dasra mantumaḥ pūshann ávo vṛiṇīmahe | yéna pitṛín ácodayaḥ || 5 ||

॥२५॥ अधा नो विश्वसौभग हिरण्यवाशीमत्तम । धनानि सुषणा कृधि ॥६॥
अति नः सश्चतो नय सुगा नः सुपथा कृणु । पूषन्निह क्रतुं विदः ॥७॥
अभि सूयवसं नय न नवज्वारो अध्वने । पूषन्निह क्रतुं विदः ॥८॥
शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम् । पूषन्निह क्रतुं विदः ॥९॥
न पूषणं मेथामसि सूक्तैरभि गृणीमसि । वसूनि दस्ममीमहे ॥१०॥

ádhā no viṣvasaubhaga híraṇyavāṣīmattama | dhánāni susháṇā kṛidhi || 6 || áti naḥ saṣcáto naya sugá naḥ supáthā kṛiṇu | púshann ihá krátuṃ vidaḥ || 7 || abhí sūyávasaṃ naya ná navajvāró ádhvane | pū° || 8 || ṣagdhí pūrdhí prá yaṅsi ca ṣiṣīhí prásy udáram | pū° || 9 || ná pūsháṇam methāmasi sūktaír abhí gṛiṇīmasi | vásūni dasmám īmahe || 10 ||

42

O God, the nourisher, liberate us from our bondage, take us across the troubles and miseries, and be our leader to guide us. 1

O nourisher, drive away from our path the enemies who are sinful, cruel and the deceitful. 2

Keep away from our path the men who are robbers, cheats and exploiters, and punish them. 3

Let the persons of dubious character and pilferers be trampled down and crushed by your punishment. 4

O nourisher, sagacious and wise, we solicit from you that protection which you have been bestowing upon our noble ancestors. 5

O mighty God, bestower of universal prosperity, possessor of all shining riches, bestow upon us riches that may be liberally distributed. 6

Lead us past all obstructions; conduct us by pleasant path easy to tread, and O nourisher, you know best how you would. 7

Lead us where there is abundant nourishment. Let there be no extreme conflicts; O nourisher, you know best how you would. 8

Be gracious to us. Fill us with full; give us, invigorate and feed. O nourisher, you know best how you would. 9

No comments have we against our Lord, the nourisher. We magnify the nourisher with our songs of praises. We solicit the mighty good-looking one for prosperity. 10

(४३) त्रिचत्वारिंशं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य घौरः कण्व ऋषिः । (१–२. ४–६) प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्यादितृचस्य च रुद्रः, (३) तृतीयाया रुद्रो मित्रावरुणौ च, (७–९) सप्तम्यादितृचस्य च सोमो देवताः । (१–८) प्रथमाद्यष्टर्चां गायत्री, (९) नवम्याश्चानुष्टुप् छन्दसी ॥

॥२६॥ कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे । वोचेम शंतमं हृदे ॥१॥
यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ॥२॥
यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ॥३॥
गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छंयोः सुम्नमीमहे ॥४॥
यः शुक्र इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठो देवानां वसुः ॥५॥

43

Kád rudráya prácetase mīḷhúshṭamāya távyase | vocéma ṣáṃtamam hridé || 1 || yáthā no áditiḥ kárat páṣve nríbhyo yáthā gáve | yáthā tokáya rudríyam || 2 || yáthā no mitró váruṇo yáthā rudráṣ cíketati | yáthā víṣve sajóshasaḥ || 3 || gāthápatim medhápatim rudrám jálāshabheshajam | tác chaṃyóḥ sumnám īmahe || 4 || yáḥ ṣukrá iva sū́ryo híraṇyam iva rócate | ṣréshṭho devā́nāṃ vásuḥ || 5 ||

॥२७॥ शं नः करत्यर्वते सुगं मेषाय मेष्ये । नृभ्यो नारिभ्यो गवे ॥६॥
अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ॥७॥
मा नः सोमपरिबाधो मारातयो जुहुरन्त । आ न इन्दो वाजे भज ॥८॥
यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य ।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥९॥

ṣáṃ naḥ karaty árvate sugám meshā́ya meshyè | nríbhyo nā́ribhyo gáve || 6 || asmé soma ṣríyam ádhi ní dhehi ṣatásya nriṇā́m | máhi ṣrávas tuvinrimṇám || 7 || mā́ naḥ somaparibā́dho mā́rātayo juhuranta | ā́ na indo vā́je bhaja || 8 || yā́s te prajā́ amrítasya párasmin dhā́mann ritásya | mūrdhā́ nā́bhā soma vena ābhū́shantīḥ soma vedaḥ || 9 ||

43

When and what hymn shall we sing in devotion to the omniscient, liberal, powerful Lord of terror and destruction, dearest to our hearts ? 1

By which earth may be made to grant the gifts of the Lord to our cattle, our people, our cows, and our children. 2

By which lightning and clouds, assisted by the Lord of terror and destruction and the Nature's other bounties, being gratified, may shower favour. 3

We invoke the Lord of terror, the protector of sacred act, the encourager of hymns, and possessor of medicaments to confer joy of emancipation, and happiness. 4

He is refulgent as the sun, who is bright as gold and who presides over all the Nature's bounties, providing habitations. 5

He bestows happiness with ease upon our horses, our rams, our ewes, on men and women, and on the cows. 6

O gracious, God, grant us glory of a hundred men, and fame of mighty chiefs. 7

Let not the unbelievers in God, nor those, who are non-generous, harass us. O loving Lord, cherish us with strength. 8

O gracious God, occupying an excellent superb home, may you have kindest regards for your law-abiding immortal children, who hold you in their highest esteem, and may they prosper in their homes. 9

[अथ नवमोऽनुवाकः ॥] (४४) चतुश्चत्वारिंशं सूक्तम्

(१-१४) चतुर्दशर्चस्यास्य सूक्तस्य काण्वः प्रस्कण्व ऋषिः । (१-२) प्रथमाद्वितीययोर्ऋचोरग्निरश्विनावुषाश्च, (३-१४) तृतीयादिद्वादशानाञ्चाग्निर्देवताः । प्रगाथः (विषमर्चा बृहती, समर्चा सतोबृहती) छन्दः ॥

॥२८॥ अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥१॥
जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम् ।
सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥२॥
अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियम् ।
धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम् ॥३॥

44

Ágne vívasvad ushásaṣ citrám rádho amartya | á dāṣúshe jātavedo vahā tvám adyá deváñ usharbúdhaḥ || 1 || júshṭo hí dūtó ási havyaváhanó 'gne rathír adhvaráṇām | sajúr aṣvíbhyām ushásā suvíryam asmé dhehi ṣrávo bṛihát || 2 || adyá dūtám vṛiṇīmahe vásum agním purupriyám | dhūmáketum bhárijīkam vyùshṭishu yajñánām adhvaraṣríyam || 3 ||

श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे ।
देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु ॥४॥
स्तविष्यामि त्वामहं विश्वस्यामृत भोजन ।
अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥५॥
॥२९॥ सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः ।
प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥६॥

ṣréshṭham yávishṭham átithim sváhutam júshṭam jánāya dāṣúshe | deváñ áchā yátave jātávedasam agním īḷe vyùshṭishu || 4 || stavishyámi tvám ahám víṣvasyāmṛita bhojana | ágne trātáram amṛítam miyedhya yájishṭham havyavāhana || 5 ||

suṣáñso bodhi gṛiṇaté yavishṭhya mádhujihvaḥ sváhutaḥ | práskaṇvasya pratiránn áyur jīváse namasyá daívyam jánam || 6 ||

44

O adorable God, you have perfect knowledge of every thing manifested or obscure; may the intellect of your devotees get new light with the coming of every dawn in the morning; may you also bring to this place all the Nature's bounties, awaking with the morning dawn. 1

You are accepter of offerings and loved messenger of Nature's bounties and inspirer of noble performances. Associated with dawn and the pair of vigour and wisdom, grant us invigorating abundant food. 2

We invoke supreme God, the messenger of Nature's bounties and giver of life comforts. We love you, O Lord, with all our heart. You are the precursor of enlightenment, the light shedding. You preserve the sacred performances of your devotees all the time, be it dawn or dusk. 3

I glorify the all pervading God at every break of day, who is the best and youngest, adorable like a guest, and supreme master of the universe. He is friendly to the men dedicated to his service. Nothing is unknown to Him which happens in the world. I invoke him so that He brings to us Nature's other bounties. 4

O immortal God, adorable, sustainer of the universe, accepter of offerings, all pure, I will glorify you and you only. O immortal God, I worship you only, who is protector and preserver of sacrifice, ever young and beyond death or decay. 5

O most youthful, richly worshipped, honey-tongued God, be gracious to your prayful devotees. May you grant long life to the enlightened people, and honour to the most celebrated sages. 6

होतारं विश्ववेदसं सं हि त्वा विश इन्धते ।
स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥७॥
सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः ।
कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ॥८॥
पतिर्ह्यध्वराणामग्ने दूतो विशामसि ।
उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ॥९॥
अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः ।
असि ग्रामेष्ववितां पुरोहितोऽसि यज्ञेषु मानुषः ॥१०॥

hótāraṃ viṣvávedasaṃ sáṃ hí tvā víṣa indháte | sá ā́ vaha puruhūta prácetasó 'gne devā́ñ ihá dravát || 7 || savitā́ram ushásam aṣvínā bhágam agníṃ vyùshṭishu kshápaḥ | káṇvāsas tvá sutásomāsa indhate havyavā́haṃ svadhvara || 8 || pátir hy àdhvarā́ṇām ágne dūtó viṣā́m ási | usharbúdha ā́ vaha sómapītaye devā́ñ adyá svardṛ́ṣaḥ || 9 || ágne pū́rvā ánūsháso vibhāvaso dīdétha viṣvádarṣataḥ | ási grā́meshv avitā́ puróhitó 'si yajñéshu mā́nushaḥ || 10 ||

॥२०॥

नि त्वा यज्ञस्य साधनमग्ने होतारमृत्विजम् ।
मनुष्वद्देव धीमहि प्रचेतसं जीरं दूतममर्त्यम् ॥११॥
यद्देवानां मित्रमहः पुरोहितोऽन्तरो यासि दूत्यम् ।
सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजन्ते अर्चयः ॥१२॥

ní tvā yajñásya sā́dhanam ágne hótāram ṛtvíjam | manushvád deva dhīmahi prácetasaṃ jīráṃ dūtám ámartyam || 11 || yád devā́nām mitramahaḥ puróhitó 'ntaro yā́si dūtyàm | síndhor iva prásvanitāsa ūrmáyo 'gnér bhrā́jante arcáyaḥ || 12 ||

O omniscient God, feeder of the world, with our devotion and noble deeds we, your subjects, invoke you. Worshipped and invoked by many a wise one, may you bring hither all Nature's bounties with speed. 7

At the end of night, O adorable and ever-eternal Lord, bring to us Nature's bounties as sun, dawn, pair of heat and light, wealth and fire. Wise men and devotional worshippers kindle your affection and offer oblations. 8

You are the protector of beneficial activities, and are the messenger; bring hither today Nature's bounties, appearing in the celestial region at dawn, to participate in the divine glory of God. 9

O adorable God, resplendent and all-visible, we see your glory daily after many preceding dawns. You are the protector of the urban life and you are the conductor of all men in their dedicated noble performances. 10

We would, as a rational being, acknowledge you, O adorable, as the supreme in our rituals and noble acts. You are the inspirer in selfless acts; you are the leader, the invoker, the destroyer of obstacles, immortal and messenger of Nature's bounties. 11

O God, when loving as a friend, you preside over the noble performances and help in accomplishing the fire-ritual, then like the far resounding billows of the surging sea, your flames rise high with splendour. 12

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥१३॥
शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः ।
पिबतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥१४॥

ṣrudhí ṣrutkarṇa váhnibhir devaír agne sayávabhiḥ | á sīdantu barhíshi mitró aryamá prātaryávāṇo adhvarám || 13 || ṣriṇvántu stómam marútaḥ sudánavo 'gnijihvá ṛitāvṛídhaḥ | píbatu sómaṃ váruṇo dhṛitávrato 'ṣvíbhyām ushásā sajúḥ || 14 ||

(४५) पञ्चचत्वारिंशं सूक्तम्

(१–१०) दशर्चस्यास्य सूक्तस्य काण्वः प्रस्कण्व ऋषिः । (१–९, १०) प्रथमादिनवर्चां, दशम्याः पूर्वार्धस्य चाग्निः, (१०) दशम्या उत्तरार्धस्य च देवा देवताः । अनुष्टुप् छन्दः ॥

॥३१॥

त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥१॥
श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ।
तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥२॥
प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ।
अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥३॥
महिकेरव ऊतये प्रियमेधा अहूषत ।
राजन्तमध्वराणामग्निं शुक्रेण शोचिषा ॥४॥

45.

Tvám agne vásūñr ihá rudrāñ ādityāñ utá | yájā svadhvarám jánam mánujātam ghṛitaprúsham || 1 || ṣrushṭīvāno hí dāṣúshe devá agne vícetasaḥ | tán rohidaṣva girvaṇas tráyastriṅṣatam á vaha || 2 || priyamedhavád atrivát jātavedo virūpavát | aṅgirasván mahivrata práskaṇvasya ṣrudhī hávam || 3 || máhikerava ūtáye priyámedhā ahūshata | rájantam adhvarāṇām agním ṣukréṇa ṣocíshā || 4 ||

O adorable God, may you with your divine ears, please listen to my prayers. Let Nature's bounties like the sun and the morning breeze, and other morning glories appear and gracefully participate in the sacred performance of worship. 13

Let the bright and vigorous vital powers, who abide by law and give bountifully, hear our devotional prayers. May venerable God, the sustainer of eternal law, accept our devotional praises, and dawn along with the pair of night and day participate in Nature's sparkling glory. 14

45

O adorable God, with your blessings may you inspire rich, valorous and learned teachers and other mortal men in the performance of their dedicated noble acts. 1

O adorable God, the learned teachers, full of wisdom, are givers of rewards to the performer of dedicated actions. O Lord of brilliant vigour, may your seekers know the secret knowledge of the thirty-three cosmic powers. 2

O adorable God, all-wise, you have been favouring all such persons as have been wisdom-loving, free from three attachments—(family, wealth and popularity), well-disciplined and men of vigour and vitality. O accomplisher of solemn acts, may you please listen to the invocations of highly enlightened persons. 3

Persons, highly learned and performers of great works, and offerers of dedicated services invoke you, O supreme Lord, shining amidst solemnities with pure resplendence. 4

घृताहवन सन्त्येमा उ षु श्रुधी गिरः ।
याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा ॥५॥

ghṛ́tāhavana santyemā́ u shú ṣrudhī gíraḥ | yā́bhiḥ káṇvasya sūnávo hávanté 'vase tvā || 5 ||

॥३२॥

त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।
शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥६॥
नि त्वा होतारमृत्विजं दधिरे वसुवित्तमम् ।
श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥७॥
आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः ।
बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥८॥
प्रातर्याव्णः सहस्कृत सोमपेयाय सन्त्य ।
इहाद्य दैव्यं जनं बर्हिरा सादया वसो ॥९॥
अर्वाञ्चं दैव्यं जनमग्ने यक्ष्व सहूतिभिः ।
अयं सोमः सुदानवस्तं पात तिरोअह्न्यम् ॥१०॥

tvā́ṃ citraṣravastama hávante vikshú jantávaḥ | ṣocíshkeṣam purupriyā́gne havyā́ya vóḷhave || 6 || ní tvā hótāram ṛitvíjaṃ dadhiré vasuvíttamam | ṣrútkarṇaṃ saprá̄thastamaṃ víprā agne dívishṭishu || 7 || ā́ tvā víprā acucyavuḥ sutásomā abhí práyaḥ | bṛihád bhā́ bíbhrato havír ágne mártaya dāṣúshe || 8 || prātaryā́vṇaḥ sahaskṛita somapéyāya santya | ihā́dyá daívyaṃ jánam barhír ā́ sādayā vaso || 9 || arvā́ñcaṃ daívyaṃ jánam ágne yákshva sáhūtibhiḥ | ayáṃ sómaḥ sudānavas táṃ pāta tiróahnyam || 10 ||

Invoked by prayers, giver of rewards, O adorable, may you listen to these praises with which the men of intellect and their children invoke you for protection. Listen to their invocation attentively. 5

O adorable God with splendours, loved by all and giver of wonderous wealth and sustenance, everyone in creation invokes you on all sides to obtain your blessings. 6

Highest regards during these performances have been shown by highly learned persons to you, O adorable God, the feeder of people, sustainer of eternal laws, and possessor of wealth and riches. 7

O adorable God, having extracted the essence of true knowledge, material as well as spiritual, wise men invoke you to communicate that divine knowledge to those seekers who were partakers in this joint truth-seeking endeavour. 8

O adorable God, you are the generator of all noble deeds, giver of rewards, provider of dwellings; may you call all Nature's morning bounties to participate in the sparkling glory of God. 9

O bounteous God, protect that man, who is possessed of divine virtues, and has just joined us. May you, Nature's bounties, participate in the sparkling glory of God, fresh as if born yesterday. 10

(४६) षट्चत्वारिंशं सूक्तम्

(१–१५) पञ्चदशर्चस्यास्य सूक्तस्य काण्वः प्रस्कण्व ऋषिः । अश्विनौ देवते । गायत्री छन्दः ॥

॥३३॥ एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥१॥
या दस्रा सिन्धुमातरा मनोतरा रयीणाम् । धिया देवा वसुविदा ॥२॥
वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि । यद्वां रथो विभिष्पतात् ॥३॥
हविषा जारो अपां पिपर्ति पपुरिर्नरा । पिता कुटस्य चर्षणिः ॥४॥
आदारो वां मतीनां नासत्या मतवचसा । पातं सोमस्य धृष्णुया ॥५॥

46

Eshó ushá ápūrvya vy ŭchati priyā́ diváḥ | stushé vām asvinā brihát || 1 || yā́ dasrā́ síndhumātarā manotárā rayi-ṇā́m | dhiyā́ devā́ vasuvídā || 2 || vacyánte vām kakuháso jūrṇā́yām ádhi vishṭápi | yád vām rátho víbhish pátāt || 3 || havíshā jāró apā́m píparti pápurir narā | pitā́ kúṭasya car-shaṇíḥ || 4 || ādāró vām matīnā́m nā́satyā matavacasā | pā-tám sómasya dhṛishṇuyā́ || 5 ||

॥३४॥ या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः । तामस्मे रासाथामिषम् ॥६॥
आ नो नावा मतीनां यातं पाराय गन्तवे । युञ्जाथामश्विना रथम् ॥७॥
अरित्रं वां दिवस्पृथु तीर्थे सिन्धूनां रथः । धिया युयुज्र इन्दवः ॥८॥
Divás cid asya varimá ví papratha índram ná mahná prithiví caná práti | bhīmás túvishmāñ carshaníbhya ātapáḥ síṣīte vájram téjase ná váṅsagaḥ || 1 || só arṇavó ná nadyàḥ samudríyaḥ práti gribhṇāti vísritā várīmabhiḥ | índraḥ sómasya pītáye vrishāyate sanát sá yudhmá ójasā panasyate || 2 || tvám tám indra párvatam ná bhójase mahó nrimṇásya dhármaṇām irajyasi | prá vīryèṇa devátāti cekite vísvasmā ugráḥ kármaṇe puróhitaḥ || 3 || sá íd váne namasyúbhir vacasyate cā́ru jáneshu prabruvāṇá indriyám | vríshā chándur bhavati haryató vríshā kshémeṇa dhénām maghávā yád ínvati || 4 || sá ín maháni samithā́ni majmánā kriṇóti yudhmá ójasā jánebhyaḥ | ádhā caná sráđ dadhati tvíshīmata índrāya vájram nighánighnate vadhám || 5 ||

sá hí sravasyúḥ sádanāni kritrímā kshmayā́ vridhānā́ ójasā vināṣáyan | jyótīṅshi kriṇvánn avrikā́ṇi yájyavé 'va sukrátuḥ sártavā́ apáḥ srijat || 6 ||

55

Within our own body exists the interspace (the region of the vital breath and mind) and also the earth (the exposed physical body). The extense of the soul is vaster than the interspace, and this earth is insignificant in dimension when compared with that of the range of influence of the soul. The soul is formidable and most mighty, and thus it has been the afflicter of the enemies of those who adore it. This self destroys evils with its sharpness and penetrates into the depths of the vitals. 1

The soul, with its comprehensive faculties, rescues thoughts just as ocean receives the rivers. It eagerly hastens to taste the essence of the spiritual bliss. It is a warrior and is to be praised for its prowess. 2

O soul, you strike the powers of darkness not for your own enjoyment; you dominate even those who are superior to you in possessions. Your divinity surpasses all others in strength. The soul with its well-deserved pride is superior to the sense-organs on account of its inherent strength and accomplishments. 3

The splendid inner self is, verily, glorified by virtuous and spiritual sages living in the forests. When it cherishes in listening to its glorious deeds, it encourages those who desire to adore it, and grants protection to them who recite its praise. 4

The soul, the warrior, engages itself in many conflicts for the good of mankind, with overwhelming prowess; men have firm faith in the soul's splendid strength. 5

He is ambitious to attain fame, therefore, he wipes off the evil forces that obstruct his self-expression. He resides in those luminous regions which are above physical reach. He can demolish the walls which obstruct spiritual flows. 6

दानाय मनः सोमपावन्नस्तु तेऽर्वाञ्चा हरी वन्दनश्रुदा कृधि ।
यमिष्ठासः सारथयो य इन्द्र ते न त्वा केता आ दभ्नुवन्ति भूर्णयः ॥७॥
अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे ।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥८॥

dānáya mánaḥ somapā-vann astu te 'rváñcā hárī vandanaṣrud á kridhi | yámishṭhāsaḥ sárathayo yá indra te ná tvā kétā á dabhnuvanti bhúrṇayaḥ || 7 || áprakshitaṃ vásu bibharshi hástayor áshāḷhaṃ sáhas tanvì ṣrutó dadhe | ávṛitāso 'vatáso ná kartríbhis tanúshu te krátava indra bhúrayaḥ || 8 ||

(५६) षट्पञ्चाशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्याङ्गिरसः सव्य ऋषिः । इन्द्रो देवता । जगती छन्दः ॥

॥२१॥ एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः ।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम् ॥१॥
तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥२॥
स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः ।
येन शुष्णं मायिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि ॥३॥

56

Eshá prá pūrvír áva tásya camríshó 'tyo ná yóshām úd ayaṅsta bhurváṇiḥ | dáksham mahé pāyayate hiraṇyáyaṃ rátham āvṛítyā háriyogam ṛíbhvasam || 1 || táṃ gūrtáyo nemanníshaḥ párīṇasaḥ samudráṃ ná saṃcáraṇe sanishyávaḥ | pátiṃ dákshasya vidáthasya nú sáho giríṃ ná vená ádhi roha. téjasā || 2 || sá turváṇir maháñ areṇú paúṅsye girér bhṛishṭír ná bhrājate tujá ṣávaḥ | yéna ṣúshṇam māyínam āyasó máde dudhrá ābhúshu rāmáyan ní dámani || 3 ||

May you O soul, drinker of the essence of spiritual joy, fulfil our pious aspirations. May you speedily be with us in our noble performances; under your blessings may the charioteer, the mind, be able to control the horses, our senses, so that the demoniac powers of darkness may not prevail upon our virtues. 7

You bear irresistible strength in your body and have an inexhaustible treasure of wisdom. O illustrious soul, your treasures are always vested in you, as wells are surrounded by those who come to seek water. 8

56

When the sense organs, as performers of the sacrifice, hold the oblations of sense enjoyments with them, as if in the ladles, the self (or the soul) rushes eagerly towards them as a horse towards a mare. Thereupon, the self stays in the golden chariot of his body, yoked with the horses, the organs, and shares with them in the enjoyment. 1

His (i. e. of the lower self) admirers, the sense-organs, bearing the sense-enjoyments, are thronging round him like rivers round the ocean. (O sense-organs), rise up at once with a hymn of praise to the self, the protector of the solemn sacrifice, just as women climb a mountain (for picking up flowers) 2

He, the self, is mighty and quick in action; he is protected by the resolute will. His glory shines in conflict like the peak of a mountain with invincible power. He, exhilarated by spiritual joy, arrests and imprisons, and has wily petty-mindedness bound in ropes. 3

देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्यः ।
यो धृष्णुना शवसा बाधते तम इयर्ति रेणुं बृहदर्हरिष्वणिः ॥४॥
वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा ।
स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याहन्वृत्रं निरपामौब्जो अर्णवम् ॥५॥
त्वं दिवो धरुणं धिष ओजसा पृथिव्या इन्द्र सदनेषु माहिनः ।
त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ॥६॥

devī́
yádi távishī tvā́vridhotáya índram síshakty ushásam ná sū́ryah | yó dhrishnúnā ṣávasā bā́dhate táma íyarti renúm brihád arharishvánih || 4 || ví yát tiró dharúnam ácyutam rájó 'tishṭhipo divá ā́tāsu barhánā | svàrmīlhe yán máda indra hárshyā́han vritrám nír apā́m aubjo arnavám || 5 || tvám divó dharúnam dhisha ójasā prithivyā́ indra sádaneshu mā́hinah | tvám sutásya máde arinā apó vī vritrásya samáyā pāshyā̀rujah || 6 ||

(५७) सप्तपञ्चाशं सूक्तम्

(१–६) षडृचस्यास्य सूक्तस्याङ्गिरसः सव्य ऋषिः । इन्द्रो देवता । जगती छन्दः ॥

॥२२॥ प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥१॥
अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।
यत्पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥२॥

57

Prá mánhishṭhāya brihaté brihádraye satyáṣushmāya taváse matím bhare | apā́m iva pravané yásya durdháram rā́dho viṣvā́yu ṣávase ápāvritam || 1 || ádha te víṣvam ánu hāsad ishṭáya ā́po nimnéva sávanā havíshmatah | yát párvate ná samáṣīta haryatá índrasya vájrah ṣnáthitā hiranyáyah || 2 ||

When the power of the soul (the lower self) is augmented by the noble work and the discipline of the sense-organs, he, with his divine light and resolute vigour, inflicts a severe blow on the evil forces as the sun on the dawn, causing much excitement and emotional disturbance in the human mind. 4

When, O soul, the destroyer of evil forces, you set open the gate of divine thoughts and distribute life-sustaining radiance to the different faculties of the mind and the body, then, exalted by assimilating spiritual exhilaration, you completely destroy the evils and make way for the endless divine thoughts to flow. 5

O mighty soul, you spread spiritual radiance on all the vital centres of the human system. Exhilarated by the spiritual joy, with your invincible strength you set open the dark powers of ignorance and, with solid determination, destroy evils once for all. 6

57

I glorify the most generous, the truly powerful and excellent self, whose irresistible impetuosity is like the rush of water down a precipice, and by whom widely diffused spiritual wealth is laid open to sustain our great deeds. 1

O soul, as if resting on a hill, you destroy the evil forces with your knowledge that shines sharp and is penetrating; all acclaim you as a protector and rush to offer homage to you and sing forth (to you) the devotional prayers. The flow of spiritual joy is as spontaneous as of water into a depth. 2

अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे ।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे ॥३॥
इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः ॥४॥
भूरि त इन्द्र वीर्यं तव स्मस्यस्य स्तोतुर्मघवन्काममा पृण ।
अनु ते द्यौर्बृहती वीर्यं मम इयं च ते पृथिवी नेम ओजसे ॥५॥
त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ ।
अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥६॥

asmaí bhīmáya námasā sám adhvará úsho ná śubhra á bharā pánīyase | yásya dháma śrávase námendriyám jyótir ákāri haríto náyase || 3 || imé ta indra té vayám purushṭuta yé tvárábhya cárāmasi prabhuvaso | nahí tvád anyó girvaṇo gíraḥ sághat kshoṇír iva práti no harya tád vácaḥ || 4 || bhúri ta indra vīryàm táva smasy asyá stotúr maghavan kámam á priṇa | ánu te dyaúr brihatí vīryàm mama iyám ca te prithiví nema ójase || 5 || tvám tám indra párvatam mahám urúm vájreṇa vajrin parvaśáś cakartitha | ávasrijo nívritāḥ sártavá apáḥ satrá víśvam dadhishe kévalam sáhaḥ || 6 ||

[अथैकादशोऽनुवाकः ॥] (५८) अष्टपञ्चाशं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य गौतमो नोधा ऋषिः । अग्निर्देवता । (१–५) प्रथमादिपञ्चर्चां जगती, (६–९) षष्ठ्यादिचतसृणाञ्च त्रिष्टुप् छन्दसी ॥

॥२३॥ नू चित्सहोजा अमृतो नि तुन्दते होता यद्दूतो अभवद्विवस्वतः ।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ॥१॥

58

Nú cit sahojá amríto ní tundate hótā yád dūtó ábhavad vivásvataḥ | ví sádhishṭhebhiḥ pathíbhī rájo mama á devátātā havíshā vivāsati || 1 ||

The dawn, the embodiment of divine light, offers homage to the formidable and victorious self whose life-sustaining, celebrated and characteristic radiance has impelled him on all sides to seek wisdom, as the speedy rays spread in all directions. 3

Much praised and most opulent soul, we, the sense-organs belong to you; we glorify you alone. Accept our offerings. None other than you is entitled to receive our devotion. May you love and cherish our prayers as the mother-earth cherishes its creatures. 4

Great is your strength, O soul; we are yours, and as such may you fulfil the aspirations of your worshippers. The vast heaven bows to your mighty vigour. This earth bows down to your magnanimity. 5

O soul, with your adamant determination, you have shattered the cloud of ignorance into fragments and have sent down the waters that were confined in it to flow. Verily, you alone possess all powers. 6

58

The inner-spiritual fire is verily the strength generated; it is also immortal, and it issues forth quickly; it is the messenger of the self-effulgent Lord. By suitable paths, it proceeds and illuminates our interior, and thus it participates in the spiritual sacrifice with oblations. 1

आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति ।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् ॥२॥
क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः ।
रथो न विक्ष्वृञ्जसान आयुषु व्यानुषग्वार्या देव ऋण्वति ॥३॥
वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।
तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥४॥
तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।
अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः ॥५॥

á svám ádma yuvámāno ajáras tṛishv ávishyánn ataséshu tishṭhati | átyo ná pṛishṭhám prushitásya rocate divó ná sánu stanáyann acikradat || 2 || kraṇá rudrébhir vásubhiḥ puróhito hóta níshatto rayishál ámartyaḥ | rátho ná vikshv ṛiñjasaná ayúshu vy ànushág váryā devá ṛiṇvati || 3 || ví vátajuto ataséshu tishṭhate vṛítha juhúbhiḥ sṛíṇya tuvishváṇiḥ | tṛishú yád agne vaníno vṛishayáse kṛishṇáṃ ta éma rúṣadūrme ajara || 4 || tápurjambho vána á vátacodito yuthe ná sahván áva vāti váṅsagaḥ | **abhivrájann ákshitam pájasā rája sthātúṣ caráthaṃ bhayate patatríṇaḥ** || 5 ||

॥२४॥ दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः ।
होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥६॥
होतारं सप्त जुह्वो३ यजिष्ठं यं वाघतो वृणते अध्वरेषु ।
अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नम् ॥७॥

dadhúsh ṭvā bhṛígavo mánusheshv á rayíṃ ná cáruṃ suhávaṃ jánebhyaḥ | hótāram agne átithiṃ váreṇyam mitráṃ ná ṣévaṃ divyáya jánmane || 6 || hótāraṃ saptá juhvò yájishṭhaṃ yáṃ vāgháto vṛiṇáte adhvaréshu | agníṃ víṣveshām aratíṃ vásūnāṃ saparyámi práyasā yámi rátnam || 7 ||

(Like the inner fire) is the undecaying physical fire, which combines its food with its flames, and quickly devours the wood, and ascends upon with a blazing flame; it spreads out like a steed all round and rises to the upper region with a noise, similar to the noise of clouds at great heights. 2

The immortal and resplendent God, the bearer of oblations is honoured by cosmic vital and wealthgiving forces, and presides over all sacred work and distribution of riches. Praised by His worshippers and admired among mankind, He accepts devotions which are successively offered. 3

He is like a blazing fire which, excited by the wind, roaring loudly penetrates easily with His flames among the wood. When this fiercely blazing fire rushes in the forest, His path is blackened by smoke. 4

He is like a forest fire, flame-weaponed and breeze-excited, destroying all the moisture (of the trees) with its heat. With voluminous flames, He rushes triumphant in full vigour against all undesirable elements, whether movable or stationary, and all are afraid of Him when He flies along. 5

O adorable God, it is for you that men perform sacrifices; you are the invoker (of Nature's forces); you alone are the supreme guest at sacrifices; and you are valued as an affectionate friend. The inspired men of wisdom have always cherished you as a precious treasure for the sake of divine birth. 6

I worship with oblations that adorable Lord whom the seven invoking priests (five sense-organs, mind and intellect) invite as the invoker at the sacrifice. The adorable God is most worthy of worship and He is the donor of all riches; I solicit His wealth. 7.

अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।
अग्ने गृणन्तमंहस उरुष्योर्जो नपात्पूर्भिरायसीभिः ॥८॥
भवा वरूथं गृणते विभावो भवा मघवन्मघवद्भ्यः शर्म ।
उरुष्याग्ने अंहसो गृणन्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥९॥

áchidrā sūno sahaso no adyá stotṛíbhyo mitramahaḥ ṣárma yacha | ágne gṛiṇántam áṅhasa urushyórjo napāt pūrbhír áyasībhiḥ || 8 || bhávā várūtham gṛiṇaté vibhāvo bhávā maghavan maghávadbhyaḥ ṣárma | urushyágne áṅhaso gṛiṇántam prātár makshú dhiyávasur jagamyāt || 9 ||

(५९) एकोनषष्टितमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य गोतमो नोधा ऋषिः । अग्निर्वैश्वानरो देवता । त्रिष्टुप् छन्दः ॥

॥२५॥ वया इदग्ने अग्नयस्ते अन्ये त्वे विश्वे अमृता मादयन्ते ।
वैश्वानर नाभिरसि क्षितीनां स्थूणेव जनाँ उपमिद्ययन्थ ॥१॥
मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः ।
तं त्वा देवासोऽजनयन्त देवं वैश्वानर ज्योतिरिदार्याय ॥२॥
आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि ।
या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥३॥

59

Vayá íd agne agnáyas te anyé tvé víṣve amṛ́tā mādayante | vaíṣvānara nā́bhir asi kshitīnā́m sthū́ṇeva jánāñ upamíd yayantha || 1 || mūrdhā́ divó nā́bhir agníḥ pṛithivyā́ áthābhavad aratí ródasyoḥ | tám tvā devā́so 'janayanta devám vaíṣvānara jyótir íd ā́ryāya || 2 || ā́ sū́rye ná raṣmáyo dhruvā́so vaiṣvānaré dadhire 'gnā́ vásūni | yā́ párvateshv óshadhishv apsú yā́ mā́nusheshv ási tásya rā́jā || 3 ||

O source of all vitality, ever adorable God, may you grant flawless happiness to your devotees worshipping you uninterruptedly. May you accept their prayers and preserve them from sin and evil deeds with your mighty iron strength. 8

O resplendent God, may you protect and preserve your devotees from misfortunes. O source of all wisdom, may you grant unhampered bliss to your wise devotees. Please come to their rescue at the rise and shower your blessings on them. 9

59

O adorable God, all other luminous divine powers derive light from you. O leader of universe, all others derive bliss from you alone. You, the ordainer of all, are the navel of living creatures, holding everyone like deep-rooted stem. 1

The supreme God is the head of heaven and the navel of the earth and thus the master of earth and heaven both. All cosmic forces manifest His power. O the ordainer of all, you inspire divine light in the heart of God-loving persons. 2

Like the rays permanently deposited in the sun, O Lord of universe, all the treasures are centered in you. You are the sovereign of the treasures present in the region of the hills, in herbs, in the waters or amongst men. 3

बृहती इ॑व सू॒नवे॒ रोद॑सी॒ गिरो॒ होता॑ मनु॒ष्यो॒३॑ न दक्षः॑ ।
स्व॑र्वते स॒त्यशु॑ष्माय पू॒र्वीर्वै॑श्वान॒राय॒ नृत॑माय य॒ह्वीः ॥४॥
दि॒वश्चि॑त्ते बृह॒तो जा॑तवेदो॒ वैश्वा॑नर॒ प्र रि॑रिचे महि॒त्वम् ।
राजा॑ कृष्टी॒नाम॑सि॒ मानु॑षीणां यु॒धा दे॒वेभ्यो॒ वरि॑वश्चकर्थ ॥५॥
प्र नू म॑हि॒त्वं वृ॑ष॒भस्य॑ वोचं॒ यं पू॒रवो॑ वृत्र॒हणं॒ सच॑न्ते ।
वै॒श्वा॒न॒रो दस्यु॑म॒ग्निर्ज॑घ॒न्वाँ अधू॑नो॒त्काष्ठा॒ अव॒ शम्ब॑रं भेत् ॥६॥
वै॒श्वा॒न॒रो म॑हि॒म्ना वि॒श्वकृ॑ष्टिर्भ॒रद्वा॑जेषु यज॒तो वि॒भावा॑ ।
शा॒त॒व॒ने॒ये श॒तिनी॑भिर॒ग्निः पु॑रुणी॒थे ज॑रते सू॒नृता॑वान् ॥७॥

briliatí iva sūnáve ródasī gíro hótā manushyò ná dákshaḥ | svàrvate satyáṣushmāya pūrvír vaiṣvānaráya nrítamāya yahvíḥ || 4 || diváṣ cit te briható jātavedo vaíṣvānara prá ririce mahitvám | rájā krishṭīnám asi mánushīṇām yudhá devébhyo várivaṣ cakartha || 5 || prá nú mahitvám vrishabhásya vocam yám pūrávo vritrahánam sácante | vaiṣvānaró dásyum agnír jaghanváñ ádhūnot káshṭhā áva ṣámbaram bhet || 6 || vaiṣvānaró mahimná viṣvákrishṭir bharádvājeshu yajató vibhávā | ṣātavaneyé ṣatínībhir agníḥ puruṇīthé jarate sūnrítāvān || 7 ||

(६०) षष्टितमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य गौतमो नोधा ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥२६॥ वह्निं॑ य॒शसं॑ वि॒दथ॑स्य के॒तुं सु॑प्रा॒व्यं॑ दू॒तं स॒द्योअ॑र्थम् ।
द्वि॒जन्मा॑नं र॒यिमि॑व प्रश॒स्तं रा॒तिं भ॑र॒द्भृग॑वे मा॒तरि॒श्वा ॥१॥

60

Váhnim yaṣásam vidáthasya ketúm suprāvyàm dūtám sadyóartham | dvijánmānam rayím iva praṣastám rātím bharad bhrígave mātaríṣvā || 1 ||

Heaven and earth have expanded as if for their son. The earnest devotee sings the varied sacred hymns repeatedly to you, our Lord of universe, all-blissful, eternally strong, ever-true, and the best guide. 4

O universal benevolent God, you exceed the vast universe in dimension; you are the sovereign master of all the cultured. You protect your pious, devotees during encounters, and shower blessings on enlightened worshippers and make them recover their lost riches. 5

I extol the greatness of that powerful God whom all worship for the showering of rains and for breaking the clouds. The adorable Lord, the ordainer, releases water from the clouds and sends it down. 6

By his magnanimity, the universally benevolent God, is all-embracing and thus an integrated whole; He is to be worshipped as the diffuser of manifold light in offerings of nutritious viands. The adorable God speaks high of the offerer of a hundred sacrifices and the performer of selfless noble acts. 7

60

May the adorable God, the illuminator of sacred performances, the embodiment of knowledge, the swiftmoving messenger of the divine forces, carrying the radiance of the two regions and associated with cosmic vital breath, be friendly to the wise men. 1

अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः ।
दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु वेधाः ॥२॥
तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः ।
यमृत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजनन्त ॥३॥
उशिक्पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु ।
दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणाम् ॥४॥
तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः ।
आशुं न वाजंभरं मर्जयन्तः प्रातर्मक्षू धियावसुर्जगम्यात् ॥५॥

asyá ṣásur ubháyāsaḥ sacante havíshmanta uṣíjo yé ca mártāḥ | diváṣ cit pū́rvo ny àsādi hótāpṛíchyo viṣpátir vikshú vedhā́ḥ || 2 || tám návyasī hṛidá ā́ jā́yamānam asmát sukīrtír mádhujihvam aṣyāḥ | yám ṛitvíjo vṛijáne mā́nushāsaḥ práyasvanta āyávo jī́jananta || 3 || uṣík pāvakó vásur mā́nusheshu váreṇyo hótādhāyi vikshú | dámūnā gṛihápatir dáma ā́ñ agnír bhuvad rayipátī rayīṇā́m || 4 || táṃ tvā vayám pátim agne rayīṇā́m prá ṣaṅsāmo matíbhir gótamāsaḥ | āṣúṃ ná vājambharám marjáyantaḥ prātár makshū́ dhiyā́vasur jagamyāt || 5 ||

(६१) एकषष्टितमं सूक्तम

(१-१६) षोडशर्चस्यास्य सूक्तस्य गोतमो नोधा ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२७॥ अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय ।
ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा ॥१॥

61

Asmā́ íd u prá taváse turā́ya práyo ná harmi stómam máhināya | ṛícīshamāyā́dhrigava óham índrāya bráhmāṇi rātátamā || 1 ||

Men, who are dedicated and love progress, both live under the guidance of God. The venerable, the distributor of desired benefits, and crowned king of creation, is always present in the hearts of devotees before the coming of dawn. 2

May our ever-fresh, reverential homage, offered with sincere love and respect, reach the adorable God, who is sweet-tongued and seated as a torch in our hearts. At the time of distress, the all-wise, experienced, wealthy and enlightened men invoke Him only. 3

He, the lovable, purifying Lord of wealth and wisdom, the giver of divine light, is enshrined in the innermost recess of man's heart. May He, the invincible, the protector, enrich the hearts of all men with His divine wealth. 4

We, the most intellectual, glorify you with excellent hymns, O adorable God, the lord of wisdom and wealth. May you grant us strength and bless our noble deeds and sublime thoughts. May you hasten to be with us every morning. 5

61

To the resplendent God alone I offer my homage with reverence to him who is the mightiest of the mighty, swift, praise-meriting, invincible, virtuous and inspiring. May our devotional songs, praising His bounties, be cherished with the eagerness as that for food. 1

अस्मा इदु प्रयं इव प्र यंसि भराम्याङ्गूषं बाधे सुवृक्ति ।
इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त ॥२॥
अस्मा इदु त्यमुपमं स्वर्षां भराम्याङ्गूषमास्येन ।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥३॥
अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय ।
गिरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय ॥४॥
अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा३ समञ्जे ।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥५॥

asmá íd u práya iva prá yaṅsi bhárāmy āñgūshám bádhe suvriktí | índrāya hridá mánasā manīshá pratnáya pátye dhíyo marjayanta || 2 || asmá íd u tyám upamáṃ svarshám bhárāmy āñgūshám āsyèna | máṅhishṭham áchoktibhir matīnáṃ suvriktíbhiḥ sūríṃ vävridhádhyai || 3 || asmá íd u stómaṃ sáṃ hinomi ráthaṃ ná táshṭeva tátsināya | gíraṣ ca gírvāhase suvriktíndrāya viṣvaminvám médhirāya || 4 || asmá íd u sáptim iva ṣravasyéndrāyārkáṃ juhvâ sám añje | vīráṃ dānaúkasaṃ vandádhyai puráṃ gūrtáṣravasaṃ darmáṇam || 5 ||

॥२८॥ अस्मा इदु त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्यं१ रणाय ।
वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः ॥६॥
अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना ।
मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता ॥७॥

asmá íd u tváshṭā takshad vájraṃ svápastamaṃ svaryàṃ ráṇāya | vritrásya cid vidád yéna márma tujánn íṣānas tujatá kiyedháḥ || 6 || asyéd u mātúḥ sávaneshu sadyó maháḥ pitúm papiváñ cárv ánnā | mushāyád víshṇuḥ pacatáṃ sáhīyān vídhyad varāháṃ tiró ádrim ástā || 7 ||

To Him alone I offer homage, acceptable as food, and I sing His glory in proper words for the sake of success in discomfiting (my adversaries). The singers chant hymns to the glory of the resplendent God, the eternal Lord, with their heart, mind and spirit. 2

I myself with my own loud tune, and with pure and forceful words, offer homage to exalt Him who is unique in His magnitude and unparralleled in His greatness and wisdom. 3

To obtain wealth and wisdom, I compose prayerful verses, as a carpenter constructs a car. May we offer praises to Him who gladly listens to them, and my emotional songs to the wise resplendent God. 4

I combine melody with my words of praise as a man yokes horse to a vehicle, in order to celebrate valour, munificence, and food-giving generosity of the resplendent God, who easily destroys the strongholds of the unfaithful. 5

For Him verily, Nature's architects sharpen their sure-aimed, effective, well-trained weapons of thunder, with which the mighty victor finally strikes the clouds of all evils and destroys them. 6

The resplendent Lord rapidly consumes all the oblations offered to him three times daily at the sacred worship. He pervades the entire universe and is the vanquisher of foes, and inflicts on them His punitive justice. He further restores wealth from the infidels and pierces the clouds of evils in His encounters. 7

अस्मा इदु ग्नाश्चिद्देवपत्नीरिन्द्रायार्कमहिहत्य ऊवुः ।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः ॥८॥
अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् ।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥९॥
अस्येदेव शवसा शुषन्तं वि वृश्चद्वज्रेण वृत्रमिन्द्रः ।
गा न व्राणा अवनीरमुञ्चदभि श्रवो दावने सचेताः ॥१०॥

asmā́ íd u gnā́ṣ cid devápatnīr índrāyārkám ahihátya ūvuḥ | pári dyā́vāpṛithivī́ jabhra urvī́ nā́sya té mahimā́nam pári shṭaḥ ||8|| asyéd evá prá ririce mahitvám̐ divás pṛithivyā́ḥ páry antárikshāt | svarā́ḷ índro dáma ā́ viṣvágūrtaḥ svarír ámatro vavakshe rā́ṇāya || 9 || asyéd evá ṣávasā ṣushántam ví vṛiṣcad vájreṇa vṛitrám índraḥ | gā́ ná vrāṇā́ avánīr amuñcad abhí ṣrávo dāváne sácetāḥ || 10 ||

॥२९॥ अस्येदु त्वेषसा रन्त सिन्धवः परि यद्वज्रेण सीमयच्छत् ।
ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः ॥११॥
अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥१२॥
अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून् ॥१३॥

asyéd u tveshásā ranta síndhavaḥ pári yád vájreṇa sīm áyachat | īṣānakṛíd dāṣúshe daṣasyán turvítaye gādhám̐ turváṇiḥ kaḥ || 11 || asmā́ íd u prá bharā tū́tujāno vṛitrā́ya vájram íṣānaḥ kiyedhā́ḥ | gór ná párva ví radā tiraṣcéshyann árṇām̐sy apā́m̐ carádhyai || 12 || asyéd u prá brūhi pūrvyā́ṇi turásya kármāṇi návya ukthaíḥ | yudhé yád ishṇāná ā́yudhāny ṛighāyámāṇo niriṇā́ti ṣátrūn || 13 ||

To the resplendent Lord, all the delicate motherly natural powers offer their reverential homage on the destruction of the serpentine darkness. He encompasses the extensive heaven and earth. They two (heaven and earth) do not surpass the resplendent God in vastness. 8

His magnitude verily surpasses that of heaven, earth and space. The resplendent God, manifesting His strength in all regions, is equal to every exploit. He engages Himself in fighting against all formidable foes and calls them to battle with skill. 9

The resplendent God, through His own strength, shatters the forces of evil and releases the stream of wisdom blocked by demoniac forces, like imprisoned cows, and recovers from thieves and cosistent with the wishes of the giver of the oblation grants his food. 10

Through His powers, only sublime thoughts flow in their destined courses, since He sets open the paths by His might, establishing His supremacy and granting recompense to the giver of oblations. He, the swift-moving, provides a safe abode for vigorous sages. 11

The resplendent God, who is ever-vigilant and has unlimited strength, inflicts punitive justice on dark evils and severs their joints, so that energy and thoughts may issue from Him and flow freely in the world. 12

Sing new hymns praising the blessings and achievements of that swift-moving resplendent Lord who inflicts His punitive justice in conflicts and destroys evil forces. 13

अ॒स्येदु॑ भि॒या गि॒रय॑श्च दृ॒ळ्हा द्यावा॑ च॒ भूमा॑ ज॒नुष॑स्तुजेते ।
उपो॑ वे॒नस्य॒ जोगु॑वान ओ॒णिं स॒द्यो भु॑वद्वी॒र्या॑य नो॒धाः ॥१४॥
अ॒स्मा इदु॒ त्यदनु॑ दाय्येषा॒मेको॒ यद्व॒व्ने भू॒रेरीशा॑नः ।
प्रैत॑शं॒ सूर्ये॑ पस्पृधा॒नं सौव॑श्व्ये॒ सुष्वि॑मावदिन्द्रः ॥१५॥
ए॒वा ते॑ हारियोजना सुवृ॒क्तीन्द्र॒ ब्रह्मा॑णि॒ गोत॑मासो अक्रन् ।
ऐषु॑ वि॒श्वपे॑शसं॒ धियं॑ धाः प्रा॒तर्म॒क्षू धि॒याव॑सुर्जगम्यात् ॥१६॥

asyéd u bhiyā́ giráyaṣ ca dṛiḷhā́ dyā́vā ca bhū́mā janúshas tujete | úpo venásya jóguvāna oṇím sadyó bhuvad vīryā̀ya nodhā́ḥ || 14 || asmā́ íd u tyád ánu dāyy eshām éko yád vavné bhū́rer íṣānaḥ | praítaṣam sū́rye paspṛidhānám saúvaṣvye súshvim āvad índraḥ || 15 || evā́ te hāriyojanā suvṛiktíndra bráhmāṇi gótamaso akran | aíshu viṣvápeṣasam dhíyam dhāḥ prātár m. dh. j. || 16 ||

(६२) द्विषष्टितमं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य गौतमो नोधा ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१॥ प्र म॑न्महे शवसा॒नाय॑ शू॒षमा॑ङ्गू॒षं गिर्व॑णसे अङ्गिर॒स्वत् ।
सु॒वृ॒क्तिभिः॑ स्तुव॒त ऋ॑ग्मि॒यायार्चा॑मा॒र्कं नरे॒ विश्रु॑ताय ॥१॥
प्र वो॑ म॒हे महि॒ नमो॑ भरध्वमाङ्गू॒ष्यं॑ शवसा॒नाय॒ साम॑ ।
येना॑ नः॒ पूर्वे॑ पि॒तरः॑ पद॒ज्ञा अर्च॑न्तो॒ अङ्गि॑रसो॒ गा अवि॑न्दन् ॥२॥

62

Prá manmahe ṣavasānā́ya ṣūshám āñgūshám gírvaṇase añgirasvát | suvṛiktíbhi stuvatá ṛigmiyā́yárcāmārkám náre víṣrutāya || 1 || prá vo mahé máhi námo bharadhvam āñgūshyàm ṣavasānā́ya sáma | yénā naḥ pū́rve pitáraḥ padajñā́ árcanto áñgiraso gā́ ávindan || 2 ||

Through fear of Him, the firmly-set mountains and the whole heaven and earth tremble. May the dedicated worshippers, praising repeatedly the preserving power of that beloved Lord, be speedly blessed with vigour. 14

To Him, who rules alone over the vast universe, this praise has been offered. The resplendent Lord prefers to receive it from His sincere and true devotees. The Lord comes faster than the sun (light) to defend His worshipper. 15

The descendants of intellectual devotees offer their prayers to please you, O resplendent Lord, the inspirer of spiritual radiance; may you bestow upon them every sort of affluence. May he who has acquired prosperity by pious acts come here quickly at the rising of sun. 16

62

Just as our vital elements are devoted to us, so may we meditate on the all-powerful attributes of the resplendent Lord, with our noble actions free from evil and with loving words. May we repeat our prayers to the celebrated leader of all, adored by His worshippers. 1

May you offer adorations to that resplendent God and chant praises to Him who is exceedingly mighty. Through him our forefathers, adept in the science of vital elements and conscious of their high positions, could recover the deluded intellects, whilst worshipping Him. 2

इन्द्रस्याङ्गिरसां चेष्टौ विदत्सरमा तनयाय धासिम् ।
बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः ॥३॥
स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः ।
सरण्युभिः फलिगमिन्द्र शक्र वलं रवेण दरयो दशग्वैः ॥४॥
गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः ।
वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ॥५॥

índrasyā́ñgirasām ceshṭaú vidát sarámā tánayāya dhāsím | bríhaspátir bhinád ádrim vidád gā́ḥ sám usríyābhir vāvaṣanta náraḥ || 3 || sá sushṭúbhā sá stubhā́ saptá vípraiḥ svaréṇādrim svaryò návagvaiḥ | saraṇyúbhiḥ phaligám indra ṣakra valám ráveṇa darayo dáṣagvaiḥ || 4 || griṇānó áñgirobhir dasma ví var ushásā sū́ryeṇa góbhir ándhaḥ | ví bhū́myā aprathaya indra sā́nu divó rája úparam astabhāyaḥ || 5 ||

॥२॥ तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।
उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्य१श्चतस्रः ॥६॥
द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥७॥
सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या ॥८॥

tád u práyakshatamam asya kárma dasmásya cā́rutamam asti dáṅsaḥ | upahvaré yád úparā ápinvan mádhvarṇaso nadyàṣ cátasraḥ || 6 || dvitā́ ví vavre sanájā sánīḷe ayā́sya stávamānebhir arkaíḥ | bhágo ná méne paramé vyòmann ádhārayad ródasī sudáṅsāḥ || 7 || sanā́d dívam pári bhū́mā vírūpe punarbhúvā yuvatī́ svébhir évaiḥ | krishṇébhir aktóshā́ rúṣadbhir vápurbhir ā́ carato anyā́nyā || 8 ||

When the soul proceeds on its search, with the vital elements, the internal organ secures nourishment for its children, the external senses; then the soul slays the evil desires, which were the devourers of the intellects, and rescues them. And, thereon, the sense-organs and the intellect, proclaim their joy aloud. 3

O powerful soul, desirous of protection, you, who are to be gratified with a laudatory and well-accented hymn by the seven vital elements of the two orders—one whose course lies in nine, and the other whose course lies in ten directions—have terrified by your efforts the divisible fructifying clouds of evil desires. 4

Destroyer of evils, praised by vital elements, you have scattered the darkness with the dawn and with the rays of the sun. You have smoothened the unevenness of the earth and have strengthened the foundations of the uppermost celestial region. 5

The deeds of that gracious soul are most admirable; its achievements are most glorious, in that it has replenished the four streams of sweet thoughts which flow full with waves over the surface of the earth. 6

He, the Self, is easily propitiated, not by violence, but by those who praise Him with sacred hymns. He parted the twofold, the eternal, and united (the celestial and terrestrial); and the Self cherishes both of them like the sun in august and the most excellent sky. 7

This pair of damsels, night and dawn, freshly born and ever-youthful, have traversed in their revolutions alternately from very ancient time, round heaven and earth, night with her dark limbs and dawn with limbs of splendour. 8

सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः ।
आमासु चिद्दधिषे पक्वमन्तः पयः कृष्णासु रुशद्रोहिणीषु ॥९॥
सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः ।
पुरू सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम् ॥१०॥

sánemi sakhyáṃ svapasyámānaḥ sūnúr dādhāra ṣávasā sudáṅsāḥ | āmásu cid dadhishe pakvám antáḥ páyaḥ kṛishṇásu rúṣad róhiṇīshu || 9 || sanát sánīlā avánīr avātá vratá rakshante amṛítāḥ sáhobhiḥ | purú sahásrā jánayo ná pátnīr duvasyánti svásāro áhrayāṇam || 10 ||

॥३॥ सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन्मनीषाः ॥११॥
सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः ॥१२॥
सनायते गोतम इन्द्र नव्यमतक्षद्ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥१३॥

sanāyúvo námasā návyo arkaír vasūyávo matáyo dasma dadruḥ | pátiṃ ná pátnīr uṣatír uṣántaṃ spṛiṣánti tvā ṣavasāvan manīsháḥ || 11 || sanád evá táva ráyo gábhastau ná kshíyante nópa dasyanti dasma | dyumáñ asi krátumāñ indra dhíraḥ ṣíkshā ṣacīvas táva naḥ ṣácībhiḥ || 12 || sanāyaté gótama indra návyam átakshad bráhma hariyójanāya | sunītháya naḥ ṣavasāna nodháḥ prātár m. dh. j. || 13 ||

This source of strength, skilled in operation, diligent in pious acts, retains His eternal friendship; you, the Self, provide to the raw intellects, black or red, the mature and glossy milk or the essence. 9

From remote times, the contiguous, unshifting and unwearied fingers have been displaying their devotions in thousands of ways of their movements of ecstasy, and the protecting sisters, like the wives, worship Him without hesitation and reservation. 10

O charming Self, who is to be adored with sacred hymns, all pious persons, desirous of holy rites and anxious for riches, and those who are wise, repair to you with veneration. O powerful Self, their minds adhere to you, as affectionate wives to their husbands. 11

O splendid Lord, the spiritual riches which you have long possessed have neither diminished nor been wasted; you, O Self, are illustrious, resolute and full of wisdom. Strengthen us with might, O supreme Lord of strength. 12

The resplendent Lord, the sustainer of ever-new (creature), and the possessor of excellent wisdom, has revealed to us this hymn. He has harnessed this sun (as if to a car), and is a sure guide to us all. May we pray this morning to our Lord, as to be present with us to inspire us for material and spiritual wealth. 13

(६३) त्रिषष्टितमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य गौतमो नोधा ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥४॥ त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः ।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन् ॥१॥
आ यद्धरी इन्द्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात् ।
येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः ॥२॥
त्वं सत्य इन्द्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट् ।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ॥३॥

63

Tvám mahā́ñ indra yó ha súshmair dyā́vā jajñānáḥ prithivī́ áme dhāḥ | yád dha te víṣvā giráyaṣ cid ábhvā bhiyā́ drilhā́sah kiráṇā naíjan || 1 || ā́ yád dhárī indra vívratā vér ā́ te vájram jaritā́ bāhvór dhāt | yénāviharyatakrato amítrān púra ishṇā́si puruhūta pūrvī́ḥ || 2 || tvám satyá indra dhrishṇúr etā́n tvám ribhukshā́ náryas tvám shā́ṭ | tvám ṣúshṇam vrijáne prikshá āṇaú yū́ne kútsāya dyumáte sácāhan || 3 ||

त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन्वृषकर्मन्नुभ्नाः ।
यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट् ॥४॥
त्वं ह त्यदिन्द्रारिषण्यन्दृळ्हस्य चिन्मर्तानामजुष्टौ ।
व्य१स्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्नथिह्यमित्रान् ॥५॥

tvám ha tyád indra codīḥ sákhā vritrám yád vajrin vrishakarmann ubhnā́ḥ | yád dha ṣūra vrishamaṇaḥ parācaír ví dásyūñr yónāv ákrito vrithāshā́ṭ || 4 || tvám ha tyád indrā́rishaṇyan drilhásya cin mártānām ájushṭau | vy àsmád ā́ kā́shṭhā árvate var ghanéva vajriñ chnathihy amítrān || 5 ||

63

O resplendent God, you are great; with your well-known powers, you sustain heaven and earth at the time of distress; and then on your account, all firmly set mountains, and all their vast and solid things, no longer tremble like the (tremulous) rays of the sun. 1

O resplendent God, when you have harnessed your variously equipped horses (to the chariot of the sun), the one who praises you, places the thunderbolt of devotion in your hands, wherewith, O accomplisher of the desired acts, you assail the clouds of ignorance, the enemies, and, glorified by all, you destroy their numerous centres, the cities. 2

O resplendent God, you are the best of all; you are bold and strong, you are the lord of devotees, the friend of men, and the subduer of enemies; you always provide assistance to the illustrious person of discretion, and you destroy his doubts and misgivings in their deadly and close-fought attacks. 3

As a friend, you support the pious. O munificent hero, you crush evil forces and destroy their wickedness, and having conquered them, you drive them to remote places, and thence, bring happiness to mankind. 4

O you, resplendent God, who is unwilling to harm any resolute person, set open all the quarters to the horses of us who praise you, when (we are exposed) to the aversion of our enemies. Just as the sun destroys the clouds, so you demolish the enemies on all sides with all your determined weapons. 5

॥५॥ त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळ्हे नर आजा हवन्ते ।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥६॥
त्वं ह त्यदिन्द्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः ।
बर्हिर्न यत्सुदासे वृथा वर्गंहो राजन्वरिवः पूरवे कः ॥७॥
त्वं त्यां न इन्द्र देव चित्रामिषमापो न पीपयः परिज्मन् ।
यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै ॥८॥
अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम् ।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात् ॥९॥

tvā́ṃ ha tyád indrā́rṇasātau svàrmīḷhe nára ājā́ havante | táva svadhāva iyám ā́ samaryá ūtír vā́jeshv atasā́yyā bhūt || 6 || tvám ha tyád indra saptá yúdhyan púro vajrin purukútsāya dardaḥ | barhír ná yát sudā́se vṛ́thā várg aṅhó rājan várivaḥ pūráve kaḥ || 7 || tvám tyā́m na indra deva citrā́m ísham ā́po ná pīpayaḥ párijman | yáyā ṣūra práty asmábhyam yáṅsi tmánam ū́rjam ná viṣvádha ksháradhyai || 8 || ákāri ta indra gótamebhir bráhmāṇy óktā námasā háribhyām | supéṣasam vā́jam ā́ bharā naḥ prātár m. dh. j. || 9 ||

(६४) चतुःषष्टितमं सूक्तम्

(१–१५) पञ्चदशर्चस्यास्य सूक्तस्य गौतमो नोधा ऋषिः । मरुतो देवताः । (१–१४) प्रथमादिचतुर्दशर्चां जगती, (१५) पञ्चदश्याश्च त्रिष्टुप् छन्दसी ॥

॥६॥ वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा मरुद्भ्यः ।
अपो न धीरो मनसा सुहस्त्यो गिरः समञ्जे विदथेष्वाभुवः ॥१॥

64

Vṛíshṇe ṣárdhāya súmakhāya vedháse nódhaḥ suvṛiktím prá bharā marúdbhyaḥ | apó ná dhī́ro mánasā suhástyo gíraḥ sám añje vidátheshv ābhúvaḥ || 1 ||

Men invoke you in the tumult of life and solicit your help in the wealth-bestowing conflicts. O mighty God, we always implore you to assist us in combating the struggle of life with success. 6

O resplendent God, the wielder of punitive actions, you have always assisted men of discretion, in the overturn of the seven cities; you take away wealth from the wicked and provide it to the generous. 7

O resplendent God, provide for us food in abundance—plentiful as water; O hero Lord, may we have it in plenty, like water flowing on every side. 8

Praises have been offered to you, O resplendent God, by the most enlightened men; they have been addressed to you with reverence. May you grant us abundant riches procured through your earnest deliberations. May He who has acquired wealth and wisdom come hither again and again in the mornings. 9

64

O sustainer of devotion, bring gifts to offer to the majestic vital principles, so that we may attain wisdom and strength. I compose my very well-thought-of songs, and with folded hands and firm faith sing them to you as fluently as the flowing stream of water, and thereby make my sacred performances effective. 1

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥२॥
युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव ।
दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥३॥
चित्रैरञ्जिभिर्वपुषे व्यञ्जते वक्षःसु रुक्माँ अधि येतिरे शुभे ।
अंसेष्वेषां नि मिमृक्षुॠष्टयः साकं जज्ञिरे स्वधया दिवो नरः ॥४॥
ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत ।
दुहन्त्यूधर्दिव्यानि धूतयो भूमिं पिन्वन्ति पयसा परिज्रयः ॥५॥

té jajñire divá rishvása uksháṇo rudrásya máryā ásurā arepásaḥ | pāvakásaḥ śúcayaḥ sū́ryā iva sátvāno ná drapsíno ghorávarpasaḥ || 2 || yúvāno rudrā́ ajárā abhoggháno vavakshúr ádhrigāvaḥ párvatā iva | drilhā́ cid víśvā bhúvanāni pā́rthivā prá cyāvayanti divyā́ni majmánā || 3 || citraír añjíbhir vápushe vy àñjate vákshassu rukmā́ñ ádhi yetire śubhé | áṅseshv eshāṃ ní mimrikshur rishṭáyaḥ sākáṃ jajñire svadháyā divó náraḥ || 4 || īśānakríto dhúnayo riśā́daso vā́tān vidyútas távishībhir akrata | duhánty ū́dhar divyā́ni dhū́tayo bhū́mim pinvanti páyasā párijrayaḥ || 5 ||

॥७॥ पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।
अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् ॥६॥
महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।
मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वम् ॥७॥

pínvanty apó marútaḥ sudā́navaḥ páyo ghritávad vidátheshv ābhúvaḥ | átyaṃ ná mihé ví nayanti vājínam útsaṃ duhanti stanáyantam ákshitam || 6 || mahisháso māyínaś citrábhānavo giráyo ná svátavaso raghushyádaḥ | mrigā́ iva hastínaḥ khādathā vánā yád ā́ruṇīshu távishīr áyugdhvam || 7 ||

These (vital principles) lofty and strong, life-giving, free from spot and stain and radiant as the sun's rays are the off-springs of the vital cosmic elements; awful in form like giants, they cherish the spiritual elixir and, for the good of humanity, send down rains to this earth. 2

These vital principles are young and are slayers and subduers of evil forces and are also very progressive. And being irresistible they make all beings tremble with their mighty strength. Even the very strong men, of both earth and heaven, feel shaky before them. 3

With various glittering clouds they adorn and exhibit their splendour; for glamour they bind golden chains on their breast. They wear lances on their shoulders. To punish the wicked, they reveal themselves in the celestial region with their inborn strength. 4

They are loud-roarers, bestowers of strength, devourers of adversaries. They cause the winds to flow, they cause the lightnings to flash with their powers. These restless shakers drain the udders of the heavenly cow, and ever-wandering round, fill the earth with milk. 5

These very effective bounteous powers come to shower blessings as plentiful as the sacred ones available in solemn rites. They guide the clouds as if they were the horses to be trained, and milk the thundering cloud so that it may ever rain without stopping. 6

Mighty, with wondrous power and marvellously bright, strong like mountains, you guide swiftly on your way. O mighty powers, like wild elephants you consume the forests when you assume your strength among the bright red flames. 7

सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः ।
क्षपो जिन्वन्तः पृषतीभिर्ऋष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥८॥
रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।
आ वन्धुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥९॥
विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।
अस्तार इषुं दधिरे गभस्त्योरनन्तशुष्मा वृषखादयो नरः ॥१०॥

siṅhā́ iva nānadati prácetasaḥ piṣā́ iva supíṣo viṣvávedasaḥ | kshápo jínvantaḥ príshatībhir ṛishṭíbhiḥ sám ít sabā́dhaḥ ṣávasā́himanyavaḥ || 8 || ródasī á vadatā gaṇaṣriyo nṛíshācaḥ ṣūrāḥ ṣávasā́himanyavaḥ | á vandhúreshv amátir ná darṣatá vidyún ná tasthau maruto rátheshu vaḥ || 9 || viṣvávedaso rayíbhiḥ sámokasaḥ sámmiṣlāsas távishībhir virapṣínaḥ | ástāra íshuṃ dadhire gábhastyor anantáṣushmā vṛíshakhādayo náraḥ || 10 ||

॥८॥ हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो न पर्वतान् ।
मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥११॥
घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥१२॥
प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत ।
अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति ॥१३॥

hiraṇyáyebhiḥ pavíbhiḥ payovṛídha új jighnanta āpathyò ná párvatān | makhā́ ayā́saḥ svasṛíto dhruvacyúto dudhrakṛíto marúto bhrā́jadṛishṭayaḥ || 11 || ghṛíshuṃ pāvakáṃ vanínaṃ vícarshaṇiṃ rudrásya sūnúṃ havásā gṛiṇīmasi | rajastúraṃ tavásaṃ mā́rutaṃ gaṇám ṛijīshíṇaṃ vṛíshaṇaṃ saṣcata ṣriyé || 12 || prá nū́ sá mártaḥ ṣávasā jánāñ áti tasthaú va ūtí maruto yám ā́vata | árvadbhir vā́jaṃ bharate dhánā nṛíbhir āpṛíchyaṃ krátum ā́ ksheti púshyati || 13 ||

Exceedingly vigilant, these vital principles roar like a lion, glamorous with glittering ornaments; and these all-knowing, valorous and glorious ones may combine amongst themselves like the spotted deer and attack evils with the fury of a serpent. 8

These vital principles march in a group, befriending and protecting men through strength and attacking with the fury of a serpent, bless the earth and heaven. The lightning appears to be seated on the aura of vitality consisting of these vital principles, with its glory seen from every side. 9

These vital principles, endowed with mighty vigour, dwelling in the prime source of wealth and wisdom, possess the treasure of all precious virtues. They are brave masters of infinite powers and promoters of all sweet melodies. Like archers, they have laid their arrows on their arms. 10

These divine vital principles with golden fellies augment the rain and drive the big clouds asunder as elephants. These are self-moving, brisk and unwearied and they overthrow even the firm hills; and they with bright lances make all things reel. 11

With prayers we invoke the group of cosmic vital principles, the brisk, the bright, the worshipful and always active. May we cleave to the strong band of vital principles for happiness, as these principles are vigorous, impetuous and offer exhilarating boons. 12

O vital principles, verily, the man whom you guard with your help surpasses all mankind in strength. Then he performs beneficial and glorious acts, and blessed with your power he thus attains wealth, renown and prosperity. 13

चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन ।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥१४॥
नू ष्ठिरं मरुतो वीरवन्तमृतीषाहं रयिमस्मासु धत्त ।
सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥१५॥

carkrítyam marutaḥ pritsú dushṭáraṃ dyumántaṃ súshmam maghávatsu dhattana | dhanasprítam ukthyàṃ visvácarshaṇiṃ tokám pushyema tánayaṃ satáṃ hímaḥ || 14 || nú shṭhirám maruto vīrávantam ritīsháhaṃ rayím asmásu dhatta | sahasríṇaṃ satínaṃ sūsuvánsam prātár - || 15 ||

[अथ द्वादशोऽनुवाकः ॥] (६५) पञ्चषष्टितमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य शाक्त्यः पराशर ऋषिः । अग्निर्देवता । द्विपदा विराट् छन्दः ॥

॥९॥ पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम् । १
सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः ॥१॥ २
ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम । ३
वर्धन्तीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातम् ॥२॥ ४
पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु । ५
अत्यो नाज्मन्त्सर्गप्रतक्तः सिन्धुर्न क्षोदः क ईं वराते ॥३॥ ६
जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति । ७
यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥४॥ ८

65

Paṣvá ná tāyúṃ gúhā cátantaṃ námo yujānáṃ námo váhantam | sajóshā dhírāḥ padaír ánu gmann úpa tvā sīdan víṣve yájatrāḥ || 2 || ritásya devá ánu vratá gur bhúvat párishṭir dyaúr ná bhúma | várdhantīm ápaḥ panvá súsisvim ritásya yónā gárbhe sújātam || 4 || pushṭír ná raṇvá kshitír ná prithví girír ná bhújma kshódo ná ṣambhú | átyo nájman sárgapratakta̤ḥ síndhur ná kshódaḥ ká īṃ varāte || 6 || jamíḥ síndhūnām bhráteva svásrām íbhyān ná rájā vánany atti | yád vátajūto vánā vy ásthād agnír ha dāti róma prithivyáḥ || 8 ||

O vital principles, may our familiarity with your mysteries make our children and grandchildren to be praiseworthy, glorious, invincible, brilliant, rich and strong. May we, thereupon, live a hundred winters, with our prosperous family. 14

O vital principles, may we be able to harness your powers for being durable and formidable, and also ever-increasing in hundred and thousand ways. Enriched with prayers, may this knowledge come to us soon. 15

65

All wise holy worshippers together, with reverence, track you (fire-divine) like a thief lurking in a dark cave with a stolen cow. They establish communion with you and keep your company. 1

Íḷe dyávāprithiví pūrvácittaye 'gním gharmám surúcam yámann ishṭáye | yábhir bháre kārám áṅṣāya jínvathas tábhir ū shú ūtíbhir aṣviná gatam || 1 ||

Bestow on us for our selfless noble actions the life of the realized resplendent self, and for the performance of noble actions and for our strength such food and nourishment as may provide us with good progeny. May we live long along with our vigorous descendants. May we have all strength in our sense-organs for our prosperity. 2

O realized architects of the inner realm, bestow sustenance upon us, upon our body chariot, upon our horse-like senses. Let everyone daily acknowledge our victorious wealth and may we triumph in our battle of life, over our foes, whether strangers or kinsmen. 3

I invoke for protection the inner self, with its perpetual companion, the architect of the inner realm, the mighty realized soul. I invite wisdom, vigour, vitality, cosmic light, cosmic plasma and the twin faculties to share my spiritual joy. May they direct us to wealth, wisdom and victory. 4

May the realized seer furnish us with ample wisdom to conquer all evils. May the enlightened and victorious self bring us victory in our struggle. May the friendly, the venerable and indivisible Lord, along with His bounties including the oceans, the earth and the celestial regions, grant us our wishes. 5

112

During the early hours, for preliminary meditation, I adore heaven and earth, fire and pleasant sunshine. O twin divines, may you come willingly with those aids which inspire men to conquer in the battle of life. 1

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे ।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम् ॥२॥
युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना ।
याभिर्धेनुमस्वं पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम् ॥३॥
याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति ।
याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतम् ॥४॥
याभी रेभं निवृतं सितमद्भ्य उद्वन्दनमैरयतं स्वर्दृशे ।
याभिः कण्वं प्र सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥५॥

yuvór dānáya subhárā asaşcáto rátham á tasthur vacasám ná mántave | yábhir dhíyó 'vathaḥ kármann ishṭáye tábhir — || 2 || yuvám tásām divyásya praşásane vişám kshayatho amŕtasya majmánā | yábhir dhenúm asvàm pínvatho narā tábhir — || 3 || yábhiḥ párijmā tánayasya majmánā dvimatá tūrshú taráṇir vibhúshati | yábhis trimántur ábhavad vicakshaṇás tábhir — || 4 || yábhī rebhám nívṛitaṃ sitám adbhyá úd vándanam aírayataṃ svàr dṛişé | yábhiḥ káṇvam prá síshāsantam ávataṃ tábhir — || 5 ||

॥२४॥

याभिरन्तकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः ।
याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥६॥
याभिः शुचन्तिं धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये ।
याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥७॥

yábhir ántakaṃ jásamānam áraṇe bhujyúṃ yábhir avyathíbhir jijinváthuḥ | yábhiḥ karkándhuṃ vayyàṃ ca jínvathas tábhir — || 6 || yábhiḥ şucantíṃ dhanasáṃ sushaṃsádaṃ taptáṃ gharmám omyávantam átraye | yábhiḥ príşnigum purukútsam ávataṃ tábhir — || 7 ||

Wherewith you defend the noble thoughts and help in efforts for attaining our objectives, with those aids, O twin divines, may you come willingly here. 2

By the vigour infused out of the celestial nectar, you have been able to rule over all men. Wherewith the poor milch-cows are made to furnish plentiful milk—with those aids O twin divines, may you come willingly here. 3

The circumambient swifit-moving wind is the father and the two upper and lower pieces of attrition of wood are the mother, and the child produced is the fire, which in its turn further is strengthened by the wind. Wherewith the priest performing the three kinds of the fire-ritual (with oblations of food materials, butter or medicinal herbs), or the three-functional devotee, through knowledge, actions and worship attained his objectives—with those aids, O twin divines, may you come willingly here. 4

Wherewith you have been lifting up the submerged priests who are cast (in the well of ignorance), and also worshippers to behold the divine light, and by which you protect an academic intellectual, longing to see the light —with those aids, O twin-divines, may you come willingly here. 5

By which you rescue a servant of mankind, about to be destroyed, from the traps of the wicked, by which you preserve a rescuer on a mission, suddenly caught into difficulties and by which you relieve craftsmen and men belonging to a common fellowship — with those aids, O twin-divines, may you come willingly here. 6

By which you provide habitation to rich, liberal and holy, and you render the scorching heat pleasurable to a sage, who is free from three kinds of miseries, and by which you preserve a space-pilot and arsenal-master—with those aids, O twin-divines, may you come willingly here. 7

याभिः शचीभिर्वृषणा परावृजं प्रान्धं श्रोणं चक्षस एतवे कृथः ।
याभिर्वर्तिकां ग्रसिताममुञ्चतं ताभिरू षु ऊतिभिरश्विना गतम् ॥८॥
याभिः सिन्धुं मधुमन्तमसश्चतं वसिष्ठं याभिरजरावजिन्वतम् ।
याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥९॥
याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम् ।
याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥१०॥

yábhiḥ ṣácībhir vṛishaṇā parāvṛíjam prándhám ṣroṇám cákshasa étave kṛitháḥ | yábhir vártikām grasitám ámuñcatam tábhir — ||8|| yábhiḥ síndhum mádhumantam ásaṣcatam vásishṭham yábhir ajarāv ájinvatam | yábhiḥ kútsam ṣrutáryam náryam ávatam tábhir — || 9 || yábhir viṣpálām dhanasám atharvyàm sahásramīḷha ājáv ájinvatam | yábhir váṣam aṣvyám preṇím ávatam tábhir — || 10 ||

॥३५॥ याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।
कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥११॥
याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे ।
याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतम् ॥१२॥
याभिः सूर्यं परियाथः परावति मन्धातारं क्षैत्रपत्येष्वावतम् ।
याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥१३॥

yábhiḥ sudānū auṣijáya vaṇíje dīrghásravase mádhu kóṣo ákṣharat | kakshívantam stotáram yábhir ávatam tábhir — || 11 || yábhī rasám kshódasodnáḥ pipinváthur anaṣvám yábhī rátham ávatam jishé | yábhis triṣóka usríyā udájata tábhir — || 12 || yábhiḥ sūryam pariyatháḥ parāváti mandhātáram kshaítrapatyeshv ávatam | yábhir vípram prá bharádvājam ávatam tábhir — || 13 ||

By which bounteous and virtuous actions, O showerers of blessings, you provide shelter to a banished and eyes to a blind, ears to a deaf and limbs to a lame, and by which you set free a quail bird seized by a wolf — with those aids, O twin-divines, may you come willingly here. 8

By which you cause sweet rivers to flow ; by which you, who are exempt from decay, and gratify the most celebrated, by which you protect a generous, well-versed in the Vedic lore, and best amongst leaders —with those aids, O twin-divines, may you come willingly here. 9

By which you enable an opulent stationary army,—even when it is unable, —to march in battles where thousands of benefits are to be gained and by which you protect vigorous, inspiring and charming youths — with those aids, O twin-divines, may you come willingly here. 10

O bounteous donors, by which clouds shed sweet rain water for the sake of a rich merchant, and by which you protect an industrious devotee—with those aids, O twin-divines, may you come willingly here. 11

By which, you fill a dry river-bed with forcefully flowing water, by which you drive a chariot to victory without exertion to horses and by which persons involved in all the three types of anxiety are recovered—with those aids, O twin-divines, may you come hither. 12

By which you encompass the sun, when far off (to extricate him from total eclipse) ; by which you defend an aeronautical architect in the discharge of his essential duties, and by which you protect a farsighted who is in charge of food stores—with those aids, O twin-divines, may you come willingly here. 13

याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम्।
याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू पु ऊतिभिरश्विना गतम्॥१४॥
याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः।
याभिर्व्यश्वमुत पृथिमावतं ताभिरू पु ऊतिभिरश्विना गतम्॥१५॥

yā́bhir mahā́m atithi-gvā́ṃ kaṣojúvaṃ dívodāsaṃ ṣambarahátya ā́vatam | yā́bhiḥ pūrbhídye trasádasyum ávataṃ tā́bhir — || 14 || yā́bhir vamrā́ṃ vipipānám upastutā́ṃ kalíṃ .yā́bhir vittájāniṃ duvasyáthaḥ | yā́bhir vyàṣvam utá príthim ávataṃ tā́bhir — || 15 ||

॥३६॥ याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः।
याभिः शारीरजतं स्यूमरश्मये ताभिरू पु ऊतिभिरश्विना गतम्॥१६॥
याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना।
याभिः शर्यातमवथो महाधने ताभिरू पु ऊतिभिरश्विना गतम्॥१७॥
याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः।
याभिर्मनुं शूरमिषा समावतं ताभिरू पु ऊतिभिरश्विना गतम्॥१८॥
याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतम।
याभिः सुदास ऊहथुः सुदेव्यं ताभिरू पु ऊतिभिरश्विना गतम्॥१९॥

yā́bhir narā ṣayáve yā́bhir átraye yā́bhiḥ purā́ mánave gātúm ishā́thuḥ | yā́bhiḥ ṣā́rīr ā́jataṃ syū́maraṣmaye tā́bhir — || 16 || yā́bhiḥ páṭharva jáṭharasya majmánāgnír nā́dīdec citá iddhó ajmann ā́ | yā́bhiḥ ṣáryātam ávatho mahādhané tā́bhir — || 17 || yā́bhir aṅgiro mánasā niraṇyáthó 'graṃ gáchatho vivaré góarṇasaḥ | yā́bhir mánuṃ ṣū́ram ishā́ sam-ávataṃ tā́bhir — || 18 || yā́bhiḥ pátnīr vimadā́ya nyūhá-thur ā́ gha va yā́bhir aruṇī́r áṣikshatam | yā́bhiḥ sudā́sa ūhā́thuḥ sudevyàṃ tā́bhir — || 19 ||

By which you defend mighty and hospitable persons, and water-impellers and also the devotees of the learned in a battle, having destroyed the devil, and by which you protect them from the horrors of the aliens—with those aids, O twin-divines, may you come here. 14

By which you preserve such persons as are not of much significance, and yet very popular in social amusements, and by which you help married astronomers, and also such persons of extensive knowledge, yet deprived of vigour —with those aids, O twin-divines, may you come willingly here. 15

By which, you bless persons, who are exempt from three types of miseries, and show them a way for their liberation; by which you urge cavaliers to attack with arrows upon the foes of justice—with those aids, O twin-divines, may you come willingly here. 16

By which cadets shine with strength of form in battles, like a blazing fire piled up with fuel ; by which you defend the adepts in war—with those aids, O twin-divines, may you come willingly here. 17

By which, with contended mind, you delight in praise and thence proceed to vital stages to restore shrouded wisdom; and further, wherewith you sustain brave seekers with sustenance—with those aids, O twin-divines, may you come willingly here. 18

Wherewith you help men addicted to drinks and men with forsaken wives, and wherewith for their delight, you help celebrate maidens, and thereby confer excellent wealth to deserving and learned persons—with those aids, O twin-divines, may you come willingly here. 19

याभिः शंताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुम् ।
ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतम् ॥२०॥
॥३७॥ याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वन्तमावतम् ।
मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतम् ॥२१॥
याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।
याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतम् ॥२२॥

yábhiḥ sáṃtātī bhávatho dadāṣúshe bhujyúṃ yábhir ávatho yábhir ádhrigum | omyávatīṃ subhárām ṛitastúbhaṃ tábhir — || 20 ||

yábhiḥ kṛiṣánum ásane duvasyátho javé yábhir yúno árvantam ávatam | mádhu priyám bharatho yát sarádbhyas tábhir — || 21 || yábhir náraṃ goshuyúdhaṃ nṛisháhye kshétrasya sātá tánayasya jínvathaḥ | yábhī ráthaṅ ávatho yábhir árvatas tábhir — || 22 ||

याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतम् ।
याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥२३॥
अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥२४॥
द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥२५॥

yábhiḥ kútsam ārjuneyáṃ ṣatakratū prá turvítim prá ca dabhítim ávatam | yábhir dhvasántim purushántim ávataṃ tábhir — || 23 || ápnasvatīm aṣvinā vácam asmé kṛitáṃ no dasrā vṛishaṇa manīshám | adyūtyé 'vase ní hvaye vaṃ vṛidhé ca no bhavataṃ vája-sātau || 24 || dyúbhir aktúbhiḥ pári pātam asmán árishṭebhir aṣvinā saúbhagebhiḥ | tán no — || 25 ||

Wherewith you bring bliss to him who offers homage, wherewith you protect a rescuers on a noble mission, and mobile men and wherewith you provide nourishing food to upholders of truth—with those aids, O twin-divines, may you willingly come here. 20

Wherewith you defend weak men in battle, and help the speedy young horses, and wherewith you deliver delicious honey to bees—with those aids, O twin-divines, may you willingly come here. 21

Wherewith you protect leaders contending for wealth and wisdom ; wherewith you assist them in the acquisition of their share of produce from fields and preserve their chariot and their energy—with those aids, O twin-divines, may you willingly come here. 22

Wherewith you protect all intelligent and dynamic devotees and protect them from a suppresser, a murderer, and one who creates differences among men—with those aids O twin-divines, may you willingly come here. 23

O twin-divines, showerers of benefits, subduers of our evil desires and invigorators of our understanding, may you sanctify our words with works. We invoke you both for our protection in the last watch of our life's night. May you be with us for increase in the provision of food. 24

O twin-divines, may you cherish us both by day and by night with undiminished blessings ; may friend, venerable and indivisible Lord with His bounties including the oceans, the earth and the celestial regions, grant us our wishes. 25

(११३) त्रयोदशोत्तरशततमं सूक्तम्

(१–२०) विंशत्यृचस्यास्य सूक्तस्याङ्गिरसः कुत्स ऋषिः । (१, २–२०) प्रथमर्चः पूर्वार्धस्य द्वितीयाद्येकोनविंशतीनाञ्च उषाः, (१) प्रथमाया उत्तरार्धस्य च रात्रिर्देवते । त्रिष्टुप् छन्दः ॥

॥१॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥१॥
रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥२॥
समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥३॥
भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।
प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥४॥
जिह्मश्ये३ चरितवे मघोन्याभोगय इष्टये राय उ त्वम् ।
दभ्रं पश्यद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा ॥५॥

113

Idáṃ sréshṭhaṃ jyótishaṃ jyótir ágāc citráḥ praketó ajanishṭa víbhva | yáthā prásūtā savitúḥ saváyaṅ evá rátry usháse yónim araik || 1 || rúṣadvatsa rúṣatı ṣvetyágād áraig u krishṇá sádanāny asyaḥ | samanábandhu amríte anucí dyávā várṇaṃ carata āminané || 2 || samānó ádhva svásror anantás tám anyányā carato devásishṭe | ná methete ná tasthatuḥ suméke náktoshásā sámanasa vírūpe || 3 || bhásvatı netrí sūnrítānām áceti citrá ví dúro na avaḥ | prárpya jágad vy ù no rāyó akhyad ushá ajīgar bhúvanāni vísva || 4 || jihmaṣyè cáritave maghóny ābhogáya ishṭáye rāyá u tvam | dabhrám páṣyadbhya urviyá vicáksha ushá || 5 ||

॥२॥ क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै ।
विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ॥६॥

kshatráya tvaṃ ṣrávase tvam mahīyá ishṭáye tvam ártham iva tvam ityaí | vísadriṣā jīvitábhipracáksha ushá — || 6 ||

113

This most excellent light amid all lights has arrived ; the wonderful, the far-extending, the manifest has been born. As the night is born for the sun's uprising, so she has yielded a birthplace for the dawn. 1

The white shining dawn, the parent of the bright sun, has arrived ; to her the dark one (night) has resigned her dwelling. Both of them, the night and dawn, friendly to each other, immortal, following each other, and mutually effacing each other's complexion, traverse the heaven. 2

The path of these sisters is common and unending. Guided by the radiant sun, they travel alternately,—though different in hues, yet one-minded. Night and dawn, giving birth to all things, clash not, neither do they stand still. 3

Bright guide of benevolent actions, she is seen by us. This tinted dawn, having illuminated the world, has unfolded the portals of our door and makes our riches manifest. She swallows as it were all the regions to be given back again.

The magnificent dawn awakens persons who have been sleeping—some to enjoyment, others devotion, and some others to wealth. She enables those who are almost lightless to see distinctly. The dawn has swallowed as it were all the regions to be given back again. 5

She awakens some to acquire wealth, others to earn food, and a few to achieve greatness ; she prompts some to sacrifices; some to pursue their own professions, and others to activities—and thus inspires all men to their various means of maintaining life. The dawn swallows as it were all regions to be given back again. 6

एषा दि॒वो दु॑हि॒ता प्रत्य॑दर्शि व्यु॒च्छन्ती॑ युव॒तिः शु॒क्रवा॑साः ।
विश्व॒स्येशा॑ना॒ पार्थि॑वस्य॒ वस्व॒ उषो॑ अ॒द्येह सु॑भगे॒ व्यु॑च्छ ॥७॥
प॒रा॒य॒ती॒नामन्वे॑ति॒ पाथ॒ आय॒ती॒नां प्र॑थ॒मा शश्व॑तीनाम् ।
व्यु॒च्छन्ती॑ जी॒वमु॑दी॒रय॑न्त्यु॒षा मृ॒तं कं च॒न बो॒धय॑न्ती ॥८॥
उषो॒ यद॒ग्निं स॒मिधे॑ च॒कर्थ॒ वि यदाव॒श्चक्ष॑सा॒ सूर्य॑स्य ।
यन्मानु॑षान्य॒क्ष्यमा॑णाँ॒ अजी॑ग॒स्तद्दे॒वेषु॑ चकृ॒षे भ॒द्रमप्नः॑ ॥९॥
किया॒त्या यत्स॒मया॒ भवा॑ति॒ या व्यू॒षुर्याश्च॑ नू॒नं व्यु॒च्छान् ।
अनु॒ पूर्वाः॑ कृपते वावशा॒ना प्र॒दीध्या॑ना॒ जोष॑म॒न्याभि॑रेति ॥१०॥

eshá divó duhitá práty adarṣi vyuchántī yuvatíḥ ṣukrávasāḥ | víṣvasyéṣānā párthivasya vásva úsho adyéhá subhage vy ùcha || 7 || parāyatīnám ánv eti pátha āyatīnám prathamá ṣáṣvatīnām | vyuchántī jīvám udīráyanty ushá́ mṛitám kám caná bodháyantī || 8 || úsho yád agním samídhe cakártha ví yád á́vas cákshasā sū́ryasya | yán mánushān yakshyámāṇāñ ájīgas tád devéshu cakṛishe bhadrám ápnaḥ || 9 || kíyāty á́ yát samáyā bhávāti yá́ vyūshúr yáṣ ca nūnám vyuchán | ánu pū́rvāḥ kṛipate vāvaṣāná pradī́dhyana jósham anyábhir eti || 10 ||

॥३॥ ई॒युष्टे ये पूर्व॑तरा॒मप॑श्यन्व्यु॒च्छन्ती॑मु॒षसं॒ मर्त्या॑सः ।
अ॒स्माभि॑रू॒ नु प्र॑ति॒चक्ष्या॑भू॒दो ते य॑न्ति॒ ये अ॑प॒रीषु॒ पश्या॑न् ॥११॥
या॒व॒यद्द्वे॑षा ऋत॒पा ऋ॑ते॒जाः सु॑म्ना॒वरी॑ सू॒नृता॑ ई॒रय॑न्ती ।
सु॒म॒ङ्ग॒लीर्बिभ्र॑ती दे॒ववी॑तिमि॒हाद्योषः॒ श्रेष्ठ॑तमा॒ व्यु॑च्छ ॥१२॥

īyúsh ṭé yé pū́rvatarām ápaṣyan vyuchántīm ushásam mártyāsaḥ | asmábhir ū nú praticákshyābhūd ó té yanti yé aparíshu páṣyān || 11 || yāvayáddveshā ṛitapá ṛitejáḥ sumnā-várī sūnṛítā īráyantī | sumaṅgalī́r bíbhratī devávītim ihá-dyóshaḥ ṣréshṭhatamā vy ùcha || 12 ||

The young maid, white-robed, the daughter of the celestial regions, the maiden with all earthly treasures, is beheld coming forward, dissipating the darkness, May you, auspicious dawn, shine upon us here and now. 7

Following the path of the mornings that have departed, she is the first of endless mornings to come hereafter. At her rising, she urges forth the living beings and awakens them from slumber, even them who lay like dead. 8

O divine light, inasmuch as you have caused the sacred fire to be kindled, inasmuch as you have awakened men to perform selfless deeds, you have performed the benevolent acts and have done good service to the enlightened ones. 9

For how long a period is it that they should be together—dawns that have shone in the past, and dawns to shine hereafter ? For how long a period would dawns continue to stay ? And for how long a period would they rise, still desirous to bring us light ? The dawns pursue the functions of their predecessors and go forth shining gloriously with the other dawns. 10

Gone are the men, who in the days before us have been looking on the rising of earlier dawns. We, the living, now behold her brightness, and they are coming who shall see her hereafter. 11

May the beings, hostile to acts of devotion, withdraw : for the dawn is the protectress of sacred rites, the guardian of law, the giver of bliss, the awakener of pleasant voices, auspicious, inspiring, the bearer of homage for the divines. May the bright dawn shine on us here and now. 12

शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी ।
अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः ॥१३॥
व्य१ञ्जिभिर्दिव आतास्वद्यौदप कृष्णां निर्णिजं देव्यावः ।
प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन ॥१४॥
आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।
ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥१५॥

śáśvat puróshá vy ùvāsa devy átho adyédáṃ vy àvo maghónī | átho vy ùchād úttarāñ ánu dyū́n ajárāmṛ́tā carati svadhábhiḥ || 13 || vy àñjíbhir divá átasv adyaud ápa krishṇā́ṃ nirṇíjaṃ devy àvaḥ | prabodháyanty aruṇébhir áśvair óshā́ yāti suyújā ráthena || 14 || avā́hantī póshyā vā́ryāṇi citráṃ ketúṃ kriṇute cékitānā | īyúshīṇām upamā́ śáśvatīnām vibhātīnā́m prathamóshā́ vy àśvait || 15 ||

॥४॥ उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।
आरैक्पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥१६॥
स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः ।
अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत् ॥१७॥
या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय ।
वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा ॥१८॥

úd īrdhvaṃ jīvó ásur na ā́gād ápa prā́gāt táma ā́ jyótir eti | ā́raik pánthāṃ yā́tave sū́ryāyā́ganma yátra pratiránta ā́yuḥ || 16 || syū́manā vācá úd iyarti váhni stávāno rebhá usháso vibhātī́ḥ | adyā́ tád ucha gṛiṇaté maghony asmé ā́yur ní didīhi prajā́vat || 17 || yā́ gómatīr ushásaḥ sárvavīrā vyuchánti dāśúshe mártyāya | vāyór iva sūnṛ́tānām udarké tā́ aśvadā́ aśnavat somasútvā || 18 ||

The divine dawn, the source of aesthetic wealth has been shining from days eternal. She still shows her light today. So will the immortal dawn shine and move on and on. Exempt from decay or death she goes on as ever in her splendour. 13

The divine dawn on the horizon shines in splendour: She throws off her veil of darkness and, awakening the world, comes at it were, on her well-harnessed chariot with purple horses. 14

Bringing with her life-sustaining blessings, and giving life to the lifeless, she imparts her brilliant lustre to the world. The dawn of today has appeared as the last one of the countless mornings that have gone by, but she is the first among the brilliant dawns that are to come. 15

Arise; inspiring life is revived again; darkness has passed away; the brilliant light is approaching. Dawn has opened a path for the sun to travel ; we arrive at a stage where we start a fresh life. 16

The divine poet, singing the praises of the refulgent mornings, repeats the well-knit words of the sacred lore. So shine today, O dawn, the possessor of affluence, on him who adores; confer on us the gift of life and offspring. 17

May not only the mortal men, but also horses, cattle and progeny prosper in the light shed by dawns. May those persons who offer libations of herbal extracts and recite hymns of praises become like the wind, worthy of favour of dawns. 18

माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि ।
प्रशस्तिकृद्ब्रह्मणे नो व्युच्छा नो जने जनय विश्ववारे ॥१९॥
यच्चित्रमप्न उषसो वहन्तीजानाय शशमानाय भद्रम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥२०॥

mātā́ devā́nām áditer ánīkaṃ yajñásya ketúr bṛihatī́ ví bhāhi | praṣastikṛíd bráhmaṇe no vy ùchā́ no jáne janaya viṣvavāre || 19 || yác citrám ápna usháso váhantījānā́ya ṣaṣamānā́ya bhadrám | tán no — || 20 ||

(११४) चतुर्दशोत्तरशततमं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्याङ्गिरसः कुत्स ऋषिः । रुद्रो देवता । (१–९) प्रथमादि-नवर्चां जगती, (१०–११) दशम्येकादश्योश्च त्रिष्टुप् छन्दसी ॥

॥५॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥१॥
मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥२॥
अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥३॥

114

Imā́ rudrā́ya taváse kapardíne kshayádvīrāya prá bharāmahe matī́ḥ | yáthā ṣám ásad dvipáde cátushpade víṣvam pushṭáṃ grā́me asmínn anāturám || 1 || mṛiḷā́ no rudrotá no máyas kṛidhi kshayádvīrāya námasā vidhema te | yác cháṃ ca yóṣ ca mánur āyejé pitā́ tád aṣyāma táva rudra práṇītishu || 2 || aṣyā́ma te sumatíṃ devayajyáyā kshayádvīrasya táva rudra mīḍhvaḥ | sumnayánn íd víṣo asmā́kam ā́ carárishṭavīrā juhavāma te havíḥ || 3 ||

O mother of divine powers, the life-force of the earth, and the ensign of sacrificial works, may you shine forth exalted. May you rise up, bestowing reward on our devotion. O, the universally respected maid, make us eminent among the people. 19

Whatever splendid wealth the dawns bring with them, may it be a blessing to the man who offers praise and worship. May friend, venerable and indivisible Lord with His bounties, including oceans, the earth, and celestial regions, grant us our wishes. 20

114

We offer these praises to the divine healer, with braided splendours and protector of brave heroes, in order that health and strength may be enjoyed and the bipeds and quadrupeds and all beings around us are nourished and become exempt from disease. 1

O divine healer, may you be gracious to us. Grant us happiness and freedom from disease; we offer our salutations to you, O ruler of valiant men. Come to our families, bringing them bliss, and may we obtain that sound health and peace which our ancestors bestow upon us, having obtained them from you. 2

O bounteous divine healer, bestower of happiness and protector of heroes, may we, through your worship, obtain your splendid wisdon. May you favour us with your kindness by making our posterity happy. May our invincible brave men be always safe. May we perform selfless deeds to gratify you. 3

त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥४॥
दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥५॥

tveshám vayám rudrám yajñasádham vankúm kavím ávase ní hvayāmahe | āré asmád daívyam hélo asyatu sumatím íd vayám asyá vrinīmahe || 4 || divó varāhám arushám kapardínam tveshám rūpám námasā ní hvayāmahe | háste bíbhrad bheshajá váryāni sárma várma chardír asmábhyam yansat || 5 ||

॥६॥ इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥६॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥७॥
मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥८॥
उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥९॥

idám pitré marútām ucyate vácah svādóh svádīyo rudráya várdhanam | rásvā ca no amrita martabhójanam tmáne tokáya tánayāya mrila || 6 || má no mahántam utá má no arbhakám má na úkshantam utá má na ukshitám | má no vadhīh pitáram mótá mātáram má nah priyás tanvò rudra rīrishah || 7 || má nas toké tánaye má na āyaú má no góshu má no ásveshu rīrishah | vīrán má no rudra bhāmitó vadhīr havíshmantah sádam ít tvā havāmahe || 8 || úpa te stómān pasupá ivákaram rásvā pitar marutām sumnám asmé | bhadrá hí te sumatír mrilayáttamáthā vayám áva ít te vrinīmahe || 9 ||

We invoke for our preservation the inspirer, the wise and impetuous divine healer; may he remove far from us, the antipathies of natural powers; verily, we aspire for His favours. 4

We invoke Him (the divine healer) from heaven with reverence; Him who is stout as a cloud, as if with braided purple splendours. He is radiant and dazzling. May He be possessed of disease-preventing medicaments, and may He grant us health, protection and a secure home. 5

Thus praise, sweeter than the sweets and congratulatory, is addressed to the divine healer, the father of healing elements. May you grant us; O divine healer, the nourishment sufficient for mortals. May you be gracious to me and my children. 6

O divine healer, may you not injure those amongst us who are old or young; harm not the one who is growing or who is fully-grown. Kill not father or mother, not afflict our personal bodies to which we are so dearly attached. 7

O divine healer, may you not inflict injury on our offspring, or other males, nor on our cows, nor on our horses. Inflamed with anger, may you not kill our valiant men. We invoke you and pay you our homage of oblations for granting these favours. 8

O the father of the healing elements, like a herdsman we offer you praises. May you bestow happiness upon us; we adore you. Your auspicious benevolence is the source of successive delights to us, so verily do we solicit your saving help. 9

आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥१०॥
अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥११॥

āré te goghnám utá pūrushaghnáṃ kshá-yadvīra sumnám asmé te astu | mṛilá ca no ádhi ca brūhi devádhā ca naḥ ṣárma yacha dvibárhāḥ || 10 || ávocāma námo asmā avasyávaḥ sṛiṇótu no hávaṃ rudró marútvān | tán no — || 11 ||

(११५) पञ्चदशोत्तरशततमं सूक्तम्

(१–६) षडृचस्यास्य सूक्तस्याङ्गिरसः कुत्स ऋषिः । सूर्यो देवता । त्रिष्टुप् छन्दः ॥

॥७॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥१॥
सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥२॥
भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥३॥
तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥४॥

115

Citrám devánām úd agād ánīkaṃ cákshur mitrásya váruṇasyāgnéḥ | ā́prā dyávāpṛithiví antáriksham sū́rya ātmā́ jágatas tasthúshaṣ ca || 1 || sū́ryo devím ushásaṃ rócamānām máryo ná yóshām abhy èti paṣcā́t | yátrā náro devayánto yugáni vitanvaté práti bhadrā́ya bhadrám || 2 || bhadrā́ áṣvā harítaḥ sū́ryasya citrā́ étagvā anumádyāsaḥ | namasyánto divá ā́ pṛishṭhám asthuḥ pári dyā́vāpṛithiví yanti sadyáḥ || 3 || tát sū́ryasya devatváṃ tán mahitvám madhyā́ kártor vítataṃ sáṃ jabhāra | yadéd áyukta harítaḥ sadhásthād ā́d rā́trī vásas tanute simásmai || 4 ||

O Lord of heroes, may the cow-killing or man-slaying divine weapons of destruction be kept far away from us. May the felicity granted by you be ours; may you, the owner of mighty two realms (mundane and spiritual), be gracious to us in granting prosperity. 10

Desirous of protection, we say, reverence be to Him; may the mighty divine healer and the healing elements accept our invocations; may friendly, venerable, and indivisible Lord, with His bounties including oceans, the earth and celestial regions, grant us our wishes. 11

115

Yonder has arisen with wonderful divine effulgence the eye of our light, life and energy. He has filled the celestial regions, the earth and the interspace with his glory. This sun is the soul of all that moves or is immovable. 1

The sun follows the divine and brilliant dawns, in the same way, as a young man follows a maiden. For the sake of good rewards, pious persons, aspiring to be divine, perform ceremonies according to seasonal times. 2

The sun ascends the summit of the sky, as if driven by the well-limbed swift horses yoked to it, traversing along a road in the interspace, and circumambulates earth and heaven. Our reverence to the blissful glory of the rays. 3

Such is the divinity, such is the majesty of the radiant sun that, when he sets, he withdraws into himself the diffused light (which has been shed upon the unfinished task). When he withdraws the beams from his aura of glory, as if unyoking the coursers from the chariot, the night extends the veiling darkness over all. 4

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥५॥
अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥६॥

tán mitrásya várunasyābhicákshe sū́ryo rūpám̧ krinute dyór upásthe | anantám anyád rúṣad asya pā́jaḥ krishṇám anyád dharítaḥ ṣám bharanti || 5 || adyā́ devā údita sū́ryasya nír áṅhasaḥ pipritā́ nír avadyā́t | tán no — || 6 ||

[अथ सप्तदशोऽनुवाकः ॥] (११६) षोडशोत्तरशततमं सूक्तम्

(१–२५) पञ्चविंशत्यृचस्यास्य सूक्तस्यौशिजो दैर्घतमसः कक्षीवान् ऋषिः । अश्विनौ देवते । त्रिष्टुप् छन्दः ॥

॥८॥ नासत्याभ्यां बर्हिरिव प्र वृञ्जे स्तोमाँ इयर्म्यभ्रियेव वातः ।
यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥१॥
वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना ।
तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥२॥
तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥३॥

116

Nā́satyābhyām barhír iva prá vriñje stómāñ iyarmy abhríyeva vā́taḥ | yā́v árbhagāya vimadā́ya jāyā́m̧ senājúvā nyūhátū ráthena || 1 || vīḷupátmabhir āṣuhémabhir va devā́nām̧ vā jūtíbhiḥ ṣā́ṣadānā | tád rā́sabho nāsatyā sahásram ājā́ yamásya pradháne jigāya || 2 || túgro ha bhujyúm aṣvinodameghé rayím̧ ná káṣ cin mamrivā́ñ ávāhāḥ | tám ūhathur naubhír atmanvátībhir antarikshaprúdbhir ápodakābhiḥ || 3 ||

In the middle of the heavens, the radiant sun displays his form to enable us to see properly the light and life. His rays extend brilliant power on the one hand and, on the other, bring on the darkness of the night. 5

This day, O divine forces, with the rising of the sun, deliver us from heinous crimes and dishonour. May friendly, venerable and indivisible Lord with His bounties, including oceans, the earth and calestial regions, grant us our wishes. 6

116

Just as the wind drives on the clouds, so do I recite these sacred hymns of praises, addressed to the determined fighters against lawlessness. We welcome them to our sacrificial rituals by trimming the sacred grass in their honour. They have been able to provide the ever-cheerful young person with a bride, having freed her from the clutches of molesting rivals. 1

These determined fighters against lawlessness, moving on rapid vehicles and encouraged by the wise men of society, have overcome thousands of miscreants of society in the maintenance of law and order introduced by the state. 2

O twin-divines, save us from the wicked and send the benevolent helping band of people forming a corps to the sea as a dying man parts with his riches. Whereas this helping corps is involved in difficulties, while fighting against pirates, you help us in rescuing them in your floating boats over the ocean and thus you help them in keeping out of waters. 3

तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥४॥
अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ॥५॥

tisráḥ kshápas trír áhātivrájadbhir nā́satyā bhujyúm ūhathuḥ pataṃgaíḥ | samudrásya dhánvann ārdrásya pāré tribhí ráthaiḥ ṣatápadbhih shálaṣvaiḥ || 4 || anārambhaṇé tád avīrayethām anāsthāné agrabhaṇé samudré | yád aṣvinā ūháthur bhujyúm ástaṃ ṣatáritrāṃ nā́vam ātasthivā́ṅsam || 5 ||

॥५॥ यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति ।
तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥६॥
युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिम् ।
कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ॥७॥
हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् ।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥८॥

yám aṣvinā dadáthuḥ ṣvetám áṣvam agháṣvāya ṣáṣvad ít svastí | tád vāṃ dātrám máhi kīrtényam bhūt paidvó vājí sádam íd dhávyo aryáḥ || 6 || yuváṃ narā stuvaté pajriyā́ya kakshī́vate aradatam púraṃdhim | kārotarā́c chaphā́d áṣvasya vríshṇaḥ ṣatáṃ kumbhā́ṅ asiñcataṃ súrāyāḥ || 7 || himénāgníṃ ghraṅsám avārayethām pitumátīm ū́rjam asmā adhattam | ṛibī́se átrim aṣvinā́vanītam ún ninyathuḥ sárvagaṇaṃ svastí || 8 ||

These fighters against lawlessness may take three nights and three days to reclaim the rescuing corps. In this reconnoitre, revolving cars having hundreds of wheels, drawn by three (i.e. several) pairs of motors, and the big boats may be involved. This triple operation involves the efforts made in the ocean and in sailing across waters and in driving on to the dry land. Finally they succeed in bringing back the corps out of water. 4

O twin-divines, thus by your valour you achieve success where apparently there is nothing to support, nothing to rest upon and nothing to cling to. And here, with the help of a hundred old ships, you are able to help the rescuing corps, and deliver it back to its own headquarters (as if brought back to the father's house). 5

O twin-divines, the armoured car, as if drawn by a motor resembling a white horse, which you have given to the infantry, whose armed vehicles (horses) are indestructible, may ever lead him to success. This precious gift of yours is always to be celebrated. This automobile of the infantry, the scatterer of the enemy, is always to be invoked. 6

O leaders, twin-divines, you gave to the field marshal, belonging to the stout and strong race, the skill of protection. You filled from the casks, designed after the hoofs of horse, hundreds of the containers of a nourishing drink. 7

O twin-divines, may you apply the fire-quenching cold devices to the blazing flames that encompass the civil population. May you supply to the civil area the food-supported strength. May you extricate the area, O twin-divines, from the darkness into which it has been thrown headlong and restore it to every kind of welfare. 8

परा॑व॒तं ना॑सत्यानुदेथामु॒च्चाबु॑ध्नं चक्रथुर्जि॒ह्मबा॑रम् ।
क्षर॒न्नापो॒ न पा॒यना॑य रा॒ये स॒हस्रा॑य॒ तृष्य॑ते॒ गोत॑मस्य ॥९॥
जु॒जु॒रुषो॑ नासत्यो॒त व॒व्रिं प्रामु॑ञ्चतं द्रा॒पिमि॑व॒ च्यवा॑नात् ।
प्राति॑रतं जहि॒तस्यायु॑र्द॒स्रादित्पति॑मकृणुतं क॒नीना॑म् ॥१०॥

párāvatáṃ nāsatyānudethām uccá-budhnaṃ cakrathur jihmábāram | ksháránn ápo ná pāyá-nāya rāyé sahásrāya tríshyate gótamasya || 9 || jujurúsho nāsatyotá vavrím prámuñcataṃ drāpím iva cyávānāt | prátiratam jahitásyáyur dasrád ít pátim akriṇutaṃ kanínām || 10 ||

॥१०॥ तद्वां॑ नरा॒ शंस्यं॒ राध्यं॑ चाभि॒ष्टिम॑न्नासत्या॒ वरू॑थम् ।
यद्वि॒द्वांसा॑ नि॒धिमि॒वाप॑गूळ्हमु॒द्द॑र्श॒तादू॒पथु॒र्वन्द॑नाय ॥११॥
तद्वां॑ नरा स॒नये॒ दंस॑ उ॒ग्रमा॒विष्कृ॑णोमि तन्य॒तुर्न वृ॒ष्टिम् ।
द॒ध्यङ् ह॒ यन्मध्वा॑थर्व॒णो वा॒मश्व॑स्य शी॒र्ष्णा प्र यदी॑मु॒वाच॑ ॥१२॥
अजो॑हवीन्नासत्या क॒रा वां॑ म॒हे याम॑न्पुरुभुजा॒ पुरं॑धिः ।
श्रु॒तं तच्छासु॑रिव वध्रिम॒त्या हिर॑ण्यहस्तमश्विनावदत्तम् ॥१३॥

tád vāṃ narā śáṅsyaṃ rádhyaṃ cābhishṭimán nāsatyā várūtham | yád vidvánsā nidhím ivápagūḷham úd darśatád ūpáthur vándanāya || 11 || tád vāṃ narā sanáye dáṅsa ugrám āvísh kriṇomi tanyatúr ná vrishṭím | dadhyáñ ha yán mádhv ātharvaṇó vām áśvasya śīrshṇá prá yád īm uváca || 12 || ájohavīn nāsatyā kará vām mahé yáman purubhujā púraṃ-dhiḥ | śrutám tác chásur iva vadhrimatyá híraṇyahastam aśvināv adattam || 13 ||

O fighters, against lawlessness, may you raise up wells and other water sources and may you make the base which has been turned upward as to give an appearance of a curved mouth, and thus revive the entire water system which has suffered a lot during war operations; may water be made available as a fine drink for the thirsty innocent civilians. 9

O twin-divines, destroyers of enemies, you have provided new youth and prosperity to the old famished nation, and thereby you have given longevity to the down-trodden country; and thereafter you have made the country lord of several bounteous prosperities. 10

O leaders of the virtuous, and fighters against lawlessness, glorious is that celebrated group of yours, worthy of adoration and to be invoked by us, through the help of which you always rescue the dedicated worshipper from difficulties like a concealed treasure from a place, visible from outside. 11

O leaders, twin-divines, I proclaim with a vehemence that an inflicter of punitive justice and the spiritual leader devoted to non-violence, becomes a preceptor of the mysteries of military science (figuratively meaning 'assuming the head of horse') to meet the emergency for the sake of happiness. 12

O twin-divines, fighters against lawlessness, accomplishers of desires and protectors of men, whenever an intelligent lady invokes you with a deep-felt request, her prayer is granted like a request made by a student to the teacher; you two divines, give to the lady the golden hand of assitance. 13

आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥१४॥
चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम् ।
सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम् ॥१५॥

āsnó vríkasya vártikām abhíke yuváṃ narā nāsatyāmumuktam | utó kavím purubhujā yuváṃ ha krípamāṇam akriṇutaṃ vicákshe || 14 || carítraṃ hí vér ivāchedi parṇám ājā́ khelásya páritakmyāyām | sadyó jáñghām ā́yasīṃ vispálāyai dháne hité sártave práty adhattam || 15 ||

॥११॥ शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकार ।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥१६॥
आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयन्ती ।
विश्वे देवा अन्वमन्यन्त हृद्भिः समु श्रिया नासत्या सचेथे ॥१७॥
यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयन्ता ।
रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥१८॥
रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहन्ता ।
आ जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातम् ॥१९॥

satám meshā́n vrikyè cakshadānám rijrā́svaṃ tám pitā́ndháṃ cakāra | tásmā akshí nāsatyā vicáksha ā́dhattaṃ dasrā bhishajāv anarván || 16 || ā́ vāṃ ráthaṃ duhitā́ sū́ryasya kā́rshmevātishṭhad árvatā jáyantī | vísve devā́ ánv amanyanta hridbhíḥ sám u sriyā́ nāsatyā sacethe || 17 || yád áyātaṃ dívodāsāya vartír bharádvājāyāsvinā háyantā | revád uvāha sacanó rátho vāṃ vrishabhás ca sinsumā́ras ca yuktá || 18 || rayíṃ sukshatráṃ svapatyám ā́yuḥ suvíryaṃ nāsatyā váhantā | ā́ jahnā́vīṃ sámanasópa vā́jais trír áhno bhāgáṃ dádhatīm ayātam || 19 ||

O the leaders, fighters against lawlessness, you liberate the helpless girl from the clutches of the kidnapper, as if the quail from the mouth of a dog that has seized her. You, who are the benefactors of all, have given protection to the intellectuals and those who are engaged in the persuit of knowledge. 14

The foot of an army commander is likely to be cut off like a wing of the bird in an encounter during the night. In such a case, may you provide an iron leg to the commander, so that his army may march under his command to attack the guarded treasure. 15

The innocent straightforward state employee gives hundreds of undue privileges to a party of the vested interests (as if giving a hundred sheep to the butcher to be cut to pieces); the protector of the state passes an order for rendering him blind. The state physicians and surgeons are called to give him back the eyes that were rendered sightless so that he might see again. 16

The daughter of the sun (dawn) ascends your car like a runner to a goal when you win the race with your swift horse. All the divine powers, supported you with eager eyes. This was victory for the truth. 17

O twin-divines, when, on invitation, you go to the dwellings of the devotees, dedicated to learning, and give them ample valuable presents, then your helping chariot contains food and treasure in abundance. Yoked to your chariot are valour and discretion. 18

O defenders of the truth, bearing strength and wealth with posterity, go to the loyal people to give them vigour-sustaining food and other three types of sustenance—clothes, medicines and equipment useful for domestic work. 19

परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः ।
विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम् ॥२०॥
॥१२॥ एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा ।
निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः ॥२१॥
शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः ।
शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् ॥२२॥

párivishṭam jāhushám
viṣvátaḥ sīm sugébhir náktam ūhathū rájobhiḥ | vibhindúnā
nāsatyā ráthena ví párvatāñ ajarayū́ ayātam || 20 ||
ékasyā vástor āvatam ráṇāya váṣam aṣvinā sanáye sa-
hásrā | nír ahatam duchúnā índravantā prithuṣrávaso vri-
shaṇāv árātīḥ || 21 || ṣarásya cid ārcatkásyāvatád ā́ nīcā́d
uccā́ cakrathuḥ pā́tave vā́ḥ | ṣayáve cin nāsatyā ṣácībhir
jásuraye staryàm pipyathur gā́m || 22 ||

अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः ।
पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥२३॥
दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वन्तः ।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥२४॥
प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम् ॥२५॥

avasyaté stuvaté kri-
shṇiyā́ya rijūyaté nāsatyā ṣácībhiḥ | paṣúm ná nashṭám iva
dárṣanāya vishṇāpvàm dadathur víṣvakāya || 23 || dáṣa rá-
trīr áṣivenā náva dyū́n ávanaddham ṣnathitám apsv àntáḥ |
víprutam rebhám udáni právriktam ún ninyathuḥ sómam
iva sruvéṇa || 24 || prá vām dáṅsāṅsy aṣvināv avocam asyá
pátiḥ syām sugávaḥ suvī́raḥ | utá páṣyann aṣnuván dīr-
ghám ā́yur ástam ivéj jarimā́ṇam jagamyām || 25 ||

Irresistible fighters against lawlessness, you march by night in your foe-overwhelming car, and march to the unfortified cities, surrounded by enemies through approachable roads, and at times you also march to inaccessible fortresses for victory. 20

O fighters, you preserve, brilliant leader so that he may obtain in a single day thousands of acceptable gifts. You are the showerer of the benefits and associated with the head of the state. You destroy the malignant and protect the granaries from the attack of enemies. 21

O fighters against lawlessness, you have been able to raise water from the lower level of the valley to the top for the thirsty sons of the loyal citizen, and by your powers you also give protection to the barren cows and enable them to yield plentiful milk for the exhausted and famished people. 22

O twin-divines, fighters against lawlessness, by your acts to the public you restore such children of the charming parents as are soliciting your protection, and as have been adoring you and are lovers of rectitude; you also give true guidance to the unruly younger elements of society. 23

Just as the extract of medicinal herbs is raised in the ladle for the fire oblation, similarly you raise a realized sage in distress from the deep well of ignorance, where he has been lying, bound with the strings of bondage for numberless nights and days, quite unattended and suffering in agony as if wounded and injured. 24

O twin-divines, I have very well described your achievements. May I become the master of my house, having abundant cattle and numerous progeny; may I retain my physical and intellectual vision and with that may I be enjoying a long life. And may I enter into an old age, as if, one entering into his own house. 25

(११७) सप्तदशोत्तरशततमं सूक्तम्

(१–२५) पञ्चविंशत्यृचस्यास्य सूक्तस्यौशिजो दैर्घतमसः कक्षीवान् ऋषिः ।
अश्विनौ देवते । त्रिष्टुप् छन्दः ॥

॥१३॥ मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम् ।
बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः ॥१॥
यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगाति ।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम् ॥२॥
ऋषिं नरावंहसः पाञ्चजन्यमृबीसादत्रिं मुञ्चथो गणेन ।
मिनन्ता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयन्ता ॥३॥
अश्वं न गूळ्हमश्विना दुरेवैरृषिं नरा वृषणा रेभमप्सु ।
सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि ॥४॥
सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम् ।
शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय ॥५॥
॥१४॥ तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् ।
शफादश्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतं मधूनाम् ॥६॥

117.

Mádhvaḥ sómasyāṣvinā mádāya pratnó hótā vivāsate vām | barhíshmatī rātír víṣritā gír ishá yātaṃ nāsatyópa vájaiḥ || 1 || yó vām aṣvinā mánaso jávīyān ráthaḥ sváṣvo víṣa ājígāti | yéna gáchathaḥ sukríto duroṇáṃ téna narā vartír asmábhyaṃ yātam || 2 || ríshiṃ narāv áṅhasaḥ páñcajanyam ribī́sād átrim muñcatho gaṇéna | minántā dásyor áṣivasya māyā́ anupūrvám vrishaṇā codáyantā || 3 || áṣvaṃ ná gūḷhám aṣvinā durévair ríshiṃ narā vrishaṇā rebhám apsú | sáṃ táṃ riṇītho víprutaṃ dáṅsobhir ná vāṃ jūryanti pūrvyā́ kritáni || 4 || sushupváṅsaṃ ná nírriter upásthe sū́ryaṃ ná dasrā támasi kshiyántam | ṣubhé rukmáṃ ná darṣatáṃ níkhātam úd ūpathur aṣvinā vándanāya || 5 ||

tád vāṃ narā ṣáṅsyam pajriyéṇa kakshívatā nāsatyā párijman | ṣaphā́d áṣvasya vājíno jánāya ṣatáṃ kumbhā́ñ asiñcatam mádhūnām || 6 ||

117

O twin-divines, may you be entertained by sweet drinks. We the loyal subjects adore you. And in that honour the former ritual of pouring the offering on the sacred grass is accomplished, and the hymn is ready for your laudation. Come, O fighters of truth, for the maintenance of law and order. 1

With that vehicle, O twin-divines, which moves with the speed of the mind, and which is drawn by good horses, and with which you proceed to the house of the virtuous, may you come to our house also. 2

O twin-divines, the leaders and showerers of benefits, you are able to rescue the eminent citizens consisting of seers, virtuous people and those very well respected by the five classes, and the foreigners, from the prison of the wicked with other co-prisoners. You destroy the enemies and baffle the devices of the malignant. 3

O leaders, showerers of benefits, you restore the realized sages, tortured by unassailable enemies, as if thrown into the water and wounded. You arrange for the healing of their wounds like curing a horse. One can never forget your previous achievements which never become old. 4

O twin-divines, the destroyer of enemies, you extricate a worshipper cast into the well of ignorance in the same manner as one extricates from the depth of the earth a handsome and splendid ornament designed for embellishment, or like the sun who disappears in darkness but reappears again from there. 5

catvāriṅṣád dáṣarathasya ṣóṇāḥ sahásrasyágre ṣréṇim nayanti | madacyútaḥ kriṣanávato átyān kakshívanta úd amṛikshanta pajráḥ || 4 || pū́rvām ánu práyatim ā́ dadę vas trī́n yuktā́ñ ashṭā́v arídhāyaso gā́ḥ | subándhavo yé viṣyā̀ iva vrā́ ánasvantaḥ ṣráva aíshanta pajráḥ || 5 ||

आगधिता परिगधिता या कशीकेव जङ्गहे ।
ददाति मह्यं यादुरी याशूनां भोज्या शता ॥६॥
उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ।
सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥७॥

ā́gadhitā párigadhitā yā́ kaṣīkéva jáṅgahe | dádāti máhyam yā́durī yā́ṣūnām bhojyā̀ ṣatā́ || 6 || úpopa me párā mṛiṣa mā́ me dabhrā́ṇi manyathāḥ | sárvāhám asmi romaṣā́ gandhā́rīṇām ivāviká || 7 ||

Forty tawny horses carry in front the wealth consisting of ten chariots and a thousand presents. Let the followers of a craftsman, born in the family of noble men, clean the coursers that are fiery and decorated with golden trappings. 4

O my brethren kinsmen, after the gifts already spoken of, I accept a prior grant for you of three and eight harnessed chariots, and valuable cattle. May you all attain prosperity and property, having lived together with affection as family members in one house. 5

The benevolent measures, applied with determination and firmness, would sustain a state, and keep enemies away as under the fear of corporeal punishment and give to me, the dedicated worker, hundreds of benefits. 6

[The State speaks to the people in ecstasy:]
"Approach me, listen to me, deem me not immature; I am hairy everywhere, like an ewe of an enchanted hilly tract." 7

[अथैकोनविंशोऽनुवाकः ॥] (१२७) सप्तविंशत्युत्तरशततमं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । अग्निर्देवता । (१–५, ७–११) प्रथमादिपञ्चर्चां सप्तम्यादिपञ्चानाञ्चात्यष्टिः, (६) षष्ठ्याश्चातिधृतिश्छन्दसी ॥

॥१२॥ अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः ॥१॥

127.

Agníṃ hótāram manye dásvantaṃ vásuṃ sūnúṃ sáhaso jātávedasaṃ vípraṃ ná jātávedasam | yá ūrdhváyā svadhvaró devó devácyā kṛipá | ghṛitásya víbhrāshṭim ánu vashṭi śocíshājúhvānasya sarpíshaḥ || 1 ||

यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः ।
परिज्मानमिव द्यां होतारं चर्षणीनाम् ।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥२॥
स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः ।
वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम् ।
निष्षहमाणो यमते नायते धन्वासहा नायते ॥३॥

yájishṭhaṃ tvā yájamānā huvema jyéshṭham áṅgirasāṃ vipra mánmabhir víprebhiḥ śukra mánmabhiḥ | párijmānam iva dyáṃ hótāraṃ carshaṇīnám | śocíshkeśaṃ vṛíshaṇaṃ yám imá víśaḥ právantu jūtáye víśaḥ || 2 || sá hí purú cid ójasā virúkmatā dídyāno bhávati druhaṃtaráḥ paraśúr ná druhaṃtaráḥ | vīḷú cid yásya sámṛitau śrúvad váneva yát sthirám | niḥsháhamāṇo yamate náyate dhanvāsáhā náyate || 3 ||

127

I venerate the divine fire, the inspirer of pious works, the munificent, the giver of dwellings, the source of strength. He is aware of all that exists; like a sage he is endowed with knowledge; He is the divine regenerator of worship. Through his lofty blaze produced by the burning of liquefied butter which is offered in oblations with his flames, he invokes the Nature's bounties. 1

We, the institutors of the fire ceremony, invoke you, with prayers, O fire-divine, you who are most deserving of worship, and are the eldest fire of the fire-priests. And with prayers recited by the priests we adore you, who, like the revolving sun, are the invoker of the divine powers on behalf of men. You are bedecked with shaggy flames, and are endowed with strength. 2

Verily, that fire-divine, shining far with brilliant vigour, is the destroyer of foes. He like a hatchet cuts down trees. What is not solid and stable melts like water at his touch. Vanquishing the enemies, He stands firm and, like an archer, does not retreat. 3

दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्यवसे ।
प्र यः पुरूणि गाहते तक्षद्वनेव शोचिषा ।
स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा ॥४॥
तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात् ।
आदस्यायुर्ग्रभणवद्वीळु शर्म न सूनवे ।
भक्तमभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः ॥५॥

drilhá cid asmā ánu dur yáthā vidé téjishthābhir áránibhir dāshty ávase 'gnáye dāshty ávase | prá yáh purúni gáhate tákshad váneva socíshā | sthirá cid ánnā ní rināty ójasā ní sthiráni cid ójasā || 4 || tám asya prikshám úparāsu dhīmahi náktam yáh sudárṣataro dívātarād áprāyushe dívātarāt | ád asyáyur grábhanavad vilú sárma ná sūnáve | bhaktám ábhaktam ávo vyánto ajárā agnáyo vyánto ajárāh || 5 ||

॥१३॥ स हि शर्धो न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः ।
आदद्धव्यान्याददिर्यज्ञस्य केतुरर्हणा ।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां नरः शुभे न पन्थाम् ॥६॥
द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः ।
अग्निरीशे वसूनां शुचिर्यो धर्णिरेषाम् ।
प्रियाँ अपिधीँर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥७॥

sá hí ṣárdho ná márutam tuvishvánir ápnasvatīshūrvárāsv ishtánir ártanāsv ishtánih | ádad dhavyány ādadír yajñásya ketúr arhánā | ádha smāsya hárshato hríshīvato víṣve jushanta pánthām nárah ṣubhé ná pánthām || 6 || dvitá yád īm kīstáso abhídyavo namasyánta upavócanta bhrígavo mathnánto dāṣá bhrígavah | agnír īṣe vásūnām ṣúcir yó dharnír eshām | priyáñ apidhíñr vanishīshta médhira á vanishīshta médhirah || 7 ||

Like wealth made over to a sage, they have made substantial donations to Him.By resplendent means He grants us grace so that we may preserve ourselves. The worshipper presents gifts to the fire-divine for preservation. He who accepts the offerings made to Him and consumes them as rapidly as He consumes forests. The standing corn ripens by His potency, and He consumes the harmful insects by the same potency. 4

Let us then place near the altar the sacrificial food for Him who shines more by night than by day. We offer it to Him who has more power at night than in the day. The libations are to be made to this fire-divine in the same way as the father's fortified house is made over to his son. These undying fires, discriminating between the edible and non-edible, grant protection. And accepting what is edible, they become exempt from decay; they do not die out. 5

He roars aloud like a thunderstorm in the course of the sanctified rites. This fire is to be worshipped and to be adored for victory over the hosts of enemies. He is the receiver of oblations and is the standard-bearer of the sacred works of the selfless. He deserving of veneration, consumes the oblations. Therefore, all men for their own good pursue the path of the fire-divine. Verily, they follow his path, verily, men follow his virtuous path for the sake of happiness. 6

The descendants of men of mature intellect celebrate the fire-divine in both his forms (fire in the sun and fire from the wood). They glorify him, and pay him homage and proclaim his praises. The descendants of men of mature wisdom churn him out (from the wood) for worship. The radiant fire-divine is the guardian of all these treasures. May the divine-fire, receiver of sacrifices, lovingly accept (our oblations). 7

विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं दंपतिं भुजे सत्यगिर्वाहसं भुजे ।
अतिथिं मानुषाणां पितुर्न यस्यासया ।
अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा वयः ॥८॥
त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर्न देवतातये ।
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
अध स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर ॥९॥

víṣvāsam tvā viṣáṃ pátim havāmahe sárvāsām samānám dámpatim bhujé satyágirvāhasam bhujé | átithim mánushāṇām pitúr ná yásyāsayá | amí ca víṣve amrítāsa á váyo havyá devéshv á váyaḥ || 8 || tvám agne sáhasā sáhantamaḥ ṣushmíntamo jāyase devátātaye rayír ná devátātaye | ṣushmíntamo hí te mádo dyumníntama utá krátuḥ | ádha smā te pári caranty ajara ṣrushṭīváno nájara || 9 ||

प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये ।
प्रति यदीं हविष्मान्विश्वासु क्षासु जोगुवे ।
अग्रे रेभो न जरत ऋषूणां जूर्णिर्होत ऋषूणाम् ॥१०॥
स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सचनाः सुचेतुना महो रायः सुचेतुना ।
महि शविष्ठ नस्कृधि संचक्षे भुजे अस्यै ।
महि स्तोतृभ्यो मघवन्त्सुवीर्यं मथीरुग्रो न शवसा ॥११॥

prá vo mahé sáhasā sáhasvata usharbúdhe paṣushé nágnáye stómo babhūtv agnáye | práti yád īṃ havíshmān víṣvāsu kshásu jóguve | ágre rebhó ná jarata rishūṇáṃ júrṇir hóta rishūṇám || 10 || sá no nédishṭhaṃ dádriṣāna á bharágne devébhiḥ sácanāḥ sucetúnā mahó rayáḥ sucetúnā | máhi ṣavishṭha nas kridhi saṃcákshe bhujé asyaí | máhi stotríbhyo maghavan suvíryam máthīr ugró ná ṣávasā || 11 ||

We invoke you, the protector of all people, you who are the common Lord of all houses, to enjoy our offerings. He is the true carrier of our oblations. We invoke you, the guest of men, to whom all these immortals apply for their sustenance, as a son to a father. May all divinities come to receive our oblations,—may the divinities come. 8

O fire-divine, you, who destroy enemies by your strength, and the possessor of splendour most fiery, are born for the sake of all sacred works and worship. You are born for the sake of divine sacrifices. Your delight is most fiery and your valour is most victorious; hence the sacrificers wait upon you like envoys upon a prince, O undecaying one. 9

May your invocations, O priests, become acceptable to the fire-divine, who is deserving of laudation and who has the might to overcome the strong and who is awakened at dawn. May the priest be grateful to the fire-divine as if to a giver of cattle. The presenter of an oblation goes assiduously to every altar with the same expectations and invokes the fire, the first to come amongst the divines, in the same way as the adept chanters glorify their worldly patrons with praises. 10

O fire-divine, may you become visible and come close to us and, partake with benign intent of the sacrificial food along with the divines; bestow upon us abundant riches. Most mighty divine fire, may you make us illustrious so that we may behold and enjoy this earth, and may we be the possessors of excellent progeny. May you give us, your devotees, life's breath and may you destroy our enemies with your might and fury. 11

(१२८) अष्टाविंशत्युत्तरशततमं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । अग्निर्देवता । अत्यष्टिश्छन्दः ॥

॥१४॥ अ॒यं जा॑यत॒ मनु॑षो॒ धरी॑मणि॒ होता॒ यजि॑ष्ठ उ॒शिजा॒मनु॑ व्र॒तम॒ग्निः स्वमनु॑ व्र॒तम् ।
वि॒श्वश्रु॑ष्टिः सखीय॒ते र॒यिरि॑व श्रव॒स्य॒ते ।
अद॑ब्धो॒ होता॒ नि ष॑ददि॒ळस्प॒दे परि॑वीत इ॒ळस्प॒दे ॥१॥
तं य॑ज्ञ॒साध॒मपि॑ वातयामस्यृ॒तस्य॑ प॒था नम॑सा ह॒विष्म॑ता दे॒वता॑ता ह॒विष्म॑ता ।
स न॑ ऊ॒र्जामु॒पाभृ॑त्य॒या कृ॒पा न जू॑र्यति ।
यं मा॑त॒रिश्वा॒ मन॑वे परा॒वतो॑ दे॒वं भाः प॑रा॒वतः॑ ॥२॥

128.

Ayám jāyata mánusho dhárīmaṇi hótā yájishṭha uṣíjām ánu vratám agníḥ svám ánu vratám | viṣvásrushṭiḥ sakhīyaté rayír iva ṣravasyaté | ádabdho hótā ní shadad iḷás padé párivīta iḷás padé || 1 || táṃ yajñasā́dham ápi vātayāmasy ṛitásya pathā́ námasā havíshmatā devátātā havíshmatā | sá na ūrjā́m upā́bhṛity ayā́ kṛipā́ ná jūryati | yáṃ mātaríṣvā mánave parāváto devám bhā́ḥ parāvátaḥ || 2 ||

ए॒वेन॑ स॒द्यः पर्ये॑ति॒ पार्थि॑वं मुहु॒र्गी रेतो॑ वृष॒भः कनि॑क्रद॒द्दध॒द्रेतः॒ कनि॑क्रदत् ।
श॒तं चक्षा॑णो अ॒क्षभि॑र्दे॒वो वने॑षु तु॒र्वणिः॑ ।
सदो॑ दधा॑न॒ उप॑रेषु॒ सानु॑ष्व॒ग्निः परे॑षु॒ सानु॑षु ॥३॥

évena sadyáḥ páry eti pā́rthivam muhurgí réto vṛishabháḥ kánikradad dádhad rétaḥ kánikradat | ṣatáṃ cákshāṇo akshábhir devó váneshu turváṇiḥ | sádo dádhāna úpareshu sā́nushv agníḥ páreshu sā́nushu || 3 ||

128

The fire-divine is the invoker of divine virtues, the assiduous promoter of sacred deeds. He is generated by devotees for the holy work like those who are born for benevolent actions. He bestows blessings on him who seeks His friendship, and is like wealth to an inspirer. He is the unobstructed offerer of oblations in the cosmic world; He is seated, surrounded by His divine priests like powers, on the holy place; He is, verily, seated on the holy place. 1

We propitiate that messenger of cosmic sacrifice by treading the path of truth, by reverential salutations with intense dedication. He accepts our offerings, and through his beneficence departs not. He is that divine fire, whom the divine cosmic wind brings from afar for the service of men,—brings from afar. 2

The divine fire, who is ever to be hymned, is the giver of food and the showerer of benefits. He comes quickly upon our invocation to the altar of the earth. He is vigorous and loud-voiced; virile and loud sounding; he travels fast when incited by praise. He manifests himself a hundred fold by his flames. The divine-fire comes quickly to the place of worship with abodes in high lands close by—in the high lands far away. 3

स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति ।
क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे ।
यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥४॥
क्रत्वा यदस्य तविषीषु पृञ्चतेऽग्नेरवेण मरुतां न भोज्येषिराय न भोज्या ।
स हि ष्मा दानमिन्वति वसूनां च मज्मना ।
स नस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः ॥५॥

sá sukrátuḥ puróhito dáme-dame 'gnír yajñásyādhvarásya cetati krátvā yajñásya cetati | krátvā vedhā́ ishūyaté víṣvā jātáni paspaṣe | yáto ghṛitaṣrír átithir ájāyata váhnir vedhā́ ájāyata || 4 || krátvā yád asya távishīshu pṛiñcáte 'gnér ávena marútām ná bhojyèshiráya ná bhojyā́ | sá hí shmā dā́nam ínvati vásūnām ca majmánā | sá nas trāsate duritā́d abhihrútaḥ ṣáṅsād aghā́d abhihrútaḥ || 5 ||

॥१५॥ विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे तरणिर्न शिश्रथच्छ्रवस्यया न शिश्रथत् ।
विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे ।
विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥६॥
स मानुषे वृजने शंतमो हितोऽग्निर्यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः ।
स हव्या मानुषाणामिळा कृतानि पत्यते ।
स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥७॥

víṣvo víhāyā aratír vásur dadhe háste dákshiṇe taráṇir ná ṣiṣrathac chravasyáyā ná ṣiṣrathat | víṣvasmā íd ishudhyaté devatrā́ havyám óhishe | víṣvasmā ít sukṛíte vā́ram ṛiṇvaty agnír dvā́rā vy ṛiṇvati || 6 || sá mā́nushe vṛijáne ṣáṃtamo hitó 'gnír yajñéshu jényo ná viṣpátiḥ priyó yajñéshu viṣpátiḥ | sá havyā́ mā́nushāṇām iḷā́ kṛitáni patyate | sá nas trāsate váruṇasya dhūrtér mahó devásya dhūrtéḥ || 7 ||

That fire-divine is the performer of excellent acts; he is like a priest in every house ; he takes care of worship and ceremonies and with wisdom takes care of worship. He bestows rewards on persons who are desirous of food, and he accepts all the offered gifts for the good of the worshipper. In sacred ceremonies he feeds abundantly on butter; he is born as a guest,—and this fire, the bearer of oblations, is born as an ordainer. 4

All devotees offer in holy rites food for His satisfaction in the blazing flames of divine fire; like the grains that are to be enjoyed by learned men, and like the food to be enjoyed by the needy. The worshipper presents gifts to Him according to the extent of his opulence. The divine-fire preserves us when we are oppressed by sin. He saves us from misery overwhelming, and from curse and from overpowering malevolence. 5

The universal, mighty, imperious divine fire holds his treasure in his right hand; and like the sun, he stretches forth his hand and stretches forth as if with the desire of obtaining oblations—but not for the wicked. Verily O fire-divine, you bear the oblation for every one of the righteous who desires it. You grant blessings to every benevolent pious worshipper and open for him the gates of heaven. 6

The divine-fire is a most amiable friend in human infirmity through the means of sacred acts like a lord victorious and like a dear lord in sacred rites. He alights upon the oblations of men when placed upon the altar. He preserves us from floods and from havocs caused by other natural forces. 7

अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे ।
विश्वायुं विश्ववेदसं होतारं यजतं कविम् ।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः ॥८॥

agním hótāram īḷate vásudhitim priyám cétishṭham aratím ny èrire havyaváham ny èrire | viṣváyum viṣvávedasam hótāram yajatám kavím | deváso raṇvám ávase vasūyávo gīrbhí raṇvám vasūyávaḥ || 8 ||

(१२९) एकोनत्रिंशदुत्तरशततमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । (१-५. ७-११) प्रथमादिपञ्चर्चां सप्तम्यादि-पञ्चानाञ्चेन्द्रः, (६) षष्ठ्याश्चेन्दुर्देवते । (१-७. १०) प्रथमादिसप्तानां दशम्याश्चात्यष्टिः, (८-९) अष्टमीनवम्योरतिशक्करी, (११) एकादश्याश्चाष्टिश्छन्दांसि ॥

॥१६॥ यं त्वं रथमिन्द्र मेधसातयेऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि ।
सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम् ।
सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम् ॥१॥
स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्य इन्द्र भरहूतये नृभिरसि प्रतूर्तये नृभिः ।
यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता ।
तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम् ॥२॥

129.

Yám tvám rátham indra medhásātaye 'pākā́ sántam ishira praṇáyasi prắnavadya náyasi | sadyáṣ cit tám abhíshṭaye káro váṣaṣ ca vājínam | sásmā́kam anavadya tū́tujāna vedhásām imā́m vā́cam ná vedhásām || 1 || sá ṣrudhi yáḥ smā pṛ́tanāsu kā́su cid dakshā́yya indra bhárahūtaye nṛ́bhir ási prátūrtaye nṛ́bhiḥ | yáḥ ṣū́raiḥ svàḥ sánitā yó víprair vā́jam tárutā | tám īṣānā́sa iradhanta vājínam pṛikshám átyam ná vājínam || 2 ||

The devotees praise the divine-fire, who is the invoker of divinities, the possessor of wealth, the beloved and benevolent. They have recourse to Him as to a sovereign; they have recourse to Him as the bearer of oblations. The divine fire is the life of all living beings and He knows all things. He is the offerer of oblations as well as the object of worship. He is also the sage. The sacred priests, desirous of affluence, sing His praises to obtain His protection. Desirous of affluence, they recite His praises in their hymns. 8

129

O resplendent Lord, inspirer of sacred acts, you fulfil the desires (of the devotee); you carry your chariot to him. O infallible one—you carry it ahead. And without delay you enable him to fulfil his desires; and you become wealth to such a one seeking food. O Lord, you who are quick and faultless, may you listen to the prayers of us the worshippers,—as ever of the worshippers. 1

Hear our invocation, O resplendent Lord. You have to be invoked by heroes reverentially in all battles for challenging and subjugating the enemies. You are the one, who, aided by heroes, seizes benefits from them and distributes it among the devotees. As the heroes take help from the swift war-horses, similarly even the mighty warriors propitiate the resplendent Lord for victory. 2

दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्यं परिवृणक्षि मर्त्यम् ।
इन्द्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयशसे ।
मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ॥३॥
अस्माकं व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम् ।
अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित् ।
नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ॥४॥
नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः ।
नेषि णो यथा पुरानेनाः शूर मन्यसे ।
विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥५॥

dasmó hí shmā vríshaṇam pínvasi tvácam kám cid yāvīr arárum ṣūra mártyam parivṛiṇákshi mártyam | índrotá túbhyam tád divé tád rudrā́ya sváyaṣase | mitrā́ya vocam váruṇāya sapráthaḥ sumṛiḷīkā́ya sapráthaḥ || 3 || asmā́kam va índram uṣmasīshṭáye sákhāyam viṣvā́yum prāsáham yújam vā́jeshu prāsáham yújam | asmā́kam bráhmotáyé 'vā pṛitsúshu kā́su cit | nahí tvā ṣátru stárate stṛiṇóshi·yám víṣvam ṣátrum stṛiṇóshi yám || 4 || ní shū́ namā́timatim káyasya cit téjishṭhābhir aráṇibhir nótíbhir ugrā́bhir ugrotíbhiḥ | néshi ṇo yáthā purā́nenā́ḥ ṣūra mányase | víṣvāni pūrór ápa parshi váhnir āsā́ váhnir no ácha || 5 ||

॥१७॥ प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् ।
अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥६॥

prá tád voceyam bhávyāyéndave hávyo ná yá ishávān mánma réjati rakshohā́ mánma réjati | svayám só asmád ā́ nidó vadhaír ajeta durmatím | áva sraved aghásaṅso 'vatarám áva kshudrám iva sravet || 6 ||

O resplendent Lord, you are the subduer of our adversaries; you fill the clouds and cause rain. O the brave one, you drive off every fleeting and transient cloud. And abandon it only when exhausted. For such a glorious deed, O Lord, I offer praise to you, the brilliant, the terror to the wicked, the life-breath of all beings, the most benevolent, the most widespread, and the bestower of bliss. 3

We desire, O resplendent Lord, to be present at the place of your sacrificial acts. You are our friend, the ally of your worshippers, the patient acceptor of viands. O Lord-supreme, may you guard our holy rites for our preservation, for in whatsoever contests you be engaged, no enemy, whom you oppose, would prevail against you; you prevail on every enemy whom you oppose. 4

O brave Lord, subdue the arrogance of every one of your adversaries by your protective and heroic powers which are as radiant as the fierce flames of burning wood. Guide us, O hero, as you have guided our forefathers, for you are honoured by all. You sustain all the world. May you remove all the sins of man and be close to us. 5

May I be competent to utter the praises of the blissful Lord who is vigorous, praiseworthy, like any other divine, and who goes with food abounding to every venerable rite. He is the destroyer of cruel people at each venerable rite. May that blissful one repress with chastisement the malevolence of him who reviles us; let the thief fall and perish, like water in a gutter running down a pit. 6

वनेम तद्धोत्रया चितन्त्या वनेम रयिं रयिवः सुवीर्यं रण्वं सन्तं सुवीर्यम् ।
दुर्मन्मानं सुमन्तुभिरेमिषा पृचीमहि ।
आ सत्याभिरिन्द्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥७॥
प्रप्रा वो अस्मे स्वयशोभिरूती परिवर्ग इन्द्रो दुर्मतीनां दरीमन्दुर्मतीनाम् ।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः ।
हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥८॥

vanéma tád dhótrayā citántyā vanéma rayím rayivaḥ suvíryam raṇvám sántam suvíryam | durmánmānam sumántubhir ém ishá pṛicīmahi | á satyábhir índram dyumnáhūtibhir yájatram dyumnáhūtibhiḥ || 7 || prá-prā vo asmé sváyaṣobhir ūtí parivargá índro durmatīnám dárīman durmatīnám | svayám sá rishayádhyai yá na upeshé atraíḥ | hatém asan ná vakshati kshiptá jūrṇír ná vakshati || 8 ||

त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्यरक्षसा ।
सचस्व नः पराक आ सचस्वास्तमीक आ ।
पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥९॥
त्वं न इन्द्र राया तरूषसोग्रं चित्त्वा महिमा सक्षदवसे महे मित्रं नावसे ।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य ।
अन्यमस्मद्रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः ॥१०॥

tvám na indra rāyá párīṇasā yāhí pathán̐ anehásā puró yāhy arakshásā | sácasva naḥ parāká á sácasvāstamīká á | pāhí no dūrád ārád abhíshṭibhiḥ sádā pāhy abhíshṭibhiḥ || 9 || tvám na indra rāyá tárūshasográm cit tvā mahimá sakshad ávase mahé mitrám návase | ójishṭha trátar ávitā rátham kám cid amartya | anyám asmád ririsheḥ kám cid adrivo ríríkshantam cid adrivaḥ || 10 ||

We glorify you, O the source of affluence, with inspiring hymns; we solicit that wealth which bestows vigour, which is agreeable, durable, and the support of progeny. May we, through surging praises, ever be possessed of abundant food. We know it is difficult to honour you adequately. May we attain communion with the resplendent Lord by true and earnest invocations,—by offering glorious invocations. 7

The resplendent Lord is powerful in the discomfiture of the malevolent by his self-glorifying aids, for us and for all. He is the destroyer of the malevolent and impetuous host sent against us by destructive forces to destroy us. It has been itself destroyed by Him; may this force of evil not reach us; may it, approach ing with speed, not reach us. 8

O resplendent Lord, come to us with abundant riches by a path free from evil and by a path unobstructed by cruel people. Be with us when afar ; be with us when near. Favour us, whether afar or nigh, with the objects we desire. Protect us by giving us adequate and desired aid ; protect us ever by your blessirgs. 9

O resplendent Lord, sustain us with the wealth that takes man across calamity; may we remain near you, O brave one radiant like sun, for our protection. O most potent protector and immortal Lord, ascend the same chariot, and come hither; O possessor of the thunder-bolt, come and repel anyone asasiling us. Turn your fury against the cruel ones, O possessor of the thunder-bolt. 10

पाहि न इन्द्र सुष्टुत स्रिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनाम्।
हन्ता पापस्य रक्षसस्त्राता विप्रस्य मावतः।
अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो ॥११॥

pāhí na indra sushṭuta sridhò 'vayātā́ sádam íd durmatī-nā́m deváḥ sán durmatīnā́m | hantā́ pāpásya rakshásas trātā́ víprasya mā́vataḥ | ádhā hí tvā janitā́ jī́janad vaso raksho-hánam tvā jī́janad vaso || 11 ||

(१३०) त्रिंशदुत्तरशततमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः। इन्द्रो देवता। (१-९) प्रथमादिनवर्चामत्यष्टिः (१०) दशम्याश्च त्रिष्टुप् छन्दसी॥

॥१८॥ एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः।
हवामहे त्वा वयं प्रयस्वन्तः सुते सचा।
पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥१॥
पिबा सोममिन्द्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसगस्तातृषाणो न वंसगः।
मदाय हर्यताय ते तुविष्टमाय धायसे।
आ त्वा यच्छन्तु हरितो न सूर्यमहा विश्वेव सूर्यम् ॥२॥

130.

Éndra yāhy úpa naḥ parāváto nā́yám áchā vidáthā-nīva sátpatir ástam rā́jeva sátpatiḥ | hávāmahe tvā vayám práyasvantaḥ suté sácā | putrā́so ná pitáram vā́jasātaye máṅhishṭham vā́jasātaye || 1 || píbā sómam indra suvānám ádribhiḥ kóṣena siktám avatám ná váṅsagas tātṛishāṇó ná váṅsagaḥ | mádāya haryatā́ya te tuvíshṭamāya dhā́yase | ā́ tvā yachantu haríto ná sū́ryam áhā víṣveva sū́ryam || 2 ||

O deservedly lauded Lord, preserve us from suffering; for, verily, you are ever the chastiser of the malevolent : you are the slayer of the wicked. You are the preserver of the virtuous, such as I am; the progenitor, the creator you have ever been an asylum of the needy; O you the destroyer of evils, an asylum for all men. 11

130

Come to us from afar, O resplendent Lord, the protector of good ; like a king, the protector of good, who comes back to one's home. We, the producers of food, are invoking you with our devotional prayers. Like sons inviting their father, we are inviting you for the procurement of food,—you the generous one for the procurement of food. 1

Accept our sweet devotional prayers that have been expressed by our thoughts and strewn as if with the sacred grass. Accept them with eagerness shown by a thirsty ox hastening towards a well,—as a very thirsty ox. May we be worthy of your loving, sweet and pleasing favours, and may your divine rays bring you hither, as the steeds convey the sun and as they carry him above the horizon day by day. 2

अविन्दद्दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्मन्यनन्ते अन्तरश्मनि ।
व्रजं वज्री गवामिव सिषासन्नङ्गिरस्तमः ।
अपावृणोदिष इन्द्रः परीवृता द्वार इषः परीवृताः ॥३॥
दादृहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव तिग्ममसनाय सं श्यदहिहत्याय सं श्यत् ।
संविव्यान ओजसा शवोभिरिन्द्र मज्मना ।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ॥४॥
त्वं वृथा नद्य इन्द्र सर्तवेऽच्छा समुद्रमसृजो रथाँ इव वाजयतो रथाँ इव ।
इत ऊतीरयुञ्जत समानमर्थमक्षितम् ।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः ॥५॥

ávindad divó níhitam̩ gúhā nidhím̩ vér ná gárbham párivītam áṣmany ananté antár áṣmani | vrajám̩ vajrí gávām iva síshāsann áṅgirastamaḥ | ápāvriṇod ísha índraḥ párīvṛitā dvára íshaḥ párīvṛitāḥ || 3 || dādṛihāṇó vájram índro gábhastyoḥ kshádmeva tigmám ásanāya sám̩ ṣyad ahihátyāya sám̩ ṣyat | sam̩vivyāná ójasā ṣávobhir indra majmánā | táshṭeva vṛikshám̩ vaníno ní vṛiṣcasi paraṣvéva ní vṛiṣcasi || 4 || tvám̩ vṛíthā nadyà indra sártavé 'chā samudrám asṛijo ráthāñ iva vājayató ráthāñ iva | itá ūtír ayuñjata samānám ártham ákshitam | dhenúr iva mánave viṣvádohaso jánāya viṣvádohasaḥ || 5 ||

॥१४॥ इमां ते वाचं वसूयन्त आयवो रथं न धीरः स्वपा अतक्षिषुः सुम्नाय त्वामतक्षिषुः ।
शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम् ।
अत्यमिव शवसे सातये धना विश्वा धनानि सातये ॥६॥

imám̩ te vácam̩ vasūyánta āyávo rátham̩ ná dhíraḥ svápā atakshishuḥ sumnáya tvám atakshishuḥ | ṣumbhánto jényam̩ yathā vájeshu vipra vājínam | átyam iva ṣávase sātáye dhánā víṣvā dhánāni sātáye || 6 ||

He, the Lord, finds out the stolen treasure, that has its abode in heaven and hidden like the nestlings of a bird in a rock, amidst a pile of vast rocks. Desiring to partake of the elixir, He the most vital, discovered the hiding place of the cows; and He, opened the closed doors of waters, shut up in the clouds,—the closed doors for food. 3

Grasping His sharp thunderbolt with both hands, the resplendent Lord, sharpened it to hurl it on His foes like the swift current of streams. He whetted it for the destruction of dark shrouds. He is fully endowed with strength, with energy and with might. O Lord, may you cut your enemies to pieces, as a wood-cutter cuts the trees of a forest,—you cut them to pieces as if with a hatchet. 4

Effortlessly you have created the rivers that flow to the sea, like the aurora of glory bearing you to sacrificial places, as those chariots who are proceeding on the way to battle. The streams flowing hither have gathered together their waters for a common purpose, like the cows that yield all things to man—that yield all things to people. 5

Men who are desirous of wealth have recited this praise of yours, as a resolute and provident man prepares a chariot for a journey; they have propitiated you for their good; glorifying thee, the resplendent Lord, as impetuous in conflicts, they have praised you as men praise a conqueror. We praise you for the acquirement of strength, wealth, and every kind of affluence, as they commend a courser for his good qualities in battle. 6

भिनत्पुरो नवतिमिन्द्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो ।
अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत् ।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा ॥७॥
इन्द्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु ।
मनवे शासदव्रतान्त्वचं कृष्णामरन्धयत् ।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥८॥

bhinát púro navatím indra pūráve dívodāsāya máhi dāṣúshe nrito vájreṇa dāṣúshe nrito | atithigváya ṣámbaram girér ugró ávābharat | mahó dhánāni dáyamāna ójasā víṣvā dhánāny ójasā || 7 || índraḥ samátsu yájamānam áryam právad víṣveshu ṣatámūtir ājíshu svàrmīḻheshv ājíshu | mánave ṣásad avratán tvácam krishṇám arandhayat | dákshan ná víṣvam tatrishāṇám oshati ny àrṣasānám oshati || 8 ||

सूरश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति ।
उशना यत्परावतोऽजगन्नूतये कवे ।
सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ॥९॥
स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः ।
दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः ॥१०॥

súraṣ cakrám prá vrihaj jātá ójasā prapitvé vácam aruṇó mushāyatīṣāná á mushāyati | uṣánā yát parāváto 'jagann ūtáye kave | sumnáni víṣvā mánusheva turváṇir áhā víṣveva turváṇiḥ || 9 || sá no návyebhir vrishakarmann ukthaíḥ púrām dartaḥ pāyúbhiḥ pāhi ṣagmaíḥ | divodāsébhir indra stávāno vāvridhīthá áhobhir iva dyaúḥ || 10 ||

O resplendent Soul, dancing with delight in battle, you destroy ninety cities for the man in service of the learned. You destroy them with your sharp intellect, for the sake of the giver of offerings. For the sake of reverential man, the fierce Lord drives out the disrespectful person from the mountain, bestowing upon the brave men immense treasure, acquired by his prowess,—all kinds of wealth acquired by his prowess. 7

The resplendent Lord, the manifold protector of his votaries in battles, defends his virtuous worshipper in all conflicts that confer heaven; for the benefit of man he punished those who broke the law. He punishes people who indulge in sinful activities. As if burning with flame, he consumes the malignant; he utterly consumes him who delights in cruelty. 8

Endowed with increasing vigour, he hurls the wheel of law against the foes; and, with fury of anger, deprives them of speech; He, the sovereign king, deprives them of exitsence. When you, O saintly resplendent Lord, come from afar to the help of honest men, you come quickly, bearing all good things to us all the time, you come quickly. 9

Showerer of benefits, destroyer of the strongholds of enemies, propitiated by our new songs, may you reward us with gratifying blessings; glorified Lord, by the descendants of devoted servants of the learned, may you increase in power, like the sun in revolving days. 10

(१३१) एकत्रिंशदुत्तरशततमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । इन्द्रो देवता । अत्यष्टिश्छन्दः ॥

॥२०॥ इन्द्राय हि द्यौरसुरो अनम्नतेन्द्राय मही पृथिवी वरीमभिर्द्युम्नसाता वरीमभिः ।
इन्द्रं विश्वे सजोषसो देवासो दधिरे पुरः ।
इन्द्राय विश्वा सवनानि मानुषा रातानि सन्तु मानुषा ॥१॥
विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् ।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।
इन्द्रं न यज्ञैश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः ॥२॥

131.

Índrāya hí dyaúr ásuro ánamnaténdrāya mahī́ prithiví várīmabhir dyumnásātā várīmabhiḥ | índram víṣve sajóshaso deváso dadhire puráḥ | índrāya víṣvā sávanāni mā́nushā rātáni santu mā́nushā || 1 || víṣveshu hí tvā sávaneshu tuñjáte samānám ékaṃ vríshamaṇyavaḥ príthak sváḥ sanishyávaḥ príthak | táṃ tvā nā́vaṃ ná parsháṇiṃ ṣūshásya dhurí dhīmahi | índraṃ ná yajñaíṣ citáyanta āyáva stómebhir índram āyávaḥ || 2 ||

वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः ।
यद्गव्यन्ता द्वा जना स्वर्यन्ता समूहसि ।
आविष्करिक्रद्वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ॥३॥

ví tvā tatasre mithunā́ avasyávo vrajásya sātā́ gávyasya niḥsṛ́jaḥ sákshanta indra niḥsṛ́jaḥ | yád gavyántā dvā́ jánā svàr yántā samū́hasi | āvísh kárikrad vríshaṇaṃ sacābhúvaṃ vájram indra sacābhúvam || 3 ||

131

To sovereign Lord has verily bowed down the lofty cosmos, the source of all vital powers. To Him the wide earth has offered homage with precious treasures. With acceptable praises the worshipper has propitiated Him for the sake of prosperity. All the Divines, well pleased, have given precedence to the sovereign Lord; let all sacred work and worship of men be appropriated to the Lord; let all the offerings of men be presented to Him. 1

Hoping to partake of your gifts, your worshippers, one and all, seeking divine bliss, hasten to adore you in all their ceremonies. We meditate on you, the sustainer of our strength like a boat that bears passengers across an ocean; we mortals, indeed, propitiate him with hymns. 2

O Lord, the married couples, anxious to satisfy you and presenting oblations together, celebrate your worship for the sake of obtaining herds of cattle by offering you oblations. You know these couples are desirous of worldly prosperity and divine bliss. Then you display to your constant companion, the punitive justice, O resplendent Lord, the showerer of benefits. 3

विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र शारदीरवातिरः सासहानो अवातिरः ।
शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते ।
महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः ॥४॥
आदित्ते अस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ ।
चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे ।
ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यन्तः सनिष्णत ॥५॥

vidúsh ṭe asyá vīryàsya pūrávaḥ púro yád indra ṣáradīr avátirah sāsahānó avátiraḥ | ṣásas tám indra mártyam áyajyuṃ ṣavasas pate | mahím amushṇāḥ prithivím imá apó mandasāná imá apáḥ || 4 || ád ít te asyá vīryàsya carkiran mádeshu vrishann uṣíjo yád ávitha sakhīyató yád ávitha | cakártha kārám ebhyaḥ prítanāsu právantave | té anyám-anyāṃ nadyàṃ sanishṇata ṣravasyántaḥ sanishṇata || 5 ||

उतो नो अस्या उषसो जुषेत ह्यर्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः ।
यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि ।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥६॥
त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्यं वज्रेण शूर मर्त्यम् ।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः ।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः ॥७॥

utó no asyá usháso jushéta hy àrkásya bodhi havísho hávīmabhiḥ svàrshātā hávīmabhiḥ | yád indra hántave mrídho vrísha vajriñ cíketasi | á me asyá vedháso návīyaso mánma srudhi návīyasaḥ || 6 || tváṃ tám indra vāvridhānó asmayúr amitrayántaṃ tuvijāta mártyaṃ vájreṇa ṣūra mártyam | jahí yó no aghāyáti srinushvá susrávastamaḥ | rishṭáṃ ná yámann ápa bhūtu durmatír víṣvápa bhūtu durmatíḥ || 7 ||

Our forefathers have known your prowess, by which, O Lord, you destroy the perennial strongholds of the evil forces; you destroy them, humiliating their defenders. You chastise, Lord of strength, the mortal who does not perform noble acts; you deprive them of the blessings of the earth and waters; you take away these gifts from them. 4

O sovereign Lord, showerer of blessings, whereby, in your love and affection, you defend your worshippers, and whereby you defend those who are solicitous of your favour and desirous of your friendship, thereby they proclaim your valour on all sides. From you they obtain many many enjoyments. They receive and distribute wealth among themselves. 5

May the Lord be present at this our morning rite; may He be apprised of the oblation offered with due observances for the sake of obtaining divine bliss. And since, O dispenser of the punitive justice and showerer of benefits, you keep awake to destroy the malevolent, therefore, listen to the praises of a person like me, intelligent, though a novice; hear it from me who is still a novice. 6

O sovereign Lord, endowed with extreme strength, being exalted by our praises and being well-disposed towards us, enlighten the man who is sinful and unfriendly to us; punish each and every sinful man with your punitive justice. As you are quick to hear, listen to our prayer. Let every ill-intent, like a broken piece, be counteracted. Let ill-intent be counteracted. 7

(१३२) द्वात्रिंशदुत्तरशततमं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । (१-५, ६) प्रथमादिपञ्चर्चां षष्ठ्या उत्तरार्धर्चस्य चेन्द्रः, (६) षष्ठ्याः पूर्वार्धर्चस्येन्द्रापर्वतौ देवताः । अत्यष्टिश्छन्दः ॥

॥२१॥ त्वया॑ व॒यं म॑घव॒न्पूर्व्ये॒ धन॒ इन्द्र॑त्वोताः सासह्याम पृतन्य॒तो व॑नु॒याम॑ वनु॒ष्य॒तः । नेदि॑ष्ठे अ॒स्मिन्नह॒न्यधि॑ वोचा॒ नु सु॑न्व॒ते । अ॒स्मिन्य॒ज्ञे वि च॑येमा॒ भरे॑ कृ॒तं वा॑ज॒यन्तो॒ भरे॑ कृ॒तम् ॥१॥

स्व॒र्जेषे॒ भर॑ आ॒प्रस्य॒ वक्म॑न्युष॒र्बुधः॒ स्वस्मि॒न्नञ्ज॑सि क्रा॒णस्य॒ स्वस्मि॒न्नञ्ज॑सि । अह॒न्निन्द्रो॒ यथा॑ वि॒दे शी॒र्ष्णाशी॑र्ष्णोपवा॒च्यः । अ॒स्म॒त्रा ते॑ स॒ध्र्य॑क्सन्तु रा॒तयो॑ भ॒द्रा भ॒द्रस्य॑ रा॒तयः॑ ॥२॥

132.

Tváyā vayám maghavan pū́rvye dhána índratvotāḥ sāsahyāma pritanyató vanuyā́ma vanushyatáḥ | nédishṭhe asmínn áhany ádhi vocā nú sunvaté | asmín yajñé ví cayemā bháre kritám vājayánto bháre kritám || 1 || svarjeshé bhára āprásya vákmany usharbúdhaḥ svásminn áñjasi krāṇásya svásminn áñjasi | áhann índro yáthā vidé sīrshṇā-sīrshṇopavā́cyaḥ | asmatrā́ te sadhryàk santu rātáyo bhadrā́ bhadrásya rātáyaḥ || 2 ||

तत्तु प्रयः॑ प्र॒त्नथा॑ ते शुशु॒क्वनं॒ यस्मि॑न्य॒ज्ञे वार॒मकृ॑ण्वत॒ क्षय॑मृ॒तस्य॒ वार॑सि॒ क्षय॑म् । वि तद्वो॑चे॒रध॑ द्वि॒तान्तः॑ पश्यन्ति र॒श्मिभिः॑ । स घा॑ वि॒दे अन्विन्द्रो॑ ग॒वेष॑णो बन्धु॒क्षिद्भ्यो॑ ग॒वेष॑णः ॥३॥

tát tú práyaḥ pratnáthā te suṣukvanám yásmin yajñé vā́ram ákriṇvata ksháyam ritásya vā́r asi ksháyam | ví tád vocer ádha dvitā́ntáḥ paṣyanti raṣmíbhiḥ | sá ghā vide ánv índro gavéshaṇo bandhukshídbhyo gavéshaṇaḥ || 3 ||

132

O bounteous Lord, possessed of opulence, through your bounty as before and protected by you, may we overcome those who are arrayed in hostile acts against us. May we anticipate our assailants. When the auspicious day of sacred worship is near, may you be pleased to speak encouragingly to the presenter of the libation; may we choose you as the best performer and our chief in this sacred work. And may we increase our strength and adopt you as our leader in this battle, our leader in the battle. 1

In this combat which secures divine bliss, the Lord destroys the obstructing adversaries of that virtuous man who wakes at dawn and who is truthful in his dealings and who.celebrates his pious rites. Therefore, the Lord is worth to be adored by each man with humility and with head bowed. May your treasures, O Lord, come to us. May your benevolent gifts be auspicious to us. 2

O Lord, wherever an excellent altar has been constructed for the fire-ceremonial, there indeed the splendid gifts are dedicated to you as ever. Only you can guide us on the path of truth. May you declare it thus; men may thence behold you in the intermediate bright firmament by means of the rays of the sun. O Lord, you alone are the dispenser of truth and knowledge. You alone reveal the truth to such worshippers as live with you like your brother. 3

नू इत्था ते पूर्वथा च प्रवाच्यं यदङ्गिरोभ्योऽवृणोरप व्रजमिन्द्र शिक्षन्नप व्रजम्।
ऐभ्यः समान्या दिशास्मभ्यं जेषि योत्सि च।
सुन्वद्भ्यो रन्धया कं चिदव्रतं हृणायन्तं चिदव्रतम् ॥४॥
सं यज्जनान्क्रतुभिः शूर ईक्षयद्धने हिते तरुषन्त श्रवस्यवः प्र यक्षन्त श्रवस्यवः।
तस्मा आयुः प्रजावदिद्बाधे अर्चन्त्योजसा।
इन्द्र ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ॥५॥

nú itthá te pūrváthā ca pravácyam yád áṅgirobhyó 'vriṇor ápa vrajám índra síkshann ápa vrajám | aíbhyaḥ samānyá disásmábhyam jeshi yótsi ca | sunvádbhyo randhayā kám cid avratám hriṇāyántam cid avratám || 4 || sám yáj jánān krátubhiḥ sūra īksháyad dháne hité tarushanta sravasyávaḥ prá yakshanta sravasyávaḥ | tásmā áyuḥ prajávad íd bádhe arcanty ójasā | índra okyàm didhishanta dhītáyo deváñ áchā ná dhītáyaḥ || 5 ||

युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतम्।
दूरे चत्ताय छन्त्सद्गहनं यदिनक्षत्।
अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥६॥

yuvám tám indrāparvatā puroyúdhā yó naḥ pritanyád ápa tám-tam íd dhatam vájreṇa tám-tam íd dhatam | dūré cattáya chantsad gáhanam yád ínakshat | asmákam sátrūn pári sūra visváto darmá darshīshṭa visvátaḥ || 6 ||

Your exploits, O Lord, are worthy to be glorified; now, verily, as always in the former times, when you break open the gate of knowledge for the sake of dedicated devotees, restoring to them their lost wisdom. Conquer for us, fight for us, as you always do for them; on behalf of those who present libations; may you subdue the faithless ones who offer no worship and rise against you. 4

When the brave Lord rightly judges men by their deeds, then in the struggle for sustenance they are enabled to acquire wealth and wisdom, to overcome their foes. They, desirous of fame, worship Him diligently. Then, accompanied by their children, they offer gifts and praises to Him, so that by their own strength they may overcome their foes. These pious and intelligent worshippers enjoy the divine bliss as if they dwell in the intimacy of the Lord Himself. 5

The Lord supreme and His strong powers, steady like mountains, are foremost in battles. They slay everyone who is arrayed against us; slay every such adversary with their strong will. The punitive justice pursues the adversary, however far, and brings about his destruction, even at the hiding-place to which he may have fled. O brave Lord, crush our enemies, and rend them asunder. 6

(१३३) त्रयस्त्रिंशदुत्तरशततमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । इन्द्रो देवता । (१) प्रथमर्चस्त्रिष्टुप्,
(२-४) द्वितीयादितृचस्यानुष्टुप्, (५) पञ्चम्या गायत्री, (६) षष्ठ्या धृतिः,
(७) सप्तम्याश्चाभिकृतिश्छन्दांसि ॥

उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिन्द्राः ।
अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळ्हा अशेरन् ॥१॥
अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम् ।
छिन्धि वटूरिणा पदा महावटूरिणा पदा ॥२॥
अवासां मघवञ्जहि शर्धो यातुमतीनाम् ।
वैलस्थानके अर्मके महावैलस्थे अर्मके ॥३॥

133.

Ubhé punāmi ródasī riténa drúho dahāmi sám mahír anindráḥ | abhivlágya yátra hatá amítrā vailasthānám pári trilhá áseran || 1 || abhivlágyā cid adrivaḥ sīrshá yātumátīnām | chindhí vaṭūríṇā padá mahávaṭūriṇā padá || 2 || ávāsām maghavañ jahi sárdho yātumátīnām | vailasthānaké armaké mahávailasthe armaké || 3 ||

यासां तिस्रः पञ्चाशतोऽभिव्लङ्गैरपावपः ।
तत्सु ते मनायति तकत्सु ते मनायति ॥४॥
पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण । सर्वं रक्षो नि बर्हय ॥५॥

yásām tisráḥ pañcāsáto 'bhivlaṅgaír apávapaḥ | tát sú te manāyati takát sú te manāyati || 4 || pisáṅgabhrishṭim ambhriṇám pisácim indra sám mriṇa | sárvam ráksho ní barhaya || 5 ||

133

By sacred deeds I purify both heaven and earth. I burn down the wide realms of the land, the people of which do not repose faith in the resplendent Lord and who are wicked. Wherever the enemies have gathered they have been killed,—utterly destroyed; they sleep in a deep pit. 1

O wielder of punitive justice, having trampled on the heads of the malignant hosts, crush them with your wide-spreading foot,—with your vast widespreading foot. 2

Annihilate, O bounteous Lord, the troop of these wicked and malignant men; hurl them into the vile pit,—the vast and vile pit. 3

O Lord, you have destroyed such hosts by your assaults three times fifty (i.e. countless). This is a deed that is much praised by your devotees,—much praised by your devotees. 4

Strike down, O Lord, the yellow and the tawny-coloured, the frightfully yelling wicked; annihilate all the wretched men. 5

अवर्मह इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः ।
शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे ।
अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥६॥
वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः ।
सुन्वान इत्सिषासति सहस्रा वाज्यवृतः ।
सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ॥७॥

avár mahá indra dādṛihí ṣrudhí naḥ ṣuṣóca hí dyaúḥ kshā́ ná bhīshā́ñ adrivo ghṛiṇā́n ná bhīshā́ñ adrivaḥ | ṣushmíntamo hí ṣushmíbhir vadhaír ugrébhir íyase | ápūrushaghno apratīta ṣūra sátvabhis trisaptaíḥ ṣūra sátvabhiḥ || 6 || vanóti hí sunván kshayam párīṇasaḥ sunvānó hí shmā yájaty áva dvísho devā́nām áva dvíshaḥ | sunvāná ít sishāsati sahásrā vājy ávṛitaḥ | sunvānā́yéndro dadāty ābhúvaṃ rayíṃ dadāty ābhúvam || 7 ||

(१३४) चतुस्त्रिंशदुत्तरशततमं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । वायुर्देवता । (१-५) प्रथमादिपञ्चर्चामत्यष्टिः, (६) षष्ठ्याश्चाष्टिश्छन्दसी ॥

आ त्वा जुवो रारहाणा अभि प्रयो वायो वहन्त्विह पूर्वपीतये सोमस्य पूर्वपीतये ।
ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती ।
नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥१॥

134.

Á tvā júvo rārahāṇā́ abhí práyo vā́yo váhantv ihá pūrvápītaye sómasya pūrvápītaye | ūrdhvā́ te ánu sūnṛ́tā mánas tishṭhatu jānatī́ | niyútvatā ráthenā́ yāhi dāváne vā́yo makhásya dāváne || 1 ||

Cut down, O Lord supreme, the cruel and the wickeds. Here are our supplications. Verily (tormented by them) the heaven is in sorrow like the earth through terror. O wielder of punitive justice, the world is unhappy, as if caught in the flames of fire. Being most powerful, we request you to assail our adversaries with strong weapons and terrible blows, but kindly see that no injury is caused to your men. May you march forward, O invincible Lord, attended by the braves,—groups of three times seven braves. 6

Offering libations, the worshipper obtains a safe abode through his noble deeds and overpowers his manifold foes. He destroys the enemies of the divines, abounding with food, and, unsubdued by adversaries, he hopes to win infinite riches. To the devotee, who offers libations, the Lord grants bounteous wealth,—gives bounteous wealth. 7

134

May your swift and fast divine waves, bring you hither, the vital Lord, so that you may be the first to accept the sentiments of devotion. May our discriminating and sincere praises rise high to your standards. May you come with your aura of vitality for the devotional prayers presented to you; come, O vital Lord, to grant us the objects of our worship. 1

मन्दन्तु त्वा मन्दिनो वायविन्दवोऽस्मत्क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः ।
यद्ध क्राणा इरध्यै दक्षं सचन्त ऊतयः ।
सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः ॥२॥
वायुर्युङ्क्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ।
प्र बोधया पुरंधिं जार आ ससतीमिव ।
प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥३॥

mándantu tvā mandíno vāyav índavo 'smát krāṇā́saḥ súkṛitā abhídyavo góbhiḥ krāṇā́ abhídyavaḥ | yád dha krāṇā́ irádhyai dáksham sácanta ūtáyaḥ | sadhrīcīnā́ niyúto dāváne dhíya úpa bruvata īṃ dhíyaḥ || 2 || vāyúr yuñkte róhitā vāyúr aruṇā́ vāyū́ ráthe ajirā́ dhurí vóḷhave váhishṭhā dhurí vóḷhave | prá bodhayā púraṃdhiṃ jārá ā́ sasatī́m iva | prá cakshaya ródasī vāsayoshásaḥ śrávase vāsayoshásaḥ || 3 ||

तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु ।
तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते ।
अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥४॥

túbhyam ushā́saḥ śúcayaḥ parāváti bhadrā́ vástrā tanvate dáṃsu raśmíshu citrā́ návyeshu raśmíshu | túbhyaṃ dhenúḥ sabardúghā víśvā vásūni dohate | ájanayo marúto vakshá ṇābhyo divá ā́ vakshá ṇābhyaḥ || 4 ||

May our devotional loving sentiments of prayer, which are well-rendered, opportune and flowing out of our hearts in due season, be pleasing to you. May your divine waves bring you here, in this sacrificial hall, to accept our offerings. All pious and active worshippers praise you in this congregation with a view to obtaining your blessings. 2

The vital Lord yokes to his chariot of the aura of vitality his two unwearied cosmic red and purple breaths (incoming and outgoing), to bear the burden; for they are able to bear it. O vital Lord, arouse the intelligent sacrificer, as a gallant awakens his sleeping mistress; and light up heaven and earth; and light up the dawn, verily, the dawn to obtain prosperity. 3

For you, the brilliant dawns, rising from afar, spread their wide auspicious raimant in inviting rays,—the variegated and glorious rays; and for you, the eternal ambrosia-yielding cow grants all kinds of treasure. And you fetch water in the firmament from the rivers for the purpose of showering rain,—for the purpose of replenishing the rivers. 4

तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्यपामिषन्त भुर्वणि ।
त्वां त्सारी दसमानो भगमीट्टे तक्ववीये ।
त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा ॥५॥
त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि ।
उतो विहुत्मतीनां विशां ववर्जुषीणाम् ।
विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरम् ॥६॥

túbhyam̱ ṣukrásaḥ ṣúcayas turaṇyávo mádeshūgrá ishaṇanta bhurváṇy apám ishanta bhurváṇi | **tvám̱ tsārí dásamāno bhágam īṭṭe takvavíye** | **tvám̱ víṣva-smād bhúvanāt pāsi dhármaṇāsuryàt pāsi dhármaṇā** || 5 || **tvám̱ no vāyav eshām ápūrvyaḥ sómānām prathamáḥ pītím arhasi** sutánām pītím arhasi | utó vihútmatīnām̱ viṣám̱ va-varjúshīṇām | víṣvā ít te dhenávo duhra āṣíram̱ ghṛitám̱ **duhrata āṣíram** || 6 ||

(१३५) पञ्चत्रिंशदुत्तरशततमं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । (१–३, ९) प्रथमादितृचस्य नवम्यृचश्च वायुः, (४–८) चतुर्थ्यादिपञ्चानाञ्चेन्द्रवायू देवताः । (१–६, ९) प्रथमादिषड्टचां नवम्याश्चात्यष्टिः, (७–८) सप्तम्यष्टम्योश्चाष्टिश्छन्दसी ॥

॥२४॥ स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते ।
तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे ।
प्र ते सुतासो मधुमन्तो अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥१॥

135.

Stīrṇám barhír úpa no yāhi vītáye sahásreṇa niyútā niyutvate ṣatínībhir niyutvate | túbhyam̱ hí pūrvápītaye devá deváya yemiré | prá te sutáso mádhumanto asthiran mádāya krátve asthiran || 1 ||

O vital Lord, the charming, loving and quick-flowing sentiments of devotion are addressed to you for your invocation, and they crave for your gracious blessings. Also, O vital Lord, even the timid and anxious worshipper praises you, for you are auspicious and capable of driving away misfortunes and miseries, and thus of defending us against calamities. And, as the reward of our righteousness, may you protect us from the fear of evil,—verily as the reward of our righteousness. 5

O vital Lord, preceded by none, you are entitled to be the first in accepting our libations; you are entitled to be invoked by our devotional prayers. May you accept oblations from the sinless and virtuous, and may you, like cattle, yield milk with cream for us,—milk and butter for us. 6

135

May you please be manifested in our hearts, O vital Lord; come with your thousands of waves of spirituality in response to our calls,—come with your hundreds of waves of spirituality. The learned people look to you as their reverential divine. You alone are entitled to worship and prayers. Sweet and loving expressions are being offered to to you for your invocation,—are offered here to receive from you your grace. 1

तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रा वसानो अर्षति ।
तवायं भाग आयुषु सोमो देवेषु हूयते ।
वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ॥२॥
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि वीतये वायो हव्यानि वीतये ।
तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा ।
अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ॥३॥

túbhyāyáṃ sómaḥ páripūto ádribhi spārhā́ vásānaḥ pári kóṣam arshati ṣukrā́ vásāno arshati | távāyám bhāgá āyúshu sómo devéshu hūyate | váha vāyo niyúto yāhy asmayúr jushāṇó yāhy asmayúḥ || 2 || ā́ no niyúdbhiḥ ṣatínībhir adhvaráṃ sahasríṇībhir úpa yāhi vītáye vā́yo havyā́ni vītáye | távāyám bhāgá ṛitvíyaḥ sáraṣmiḥ sū́rye sáca | adhvaryúbhir bháramāṇā ayaṅsata vā́yo ṣukrā́ ayaṅsata || 3 ||

आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये ।
पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम ।
वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम ॥४॥

ā́ vāṃ rátho niyútvan vakshad ávase 'bhí práyāṅsi súdhitāni vītáye vā́yo havyā́ni vītáye | píbatam mádhvo ándhasaḥ pūrvapéyaṃ hí vāṃ hitám | vā́yav ā́ candréṇa rā́dhasā́ gatam índraṣ ca rā́dhasā́ gatam || 4 ||

O vital Lord, we are offering you the sweet devotional prayers just as the sweetened herbal extract is prepared by pressing the plant between stones, filtered through cloth and received in a receptacle. Like that pure and brilliant elixir, our praises are being offered to you as your portion. You are the first to be invoked and none else amongst the learned. O vital Lord, may the waves of spirituality come to us from you; depart gratified,—depart well-disposed towards us. 2

Come with hundreds and thousands of your waves of spirituality to our place of worship to partake of the sacrificial invocations; Come, O vital Lord, to accept the oblations You alone are entitled to this portion and it is suitable for the seasons. The devotional prayers are brilliant like the elixir that becomes radiant when exposed to the sun. These prayers have been tuned and sung by the priests and are full of vitality. 3

Let the aurora of glory and vitality be drawn by the beams and waves of spirituality. They manifest to us the resplendent Lord who is also the Lord of vitality at the place of worship, for our preservation, and to partake of the consecrated viands and to partake of the oblations, and accept our sweet and melodious prayers. O vital Lord, come to us with joy-bestowing wealth; and, O resplendent Lord, come with your blessings of prosperity. 4

आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त वाजिनमाशुमत्यं न वाजिनम् ।
तेषां पिबतमस्मयू आ नो गन्तमिहोत्या ।
इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ॥५॥

á vām dhíyo vavrityur adhvarā́ñ úpemám índum marmṛijanta vājínam āṣúm átyam ná vājínam | téshām pibatam asmayū́ ā́ no gantam ihótyā | índravāyū sutā́nām ádribhir yuvám mádāya vājadā yuvám || 5 ||

॥२५॥ इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ।
एते वामभ्यसृक्षत तिरः पवित्रमाशवः ।
युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ॥६॥
अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम् ।
वि सूनृता ददृशे रीयते घृतमा पूर्णया नियुता याथो अध्वरमिन्द्रश्च याथो अध्वरम् ॥७॥
अत्राह तद्वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठन्त जायवोऽस्मे ते सन्तु जायवः ।
साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यन्ति धेनवो नाप दस्यन्ति धेनवः ॥८॥

imé vām sómā apsv ā́ sutā́ ihā́dhvaryúbhir bhā́ramāṇā ayaṅsata vā́yo ṣukrā́ ayaṅsata | eté vām abhy àsṛikshata tiráḥ pavítram āṣávaḥ | yuvāyávó 'ti rómāṇy avyáyā sómāso áty avyáyā || 6 || áti vāyo sasató yāhi ṣáṣvato yátra grā́vā vádati tátra gachatam gṛihám índraṣ ca gachatam | ví sūnṛítā dádṛiṣe ríyate ghṛitám ā́ pūrṇáyā niyútā yātho adhvarám índraṣ ca yātho adhvarám || 7 || átrāha tád vahethe mádhva ā́hutim yám aṣvatthám upatíshṭhanta jāyávo 'smé té santu jāyávaḥ | sākám gā́vaḥ súvate pácyate yávo ná te vāya úpa dasyanti dhenávo nápa dasyanti dhenávaḥ || 8 ||

The pious acts of prayers offered to you have given increased efficacy to our selfless acts. For you the singer has tuned these songs just as the herbal extract is pressed out through a strainer or just as the grooms rub down the quick-running horses. May you accept our invocation and come hither, well-disposed towards us, for our protection. May you accept our devotional prayer which is so well offered as if the juices from plants are pressed out by stones. O God, you as resplendent self and vital Lord are the giver of food to us. 5

O resplendent and vital Lord, these sweet expressions of devotional prayers sung by the priests are all addressed to you possessing the qualities of radiance and vitality; pure prayers are meant for both of you, O resplendent vital Lord, these prayers have come out of our hearts just as herbal juices filtered out through an oblique strainer. They are meant to invoke both of your aspects : the resplendent and the vital. Prayers come out of our hearts just as plant juices come through wooly fleece,—the inexhaustible expressions of devotions. 6

O vital Lord, may you pass in the close proximity of the many sleeping worshippers and go to the house where the devotees are tuning their prayers. O resplendent Lord, go to that dwelling, go where the word of eternal truth is being heard; and where butter flows; go, O Lord, with radiance and the waves of spirituality,—O Lord, go to the place of worship. 7

Then, bring the libations of the sweet juice to the place of worship where the triumphant priests stand round the rock-born plant. May they ever be victorious for us. For you together the cows yield their milk; the offering of barley is cooked. And may your cows never grow weak; never may the cattle be carried off by thieves. 8

इमे ये ते सु वायो बाह्वोजसोऽन्तर्नदी ते पतयन्त्युक्षणो महि व्राधन्त उक्षणः।
धन्वञ्चिद्ये अनाशवो जीराश्चिदगिरौकसः ।
सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः ॥९॥

imé yé te sú vāyo bāhvòjaso 'ntár nadī́ te patáyanty uksháṇo máhi vrádhanta uksháṇaḥ | dhánvañ cid yé anāṣávo jīrā́ṣ cid ágiraukasaḥ | sū́ryasyeva raṣmáyo durniyántavo hástayor durniyántavaḥ || 9 ||

(१३६) षट्त्रिंशदुत्तरशततमं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । (१–५) प्रथमादिपञ्चर्चां मित्रावरुणौ, (६–७) षष्ठीसप्तम्योश्च लिङ्गोक्ता देवताः । (१–६) प्रथमादिषड्चामत्यष्टिः, (७) सप्तम्याश्च त्रिष्टुप् छन्दसी ॥

॥२६॥ प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्याम्।
ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता ।
अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ॥१॥
अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः ।
द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च ।
अथा दधाते बृहदुक्थ्यं१ वय उपस्तुत्यं बृहद्वयः ॥२॥

136.

Prá sú jyéshṭhaṃ nicirā́bhyām bṛihán námo havyáṃ matím bharatā mṛiḷayádbhyāṃ svā́dishṭhaṃ mṛiḷayádbhyām | tā́ samrā́jā ghṛitā́sutī yajñé-yajña úpastutā | áthainoḥ kshatráṃ ná kútaṣ canā́dhṛíshe devatváṃ nū́ cid ādhṛíshe || 1 ||
ádarṣi gātúr uráve várīyasī pánthā ṛitásya sám ayaṅsta raṣmíbhiṣ cákshur bhágasya raṣmíbhiḥ | dyukshám mitrásya sā́danam aryamṇó váruṇasya ca | áthā dadhāte bṛihád ukthyàṃ váya upastútyam bṛihád váyaḥ || 2 ||

These your horses, who are strong of limb, youthful and full of vigour, bear you through the space between heaven and earth. They are growing in bulk and strong like oxen; they are not lost in the firmament, but hold on their speed, unretarded by reviling; difficult are they to be arrested as the beams of the sun,—difficult are they to be arrested by force. 9

136

May we offer most excellent and ample admiration and reverential regards to the two suns of summer and winter, while they occupy the two stations; the suns who have existed eternally and who confer happiness to the people of this earth. The suns in these two positions deserve most coveted approbations. These are both imperial suns. We sing the praises in devotional hymns and we glorify the summer sun and the winter sun at both these places on every sacred occasion. Hence the might of these is not in any way opposed, nor their divinity is resisted. 1

The most excellent dawn is proceeding to participate in the sacred cosmic ritual. The path of the revolving sun has been lighted up as if by the rays of the dawn. The eyes of people on the earth have been opened by the rays of the sun. The brilliant mansion of the sun, known as supra-life (during summer), the time-ordainer (during autumn) and the superb (during winter), has been lighted up by dawn's rays. And, therefore, may the sun accept the praiseworthy and copious adoration,—the praiseworthy and copious adoration. 2

ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे ।
ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती ।
मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ॥३॥
अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः ।
तं देवासो जुषेरत विश्वे अद्य सजोषसः ।
तथा राजाना करथो यदीमह ऋतावाना यदीमहे ॥४॥

jyótishmatīm áditim dhārayátkshitim svàrvatīm á sacete divé-dive jāgṛivánsā divé-dive | jyótishmat kshatrám āṣāte ādityá dánunas pátī | mitrás táyor váruṇo yātayájjano 'ryamá yātayájjanaḥ || 3 || ayám mitráya váruṇāya ṣáṃtamaḥ sómo bhūtv avapáneshv ábhago devó devéshv ábhagaḥ | táṃ deváso jusherata víṣve adyá sajóshasaḥ | táthā rājānā karatho yád ímaha ṛítāvānā yád ímahe || 4 ||

यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वांसं मर्तमंहसः ।
तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम् ।
उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ॥५॥
नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्हुषे सुमृळीकाय मीळ्हुषे ।
इन्द्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगम् ।
ज्योग्जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ॥६॥

yó mitráya váruṇāyávidhaj jáno 'narváṇaṃ tám pári pāto áṅhaso dāṣváṅsam mártam áṅhasaḥ | tám aryamábhí rakshaty ṛijūyántam ánu vratám | ukthaír yá enoḥ paribhúshati vratáṃ stómair ābhúshati vratám || 5 || námo divé bṛihaté ródasībhyām mitráya vocaṃ váruṇāya mīḷhúshe sumṛiḷīkáya mīḷhúshe | índram agním úpa stuhi dyukshám aryamáṇam bhágam | jyóg jívantaḥ prajáyā sacemahi sómasyotí sacemahi || 6 ||

The indivisible sun is full of luminosity and celestiality; it is the upholder of the people. You, O sun, come day by day,—you are worshipped day by day by those who wake up early in the morning. O summer sun and winter sun, both of you are the animators of the people on the right path. O time ordainer (the sun of the autumn season) you are the inspirer of men. 3

May these seasonal offerings be gratifying to the summer sun and the winter sun and may they be enjoyed by them as they accept it with due respect. This divine offering is fit to be enjoyed by the cosmic divine. May all the cosmic divines, enlightened, be united to enjoy it. Therefore, O royal divines, may our aspirations come to fulfilment. You, who are the sustainer of cosmic law,—may our aspirations be fulfilled. 4

Any-one, who offers adoration to the summer sun and the winter sun may be rendered free of evil thoughts. May the sun of autumns protect him from danger,—they save the worshipper from danger. The law-giver, pleased with his worship, protects him who also is dedicated to the winter and summer suns righteously. May you lead to prosperity him who toils in the rainy season also,—who toils and thus worships in the seasons of spring and autumn. 5

Let me proclaim veneration to the mighty sun, to heaven and earth, to the sun of summer and to the benevolent sun of winter, to the conferrer of happiness, the showerer of benefits. Let me glorify the resplendent sun to the super-fire, to the brilliant time-ordainer and the effulgent, so that, enjoying long life, we may be blessed with progeny. May we be happy through the protecting virtues of medicinal herbs. 6

ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः ।
अग्निर्मित्रो वरुणः शर्म यंसन्तदश्याम मघवानो वयं च ॥७॥

ūtí devánām va-
yám índravanto maṅsīmáhi sváyaṣaso marúdbhiḥ | agnír
mitró váruṇaḥ ṣárma yaṅsan tád aṣyāma magháväno va-
yáṃ ca || 7 ||

(१३७) सप्तत्रिंशदुत्तरशततमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । मित्रावरुणौ देवते । अतिशक्वरी छन्दः ॥

॥१॥ सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे ।
आ राजाना दिविस्पृशास्मत्रा गन्तमुप नः ।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥१॥
इम आ यातमिन्दवः सोमासो दध्याशिरः सुतासो दध्याशिरः ।
उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ।
सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये ॥२॥
तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः ।
अस्मत्रा गन्तमुप नोऽर्वाञ्चा सोमपीतये ।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ॥३॥

137.

Sushumá yātam ádribhir góṣrītā matsará imé sómāso matsará imé | á rājānā divispriṣāsmatrá gantam úpa naḥ | imé vām mitrāvaruṇā gávāṣiraḥ sómāḥ ṣukrá gávāṣiraḥ || 1 || imá á yātam índavaḥ sómāso dádhyāṣiraḥ sutáso dá-dhyāṣiraḥ | utá vām usháso budhí sākáṃ súryasya raṣmí-bhiḥ | sutó mitráya váruṇāya pītáye cárur ṛitáya pītáye || 2 || táṃ vāṃ dhenúṃ ná vāsarím aṅṣúṃ duhanty ádribhiḥ sómaṃ duhanty ádribhiḥ | asmatrá gantam úpa no 'rváñcā sómapītaye | ayáṃ vām mitrāvaruṇā nṛíbhiḥ sutáḥ sóma á pītáye sutáḥ || 3 ||

Worshipping the resplendent sun, and favoured by the vital principles, may we rely upon our strength and receive the protection of the divine cosmic powers, and may we be affluent through their bounty. May we enjoy the felicity which the super-fire, super-life and the super-sun are bestowing upon us. 7

137

Come, O *supra-life* (summer sun) and Super Sun (winter sun) to our place of toil where we express the healing essence of herbs with stones. These essences mixed with milk are exhilarating. These elixirs are exhilarating. Come to us, O royal cosmic powers, dwellers in heaven and our guardians. These juices are mixed with milk for you, O source of light and bliss, they are brilliant and mixed with milk. 1

Come to partake of these dripping healing juices which are mixed with curds,—they are extracted and mixed with curds. They have been prepared just after the dawn at the appearance of the sun-rays. They are dedicated to the winter sun, as well as the summer sun for their acceptance, —the extracted juices are for the realization of the eternal and never-failing truth. 2

They milk for both of you the elixir by crushing the succulent creeper with stones like a productive milch-cow,– they milk the elixir by crushing with stones. Come to us as our protectors. Be present with us to drink the healing elixir. This has been effused, O the summer sun and winter sun, effused for your drinking. 3

(१३८) अष्टात्रिंशदुत्तरशततमं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । पूषा देवता । अत्यष्टिश्छन्दः ॥

॥२॥ प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तन्दते स्तोत्रमस्य न तन्दते ।
अर्चामि सुम्नयन्नहमन्त्यूतिं मयोभुवम् ।
विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः ॥१॥
प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः ।
हुवे यत्त्वा मयोभुवं देवं सख्याय मर्त्यः ।
अस्माकमाङ्गूषान्द्युम्निनस्कृधि वाजेषु द्युम्निनस्कृधि ॥२॥

138.

Prá-pra pūshṇás tuvijātásya ṣasyate mahitvám asya taváso ná tandate stotrám asya ná tandate | árcāmi sumnayánn ahám ántyūtim mayobhúvam | víṣvasya yó mána āyuyuvé makhó devá āyuyuvé makháḥ || 1 || prá hí tvā pūshann ajirám ná yấmani stómebhiḥ kṛiṇvá ṛiṇávo yáthā mṛídha úshṭro ná pīparo mṛídhaḥ | huvé yát tvā mayobhúvam devám sakhyấya mártyaḥ | asmấkam āṅgūshấn dyumnínas kṛidhi vấjeshu dyumnínas kṛidhi || 2 ||

यस्य ते पूषन्त्सख्ये विपन्यवः क्रत्वा चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ।
तामनु त्वा नवीयसीं नियुतं राय ईमहे ।
अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ॥३॥

yásya te pūshan sakhyé vipanyávaḥ krátvā cit sántó 'vasā bubhujrirá íti krátvā bubhujriré | tấm ánu tvā návīyasīṃ niyútaṃ rāyá īmahe | áheḷamāna uruṣaṅsa sárī bhava vấje-vāje sárī bhava || 3 ||

138

Our Lord is the divine nourisher ; He is universally worshipped and His great strength is widely lauded. His greatness is never questioned ; His glory knows no bounds. Desirous of happiness, I adore Him, whose protection is always ready at hand and who is the giver of happiness. When devoutly worshipped, He helps in the performances of sacred works, helps to perform the sacred ceremonies. 1

I invoke you, O Lord, the divine nourisher, may your help come to us quick like a courser in a war, or like a camel across the desert. Therefore do I, a mortal, invoke you, the divine bestower of happiness, for your friendship. May you render our invocations productive,—may you render them inspiring at the time of battle. 2

O divine nourisher, those wise devotees who through your friendship enjoy countless riches, enjoy them due to your protection and their own hard labour,—mainly through their hard labour. Free from anger, and entitled to ample praises, may you be ever accessible to us, and may you be our leader in every encounter. 3

अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व ।
ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः ।
नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ॥४॥

asyā́ ū shú ṇa úpa sātáye bhuvó 'heḷamāno rarivā́ñ ajāṣva ṣravasyatā́m ajāṣva | ó shú tvā vavṛitīmahi stómebhir dasma sādhúbhiḥ | nahí tvā pūshann atimánya āghriṇe ná te sakhyám apahnuvé || 4 ||

(१३९) एकोनचत्वारिंशदुत्तरशततमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य दैवोदासिः परुच्छेप ऋषिः । (१,११) प्रथमर्च एकादश्याश्च विश्वे देवाः, (२) द्वितीयाया मित्रावरुणौ, (३-५) तृतीयादितृचस्याश्विनौ, (६) षष्ठ्या इन्द्रः, (७) सप्तम्या अग्निः, (८) अष्टम्या मरुतः, (९) नवम्या इन्द्राग्नी, (१०) दशम्याश्च बृहस्पतिर्देवताः । (१-४, ६-१०) प्रथमादिचतुर्ऋचां षष्ठ्यादिपञ्चानाञ्चात्यष्टिः, (५) पञ्चम्या बृहती, (११) एकादश्याश्च त्रिष्टुप् छन्दांसि ॥

॥३॥ अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ॥१॥
यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना ।
युवोरित्थाधि सद्मस्वपश्याम हिरण्ययम् ।
धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥२॥

139.

Ástu ṣraúshaṭ puró agním dhiyā́ dadha ā́ nú tác chárdho divyám vriṇīmaha indravāyū́ vriṇīmahe | yád dha krāṇā́ vivásvati nā́bhā saṃdā́yi návyasī | ádha prá sū́ na úpa yantu dhītáyo devā́ñ áchā ná dhītáyaḥ || 1 || yád dha tyán mitrāvaruṇāv ṛitā́d ádhy ādadā́the ánṛitaṃ svéna manyúnā dákshasya svéna manyúnā | yuvór itthā́dhi sádmasv ápaṣyāma hiraṇyáyam | dhībhíṣ caná mánasā svébhir akshábhiḥ sómasya svébhir akshábhiḥ || 2 ||

Free from anger, and liberal to us in giving gifts, may you be close to us, O fast moving divine nourisher, for the acceptance of our offerings. May you be near to those who solicit food, O fast mover. With pious hymns, we turn to you, O destroyer of enemies. O accepter of offerings, we never cease to think of you, and never disregard your friendship. 4

139

May our prayers be heard. We meditate on the supreme adorable God and solicit the divine strength. We adore the resplendent and all-pervading God. Inasmuch as the brilliant noble works have been perfoımed by us, so may our prayers be heard by the divine powers,—may our prayers reach the divine powers. 1

Inasmuch as, O supreme source of light and source of bliss, through your divine wisdom you discern everything that is false and everything that is true, and cause the valorous to govern with the aid of your own power, so may we realize in all the places of our worship your golden halo through our thinking, and through our vision and experience,—through our blissful vision. 2

युवां स्तोमेभिर्देवयन्तो अश्विनाश्रावयन्त इव श्लोकमायवो युवां हव्याभ्याऽयवः ।
युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा ।
प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये ॥३॥
अचेति दस्रा व्यु१नाकमृण्वथो युञ्जते वां रथयुजो दिविष्टिष्वध्वस्मानो दिविष्टिषु ।
अधि वां स्थाम वन्धुरे रथे दस्रा हिरण्यये ।
पथेव यन्तावनुशासता रजोऽञ्जसा शासता रजः ॥४॥
शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम् ।
मा वां रातिरुप दसत्कदा चनास्मद्रातिः कदा चन ॥५॥

yuvā́ṃ stómebhir devayánto aṣvināṣrāváyanta iva ṣlókam āyávo yuvā́ṃ havyā́bhy ā̀yávaḥ | yuvór víṣvā ádhi ṣríyaḥ príkshaṣ ca viṣvavedasā | prushāyánte vām paváyo hiraṇyáye ráthe dasrā hiraṇyáye || 3 || áceti dasrā vy ù nā́kam riṇvatho yuñjáte vāṃ rathayújo díviṣhṭishv adhvasmā́no díviṣhṭishu | ádhi vāṃ sthā́ma vandhúre ráthe dasrā hiraṇyáye | pathéva yántāv anuṣā́satā rájó 'ñjasā ṣā́satā rájaḥ || 4 || ṣácībhir naḥ ṣacīvasū dívā náktaṃ daṣasyatam | mā́ vāṃ rātír úpa dasat kádā canā́smád rātíḥ kádā caná || 5 ||

॥२॥ वृषन्निन्द्र वृषपाणास इन्दव इमे सुता अद्रिषुतास उद्भिदस्तुभ्यं सुतास उद्भिदः ।
ते त्वा मन्दन्तु दावने महे चित्राय राधसे ।
गीर्भिर्गिर्वाहः स्तवमान आ गहि सुमृळीको न आ गहि ॥६॥

vríshann indra vrishapā́ṇāsa índava imé sutā́ ádrishutāsa udbhídas túbhyaṃ sutā́sa udbhídaḥ | té tvā mandantu dāváne mahé citrā́ya rā́dhase | gīrbhír girvāha stávamāna ā́ gahi sumriḷīkó na ā́ gahi || 6 ||

O twin divines, the supervisors of law and education, these enlightened worshippers glorify you with their hymns and invoke you and pay compliments to your attributes. All your opulence, and every kind of wealth and abundant food, O omniscient, are vested in the aura of your vitality. The fellies of the wheels of your aura of vitality are dropping honey. The fellies of that golden aura carry you onward, O mighty twin divines. 3

O twin-leaders, your objective is clear; you have thrown open the routes of spaces. The pilots of your space ship have harnessed engines for your onward journey,--the engines that take you safe on the onward journey without accidents. Both of you have been conveniently seated in your richly decorated three-shafted craft, going along a direct path through space. 4

With your valorous deeds, O twin-divines, grant us, by day and night, all good things, having been pleased with our noble deeds; may your munificent grants never diminish,—never may our donations become less. 5

O resplendent Lord, showerer of blessings, these effused juices, pressed out from herbs gathered from the hills are for your acceptance. These herbal extracts have been specially prepared for you. May they satisfy you as an offering presented in the hope of receiving rich and abundant wealth. Accepter of laudations, may you come to us, glorified by our hymns; come to us well pleased. 6

ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यज्ञियेभ्यो राजभ्यो यज्ञियेभ्यः ।
यद्ध त्यामङ्गिरोभ्यो धेनुं देवा अदत्तन ।
वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥७॥
मो षु वो अस्मदभि तानि पौंस्या सना भूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः ।
यद्वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यम् ।
अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ॥८॥

ó shú ṇo agne srinuhi tvám īlitó devébhyo bravasi yajñíyebhyo rájabhyo yajñíyebhyaḥ | yád dha tyám áñgirobhyo dhenúṃ devā ádattana | ví táṃ duhre aryamá kartárī sácāñ eshá táṃ veda me sácā || 7 || mó shú vo asmád abhí táni paúñsyā sánā bhūvan dyumnáni mótá jārishur asmát purótá jārishuḥ | yád vaṣ citráṃ yugé-yuge návyaṃ ghóshād ámartyam | asmásu tán maruto yác ca dushṭáraṃ didhritá yác ca dushṭáram || 8 ||

दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः ।
तेषां देवेष्वायतिरस्माकं तेषु नाभयः ।
तेषां पदेन मह्या नमे गिरेन्द्राग्नी आ नमे गिरा ॥९॥
होता यक्षद्वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः ।
जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना ।
अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः ॥१०॥

dadhyáñ ha me janúsham púrvo áñgirāḥ priyámedhaḥ káṇvo átrir mánur vidus té me púrve mánur viduḥ | téshāṃ devéshv áyatir asmákaṃ téshu nábhayaḥ | téshām padéna máhy á name giréndrāgní á name girá || 9 || hótā yakshad vaníno vanta váryam bríhaspátir yajati vená ukshábhiḥ puruvárebhir ukshábhiḥ | jagribhmá dūráādisaṃ slókam ádrer ádha tmánā | ádhārayad araríndāni sukrátuḥ purú sádmāni sukrátuḥ || 10 ||

O leader of people, do come and listen attentively when you are praised by us, and speak on our behalf to other distinguished colleagues, worthy of our respectful regards, worthy of venerable regards. The cow of prosperity you gave to the producers of wealth and which the lawgivers have also milked for the public good,—may we all comprehend the nature of that cow. 7

Never, O fighters for the public good, may your youthful energies be turned against us; may our glory never diminish; never before our time decay. May your favours, that have been wonderfully yours from age to age, and whatsoever is most difficult of attainment,—bestow upon us all that is most difficult to be attained. 8

The ancient men of spiritual austerity, vitality, kindness and men of wisdom, exempt from three types of pains, have known my origin; they, the men of wisdom, have known my progenitors; theirs is a very intimate relation with all the divines. Our forefathers have been among them. Following in their footsteps, I humbly propitiate with hymns; I worship the resplendent Lord and the Lord, the adorable, with hymns. 9

Let the invoker of the divines offer worship. And may they, desirous of the offering, partake of the acceptable libation. May the benevolent preceptor himself, desiring the libation, celebrate the worship with devotional chants with copious and excellent chants. We now hear from a distant quarter the sound of devotional songs, whereby the performer of pious acts has of himself secured many gifts and the performer of pious acts has secured numerous habitations. 10

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥११॥

yé devāso divy ékādaṣa sthá pṛithivyā́m ádhy ékādaṣa sthá | apsukshíto mahinaíkādaṣa sthá té devāso yajñám imám jushadhvam || 11 ||

(१४०) चत्वारिंशदुत्तरशततमं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता ।
(१-९, ११) प्रथमादिनवर्चामेकादश्याश्च जगती, (१०) दशम्या जगती त्रिष्टुब् वा, (१२-१३) द्वादशीत्रयोदश्योश्च त्रिष्टुप् छन्दसी ॥

॥५॥ वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् ॥१॥
अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः ।
अन्यस्यासा जिह्वया जेन्यो वृषा न्य१न्येन वनिनो मृष्ट वारणः ॥२॥
कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम् ।
प्राचाजिह्वं ध्वसयन्तं तृषुच्युतमा साच्यं कुपयं वर्धनं पितुः ॥३॥

140.

Vedisháde priyádhāmāya sudyúte dhāsím iva prá bharā yónim agnáye | vástreṇeva vasaya mánmanā ṣúcim jyotíratham ṣukrávarṇam tamohánam || 1 || abhí dvijánmā trivṛ́d ánnam ṛijyate saṃvatsaré vāvṛidhe jagdhám ī púnaḥ | anyásyāsā́ jihváyā jényo vṛ́shā ny ànyéna vaníno mṛishṭa varaṇáḥ || 2 || kṛishṇaprútau vevijé asya sakshítā ubhā́ tarete abhí mātárā ṣíṣum | pracā́jihvam dhvasáyantam trishucyútam ā́ sā́cyam kúpayam várdhanam pitúḥ || 3 ||

O (the thirty-three) divines that are eleven in heaven, eleven on earth, and eleven in firmament, may you be pleased with sacred performances. 11

140

Select a proper spot as it were an offering for the radiant fire; construct an altar and place the fire on it, this being the seat dear to him. As with a garment, cover him with soft wood, whereupon it would blaze out as sacred, light-bearing, bright and gloom-dispelling. 1

This fire is twice-generated (having come out first between the two pieces of wood in the process of attrition and then caught in the dry grass), and it devours the triple food [i.e. wood fuel, butter, and other seasonal offerings], and at the close of the year, it renovates all that has been consumed. The food taken by the tongue and the mouth is consumed by one form of fire (the metabolic energy), and the forest wood is consumed by another fire (of fuel combustion). 2

Both fire-sticks, originators of this offspring, get charred by combustion, living close to each other, tremble and give birth to an infant whose tongue of flame glows in the east; (who) readily develops; who rapidly issues forth; who is ever to be cherished and fit to be protected, and who is the augmenter of the prosperity of his parents. 3

मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः ।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः ॥४॥
आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः ।
यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्त्स्तनयन्नेति नानदत् ॥५॥

mumu-
kshvò mánave mānavasyaté raghudrúvah krishnásītāsa ū júvah | asamaná ajiráso raghushyádo vátajūtā úpa yujyanta āṣávah || 4 || ád asya té dhvasáyanto vrítherate krishnám ábhvam máhi várpah kárikratah | yát sīm mahím avánim prábhí mármriṣad abhiṣvasán stanáyann éti nánadat || 5 ||

॥६॥ भूषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः ॥६॥
स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद्वर्पः पित्रोः कृण्वते सचा ॥७॥
तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः ।
तासां जरां प्रमुञ्चन्नेति नानददसुं परं जनयञ्जीवमस्तृतम् ॥८॥

bhúshan ná yó 'dhi babhrúshu námnate vríshevа pátnīr abhy èti róruvat | ojāyámānas tanvàṣ ca ṣumbhate bhīmó ná ṣríñga davidhāva durgríbhih || 6 || sá saṃstíro vishtírah sáṃ gribhayati janánn evá jānatír nítya á ṣaye | púnar vardhante ápi yanti devyàm anyád várpah pitróh krinvate sácā || 7 || tám agrúvah keṣínīh sáṃ hí rebhirá ūrdhvás tasthur mamrúshīh práyáve púnah | tásāṃ jarám pramuñcánn eti nánadad ásum páraṃ janáyañ jīvám ástritam || 8 ||

The flames coming out of the fire-altar, wishing to proceed on smoky track, quick-consuming, capricious, restless, lambent, formed by the wind, spreading wide, and assuring prosperity to the devotee, are kindled for the benefit of the worshipper,—dedicated to serve men. 4

When the fire proceeds touching and licking the great earth, hissing and tumbling, then those flames, the destroyers of darkness, easily fly about, exhibiting their black terrific great form, thundering and roaring. 5

And he, (the enraged fire) stoops down among the brown bushes as if embellishing them with his lusture, and rushes bellowing loudly like a bull amongst a herd of cows; and increasing in intensity, he adorns his form and like a terrific beast he violently brandishes his horns. 6

Now hidden, now revealed, he (the fire) seizes on the fuels as if understanding the purpose of the worshipper and even reposes amidst the conscious flames; again these (flames) break forth, and repair to the divine fire of the altar. And, blending with it, they give different luminous forms to their parents, the sun and the earth. 7

The curled tresses of the flames embrace him and, when dwindling, spring aloft again to greet their coming lord, rescuing them from decrepitude. He comes sounding aloud, generating in them intenser animation and invincible vitality. 8

अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः ।
वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह ॥९॥
अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः ।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥१०॥

adhī-
vasám pári matú rihám áha tuvigrébhiḥ sátvabhir yāti ví jráyaḥ | váyo dádhat padváte rérihat sádānu ṣyénī sacate vartanír áha || 9 || asmákam agne maghávatsu dīdihy ádha ṣvásīvān vṛishabhó dámūnāḥ | avásyā ṣíṣumatīr adīder vármeva yutsú parijárbhurāṇaḥ || 10 ||

॥७॥

इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु ते ।
यत्ते शुक्रं तन्वो३ रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ॥११॥
रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने ।
अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ॥१२॥
अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिन्धवश्च स्वगूर्ताः ।
गव्यं यव्यं यन्तो दीर्घाहेषं वरमरुण्यो वरन्त ॥१३॥

idám agne súdhitaṃ dúrdhitād ádhi priyád u cin mánmanaḥ préyo astu te | yát te ṣukrám tanvò rócate ṣúci ténāsmábhyaṃ vanase rátnam á tvám || 11 || ráthāya návam utá no gṛiháya nítyāritrām padvátīṃ rāsy agne | asmákaṃ vīráñ utá no maghóno jánāñṣ ca yá pāráyāc chárma yá ca || 12 || abhí no agna ukthám íj juguryā dyávākshámā síndhavaṣ ca svágūrtāḥ | gávyaṃ yávyaṃ yánto dīrgháhéshaṃ váram aruṇyò varanta || 13 ||

He (the fire of the forest) passes through tracts, as is well known, licking up the vesture of the mother earth, and accompanied by the loudly crying animals. The dark tracks follow the forest fire, and the land is cleared for farming which provides food and sustenance to men and cattle. 9

Shine, O bounteous fire, in our opulent abodes, vivifying, showering blessings, and casting off infantine glimmerings. Blaze fiercely, repelling enemies repeatedly, and may you be like an armour to us in our struggles. 10

May this offering, carefully placed upon the rugged but agreeable pile of fuel, be most acceptable to you. May the pure radiance of your person shine brightly, and may you grant us abundant wealth. 11

Bestow, O fire, a boat for the pleasure of our family, fitted with oars and motor wheels, the one that may render our posterity prosperous, and may bear people across the ocean of life and lead them to happiness. 12

O Fire, be propitiated by our earnest praise, and may the sun and the earth and the spontaneously-flowing streams, accepting our oblation, provide for us the produce of the herd and of the field; and may the purple coursers of the dawn bestow upon us abundant food for all times. 13

(१४१) एकचत्वारिंशदुत्तरशततमं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । (१-११) प्रथमाद्येकादशर्चां जगती, (१२-१३) द्वादशीत्रयोदश्योश्च त्रिष्टुप् छन्दसी ॥

॥८॥ बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः ॥१॥
पृक्षो वपुः पितुमान्नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥२॥
निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ॥३॥

141.

Báḷ itthā́ tád vápushe dhāyi darṣatáṃ devásya bhárgaḥ sáhaso yáto jáni | yád īm úpa hvárate sā́dhate matír ṛitásya dhénā anayanta sasrútaḥ || 1 || prikshó vápuḥ pitumā́n nítya ā́ ṣaye dvitī́yam ā́ saptáṣivāsu mātṛíshu | tṛitī́yam asya vṛishabhásya doháse dáṣapramatiṃ janayanta yóshaṇaḥ || 2 || nír yád īm budhnā́n mahishásya várpasa īṣānā́saḥ ṣávasā kránta sūráyaḥ | yád īm ánu pradívo mádhva ādhavé gúhā sántam mātaríṣvā mathāyáti || 3 ||

प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ॥४॥
आदिन्मातॄराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।
अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते ॥५॥

prá yát pitúḥ paramā́n nīyáte páry ā́ prikshúdho vīrúdho dáṃsu rohati | ubhā́ yád asya janúshaṃ yád ínvata ā́d íd yávishṭho abhavad ghṛiṇā́ ṣúciḥ || 4 || ā́d ín mātṛ́īr ā́viṣad yā́sv ā́ ṣúcir áhiṅsyamāna urviyā́ ví vāvṛidhe | ánu yát pū́rvā áruhat sanājúvo ní návyasīshv ávarāsu dhāvate || 5 ||

141

Verily, that visible radiance of the divine fire, is enshrined by us all for the support of the body. It has been generated for this purpose by physical effort. That is why our mind is attracted towards that radiance and we propitiate it. All sacred prayers, together with oblations are carried to the fire alone. 1

The first form of this universal divine fire is that pattern of one which is reposed on the earth and has the faculty of ripening the crop in the fields and subsequently digesting the food. Its second form is that cosmic one which dwells among the seven auspicious mothers. (This refers to the spiritual fire which is generated with the help of the seven symbolic terms: *bhuh, bhuvah, svah, mahah, janah, tapah* and *satyam,* in the meditative repetitions in the system of the Yoga). The third form of this benevolent divine is that which is manifested in the process of attrition in which the ten fingers participate like maidens. 2

When powerful priests bring to life this mighty divine fire from the interior of the wood and when, for the sake of offering oblations, the cosmic wind churns it out of the altar where it has been lurking in the hiding place; 3

When excellent nutritious oblations are offered to this divine fire and the dry branches of wood are fed to the hungry flames under the directions of the institutor of the ceremony and the priest, the fire blazes out and becomes most youthful and radiant with effulgence. 4

The fire, having born out of the wood, is proceeding again to other pieces of wood like a child moving towards its mother; here pure and unharmed, it evolves into magnitude. Then it mounts on the heap of the wood nearby, and runs rapidly amongst the smaller pieces of wood which are constantly being fed to it. 5

आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋञ्जते ।
देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे ॥६॥
वि यदस्थाद्यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।
तस्य पत्मन्दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ॥७॥
रथो न यातः शिक्वभिः कृतो द्यामङ्गेभिररुषेभिरीयते ।
आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथादीषते वयः ॥८॥

ád íd dhótāram vrinate dívishtishu bhágam iva papricānása riñjate | deván yát krátvā majmánā purushtutó mártam sáṅsam visvádhā véti dhā́yase || 6 || ví yád ásthād yajató vátacodito hvāró ná vákvā jaráṇā ánākritah | tásya pátman dakshúshah krishnájaṅhasah súcijanmano rája ā́ vyádhvanah || 7 || rátho ná yātáh síkvabhih kritó dyā́m áñgebhir arushébhir īyate | ā́d asya té krishnáso dakshi sūráyah sū́rasyeva tvesháthād īshate váyah || 8 ||

त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः ।
यत्सीमनु क्रतुना विश्वथा विभुररान्न नेमिः परिभूरजायथाः ॥९॥
त्वमग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि ।
तं त्वा नु नव्यं सहसो युवन्वयं भगं न कारे महिरत्न धीमहि ॥१०॥

tváyā hy ágne váruno dhritávrato mitráh sāsadré aryamá sudánavah | yát sīm ánu krátunā visváthā vibhúr arā́n ná nemíh paribhúr ájāyathāh || 9 || tvám agne sasamānā́ya sunvaté rátnam yavishtha devátātim invasi tám tvā nú návyam sahaso yuvan vayám bhágam na kāré mahiratna dhīmahi || 10 ||

Just as people adore a powerful prince, this fire is adored by the pious worshippers so that it becomes an invoker for the propitiation of other cosmic forces. This universally praised and all-upholding divine fire alone knows how to establish a link between the mortal worshipper and Nature's other benign forces for the procurement of sustenance. 6

Whilst the adorable fire-divine, impelled by the wind and unresisted, spreads in various directions, like an insincere and unrestrained chatterer, who utters indiscriminate praises, the world follows him and worships, who is the consumer of all, whose path is dark but who is pure of birth, and who travels in various directions. 7

Like a chariot drawn by ropes, this fire-divine, set in movement by his own revolving flames, rolls onward to the heavens with his ruddy limbs. Then the paths he traverses are blackened by smoke, as he consumes the fuel, and the birds (in terror) fly away from his radiance as enemies from the prowess of a hero. 8

Through your aid, O divine fire, the ocean remains within limits, the sun dispels darkness, and the rains become bounteous; and thus you have been born comprehending all of them universally in their functions, and encompassing them all as spokes in a felly. 9

O most youthful fire divine, you bring wealth and cosmic powers for the good of him who praises you and offers you libations. We, therefore, glorify you the new-born who are to be lauded and to whom rich offerings are to be presented. We glorify you in our hymn as men eulogize a powerful prince. 10

अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ।
रश्मीँरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः ॥११॥
उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः ।
स नो नेषन्नेषतमैरमूरोऽग्निर्वामं सुवितं वस्यो अच्छ ॥१२॥
अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः ।
अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः ॥१३॥

asmé rayím̥ ná svártham̥ dámūnasam bhágam̥ dáksham̥ ná papricāsi dharnasím | rasmīñr iva yó yámati jánmanī ubhé devánām̥ sáṅsam ritá ā́ ca sukrátuḥ || 11 || utá naḥ sudyótmā jīrā́svo hótā mandráḥ srinavac candrárathaḥ | sá no neshan néshatamair ámūro 'gnír vāmám̥ suvitám̥ vásyo ácha || 12 || ástāvy agníḥ símīvadbhir arkaíḥ sā́mrājyāya prataráṃ dádhānaḥ | amí ca yé maghávāno vayám̥ ca míham̥ ná sū́ro áti nísh ṭatanyuḥ || 13 ||

(१४२) द्विचत्वारिंशदुत्तरशततमं सूक्तम्

(१–१३) त्रयोदशर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । (१) प्रथमर्च इध्मः समिद्धो वाग्निः, (२) द्वितीयायास्तनूनपात्, (३) तृतीयाया नराशंसः, (४) चतुर्थ्या इळः, (५) पञ्चम्या बर्हिः, (६) षष्ठ्या देवीर्द्वारः, (७) सप्तम्या उषासानक्ता, (८) अष्टम्या दैव्यौ होतारौ प्रचेतसौ, (९) नवम्यास्तिस्रो देव्यः सरस्वतीळाभारत्यः, (१०) दशम्यास्त्वष्टा, (११) एकादश्या वनस्पतिः, (१२) द्वादश्याः स्वाहाकृतयः, (१३) त्रयोदश्याश्चेन्द्रो देवताः । अनुष्टुप् छन्दः ॥

॥१०॥ समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे । तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥१॥
घृतवन्तमुप मासि मधुमन्तं तनूनपात् ।
यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः ॥२॥

142.

Sámiddho agna ā́ vaha deváñ adyá yatásruce | tántum̥ tanushva pūrvyám̥ sutásomāya dāsúshe || 1 || ghritávantam úpa māsi mádhumantam̥ tanūnapāt | yajñám̥ víprasya mávataḥ sasamānásya dāsúshaḥ || 2 ||

Just as you grant us, fire-divine, useful house-hold wealth, good fortune and powerful strength, in like manner may you confer these blessings upon them who are the performers of holy rites. Like the reins, you regulate both the lives of the associates, the past and future, and you add lustre to their fame. 11

Would he, who is full of radiance and who has fleet horses, who is the invoker of the divines, full of joy, and born in a golden aura of glory, listen to us ? Would that irresistible, yet placable divine fire conduct us by the most efficacious means to delightful happiness and blessedness ? 12

Fire-divine, with the capacitance of the supreme, universal kinship has been glorified by us with holy rites and with hymns. Let all, who are present, one and all enriched by his favour, ever reverberate with his praises, as loudly as the sun causes the rain-cloud to thunder. 13

142

Having been kindled, O fire-divine, bring to us the benign divine powers today. And extend your radiance for him who lifts up his ladle and who has pressed out medicinal herbs for offerings. 1

O the one with never-decaying body, may you grace the well-sweetened and butter-fed fire-performance, participated in by the wise devotee, liberal in charity, glorifying you like me. 2

शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति ।
नराशंसस्त्रिरा दिवो देवो देवेषु यज्ञियः ॥३॥
ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् ।
इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥४॥

śúciḥ pāvakó ádbhuto mádhvā yajñám mimikshati | nárāṣáṅsaḥ trír á̄ divó devó devéshu yajñíyaḥ || 3 || īḷitó agna á̄ vahéndram̐ citrám ihá priyám | iyám̐ hí tvā matír mámáchā sujihva vacyáte || 4 ||

स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे ।
वृञ्जे देवव्यचस्तममिन्द्राय शर्म सप्रथः ॥५॥
वि श्रयन्तामृतावृधः प्रयै देवेभ्यो महीः ।
पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ॥६॥

striṇānáso yatásruco barhír yajñé svadhvaré | vriñjé devávyacastamam índrāya ṣárma sapráthaḥ || 5 || ví ṣrayantām ritāvrídhaḥ prayaí devébhyo mahíḥ | pāvakā́saḥ purusprího dvā́ro devír asaṣcátaḥ || 6 ||

॥१२॥

आ भन्दमाने उपाके नक्तोषासा सुपेशसा ।
यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत् ॥७॥
मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशम् ॥८॥

á̄ bhándamāne úpāke náktoshā́sā supéṣasā | yahví ritásya mātárā sídatām barhír á̄ sumát || 7 || mandrájihvā jugurváṇī hótārā daívyā kaví | yajñám̐ no yakshatām imám̐ sidhrám adyá divispríṣam || 8 ||

O fire, dear to people, pure, purifying, wonderful and adorable divine amongst divines, may you, having come from heaven, sweeten the ceremonial fire with honey three times a day. 3

O fire-divine, praised by us, bring us the resplendent and the beloved supreme Lord. This my praise is recited, O bright-tongued (i.e. with colourful flames), in your honour. 4

The priests, bearing ladles, are scattering the sacred grass in this holy place of worship and getting ready thereafter for the extensive laudable praises to be offered to the resplendent Lord. 5

Let the bright broad doors of divine knowledge and selfless service, the promoters of worship, the purifiers and dear to all, be set open for the divine sentiments to enter. 6

O beautiful night and dawn, praised by all, closely associated with each other, great sustainers of eternal law, may you join us of your own goodwill in the sacred worship. 7

May the two invokers, the inspired and the learned, possessed of pleasing voice, loud in pitch, officiate today at this our sacrifice which confers rewards and provides divinity to it. 8

शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती ।
इळा सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ॥९॥
तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना ।
त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ॥१०॥
अवसृजन्नुप त्मना देवान्यक्षि वनस्पते ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ॥११॥
पूषण्वते मरुत्वते विश्वदेवाय वायवे ।
स्वाहा गायत्रवेपसे हव्यमिन्द्राय कर्तन ॥१२॥
स्वाहाकृतान्या गह्युप हव्यानि वीतये ।
इन्द्रा गहि श्रुधी हवं त्वां हवन्ते अध्वरे ॥१३॥

ṣúcir devéshv árpitā hótrā marútsu bhāratī | íḷā sárasvatī mahī́ barhíḥ sīdantu yajñíyāḥ || 9 || tán nas turī́pam ádbhutam purú vā́ram purú tmánā | tváshṭā póshāya ví shyatu rāyé nā́bhā no asmayúḥ || 10 || avasṛijánn úpa tmánā devā́n yakshi vanaspate | agnír havyā́ sushūdati devó devéshu médhiraḥ || 11 || pūshaṇváte marútvate viṣvádevāya vāyáve | svā́hā gāyatrávepase havyám índrāya kartana || 12 || svā́hākṛitāny ā́ gahy úpa havyā́ni vītáye | índrā́ gahi ṣrudhī́ hávaṃ tvā́ṃ havante adhvaré || 13 ||

(१४३) त्रिचत्वारिंशदुत्तरशततमं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । (१-७) प्रथमादिसप्तर्चां जगती, (८) अष्टम्याश्च त्रिष्टुप् छन्दसी ॥

॥१२॥ प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे ।
अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीददृत्वियः ॥१॥

143.

Prá távyasīṃ návyasīṃ dhītím agnáye vācó matíṃ sáhasaḥ sūnáve bhare | apā́ṃ nápād yó vásubhiḥ sahá priyó hótā pṛithivyā́ṃ ny ásīdad ṛitvíyaḥ || 1 ||

May the divine virtues, wisdom (*ila*), speech (*sarasvati*) and material prosperity (*mahi*), along with culture (*bharati*) come to this sacred place of worship, participated in by pious invokers, along with the learned and their associates. 9

May the supreme architect, favourably disposed towards us, send us for our nourishment and prosperity quick-flowing abundant water, provided by the clouds. 10

O God, bestower of the wealth of herbs and plants, we offer homage to you through our noble deeds and thoughts. May divine knowledge come to us as our reward. 11

With the auspicious invocation to our resplendent Lord, may you start your sacred performances in the house of a devotee. May we offer there our gratitude to the Nature's bounties also. 12

O resplendent Lord, be with us to cherish our offerings, presented with the words *svaha*. May you hear the invocations of devotees who are calling you to their place of worship. 13

143

I offer my most invigorating and entirely new hymns of praises, expressing hearty adoration to the dear fire-divine, who is manifested through great skill and efforts, and who is the energy pervading through waters. He appropriately exists in all seasons and is the ministering agent (of Nature's forces). He occupies a place on the altar along with other precious substances of oblations. 1

स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत ॥२॥
अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः ।
भात्वक्षसो अत्यक्तुर्न सिन्धवोऽग्ने रेजन्ते अससन्तो अजराः ॥३॥
यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना ।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥४॥

sá jā́yamānaḥ paramé vyòmany āvír agnír abhavan mātaríṣvane | asyá krátvā samidhānásya majmánā prá dyā́vā ṣocíḥ prithiví́ arocayat || 2 || asyá tveshá ajárā asyá bhānávaḥ susaṃdríṣaḥ suprátīkasya sudyútaḥ | bhā́tvakshaso áty aktúr ná síndhavo 'gné rejante ásasanto ajárāḥ || 3 || yám eriré bhrígavo viṣvávedasaṃ nā́bhā prithivyā́ bhúvanasya majmánā agníṃ táṃ gīrbhír hinuhi svá ā́ dáme yá éko vásvo váruṇo ná rā́jati || 4 ||

न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।
अग्निर्जम्भैस्तिगितैरत्ति भर्वति योधो न शत्रून्स वना न्यृञ्जते ॥५॥
कुविन्नो अग्निरुचथस्य वीरसद्वसुष्कुविद्वसुभिः काममावरत ।
चोदः कुवित्तुतुज्यात्सातये धियः शुचिप्रतीकं तमया धिया गृणे ॥६॥
घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋञ्जते ।
इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियम ॥७॥

ná yó várāya marútām iva svanáḥ séneva srishṭá divyá yáthāṣániḥ | agnír jámbhais tigitaír atti bhárvati yodhó ná ṣátrūn sá vánā ny riñjate || 5 || kuvín no agnír ucáthasya vī́r ásad vásush kuvíd vásubhiḥ kā́mam āvárat | codáḥ kuvít tutujyā́t sātáye dhíyaḥ ṣúcipratīkaṃ tám ayā́ dhiyā́ griṇe || 6 || ghritápratīkaṃ va ritásya dhūrshádam agním mitráṃ ná samidhāná riñjate | índhāno akró vidátheshu dídyac chukrávarṇām úd u no yaṅsate dhíyam || 7 ||

That fire-divine, as soon as manifested and assisted by space-wind, becomes visible in the highest regions, and his radiance, kindled by vigorous efforts, illuminates heaven and earth. 2

His radiance never fades; his rays are everywhere, brilliant and bright. His intensely shining, all-pervading, unceasing and undecaying rays, desist not from their functions. 3

Propitiate with praises in your own house that fire-divine, who is the possessor of all riches, and whom the descendants of men of mature intellect establish upon the navel of the earth, and who like the venerable Lord is the sole monarch of all wealth. 4

The fire-divine who like the roaring of the winds and like a victorious host, or like the thunderbolt in heaven, is not to be warded off; it devours and destroys with sharp jaws and as a warrior annihilates his enemies. He destroys and clears the forest. 5

May the fire-divine be ever worthy of our hymns. May it be the giver of wealth and satisfy our aspirations with riches. May it be the inspirer of our sacred actions and promote our prayers to the attainment of our wishes. I glorify that effulgent fire-divine with this hymn. 6

For your sake the fuel-fed fire, promoter of natural operations, well kindled, and blazing brightly at the furnaces, is propitiated; may he illumine our well-meaning plans. 7

अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।
अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥८॥

áprayuchann áprayuchadbhir agne sivébhir naḥ pāyúbhiḥ pāhi sagmaíḥ | ádabdhebhir ádṛipitebhir ishṭé 'nimishadbhiḥ pári pāhi no jáḥ || 8 ||

(१४४) चतुश्चत्वारिंशदुत्तरशततमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । जगती छन्दः ॥

॥१३॥ एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियम् ।
अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥१॥
अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।
अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते ॥२॥
युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः ।
आदीं भगो न हव्यः समस्मदा वोळ्हुर्न रश्मीन्त्समयंस्त सारथिः ॥३॥
यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।
दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ॥४॥

144.

Éti prá hótā vratám asya māyáyordhvám dádhānaḥ súcipeṣasaṃ dhíyam | abhí srúcaḥ kramate dakshiṇāvríto yá asya dhāma prathamáṃ ha níṅsate || 1 || abhím ṛitásya dohána anūshata yónau devásya sádane párīvṛitāḥ | apám upásthe víbhṛito yád ávasad ádha svadhá adhayad yábhir íyate || 2 || yúyūshataḥ sávayasā tád íd vápuḥ samānám ár-thaṃ vitáritratā mitháḥ | ád īm bhágo ná hávyaḥ sám asmád á vóḷhur ná raṣmín sám ayaṅsta sárathiḥ || 3 || yám īṃ dvá sávayasā saparyátaḥ samané yónā mithuná sámokasa | dívā ná náktam palitó yúvājani purú cárann ajáro mánushā yugá || 4 ||

Without neglect, without any negligence, O fire-divine, may you protect us with guards, auspicious and strong, with guards, who never slumber and who are never beguiled and ever vigilant. May you protect us and also those born of us. 8

144

The ministering priest, qualified by experience, and possessing exalted and graceful devotion, proceeds to perform the fire ceremony according to the disciplines prescribed. He moves, turns to the right and lifts the ladles which are first to come lovingly in contact with the ceremonial fire (at the time of offering oblations). 1

The rain-clouds, full of streams of water, envelop the sun, the original home of the fire-divine, and sing to Him His glory. So long as fire, as heat, abides in water, water is made enjoyable to people like nectar, and the fire becomes identified with water. 2

Of the same age and extensively dispersed and with a common objective, both the wooden sticks bring their bodies in loving contacts and embrace each other. Then the fire, divine, sacred as oblation, takes the reins in his hands, like a charioteer as those of a horse. 3

He (the fire) whom the two, the married couple of similar age, living in the same place, and engaged in the same work, worship night and day; He though born in olden times is still young and though He lives through many human generations, is still exempt from decay. 4

तमीं हिन्वन्ति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे ।
धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥५॥
त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना ।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते ॥६॥
अग्ने जुषस्व प्रति हर्य तद्वचो मन्द्र स्वधाव ऋतजात सुक्रतो ।
यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँ इव क्षयः ॥७॥

tám īṃ hinvanti dhītáyo dáṣa vríṣo de-
vám mártāsa ūtáye havāmahe | dhánor ádhi praváta á sá
ṛiṇvaty abhivrájadbhir vayúnā návādhita || 5 || tvám hy ágne
divyásya rájasi tvám párthivasya paṣupá iva tmánā | énī ta
eté bṛihatī́ abhiṣrī́yā hiraṇyáyī vákvarī barhír āṣāte || 6 ||
ágne jushásva práti harya tád váco mándra svádhāva ṛí-
tajāta súkrato | yó viṣvátaḥ partyáññ ási darṣató raṇváḥ
sáṃdṛishṭau pitumáñ iva ksháyaḥ || 7 ||

(१४५) पञ्चचत्वारिंशदुत्तरशततमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । (१-४) प्रथमादि-
चतुरृचां जगती, (५) पञ्चम्याश्च त्रिष्टुप् छन्दसी ॥

॥१४॥ तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते ।
तस्मिन्त्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः ॥१॥

145.

Tám pṛichatā sá jagāmā sá veda sá cikitváñ īyate sá
nv īyate | tásmin santi praṣíshas tásminn ishṭáyaḥ sá vá-
jasya ṣávasaḥ ṣushmíṇas pátiḥ || 1 ||

The ten fingers intertwined propitiate that divine-fire; we mortals invoke Him for our protection; He darts His rays like swift arrows from a bow, and assimilates the new praises uttered by those who gather round the altar. 5

O fire-divine, you, as a herdsman, reign over the dwellers in heaven and over those of the earth according to your own will. These two, (i.e. earth and heaven) vast, glorious, golden, beneficent and bright sweet-sounding, partake of the oblations. 6

O fire-divine, joy-giver, self-sustained and born of eternal law, performer of good works, may you be pleased and attend to our prayer. You are pleasant to look on when seen from every side. You are a storehouse of food, pleasant in appearance and the refuge of all. 7

145

May you submit to Him the adorable, for every place is within His reach and all things are within His knowing. He is full of wisdom. He determines what ought to be done, and is our only recourse. In Him are vested all powers to command, in Him the power of granting enjoyments. He is the giver of food and strength and He is the protector of the mighty. 1

तमित्पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत् ।
न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा सचते अप्रदृपितः ॥२॥
तमिद्गच्छन्ति जुह्वस्तमर्वतीर्विश्वान्येकः शृणवद्वचांसि मे ।
पुरुप्रैषस्ततुरिर्यज्ञसाधनोऽच्छिद्रोतिः शिशुरादत्त सं रभः ॥३॥
उपस्थायं चरति यत्समारत सद्यो जातस्तत्सार युज्येभिः ।
अभि श्वान्तं मृशते नान्द्ये मुदे यदीं गच्छन्त्युशतीरपिष्ठितम् ॥४॥
स ईं मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां नि धायि ।
व्यब्रवीद्वयुना मर्त्येभ्योऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ॥५॥

tám ít prichanti ná simó ví prichati svéneva dhíro mánasā yád ágrabhīt | ná mrishyate prathamám náparam váco 'syá krátvā sacate ápradripitah || 2 || tám íd gachanti juhvàs tám árvatīr víṣvāny ékah ṣrinavad vácāṅsi me | purupraishás táturir yajñasádhanó 'chidrotih ṣíṣur ádatta sám rábhah || 3 || upasthấyam carati yát samárata sadyó jātás tatsāra yújyebhih | abhí ṣvāntám mriṣate nāndyè mudé yád īm gáchanty uṣatír apishthitám || 4 || sá īm mrigó ápyo vanargúr úpa tvacy ùpamásyām ní dhāyi | vy àbravīd vayúnā mártyebhyo 'gnír vidvấñ ritacíd dhí satyáh || 5 ||

(१४६) षट्चत्वारिंशदुत्तरशततमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे ।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ॥१॥

146.

Trimūrdhánam saptáraṣmim grinīshé 'nūnam agním pitrór upásthe | nishattám asya cárato dhruvásya víṣvā divó rocanápaprivấṅsam || 1 ||

Only wise sages know His greatness; no one else knows His magnanimity, for a man of determination fully knows His mind and does what he chooses to do. The adorable Lord does not tolerate an interrogation nor endures a rejoinder. He who is devoid of arrogance is favoured by His grace and protection. 2

To Him alone go all the invocations and prayers that are chanted. He alone hears all my prayers, is the inspirer of all and steers us across troubles. He is the instrument of success in sacred acts and the unintermitting preserver of life. 3

When the devotee invokes Him (the adorable Lord), He makes himself manifested and goes forward with His glory. And when worshipped with devotion and sincerity, He gratifies the aspirations of the tired and perplexed devotee. All the prayers and offerings go to Him alone for the fulfilment of the desires of the worshipper. 4

This adorable Lord is worthy of quest and attainment. He is to be sought in the innermost core of the heart where lies His abode. He is all-knowing law and truth personified, and He has revealed divine knowledge for the good of mankind. 5

146

I glorify the adorable God, subject to no diminution, sovereign master of the three worlds (physical, mental and spiritual), further represented by seven symbolic attributes, and extending through parental time and space. We glorify the universal radiance of the divine, illuminating the entire static and dynamic existences of the universe. 1

उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावितऊतिर्ऋष्वः ।
उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ॥२॥
समानं वत्समभि संचरन्ती विष्वग्धेनू वि चरतः सुमेके ।
अनपवृज्याँ अध्वनो मिमाने विश्वान्केताँ अधि महो दधाने ॥३॥
धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम् ।
सिषासन्तः पर्यपश्यन्त सिन्धुमाविरेभ्यो अभवत्सूर्यो नॄन् ॥४॥
दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे ।
पुरुत्रा यदभवत्सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ॥५॥

ukshā́ mahā́ñ abhí vavaksha ene ajáras tasthāv itáūtir ṛishváḥ | urvyā́ḥ padó ní dadhāti sā́nau rihánty ū́dho arushā́so asya || 2 || samānám vatsám abhí saṃcárantī víshvag dhenū́ ví carataḥ suméke | anapavṛijyā́ñ ádhvano mímāne víṣvān kétāñ ádhi mahó dádhāne || 3 || dhī́rāsaḥ padáṃ kaváyo nayanti nā́nā hṛidā́ rákshamāṇā ajuryám | síshāsantaḥ páry apaṣyanta síndhum āvír ebhyo abhavat sū́ryo nṛ́n || 4 || didṛikshéṇyaḥ pári kā́shṭhāsu jénya īḷényo mahó árbhāya jīváse | purutrā́ yád ábhavat sū́r áhaibhyo gárbhebhyo maghávā viṣvádarṣataḥ || 5 ||

(१४७) सप्तचत्वारिंशदुत्तरशततमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१६॥ कथा ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः ।
उभे यत्तोके तनये दधाना ऋतस्य सामन्रणयन्त देवाः ॥१॥

147.

Kathā́ te agne ṣucáyanta āyór dadāṣúr vā́jebhir āṣushāṇā́ḥ | ubhé yát toké tánaye dádhānā ṛitásya sā́man raṇáyanta devā́ḥ || 1 ||

Adorable and potent God pervades through two worlds—heaven and earth. He is beyond decay. He is generous in bestowing protection. His feet are on the summit of this earth and His radiance licks the udder of the entire space. 2

The two beautiful milch cows, representing two philosphies, worldly and spiritual, walk towards a common calf, i.e. lead to a common goal. They point out the obstacles to be avoided on the path, and provide all the indications of the measures to be adopted. 3

The realized and wise sages seek the Invincible (adorable Lord) in the interior of their heart, cherishing Him in manifold ways. For those people who see all around them the ocean of divine bliss, the sun of enlightenment makes its appearance. 4

In all regions, He is the one that is worth being sought, victorious, glorious, and to be adored. He is the source of life to great and small. He is opulent and His glory is manifest to all. He is the progenitor everywhere of the things of which He is the divine source. 5

147

O adorable God, how does your all-pervading and purifying radiance support nourishment and long life? Blessed by these both how are the virtuous worshippers with their children and grandchildren delighted in chanting sacred hymns in their worship? 1

बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने ॥२॥
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥३॥
यो नो अग्ने अररिवाँ अघायुररातीवा मर्चयति द्वयेन ।
मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ॥४॥
उत वा यः सहस्य प्रविद्वान्मर्तो मर्तं मर्चयति द्वयेन ।
अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरिताय धायीः ॥५॥

bódhā me asyá vácaso yavishṭha máṅhishṭhasya prábhṛitasya svadhāvaḥ | píyati tvo ánu tvo gṛiṇāti vandā́rus te tanvàm vande agne || 2 || yé pāyávo māmateyám te agne páṣyanto andhám duritā́d árakshan | raráksha tā́n sukṛíto viṣvávedā dípsanta íd ripávo nā́ha debhuḥ || 3 || yó no agne árarivāñ aghāyúr arātīvā́ marcáyati dvayéna | mántro gurúḥ púnar astu só asmā ánu mṛikshīshṭa tanvàm duruktaíḥ || 4 || utá vā yáḥ sahasya pravidvā́n márto mártam marcáyati dvayéna | átaḥ pāhi stavamāna stuvántam ágne mā́kir no duritā́ya dhāyīḥ || 5 ||

(१४८) अष्टचत्वारिंशदुत्तरशततमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१७॥ मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम् ।
नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावम् ॥१॥

148.

Máthīd yád īm vishṭó mātaríṣvā hótāram viṣvā́psum viṣvádevyam | ní yám dadhúr manushyā̀su vikshú svàr ṇá citrám vápushe vibhā́vam || 1 ||

O ever-youthful and mighty adorable Lord, may you listen to my most reverential and earnestly recited hymns. Whilst some praise you and others defy you, I would continue to sing your splendid glory, since I love and revere you so much. 2

O adorable Lord, your fostering rays, perceiving the blindness of the son of a distressed mother, relieve him of his grief. Being omniscient, you offer protection to the righteous. Malevolent enemies would ever be unable to do them harm. 3

O adorable Lord, may he who does not allow homage to be offered and who does not offer homage himself and thus through ambiguity seeks to inflict injury on us, may his intentions be heavy on him and may his evil words injure him only. 4

And, O Lord, the source of might, whosoever assails another person, a worshipper of yours, with ambiguity, save him from this wicked. O adorable Lord, may you not consign us to misfortunes. 5

148

The cosmic wind, of the firmament has churned out the cosmic fire, the invoker of Nature's bounties, multipurpose-ful and multicoloured, from its sources. The cosmic fire, beautiful like the resplendent sun, has been duly established in men-folk for the sustenance of their bodies. 1

दुदानमिन्न ददभन्त मन्माग्निर्वरूथं मम तस्य चाकन् ।
जुषन्त विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः ॥२॥
नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः ।
प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः ॥३॥
पुरूणि दस्मो नि रिणाति जम्भैराद्रोचते वन आ विभावा ।
आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यून् ॥४॥
न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति ।
अन्धा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन् ॥५॥

dadānám ín ná dadabhanta mánmāgnír várūtham máma tásya cākan | jushánta víṣvāny asya kármópastutim bháramāṇasya kāróḥ || 2 || nítye cin nú yáṃ sádane jagribhré práṣastibhir dadhiré yajñíyāsaḥ | prá sū́ nayanta gribháyanta ishṭáv áṣvāso ná rathyò rarahāṇā́ḥ || 3 || purū́ṇi dasmó ní riṇati jámbhair ád rocate vána ā́ vibhā́vā | ád asya vā́to ánu vāti ṣocír ástur ná ṣáryām asanā́m ánu dyū́n || 4 || ná yáṃ ripávo ná rishaṇyávo gárbhe sántaṃ reshaṇā́ resháyanti | andhā́ apaṣyā́ ná dabhann abhikhyā́ nítyāsa īṃ pretā́ro arakshan || 5 ||

(१४९.) एकोनपञ्चाशदुत्तरशततमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । विराट् छन्दः ॥

१६॥ महः स राय एषते पतिर्दन्निन इनस्य वसुनः पद आ ।
उप ध्रजन्तमद्रयो विधन्नित् ॥१॥

149.

Mahā́ḥ sá rāyá éshate pátir dánn iná inásya vásunaḥ padá ā́ | úpa dhrájantam ádrayo vidhánn ít || 1 ||

So long as I enumerate the glories of the cosmic fire, none can suppress me. The cosmic fire fully appreciates my approbations; and all the rest of the Natural forces are gratified in their turn whilst the fire is being glorified by us with praises. 2

Holy worshippers carry a fragment of this cosmic fire to their sacred place of worship and enshrine him with a chant of sacred hymns. Like the swift horses yoked to a chariot, they augment this fire quickly in the ceremonial place. 3

The destructive forest fire consumes numerous trees with his jaw-like flames. Then he brilliantly shines in the forest. The blowing wind then spreads this fire onwards, step by step, like the swift arrow of an archer. 4

The blind (of eyes) who sees not, and the blind of intellect detract not from his glory, whom no enemies, no malevolent adversaries harm even whilst yet in the embryo, for he is constantly defended by his admirers. 5

149

The adorable Lord of great riches is coming here; the Lord of lords comes to the place of affluence. May we worship Him for granting wealth and wisdom. As He is approaching, let us be ready with sweet devotional expressions to greet Him. 1

स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः ।
प्र यः सस्राणः शिश्रीत योनौ ॥२॥
आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्वा ।
सूरो न रुरुक्वाञ्छतात्मा ॥३॥
अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।
होता यजिष्ठो अपां सधस्थे ॥४॥
अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
मर्तो यो अस्मै सुतुको ददाश ॥५॥

sá yó vṛ́shā narā́ṃ ná ródasyoḥ srávobhir ásti jīvápītasargaḥ | prá yáḥ sasrāṇáḥ siśrītá yónau || 2 || ā́ yáḥ púraṃ nā́rmiṇīm ádīded átyaḥ kavír nabhanyò nárva | súro ná rurukvā́ñ chatā́tmā || 3 || abhí dvijánmā trī́ rocanā́ni víśvā rájāṅsi śuśucānó asthāt | hótā yájishṭho apā́ṃ sadhásthe || 4 || ayáṃ sá hótā yó dvijánmā víśvā dadhé vā́ryāṇi śravasyā́ | márto yó asmai sutúko dadā́śa || 5 ||

(१५०) पञ्चाशदुत्तरशततमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अग्निर्देवता । उष्णिक् छन्दः ॥

॥१९॥ पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा । तोदस्येव शरण आ महस्य ॥१॥
व्यनिनस्य धनिनः प्रहोषे चिदररुषः । कदा चन प्रजिगतो अदेवयोः ॥२॥
स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि । प्रप्रेत्ते अग्ने वनुषः स्याम ॥३॥

150.

Purú tvā dāśvā́n voce 'rír agne táva svid ā́ | todásyeva śaraṇá ā́ mahásya || 1 || vy àninásya dhanínaḥ prahoshé cid árarushaḥ | kadā́ caná prajígato ádevayoḥ || 2 || sá candró vipra mártyo mahó vrā́dhantamo diví | prá-prét te agne vanúshaḥ syāma || 3 ||

Great is the glory of the adorable Lord who rules over earth and heaven, and who, as well, guides the valour of men. It is He out of whom the creation has imbibed life, and who, entering into the womb, procreates (all living creatures). 2

He, who is wise and goes fast like the space wind, has lighted up the invincible city (the innermost cavity of the human body) and possessed of hundreds of forms is effulgent like a sun. 3

He, with his manifestation in the two realms, physical and spiritual, illuminates the three bright regions (terrestrial, interstitial and celestial) and shines over all the lustrous spheres. He is the invoker of all the cosmic forces and is present in the plasma of cosmic consciousness. 4

He, the invoker of divines (Nature's bounties), is manifested in the two realms (physical and spiritual). He bestows all excellent riches on that mortal who, with all his sincerity, surrenders completely to Him. Such a man is blessed with excellent progeny. 5

150

Whilst offering homage to you with reverence I, the humble one, implore you in many ways, O adorable. I come to your most honoured presence, as if (like a servant) in the house of a great master. 1

I ask you also to withhold your favour from those types of rebels who though rich, do not acknowledge you as their Lord, do not offer their riches for a noble cause and who disregard your authority. 2

O, wise adorable God, assuredly that mortal who worships you becomes a celestial moon, the beauty and happiness personified, and further becomes the most eminent of the divines. May we, therefore, ever be your most enthusiastic worshippers. 3

(१५१) एकपञ्चाशदुत्तरशततमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । (१) प्रथमर्चो मित्रः, (२-९) द्वितीयाद्यष्टानाञ्च मित्रावरुणौ देवताः । जगती छन्दः ॥

॥२०॥ मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः ॥१॥
यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ।
अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ॥२॥
आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ।
यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरम् ॥३॥

151.

Mitrám ná yám símyā góshu gavyávaḥ svādhyò vidáthe apsú jíjanan | árejetām ródasī pā́jasā girā́ práti priyám yajatám janúshām ávaḥ || 1 || yád dha tyád vām purumīḷhásya somínaḥ prá mitrā́so ná dadhiré svābhúvaḥ | ádha krátum vidatam gātúm árcata utá srutam vrishaṇā pastyā̀vataḥ || 2 || ā́ vām bhūshan kshitáyo jánma ródasyoḥ pravā́cyam vrishaṇā dákshase mahé | yád īm ritā́ya bhúratho yád árvate prá hótrayā símyā vītho adhvarám || 3 ||

प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत् ।
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युञ्जाथे अपः ॥४॥
मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः ।
स्वरन्ति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव ॥५॥

prá sā́ kshitír asura yā́ máhi priyá ṛ́tāvānāv ritám ā́ ghoshatho brihát | yuvám divó briható dáksham ābhúvam gā́m ná dhury úpa yuñjāthe apáḥ || 4 || mahī́ átra mahinā́ vā́ram riṇvatho 'reṇávas túja ā́ sádman dhenávaḥ | sváranti tā́ uparátāti sū́ryam ā́ nimrúca ushásas takvavī́r iva || 5 ||

151

Heaven and earth have been very much agitated by the force and energy of the cosmic fire, who is like a friend and benefactor of mankind and who deserves our adoration. It is he whom pious devotees, aspiring to obtain wealth and wisdom have generated by their sacred acts in the vital life-force of the human mind and body. 1

They, the poets, your admirers, offer to you both cosmic lights and cosmic plasma, the abundantly flowing and spontaneous melodious praises. Therefore, may you both consent to contribute to the wisdom of the poets and their ability to sing and listen, O bestowers of bliss, to the prayer of the family. 2

People glorify, O cosmic light and cosmic plasma, your manifestation in celestial space and earth to attain great strength. May you assuredly grant the desires of righteous men as the reward of their selfless works, and go to the place of worship to accept the offering that is solemnized with praise and oblation. 3

O mighty gracious divines (the cosmic light and cosmic plasma), we have carefully made that place a spot of worship which is most agreeable to you. O guardians of eternal laws, may you proclaim the ceremony having been duly performed. And may you harness this little ceremony with the vast operations going on in the cosmos like yoking a bull to the chariot. 4

Upon this vast earth you have given excellent cows, who continue to live under your care and protection. The innocent milch-kine, yielders of large quantities of milk return to their stalls at the day-end, and at the dawn, on the cloudy days, they anxiously cry for the sun, just as one cries, when sees thieves having entered in the house. 5

॥२१॥ आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः ।
अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥६॥
यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ।
उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू ॥७॥
युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयुक्तिषु ।
भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ॥८॥
रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनम् ।
न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम् ॥९॥

á vam ritáya keśínīr anūshata mítra yátra váruṇa gātúm árcathaḥ | áva tmánā srijátam pínvatam dhíyo yuvám víprasya mánmanām irajyathaḥ || 6 || yó vām yajñaíḥ śaśamānó ha dáśati kavír hótā yájati manmasádhanaḥ | úpāha tám gáchatho vīthó adhvarám áchā gíraḥ sumatím gantam asmayū́ || 7 || yuvám yajñaíḥ prathamá góbhir añjata ŕitāvanā mánaso ná práyuktishu | bháranti vām mánmanā saṃyátā gíró 'dripyatā mánasā revád āśāthe || 8 || revád váyo dadhāthe revád āśathe nárā māyábhir itáūti máhinam | ná vām dyávó 'habhir nótá síndhavo ná devatvám paṇáyo nánaśur maghám || 9 ||

(१५२) द्विपञ्चाशदुत्तरशततमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । मित्रावरुणौ देवते । त्रिष्टुप् छन्दः ॥

॥२२॥ युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥१॥

152.

Yuvám vástrāṇi pīvasá vasāthe yuvor áchidrā mántavo ha sárgāḥ | ávātiratam ánritāni víśva riténa mitrāvaruṇā sacethe || 1 ||

O cosmic light and cosmic waters, wherever people acknowledge your existence, the lofty flames of cosmic (as well as of ceremonial) fire greet you; may you both bless us of your own accord with a discriminating matured intellect, since both of you are inspirers of poetic thoughts of the seer. 6

May both of you go to him and love his noble performance, who endowed with intelligence invokes you with his prayers, praises you, and worships you. Come, therefore, lovingly to respond to our worship, and be favourably disposed towards us. 7

O both of you, abiding by the eternal laws, the devotees honour you first with selfless work, discriminative intellect and disciplined mind, and trained senses. They offer to you praises and you then generously bestow wealth and wisdom on them. 8

O leaders, you graciously give food along with wealth, to all of us with your wide and ample provisions. Neither the heaven, nor the firmament, neither days nor nights, nor the oceans and nor the greedy wickeds attain your divinity or your grandeur. 9

152

O cosmic light and cosmic plasma, you decorate yourself with uninterupted vestments (of radiance). Your plans and activities are free from faults. You conquer all falsehood and closely cleave unto the eternal law. 1

एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्रः कविशस्त ऋघावान् ।
त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥२॥
अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥३॥
प्रयन्तमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् ।
अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम ॥४॥

etác caná tvo ví ciketad eshām satyó mántraḥ kaviṣastá ṛíghāvān | trirásrim hanti cáturasrir ugró devanído há prathamá ajūryan || 2 || apád eti prathamá padvátīnām kás tád vām mitrāvaruṇá ciketa | gárbho bhārám bharaty á cid asya ṛitám píparty ánṛitam ní tārīt || 3 || prayántam ít pári jārám kanínām páṣyāmasi nópanipádyamānam | ánavapṛigṇā vítatā vásānam priyám mitrásya váruṇasya dhā́ma || 4 ||

अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः ।
अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणन्तः ॥५॥
आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्त्सस्मिन्नूधन् ।
पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥६॥
आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम् ।
अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥७॥

anaṣvó jātó anabhīṣúr árvā kánikradat patayad ūrdhvásānuḥ | acíttam bráhma jujushur yúvānaḥ prá mitré dhā́ma váruṇe gṛiṇántaḥ || 5 || á dhenávo māmateyám ávantīr brahmapríyam pīpayan sásminn ū́dhan | pitvó bhiksheta vayúnāni vidvā́n āsā́vívāsann áditim urushyet || 6 || á vām mitrāvaruṇā havyájushṭim námasā devāv ávasā vavṛityām | asmā́kam bráhma prítanāsu sahyā asmā́kam vṛishṭír divyá supārá || 7 ||

Each one of you (cosmic light and cosmic plasma) is competent to discern the truth, is wise, commended by the learned and intelligent. The sharp four-edged weapon defeats the three-edged one (the well-armed slays the less efficiently accoutred one). The antagonists of divine forces, assuredly, are bound to perish ultimately. 2

O cosmic light and cosmic plasma, who could have thought that, assisted by you, dawn, devoid of foot, would march ahead of creatures possessing feet; and that your infant (the sun) would sustain the burden of this world. He diffuses the light of truth and dispels the darkness of falsehood. 3

We only behold the sun, the lover of the maiden dawns, ever in movement, never stopping for an instant, clad in inseparable radiance, and spreading far and wide its glory in the beloved abode of cosmic light and cosmic plasma. 4

Though without a horse and without reins, he moves with swiftness and then with its roaring grandeur ascends to higher and higher summits. The ever-youthful sun passes through the realms of cosmic light and cosmic plasma. May we praise and glorify him with hymns of deep meaning. 5

May the cows serve the attached loving devotee with their well-filled udders. May the invoker, fully conversant with the details of worship, pray for nourishing food. May the dedicated devotee attain spotless fame. 6

O cosmic light and cosmic plasma, may I offer oblation to you with all due reverence. May our dedication and offerings lead us to victory in our struggles. May we have showers of rain from space to make us prosperous. 7

(१५३) त्रिपञ्चाशदुत्तरशततमं सूक्तम्

(१–४) चतुर्ऋचस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । मित्रावरुणौ देवते । त्रिष्टुप् छन्दः ॥

॥२३॥ यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ।
घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति ॥१॥
प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः ।
अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥२॥

153.

Yájāmahe vām maháḥ sajóshā havyébhir mitrāvaruṇā námobhiḥ | ghṛitaír ghṛitasnū ádha yád vām asmé adhvaryávo ná dhītíbhir bháranti || 1 || prástutir vāṃ dhā́ma ná práyuktir áyāmi mitrāvaruṇā suvṛiktíḥ | anákti yád vāṃ vidátheshu hótā sumnáṃ vāṃ sūrír vṛishaṇāv íyakshan || 2 ||

पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे ।
हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता ॥३॥
उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः ।
उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥४॥

pīpā́ya dhenúr áditir ṛitā́ya jánāya mitrāvaruṇā havirdé | hinóti yád vāṃ vidáthe saparyán sá rātáhavyo mánusho ná hótā || 3 || utá vāṃ vikshú mádyāsv ándho gā́va ā́paś ca pīpayanta devī́ḥ | utó no asyá pūrvyáḥ pátir dán vītám pātám páyasa usríyāyāḥ || 4 ||

153

O cosmic light and cosmic plasma, highly energetic and endowed with mutual affinities, our ministerial chiefs have been speaking of you both in the highest terms and therefore, all of us are also adoring you reverentially with our offerings. 1

O cosmic light and cosmic plasma, here is offered to you our devotional prayer. Here we think of you with affection as if belonging to one's own home. O mighty showerer of bliss, our learned invoker solicits happiness by performing fire-ceremony, offers his homage to both of you in these operations. 2

O cosmic light and cosmic plasma, may the productive milch-cow furnish abundant milk for the dedicated virtuous man, as when the ministrant priest glorifying you propitiates in the solemnity while performing the fire-ceremony. 3

May you both (cosmic light and cosmic plasma) make all deserving people prosperous with the supply of food, cows and water. And may the cosmic fire, the old patron, enrich us. May you both accept the sacrificial food and the milk of the milch-cow. 4

(१५४) चतुष्पञ्चाशदुत्तरशततमं सूक्तम्

(१-६) षड्टचस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । विष्णुर्देवता । त्रिष्टुप् छन्दः ॥

॥२४॥ विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥१॥
प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥२॥
प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥३॥

154.

Víshṇor nú kaṃ vīryā̀ṇi prá vocaṃ yáḥ pā́rthivāni vimamé rájāṅsi | yó áskabhayad úttaraṃ sadhásthaṃ vicakramāṇás tredhórugāyáḥ || 1 || prá tád víshṇu stavate vīryèṇa mṛigó ná bhīmáḥ kucaró girishṭhā́ḥ | yásyorúshu trishú vikrámaṇeshv adhikshiyánti bhúvanāni víśvā || 2 || prá víshṇave śūshám etu mánma girikshíta urugāyā́ya vṛíshṇe | yá idáṃ dīrghám práyataṃ sadhástham éko vimamé tribhír ít padébhiḥ || 3 ||

यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥४॥
तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥५॥

yásya trí pūrṇā́ mádhunā padā́ny ákshīyamāṇā svadháyā mádanti | yá u tridhā́tu pṛithivī́m utá dyā́m éko dādhā́ra bhúvanāni víśvā || 4 || tád asya priyám abhí pā́tho aśyāṃ náro yátra devayávo mádanti | urukramásya sá hí bándhur itthā́ víshṇoḥ padé paramé mádhva útsaḥ || 5 ||

154

Earnestly I glorify the mighty deeds of the all-pervading God, who has made the terrestrial bodies, who is highly glorified and who upholds the extensive cosmos, possessed of three types of motions of translation, of rotation and of vibration. 1

The all-pervading God has been dominating by His prowess like a sturdy wild mountain lion. Within His three-extended paces, He covers the entire creation. 2

To Him alone, who has created the entire extensive universe with three components (macro, micro, and ultra-micro), and who is the showerer of bliss, the upholder of clouds, and the one glorified by all, are dedicated our learning and endeavours; 3

and to the one in whose imperishable, delightful and self-ordained three regions lives and rejoices the world, and who, verily, alone upholds the terrestrial and celestial regions with the three-fold elements (tranquil, active and inert). 4

May I occupy that enviable position of His in which the godly virtuous people find delight. In the exalted station of this all-pervading God, there is a (perpetual) fountain of felicity and He is ever a friend of the earnestly active. 5

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ॥६॥

tá vám vástuny uṣmasi gámadhyai yátra gávo bhúrisriñgā ayásaḥ | átráha tád urugāyásya vríshṇaḥ paramám padám áva bhati bhúri || 6 ||

(१५५) पञ्चपञ्चाशदुत्तरशततमं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । (१-३) प्रथमतृचस्येन्द्राविष्णू,
(४-६) द्वितीयतृचस्य च विष्णुर्देवताः । जगती छन्दः ॥

॥२५॥ प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत ।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ॥१॥
त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति ।
या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥२॥
ता ईं वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे ।
दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ॥३॥

155.

Prá vaḥ pā́ntam ándhaso dhiyāyaté mahé ṣū́rāya víshṇave cārcata | yā́ sā́nuni párvatānām ádābhyā mahás tasthátur árvateva sādhúnā || 1 || tveshám itthá samáraṇaṃ ṣímīvator índrāvishṇū sutapā́ vām urushyati | yá mártyāya pratidhīyámānam ít kriṣánor ástur asanám urushyáthaḥ || 2 || tā́ īṃ vardhanti máhy asya paúṅsyaṃ ní mātárā nayati rétase bhujé | dádhāti putró 'varam páram pitúr nā́ma tritī́yam ádhi rocané diváḥ || 3 ||

We pray that both of you may go to those regions of enlightenment where the penetrating and wide-spreading rays get free admittance. Here exists the effulgent supreme abode of the highly-praised and all pervading God, the showerer of benefits. 6

155

May you respectfully offer wholesome drinks to both the invincible great sun and to the thunder-clouds who have ascended on the hill-tops with the speed of a fast moving horse. 1

O sun and thunder-clouds, the extensive and blinding effulgence of both of you has been very much augmented by the devotee by his exhilarating offerings. Both of you have given extensive support to the fire-projectile for the protection of men. 2

These offerings increase the virility of this sun, which He then establishes between the two mothers (earth and heaven) for generation and gratification. Just as the son has the inferior and superior, and a third (middle) appellations of the father, similarly the sun establishes its effulgence in the celestial space. 3

तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः ।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥४॥
द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति ।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ॥५॥
चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम् ॥६॥

tát-tad íd asya paúṅsyaṃ griṇīmasīnásya trātúr avṛikásya mīḷhúshaḥ | yáḥ pā́rthivāni tribhír íd vígāmabhir urú krámishṭorugāyā́ya jīváse || 4 || dvé íd asya krámaṇe svardṛ́ṣo 'bhikhyā́ya mártyo bhuraṇyati | tṛitī́yam asya nákir ā́ dadharshati váyaṣ caná patáyantaḥ patatríṇaḥ || 5 || catúrbhiḥ sākáṃ navatíṃ ca nā́mabhiṣ cakráṃ ná vṛittáṃ vyátīṅr avīvipat | bṛiháccharīro vimímāna ṛ́kvabhir yúvākumāraḥ práty ety āhavám || 6 ||

(१५६) षट्पञ्चाशदुत्तरशततमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । विष्णुर्देवता । जगती छन्दः ॥

॥२६॥
भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः ।
अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ॥१॥
यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।
यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥२॥

156.

Bhávā mitró ná ṣévyo ghṛitā́sutir víbhūtadyumna evayā́ u saprátthāḥ | ádhā te vishṇo vidúshā cid árdhya stómo yajñā́ṣ ca rā́dhyo havíshmatā || 1 || yáḥ pūrvyā́ya vedháse návīyase sumájjānaye víshṇave dádāṣati | yó jātám asya maható máhi brávat séd u ṣrávobhir yújyaṃ cid abhy ā̀sat || 2 ||

Therefore we celebrate the virility of this (sun) who is powerful and foe-less, and who is a gracious saviour and who traverses widely the interspace above the earth in three consecutive paces so that the world may live with its full existence. 4

The mortal man is able to track two steps of this effulgent sun, traversing in celestial space, but he comprehends not the third one; in fact, no bird soaring in the interspace can trace it. 5

He (the sun) by his gyrations, causes ninety into four (360) rotations (of the earth, 360 days in a year), like a circular wheel, moving on its axis,—the massive body of the sun again and again appears daily in many forms, ever-matured young, not immature, he comes as if to participate in our morning invocations. 6

156

O sun, producer of sap, resplendent, and accessible everywhere, may you be helpful like a friend to us. And, as, such, compliments are repeatedly paid to you by the wise and sacred fire-rituals solemnized by the offerer of oblations. 1

He who presents offerings to the Lord, the Self in the sun, the most ancient, yet also the recent, the self-born, and the one who describes the great birth of this mighty sun, that devotee alone verily attains prosperity and high status. 2

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।
आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ॥३॥
तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः ।
दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते ॥४॥
आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः ।
वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥५॥

tám u stotārah̩ pūrvyám̩ yáthā vidá ritásya gárbham̩ janúshā pipartana | ā́sya jānánto nā́ma cid vivaktana mahás te vishn̩o sumatím bhajāmahe || 3 || tám asya rā́jā vá-run̩aś tám aśvínā krátum̩ sacanta mā́rutasya vedhásah̩ dādhā́ra dáksham uttamám aharvídam̩ vrajám̩ ca víshn̩uh̩ sákhivāñ́ aporn̩uté || 4 || ā́ yó vivā́ya sacáthāya daívya índrāya víshn̩uh̩ sukríte sukríttarah̩ | vedhā́ ajinvat trishadha-sthá ā́ryam ritásya bhāgé yájamānam ā́bhajat || 5 ||

(१५७) सप्तपञ्चाशदुत्तरशततमं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अश्विनौ देवते । (१-४) प्रथमादिचतुर्ऋचां जगती, (५-६) पञ्चमीषष्ठयोश्च त्रिष्टुप् छन्दसी ॥

॥२७॥ अबोध्यग्निर्ज्म उदेति सूर्यो व्युषाश्चन्द्रा मह्यावो अर्चिषा ।
आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥१॥

157.

Ábodhy agnír jmá úd eti sū́ryo vy ùshā́ś candrā́ mahy ā̀vo arcíshā | ā́yukshātām aśvínā yā́tave rátham prā́sāvīd deváh̩ savitā́ jágat príthak || 1 ||

O singers, may you propitiate of your own accord that Self in the sun, who is existent from very old times and is the centre of all orderly creation. O sun, aware of your greatness, may we celebrate your name and enjoy your favour. 3

The royal sun works in perfect unison with space-winds, and Nature's forces and around him move the twins, the earth and the moon. The sun with his associates has the supreme control on the light that causes the day and he breaks open the cluster of clouds . 4

The celestial sun, the prime mover of cosmic activity, comes to assist the lower self (the soul), the accomplisher of noble deeds. He (the sun) being present in all the three regions, shows favour to the virtuous people and admits the performers of dedicated acts to their appropriate shares. 5

157

Fire is awakened on the earth ; the sun rises ; the refulgent dawn, exhilarating by her radiance, has adorned the horizon. The twins (the physicians and surgeons) have yoked their car and put it on road to help the sick and wounded. The divine sun has put the world on different routines. 1

यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।
अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥२॥
अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः ।
त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे ॥३॥
आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः कशया मिमिक्षतम् ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥४॥

yád yuñjáthe vríshaṇam aṣvinā rátham ghriténa no mádhunā kshatrám ukshatam asmákam bráhma prítanāsu jinvatam vayám dhánā ṣū́rasātā bhajemahi || 2 || arvā́ñ tricakró madhuváhano rátho jīrā́ṣvo aṣvínor yātu súshṭutaḥ | trivandhuró maghávā viṣvásaubhagaḥ ṣám na á vakshad dvipáde cátushpade || 3 || á na ū́rjam vahatam aṣvinā yuvám mádhumatyā naḥ káṣayā mimikshatam | práyus tā́rishṭam ní rápāṅsi mrikshatam sédhatam dvésho bhávatam sacābhúvā ||4||

युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः ।
युवमग्निं च वृषणावपश्च वनस्पतीँरश्विनावैरयेथाम् ॥५॥
युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या राथ्येभिः ।
अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश ॥६॥

yuvám ha gárbham jágatīshu dhattho yuvám víṣveshu bhúvaneshv antáḥ | yuvám agním ca vrishaṇāv apáṣ ca vánaspátīñr aṣvināv aírayethām || 5 || yuvám ha stho bhishájā bheshajébhir átho ha stho rathyā̀ ráthyebhiḥ | átho ha kshatrám ádhi dhattha ugrā yó vām havíshmān mánasā dadā́ṣa || 6 ||

O twins (physicians and surgeons), as you are harnessing your mighty bounteous chariot, we pray to you that with your car and treatment, may you refresh our brave soldiers engaged in war with honey and butter. May you also provide wisdom to our learned men in their endeavours. May our heroes obtain riches in their ventures. 2

May the three-wheeler chariot of the twins (physician and surgeon) drawn by swift horses (engines) laden with sweet nourishments, moving on three axles (to enable the chariot to move in three dimensions) all round well-set up bring prosperity to our men and cattle. 3

Bring us, O twins, vigour, animate us with your honeyed-sprays, prolong our lives, wipe away our pains, and ward off our enemies and be our associates. 4

Both of you, O twins, the showerer of benefits, are able to inseminate the germ of life in cows and other female cattle, within all living beings, and you supervise the supply of healthy fuel, water and plant materials (for our prosperity). 5

Both of you, physician and surgeon, are conversant with remedies, medicines and treatment. You ride in a quick vehicle drawn by well-trained steeds, and therefore, you, mighty divines, resolutely provide valour to the person, who with his intent devotion, offers his regards to you and seeks your help. 6.

(१५८) अष्टपञ्चाशदुत्तरशततमं सूक्तम्

(१–६) षडृचस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः। अश्विनौ देवते। (१–५) प्रथमादिपञ्चर्चां त्रिष्टुप्, (६) षष्ठ्याश्चानुष्टुप् छन्दसी ॥

॥१। वसू रुद्रा पुरुमन्तू वृधन्ता दशस्यतं नो वृषणावभिष्टौ ।
दस्रा ह यद्रेक्ण औचथ्यो वां प्र यत्सस्राथे अकवाभिरूती ॥१॥
को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा पदे गोः ।
जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरन्ता ॥२॥
युक्तो ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि पज्रः ।
उप वामवः शरणं गमेयं शूरो नाज्म पतयद्भिरेवैः ॥३॥

158.

Vásū rudrá purumántū vridhántā daṣasyátaṃ no vrishaṇāv abhíshṭau | dásrā ha yád rékṇa aucathyó vām prá yát sasráthe ákavābhir ūtí || 1 || kó vāṃ dāṣat sumatáye cid asyaí vásū yád dhéthe námasā padé góḥ | jigṛitám asmé revátīḥ púraṃdhīḥ kāmapréṇeva mánasā cárantā || 2 || yuktó ha yád vāṃ taugryā́ya perúr ví mádhye árṇaso dhā́yi pajráḥ | úpa vām ávaḥ ṣaraṇáṃ gameyaṃ ṣū́ro nā́jma patáyadbhir évaiḥ || 3 ||

उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धाम् ।
मा मामेधो दशतयश्चितो धाक् प्र यद्वां बद्धस्त्मनि खादति क्षाम् ॥४॥
न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः ।
शिरो यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसावपि ग्ध ॥५॥

úpastutir aucathyám urushyen mā́ mā́m imé patatríṇī ví dugdhām | mā́ mā́m édho dáṣatayaṣ citó dhāk prá yád vām baddhás tmáni khā́dati kshā́m || 4 || ná mā garan nadyò mātṛítamā dāsā́ yád īṃ súsamubdham avā́dhuḥ | ṣíro yád asya traitanó vitákshat svayáṃ dāsá úro áṅsāv ápi gdha || 5 ||

158

O (twins) the possessors of wealth and defenders, both of you are exceedingly wise, great, full of virility, fulfillers of desires, and destroyers of adversaries, when the deserving devotee approaches you for assistance. May you come quickly forward with liberal help. 1

O twins, the possessors of wealth, who could have given us so liberally, as you have on our mere obeisance at the altar. May you grant us cows, rich in milk, since you have always the intention of granting the requests of others. 2

O twin divines, as your swift and mighty chariot, able to cross the sea, was harnessed and placed in the middle of the surging ocean for the rescue of the benevolent saviour, so may I swiftly reach your preserving protection as a victorious hero who returns home quickly as if by riding flying horses. 3

May the praise addressed to you, O twin divines, preserve the son of the righteous man. Let not these fast revolving days and nights exhaust me ; let not the tenfold pile of wood burn me : let it not be that the devotee of yours, now bound as slave himself, bite the earth. 4

The infidel adversaries (in wars and battles) so often hurl me down, even the old and decrepit, and yet the rivers, becoming kind to me as mothers, do not swallow me. Another heathen with tridentate spears inflicts injuries on my head, breast and shoulders. [Yet you could save me.] 5

दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे ।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥६॥

dīrghátamā māmateyó jujurván daṣamé yugé | apám ártham yatínām brahmá bhavati sárathiḥ || 6 ||

(१५९) एकोनषष्ट्युत्तरशततमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । द्यावापृथिव्यौ देवते । जगती छन्दः ॥

॥२॥ प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ।
देवेभिर्ये देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ॥१॥
उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्धवीमभिः ।
सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः ॥२॥
ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये ।
स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥३॥

159.

Prá dyávā yajñaíḥ pṛithiví ṛitāvṛídhā mahí stushe vidátheshu prácetasā | devébhir yé devápntre sudáṅsasetthá dhiyá váryāṇi prabhúshataḥ || 1 || utá manye pitúr adrúho máno mātúr máhi svátavas tád dhávīmabhiḥ | surétasā pitárā bhúma cakratur urú prajáyā amṛítam várīmabhiḥ || 2 || té sūnávaḥ svápasaḥ sudáṅsaso mahí jajñur mātárā pūrvácittaye | sthātúṣ ca satyám jágataṣ ca dhármaṇi putrásya pāthaḥ padám ádvayāvinaḥ || 3 ||

This long-tortured son of an affectionate mother thus might remain for ten long years in terrible state, and become decrepit. He, however, under the protection and care (of the physicians and surgeons) could live a long and dedicated life, and become a leader amongst learneds. 6

159

I glorify with sacred ceremonies the vast heaven and earth of divine origin, augmenters of worship, and intelligent in regard to operations of public use and who bring forth the choicest blessings through wonder-working wisdom. 1

And by invocations I propitiate the benevolent attitude of my affectionate father (heaven) and mother (earth) who with their virility and protective measures made this far-flung world immortal for their children. 2

These charming children of yours, the performer of deeds, recognize you as their great parent for having received from you the first instructions. For the welfare of inanimate and animate creation, they preserve the status of their guileless son (the fire). 3

ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ।
नव्यंनव्यं तन्तुमा तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः ॥४॥
तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम् ॥५॥

té māyíno mamire suprácetaso jāmí sáyonī mithuná sámokasā | návyam-navyam tántum á tanvate diví samudré antáh kaváyah sudītáyah ||4|| tád rádho adyá savitúr várenyam vayám devásya prasavé manāmahe | asmábhyam dyāvāprithivī sucetúnā rayím dhattam vásumantam satagvínam ||5||

(१६०) षष्ट्युत्तरशततमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । द्यावापृथिव्यौ देवते । जगती छन्दः ॥

ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी ।
सुजन्मनी धिषणे अन्तरीयते देवो देवी धर्मणा सूर्यः शुचिः ॥१॥
उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः ।
सुधृष्टमे वपुष्ये न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥२॥
स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया ।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ॥३॥

160.

Té hí dyávāprithiví visvásambhuva ritávarī rájaso dhārayátkavī | sujánmanī dhisháne antár īyate devó deví dhármanā sū́ryah súcih || 1 || uruvyácasā mahínī asascátā pitá mātá ca bhúvanāni rakshatah | sudhríshtame vapushyè ná ródasī pitá yát sīm abhí rūpaír ávāsayat ||2|| sá váhnih putráh pitróh pavítravān punáti dhíro bhúvanāni māyáyā | dhenúm ca prísnim vrishabhám surétasam visváhā sukrám páyo asya dukshata || 3 ||

Those provident and wise divines, all of the same source, coupled to each other, living in the same place, knowing (their functions) and bright shining, they spread new, and ever-new warp and woof throughout the radiant cosmos. 4

So may we beg today for our growth the choicest wealth of the resplendent creator, our Lord, and through Him, may this benign heaven and earth bestow upon us riches of habitation and hundreds of things of value. 5

160

These two divines, heaven and earth, bestow happiness on all. They are bound by the universal law and sustain water (of rains in space) and are full of splendour. The resplendent sun proceeds in the inter-space for the discharge of his assigned duty. 1

Widely expanded, vast, not joined to each other, the celestial father and the terrestrial mother of all beings preserve the world. They are resolute on their paths and work for the good of all creatures. The father clothes everything with colourfully attractive forms. 2

Fire, the pure and the resolute son of these parents, sanctifies the worlds by his intelligence, and also sanctifies the milch-cow (the earth) and the vigorous bull (the heaven). He further daily milks the pellucid milk (of the heaven). 3

अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशंभुवा ।
वि यो ममे रजसी सुक्रतूययाजरेभिः स्कम्भनेभिः समानृचे ॥४॥
ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ।
येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम् ॥५॥

ayáṃ devā́nām apásām apástamo yó jajā́na ródasī viṣvā́ṣambhuvā | ví yó mamé rájasī sukratūyáyājárebhi skámbhanebhiḥ sám ānṛice ||4|| té no gṛiṇāné mahinī máhi ṣrávaḥ kshatrā́ṃ dyāvāpṛithivī dhāsatho bṛihát | yénābhí kṛíshṭíṣ tatánāma viṣváhā panā́yyam ójo asmé sám invatam || 5 ||

(१६१) एकपष्ट्युत्तरशततमं सूक्तम्

(१-१४) चतुर्दशर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । ऋभवो देवताः । (१-१३) प्रथमादित्रयोदशर्चां जगती, (१४) चतुर्दश्याश्च त्रिष्टुप् छन्दसी ॥

किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं१ कद्यदूचिम ।
न निन्दिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम ॥१॥
एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवन्तद्व आगमम् ।
सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ॥२॥
अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ।
धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि ॥३॥

161.

Kím u ṣréshṭhaḥ kíṃ yávishṭho na ā́jagan kím īyaté dūtyàṃ kád yád ūcimá | ná nindima camasáṃ yó mahākuló 'gne bhrātar drúṇa íd bhūtím ūdima || 1 || ékaṃ camasáṃ catúraḥ kṛiṇotana tád vo devā́ abruvan tád va ā́gamam | saúdhanvanā yády evā́ karishyátha sākáṃ devaír yajñíyāso bhavishyatha || 2 || agníṃ dūtáṃ práti yád ábravītanā́ṣvaḥ kártvo rátha utéhá kártvaḥ | dhenúḥ kártvā yuvaṣā́ kártvā dvā́ tā́ni bhrātar ánu vaḥ kṛitvy émasi || 3 ||

Uppermost are the actions of this (supreme Lord) amongst the actions of other divinities (natural forces); He has given birth to the all-delighting heaven and earth, and has measured them both, and for the sake of holy rites He has propped them up with pillars which shall never decay. 4

May the Lord of these far-flung heaven and earth, glorified by us, grant us abundant food and praiseworthy strength; whereby we may ever perpetuate our race everywhere. And may He bestow upon us commendable vigour. 5

161

Is this one who has come to us the most honoured, or just an ordinary ? Whose messenger is he ? What is it we should say ? O brother, the divine fire, we do not revile the one bowl of noble family. We describe only the attainments of the destroyer of adversaries. [The bowl is the unmanifested primordial *matter*]. 1

Divide the one lot into four. That has been told by the enlightened ones. That I have come to tell you. If you accomplish this, you will be entitled to perform sacred worship along with the enlightened ones. [The four transformations of the primordial matter are : air, fire, water and earth]. 2

Then they say to the fire, the messenger of divines : "The horse (physical force) is to be kept ready ; a chariot (mechanical force) is to be on road ; the cow (the intellectual force) is to be taken care of ; the two olds (traditions and rituals) have to be rejuvenated. Having accomplished these things first, brother divine fire, we are prepared to follow you." 3

चकृवांसं ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन् ।
यदावाख्यच्चमसाञ्चतुरः कृतानादित्त्वष्टा ग्नास्वन्तर्न्यानजे ॥४॥
हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिन्दिषुः ।
अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३ नामभिः स्परत् ॥५॥

cakriváṅsa ṛibhavas tád apṛichata kvéd abhūd yáḥ syá dūtó na ájagan | yadávákhyac camasáñ catúraḥ kṛitán ád ít tváshṭā gnásv antár ny ànaje || 4 || hánāmainān̐ íti tváshṭā yád ábravīc camasám yé devapánam ánindishuḥ | anyá námāni kṛiṇvate suté sácān̐ anyaír enān kanyà námabhi sparat || 5 ||

॥५॥ इन्द्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत ।
ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥६॥
निश्चर्मणो गामरिणीत धीतिभिर्या जरन्ता युवशा ताकृणोतन ।
सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥७॥
इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुञ्जनेजनम् ।
सौधन्वना यदि तन्नेव हर्यथ तृतीये घा सवने मादयाध्वै ॥८॥

índro hárī yuyujé aṣvínā rátham bṛíhaspátir viṣvárūpām úpājata | ṛibhúr víbhvā vájo deváñ agachata svápaso yajñíyam bhāgám aitana || 6 || níṣ cármaṇo gám ariṇīta dhītíbhir yá járantā yuvaṣá tákṛiṇotana | saúdhanvanā áṣvād áṣvam atakshata yuktvá rátham úpa deváñ ayātana || 7 || idám udakám pibatéty abravītanedám vā ghā pibatā muñjanéjanam | saúdhanvanā yádi tán néva háryatha tṛitíye ghā sávane mādayādhvai || 8 ||

Having heard all this, the wise men, the men of actions, may so inquire, "Where was the messenger born, the one who has come to us?" and the reply would be, "When the great architect had divided the entire bowl (the matter) into four transformations, this messenger (fire) was found moving amongst the cosmic regions." 4

The great architect may further instruct us, "They are worthy of being destroyed who despise the contents of the divine bowl, worthy of enjoyment by enlightened ones, when the divine exhilarating nectar is pressed out ; this is also known by other names ; the young maidens give it several other names." 5

The resplendent sun has yoked the rays as if on a pair of horses ; the twin-divines have harnessed their chariot ; the great preceptor has started using speech of multiforms ; therefore, O wise vigorous and strong men, go to the enlightened men, accomplishers of good deeds, and enjoy your sacrificial offerings. 6

O brave sons, by your efforts, you have nourished the cow who had been without skin (i.e. to the immature persons, you have given intellect) ; by your marvellous acts you have made your aged parents young ; from one energy (horse) you have harnessed energy in other forms, and used it in your chariot, and thus equipped you have gone to the enlightened men. 7

O sons of the wise men, the enlightened men have said, "Drink of this water of divine origin (morning sacrificial drink) or enjoy that herbal drink which has been filtered out through the acts of austerity (the midday-sacrificial drink) ; or if you are not pleased with either of these, be inspired by that exhilarating elixir which is taken at the third sacrificial acts of the evenings." 8

आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ।
वधर्यन्तीं बहुभ्यः प्रैको अब्रवीदृता वदन्तश्चमसाँ अपिंशत ॥९॥
श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम् ।
आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥१०॥

ápo bhúyishṭha íty éko abravīd agnír bhúyishṭha íty anyó abravīt | vadharyántīm bahúbhyaḥ praíko abravīd ritá vadantaṣ camasáñ apiñṣata || 9 || ṣroṇám éka udakáṃ gám ávajati māñsám ékaḥ piñṣati sūnáyábhritam | á nimrúcaḥ ṣákrid éko ápabharat kíṃ svit putrébhyaḥ pitárā úpāvatuḥ || 10 ||

॥६॥ उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः ।
अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ ॥११॥
संमील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः ।
अशपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ॥१२॥
सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत् ।
श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥१३॥

udvátsv asmā akriṇotanā tríṇaṃ nivátsv apáḥ svapasyáyā naraḥ | ágohyasya yád ásastanā grihé tád adyédám ribhavo nánu gachatha || 11 || sammílya yád bhúvanā paryásarpata kvà svit tātyá pitára va āsatuḥ | áṣapata yáḥ karásnaṃ va ādadé yáḥ prábravīt pró tásmā abravītana || 12 || sushupváñsa ribhavas tád aprichatágohya ká idáṃ no abūbudhat | ṣvánam bastó bodhayitáram abravīt saṃvatsará idám adyá vy ákhyata || 13 ||

The divine waters are the most excellent, so says one ; the divine fire is the most excellent, says the other ; the third declares the divine earth to be the most excellent and thus speaking, each of the wise men speaks the truth ; they refer to the *bowl* in different ways. 9

The one takes the healthy cow (of knowledge) to a water reservior ; the second one takes the cow to nourishing fodder for the growth of flesh ; and the third at the sunset cleans the cowdung. The three sons thus by their service please their parents. (For the attainment of knowledge, one needs observation, thinking, and discrimination). 10

O realized wise ones, may you through your sincere efforts establish grass farms on high lands for your cattle and arrange for drinking water at the low lands. So long as you stay in houses, where you cannot keep comfortably your cows, you cannot prosper. [One should create healthy environments for acquiring knowledge]. 11

O wise divine radiations, as you glide along enveloping the regions in clouds, where do your parents live ? May you curse him who holds your hands ; may you bless him who favours you. 12

O divine radiations, reposing during the rainy season in the solar orb, have you ever inquired from the never-setting sun, as to who awakens us. The sun, the sustainer of all the world, on this replies that the awakener has been the wind divine. After a very long time in the year, there is again a sunshine. (The wind drives away the clouds). 13

दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति ।
अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः ॥१४॥

diváyānti marúto bhúmyāgnír ayám váto antárikshena yati | adbhír yāti váruṇaḥ samudraír yushmā́ñ ichántaḥ savaso napātaḥ || 14 ||

(१६२) द्विषष्ट्युत्तरशततमं सूक्तम्

(१–२२) द्वाविंशत्यृचस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अश्वो देवता । (१–२,४–५,७–२२) प्रथमाद्वितीययोश्चतुर्थीपञ्चम्योस्सप्तम्यादिषोडशर्चाञ्च त्रिष्टुप्, (३, ६) तृतीयाषष्ठयोश्च जगती छन्दसी ॥

।।७।। मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥१॥
यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥२॥
एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ॥३॥

162.

Má no mitró váruṇo aryamáyúr índra ṛibhukshá marútaḥ pári khyan | yád vajíno devájātasya sáptek pravakshyámo vidáthe vīryàṇi || 1 || yán nirṇíjā rékṇasā právṛitasya rātím gṛibhītám mukható náyanti | súprañ ajó mémyad viṣvárūpa indrāpūshṇóḥ priyám ápy eti páthaḥ || 2 || eshá chágaḥ puró áṣvena vājínā pūshṇó bhāgó nīyate viṣvádevyaḥ | abhipríyam yát puroḷáṣam árvatā tváshṭéd enam sausravasáya jinvati || 3 ||

O radiations of infallible strength, the rain-bearing thunder clouds wishing to meet you, advance from the heaven; the divine fire rises to meet you from the earth; the wind divine traverses the firmament for the same purpose ; and the divine ocean with singing waves approaches you. 14

162

Here we shall be narrating the attainments of a swift horse possessing exceptionally supreme qualities exhibited during battles. These attributes are to be appreciated by all classes of people—friends, learneds, men of judiciary, the wise, the illustrious and the intellectuals and by the people serving in defence departments. 1

Due care is taken of this royal horse, who should be cleaned and decorated with rich trappings, and whilst it fights bravely against the enemies, it gets laudations and favours from the king and commanders. 2

A charming novice horse, representing the commander, moves in the frontline, and it is followed by the royal horse. The novice horse is put under the care of a skilled trainer, and provided with all facilities for receiving honours and glory in future. 3

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥४॥
होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥५॥

yád dhavishyàm ṛitusó devayā́nam trír mā́nushāḥ páry áṣvam náyanti | átrā pūshṇáḥ prathamó bhāgá eti yajñám devébhyaḥ prativedáyann ajáḥ || 4 || hótādhvaryúr ā́vayā agnimindhó grāvagrābhá utá ṣáṅstā súvipraḥ | téna yajñéna svàraṃkṛitena svìshṭena vakshánā ā́ pṛiṇadhvam || 5 ||

॥८॥ यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥६॥
उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥७॥
यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये३ तृणं सर्वा ता ते अपि देवेष्वस्तु ॥८॥

yūpavraskā́ utá yé yūpavāhā́ṣ cashā́laṃ yé aṣvayūpā́ya tákshati | yé cā́rvate pácanaṃ sambháranty utó téshām abhígūrtir na invatu || 6 || úpa prā́gāt sumán me 'dhāyi mánma devā́nām ā́ṣā úpa vītápṛishṭhaḥ | ánv enaṃ víprā ṛíshayo madanti devā́nām pushṭé cakṛimā subándhum || 7 || yád vājíno dā́ma saṃdā́nam árvato yā́ ṣīrshaṇyā̀ raṣanā́ rájjur asya | yád vā ghāsya prábhṛitam āsyè tṛ́iṇaṃ sárvā tá te ápi devéshv astu || 8 ||

The persons, in-charge of the honour-awarding ceremony, conducted at the proper season, send forth the royal horse, who is taken thrice round the arena and whilst the royal horse moves, the novice horse representing the commander, marches on in the front, as if he is being trained for leadership. He moves in the first line, and as he moves, he as if goes on announcing to the learned audience the commencement of the royal sacrifice.4

At the ceremony are also present the priest, the minister of rites, the offerer of oblation, the kindler of fires, caretaker of medicinal plants, the directors of ceremonies, and the stage supervisors under their direction. The impressive ceremony continues in an orderly manner. Proper arrangements of water channels are also made. 5

Attention is paid even to all minor details in the arena. Care is taken of the post to which the horse is roped and special attendants are keen to take care of the horse. Rings are fastened on the top of the posts and in close vicinity are vessels in which the food and fodder of the horse are dressed. 6

Whilst the horse arrives at the place of honour, the chanting of the Vedic hymns begins. And there is rejoicing by singers and sages alike. The horse roped to the post is admired by the distinguished elites. 7

The distinguished visitors are delighted to see the halter and the heel-ropes of the fleet-courser and the head-ropes, the girths, and other parts of the harness. The horse looks noble as he shoves the grass into his mouth. 8

यदश्व॑स्य क्र॒विषो॒ मक्षि॒काश॒ यद्वा॒ स्वरौ॒ स्वधि॑तौ रि॒प्तमस्ति॑ ।
यद्धस्त॑योः शमि॒तुर्यन्न॒खेषु॒ सर्वा॒ ता ते॒ अपि॑ दे॒वेष्व॑स्तु ॥९॥
यदूव॑ध्यमु॒दर॑स्याप॒वाति॒ य आ॒मस्य॑ क्र॒विषो॑ ग॒न्धो अस्ति॑ ।
सु॒कृ॒ता तच्छ॑मि॒तारः॑ कृण्वन्तू॒त मेधं॑ शृत॒पाकं॑ पचन्तु ॥१०॥

yád ásvasya kravísho mákshikása yád vā svárau svádhitau riptám ásti | yád dhástayoḥ samitúr yán nakhéshu sárvā tá te ápi devéshv astu || 9 || yád ū́vadhyam udárasyāpavā́ti yá āmásya kravísho gandhó ásti | sukr̥tá tác chamitáraḥ kriṇvantūtá médham sritapákam pacantu || 10 ||

यत्ते॒ गात्रा॑द॒ग्निना॑ प॒च्यमा॑नाद॒भि शूलं॒ निह॑तस्याव॒धाव॑ति ।
मा तद्भूम्या॒मा श्रि॑ष॒न्मा तृणे॑षु दे॒वेभ्य॒स्तदु॒शद्भ्यो॑ रा॒तम॑स्तु ॥११॥
ये वा॒जिनं॑ परि॒पश्य॑न्ति प॒क्वं य ई॑मा॒हुः सु॑र॒भिर्निर्ह॒रेति॑ ।
ये चार्व॑तो मां॒सभि॒क्षामु॒पास॑त उ॒तो तेषा॑म॒भिगू॑र्तिर्न इन्वतु ॥१२॥
यन्नीक्ष॑णं माँ॒स्पच॑न्या उ॒खाया॒ या पात्रा॑णि यू॒ष्ण आ॒सेच॑नानि ।
ऊ॒ष्म॒ण्या॑पि॒धाना॑ चरू॒णाम॒ङ्काः सू॒नाः परि॑ भूष॒न्त्यश्व॑म् ॥१३॥

yát te gā́trād agnínā pacyámānād abhí sūlam níhatasyāvadhávati | má tád bhū́myām ā́ srishan má tríṇeshu devébhyas tád usádbhyo rātám astu || 11 || yé vājínam paripásyanti pakvám yá īm āhúḥ surabhír nír haréti | yé cárvato māṅsabhikshā́m upā́sata utó téshām abhígūrtir na invatu || 12 || yán níkshaṇam māṅspácanyā ukháyā yá pā́trāṇi yūshṇá āsécanāni | ūshmaṇyā̀pidhā́nā carūṇā́m aṅkā́ḥ sūnā́ḥ pári bhūshanty ásvam || 13 ||

The horse is bathed clean so that the flies do not sit on the wounds. The filth from the horse is removed. Hands and finger nails of the attending physicans are cleaned. And thus all care is taken of the royal ceremony. 9

It is the duty of the caretakers of surgical operations to ensure that whatever undigested grass falls from his belly or whatever particles of raw flesh might have remained, everything is made perfectly clean and free from defect and the wounds are perfectly dressed with the help of hot and boiled lotions. 10

Any portions of the operated body which drops to the ground during the surgical operation are carefully picked up and consigned to fire and dispersed in atmosphere. 11

The horse is fed with a well-cooked meal of cereals of several kinds giving out such odours, so fragrant, that even the passers-by are tempted to say, "It is fragant, therefore give us some". 12

The stick that is dipped into the cauldron in which the meal is boiled, the vessels that distribute the broth, the covers of the dishes, the skewers, the knives, all do honour (to the horse). 13

निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥१४॥
मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥१५॥

nikrámaṇam nishádanam vivártanam yác ča pádbīṣam árvataḥ | yác ca papaú yác ca ghāsím jaghása sárvā tá te ápi devéshv astu || 14 || má tvāgnír dhvanayīd dhūmágandhir mókhá bhrájanty abhí vikta jághriḥ | ishṭám vītám abhígūrtam váshaṭkṛitam tám devásaḥ práti gṛibhṇanty áṣvam || 15

॥१०॥ यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥१६॥
यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥१७॥
चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥१८॥

yád áṣvāya vása upastṛiṇánty adhīvāsám yá híraṇyāny asmai | saṃdánam árvantam pádbīṣam priyá devéshv á yāmayanti || 16 || yát te sādé máhasā ṣúkṛitasya párshṇyā vā káṣayā vā tutóda | srucéva tá havísho adhvaréshu sárvā tá te bráhmaṇā sūdayāmi || 17 || cátustriṅṣad vājíno devábandhor váṅkrīr áṣvasya svádhitiḥ sám eti | áchidrā gátrā vayúnā kṛiṇota párush-parur anughúshya ví ṣasta || 18 ||

O victory horse, the way you trot, the way you sit, you roll on the ground, the actions of your nimble foot, and also all that you drink and the grass that you eat—all these sights are enchanting to the distinguished visitors. 14

O victory horse, the smoke coming out of the kitchen may not cause irritation to you. The heat of the glowing cauldron with its fragrant contents may not terrify you. O horse, you have been declared victorious and the ceremony is in your honour and every one present in the distinguished gallery is honouring you with slogans of loud praise. 15

The victory horse is covered with highly attractive cloth, worthy of appreciation; with golden trappings and decorations. And the horse is provided with special head-robes and foot-robes. No wonder the distinguished visitors are impressed. 16

O victory horse, whilst on the battlefield you have been goaded forward, either with heels or with whips, and you have borne a good deal of hardship all through. Now you will enjoy rest and relax at this ceremony of welcome. For bringing you relief, the priests are offering oblation to the fire with prayers to the divine. 17

The victory horse has thirty-four ribs on both the sides which are exposed to attack during battle. O surgeons, dress up all these wounds with skill, so that the limbs may regain their vigour and dress up every joint, one by one, with care. 18

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः ।
या ते गात्राणामृतुथा कृणोमि ताताा पिण्डानां प्र जुहोम्यग्नौ ॥१९॥
मा त्वा तपत्प्रिय आत्मापियन्तं मा स्वधितिस्तन्व१ आ तिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥२०॥
न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥२१॥
सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिम् ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान् ॥२२॥

ékas tváshṭur áṣvasyā viṣastā́ dvā́ yantā́rā bhavatas tátha ritúḥ | yā́ te gā́trāṇām rituthā́ kriṇómi tā́-tā píṇḍanām prá juhomy agnaú || 19 || mā́ tvā tapat priyá ātmā́piyántam mā́ svádhitis tanvà ā́ tishṭhipat te | mā́ te gridhnúr aviṣastā́tihā́ya chidrā́ gā́trany asínā míthū kaḥ || 20 || ná vā́ u etán mri-yase ná rishyasi devā́ñ íd eshi pathíbhiḥ sugébhiḥ | hárī te yúñjā príshatī abhūtām úpāsthād vājī́ dhurí rā́sabhasya || 21 || sugávyam no vājī́ sváṣvyam puṅsáḥ putrā́ñ utá vi-ṣvāpúsham rayím | anāgāstvám no ā́ditiḥ kriṇotu kshatrám no áṣvo vanatām havíshman || 22 ||

(१६३) त्रिषष्ट्युत्तरशततमं सूक्तम

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः । अश्वो देवता । त्रिष्टुप छन्दः ॥

॥११॥ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥१॥

163.

Yád ákrandaḥ prathamám jā́yamāna udyán samudrā́d utá vā púrīshāt | ṣyenásya pakshā́ hariṇásya bāhū́ upastú-tyam máhi jātám te arvan || 1 ||

There is only one immolator which can kill the radiant horse, that is the time—killer of all. Whilst there are two to take care of him (the horse himself and his master rider), such of the limbs of the horse I take care of according to the seasons, (to give protection from heat and cold) and to heal up its wounds, hot fomentations are given to the swollen tumours. 19

Let not your precious body grieve you, O victory horse, for you will be healthy very soon. Let not the fear of surgical knives linger in your body. May you not be treated by greedy and unskilful surgeons giving undue pain to your limbs with their knives. 20

O horse, injured may you be, but we will not allow you to die. No more tortures for you, for you have served us nobly in an auspicious cause. You will be fit again to join the battles with redoubled valour, speed of the deer and the roar of the horse-chariot wheels. 21

May this victory horse bring to us all-sustaining wealth, cows, excellent horses of male offspring. May the spirited steed cure us of wickedness. May this horse, honoured in ceremony, procure for us bodily vigour. 22

163

O sun, we glorify your rising. At times you appear to be springing from the firmament or from the ocean with the roar of sea-waves. You rise higher and higher as if possessed with the wings of a falcon and the limbs of a deer. 1

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥२॥
असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥३॥
त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥४॥

yaména dattám tritá enam āyunag índra eṇam prathamó ádhy atishṭhat | gandharvó asya raṣanám agṛibhṇāt sū́rād áṣvam vasavo nír atashṭa || 2 || ási yamó ásy ādityó arvann ási tritó gúhyena vraténa | ási sómena samáyā víprikta āhús te trī́ṇi diví bándhanāni || 3 || trī́ṇi ta āhur diví bándhanāni trī́ṇy apsú trī́ṇy antáḥ samudré | utéva me váruṇaṣ chantsy arvan yátrā ta āhúḥ paramáṃ janítram || 4 ||

इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥५॥

॥१२॥ आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥६॥
अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः ॥७॥

imā́ te vājinn avamā́rjanānīmā́ ṣaphā́nām sanitúr nidhā́nā | átrā te bhadrā́ raṣanā́ apaṣyam ṛitásya yā́ abhirákshanti gopā́ḥ || 5 ||

ātmā́nam te mánasārā́d ajānām avó divā́ patáyantam patamgám | ṣíro apaṣyam pathíbhiḥ sugébhir areṇúbhir jéhamānam patatrí || 6 || átrā te rūpám uttamám apaṣyam jígīshamāṇam ishá ā́ padé góḥ | yadā́ te márto ánu bhógam ā́naḷ ā́d íd grásishṭha óshadhīr ajīgaḥ || 7 ||

The rising sun resembles a horse with a rider on. It looks like a gift from the supreme law-giver and harnessed by the divine floater. The resplendent Lord appears to be riding on him and the cosmic wind holds its reins. O cosmic architect, you have fabricated this horse from that luminous giant body. 2

O sun, you are the law-giver; you are the luminous giant and you float as if by a mysterious act. You are associated with the moon also. The sages say that you have three stations in the luminous space. 3

They also say that you have three stations in heaven and three on the earth and three in the interspace. You also seem to be one with the ocean and your form is most charming while arising out of waters. 4

O sun, you are the victory horse of the cosmic ceremonial. I have beheld your purifying regions, these impressions of your hoofs, participating in the ceremony. Here are your auspicious reins, which are the protectors of the rites that preserve it. 5

I recognize in my mind your form afar off, going from the earth below, by way of heaven to the midday sun. I behold your head soaring aloft and mounting quickly by unobstructed paths, unsullied by dust. 6

I behold most your excellent form as if anxiously looking round for food on this earth, whilst you come up. It appears as if your attendant brings you near your provender, which you start consuming with immense pleasure. 7

अनु॑ त्वा॒ रथो॒ अनु॒ मर्यो॑ अर्व॒न्ननु॒ गावोऽनु॒ भगः॑ क॒नीना॑म् ।
अनु॒ व्राता॑स॒स्तव॑ स॒ख्यमी॑यु॒रनु॑ दे॒वा म॑मिरे वी॒र्यं॑ ते ॥८॥
हिर॑ण्यशृ॒ङ्गोऽयो॑ अस्य॒ पादा॒ मनो॑जवा॒ अव॑र॒ इन्द्र॑ आसीत् ।
दे॒वा इद॑स्य हवि॒रद्य॑मायन्यो अर्व॑न्तं प्रथ॒मो अ॒ध्यति॑ष्ठत् ॥९॥
ई॒र्मान्ता॑सः॒ सिलि॑कमध्यमासः॒ सं शूर॑णासो दि॒व्यासो॒ अत्याः॑ ।
हं॒सा इ॑व श्रेणि॒शो य॑तन्ते॒ यदाक्षि॑षुर्दि॒व्यमज्म॒मश्वाः॑ ॥१०॥

ánu tvā
rátho ánu máryo arvann ánu gā́vó 'nu bhágaḥ kanī́nām |
ánu vrā́tāsas táva sakhyám īyur ánu devā́ mamire vīryàṃ
te || 8 || híraṇyaṣriṅgó 'yo asya pā́dā mánojavā ávara índra āsīt | devā́ íd asya havirádyam āyan yó árvantam prathamó adhyátishṭhat || 9 || īrmā́ntāsaḥ sílikamadhyamāsaḥ sáṃ ṣū́raṇāso divyā́so átyāḥ | haṅsā́ iva ṣreṇiṣó yatante yád ákshishur divyám ájmam áṣvāḥ || 10 ||

तव॒ शरी॑रं पतयि॒ष्ण्व॑र्व॒न्तव॑ चि॒त्तं वात॑ इव॒ ध्रजी॑मान् ।
तव॒ शृङ्गा॑णि॒ विष्ठि॑ता पुरु॒त्रार॑ण्येषु॒ जर्भु॑राणा चरन्ति ॥११॥
उप॒ प्रागा॒च्छस॑नं वा॒ज्यर्वा॑ देव॒द्रीचा॒ मन॑सा॒ दीध्या॑नः ।
अ॒जः पु॒रो नी॑यते॒ नाभि॑र॒स्यानु॑ प॒श्चात्क॒वयो॑ यन्ति रे॒भाः ॥१२॥
उप॒ प्रागा॑त्पर॒मं यत्स॒धस्थ॒मर्वाँ॒ अच्छा॑ पि॒तरं॑ मा॒तरं॑ च ।
अ॒द्या दे॒वाञ्जुष्ट॑तमो॒ हि ग॒म्या अथा शा॑स्ते दा॒शुषे॒ वार्या॑णि ॥१३॥

táva ṣárīram patayishṇv àrvan táva cittáṃ vā́ta iva dhrájīmān | táva ṣṛíṅgāṇi víshṭhitā purutrā́raṇyeshu járbhurāṇā caranti || 11 || úpa prā́gāc chásanaṃ vājy árvā devadrī́cā mánasā dī́dhyānaḥ | ajáḥ puró nīyate nā́bhir asyā́nu paṣcā́t kaváyo yanti rebhā́ḥ || 12 || úpa prā́gāt paramáṃ yát sadhástham árvāñ áchā pitáram mātáraṃ ca | adyā́ devā́ñ júshṭatamo hí gamyā́ áthā́ ṣāste dāṣúshe vā́ryāṇi || 13 ||

O sun, you look like a chariot with horses attached to it, and there are men to attend on you and cattle to follow you. It looks as if lovely maidens wait upon you; troops and demi-gods follow you ; they have sought your friendship. O sun, the Nature's bounties themselves admire your vigour. 8

His mien is of gold; his feet are of iron and fleet as thought. The supreme self seems inferior to him, in speed. All the beauties of Nature come to participate in the glory of the sun. And it appears as if the resplendent Lord himself first used this horse for his mount. 9

The full haunched, slender-waisted, high-spirited and celestial coursers (of the sun), may you gallop along like swans in rows, while the rays of the sun spread along the heavenly path. 10

Your body, O solar horse, is made for motion. Your mind is as rapid as the wind; the hair of your mien tossed in manifold directions and spread beautifully in the forest. 11

The swift sun-horse approaches the place of rest, meditating with mind intent upon Nature's glories. The setting sun is preceded by an evening dusk as if bound to him. The priests and singers chant their parting hymns at this hour. 12

The sun-horse reaches the loftiest place, the source of its origin. May he approach Nature's bounties and cause to bestow prosperity to the dedicated worshipper. 13

(१६४) चतुःषष्ट्युत्तरशततमं सूक्तम्

(१-५२) द्विपञ्चाशदृचस्यास्य सूक्तस्यौचथ्यो दीर्घतमा ऋषिः। (१-४१) प्रथमाद्येकचत्वारिंशदृचां विश्वे देवाः, (४२) द्विचत्वारिंश्याः पूर्वार्धस्य वाक्, उत्तरार्धस्य चापः, (४३) त्रिचत्वारिंश्याः पूर्वार्धस्य शकधूमः, उत्तरार्धस्य च सोमः, (४४) चतुश्चत्वारिंश्याः केशिनः (अग्निः सूर्यो वायुश्च), (४५) पञ्चचत्वारिंश्या वाक्, (४६-४७) षट्चत्वारिंशीसप्तचत्वारिंश्योः सूर्यः, (४८) अष्टचत्वारिंश्याः संवत्सरकालचक्रम्, (४९) एकोनपञ्चाश्याः सरस्वती, (५०) पञ्चाश्याः साध्याः, (५१) एकपञ्चाश्याः सूर्यः पर्जन्याग्नी वा, (५२) द्विपञ्चाश्याश्च सरस्वान् सूर्यो वा देवताः। (१-११, १३-१४, १६-२२, २४-२८, ३०-३५, ३७-४०, ४३-५०, ५२) प्रथमाद्येकादशर्चां, त्रयोदशीचतुर्दश्योः, षोडश्यादिसप्तानां, चतुर्विंश्यादिपञ्चानां, त्रिंश्यादिषण्णां, सप्तत्रिंश्यादिचतसृणां, त्रिचत्वारिंश्याद्यष्टानां, द्विपञ्चाश्याश्च त्रिष्टुप्, (१२, १५, २३, २९, ३६, ४१) द्वादशीपञ्चदशीत्रयोविंश्येकोनत्रिंशीषट्त्रिंश्येकचत्वारिंशीनां जगती, (४२) द्विचत्वारिंश्याः प्रस्तारपङ्क्तिः, (५१) एकपञ्चाश्याश्चानुष्टुप् छन्दांसि॥

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम्॥१॥
सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः॥२॥

164.

Asyá vāmásya palitásya hótus tásya bhrā́tā madhyamó asty áṣnaḥ | tritī́yo bhrā́tā ghritáprishṭho asyā́trāpaṣyam viṣpátim saptáputram || 1 || saptá yuñjanti rátham ékacakram éko áṣvo vahati saptánāmā | trinā́bhi cakrám ajáram anarvám yátremā́ víṣvā bhúvanā́dhi tasthúḥ || 2 ||

इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः।
सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम॥३॥
को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति।
भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत्॥४॥

imám rátham ádhi yé saptá tasthúḥ saptácakram saptá vahanty áṣvāḥ | saptá svásāro abhí sám navante yátra gávām níhitā saptá nā́ma || 3 || kó dadarṣa prathamám jā́yamānam asthanvántam yád anasthā́ bíbharti | bhū́myā ásur ásrig ātmā́ kvà svit kó vidvā́ṅsam úpa gāt práshṭum etát || 4 ||

164

The all-pervading air is the middle brother of this sun, the benign priest, who is worthy of being propitiated and who is the protector of all and the butter-fed fire is his third brother. Of them, I behold the sun who has seven sons and is the lord of all subjects. 1

They yoke the seven to the one-wheeled car. One horse named *sapta* bears it along : the three-axled wheel (or the wheel with three hubs) is undecaying; it is always firm in its grip ; and in it all these regions of the universe abide. 2

The seven who preside over the seven-wheeled chariot are the seven horses who draw it; seven sisters ride it together, and in it are deposited the seven forms of sacrifices or utterances. 3

Who was the one, who could see the first born ? Who was that boneless from which the long-ones were produced ? Where were the breath, blood and the soul of this earth ? Who was the first to raise these questions to the sage ? 4

पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधि सप्त तन्तून्वि तत्निरे कवय ओतवा उ ॥५॥

pākaḥ prichāmi mánasávijānan devánām ená níhitā padáni | vatsé bashkáye 'dhi saptá tántūn ví tatnire kaváya ótavá u || 5 ||

॥१२॥ अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान् ।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ॥६॥
इह ब्रवीतु य ईमङ्ग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ॥७॥
माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ॥८॥
युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः ।
अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥९॥
तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥१०॥

ácikitvāñ cikitúshaś cid átra kavín prichāmi vidmáne ná vidvān | ví yás tastámbha sháḷ imá rájāṅsy ajásya rūpé kím ápi svid ékam || 6 || ihá bravītu yá īm aṅgá védasyá vāmásya níhitam padám véḥ | śīrshṇáḥ kshīrám duhrate gávo asya vavrím vásanā udakám padápuḥ || 7 || mātá pitáram ritá á babhāja dhīty ágre mánasā sám hí jagmé | sā bībhatsúr gárbharasā níviddhā námasvanta íd upavākám īyuḥ || 8 || yuktá mātásīd dhurí dákshiṇāyā átishṭhad gárbho vrijanīshv antáḥ | ámīmed vatsó ánu gám apaśyad viśvarūpyàm trishú yójaneshu || 9 || tisró mātrís trín pitrín bíbhrad éka ūrdhvás tasthau ném áva glāpayanti | mantráyante divó amúshya prishṭhé viśvavídam vácam áviśvaminvām || 10 ||

Immature (in understanding), undiscerning in mind, as I am, I inquire about those things (of those strides) which are hidden (even) from the super-powers. What are the seven threads in whom all abide, and which the sages have spread to envelop the sun ? 5

Ignorant, I inquire of the sages who know (the truth); not as one knowing (do I inquire), for the sake of (gaining) knowledge : What is that one supreme, who has upheld these six spheres in the form of the unborn? 6

Let him who knows this (truth) quickly declare it : The stride of the sun turning to the left (i. e. the divine half) is hidden. His rays pour down water from aloft. Putting on a visible form, they suck water with their feet. 7

The mother (earth) worships the father (the sun) with holy rites for the sake of water, but he has anticipated (her desires) in his mind; whereupon, desirous of progeny, she is penetrated by the dews of impregnation, and, (all) expectant of abundance, exchange words (of felicitations). 8

The mother (i.e., space) comes in contact with the southern yoke (southern hemisphere). Her embryo (water vapour) stood in the clouds. The calf (i.e., year) lowed (or desired to follow) the rays and saw the sun in all the three zones of the heavens. 9

The one alone (sun), having three mothers and three fathers, stood on high ; none ever over-weary him ; the (gods) on the summit of the sky take counsel, respecting him in a language all-comprehending, (but) not extending to all. 10

॥१६॥ द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥११॥
पञ्चपादं पितरं द्वादशाकृतिं दिव .आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ॥१२॥
पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ॥१३॥

dvā́daṣāraṃ nahí táj járāya várvarti cakrám pári dyā́m ṛitásya | ā́ putrā́ agne mithunáso átra saptá ṣatā́ni viṅṣatíṣ ca tasthuḥ || 11 || páñcapādam pitáraṃ dvā́daṣākṛitiṃ diváḥ āhuḥ páre árdhe purīshíṇam | áthemé anyá úpare vicakshaṇáṃ saptácakre shálara āhur árpitam || 12 || páñcāre cakré parivártamāne tásminn ā́ tasthur bhúvanāni víṣvā | tásya nā́kshas tapyate bhū́ribhāraḥ sanád evá ná ṣīryate sánābhiḥ || 13 ||

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥१४॥
साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ॥१५॥

sánemi cakrám ajáraṃ ví vāvṛita uttānā́yāṃ dáṣa yuktā́ vahanti | sū́ryasya cákshū rájasaity ā́vṛitaṃ tásminn ā́rpitā bhúvanāni víṣvā || 14 || sākaṃjā́nāṃ saptátham āhur ekajáṃ shál íd yamā́ ṛíshayo devajā́ íti | téshām ishṭā́ni víhitāni dhāmaṣáḥ sthātré rejante víkṛitāni rūpaṣáḥ || 15 ||

The twelve-spoked wheel of the true (sun) revolves round the heavens, and never (tends) to decay: seven hundred and twenty children in pairs, O sun, abide in it. 11

They call (him, i.e., the sun) a father having five feet and twelve forms and one possessed of rain-water in the upper half of the heavens. And these and some others call (the sun) as fixed in the chariot, having seven wheels and six spokes. 12

All beings abide in this five-spoked revolving wheel; the heavy loaded axle gets never heated; though in motion since eternal time, it knows no wear or tear (it does not give way from its hub). 13

The seven-fellied, undecaying wheel repeatedly revolves, yoked on the extended side with ten (horses) and it bears (the entire world); the orb of the sun proceeds, invested with water, and in it are all beings deposited. 14

Of these (seasons) born together, the seventh is called as born of one. The six alone are born in pairs; they move on and are born of god (the sun). Sacrifices pertaining to them are performed at proper periods, and for him who presides, the auxiliary sacrifices continue in various forms. 15

॥२७॥ स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ॥१६॥
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अन्तः ॥१७॥
अवः परेण पितरं यो अस्यानुवेद पर एनावरेण ।
कवीयमानः क इह प्र वोचद्देवं मनः कुतो अधि प्रजातम् ॥१८॥

stríyaḥ satís tā́m̐ u me puṅsá āhuḥ páṣyad akshaṇvā́n ná ví cetad andháḥ | kavír yáḥ putráḥ sá īm ā́ ciketa yás tā́ vijā́nāt sá pitúsh pitā́sat || 16 || aváḥ páreṇa pará enā́vareṇa padā́ vatsám bíbhratī gaúr úd asthāt | sā́ kadrī́cī káṃ svid árdham párāgāt kvà svit sūte nahí yūthé antáḥ || 17 || aváḥ páreṇa pitáraṃ yó asyānuvéda pará enā́vareṇa | kavīyámānaḥ ká ihá prá vocad devám mánaḥ kúto ádhi prájātam || 18 ||

ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥१९॥
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥२०॥

yé arvā́ñcas tā́m̐ u párāca āhur yé párāñcas tā́m̐ u arvā́ca āhuḥ | índraṣ ca yā́ cakráthuḥ soma tā́ni dhurā́ ná yuktā́ rájaso vahanti || 19 || dvā́ suparṇā́ sayújā sákhāyā samānám̐ vṛikshám pári shasvajāte | táyor anyáḥ píppalaṃ svādv átty ánaṣnann anyó abhí cākaṣīti || 20 ||

They, though females, have been called males, so we hear. He who has eyes beholds; the blind man does not see; he who is a sage-son understands this; and he who so discriminates is the father of the father. 16

The cow gets up, bearing the calf (which holds) the hind leg with the front and the front leg with the hind one. Whither does she go ? To which nalf does she go ? She delivers the young calf somewhere and not amidst the herd. 17

Where is such a wise man who knows its (calf's) father (the sun) as one traversing the lower from the upper half (in respect to the celestial region) and the upper from the lower half (in respect to the terrestrial region) ? Where is such a person who knows from whence the shining mind (moon) has been born ? Let him come and tell us if he knows. 18

Those which (the sages) have termed descending (or moving in the lower half), they have also termed ascending (or moving in the upper half) ; and those they have termed ascending, they have also called descending ; and those orbits which you, the moon and the sun, have made, bear along the worlds like (oxen) yoked to a chariot. 19

Two birds which are closely associated and intimate friends perch on the same tree. Of them one (the lower soul) tastes of its fruits ; the other (the supreme Lord) shines resplendently without tasting. 20

यत्रा॑ सुप॒र्णा अ॒मृत॑स्य भा॒गमनि॑मेषं वि॒दथा॑भि॒स्वर॑न्ति ।
इ॒नो विश्व॑स्य॒ भुव॑नस्य गो॒पाः स मा॒ धीरः॒ पाक॒मत्रा वि॑वेश ॥२१॥
यस्मि॑न्वृ॒क्षे म॒ध्वदः॑ सुप॒र्णा नि॑वि॒शन्ते॒ सुव॑ते॒ चाधि॒ विश्वे॑ ।
तस्येदा॑हुः॒ पिप्प॑लं स्वा॒द्वग्रे॒ तन्नोन्न॑श॒द्यः पि॒तरं॒ न वेद॑ ॥२२॥

yátrā suparṇā́ amṛ́tasya bhāgám ánimesham vidáthā-bhisváranti | inó víṣvasya bhúvanasya gopā́ḥ sá mā dhī́raḥ pā́kam átrā́ viveṣa || 21 || yásmin vṛikshé madhvádaḥ suparṇā́ niviṣánte súvate cā́dhi víṣve | tásyéd āhuḥ píppalaṃ svādv ágre tán nón naṣad yáḥ pitáraṃ ná véda || 22 ||

यद्गा॑य॒त्रे अधि॑ गाय॒त्रमाहि॑तं॒ त्रैष्टु॑भाद्वा॒ त्रैष्टु॑भं नि॒रत॑क्षत ।
यद्वा॒ जग॒ज्जग॒त्याहि॑तं प॒दं य इत्तद्वि॒दुस्ते अ॑मृत॒त्वमा॑नशुः ॥२३॥
गा॒य॒त्रेण॒ प्रति॑ मिमीते अ॒र्कम॒र्केण॒ साम॒ त्रैष्टु॑भेन वा॒कम् ।
वा॒केन॑ वा॒कं द्वि॒पदा॒ चतु॑ष्पदा॒क्षरे॑ण मिमते स॒प्त वाणीः॑ ॥२४॥
जग॑ता॒ सिन्धुं॑ दि॒व्य॑स्तभायद्रथन्त॒रे सूर्यं॒ पर्य॑पश्यत् ।
गा॒य॒त्रस्य॑ स॒मिध॑स्ति॒स्र आ॑हु॒स्ततो॑ म॒ह्ना प्र रि॑रिचे महि॒त्वा ॥२५॥

yád gāyatré ádhi gāyatrám ā́hitaṃ traíshṭubhād vā traíshṭubhaṃ nirátakshata | yád vā jágaj jágaty áhitam padáṃ yá ít tád vidús té amṛitatvám ānaṣuḥ || 23 || gāyatréṇa práti mimīte arkám arkéṇa sā́ma traíshṭubhena vākám | vākéna vākáṃ dvipádā cátushpadākshárena mimate saptá vā́ṇīḥ || 24 || jágatā síndhuṃ divy àstabhāyad rathaṃtaré sū́ryam páry apaṣyat | gāyatrásya samídhas tisrá āhus táto mahnā́ prá ririce mahitvā́ || 25 ||

Where the beautiful birds (rays) cognizant (of their functions), constantly sing the glory of eternal ambrosia ; there has the Lord and steadfast protector of all beings consigned me, (though) immature in wisdom. 21

On the tree, whereon the beautiful birds taste the sweetness, where they all rest and again bring forth their offerings,—on its top, they say, the fruits are sweet, but the one who knows not the father (of the universe) has no privilege to enjoy them. [Tree=sun or the supreme Lord ; beautiful birds=rays of the sun, or lower selves]. 22

They, who know the support of *gayatri* on *gayatri*, the support of *tristubh* on *tristubh*, and the support of *jagati* on *jagati*, know the eternal. [*Gayatri* is a metre of 24 syllables, *tristubh* of 44 syllables and *jagati* of 48 syllables. Figuratively they represent fire, air and the sun of the terrestrial, interspatial and celestial regions]. 23

He, the Lord, constructs the Ṛks with *gayatri* prayers (of 24 syllables) ; with the *ṛks* he constructs the Saman ; and with the *tristubh* (of 44 syllables) the Yajuh couplet (or triplet) ; with the couplet (or triplet), he constructs the Atharvan hymns with (verses of) two or four distichs and subsequently with the syllable, they (the poets) construst the seven metres. 24

With the stanzas in the *jagati* metre (of 48 syllables), he fixed the milky way (or rain) in the heaven, and surveyed the sun in the interspace (or *rathantara* psalm). They have declared three divisions of the *gayatri* metre (divisions of time: past, present and future) whence the creator or Lord surpasses (all the rest) in authority and grandeur. 25

॥२०॥ उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम् ॥२६॥
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥२७॥

úpa hvaye sudúghām̩ dhenúm etā́m̩ suhásto godhúg utá dohad enām | sréshtham̩ savám̩ savitā́ sāvishan no 'bhī́ddho gharmás tád u shú prá vocam || 26 || hiṅkriṇvatī́ vasupátnī vásūnām̩ vatsám ichántī mánasābhy ā́gāt | duhām asvíbhyām páyo aghnyéyám̩ sā́ vardhatām mahaté saúbhagāya || 27 ||

गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥२८॥
अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥२९॥
अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥३०॥

gaúr amīmed ánu vatsám mishántam mūrdhā́nam̩ híṅṅ akriṇon mātavā́ u | sríkvāṇam̩ gharmám abhí vāvaṣānā́ mímāti māyúm páyate páyobhiḥ || 28 || ayám̩ sá ṣiṅkte yéna gaúr abhívrita mímāti māyúm̩ dhvasánāv ádhi ṣritā́ | sá cittíbhir ní hí cakā́ra mártyam̩ vidyúd bhávantī práti vavrím auhata || 29 || anác chaye turágātu jīvám éjad dhruvám mádhya ā́ pastyā̀nām | jīvó mritásya carati svadhā́bhir ámartyo mártyenā sáyoniḥ || 30 || 19 ||

I invoke the milch cow (the cloud) that is easily milked, that the handy milker may milk her; may the creator acçept our excellent libation, that His cosmic energy (heat) may (thereby) increase ; it is for this, verily, that I earnestly invoke Him. [Cow=cloud, milk=rain, milker=wind; and again, cow=divine speech, milk=knowledge, milker=preceptor]. 26

She comes lowing, abounding in riches (products); desiring her calf in her mind ; may this cow grant her milk to the cosmic twins; may she thrive for our great advantage. [Calf=world or mankind; cow=cloud, milk=rain; and again calf=the seeker, or self ; cow=divine speech; milk= knowledge]. 27

The cow lows standing by calf with eyes half-closed, and caresses the calf with affection, licking the forehead ; she conveys her warm udders to the mouth of the calf; she bellows and feeds the calf with her milk. 28

He, (the calf), too, bellows, and encompassed by him is the cow uttering inarticulate sounds, as she repairs to her stall; (influenced) by her instincts, she behaves like a human being, and radiant as lightning, manifests her beautiful form. [Calf=cloud ; cow=earth ; refers to the thunder-clouds encompassing the earth, with occasional flashes of lightning]. 29

The soul, endowed with life-breath and fast speed, goes out and the dead body is left behind in the house. The immortal soul, hitherto living in the mortal body, keeps, on moving from life to life by its own nature. 30

॥२०॥ अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥३१॥
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ॥३२॥
द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥३३॥

ápaṣyaṃ gopám ánipadyamānam á ca párā ca pathíbhiṣ cárantam | sá sadhrícīḥ sá víshūcīr vásāna á varīvarti bhúvaneshv antáḥ || 31 || yá īṃ cakára ná só asyá veda yá īṃ dadárṣa hírug ín nú tásmāt | sá mātúr yónā párivīto antár bahuprajá nírṛitim á viveṣa || 32 || dyaúr me pitá janitá nábhir átra bándhur me mātá prithiví mahíyám | uttānáyoṣ camvòr yónir antár átrā pitá duhitúr gárbham ádhāt || 33 ||

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥३४॥
इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥३५॥

prichámi tvā páram ántam prithivyáḥ prichámi yátra bhúvanasya nábhiḥ | prichámi tvā vríshṇo áṣvasya rétaḥ prichámi vācáḥ paramáṃ vyòma || 34 || iyáṃ védiḥ páro ántaḥ prithivyá ayáṃ yajñó bhúvanasya nábhiḥ | ayáṃ sómo vríshṇo áṣvasya réto brahmáyáṃ vācáḥ paramáṃ vyòma || 35 ||

I have beheld the unwearied protector of the universe, the sun, travelling (spirally) upwards and downwards by various orbits ; invested with aggregative and diffusive radiance, he revolves in the midst of the regions. 31

He who was brought to life in body does not know of it. He who sees it, is (now) concealed from it. It is hemmed in the womb of the mother, is subject to many births and finally merges into the eternity. [He=Brahman and also Eternal Time; it=lower self and also day]. 32

The heaven (or the sun) is my parent and progenitor; the navel (of the earth) is my kinsman; the spacious earth is my mother. In between the two extended flaps lies the uterus. Herein the father has deposited the germs (of the fruitfulness) of the daughter, dawn. [Father=sun, mother=earth, kinsman=earth's navel, daughter=dawn, germ=rain]. 33

I ask you, what is the uttermost end of the earth; I ask you, what is the navel of the world; I ask you, what is the fecundating power of the rain-shedding steed; I ask you, what is the supreme space of (holy) speech? 34

The altar is the uttermost end of the earth; this sacrifice is the navel of the world. The herb offering is the fecundating power (semen) of this rain-shedding steed. This Lord is the supreme space of (holy) speech. 35

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥३६॥
न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ।
यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ॥३७॥

saptardhagarbhá bhúvanasya réto víshṇos tishṭhanti pradíṣa vídharmaṇi | té dhītíbhir mánasā té vipaṣcítaḥ paribhúvaḥ pári bhavanti viṣvátaḥ || 36 || ná ví jānāmi yád ivedám ásmi niṇyáḥ sáṃnaddho mánasā carāmi | yadá mấgan prathamajá ṛitásyád íd vācó aṣnuve bhāgám asyấḥ || 37 ||

अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्यन्यं चिक्युर्न नि चिक्युरन्यम् ॥३८॥
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥३९॥
सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥४०॥

ápān prán eti svadháyā gṛibhītó 'mártyo mártyenā sáyoniḥ | tá ṣáṣvantā vishūcínā viyántā ny ànyám cikyúr ná ní cikyur anyám || 38 || ṛicó aksháre paramé vyòman yásmin devá ádhi víṣve nishedúḥ | yás tán ná véda kím ṛicá karishyati yá ít tád vidús tá imé sám āsate || 39 || sūyavasád bhágavatī hí bhūyá átho vayám bhágavantaḥ syāma | addhí tṛíṇam aghnye viṣvadánīm píba ṣuddhám udakám ācáranti || 40 || २१ ||

The seven half-embryos (the semen of the universe) are employed in the work of supporting (the universe) by the Lord's orders. Those wise ones consciously whirl round and round the earth. [Cosmic intelligence, ego and five abstracts—colour, taste, sound, touch and smell—as the seven.] 36

I distinguish not if I am this all, for I go perplexed and bound in mind ; when the first-born (perceptions) of the Holy Law reached me, then of this speech I first obtained a portion (of the meaning). 37

The immortal soul associated with the mortal body ceaselessly moves the lower (inferior) or the upper (superior) bodies according to its own actions. They both go always together and everywhere together ; (we, the men) have comprehended the one (whilst in the physical body) but have not comprehended the other (the soul free from body). 38

The supreme Lord is omnipresent like space and eternal like his word and all Nature's bounties have their repose in Him. What will he, who knows not this (divine principle), do with the Veda ? But they who know it, they come close to Him. 39

Come, may you be rich in milk through abundant fodder, that we may also be rich (in abundance) ; eat grass at all seasons, and roaming (at will), drink pure water. 40

॥२२॥ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥४१॥
तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥४२॥
शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥४३॥

gaurír mimāya salilā́ni tákshaty ékapadī dvipádī sá cátushpadī | ashṭā́padī návapadī babhūvúshī sahásrākshara paramé vyòman || 41 || tásyāḥ samudrá ádhi ví ksharanti téna jīvanti pradíṣaṣ cátasraḥ | tátaḥ ksharaty aksháram tád víṣvam úpa jīvati || 42 || ṣakamáyam dhūmám ārā́d apaṣyam vishūvátā pará enā́varena | ukshā́ṇam príṣnim apacanta vīrā́s tā́ni dhármāṇi prathamány āsan || 43 ||

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥४४॥
चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥४५॥
इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥४६॥

tráyaḥ kesína rituthā́ ví cakshate saṃvatsaré vapata éka eshām | víṣvam éko abhí cashte ṣácībhir dhrā́jir ékasya dadriṣe ná rūpám || 44 || catvā́ri vā́k párimitā padā́ni tā́ni vidur brāhmaṇā́ yé manīshíṇaḥ | gúhā tríṇi níhitā néṅgayanti turíyaṃ vācó manushyà vadanti || 45 || índram mitrám váruṇam agním āhur átho divyáḥ sá suparṇó garútmān | ékaṃ sád víprā bahudhā́ vadanty agníṃ yamám mātaríṣvānam āhuḥ || 46 ||

The divine speech has been uttered enabling the thoughts to flow, and is one-footed, two-footed, four-footed, eight-footed, nine-footed or infinite in the innermost region of heart. 41

From her (i.e. from the divine speech) the clouds (or words) shed abundant rain, and thence (the people of) the four quarters live : thence the glory of the imperishable spreads and the universe is sustained. 42

I behold near (me) the smoky clouds ; and by that one arrives at the universal concept of inference of cause (the cosmic heat) from the effect. The priests have glorified with affectionate laurels that causal fire in the fire-rituals for such are their first duties. 43

The three, with beautiful tresses, look down in their several seasons upon the earth; one of them (fire) comes forth only once in a year (the ritual fire is established once in a year) ; the second one (the sun), by his acts, brightens the universe ; the course of the third one (air) is visible though not his form. 44

Four are the definite grades of speech ; those learned who are wise know them ; three deposited in secret, indicate no meaning ; men speak the fourth grade of speech. [Four grades of speech ; Om, Bhuh, Bhuvah, and Svah, also known as Para, Pasyanti, Madhyama and Vaikhari ; Para is the innermost at the origin ; pasyanti, pertains to heart, Madhyama to intellect, and Vaikhari, the phonetically expressed through the organs of speech.]. 45

They have styled (Him, God or the sun) *indra* (the resplendent), *mitra* (the surveyor), *varuna* (the venerable), *agni* (the adorable), and he is the celestial, well-winged *garutmat* (the great), for learned priests call one by many names as they speak of the adorable as *yama* (ordainer) and *matarisvan* (cosmic breath). 46

॥२३॥ कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥४७॥
द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः ॥४८॥
यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि ।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः ॥४९॥

krishṇám niyā́nam hárayaḥ suparṇā́ apó vásānā dívam út patanti | tá ā́vavṛitran sádanād ṛitásyā́d íd ghṛiténa pṛithiví vy ùdyate || 47 || dvā́dasa pradháyas cakrám ékam tríṇi nábhyāni ká u tác ciketa | tásmin sākám trisatā́ ná sañkávo 'rpitā́ḥ shashṭír ná calācalā́saḥ || 48 || yás te stánaḥ sasayó yó mayobhū́r yéna vísvā púshyasi vā́ryāṇi | yó ratnadhā́ vasuvíd yáḥ sudátraḥ sárasvati tám ihá dhā́tave kaḥ || 49 ||

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥५०॥
समानमेतदुदकमुच्चैत्यव चाहभिः ।
भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ॥५१॥
दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् ।
अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥५२॥

yajñéna yajñám ayajanta devā́s tā́ni dhármāṇi prathamā́ny āsan | té ha nā́kam mahimā́naḥ sacanta yátra pū́rve sādhyā́ḥ sánti devā́ḥ || 50 || samānám etád udakám úc caíty áva cā́habhiḥ | bhū́mim parjányā jínvanti dívam jinvanty agnáyaḥ || 51 || divyám suparṇám vāyasám bṛihántam apā́m gárbham darsatám óshadhīnām | abhīpató vṛishṭíbhis tarpáyantam sárasvantam ávase johavīmi || 52 || २३ ||

The smooth-gliding waters (of the rain, the solar rays) clothing the waters with a dark cloud, ascend to heaven. They come down again from the dwelling of the rain, and immediately the earth is moistened with water. 47

The fellies (or arcs) are twelve; the wheel is one; three are the axles (or hubs); but who knows it ? Within it are collected 360 (spokes), which are as it were, moveable and immoveable. [Wheel=year ; fellies=12 months ; axles= 3 double seasons, summer, rains and winter ; spokes=360 days of luni-solar year]. 48

O divine mother (speech), that ever-full breast (with inexhaustive vocabulary), which is the source of delight, with which you bestow all good things, which is the container of wealth, the distributor of riches, the giver of good (fortune) ; that bosom do thou lay open at this moment for our sustenance. 49

The Nature's bounties (gods) glorify the sacrifice with sacrifice, for such are their duties ; those righteous ones, verily, attain the highest glory attained by the wise persons of yore. 50

The homogeneous water passes upwards (evaporates as vapours) and downwards (in the form of rains) in the course of days ; clouds give joy to the earth ; the sacrificial fires (rays) bring joy to the heaven (the sky). 51

I invoke for our protection the celestial, well-winged, swift moving, majestic (God or the sun or speech) who is the germ of the waters, the displayer of herbs, the cherisher of lakes, replenishing the ponds with rain. 52

(१६५) पञ्चषष्ट्युत्तरशततमं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य (१-२, ४, ६, ८, १०-१२) प्रथमाद्वितीययोर्ऋचोश्चतुर्थीषष्ठ्यष्टमीनां दशम्यादितृचस्य चेन्द्रः, (३, ५, ७, ९) तृतीयापञ्चमीसप्तमीनवमीनां मरुतः, (१३-१५) त्रयोदश्यादितृचस्य च मैत्रावरुणिरगस्त्य ऋषयः । मरुत्वानिन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२४॥ कया शुभा सवयसः सनीळाः समान्या मरुतः सं मिमिक्षुः ।
कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया ॥१॥
कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त ।
श्येनाँ इव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम ॥२॥

165.

Káyā ṣubhá sávayasaḥ sánīḷāḥ samānyá marútaḥ sám mimikshuḥ | káyā matí kúta étāsa eté 'rcanti ṣúshmaṃ vṛ́shaṇo vasūyá || 1 || kásya bráhmāṇi jujushur yúvānaḥ kó adhvaré marúta á vavarta | ṣyenáñ iva dhrájato antárikshe kéna mahá mánasā rīramāma || 2 ||

कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥३॥
ब्रह्माणि मे मतयः शं सुतासः शुष्मं इयर्ति प्रभृतो मे अद्रिः ।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥४॥
अतो वयमन्तमेभिर्युजानाः स्वक्षत्रेभिस्तन्वः शुम्भमानाः ।
महोभिरेताँ उप युज्महे न्विन्द्र स्वधामनु हि नो बभूथ ॥५॥

kútas tvám indra máhinaḥ sánn éko yāsi satpate kíṃ ta itthá | sám pṛchase samarāṇáḥ ṣubhānaír vocés tán no harivo yát te asmé || 3 || bráhmāṇi me matáyaḥ ṣáṃ sutásaḥ ṣúshma iyarti prábhṛito me ádriḥ | á ṣāsate práti haryanty ukthémá hárī vahatas tá no ácha || 4 || áto vayám antamébhir yujānáḥ svákshatrebhis tanvàḥ ṣúmbhamānāḥ | máhobhir étāñ úpa yujmahe nv índra svadhám ánu hí no babhūtha || 5 ||

165

The self:

With what kind of high aspirations are these vital senses invested, who are of the same age and dwell in the same place? From where having come, and with what kind of wisdom do these mighty ones pray to obtain strength? 1

The self:

Whose hymns do these ever-youthful ones enjoy? Who turns these vital senses to the place of work and worship. By what great hymns shall these vital senses who fly in the vast expanse of thought and action like eagles be pleased? 2

Vital senses:

Whither O mighty self, are you going alone? What has happened to you, O protector of the pious men? We speak to you whilst accompanying you. O brilliant one, speak to us; O possessor of radiant thoughts, say to us in sweet voice all that which you have to say to us. 3

The self:

May the sacred rites be mine; may the sacred songs be pleasing to me, and may the offering be delightful. May my adamantine will be hurled against evils. These hymns are for me and my praise. May these twin forces, vital and mental, carry us towards our destination. 4

Vital senses:

Therefore we, having joined with extremely swift mind and having adorned with brilliant radiance, use these variegated powers (to destroy obstructing adversaries). O self, you understand our nature. 5

॥२०॥ क्व॑ स्या वो॑ मरुतः स्वधासीद्यन्मामेकं॑ समधत्ताहिहत्ये॑ ।
अहं ह्यु॑ग्रस्तविषस्तुविष्मान्विश्व॑स्य शत्रोरनमं वधस्नैः ॥६॥
भूरि॑ चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः ।
भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा॑ मरुतो यद्वशाम ॥७॥
वधीं वृत्रं म॑रुत इन्द्रियेण स्वेन भामेन तविषो ब॑भूवान् ।
अहमेता मनवे विश्वश्चन्द्राः सुगा अपश्चकर वज्रबाहुः ॥८॥

kvà syā́ vo marutaḥ svadhā́sīd yán mā́m ékam samá-dhattāhihátye | ahám hy ūgrás tavishás túvishmān víṣvasya ṣátror ánamam vadhasnaíḥ || 6 || bhū́ri cakartha yújyebhir asmé samānébhir vrishabha paúṅsyebhiḥ | bhū́rīṇi hí kriṇá-vāmā ṣavishṭhéndra krátvā maruto yád váṣāma || 7 || vá-dhīm vritrám maruta indriyéṇa svéna bhā́mena tavishó ba-bhūván | ahám etá mánave viṣváṣcandrāḥ sugá apáṣ cakara vájrabāhuḥ || 8 ||

अनु॑त्तमा ते॑ मघवन्नकिर्नु न त्वावाँ॑ अस्ति देवता विदा॑नः ।
न जाय॑मानो नशते न जातो यानि॑ करिष्या कृणुहि प्रवृद्ध ॥९॥
एक॑स्य चिन्मे विभ्व॑स्त्वोजो या नु द॑धृष्वान्कृणवै॑ मनीषा ।
अहं ह्यु॑ग्रो मरुतो विदा॑नो यानि च्यवमिन्द्र इदीश एषाम् ॥१०॥

ánuttam á te maghavan nákir nú ná tvá-vāṅ asti devátā vídānaḥ | ná jāyamāno náṣate ná jātó yáni karishyá kriṇuhí pravriddha || 9 || ékasya cin me vibhv àstv ójo yá nú dadhrishván kriṇávai manīshá | ahám hy ùgró maruto vídāno yáni cyávam índra íd īṣa esham || 10 || 25 ||

The self :

Where then does that nature of yours go away, O vital senses, when you charge me alone to put an end to the evil forces? I myself am formidable, strong and mighty. I am able to bring down the arms of all my adversaries with death-dealing weapons. 6

Vital senses :

O mighty showerer, the self, much have you achieved but it has been with our concerted efforts for we too have done many things. Whenever we determine to do something, we also achieve it without fail ; whatsoever, we, the vital senses, intend to do, we do it with our own efforts. 7

The self :

O vital senses, I destroy evils with my own strength, and through my own determination, I became a superior power. I, with adamantine will-power at my command, can make these lucid softly-flowing pious thoughts accessible to everyone. 8

Vital senses :

O bounteous self, nothing done by you is unavailing. No nature's force could be as effective as you. No one that is to be born, nor any one that has been born could surpass you in these deeds which you have achieved, O exceedingly mighty self. 9

The self :

May the prowess of me alone spread all over, and may I accomplish whatever I contemplate in my mind. For, verily, O vital senses, I am formidable and conscious of my duties and to whatever I direct my thoughts. I am the expeller of pains and I rule over them. 10

॥२६॥ अमन्दन्मा मरुतः स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र ।
इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः ॥११॥
एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः ।
संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥१२॥
को न्वत्र मरुतो मामहे वः प्र यातन सखीँरच्छा सखायः ।
मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम् ॥१३॥

ámandan mā maruta stómo átra yán me naraḥ ṣrútyam bráhma cakrá | índrāya vríshṇe súmakhāya máhyaṃ sákhye sákhāyas tanvè tanúbhiḥ || 11 || evéd eté práti mā rócamānā ánedyaḥ ṣráva ésho dádhanaḥ | saṃcákshya marutaṣ candrávarṇā áchānta me chadáyāthā ca nūnám || 12 || kó nv átra maruto māmahe vaḥ prá yātana sákhīñr áchā sakhāyaḥ | mánmāni citrā apivātáyanta eshám bhūta návedā ma ṛitánām || 13 ||

आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा ।
ओ षु वर्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥१४॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१५॥

á yád duvasyád duváse ná kārúr asmáñ cakré mānyásya medhá | ó shú vartta maruto vípram áchemá bráhmāṇi jaritá vo arcat || 14 || eshá va stómo maruta iyáṃ gír māndāryásya manyásya karóḥ | éshá yāsīshṭa tanvè vayáṃ vidyáméshám vṛijánaṃ jīrádānum || 15 ||

The self :

O vital senses, my friends and leaders, the praises and the glorious hymns that you have offered on this occasion to glorify have gratified me considerably. May your invocations to me, the resplendent and showerer of benefits, be blessings to me for the enhancement of my personality, since they have been addressed from a friend to a friend. 11

The self :

O vital senses, you have affectionate regards towards me, and you provide me with proper nourishment and strength. May you, with your wonderful characteristics invest me with all-round splendour. 12

O vital senses, who has magnified you in this universe? May you go to the company of your friends. O wonderful ones, may you not be uncognizant of my merits. May you be regardful of my virtuous actions. 13

O vital senses, may we obtain that wisdom which assists the worshipper to perform the sacred ceremony with devotional hymns. The devotee sings these praises for you, and therefore, may you quickly turn towards him. 14

O vital senses, this praise is for you ; this sacred hymn sung by the venerable poet is for you. May you confer delight on the singer ; may this praise reach you, for the good of your persons; may we thence obtain food, strength and long life. 15

(१६६) षट्षष्ट्युत्तरशततमं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । मरुतो देवताः । (१-१३) प्रथमादित्रयोदशर्चां जगती, (१४-१५) चतुर्दशीपञ्चदश्योश्च त्रिष्टुप् छन्दसी ॥

॥१॥ तन्नु वोचाम रभसाय जन्मने पूर्वं महित्वं वृषभस्य केतवे ।
ऐधेव यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन ॥१॥
नित्यं न सूनुं मधु बिभ्रत उप क्रीळन्ति क्रीळा विदथेषु घृष्वयः ।
नक्षन्ति रुद्रा अवसा नमस्विनं न मर्धन्ति स्वतवसो हविष्कृतम् ॥२॥
यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे ।
उक्षन्त्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः ॥३॥

166.

Tán nú vocāma rabhasā́ya jánmane pū́rvam mahitvám vrishabhásya ketáve | aidhéva yā́man marutas tuvishvaṇo yudhéva ṣakrās tavishā́ṇi kartana || 1 || nítyaṃ ná sūnúm mádhu bíbhrata úpa krīḷanti krīḷā́ vidátheshu ghríshvayaḥ | nákshanti rudrā́ ávasā namasvínaṃ ná mardhanti svátavaso havishkrítam || 2 || yásmā ū́māso amrítā árāsata rāyás posham ca havíshā dadāṣushe | ukshánty asmai marúto hitā́ iva purū́ rájāṅsi páyasā mayobhúvaḥ || 3 ||

आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन् ।
भयन्ते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु ॥४॥
यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।
विश्वो वो अज्मन्भयते वनस्पती रथीयन्तीव प्र जिहीत ओषधिः ॥५॥

ā́ yé rájāṅsi távishībhir ávyata prá va évāsaḥ sváyatāso adhrajan | bháyante víṣvā bhúvanāni harmyā́ citró vo yā́maḥ práyatāsv rishṭíshu || 4 || yát tvesháyāmā nadáyanta párvatān divó vā prishṭhám náryā ácucyavuḥ | víṣvo vo ájman bhayate vánaspátī rathīyántīva prá jihīta óshadhiḥ || 5 ||

166

O brave soldiers, may we say that you have from your previous life inherited the germ of heroism and become leader of strong men. O loud roaring and mighty heroes, (perform your deeds of valour) advancing on the way to the battlefield to destroy enemies like the blazing fire. 1

Just as father provides nourishment to son, in the same way, O heroes, bearing goodwill towards all, skilful in warfare, in battles you playfully exhibit your brave actions. These vanquishers of enemies come to the god-loving persons for their protection, and as they are self-made they suffer no harm. 2

To that devotee, who presents offerings, these protecting and immortal heroes, gratified by dedication give abundant riches. On him, like loving friends, the heroes bestow happiness and supply plentiful water to the regions (i.e. to their agricultural land). 3

When your vehicles, which move speedily through the regions and proceed self-directed, people are alarmed and damage is done to buildings ; for so swift are your advances and so great is the dread of the thrust of your spears. 4

When these heroes advance with vigour, their dazzling rush makes the mountains echo and though friendly to men, they shake the clouds of the firmament. Even the forest lords get alarmed at your approach and the shrubs wave to and fro, as a damsel in a fast-running chariot. 5

॥२॥ यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन ।
यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा ॥६॥
प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः ।
अर्चन्त्यर्कं मदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंस्या ॥७॥
शतभुजिभिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत ।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥८॥

yūyám na ugrā marutah sucetúnárishtagrāmāh sumatím pipartana | yátrā vo didyúd rádati krívirdatī rināti paṣváh súdhiteva barháṇā || 6 || prá skambhádeshṇā anavabhrárā-dhaso 'lātriṇáso vidátheshu súshṭutāḥ | árcanty arkám madirásya pītáye vidúr vīrásya prathamáni paúṅsyā || 7 || ṣa-tábhujibhis tám abhíhruter aghát pūrbhí rakshatā maruto yám ávata | jánam yám ugrās tavaso virapṣinaḥ pāthánā ṣáṅsāt tánayasya pushṭíshu || 8 ||

विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता ।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥९॥
भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अञ्जयः ।
अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ॥१०॥

víṣvāni bhadrá maruto rá-theshu vo mithaspṛídhyeva tavisháṇy áhitā | áṅseshv á vaḥ prápatheshu khādáyó 'ksho vaṣ cakrá samáyā ví vāvṛite || 9 || bhúrīṇi bhadrá náryeshu bāhúshu vákshassu rukmá rabhasáso añjáyaḥ | áṅseshv étāḥ pavíshu kshurá ádhi váyo ná pakshán vy ánu ṣríyo dhire || 10 ||

O brave and terrible heroes, free from malice in your kindly thoughts, you fulfil our aspirations with your benevolence. Wherever your lightning missile strikes, it crunches up the enemy, as a well-hurled weapon wounds a cattle. 6

These heroes are liberal in giving shelter, possessors of inexhaustible riches, devoid of malevolence and are glorified in self-sacrifice. They go to the battlefield and dedicate themselves to the service of men for enjoying exhilarating rewards ; for they know the exact responsibilities of an ideal hero. 7

O brave, mighty and glorified heroes, may you give the person, whom you have loved, forts with all the myriad provisions for his protection. May you guard him from ruin as well as from sin. Further, may you defend him from calumny and provide amply for the nourishment of his children. 8

O brave heroes, all benevolent things are stored in your vehicles. From your shoulders hang innumerable weapons. At your resting places, when you take a long journey, ample refreshments have been provided to feed you. The axle of the chariot holds the wheels firmly together. 9

O brave heroes, in your manly arms are many good things; on your chests are golden plates; on your shoulders are brilliant ornaments; sharp are the edges of your weapons. These heroes wear various decorations, as birds with multi-coloured wings. 10

॥३॥ महान्तो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः ।
मन्द्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इन्द्रे मरुतः परिष्टुभः ॥११॥
तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतम् ।
इन्द्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वम् ॥१२॥
तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत ।
अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे ॥१३॥

mahánto mahná vibhvò víbhūtayo dūredríśo yé divyá iva stríbhiḥ | mandráḥ sujihváḥ sváritāra āsábhiḥ sámmiślā índre marútaḥ parishṭúbhaḥ || 11 || tád vaḥ sujātā maruto mahitvanám dīrghám vo dātrám áditer iva vratám | índraś caná tyájasā ví hruṇāti táj jánāya yásmai sukríte árādhvam || 12 || tád vo jāmitvám marutaḥ páre yugé purú yác cháṅsam amritāsa ávata | ayá dhiyá mánave srushṭím ávya sakám náro daṅsánair á cikitrire || 13 ||

येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।
आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्याम ॥१४॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१५॥

yéna dīrghám marutaḥ śūśávāma yushmákena párīṇasā turāsaḥ | á yát tatánan vrijáne jánāsa ebhír yajñébhis tád abhíshṭim aśyām || 14 || eshá va stómo — || 15 ||

These heroes are strong with their mighty power, full of grandeur, full of splendour like the stars (or constellations) of heaven, prudent, joyful, sweet-tongued and eloquent. They are helpful to the state and deserve to be glorified in all respects. 11

O brave well-born heroes, that is your greatness. Your munificence is as extensive as the firmament. Even the head of a state favours the one who receives assistance from you. 12

O brave heroes, your alliance with us is of a long duration. O immortals, you have always listned to our invocation, and protected us. And having accepted our laudation, you have become leaders of people through your dedicated services. You are so well-known because of your favourable disposition towards mankind. 13

O quick-moving heroes, may we flourish for a long time through your greatness and through your help. May we triumph in combats. May we by these sacred acts fulfil your high expectations. 14

O brave heroes, this praise is for you ; this sacred hymn is for you, which is sung by the venerable poet, capable of conferring delight by his laudations. May this praise reach you for (the good of your) persons, so that we may thence obtain food, strength and long life. 15

(१६७) सप्तषष्ट्युत्तरशततमं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । (१) प्रथमर्च इन्द्रः,
(२–११) द्वितीयादिदशानाञ्च मरुतो देवताः । त्रिष्टुप् छन्दः ॥

॥४॥ सहस्रं त इन्द्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः ।
सहस्रं रायो मादयध्यै सहस्रिण उप नो यन्तु वाजाः ॥१॥
आ नोऽवोभिर्मरुतो यान्त्वच्छा ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः ।
अध यदेषां नियुतः परमाः समुद्रस्य चिद्धनयन्त पारे ॥२॥

167.

Sahásram ta indrotáyo naḥ sahásram ísho harivo gūrtátamāḥ | sahásram ráyo madayádhyai sahasríṇa úpa no yantu vā́jāḥ || 1 || ā́ nó 'vobhir marúto yāntv ácha jyéshṭhebhir vā brihláddivaiḥ sumāyā́ḥ | ádha yád eshām niyútaḥ paramā́ḥ samudrásya cid dhanáyanta pāré || 2 ||

मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टिः ।
गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव सं वाक् ॥३॥
परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः ।
न रोदसी अप नुदन्त घोरा जुषन्त वृधं सख्याय देवाः ॥४॥
जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः ।
आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या ॥५॥

mimyáksha yéshu súdhitā ghritā́cī híraṇyanirṇig úparā ná rishṭíḥ | gúhā cárantī mánusho ná yósha sabhā́vatī vidathyèva sám vā́k || 3 || párā śubhrā́ ayā́so yavyā́ sādhāraṇyéva marúto mimikshuḥ | ná rodasí ápa nudanta ghorā́ jushánta vrídham sakhyā́ya devā́ḥ || 4 || jóshad yád īm asuryā̀ sacádhyai víshitastukā rodasí nrimáṇāḥ | ā́ sūryéva vidható rátham gāt tveshápratīkā nábhaso nétyā || 5 ||

167

O resplendent Lord, the source of gravitational forces, you know a thousand ways of protecting us ; you have a thousand types of most nutritive nourishment ; may all these be ours. You have, besides these, a thousand varieties of exhilarating wealth, and thousands of cattle; may all these be given to us. 1

May the most sapient cloud-bearing winds come to our presence with benefactions ; may they come to us with choicest celestial blessings. May they come to us with treasures alongwith the glorious lightning from the sea's farthest limits. 2

(The cloud-bearing winds are such) in whom the water-shedding, well-grasped golden coloured lightning clings in the firmament, like the wife of a man moving in seclusion under a cover, or like a spear carried rearward, or like divine speech in an assembly of the learned. 3

These brilliant, fast-moving cloud-bearing winds cling to the lightning, and drench forth the interspace and earth with rains, and yet do not upset them with their overwhelming roars. May, in the same way, the learned wish the general prosperity of all through friendly regards. 4

This lightning, with dishevelled tresses and mind devoted to her lords, wooes the cloud-bearing winds to associate with her. She, radiant in form, ascends the chariot of the restless (the cloud-bearing winds) as dawn, the daughter of the sun, on the chariot of twin-divines, and comes here with (the speed of) the sun. 5

॥५॥ आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम् ।
अर्को यद्वो मरुतो हविष्मान्गायद्गाथं सुतसोमो दुवस्यन् ॥६॥
प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति ।
सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः ॥७॥
पान्ति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान् ।
उत च्यवन्ते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः ॥८॥

ásthāpayanta yuvatím yúvānaḥ subhé nímislām vidátheshu pajrám | arkó yád vo maruto havíshmān gáyad gāthám sutásomo duvasyán || 6 || prá tám vivakmi vákmyo yá eshām marútam mahima satyó ásti | sáca yád īm vríshamaṇā ahamyú sthirá cij jánīr váhate subhagáḥ || 7 || pánti mitrávárunav avadyác cáyata īm aryamó ápraṣastan | utá cyavante ácyutā dhruváṇi vavṛidhá īm maruto dátivaraḥ || 8 ||

नहीं नु वो मरुतो अन्त्यस्मे आरात्ताच्चिच्छवसो अन्तमापुः ।
ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि ष्ठुः ॥९॥
वयमद्येन्द्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये ।
वयं पुरा महि च नो अनु द्यून्तन्न ऋभुक्षा नरामनु ष्यात् ॥१०॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥११॥

nahí nú vo maruto ánty asmé ārāttāc cic chávaso ántam āpúḥ | té dhṛishṇúnā ṣávasā ṣūṣuvánsó 'rṇo ná dvésho dhṛishatá pári shṭhuḥ || 9 || vayám adyéndrasya préshṭhā vayám svó voccmahi samaryé | vayám purá máhi ca no ánu dyún tán na ṛibhukshá narám ánu shyāt || 10 || eshá va stómo — || 11 ||

O youthful cloud-bearing winds, when you get this ever-young lightning, who is full of life, highly accomplished and social, seated (on your chariot) for glory, then the revered worshipper, presenter of oblations, singer of devotional prayers chants melodious songs in social gatherings. 6

I celebrate the greatness of the cloud-bearing winds which is true and worthy of laudation, inasmuch as their firm-minded, benevolent, highly-respectable and fortuitous maiden bears and supports a flourishing family. [Maiden=lightning ; family=rains]. 7

O cloud-bearing winds, Nature's bounties such as the sun, oceans and rains, defend our cosmic creation from all that is reprehensible, and destroy all that is unworthy. They cause the yet unfallen and showering rains to descend, and then the rainy season brings prosperity to this world. 8

None of us, O cloud-bearing winds, have attained, either nearly or remotely, the limit of your vigour. These cloudy winds, increasing in energy and vigour, overwhelm their enemies—obstructing forces—like waters (or ocean). 9

Let us, who are the dearest friends of resplendent Lord, glorify Him today; let us glorify Him tomorrow in our sttuggles of life ; let us praise Him for our good in future days as of old, so that the supreme Lord may ever be favourable to us among men. 10

O vital principles, this praise is for you, this sacred hymn is sung for you by the venerable poet capable of conferring delight by his laudations. May this praise reach you for the good of your persons, so that we may thence obtain food, strength and long life. 11

(१६८) अष्टषष्ट्युत्तरशततमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । मरुतो देवता । (१-७) प्रथमादिसप्तर्चां जगती, (८-१०) अष्टम्यादितृचस्य च त्रिष्टुप् छन्दसी ॥

॥६॥ यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे ।
आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिः ॥१॥
वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः ।
सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः ॥२॥

168.

Yajñá-yajñā vaḥ samanā́ tuturváṇir dhíyam-dhiyam vo devayā́ u dadhidhve | ā́ vo 'rvā́caḥ suvitā́ya ródasyor mahé vavrityām ávase suvriktíbhiḥ || 1 || vavrā́so ná yé svajā́ḥ svátavasa ísham svàr abhijā́yanta dhū́tayaḥ | sahasríyāso apā́m nórmáya āsā́ gā́vo vándyāso nókshánaḥ || 2 ||

सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते ।
ऐषामंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ॥३॥
अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना ।
अरेणवस्तुविजाता अचुच्यवुर्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः ॥४॥
को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया ।
धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो३ नैतशः ॥५॥

sómāso ná yé sutā́s triptā́ṅsavo hritsú pītā́so duvā́so nā́sate | aíshām áṅseshu rambhíṇīva rārabhe hásteshu khādíṣ ca kritíṣ ca sám dadhe || 3 || áva svā́yuktā divá ā́ vríthā yayur ámartyāḥ káṣayā codata tmánā | areṇā́vas tuvijātā́ acucyavur drilhā́ni cin marúto bhrā́jadrishṭayaḥ || 4 || kó vo 'ntár maruta rishṭividyuto réjati tmánā hánveva jihvā́yā | dhanvacyúta ishā́m ná yā́mani purupraíshā ahanyò naítaṣaḥ || 5 ||

168

O cloud-bearing winds, dedicated action brings forth a swift and uniform response. Verily, your intention is to discharge your duties for the benefit of mankind. So may I invite you through these glorious hymns to come down here for the protection and sustenance of inter-space and earth (by your rains). 1

These cloud-bearing winds, who are self-born, self-invigorating, and ever-moving, have been in existence to confer abundance of food and happiness. They are like thousands of undulations of the waters in a state of turmoil. They are to be admired so that they may remain near us for shedding water like cows (yielding milk). 2

They are like persons who have taken pressed out medicinal elixirs to their satisfaction; they abide like devoted adherents, in the hearts of men. Upon their shoulders rests a warrior's spear, like a youthful maiden, and in their hands they hold a sword and iron gloves. 3

Mutually supported, they descend readily from the sky. O immortal cloud-bearing winds, you animate us by your own whip. These cloudy winds, who are pure, renowned for strength and armed with their shining spears (lightnings) have shaken even the firmest rocks. 4

O cloud-bearing winds, armed with lightning spears, you drive the people to cultivate fields. Who is the being who, standing amongst you, sets you in motion, as the jaws are set in motion by the tongue ? As falling rains are essential for obtaining food so (persons desirous of sustenance) excite you in various ways like a horse undergoing daily training. 5

॥७॥ क्वं स्विदुस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय ।
यच्च्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवम् ॥६॥
सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती ।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जञ्जती ॥७॥
प्रति ष्टोभन्ति सिन्धवः पविभ्यो यदभ्रियां वाचमुदीरयन्ति ।
अव स्मयन्त विद्युतः पृथिव्यां यदी घृतं मरुतः प्रुष्णुवन्ति ॥८॥

kvà svid asyá rájaso mahás páram kvávaram maruto yásminn āyayá | yác cyaváyatha vithuréva sámhitam vy ádriṇā patatha tveshám arṇavám || 6 || sātír ná vó 'mavatī svàrvatī tveshá vípākā marutaḥ pípishvatī | bhadrá vo rātíḥ priṇató ná dákshiṇa prithujráyī asuryèva jáñjatī || 7 || práti shṭobhanti síndhavaḥ pavíbhyo yád abhríyām vácam udīráyanti | áva smayanta vidyútaḥ prithivyám yádī ghritám marútaḥ prushṇuvánti || 8 ||

असूत पृश्निर्महते रणाय त्वेषमयासां मरुतामनीकम् ।
ते सप्सरासोऽजनयन्ताभ्वमादित्स्वधामिषिरां पर्यपश्यन् ॥९॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१०॥

ásūta príśnir mahaté ráṇāya tveshám ayásām marútām ánīkam | té sapsaráso 'janayantábhvam ád ít svadhám ishirám páry apaśyan || 9 || eshá va stómo — || 10 ||

O cloud-bearing winds, where is that limit of the vast region (whence you come) ? Where is the other end ? When do you scatter the dense vapour like light grass ? And when do you hurl down the brilliant rain-cloud by the bolt of lightning ? 6

Like your bounty, O cloud-bearing winds, is your liberality : you are bliss-bestowing, brilliant, fruitful, full of plenteousness and benevolent. It is like the donation of a wealthy donor prompt of distribution and like the all actively-engaged subduing forces of Nature. 7

The rivers cry aloud like thunderbolts in tune with the roar of clouds. But the lightning smiles upon the earth beneath them, when the cloud-bearing rains sprinkle water on the earth. 8

The Lord of cosmos brings forth the glittering army of the quick-moving, cloud-bearing winds to fight out the mighty battle. The joint efforts of these cloud-winds soon made them realize that the desired food could be produced. 9

O cloud-bearing winds, this praise is for you; this sacred hymn is for you, which is sung by the venerable poet, capable of conferring delight by his laudations. May this praise reach you for the good of your people, so that, we may thence obtain food, strength and long life. 10

(१६९) एकोनसप्तत्युत्तरशततमं सूक्तम्

(१–८) अष्टर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । इन्द्रो देवता । (१, ३–८) प्रथमर्चः तृतीयादिषण्णाञ्च त्रिष्टुप्, (२) द्वितीयायाश्च चतुष्पदा विराट् छन्दसी ॥

॥८॥ महश्चित्त्वमिन्द्र यत एतान्महश्चिदसि त्यजसो वरूता ।
स नो वेधो मरुतां चिकित्वान्त्सुम्ना वनुष्व तव हि प्रेष्ठा ॥१॥
अयुज्रन्त इन्द्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा ।
मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ ॥२॥
अम्यक्सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति ।
अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि ॥३॥

169.

Mahás cit tvám indra yatá etán mahás cid asi tyájaso varūtá | sá no vedho marútām cikitván sumná vanushva táva hí préshṭhā || 1 || áyujran ta indra visvákrishṭīr vidānáso nishshídho martyatrá | marútām pritsutír hásamānā svàrmīlhasya pradhánasya sātaú || 2 || ámyak sá ta indra rishṭír asmé sánemy ábhvam marúto junanti | agnís cid dhí shmātasé susukván ápo ná dvīpám dádhati práyāṅsi || 3 ||

त्वं तू न इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम् ।
स्तुतश्च यास्ते चकनन्त वायोः स्तनं न मध्वः पीपयन्त वाजैः ॥४॥
त्वे राय इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः ।
ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातूयन्तीव देवाः ॥५॥

tvám tū́ na indra tám rayím dā ójishṭhayā dákshiṇayeva rātím | stútas ca yā́s te cakánanta vāyó stánam ná mádhvaḥ pīpayanta vā́jaiḥ || 4 || tvé rā́ya indra tosátamāḥ praṇetā́raḥ kásya cid ritāyóḥ | té shú ṇo marúto mriḷayantu yé smā purā́ gātūyántīva devā́ḥ || 5 ||

169

O supreme sun, yours is the greatness, since you take under your protection, with an unattached attitude, those who are also great. Therefore, O all-wise, controller of the cloud-bearing winds, grant us those blessings which are dearest to you. 1

O resplendent sun, these cloud-bearing winds which favour agriculture, and which impel the rains towards men, they all are working in co-ordination with you. The host of cloud-bearing winds is proceeding forward to win the bliss-bestowing wealth with delight. 2

O resplendent sun, your protective weapon is available to us for our aid. These cloud-bearing winds always send down the long accumulated rain. The sacred fire-divine is set ablaze for the ceremony. The oblations encompass him as the waters surround an island. 3

O resplendent sun, may you grant us quickly that wealth (which you possess), for which we would be bestowing on the donor the most worthy present. Devotees offer you, the giver of boons, their respectful prayers; and they cherish your blessings as a child cherishes nourishment and sweet milk from the bosom of its mother. 4

O resplendent sun, you possess most bounteous riches that inspire everyone who lives a dedicated life. May these vital principles show us loving kindness. These Nature s forces have always gone out to assist sacred projects. 5

॥९॥ प्रति प्र याहीन्द्र मीळ्हुषो नॄन्महः पार्थिवे सदने यतस्व।
अध यदेषां पृथुबुध्नास एतास्तीर्थे नार्यः पौंस्यानि तस्थुः॥६॥
प्रति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः।
ये मर्त्यं पृतनायन्तमूमैरृणावानं न पतयन्त सर्गैः॥७॥
त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः।
स्तवानेभिः स्तवसे देव देवैर्विद्यामेषं वृजनं जीरदानुम्॥८॥

práti prá yāhīndra mīḷhúsho nṛ́n maháḥ pā́rthive sádane yatasva | ádha yád eshām prithubudhnā́sa étās tīrthé nā́ryaḥ paúṅsyāni tasthúḥ || 6 || práti ghorā́ṇām étānām ayā́sām marútām ṣriṇva āyatā́m upabdíḥ | yé mártyam pritanāyántam ū́mair riṇāvā́nam ná patáyanta sárgaiḥ || 7 || tvám mā́nebhya indra viṣvájanyā rádā marúdbhiḥ ṣurúdho góagrāḥ | stávānebhi stavase deva devaír vidyā́meshám vrijánam jīrádānum || 8 ||

(१७०) सप्तत्युत्तरशततमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य (१, ३, ४) प्रथमातृतीयाचतुर्थीनामृचामिन्द्रश्चतुर्थ्या अगस्त्यो वा. (२, ५) द्वितीयापञ्चम्योश्च मैत्रावरुणिरगस्त्य ऋषी। इन्द्रो देवता। (१) प्रथमर्चो बृहती. (२-४) द्वितीयादितृचस्यानुष्टुप्. (५) पञ्चम्याश्च त्रिष्टुप् छन्दांसि॥

॥१०॥ न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्।
अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति॥१॥
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव।
तेभिः कल्पस्व साधुया मा नः समरणे वधीः॥२॥

170.

Ná nūnám ásti nó ṣváḥ kás tád veda yád ádbhutam | anyásya cittám abhí saṃcaréṇyam utā́dhītaṃ ví naṣyati || 1 || kíṃ na indra jighāṅsasi bhrā́taro marútas táva | tébhiḥ kalpasva sādhuyā́ mā́ naḥ samárаṇe vadhīḥ || 2 ||

O resplendent sun, may you extend your assistance to the mighty rain-shedding leaders (of clouds) and exert yourself in the interspatial struggle. There the broad-footed horses (i.e. dark-coloured clouds) still stand firm in need of your help like robust enemies on water-ways. 6

The roar of the formidable dark coloured, swift-moving and advancing cloud-bearing winds is every-where echoed. They strike down the mortal opponent by their self-defending blows and throw down like a debtor who borrows money. 7

Associated with the cloud-bearing winds,· O resplendent sun, may you, for your own honour and the good of all, pierce the exhilarating containers of waters (who obstruct the shedding of rain). You are glorified by all the cosmic powers. May you help us in obtaining food, strength and long life. 8

170

[A dialogue between the Frustrated Self and the Inner Conscience]

Self : There is neither a certainty of today, nor of tomorrow. Who knows what a mystery it is ! Whatsoever we have accomplished through other's thinking, or whatever has been profoundly studied by us is all vanishing !! 1

Conscience : Why do you want to injure us, O resplendent self ? The vital airs are your bretheren; treat them with kindness. Do not kill us in internal conflicts. 2

किं नो॑ भ्रातरगस्त्य॒ सखा॒ सन्नति॑ मन्यसे ।
वि॒द्मा हि ते॒ यथा॒ मनो॒ऽस्मभ्य॒मिन्न दित्स॑सि ॥३॥
अरं॑ कृण्वन्तु॒ वेदिं॑ सम॒ग्निमि॑न्धतां पु॒रः ।
तत्रा॒मृत॑स्य॒ चेत॑नं य॒ज्ञं ते॑ तनवावहै ॥४॥
त्वमी॑शिषे वसुपते॒ वसू॑नां॒ त्वं मि॒त्राणां॑ मित्रपते॒ धेष्ठः॑ ।
इन्द्र॒ त्वं म॒रुद्भिः॒ सं व॑दस्वाध॒ प्राशा॑न ऋतु॒था ह॒वींषि॑ ॥५॥

kíṃ no bhrātar agastya sákhā sánn áti manyase | vidmá hí te yáthā máno 'smábhyam ín ná ditsasi || 3 || áraṃ kriṇvantu védiṃ sám agním indhatām puráḥ | tátrāmrítasya cétanaṃ yajñáṃ te tanavāvahai || 4 || tvám īśishe vasupate vásūnāṃ tvám mitrāṇām mitrapate dhéshṭhaḥ | índra tvám marúdbhiḥ sáṃ vadasvádha práśāna rituthá havíṃshi || 5 ||

(१७१) एकसप्तत्युत्तरशततमं सूक्तम्

(१-६) षड्ऋचस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । (१-२) प्रथमाद्वितीययोर्ऋचोर्मरुतः,
(३-६) तृतीयादिचतसृणाञ्च मरुत्वानिन्द्रो देवताः । त्रिष्टुप् छन्दः ॥

प्रति॑ व ए॒ना नम॑सा॒हमे॑मि सू॒क्तेन॑ भिक्षे सुम॒तिं तु॒राणा॑म् ।
र॒र॒णता॑ मरुतो वे॒द्याभि॒र्नि हेळो॑ ध॒त्त वि मु॑चध्व॒मश्वा॑न् ॥१॥
ए॒ष वः॒ स्तोमो॑ मरुतो॒ नम॑स्वान्हृ॒दा त॒ष्टो मन॑सा धायि देवाः ।
उपे॒मा या॑त॒ मन॑सा जुषा॒णा यू॒यं हि ष्ठा नम॑स इद्वृ॒धासः॑ ॥२॥

171.

Práti va ená námasāhám emi sūkténa bhikshe sumatíṃ turáṇām | raraṇátā maruto vedyábhir ní hélo dhattá ví mucadhvam áśvān || 1 || eshá va stómo maruto námasvān hridá tashṭó mánasā dhāyi devāḥ | úpem á yāta mánasā jushāṇá yūyáṃ hí shṭhá námasa íd vridhásaḥ || 2 ||

Self : Wherefore, O brother, with steady mind, do you, who are my friend, treat me with disregard? We, verily, know what is in your mind. You do not intend to give us anything. 3

Conscience : Let the priest decorate the spiritual altar and kindle the inner fire as a first step. Both of us then shall nourish and enlighten for your sake the inner fire, the inspirer of immortal wisdom. 4

Conscience : O Lord of wealth, you are the custodian of treasures; O protector of friends, you are the supporter of friends. O resplendent self, may you treat the vital airs with affection, and partake with them in the seasonal offerings of the inner sacrifice. 5

171

I (the flickering mind) come to you, O vital airs, with this reverential homage, and with this hymn, I implore your favour against the approaching impediments. Having been pacified by our praises, may you suppress your anger and send out your horses in action. 1

[This refers to the control of mind to be achieved through breathing exercises.]
O vital airs, this praise, along with proper offering is for you, and it comes out of the sincere heart; O divines, may you, accept it with favour. Since you are the augmenters of the sacrificial food, may you come with willing intentions to receive these laudations. 2

स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शंभविष्ठः ।
ऊर्ध्वा नः सन्तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा ॥३॥
अस्मादहं तविषादीषमाण इन्द्राद्भिया मरुतो रेजमानः ।
युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता नः ॥४॥
येन मानासश्चितयन्त उस्रा व्युष्टिषु शवसा शश्वतीनाम् ।
स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः ॥५॥
त्वं पाहीन्द्र सहीयसो नॄन्भवा मरुद्भिरवयातहेळाः ।
सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुम् ॥६॥

stutáso no marúto mriḷayantūtá stutó magháva ṣámbhavishṭhaḥ | ūrdhvá naḥ santu komyá vánany áhani víṣva maruto jigīshá ||3|| asmád ahám tavishád íshamaṇa índrād bhiyá maruto réjamānaḥ | yushmábhyam havyá níṣitāny āsan tány aré cakrima mriḷáta naḥ || 4 || yéna mánāsaṣ citáyanta usrá vyúshṭishu ṣávasā ṣáṣvatīnām | sá no marúdbhir vrishabha ṣrávo dha ugrá ugrébhi stháviraḥ sahodáḥ || 5 || tvám pāhīndra sáhīyaso nrín bháva marúdbhir ávayātaheḷāḥ | supraketébhiḥ sāsahír dádhano vidyámeshám v. j. ||6||

(१७२) द्विसप्तत्युत्तरशततमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । मरुतो देवताः । गायत्री छन्दः ॥

॥१२॥ चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः । मरुतो अहिभानवः ॥१॥
आरे सा वः सुदानवो मरुत ऋञ्जती शरुः । आरे अश्मा यमस्यथ ॥२॥
तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः । ऊर्ध्वान्नः कर्त जीवसे ॥३॥

172.

Citró vo 'stu yámaṣ citrá ūtí sudānavaḥ | máruto áhibhānavaḥ || 1 || āré sá vaḥ sudānavo máruta riñjatí ṣáruḥ | āré áṣmā yám ásyatha || 2 || triṇaskandásya nú víṣaḥ pári vriṅkta sudānavaḥ | ūrdhván naḥ karta jīváse || 3 ||

May the vital airs, now invoked, come to bestow happiness on us. May the inner self, now glorified, be propitious to us. O vital airs, may all the days of our life, yet to come, prove gratifying and be full of enjoyment. 3

O vital airs, through the fear of that vital inner self, I (the flickering mind) fly trembling. These oblations had been prepared for you, but have not been offered for this reason. Nevertheless, may you make us happy. 4

The rays of divine enlightenment in the inner realm are favoured, O inner self, by your vigour; and as they shine, they confer a spiritual consciousness. May, you, the showerer of benefits and bestower of strength, along with the highly active vital airs, grant us spiritual food and nourishments. 5

May you, inner self, protect the sense-organs, leaders to the sensualities, and be free from displeasure against vital airs. Let us gain victory over obstacles, and may we have your support in obtaining food, strength and long life. 6

172

O bounteous vital principles, with splendour never diminishing, may your approach be marvellous and equally marvellous be your extensive protection. 1

O vital principles and liberal benefactors, far be from us your bright and destructive shaft; and far be from us your powerful bolt which you hurl on evil forces. 2

O vital airs, our liberal benefactors, save my people, the sense organs, though I may be as insignificant as a blade of grass. Lift us up that we may live. 3

(१७३) त्रिसप्तत्युत्तरशततमं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१३॥ गायत्साम नभन्यं यथा वेरर्चाम तद्वावृधानं स्वर्वत् ।
गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासान् ॥१॥
अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगो नाश्नो अति यज्जुगुर्यात् ।
प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः ॥२॥
नक्षद्धोता परि सद्म मिता यन्भरद्गर्भमा शरदः पृथिव्याः ।
क्रन्ददश्वो नयमानो रुवद्गौरन्तर्दूतो न रोदसी चरद्वाक् ॥३॥

173.

Gáyat sáma nabhanyàṃ yáthā vér árcāma tád vāvṛidhānáṃ svàrvat | gávo dhenávo barhíshy ádabdhā á yát sadmánaṃ divyáṃ vívāsān || 1 || árcad vṛíshā vṛíshabhiḥ svéduhavyair mṛigó náṣno áti yáj juguryát | prá mandayúr manáṃ gūrta hótā bhárate máryo mithuná yájatraḥ || 2 || nákshad dhótā pári sádma mitá yán bhárad gárbham á ṣarádaḥ pṛithivyáḥ | krándad áṣvo náyamāno ruvád gaúr antár dūtó ná ródasī carad vák || 3 ||

ता कर्माषतरास्मै प्र च्यौत्नानि देवयन्तो भरन्ते ।
जुजोषदिन्द्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ॥४॥
तमु ष्टुहीन्द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः ।
प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहन्ता ॥५॥

tá karmáshatarāsmai prá cyautnáni devayánto bharante | jújoshad índro dasmávarcā násatyeva súgmyo ratheshṭháḥ || 4 || tám u shṭuhíndraṃ yó ha sátvā yáḥ ṣúro maghávā yó ratheshṭháḥ | pratīcáṣ cid yódhīyān vṛíshaṇvān vavavrúshaṣ cit támaso vihantá || 5 ||

173

When the learned wise men speak highly and unreservedly of the most illustrious dedicated man, holding a post of honour, let us greet him with sacred Vedic lores. May we extend our devotion to him by singing blissful and inspiring hymns. 1

When that dedicated man expresses his force of vigour like a lion impelled by hunger, then other strong persons also follow him and offer their assistance for the accomplishment of the desired objective. O mighty, only then assiduous and devoted men co-operate to accomplish the benevolent act initiated by you. 2

Assuredly the dedicated person achieves his objective of the sacred act, and his fame acquired thereby extends across the dimensions of time (year) and space (earth). Being brave whilst he approaches, and moves, he gathers the vitality of a horse and the benevolence of a cow, and his voice becomes effective in both the worlds. 3

We offer (to this dedicated person) the highest laurels ; the admirers of the learned and wise also present to him their homage. May he, of conspicuous lustre, occupying an eminent position, be pleased with our adorations like the immortal ones. 4

May we glorify that dedicated illustrious man who is mighty, brave and bounteous. When he proceeds speedily on a mission he becomes intensely involved in it and overcomes all difficulties. His strength is boundless and all-sided. He drives away all kinds of gloomy influences. 5

॥१४॥ प्र यदि॒त्था म॑हि॒ना नृभ्यो॒ अस्त्यरं॒ रोद॑सी क॒क्ष्ये॒३॑ नास्मै॑ ।
सं वि॑व्य॒ इन्द्रो॑ वृ॒जनं॒ न भूमा॒ भर्ति॑ स्व॒धावाँ॑ ओप॒शमि॑व॒ द्याम् ॥६॥
स॒मत्सु॑ त्वा शूर स॒तामु॑रा॒णं प्र॑प॒थिन्त॑मं परितंस॒यध्यै॑ ।
स॒जोष॑स॒ इन्द्रं॒ मदे॑ क्षो॒णीः सू॒रिं चि॒द्ये अ॑नु॒मद॑न्ति॒ वाजैः॑ ॥७॥
ए॒वा हि ते॒ शं सव॑ना समु॒द्र आपो॒ यत्त॑ आ॒सु मद॑न्ति दे॒वीः ।
विश्वा॑ ते॒ अनु॒ जोष्या॑ भू॒द्गौः सू॒रीँश्चि॒द्यदि॑ धि॒षा वेषि॒ जना॑न् ॥८॥

prá yád itthá mahiná nríbhyo ásty áram ródasī kakshyè násmai | sáṃ vivya índro vrijánam ná bhúmā bhárti svadhávāñ opaṣám iva dyám || 6 || samátsu tvā ṣūra satám urāṇám prapathíntamam paritaṅsayádhyai | sajóshasa índram máde kshoṇíḥ sūríṃ cid yé anumádanti vájaiḥ || 7 || evá hí te ṣáṃ sávanā samudrá ápo yát ta āsú mádanti devíḥ | víṣvā te ánu jóshyā bhūd gaúḥ sūríṅṣ cid yádi dhishá véshi jánān || 8 ||

असा॑म॒ यथा॑ सुष॒खाय॑ एन स्वभि॒ष्टयो॑ न॒रां न शंसैः॑ ।
अस॒द्यथा॑ न॒ इन्द्रो॑ वन्दने॒ष्ठास्तु॒रो न कर्म॒ नय॑मान उ॒क्था ॥९॥
वि॒ष्प॒र्धसो॑ न॒रां न शंसै॑र॒स्माका॑स॒दिन्द्रो॒ वज्र॑हस्तः ।
मि॒त्रा॒युवो॒ न पूर्प॑तिं॒ सुशि॑ष्टौ मध्या॒युव॒ उप॑ शिक्षन्ति य॒ज्ञैः ॥१०॥

ásāma yáthā sushakháya ena svabhishṭáyo naráṃ ná ṣáṅsaiḥ | ásad yáthā na índro vandaneshṭhás turó ná kárma náyamāna ukthá || 9 || víshpardhaso naráṃ ná ṣáṅsair asmákāsad índro vájrahastaḥ | mitrāyúvo ná púrpatiṃ súṣishṭau madhyayúva úpa ṣikshanti yajñaíḥ || 10 ||

Thus he is truly superior to all others through his majesty. The vast heaven and earth are not sufficient to hold his extensive glory. This mighty resplendent soul encompasses the earth as if it is his garment and with his superior power he wears the heaven as if it were a frontlet. 6

O brave dedicated leader, the head of a state, to you alone people look for guidance during wartime just as they pay you homage with determination and assurance. At all other times, warriors and soldiers look upon you as their supreme commander. 7

When the sparkling waters of oceans rise up to form clouds for the benefit of mankind, and when fire-ceremonies are performed to bring down rain, O illustrious brave one, you express your supreme satisfaction and joy. All praise is acceptable to you and you reward with understanding, those who speak highly of you. 8

So may we be blessed by you and through your blessings achieve our higher aspirations and the friendship of honest men. May the resplendent leader of ours carrying our adorations be with us in all our benevolent deeds and thus may our worship attain its objective. 9

The followers contending for the favour of the illustrious leader vie with each other in propitiating him with devotion. Like those, who desirous of his friendship, conciliate the head of a state, with good government, so do our representatives propitiate (the leader) with benevolent activities and participations. 10

॥१५॥ यज्ञो हि ष्मेन्द्रं कश्चिदृन्धञ्जुहुराणश्चिन्मनसा परियन् ।
तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा ॥११॥
मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥१२॥
एष स्तोम इन्द्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः ।
आ नो ववृत्याः सुविताय देव विद्यामेषं वृजनं जीरदानुम् ॥१३॥

yajñó hí shméndraṃ kás cid ṛindháñ juhurāṇás cin mánasā pariyán | tīrthé náchā tātṛishāṇám óko dīrghó ná sidhrám á kṛiṇoty ádhvā || 11 || mó shú ṇa indrátra pṛitsú devaír ásti hí shmā te sushminn avayáḥ | mahás cid yásya mīḷhúsho yavyá havíshmato marúto vándate gíḥ || 12 || eshá stóma indra túbhyam asmé eténa gātúṃ harivo vido naḥ | á no vavṛityāḥ suvitáya deva vidyámesháṃ v. j. || 13 ||

(१७४) चतुःसप्तत्युत्तरशततमं सूक्तम्

(१–१०) दशर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१६॥ त्वं राजेन्द्र ये च देवा रक्षा नॄन्पाह्यसुर त्वमस्मान् ।
त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः ॥१॥
दनो विश इन्द्र मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त् ।
ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रन्धीः ॥२॥

174.

Tváṃ rájendra yé ca devá rákshā nṛín pāhy àsura tvám asmán | tváṃ sátpatir magháva nas tárutras tváṃ satyó vásavānaḥ sahodáḥ || 1 || dáno vísa indra mṛidhrávācaḥ saptá yát púraḥ sárma sáradīr dárt | ṛiṇór apó anavadyárṇa yúne vṛitráṃ purukútsāya randhīḥ || 2 ||

Of the two types of followers, one propitiates the illustrious leader, augmenting him by selfless unmotivated action; another is the group of insincere ones, praising him with mind averted (with selfish motives). To the first type of group, he is like a lake to a thirsty pilgrim near a sacred spot. To the other, he is like a long road, which retards the end (of the journey). 11

O resplendent illustrious leader, associated with your brave comrades, abandon us not in the grim struggle of life which confronts us at every step. For O mighty one, the best-ower of blessings and kind accepter of our oblations, whilst we have the greatest regard for you, we have no less regard for your brave associates also, and we have all praise for them too. 12

O resplendent illustrious leader, this hymn is addressed to your honour, reflecting the deep yearning of our heart towards you. May you respond to our love and be our guide. May you bless us with food, strength and long life. 13

174

O resplendent Lord, you are our sovereign king. All the Nature's forces are under your aegis. O the vital source, may you protect and foster us. You are the defender of all righteous men, the possessor of wealth, and extricator of us from sin. You are the embodiment of truth, giver of shelter and strength. 1

Resplendent Lord, you help us to subdue our sins arising from all the seven (five sense organs, vital breath, and mind). You subjugate violent people speaking offensive language. O irreproachable Lord, you let the thoughts flow freely and destory darkness to help men of discretion. 2

अजा वृतं इन्द्र शूरपत्नीर्द्यां च येभिः पुरुहूत नूनम् ।
रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ॥३॥
शेषन्नु त इन्द्र सस्मिन्योनौ प्रशस्तये पवीरवस्य मह्ना ।
सृजदर्णांस्यव यद्युधा गास्तिष्ठद्धरी धृषता मृष्ट वाजान् ॥४॥
वह कुत्समिन्द्र यस्मिञ्चाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा ।
प्र सूरश्चक्रं वृहतादभीकेऽभि स्पृधो यासिषद्वज्रबाहुः ॥५॥

ája vríta indra súrapatnīr dyám ca yébhiḥ puruhuta nūnám | ráksho agním aśúsham túrvayaṇam siṅhó ná dáme ápāṅsi vástoḥ || 3 || séshan nú tá indra sásmin yónau práśastaye pávīravasya mahná | srijád árṇāṅsy áva yád yudhá gás tíshṭhad dhárī dhrishatá mrishṭa vájān || 4 || váha kútsam indra yásmiñ cakán syumanyú rijrá vátasyáśva | prá súraś cakrám vrihatād abhíke 'bhí sprídho yasishad vájrabāhuḥ || 5 || १८ ||

॥१७॥ जघन्वाँ इन्द्र मित्रेरूञ्चोदप्रवृद्धो हरिवो अदाशून् ।
प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यम् ॥६॥
रपत्कविरिन्द्रार्कसातौ क्षां दासायोपबर्हणीं कः ।
करत्तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत ॥७॥

jaghanváñ indra mitrérūñ codápravriddho harivo ádāśūn | prá yé páśyann aryamáṇam sácāyós tváyā śurtá váhamāna ápatyam || 6 || rápat kavír indrārkásātau kshám dāsáyopabárhaṇīm kaḥ | kárat tisró maghávā dánucitrā ní duryoṇé kúyavācam mridhí sret || 7 ||

Resplendent Lord, invoked by all and aided by brave warriors, you reveal your glory and drive away the evil forces. May you preserve the blazing and ever-surging flames of the spiritual fire which always burns in men like the fury of a lion. 3

Let the evil forces be humbled by the might of your firm and unyielding determination and let adversaries be made inactive in their own places. When you, armed with your will power, come to force, you make virtuous thoughts flow freely. You rejuvenate the pious wise men, and brighten up their spiritual radiance. May you by your enhanced power grant purity of thought to your followers. 4

Resplendent Lord, may you turn your radiant spiritual beams, swift as the wind, to that aspirant and earnest man of discretion who is completely dedicated to your service. May the sun bring near the wheel of his chariot and may he as the lord of punitive justice subjugate our adversaries. 5

O resplendent Lord, master of strong spiritual power, invigorated by our animating praises, may you destroy unbelievers and misers. But may you bless those who are law-abiding and dedicated to you; may they lead a courageous life of bravery and obtain from you food and progeny. 6

O resplendent Lord, the sages glorify you to obtain blessings. You throw the evil forces obstructing the path of their progress and crush the evils once for all. O bounteous Lord, you set open the doors of the three-fold progress — physical, mental and spiritual, and annihilate demoniac forces which put obstacles in our progress. 7

सना ता त इन्द्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः ।
भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥८॥
त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥९॥
त्वमस्माकमिन्द्र विश्वध स्या अवृकतमो नरां नृपाता ।
स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम् ॥१०॥

sánā tá ta indra návya águḥ sáho nábhó 'viraṇāya pūrvīḥ | bhinát púro ná bhído ádevīr nanámo vádhar ádevasya pīyóḥ || 8 || tvaṃ dhúnir indra dhúnimatīr ṛiṇór apáḥ sīrā́ ná srávantīḥ | prá yát samudrám áti ṣura párshi paráya turváṣaṃ yáduṃ svastí || 9 || tvám asmákam indra viṣvádha sya avṛikátamo narā́ṃ nṛipātā́ | sá no víṣvāsāṃ spṛidhā́ṃ sahodā́ vi° || 10 ||

(१७५) पञ्चसप्तत्युत्तरशततमं सूक्तम्

(१-६) षड्ऋचस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । इन्द्रो देवता । (१) प्रथमर्चः स्कन्धोग्रीवी बृहती, (२-५) द्वितीयादिचतसृणामनुष्टुप्, (६) षष्ठ्याश्च त्रिष्टुप् छन्दांसि ॥

॥१८॥ मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।
वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥१॥
आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः । सहावाँ इन्द्र सानसिः पृतनाषाळमर्त्यः ॥२॥

175.

Mátsy ápayi te máhaḥ pátrasyeva harivo matsaró mádaḥ | vríshā te vríshṇa índur vājī́ sahasrasā́tamaḥ || 1 || á nas te gantu matsaró vríshā mádo várenyaḥ | saháváṅ indra sānasíḥ pṛitanāshā́ḷ ámartyaḥ || 2 ||

O resplendent Lord, the sages celebrate your everlasting glory both past and present. You subdue all violent forces to make the world a safe place for peace-loving people. You demolish the strongholds of enmities and humble the Godless people's deadly weapon. 8

O resplendent Lord, you are the terrifier of evil forces. You set the stream of pious thoughts to flow in torrents. And when the earth is filled with water and takes the form of the deep ocean, you take the glorious and assiduous people across it. 9

O resplendent Lord, you have been our benign protector and preserver of all. You furnish strength to all our dedicated and noble works. May we have your support in obtaining food, strength and long life. 10

175

O resplendent Lord with brilliant radiance, may you be delighted. May your own bliss be consummated. Your delightful creation, the holder of your bliss, is as exhilarating as the bliss itself. For you, the vigour, equally invigorating is the bliss, O mighty, the giver of thousand pleasures. 1

O resplendent Lord, may our offering of the spiritual delight be acceptable to you ; for (it is) invigorating, inspiring, strength-giving and most precious to us ; it is the vanquisher of adverse tendencies and is immortal. 2

त्वं हि शूरः सनिता चोदयो मनुषो रथम् । सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥३॥
मुषाय सूर्यं कवे चक्रमीशान ओजसा । वह शुष्णाय वधं कुत्सं वातस्याश्वैः ॥४॥
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः ॥५॥
यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥६॥

tvám hí śúraḥ sánitā codáyo mánusho rátham | saháván dásyum avratám óshaḥ pátram ná śocíshā || 3 || mushayá súryaṃ kave cakrám íśāna ójasā | váha śúshṇaya vadháṃ kútsaṃ vátasyáśvaiḥ || 4 || śushmíntamo hí te mádo dyumníntama utá krátuḥ | vṛitraghná varivovída maṅsishṭhá aśvasátamaḥ || 5 || yáthā púrvebhyo jaritṛíbhya indra máya ivápo ná tṛíshyate babhútha | tám ánu tva nivídaṃ johavīmi vi° || 6 ||

(१७६) षट्सप्तत्युत्तरशततमं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । इन्द्रो देवता । (१-५) प्रथमादिपञ्चर्चामनुष्टुप्, (६) षष्ठ्याश्च त्रिष्टुप् छन्दसी ॥

॥२०॥

मत्सि नो वस्यइष्टय इन्द्रमिन्दो वृषा विश ।
ऋघायमाण इन्वसि शत्रुमन्ति न विन्दसि ॥१॥
तस्मिन्ना वेशया गिरो य एकश्चर्षणीनाम् ।
अनु स्वधा यमुप्यते यवं न चर्कृषद्वृषा ॥२॥

176.

Mátsi no vásyaïshṭaya índram indo vṛíshá viśa | ṛigha-yámāṇa invasi śátrum ánti ná vindasi || 1 || tásminn á ve-śayā gíro yá ékaś carshaṇīnám | ánu svadhá yám upyáte yávaṃ ná cárkṛishad vṛíshā || 2 ||

O resplendent Lord, you are indeed brave, bounteous and a benefactor. You have been accelerating the speedy chariot of human endeavours. O mighty one, may you consume the unruly and indisciplined elements of human society like the blazing fire which consumes the wooden vessel. 3

O poet of wisdom, our Lord, you have carried off by your strength one wheel of the chariot of the mighty sun. May you wield your wheel of punitive justice and put an end to the greedy exploiters. And may you proceed with the swiftness of the wind to provide aid to men of discretion. 4

Your triumphant delight is most intense and your benevolent acts are exceedingly bright. You are the supreme giver of vital vigours. May your bounteous nature and beneficence destroy our enemies and distribute riches to us. 5

O resplendent Lord, you have been providing happiness from eternity to your devotees; your blessings are as satisfying as water to a thirsty man. Therefore, I have been unceasingly repeating my invocations so that we may have your support in obtaining from you food, strength and long life. 6

176

O resplendent Lord, through your ecstasy of love you inspire us to acquire prosperity. May our love reach you. Verily, only you can drive away adversaries. No evil can approach us in your presence. 1

May our songs reach the resplendent Lord who is the only protector of men. The sacred food is offered to Him as the steer ploughs the barley in. 2

यस्य विश्वानि हस्तयोः पञ्च क्षितीनां वसु ।
स्पाशयस्व यो अस्मध्रुग्दिव्येवाशनिर्जहि ॥३॥
असुन्वन्तं समं जहि दूणाशं यो न ते मयः ।
अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते ॥४॥
आवो यस्य द्विबर्हसोऽर्केषु सानुषगसत् ।
आजाविन्द्रस्येन्दो प्रावो वाजेषु वाजिनम् ॥५॥
यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥६॥

yásya vísvāni hástayoḥ páñca kshitīnā́m vásu | spāsáyasva yó asmadhrúg divyévāsánir jahi || 3 || ásunvantam samam jahi dūṇā́sam yó ná te máyaḥ | asmábhyam asya védanam daddhí sūrís cid ohate || 4 || ávo yásya dvibárhaso 'rkéshu sānusház ásat | ājā́v índrasyendo prā́vo vā́jeshu vājínam || 5 || yáthā pū́rvebhyo — || 6 ||

(१७७) सप्तसप्तत्युत्तरशततमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२०॥ आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इन्द्रः ।
स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङ् ॥१॥
ये ते वृषणो वृषभास इन्द्र ब्रह्मयुजो वृषरथासो अत्याः ।
ताँ आ तिष्ठ तेभिरा याह्यर्वाङ् हवामहे त्वा सुत इन्द्र सोमे ॥२॥

177.

Á carshaṇiprá vrishabhó jánānām rā́jā krishṭīnā́m puruhūtá índraḥ | stutáḥ sravasyánn ávasópa madríg yuktvā́ hárī vríshaṇā yāhy arvā́ñ || 1 || yé te vríshaṇo vrishabhā́sa indra brahmayújo vrísharathāso átyāḥ | tā́ñ ā́ tishṭha tébhir ā́ yāhy arvā́ñ hávāmahe tvā sutá indra sóme || 2 ||

In whose hands are vested all the treasures of the five classes of people (learneds, administrators, businessmen, labour, and the fifth uncovered by the classification). May He mark out the man who oppresses us and destroy him like the lightning falling from the sky and burning up the trees. 3

May such a person be deprived of all privileges, as does not serve you as a law-abider, and works contrary to the general interests. Let his share of benefits be given to your faithful devotees because only wise people deserve your favour and protection. 4

O joy of ecstasy, you favour those who are doubly devout and serve you with body and mind. May the songs of our joyous expressions reach the resplendent Lord, so that He helps us in our struggles and vigorously assists in our battles. 5

O resplendent Lord, as you have been providing happiness from eternity to your devotees, your blessings are as satisfying as water to a thirsty man. Therefore, I have been unceasingly repeating my invocations that I may obtain food, strength and long life. 6

177

The resplendent Lord is a real wellwisher of humanity. He is the source of strength for mankind and the sovereign benefactor of all people. When He is invoked and praised by His followers, He is pleased and comes speedily to help, as if mounted on a vigorous steed. 1

O resplendent Lord, may the beams of your spiritual radiance which are bliss-bestowing, inspiring, invocable by prayers, reach us speedily as if mounted on a chariot. O Lord, we invoke you with full awareness of the spiritual experience of our heart. 2

आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि ।
युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक् ॥३॥
अयं यज्ञो देवया अयं मियेध इमा ब्रह्माण्ययमिन्द्र सोमः ।
स्तीर्णं बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह ॥४॥
ओ सुष्टुत इन्द्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः ।
विद्याम वस्तोरवसा गृणन्तो विद्यामेषं वृजनं जीरदानुम् ॥५॥

ā́ tishṭha ráthaṃ vṛishaṇaṃ vṛíshā te sutáḥ sómaḥ párishiktā mádhūni | yuktvā́ vṛishabhyāṃ vṛishabha kshitīnā́ṃ háribhyāṃ yāhi pravátópa madrík ‖ 3 ‖ ayáṃ yajñó devayā́ ayám miyédha imā́ bráhmāṇy ayám indra sómaḥ | stīrṇám barhír ā́ tú śakra prá yāhi píba nishádya ví mucā hárī ihá ‖ 4 ‖ ó súshṭuta indra yāhy arvā́ṅ úpa bráhmāṇi mānyásya kāróḥ | vidyāma vastor ávasā gṛiṇánto vi° ‖ 5 ‖

(१७८) अष्टसप्तत्युत्तरशततमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२२॥ यद्ध स्या त इन्द्र श्रुष्टिरस्ति यया बभूथ जरितृभ्य ऊती ।
मा नः कामं महयन्तमा धग्विश्वा ते अश्यां पर्याप आयोः ॥१॥
न घा राजेन्द्र आ दभन्नो या नु स्वसारा कृणवन्त योनौ ।
आपश्चिदस्मै सुतुका अवेषन्गमन्न इन्द्रः सख्या वयश्च ॥२॥

178.

Yad dha syā ta indra śrushṭír ásti yáyā babhū́tha jaritṛíbhya ūtī́ | mā́ naḥ kā́mam mahā́yantam ā́ dhag víśvā te aśyām páry āpa āyóḥ ‖ 1 ‖ ná gha rājéndra ā́ dabhan no yā́ nú svásārā kṛiṇávanta yónau | ā́paś cid asmai sutúkā aveshan gáman na índraḥ sakhyā́ váyaś ca ‖ 2 ‖

Ascend your bounty-shedding chariot. We are inviting you to greet you with our sweet emotional expressions. O resplendent Lord, may you harness your vigorous bounty-shedding chariot and come to us for our preservation; come with utmost haste to your own people. 3

O resplendent Lord, this is a benevolent selfless act dedicated to Nature's bounties; this is an oblation for sacred dedication; these are divine hymns and this is an emotional expression of devotion,—all these are to be dedicated to you. O Lord, come close and accept our loving devotion; come to stay with us for all times. 4

O illustrious divine leader, glorified by the sacred hymns of revered preceptors, come to bless our noble acts, so that we may enjoy prosperity through your protection May we have support in obtaining food, strength and long life. 5

178

O resplendent Lord, may you bless us with those beneficent qualities wherewith you help and protect your dedicated devotees. May you please not allow our lofty aspirations to die unfulfilled. May we through your favour obtain every thing that is obtainable by men. 1

May our Lord not allow any one to diminish the valour of that labour, which our sisters (either day and night, or fingers of a hand) have directed us to do. May all our invigorating offerings propitiate Him so that He continues to be friendly to us and provide adequate nourishment. 2

जेता नृभिरिन्द्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः ।
प्रभर्ता रथं दाशुषं उपाक उद्यन्ता गिरो यदि च त्मना भूत् ॥३॥
एवा नृभिरिन्द्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत् ।
समर्य इषः स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥४॥
त्वया वयं मघवन्निन्द्र शत्रूनभि ष्याम महतो मन्यमानान् ।
त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुम् ॥५॥

jétā nríbhir índraḥ pritsú súraḥ srótā hávam nádhamānasya kāróḥ | prábhartā rátham dasúsha upaká údyantā gíro yádi ca tmánā bhút || 3 || evá nríbhir índraḥ susravasyá prakhādáḥ prikshó abhí mitríṇo bhūt | samaryá ishá stavate víváci satrākaró yájamanasya sáṅsaḥ || 4 || tváyā vayám maghavann indra sátrun abhí shyama maható mányamanan | tvám trātá tvám u no vridhé bhur vi° || 5 ||

(१७९) एकोनाशीत्युत्तरशततमं सूक्तम्

(१–६) षड्चस्यास्य सूक्तस्य (१–२) प्रथमाद्वितीययोर्ऋचोर्लोपामुद्रा ऋषिका, (३–४) तृतीयाचतुर्थ्यो-र्मैत्रावरुणिरगस्त्यः, (५–६) पञ्चमीषष्ठ्योश्चागस्त्यान्तेवासी ब्रह्मचारी ऋषी । रतिर्देवता ।
(१–४, ६) प्रथमादिचतुर्ऋचां षष्ठ्याश्च त्रिष्टुप्, (५) पञ्चम्याश्च बृहती छन्दसी ॥

॥२२॥ पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः ।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः ॥१॥
ये चिद्धि पूर्व ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि ।
ते चिदवासुर्नह्यन्तमापुः समू नु पत्नीर्वृषभिर्जगम्युः ॥२॥

179.

Purvír ahám saradaḥ sasramaṇá doshá vástor usháso jaráyantiḥ | mináti sríyam jarimá tanúnam ápy u nú pátnir vríshaṇo jagamyuḥ || 1 || yé cid dhí púrva ritasápa ásan sākám devébhir ávadann ritáni | té cid ávasur nahy ántam apúḥ sám ū nú pátnir vríshabhir jagamyuḥ || 2 ||

Resplendent Lord, with his valorous colleagues wins battles, carefully listens to the invocations of His subjects, speedily goes to the dedicated followers and when glorified by honest devotees comes, of His own accord, quite close to them. 3

Verily, the resplendent Lord accepts all the offerings made by his friendly people and in response helps them to overcome their difficulties, and achieve their aspirations. He is faithful in his assurance, and commending the piety of His men, He approves of the offered homage. 4

Through your alliance, O bounteous resplendent Lord, may we defeat our formidable enemies who think themselves unconquerable. Verily you are our protector and promoter of our prosperity. May we have your support in obtaining food, strength and long life. 5

179

Ascetic's wife :

Many years, many days and nights have passed. Dawns have come and gone. I have been intelligently working all this time. Now old age impairs the beauty of my youth. Better only strong men should approach their wives and make life fruitful. 1

The ancient sages truly obeyed the eternal laws of Nature and were honest to express their heartfelt feelings and respond to the natural urges. They did not keep the vow of absolute continence. Therefore, it is advisable that wives should be approached by strong men, and life be made fruitful. 2

न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव ।
जयावेदत्र शतनीथमाजिं यत्सम्यञ्चा मिथुनावभ्यजाव ॥३॥
नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित् ।
लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम् ॥४॥
इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे ।
यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥५॥
अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥६॥

ná mṛ́sha ṣrāntám yád ávanti devá víṣva ít spṛ́dho abhy àṣnavāva | jáyavéd átra ṣatánītham ājíṃ yát samyáñcā mithunáv abhy ájāva || 3 || nadásya mā rudhatáḥ káma ágann itá ájāto amútaḥ kútaṣ cit | lópāmudrā vṛ́shaṇam ní riṇāti dhíram ádhīrā dhayati ṣvasántam || 4 || imám nú sómam ántito hṛtsú pītám úpa bruve | yát sīm ágaṣ çakṛmá tát sú mṛḷatu pulukámo hí mártyaḥ || 5 || agástyaḥ khánamānaḥ khanítraiḥ prajám ápatyam bálam ichámānaḥ | ubhaú várṇāv ṛ́shir ugráḥ puposha satyá devéshv āṣísho jagāma || 6 ||

(१८०) अशीत्युत्तरशततमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । अश्विनौ देवते । त्रिष्टुप् छन्दः ॥

॥२३॥ युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत् ।
हिरण्यया वां पवयः प्रुषायन्मध्वः पिबन्ता उषसः सचेथे ॥१॥
युवमत्यस्याव नक्षथो यद्विपत्मनो नर्यस्य प्रयज्योः ।
स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे च ॥२॥

180.

Yuvó rájāṅsi suyámāso áṣvā rátho yád vām páry árṇāṅsi díyat | hiraṇyáyā vam paváyaḥ prushāyan mádhvaḥ píbantā ushásaḥ sacethe || 1 || yuvám átyasyáva nakshatho yád vípatmano náryasya práyajyoḥ | svásā yád vāṃ viṣvagurtí bhárāti vájāyéṭṭe madhupāv ishé ca || 2 ||

Ascetic :

No penance is practised in vain since the divine powers protect all. Ultimately natural forces prevail and win over unnatural restraints. If we exert ourselves together, we can triumph over hundreds of adversities. 3

Suppressed desires overwhelm the mind arising either from this cause or from that like an obstructed stream. Then the young impatient maiden, passions suppressed, approaches her husband under deep emotional stress. She approaches her ascetic husband, snoring in deep slumber. 4

I beseach the loving God seated in my heart, that He may fully expiate the sin, which might have been committed. After all, man is subject to many desires and natural urges. 5

The ascetic, a venerable sage, following the rightful course, works as if a farmer with implements in a field desiring progeny, offspring and strength, and practises both types of obligations (the one of household life and the other of austerity) and receives true benedictions from God and elders. 6

180

O twin lords of cosmic vitality and consciousness, when, round the cosmic sea of space your cosmic chariot proceeds to its desired quarters, your golden fellies scatter drops of moisture. May you, accepting our sweet devotional prayers participate in our sacred morning ceremonies. 1

Direct downwards the course of your cosmic chariot which is holy, swift-moving, multi-directional and friendly to men. May the adorable sister, the dawn, prepare for your welcome, and the institutor of the ceremony worship you for the sake of obtaining strength and food. 2

युवं पय उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः ।
अन्तर्यद्वनिनो वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान् ॥३॥
युवं ह घर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतमेषे ।
तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः ॥४॥
आ वां दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः ।
अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा ॥५॥

yuvám páya usríyāyām adhattam pakvám āmáyām áva pū́rvyaṃ góḥ | antár yád vaníno vām ṛitapsū hvāró ná śúcir yájate havíshmān || 3 || yuváṃ ha gharmáṃ mádhumantam átraye 'pó ná kshódo 'vṛiṇītam eshé | tád vāṃ narāv aśvinā páśvaïshṭī ráthyeva cakrā́ práti yanti mádhvaḥ || 4 || ā́ vāṃ dānā́ya vavṛitīya dasrā gór óheṇa taugryó ná jívriḥ | apáḥ kshoṇī́ sacate mā́hinā vāṃ jūrṇó vām ákshur áṅhaso yajatrā || 5 ||

॥२४॥

नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिम् ।
प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजम् ॥६॥
वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान् ।
अधा चिद्धि ष्माश्विनावनिन्द्या पाथो हि ष्मा वृषणावन्तिदेवम् ॥७॥
युवां चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ ।
अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः ॥८॥

ní yád yuvéthe niyútaḥ sudānū úpa svadhā́bhiḥ sṛijathaḥ púraṃdhim | préshad véshad vā́to ná sūrír ā́ mahé dade suvrató ná vā́jam || 6 || vayáṃ cid dhí vāṃ jaritā́raḥ satyā́ vipanyā́mahe ví paṇír hitā́vān | ádhā cid dhí shmā-śvināv anindyā pāthó hí shmā vṛishaṇāv ántidevam || 7 || yuváṃ cid dhí shmāśvināv ánu dyū́n vírudrasya prasrávaṇasya sātaú | agástyo narā́ṃ nṛíshu práśastaḥ kā́rādhunīva citayat sahásraiḥ || 8 ||

You have restored milk to the cow. You have matured the first raw milk in the udders of the milch cow. The devout and earnest devotee worships you, truth personified, with dedication. He is as vigilant in the midst of the ceremony, as a snake in the midst of a thicket. 3

You render the fierce heat soothing as sweet butter to the really detached person ; for the sake of relief, you invest it with the coolness of water, therefore, for you, O cosmic twins, inspirers of the sacred works, the fire-offering is made. The sweet expressions flow towards you like chariot-wheels (down a slope). 4

O destroyer of enemies, may I by means of my prayers bring you hither, to bestow upon me that aid, which you could give to the infirm son of the saviour. Your greatness compasses earth, heaven and ocean. May this, your aged worshipper, enjoy long sinless life. 5

O bounteous ones, when you come speedily with your yoked cosmic chariot, you replenish the earth with food. May this, your worshipper, be swift as the wind to propitiate and please you. Through your great favour may he, like a pious man, obtain plenty of food and become great. 6

We, your sincere adorers, verily praise you in various ways. Our heart, the container, is full with your devotion. O blameless cosmic twin powers, showerers of benefits, may you both freely participate in the sparkling glory of God. 7

O pair of cosmic vitality and consciousness, the steady-minded sage, eminent amongst the leaders of men, arouses you daily with numerous invocations, like a musical instrument with thousands of notes so that torrents of blessings may flow from you to him. 8

प्र यद्वहेथे महिना रथस्य प्र स्पन्द्रा याथो मनुषो न होता ।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥९॥
तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यम् ।
अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुम् ॥१०॥

prá yád váhethe mahiná ráthasya prá syandrá yatho mánusho ná hótā | dhattáṃ sūríbhya utá va svásvyaṃ násatya rayishácaḥ syama || 9 || táṃ vāṃ ráthaṃ vayáṃ adyá havema stómair aṣvina suvitáya návyam | árishṭanemim pári dyám iyānáṃ vi° || 10 ||

(१८१) एकाशीत्युत्तरशततमं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । अश्विनौ देवते । त्रिष्टुप् छन्दः ॥

॥२५॥ कदु प्रेष्ठाविषां रयीणामध्वर्यन्ता यदुन्निनीथो अपाम् ।
अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानाम् ॥१॥
आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः ।
मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु ॥२॥
आ वां रथोऽवनिर्न प्रवत्वान्त्सृप्रवन्धुरः सुविताय गम्याः ।
वृष्णः स्थातारा मनसो जवीयानहंपूर्वो यजतो धिष्ण्या यः ॥३॥

181.

Kád u préshṭāv ishám rayīṇám adhvaryánta yád unninīthó apám | ayáṃ vāṃ yajñó akṛita práṣastiṃ vásudhitī ávitārā janānām || 1 || á vāṃ áṣvāsaḥ ṣúcayaḥ payaspá vátarañhaso divyáso átyāḥ | manojúvo vṛíshaṇo vītápṛishṭhā éhá svarájo aṣvínā vahantu || 2 || á vāṃ rátho 'vánir ná pravátvān sṛiprávandhuraḥ suvitáya gamyāḥ | vṛíshṇa sthātārā mánaso jávīyān ahampūrvó yajató dhishṇyā yáḥ || 3 ||

When, by virtue of your cosmic chariot, you come quick to the place of worship and when, like the ministering priest, after discharging his function, you depart, gliding away, you give to the devout worshippers a reward, say, of vehicles or good horses. May we be rich, O ever-true cosmic twins, through your grace. 9

We invoke today, O pair of cosmic twin powers, with hymns for our welfare and invoke your praiseworthy cosmic chariot of undamaged wheels, while traversing the sky. May we obtain through you food, strength and long life. 10

181

O cosmic twin forces, bestower of protection and prosperity, we glorify you with our dedicated actions. O dearest twins, while coming to our place of worship when will you bring from the cosmic ocean, riches and nourishment? 1

O cosmic twin forces, may your celestial waves, pure, rain-drinking, swift as the tempest, heaven-born, quick-moving, rapid as thought, vigorous, well-backed and resplendent in its own light bring you hither. 2

O cosmic twin forces, firmly founded in your own station, may your cosmic chariot, which is strong, swift as mind, venerable, equipped with charming face, vast like earth, extensive, speedy, come near us for our welfare. 3

इहेह जाता समवावशीतामरेपसा तन्वा३ नामभिः स्वैः ।
जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे ॥४॥
प्र वां निचेरुः ककुहो वशाँ अनु पिशङ्गरूपः सदनानि गम्याः ।
हरी अन्यस्य पीपयन्त वाजैर्मथ्रा रजांस्यश्विना वि घोषैः ॥५॥

ihéha jātá sám avāvaṣītām arepásā tanvā̀ námabhiḥ svaíḥ | jishṇúr vām anyáḥ súmakhasya sūrír divó anyáḥ subhágaḥ putrá ūhe || 4 || prá vāṃ niceráḥ kakuhó váṣāñ ánu piṣáñgarūpaḥ sádanāni gamyāḥ | hárī anyásya pīpá-yanta vā́jair mathrá rájāṅsy aṣvinā ví ghóshaiḥ || 5 ||

॥२३॥ प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन् ।
एवैरन्यस्य पीपयन्त वाजैर्वेषन्तीरूर्ध्वा नद्यो न आगुः ॥६॥
असर्जि वां स्थविरा वेधसा गीर्बाळ्हे अश्विना त्रेधा क्षरन्ती ।
उपस्तुताववतं नाधमानं यामन्नयामञ्छृणुतं हवं मे ॥७॥
उत स्या वां रुशतो वप्ससो गीस्त्रिबर्हिषि सदसि पिन्वते नॄन् ।
वृषा वां मेघो वृषणा पीपाय गोर्न सेके मनुषो दशस्यन् ॥८॥
युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हविष्मान् ।
हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुम् ॥९॥

prá vāṃ ṣarádvān vrishabhó ná nishshā́ṭ pūrvī́r íshaṣ carati mádhva ishṇán | évair anyásya pīpáyanta vā́jair véshantīr ūrdhvā́ nadyò na ā́guḥ || 6 || ásarji vāṃ sthávirā vedhasā gī́r bāḻhé aṣvinā tredhā́ kshárantī | úpastutāv avatam nā́dhamānam yā́mann áyāmañ chriṇutam hávam me || 7 || utá syā́ vāṃ rúṣato vápsaso gī́s tribarhíshi sádasi pinvate nṝ́n | vríshā vām meghó vrishaṇā pīpāya gór ná séke mánusho daṣasyán || 8 || yuvā́m pūshévāṣvinā púraṃdhir agním ushā́ṃ ná jarate havíshmān | huvé yád vāṃ varivasyā́ griṇānó vi° || 9 ||

You have been glorified together, as faultless by your many famous names. One of you is victorious son of inter-space and promoter of dedicated sacred actions; the other, the auspicious offspring of cosmic stellar regions. Both of you thus uphold the entire cosmos. 4

O twin forces, may down-gliding, exalted golden coloured space-chariot of one of you, traversing at will the quarters of space, come to promote our dedicated actions; and may our men supply to the motor engines of the other the fuel and the twins shall stir the regions with roars. 5

One of you is eternal disperser of the clouds like the sun, the annihilator of foes, acceptor of devotion and bearer of numerous nourishments. The other controls the vigorous, extensive and upward going streams, capable of providing nourishments. Let these streams of favour come swelling to us. 6

O cosmic twins, hymns of devotional songs flow across three paths to secure your steady favour. May you protect him, whosoever solicits your favour and whether moving or stationary. May you hear his invocation. 7

This praise of your resplendent forms is uttered in the hall of worship, where three-fold dedication is offered. O mighty showerers of benefits, may the swollen rain-cloud, proceeding to man, nourish him like a sprinkling of cow's milk. 8

Like nourisher, the wise offerer of oblations praises you, O cosmic twin divines, as he would praise supreme God and the dawn. I am invoking you with devotion. May you help us in obtaining food, strength and long life. 9

(१८२) द्व्यशीत्युत्तरशततमं सूक्तम्

(१–८) अष्टर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । अश्विनौ देवते । (१–५, ७) प्रथमादिपञ्चर्चां सप्तम्याश्च जगती, (६, ८) षष्ठ्यष्टम्योश्च त्रिष्टुप् छन्दसी ॥

अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः ।
धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता ॥१॥
इन्द्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा ।
पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विना ॥२॥
किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते ।
अति क्रमिष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे ॥३॥

182.

Ábhūd idáṃ vayúnam ó shú bhūshatā rátho vríshaṇvān mádatā manīshiṇaḥ | dhiyaṃjinvá dhíshṇyā viṣpálāvasū divó nápatā sukríte ṣúcivratā || 1 || índratamā hí dhíshṇyā marúttamā dasrá dáṅsishṭhā rathyà rathítamā | pūrṇáṃ rátham vahethe mádhva ácitaṃ téna dāṣváṅsam úpa yātho aṣvinā || 2 || kím átra dasrā kriṇuthaḥ kím āsāthe jáno yáḥ káṣ cid áhavir mahīyáte | áti kramishṭaṃ jurátam paṇér ásuṃ jyótir víprāya kriṇutaṃ vacasyáve || 3 ||

जम्भयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना ।
वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥४॥
युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्र्याय कम् ।
येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥५॥

jambháyatam abhíto ráyataḥ ṣúno hatám mrídho vidáthus tány aṣvinā | vácaṃ-vācaṃ jaritú ratnínīṃ kritam ubhá ṣáṅsaṃ nāsatyāvatam máma || 4 || yuvám etáṃ cakrathuḥ síndhushu plavám ātmanvántam pakshíṇaṃ taugryáya kám | yéna devatrá mánasā nirūháthuḥ supaptanī́ petathuḥ kshódaso maháḥ || 5 ||

182

O wise learned men, the information has been received; be ready with your praises, for the benefit-showering cosmic chariot of the twin divines has appeared. Rejoice and be ready to welcome them, For they are abiders of benevolent laws. They are sustainers of the cosmos, beneficent to mankind and giver of wisdom to the performer of noble deeds. 1

O foe-destroyer twin divines, in truth you are most imperial like resplendent Lord, and vital like wind. You are most active; you are indeed eminent riders and most distinguished charioteers. You drive a cosmic chariot, fully heaped up with ambrosia. May you come with that chariot to the dedicated worshipper. 2

O destroyer of evils, mighty cosmic twin divines, what do you do here ? Why do you linger for a man who makes no oblation, still honoured ? Pass over him; take away the life of the miser; grant light to the pious man who is eloquent in your praises. 3

O holder of eternal seed of life, annihilate them on every side who bark at us like dogs ; slay our enemies ; you know them well. Give reward and excellent wealth to the poet for the praises he offers you. Accept, O truth-abiding twins, my devotional praises. 4

You construct, amid the flood water, that animated ship with wings to fly for the saviour of the pious, whereupon, with God-devoted mind, you bear him up and quickly descending from the cosmos, you make a path for him out of the mighty surge. 5

॥२८॥ अवविद्धं तौग्र्यमप्स्व१न्तरनारम्भणे तमसि प्रविद्धम् ।
चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति ॥६॥
कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत् ।
पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कम् ॥७॥
तद्वां नरा नासत्यावनु ष्याद्यद्वां मानास उचथमवोचन् ।
अस्मादद्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुम् ॥८॥

ávaviddham taugryám apsv àntár anārambhaṇé támasi práviddham | cátasro nā́vo jáṭhalasya júshṭā úd aṣvíbhyām ishitā́ḥ pārayanti || 6 || káḥ svid vriksó níshṭhito mádhye árṇaso yáṃ taugryó nādhitáḥ paryáshasvajat | parṇā́ mrigásya patáror ivārábha úd aṣvinā ūhathuḥ ṣrómatāya kám || 7 || tád vāṃ narā nāsatyāv ánu shyād yád vām mā́nāsa ucátham ávocan | asmā́d adyá sádasaḥ somyā́d ā́ vi⁰ || 8 ||

(१८३) त्र्यशीत्युत्तरशततमं सूक्तम्

(१–६) षडृचस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । अश्विनौ देवते । त्रिष्टुप् छन्दः ॥

॥३०॥ तं युञ्जाथां मनसो यो जवीयान्त्रिवन्धुरो वृषणा यस्त्रिचक्रः ।
येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः ॥१॥
सुवृद्रथो वर्तते यन्नभि क्षां यत्तिष्ठथः क्रतुमन्तानु पृक्षे ।
वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचेथे ॥२॥
आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान् ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥३॥

183.

Táṃ yuñjāthām mánaso yó jávīyān trivandhuró vrishaṇa yás tricakráḥ | yénopayātháḥ sukríto duroṇáṃ tridhā́tunā patatho vír ná parṇaíḥ || 1 || suvríd rátho vartate yánn abhí kshā́ṃ yát tíshṭhathaḥ krátumantā́nu prikshé | vápur vapushyā́ sacatām iyáṃ gír divó duhitróshásā sacethe || 2 || ā́ tishṭhataṃ suvrítaṃ yó rátho vām ánu vratā́ni vártate havíshmān | yéna narā nāsatyeshayádhyai vartír yātháḥ tánayāya tmáne ca || 3 ||

Four ships move into the midst of the floods, sent by the cosmic twin divines. They bring safe to shore the son of the saviour. He is cast headlong into the flood by his foes, and plunges into the thick inevitable darkness. 6

What tree or cosmic chariot is that which stands fixed in the surrounding cosmic ocean, and to which the supplicating son of saviour clings? O cosmic twin-divines, as twigs are caught hold of for support by a falling creature, you bear him up to safety. 7

May this hymn, which your devout adorers utter, be acceptable to you, O ever-true cosmic twin divines. May you today, in this sacred place of worship help in obtaining food, strength and long life. 8

183

O showerers of benefits, make ready that cosmic vehicle which has triple seat, three wheels and is as quick as thought. With this vehicle, embellished with three elements, you come to the dwelling of the pious worshipper. With this you fly like a bird with wings. 1

Full of action, you mount this easy-rolling cosmic vehicle alighting upon the earth for the sake of sacrificial food. May this melodious hymn delight you and promote your well-being; and as you travel, may you unite with the dawn, the damsel of the cosmic region. 2

O ever-true cosmic leaders, ascend your easy-rolling cosmic chariot, filled with sacred offerings. This vehicle takes you both, to carry out your assigned work. Mounted on this you come into the house of the worshipper, to encourage him and his children to proceed to the place of worship. 3

मा वां वृको मा वृकीरा दधर्षीन्मा परि वर्क्तमुत माति धक्तम् ।
अयं वां भागो निहित इयं गीर्दस्राविमे वां निधयो मधूनाम् ॥४॥
युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा हवतेऽवसे हविष्मान् ।
दिशं न दिष्टामृजूयेव यन्ता मे हवं नासत्योप यातम् ॥५॥
अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥६॥

má vām vṛíko má vṛikír á dadharshīn má pári varktam utá máti dhaktam | ayám vām bhāgó níhita iyám gír dásrāv imé vām nidháyo mádhūnām || 4 || yuvám gótamaḥ purumīḷhó átrir dásrā hávate 'vase havíshmān | díśam ná dishṭám ṛijūyéva yántā me hávam nāsatyópa yatam || 5 || átārishma támasas pārám asyá práti vām stómo aśvināv adhāyi | éhá yātam pathíbhir devayánair vi° || 6 ||

(१८४) चतुरशीत्युत्तरशततमं सूक्तम्

(१-६) षड्ऋचस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । अश्विनौ देवते । त्रिष्टुप् छन्दः ॥

॥१॥ ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः ।
नासत्या कुह चित्सन्तावर्यो दिवो नपाता सुदास्तराय ॥१॥
अस्मे ऊ षु वृषणा मादयेथामुत्पणीँर्हतमूर्म्या मदन्ता ।
श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥२॥
श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।
वच्यन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥३॥

184.

Tá vām adyá táv aparám huvemochántyām ushási váhnir ukthaíḥ | násatyā kúha cit sántāv aryó divó nápātā sudástarāya || 1 || asmé ū shú vṛishaṇā mādayethām út paṇīṁr hatam ūrmyá mádanta | śrutám me áchoktibhir matīnám éshṭā narā níċetāra ca kárṇaiḥ || 2 || śriyé pūshann ishukríteva devá násatyā vahatúm sūryáyāḥ | vacyánte vām kakuhá apsú jātá yugá jūrṇéva váruṇasya bhúreḥ || 3 ||

May I be safe in your protection; may you not torment me, nor deliver me to some one else. O destroyer of evils, here is your share of offering; here is a praise for you. The treasure of sweet devotional prayers is for you alone. 4

O true and sweet cosmic forces, persons of eminent intelligence, full of bliss and ever moving, invoke both of you with offerings for protection. May you come to them like one who goes straight by an easy path to the assigned destination. 5

O ever-true cosmic twin-divines, we have crossed the region of this darkness. Our praises have been addressed to you. Come hither by the paths which other divine forces have travelled. May you help us in obtaining food, strength and long life. 6

184

O ever-true cosmic twin-divines, we invoke you both this day as on any other day, when the priest has kindled the fire and is singing hymns at the break of dawn, the dispeller of darkness. O twin-divines wheresoever you be, come here for the benefit of the benevolent worshipper. 1

O brave cosmic twin-divines, may you be delighted by our constant chant of sweet expressions of devotion and destroy the unfaithful misers who do not offer homage. May you graciously hear with your own ears, my pious praises, as you favour the true devotee and retain his prayers. 2

O bounteous nourisher, cosmic twin-divines, in whom is no untruth, you carry dawn, an offspring of the sun, for glory and go straight like an arrow. Your giant steeds move on, today as in the ages past, sprung from the cosmic ocean of the mighty venerable Lord. 3

अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः ।
अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥४॥
एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति ।
यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥५॥
अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥६॥

asmé sá vām mādhvī rātír astu stómaṃ hinotam mānyásya karóḥ | ánu yád vāṃ ṣravasyā sudanū suvíryāya carshaṇáyo mádanti || 4 || eshá vāṃ stómo aṣvināv akari mánebhir maghavāna suvṛiktí | yātáṃ vartis tánayāya tmáne cāgástye nāsatyā mádantā || 5 || átarishma — || 6 || 1 ||

(१८५) पञ्चाशीत्युत्तरशततमं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । द्यावापृथिव्यौ देवते । त्रिष्टुप् छन्दः ॥

॥२॥ कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥१॥
भूरिं द्वे अचरन्ती चरन्तं पद्वन्तं गर्भमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥२॥
अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ।
तद्रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥३॥

185.

Katarā́ pū́rvā katarā́parāyóḥ kathā́ jāté kavayaḥ kó ví veda | víṣvaṃ tmánā bibhṛito yád dha nā́ma ví vartete áhanī cakríyeva || 1 || bhū́rim dvé ácarantī cárantam padvántaṃ gárbham apádī dadhāte | nítyaṃ ná sūnúm pitrór upásthe dyā́vā rákshatam pṛithivī no ábhvāt || 2 || anehó dātrám áditer anarvám huvé svàrvad avadhám námasvat | tád rodasī janayataṃ jaritré dyā́vā — || 3 ||

O cherishers of sweet devotions and bounteous cosmic twin forces, may your grace be with us. May you be pleased with the hymns sung by earnest and active devotees. May we all be joyful in your glorious realm and obey your commands to secure fame and renown. 4

O bounteous ever-true lords of cosmic vitality and conciousness, this hymn is recited with respect and regards. Therefore, please do come to our house and be favourable to the sages of mature wisdom and bless them and their children. 5

We have crossed the sea of this darkness, O lords of cosmic light and vitality. This hymn is addressed to you; come hither along the paths by which all the Nature's forces have travelled. May we find strengthening food in abundance. 6

185

Which of these two (heaven and earth) is elder and which is younger, and how are they born, who knows, O sages ? Both of you independently support the entire universe, and day and night revolve very much like wheels. 1

These two heaven and earth, though apparently motionless and footless, sustain creatures moving and footed. As a son is nursed on the lap of his parents, similarly, O heaven and earth, defend us from perils and miseries. 2

I solicit the unrivalled bounty of the sun which is perfect, celestial, deathless and exempt from any kind of harm. May heaven and earth produce this wealth for him who adores them. O heaven and earth, defend us from perils and miseries. 3

अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे ।
उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥४॥
संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे ।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥५॥

átapyamāne áva-sávantī ánu shyāma ródasī deváputre | ubhé devā́nām ubháyebhir áhnāṃ dyā́vā — || 4 || saṃgáchamāne yuvatī́ sámante svásārā jāmí pitrór upásthe | abhijíghrantī bhúvanasya nā́bhiṃ dyā́vā — || 5 ||

॥३॥

उर्वी सद्मनी बृहती ऋतेनं हुवे देवानामवसा जनित्री ।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ॥६॥
उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥७॥
देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा ।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥८॥
उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम् ।
भूरि चिदर्यः सुदास्तरायेषा मदन्त इषयेम देवाः ॥९॥

urvī́ sádmanī bṛihatī́ ṛiténa huvé devā́nām ávasā jánitrī | dadhā́te yé amṛítaṃ suprátīke dyā́vā — || 6 || urvī́ pṛithvī́ bahulé dūréante úpa bruve námasā yajñé asmín | dadhā́te yé subháge suprátūrtī dyā́vā — || 7 || devā́n vā yác cakṛimá kác cid ā́gaḥ sákhāyaṃ vā sádam íj jā́spatiṃ vā | iyáṃ dhī́r bhūyā avayā́nam eshāṃ dyā́vā — || 8 || ubhā́ ṣáṅsā náryā mā́m avishṭām ubhé mā́m ūtī́ ávasā sacetām | bhū́ri cid aryáḥ sudā́starāyeshā́ mádanta ishayema devā́ḥ || 9 ||

The heaven and earth are the source of natural forces, are not subject to annoyance, and satisfy all beings with food. May we live in harmony with them all the days and nights. O heaven and earth, defend us from perils and miseries. 4

Going always together, young and of the same limits, these twin sisters exist as if lying in their parents' bosom, kissing the navel of the world together. O heaven and earth, defend us from perils and miseries. 5

I invoke these two, heaven and earth, who are beautiful to look on, who sustain ambrosial showers, who are vast and mighty and the progenitor (of rain and corn), for the protection of enlightened devotees. O heaven and earth, defend us from peril and miseries. 6

O heaven and earth, splendid, extensive of varied forms, bounteous, all-sustaining, and of limitless bounds, I address you with this hymn of praise; O heaven and earth defend us from perils and miseries. 7

Whatever sin or offence we may have at any time committed against Nature's forces, against our friends, or against the Lord of the universe, thereof may this hymn be expiation. O heaven and earth, defend us from perils and miseries. 8

May both these blessed benefactors of mankind preserve me. May heaven and earth equip me with all the means of protection. O divine forces, may we, while enjoying plenty of food, be blessed with wealth for liberal charity. 9

ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथमं सुमेधाः ।
पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिः ॥१०॥
इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।
भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥११॥

ṛitáṃ divé tád avocam pṛithivyá́ abhiṣrāvá́ya prathamáṃ sumedhá́ḥ | pātám avadyá́d duritá́d abhíke pitá́ mātá́ ca rakshatām ávobhiḥ || 10 || idáṃ dyāvāpṛithivī satyám astu pítar má́tar yád ihópabruvé vām | bhūtáṃ devá́nām avamé ávobhir vidyá́° || 11 ||

(१८६) षडशीत्युत्तरशततमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य मैत्रावरुणिरगस्त्य ऋषिः । विश्वे देवा देवताः । त्रिष्टुप् छन्दः ॥

॥४॥ आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥१॥
आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।
भुवन्यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शवः ॥२॥
प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः ।
असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ॥३॥

186.

Á na íḷabhir vidáthe suṣastí viṣvánaraḥ savitá́ devá́ etu | ápi yáthā yuvāno mátsathā no víṣvaṃ jágad abhipitvé manīshá́ || 1 || á́ no víṣva á́skrā gamantu devá́ mitró aryamá́ váruṇaḥ sajóshāḥ | bhúvan yáthā no víṣve vṛidhásaḥ káran susháhā vithuráṃ ná ṣávaḥ || 2 || préshṭhaṃ vo átithiṃ gṛiṇīshe 'gníṃ ṣastíbhis turváṇiḥ sajóshāḥ | ásad yáthā no váruṇaḥ sukīrtír íshaṣ ca parshad arigūrtáḥ sūríḥ || 3 ||

Endowed with understanding, I have recited this excellent hymn to you, O heaven and earth, to be heard around. May father, the heaven and mother, the earth, preserve us from reprehensible iniquity and be always close to us to offer protection. 10

May this my prayer, which I address to you, be fulfilled, O earth and heaven—father and mother. May you always be ready with your protection in the proximity of those who praise you. May you help us in obtaining food, strength and long life. 11

Your two horses (yoked to the sun)—mental and vital faculties in the body complex—with all their vigour have announced the rain of forth-coming virtuous thoughts. The level earth,—physical personality—anxiously expects the fall of the rain, as the gathering cloud passes by. 7

The rain cloud, over conscious of its functions is settled down, resonating with the maternal waters, it has spread wide. The winds augmenting the sound in distant horizon, have promulgated the inner voice of the resplendent self. 8

The powerful resplendent self strikes down the dark evil forces who lay across the river of virtuous thoughts. At that time vital and mental faculties of the human body tremble through fear of the roaring adamantine will power of the soul. 9

The adamantine will of the benevolent resplendent soul voices its strength to strike down the hostile forces of evil, concealed in the sense organs. Having realized the spiritual bliss, the soul overthrows the wickedness of the dark forces of evil. 10

॥५॥ पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥११॥
त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥१२॥
स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥१३॥

píbā-pibéd indra ṣūra sómam mándantu tvā mandínaḥ sutā́saḥ | priṇántas te kukshī́ vardhayantv itthā́ sutáḥ paurá índram āva || 11 || tvé indrā́py abhūma víprā dhíyaṃ vanema ṛitayā́ ṡápantaḥ | avasyávo dhīmahi práṣastiṃ sadyás te rāyó dāváne syāma || 12 || syā́ma té ta indra yé ta ūtí avasyáva ū́rjaṃ vardháyantaḥ | ṣushmíntamaṃ yáṃ cākánāma devāsmé rayíṃ rāsi vīrávantam || 13 ||

रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् ॥१४॥
व्यन्त्विन्नु येषु मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र ।
अस्मान्त्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥१५॥
॥६॥ बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान् ।
स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिन्द्र वाजमग्मन् ॥१६॥

rā́si kshā́yaṃ rā́si mitrám asmé rā́si ṣárdha indra mā́rutaṃ naḥ | sajóshaso yé ca mandasānā́ḥ prá vāyávaḥ pānty ágraṇītim || 14 || vyántv ín nú yéshu mandasānás tṛipát sómam pahi drahyád indra | asmā́n sú pṛitsv ā́ tarutrā́vardhayo dyā́m bṛihádbhir arkaíḥ || 15 ||

bṛihánta ín nú yé te tarutrokthébhir vā sumnám āvívāsān | stṛiṇānā́so barhíḥ pastyā̀vat tvótā íd indra vā́jam agman || 16 ||

O resplendent self, may you drink and drink again the consummate spiritual bliss and may this joy invigorate you by inspiring the entire physical personality. Verily this consummate bliss would give full satisfaction of self-realization to the soul. 11

We the devotees fully belong to you, O resplendent soul. May we be able to receive your wisdom while engaged in performing noble deeds. Seeking your favour, may we be able to adopt your divine virtues. May we ever become worthy of the gift of your riches. 12

O resplendent self, may we, your faithful devotees, continue to appreciate more and more your glory. We are ever eager to have your protection; may you give us, O self, the coveted, most inspiring wisdom and brave sons. 13

May you give us comfortable homes and sincere friends. Grant us the assertive strong vitality to share your spiritual joy, and may the vital breaths experience the benign bliss. 14

O resplendent self, on the occasions of such sacred acts as you have most appreciated and on the occasions of struggle of life, may you enjoy the satiating nectar. Also may your devotees and prayers associate themselves in this enjoyment. O liberator, may you in association with other vital elements augment our prosperity and make us worthy of your enlightenment. 15

Great indeed become they who seek to win your favour through holy hymns, O liberator from evils. They open out their affectionate hearts in your devotion, and are blessed by your protection. They verily acquire special benefits of home and sustenance from you. 16

उ॒ग्रेष्वि॒न्नु शू॑र मन्दसा॒नस्त्रिक॑द्रुकेषु पाहि॒ सोम॑मिन्द्र ।
प्र॒दोधु॑व॒च्छ्मश्रु॑षु प्रीणा॒नो या॒हि हरि॑भ्यां सु॒तस्य॑ पी॒तिम् ॥१७॥

ugréshv ín nú ṣūra mandasānás tríkadrukeshu pāhi sómam indra | pradódhuvac chmáṣrushu prīṇānó yāhí háribhyām sutásya pītím || 17 ||

धि॒ष्वा शवः॑ शूर॒ येन॑ वृ॒त्रम॒वाभि॑न॒द्दानु॑मौर्णवा॒भम् ।
अपा॑वृणो॒र्ज्योति॒॑रार्या॑य॒ नि स॑व्य॒तः सा॑दि॒ दस्यु॑रिन्द्र ॥१८॥

dhishvá ṣávaḥ ṣūra yéna vṛitrám avábhinad dánum aurṇavābhám | ápāvṛiṇor jyótir áryāya ní savyatáḥ sādi dásyur indra || 18 ||

सने॑म॒ ये त॑ ऊ॒तिभि॒स्तर॑न्तो॒ विश्वाः॒ स्पृध॒ आर्ये॑ण॒ दस्यू॑न् ।
अ॒स्मभ्यं॒ तत्त्वा॒ष्ट्रं वि॒श्वरू॑प॒मर॑न्धयः सा॒ख्यस्य॑ त्रि॒ताय॑ ॥१९॥

sánema yé ta ūtíbhis táranto víṣvā spṛídha áryeṇa dásyūn | asmábhyam tát tvāshṭrám viṣvárūpam árandhayaḥ sākhyásya tritáya || 19 ||

अ॒स्य सु॑वा॒नस्य॑ म॒न्दिन॑स्त्रि॒तस्य॒ न्यर्बु॑दं वावृधा॒नो अ॑स्तः ।
अव॑र्तय॒त्सूर्यो॒ न च॒क्रं भि॒नद्व॒लमिन्द्रो॒ अङ्गि॑रस्वान् ॥२०॥
नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यदि॑न्द्र॒ दक्षि॑णा म॒घोनी॑ ।
शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग्भगो॑ नो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ ॥२१॥

asyá suvānásya mandínas tritásya ny árbudam vāvṛidhānó astaḥ | ávartayat sūryo ná cakrám bhinád valám índro áṅgirasvān || 20 || nūnám sá te práti váram jaritré duhīyád indra dákshiṇā maghónī | ṣíkshā stotṛíbhyo máti dhag bhágo no bṛihád vadema v. s. || 21 ||

Exulted by the spell of spiritual ecstasy, may you, O resplendent self, further relish the nectar through three realms—physical, mental, and spiritual. May you enjoy the bliss with the satisfaction of smiles on your face, and with your vigour in vital organs and be delighted. 17

May you put in yourself once more, O resplendent self, the same strength by which you strike down the devilish evil, the coverer of enlightenment, who extends its web of influence like a spider. May you restore the light of wisdom to the men of truth and faith, so that the infidel is finally crushed by you. 18

May we honour those men who, through your help, surpass all their rivals, as the infidels surpassed by men of truth and faith. This you have done for us. You have subdued the variegated types of passions, born out of the creative mind, through the friendship and control of the triple realm (physical, vital and mental). 19

The divine soul, has cast down the demon of ego, the enemy of the triple realm (physical, vital and mental) having realized the spiritual bliss. In order to kill the devil of pride, it aided with the life-essence, wields his adamantine determination as the sun whirls round his wheels. 20

May your liberality in granting wisdom be shown to your singer. May you bestow vitality to your worshippers. May you not keep us out of reward. May we sing your glory loudly at this sacred assembly and be blessed with worthy descendants. 21

[अथ द्वितीयोऽनुवाकः ॥] (१२) द्वादशं सूक्तम्

(१–१५) पञ्चदशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥७॥ यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥१॥
यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ॥२॥

12.

Yó jātá evá prathamó mánasvān devó devā́n krátunā paryábhūshat | yásya śúshmād ródasī ábhyasetām nṛimṇásya mahnā́ sá janāsa índraḥ || 1 || yáḥ pṛithivī́m vyáthamānām ádṛiṅhad yáḥ párvatān prákupitāñ áramṇāt | yó antárikshaṃ vimamé várīyo yó dyā́m ástabhnāt sá janāsa índraḥ || 2 ||

यो हत्वाहिमरिणात्सप्त सिन्धून्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक्समत्सु स जनास इन्द्रः ॥३॥
येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्रः ॥४॥

yó hatvā́him áriṇāt saptá síndhūn yó gā́ udā́jad apadhā́ valásya | yó áśmanor antár agníṃ jajā́na saṃvṛík samátsu s. j. í. || 3 || yénemā́ víśvā cyávanā kṛitā́ni yó dā́saṃ várṇam ádharaṃ gúhākaḥ | śvaghnī́va yó jigīvā́ñ lakshám ā́dad aryáḥ pushṭā́ni s. j. í. || 4 ||

यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥५॥

yáṃ smā pṛichánti kúha séti ghorám utém āhur naíshó astī́ty enam | só aryáḥ pushṭī́r víja ivā́ mināti śrád asmai dhatta s. j. í. || 5 ||

12

O men, it is the resplendent self, the foremost, who, as soon as it is born excels other divine faculties with its power and under its submission, the dual complex of body and mind functions, owing to the supremacy of its strength. 1

O men, it is the resplendent self who makes the trembling earth, i.e. the body physique, firm; who tranquillizes the agitated senses, who measures out the mid vital region and keeps the celestial mental realm upright. 2

O men, there is another, the supreme resplendent Lord who having destroyed the evil forces, has set free the seven channels of virtues, who has restored wisdom concealed in dark caves of ignorance, who manifests the fire-energy hidden between the rocks and who is invincible in battle. 3

O men, He is the resplendent Lord by whom all this fast revolving universe has been created, who drives away to oblivion the dark devil forces and who snatches off the riches of the malicious like a hunter striking his prey. 4

O men, He is the resplendent Lord, the one whom all fear. They inquire "Where is he ?" They say "He is not (at any one particular place.)" He takes away the inimical tendencies of the senses like a hunting bird. O men, have faith in Him. 5

॥८॥ यो र॒ध्रस्य॑ चोदि॒ता यः कृ॒शस्य॒ यो ब्र॒ह्मणो॒ नाध॑मानस्य की॒रेः ।
यु॒क्तग्रा॑व्णो॒ यो॑ऽवि॒ता सु॑शि॒प्रः सु॒तसो॑मस्य॒ स ज॑नास॒ इन्द्रः॑ ॥६॥
यस्याश्वा॑सः प्र॒दिशि॒ यस्य॒ गावो॒ यस्य॒ ग्रामा॒ यस्य॒ विश्वे॒ रथा॑सः ।
यः सूर्यं॒ य उ॒षसं॑ ज॒जान॒ यो अ॒पां ने॒ता स ज॑नास॒ इन्द्रः॑ ॥७॥
यं क्रन्द॑सी सं॒यती॑ वि॒ह्वये॑ते॒ परेऽव॑र उ॒भया॑ अ॒मित्राः॑ ।
स॒मा॒नं चि॒द्रथ॑मातस्थि॒वांसा॒ नाना॑ हवेते॒ स ज॑नास॒ इन्द्रः॑ ॥८॥
यस्मा॒न्न ऋ॒ते वि॒जय॑न्ते॒ जना॑सो॒ यं युध्य॑माना॒ अव॑से॒ हव॑न्ते ।
यो विश्व॑स्य प्रति॒मानं॑ ब॒भूव॒ यो अ॑च्युत॒च्युत्स ज॑नास॒ इन्द्रः॑ ॥९॥
यः शश्व॑तो॒ मह्येनो॒ दधा॑ना॒नम॑न्यमाना॒ञ्छर्वा॑ ज॒घान॑ ।
यः शर्ध॑ते॒ नानु॒ददा॑ति शृ॒ध्यां यो दस्यो॑र्ह॒न्ता स ज॑नास॒ इन्द्रः॑ ॥१०॥

yó radhrásya coditā́ yáḥ kṛiśásya yó brahmáṇo nā́dhamānasya kīréḥ | yuktágrāvṇo yó 'vitā́ suśipráḥ sutásomasya s. j. í. || 6 || yásyā́śvāsaḥ pradíśi yásya gā́vo yásya grā́mā yásya víśve ráthāsaḥ | yáḥ sū́ryam yá ushásam jajā́na yó apā́m netā́ s. j. í. || 7 || yám krándasī samyatī́ vihváyete páre 'vara ubháyā amítrāḥ | samānám cid rátham ātasthivā́ṅsā nā́nā havete s. j. í. || 8 || yásmān ná ṛité vijáyante jánāso yám yúdhyamānā ávase hávante | yó víśvasya pratimā́nam babhū́va yó acyutacyút s. j. í. || 9 || yáḥ śáśvato máhy éno dádhānān ámanyamānāñ chárvā jaghā́na | yáḥ śárdhate nā́nudádāti śṛidhyā́m yó dásyor hantā́ s. j. í. || 10 ||

॥९॥ यः शम्ब॑रं॒ पर्व॑तेषु क्षि॒यन्तं॑ चत्वारिं॒श्यां श॒रद्य॒न्ववि॑न्दत् ।
ओ॒जा॒यमा॑नं॒ यो अहिं॑ ज॒घान॒ दानुं॒ शया॑नं॒ स ज॑नास॒ इन्द्रः॑ ॥११॥

yáḥ śámbaram párvateshu kshiyántam catvāriṅśyā́m śarády anvávindat | ojāyámānam yó áhim jaghā́na dā́num śáyānam s. j. í. || 11 ||

O men, He is the resplendent Lord, who is the inspirer of the rich and poor, and of the priest who recites His praise and is a suppliant. He is charming, and defender of him who initiates worships and constantly sings devotional songs for Him. 6

O men, He is the resplendent Lord who has a control over horses and cows, villages and all chariots, brings forth the sun and the dawn, and who orders the waters to flow. 7

O men, He is the resplendent Lord who is invoked both by heaven and earth, both by enemies and friends even whilst encountering with each other, and also by two persons, sitting on the same chariot. 8

O men, He is the resplendent Lord, without whose blessings no man can conquer, and whom the fighters invoke for protection. He is more than a match, or prototype for everyone and He moves even the immovable. 9

O men, He is the resplendent Lord, who destroys with His punitive justice the infidels and who pays Him no homage, and is crual towards innocent, and virtuous. He does not grant success to the arrogant and is the slayer of the vicious persons. 10

O men, He is the resplendent, who finds out the arrogant clouds of devilish tendencies concealed in the dark rocks of sin for long forty autumns. He destroys the sleeping venomous serpent born of evils, growing in strength and blocking the way of the flow of divine light. (The *resplendent* here in this verse may also be the sun who ultimately wins over the clouds, thickly wide-spread for forty days). 11

यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ॥१२॥
द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः ॥१३॥
यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥१४॥
यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥१५॥

yáḥ saptáraṣmir vṛishabhás túvishmān avásṛijat sártave saptá síndhūn | yó rauhiṇám ásphurad vájrabāhur dyám āróhantam s. j. í. || 12 || dyávā cid asmai pṛithiví namete ṣúshmāc cid asya párvatā bhayante | yáḥ somapā́ nicitó vájrabāhur yó vájrahastaḥ s. j. í. || 13 || yáḥ sunvántam ávati yáḥ pácantam yáḥ ṣáṅsantam yáḥ ṣaṣamānám ūtí | yásya bráhma várdhanam yásya sómo yásyedám rā́dhaḥ s. j. í. || 14 || yáḥ sunvaté pácate dudhrá ā́ cid vā́jam dárdarshi sá kílāsi satyáḥ | vayám ta indra viṣváha priyā́saḥ suvī́rāso vidátham ā́ vadema || 15 ||

(१३) त्रयोदशं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । (१-१२) प्रथमादि-द्वादशर्चां जगती. (१३) त्रयोदश्याश्च त्रिष्टुप् छन्दसी ॥

॥१०॥ ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते ।
तदाहना अभवत्पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यम् ॥१॥

13.

Ritúr jánitrī tásyā apás pári makshū́ jātá ā́viṣad yā́su várdhate | tád āhanā́ abhavat pipyúshī páyo 'ṅṣóḥ pīyū́sham prathamám tád ukthyàm || 1 ||

O men, He is the resplendent, who with His majestic strength controls with seven reins and sends down the seven streams of light to flow forth. He with the bolt in His arms invigorates the ascending clouds. 12

O men, He is the resplendent Lord, before whom bend all the powers of celestial and terrestrial regions. He is widely known as the cherisher of all benevolent thoughts and deeds bearing the bolt of punitive justice in His hands. 13

O men, He is the resplendent Lord, who with His help favours a devotee who repeatedly sings devotional prayers, performs benevolent acts, and verily toils for the Lord. He is the one whom the devotional prayers and our benevolent deeds exhilarate. 14

O resplendent Lord, you indeed are difficult to approach, and a true benefactor, and bestower of sustenance on him who offers the libations of selfless acts in life, and who ripens his devotion to you. May we always be dear to you and sing a hymn in the congregational hall of worship and be endowed with brave posterity. 15

13

The rainy season is the mother of nectar, which as soon as born of her, enters into the waters. The mother cherishes this nectar, the first essence of it, and hence all praises to it. 1

सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम् ।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥२॥
अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते ।
विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥३॥

sadhrím ā́ yanti pári bíbhratīḥ páyo viṣvápsnyāya prá bharanta bhójanam | samānó ádhvā pravátām anushyáde yás tā́kriṇoḥ prathamáṃ sā́sy ukthyàḥ || 2 || ánv éko vadati yád dádāti tád rūpā́ minán tádapā éka īyate | víṣvā ékasya vinúdas titikshate yás tā́kṛi⁰ || 3 ||

प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥४॥
अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः ।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः ॥५॥

prajā́bhyaḥ pushṭíṃ vibhájanta āsate rayím iva prishṭhám prabhávantam āyaté | ásinvan dáṅshṭraiḥ pitúr atti bhójanaṃ yás tā́kṛi⁰ || 4 || ádhākṛiṇoḥ pṛithivíṃ saṃdṛíṣe divé yó dhautīnā́m ahihann ā́riṇak patháḥ | táṃ tvā stómebhir udábhir ná vājínaṃ deváṃ devā́ ajanan sā́sy ukthyàḥ || 5 ||

॥११॥ यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ ।
स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ॥६॥

yó bhójanaṃ ca dáyase ca várdhanam ārdrā́d ā́ ṣúshkam mádhumad dudóhitha | sá ṣevadhíṃ ní dadhishe vivásvati víṣvasyaíka īṣishe sā́sy u. || 6 ||

The rivers flowing together bearing this nectar come from all around, and offer their waters to the sea, which are its food. The flow of all these channels is directed towards the same sea. O resplendent Lord, all this goes on according to your first assignment and hence all praises to you. 2

One worshipper speaks about that which he offers; another moves about, supervising the forms of oblations, the third one removes all the deficiences of the two. O resplendent Lord, this goes on according to your first assignment and hence all praises to you. 3

They (the house-holders) continue distributing nourishment to the people, whilst (the priests) offer ample and sustaining presents to the guest, the sacred fire, who relishingly masticates (and thus consumes) the food offered by the patron. O resplendent Lord, this goes on according to your first assignment and hence all praises to you. 4

Indeed you make the earth visible in the celestial region, you set open the paths of the on-rushing streams of virtues. O destroyer of the dragon of evils, the learned priests exalt you with sacred hymns as people offer water to a thirsty horse. O resplendent Lord, this goes on according to your first assignment and hence all praises to you. 5

You give food and prosperity to the worshipper and you milk out dry and sweet corn from the wet plants. You grant riches to the priest. You are the sole sovereign of the whole world. O resplendent Lord, this goes on according to your first assignment and hence all praises to you. 6

यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्य१वनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः ॥७॥
यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः ॥८॥

yáḥ pushpíṇīṣ ca prasvàṣ ca dhármaṇā́dhi dā́ne vy ávánīr ádhārayaḥ | yáṣ cā́samā ájano didyúto divá urúr ūrvā́ñ abhítaḥ s. u. || 7 || yó nārmarám saháwasum níhantave prikshā́ya ca dāsáveṣāya cā́vahaḥ | ūrjáyantyā áparivishṭam āsyàm utaívā́dyá purukrit s. u. || 8 ||

शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ ।
अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ॥९॥
विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः ॥१०॥

ṣatám vā yásya dáṣa sākám ā́dya ékasya ṣrushṭaú yád dha codám ā́vitha | arajjaú dásyūn sám unab dabhī́taye suprāvyò abhavaḥ s. u. || 9 || víṣvéd ánu rodhanā́ asya paúṃsyam dadúr asmai dadhiré kritnáve dhánam | sháḷ astabhnā vishṭíraḥ páñca saṃdríṣaḥ pári paró abhavaḥ s. u. || 10 ||

॥१२॥ सुप्रवाचनं तव वीर वीर्यं१ यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ॥११॥

supravācanáṃ táva vīra vīryàṃ yád ékena krátunā vindáse vásu | jātúshṭhirasya prá váyaḥ sáhasvato yá cakártha séndra víṣvāsy ukthyàḥ || 11 ||

You are the Lord who has by culture caused the flower and fruit plants to spread over the fields and also generated the various luminaries of the celestial region, and who has created the wide-stretched mountains; and hence all praises to you. 7

You are the one who without hesitation has violently crushed cruel men and along with them their rich treasures, with your sharpened thunder-bolt (the clear out punitive laws) for purposes of the defence of sacred possessions of the virtuous and for the destruction of evil forces, and hence all praises to you. 8

O resplendent Lord, you bind the undisciplined in a bond. You have the pleasure of being assisted by ten-hundred (1000) natural forces for the protection of the helpless one. You are the one by whom all are to be fed, and you are the protector of the worshipper. For the sake of your devotee, you have cast the evil forces into unfettered captivity. You alone are to be approached by all and hence all praises to you. 9

All obstacles yield to your manly strength, and all the virtuous lay before you, the victor, all their possessions. You are the door of mighty deeds and uphold the regions of the six extensions or cardinal points and offer protection to the five classes of men who look up to you and hence all praises to you. 10

The valour of yours is laudable, O hero, with your single effort you acquire all the wealth that you wish. You are powerful, and you accept the offerings of one who is firm in his devotion. Such are your multifarious performances, and as such, all praises to you. 11

अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः ॥१२॥
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥१३॥

áramayaḥ sárapasas tárāya káṃ turvítaye ca vayyāya ca srutím | nīcā́ sántam úd anayaḥ parāvṛ́jam prā́ndhám ṣroṇáṃ ṣraváyan s. u. || 12 || asmábhyam tád vaso dānā́ya rā́dhaḥ sám arthayasva bahú te vasavyàm | índra yác citráṃ ṣravasyā́ ánu dyū́n bṛhád vadema v. s. || 13 ||

(१४) चतुर्दशं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१३॥ अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चता मद्यमन्धः ।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥१॥
अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य ॥२॥

14.

Ádhvaryavo bháraténdrāya sómam ámatrebhiḥ siñcatā mádyam ándhaḥ | kāmí hí vīráḥ sádam asya pītíṃ juhóta vṛ́shṇe tád íd eshá vashṭi || 1 || ádhvaryavo yó apó vavrivā́ṅsaṃ vṛtrā́ṃ jaghā́nāṣányeva vṛkshám | tásmā etám bharata tadvaṣā́yaṅ eshá índro arhati pītím asya || 2 ||

You are the one who regulates the flowing waters for an easy crossing for the benefit of courageous and benevolent persons. You are also well-known for bringing up the forlorn or destitute who has been blind and crippled and cast down under the burden of miseries and lowlines of affliction; you are such, and hence all praises to you. 12

O resplendent Lord, may you set aside that treasure for a gift to us. Ample is your wealth. May you willingly and kindly grant us that wealth day by day. May we be endowed with brave sons and in your praise, sing out brilliant hymns in the congregation. 13

14

O presenters of offerings, sing your devotional songs to the resplendent Lord. Pour out the intense love of your heart before the Lord, for the sovereign Lord is always pleased to entertain your love. Offer Him with dedication as He always prefers you to do it. 1

O worshippers, sing your devotional songs to the resplendent Lord, who loves to hear them. He destroys the devil of ignorance which obstructs the path of virtuous thoughts as the lightning burns a tree. The resplendent Lord is worthy of the enjoyment of these laudations. 2

अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥३॥
अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ॥४॥

ádhvaryavo yó dríbhīkaṃ jaghắna yó gắ udắjad ápa hí valáṃ váḥ | tásmā etám antárikshe ná vắtam índraṃ sómair órṇuta jū́r ná vástraiḥ || 3 || ádhvaryavo yá úraṇaṃ jaghắna náva cakhváṅsaṃ navatíṃ ca bāhū́n | yó árbudam áva nīcắ babādhé tám índraṃ sómasya bhṛithé hinota || 4 ||

अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥५॥
अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै ॥६॥

ádhvaryavo yáḥ sv áṣnaṃ jaghắna yáḥ ṣúshṇam aṣúshaṃ yó vyàṅsam | yáḥ píprum námucim yó rudhikrắṃ tásmā índrāyắndhaso juhota || 5 || ádhvaryavo yáḥ ṣatáṃ ṣámbarasya púro bibhédắṣmaneva pūrvīḥ | yó varcínaḥ ṣatám índraḥ sahásram apávapad bhāratā sómam asmai || 6 ||

॥१४॥ अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान् ।
कुत्सस्यायोरतिथिग्वस्य वीरान्न्यावृणग्भरता सोममस्मै ॥७॥
अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।
गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥८॥

ádhvaryavo yáḥ ṣatám ắ sahásram bhū́myā upásthé 'vapaj jaghanván | kútsasyāyór atithigvásya vīrấn ny ávṛiṇag bhāratā sómam asmai || 7 || ádhvaryavo yán naraḥ kāmáyādhve ṣrushṭí váhanto naṣathā tád índre | gábhastipūtam bharata ṣrutáyéndrāya sómaṃ yajyavo juhota || 8 ||

O worshippers, sing your devotional songs to the resplendent Lord, who destroys wild tendencies and who restores to us the lost wisdom and subdues passions. Sing profusely His praises and fill His heart with your love like the wind filling the firmament. Pour out your love and cover the Lord with it as a disabled and sick person covers himself with garments. 3

O worshippers, when our devotional songs are sung, may you invoke the resplendent Lord, who destroys the obstructive forces possessing ninety-nine arms, and cast the serpent-like dark forces down head-long. 4

O worshippers, pour out the delightful devotional songs to that resplendent Lord, who easily dispels obstinacy and exploitation; who subdues violence, ego, everclinging evils and obstacles. 5

O worshippers, sing your devotional songs to the resplendent Lord who, as if, with a stone batters hundreds of strong holds of law-breaking tendencies and who humbles down a hundred-thousand forces of blazing evils. 6

O worshippers, sing your devotional songs to that victorious Lord, who dispels and destroys and thus uproots hundreds and thousands of aggressors, and who humbles down the forces opposing the virtues of generosity, liveliness and hospitality. 7

O the leading worshippers, you obtain from the resplendent Lord whatever you desire when you bring your offerings willingly to Him. Sing the devotional songs and dedicate your sanctified actions and offer them to the adorable Lord, O priests. 8

अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् ।
जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत ॥९॥
अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।
वेदाहमस्य निभृतं म एतद्दित्सन्तं भूयो यजतश्चिकेत ॥१०॥

ádhvar-
yavaḥ kártanā srushṭím asmai vánc nípūtaṃ vána ún na-
yadhvam | jushāṇó hástyam abhí vāvase va índrāya sómam
madiráṃ juhota || 9 || ádhvaryavaḥ páyasódhar yáthā góḥ
sómebhir īm priṇatā bhojám índram | védāhám asya ní-
bhṛitam ma etád dítsantam bhū́yo yajatás ciketa || 10 ||

अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।
तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु ॥११॥
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥१२॥

ádhvaryavo yó divyásya vásvo yáḥ párthivasya kshámya-
sya rájā | tám ū́rdaraṃ ná priṇatā yávenéndraṃ sómebhis
tád ápo vo astu || 11 || asmábhyaṃ tád — || 12 ||

(१५) पञ्चदशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१५॥ प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥१॥

15.

Prá ghā nv àsya maható maháni satyá satyásya kára-
ṇāni vocam | tríkadrukeshv apibat sutásyāsyá máde áhim
índro jaghāna || 1 ||

O worshippers, just as medicinal offerings to a fire are crushed, washed with water and purified and lifted up in ladles, so may your devotional songs, free from malice and hatred, be offered to the resplendent Lord, who when well-pleased, gladly accepts it from your hands. 9

O worshippers, may you offer to the bountiful resplendent Lord your sweet devotional songs, like the udder of a cow getting filled with milk. May He liberally accept our devotions, so affectionately offered to Him, and may He say in acknowledgement, "I know him, I am sure of this, and I would surely give him more". 10

O worshippers, may you offer to the bountiful resplendent Lord, who is master of the treasures of heaven, mid-heaven and also of the earth. May you offer your songs so profusely as people fill the granary with corn. May such (pious) act be for your good. 11

O resplendent Lord, may you set aside that treasure for a gift to us. Ample is your wealth. May you willingly and kindly grant us that wealth day by day. May we be endowed with brave sons and in your praise sing out brilliant hymns in the congregation. 12

15

I proclaim the praise of the great and authentic deeds of the resplendent Lord, who is an embodiment of truth. In three regions He partakes of the divine bliss, and exhilarated by it, He destroys the serpentine devil of evils. 1

अवंशे द्यामस्तभायद्बृहन्तमा रोदसी अपृणदन्तरिक्षम् ।
स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार ॥२॥
सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥३॥
स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार ॥४॥
स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति ।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार ॥५॥

avaṅsé dyā́m astabhāyad brihántam ā́ ródasī aprinad antáriksham | sá dhārayad prithivī́m papráthac ca sómasya tā́ máda índraṣ cakāra || 2 || sádmeva prā́co ví mimāya mā́nair vájreṇa khā́ny atrinan nadī́nām | vrī́thāsrijat pathíbhir dīrghayāthaíḥ sómasya tā́ — || 3 || sá pravoḷhrī́n parigátyā dabhī́ter víṣvam adhāg ā́yudham iddhé agnaú | sám góbhir áṣvair asrijad ráthebhiḥ só⁰ || 4 || sá īm mahī́m dhúnim étor aramṇāt só asnātrī́n apārayat svastí | tá utsnā́ya rayím abhí prá tasthuḥ só⁰ || 5 ||

॥१६॥ सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्चन्त्सोमस्य ता मद इन्द्रश्चकार ॥६॥
स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् ।
प्रति श्रोणः स्थाद्व्यनगचष्ट सोमस्य ता मद इन्द्रश्चकार ॥७॥

sódañcam síndhum ariṇān mahitvā́ vájreṇā́na ushásaḥ sám pipesha | ajaváso javínībhir vivriṣcán só⁰ || 6 || sá vidvā́m̐ apagohám kanī́nām āvír bhávann úd atishṭhat parāvrík | práti ṣroṇá sthād vy ànág acashṭa só⁰ || 7 ||

He establishes heaven in the supportless space. With His power, He fills the inter-space, heaven and earth (with His light). He has upheld and extended the wide earth. All this He does in the ecstasy of His benign bliss. 2

Like buildings He has measured out the space (eastern and other quarters), and He has dug the beds of rivers with His adamantine bull-dozers, and has sent them forth by the long-continued paths. All this He does in the ecstasy of His benign bliss. 3

Surrounding the malicious forces, which suppress the faculty of right discretion, He burns all the demonic weapons in the kindled fire and restores (the faculty), and enriches it with all its zeal, sustenance and motive power (cows, horses, and chariots). All this He does in the ecstasy of His benign bliss. 4

The resplendent sun slows the velocity. He tranquillizes this great river of toil and turbulence, so that it might be crossed. He conveys across it in safety, those righteous persons who are unable to pass over it and who having crossed it proceed to realize the wealth they have been seeking. All this He does in the ecstasy of His benign bliss. 5

With His strength, the resplendent Lord makes the rivers flow towards the north. He crushes the cart of the dawn with His adamantine radiance, scattering the tardy enemy of darkness with His swift forces. All this He does in the ecstasy of His benign bliss. 6

The eclipsed sun of the divine enlightenment manifests himself and stands up high for revelling with the maiden glories. The crippled lame is enabled to stand upon his legs and the blind now begins to see. All this, He (the resplendent Lord) does in the ecstasy of His benign bliss. 7

भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥८॥
स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः ।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥९॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥१०॥

bhinád valám áñgirobhir griṇānó ví párvatasya driṅhitány airat | riṇág ródhāṅsi kritrímāṇy eshām só° || 8 || svápnenābhyúpyā cúmurim dhúnim ca jaghántha dásyum prá dabhítim āvaḥ | rambhí cid átra vivide híraṇyam só° || 9 || nūnám sā́ te práti — || 10 ||

(१६) षोडशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । (१-८) प्रथमाद्यष्टर्चां जगती, (९) नवम्याश्च त्रिष्टुप् छन्दसी ॥

॥१७॥ प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे ।
इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद्युवानमवसे हवामहे ॥१॥
यस्मादिन्द्राद्बृहतः किं चनेमृते विश्वान्यस्मिन्त्संभृताधि वीर्या ।
जठरे सोमं तन्वी३ सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम् ॥२॥

16.

Prá vaḥ satā́m jyéshṭhatamāya sushṭutím agnáv iva samidhāné havír bhare | índram ajuryám jaráyantam ukshitám sanā́d yúvānam ávase havāmahe || 1 || yásmād índrād brihatáḥ kím caném rité víśvāny asmin sámbhritā́dhi vīryā̀ | jaṭháre sómam tanvì sáho máho háste vájram bhárati śīrsháṇi krátum || 2 ||

Well pleased with the fire-priests, the resplendent Lord dispels dismal darkness. He breaks open the strong gates of the mountain. He casts away the artificial walls of the dark fortresses of evil. All this, He does in the ecstasy of His benign bliss. 8

Having laid laziness and timidity low through sleep, the resplendent Self slays them and preserves the faculty of discretion. His chamberlain, the mind, in this contest finds the golden treasure. All this He does in the ecstasy of His benign bliss. 9

May your liberality in granting wisdom be shown to your singer. May you bestow vitality to your worshippers. May not your grace keep us out of reward. May we sing your glory loudly at this sacred assembly and be blessed with worthy descendents. 10

16

For your protection, O worshippers, I offer an excellent hymn to the resplendent Lord, the best amongst holies, in the same way as an oblation is offered to the kindled ceremonial fire. We invoke, for our protection, that Lord who is ever-youthful, eternal, invincible and powerful destroyer of the evil. 1

All prowess is centred within that mighty resplendent Lord, without whom this world were nothing. He is the embodiment of the benign bliss, carries great strength and energy in His body, bears adamantine forces in His hands and wisdom in His head. 2

न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः ।
न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ॥३॥
विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते ।
वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना ॥४॥

ná kshoṇíbhyām paribhvè ta indriyáṃ ná samudraíḥ párvatair indra te ráthaḥ | ná te vájram ánv aṣnoti káṣ caná yád āṣúbhiḥ pátasi yójanā purú || 3 || víṣve hy àsmai yajatáya dhṛishṇáve krátum bháranti vṛishabháya sáṣcate | vṛ́shā yajasva havíshā vidúshṭaraḥ píbendra sómaṃ vṛishabhéṇa bhānúnā || 4 ||

वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे ।
वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥५॥

vṛ́shṇaḥ kóṣaḥ pavate mádhva ūrmír vṛishabhánnāya vṛishabháya pắtave | vṛ́shaṇādhvaryū́ vṛishabháso ádrayo vṛ́shaṇaṃ sómaṃ vṛishabháya sushvati || 5 ||

॥१८॥ वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृप्णुहि ॥६॥
प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ॥७॥

vṛ́shā te vájra utá te vṛ́shā rátho vṛ́shaṇā hárī vṛishabhắṇy ắyudhā | vṛ́shṇo mádasya vṛishabha tvám īṣisha índra sómasya vṛishabhásya tṛipṇuhi || 6 || prá te nắvaṃ ná sámane vacasyúvam bráhmaṇā yāmi sávaneshu dádhṛishiḥ | kuvín no asyá vácaso nibódhishad índram útsaṃ ná vásunaḥ sicāmahe || 7 ||

O resplendent Lord, your might is not over-come by heaven and earth and when you traverse many leagues with speed, your chariot is not stopped by oceans and mountains, and nobody can escape from your laws of punitive justice. 3

All devotees offer worship to this hero, the resplendent Lord, who is adorable, powerful, munificient and ready to help. You, wise and liberal, are expected to worship this Lord with oblations. May you, resplendent Lord, showerer of blessings, accept our devotional songs with compassion and affection. 4

(From the heart of the devotees) the stream of devotional emotions, strength-giving and sweet, is flowing towards the resplendent Lord, who would gladly accept it with his affectionate response. May these emotions be expressed out of our heart in the same way as the two priests (a priest with his assistant) express the juice out of the invigorating medicinal herbs with the help of strong pressing stones. 5

Shower of bounties is your adamantine weapon and shower of blessings is your chariot; and so are your horses and armoury. You are the Lord of the spiritual happiness. May you enjoy to your satisfaction your own benign bliss. 6

I sing forth to you an eloquent hymn on my success in this struggle of life carrying me across like a boat. I approach you being bold, with a hymn of prayers for your acceptance and appreciation. We pour out libations to the resplendent Lord, who is a receptacle of treasure as a well is of water. 7

पुरा संबाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥

purá sambādhád abhy á vavṛitsva no dhenúr ná vatsáṃ yávasasya pipyúshī | sakṛít sú te sumatíbhiḥ ṣatakrato sám pátnībhir ná vṛíshaṇo nasīmahi || 8 || nūnáṃ sá — || 9 ||

(१७) सप्तदशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । (१-७) प्रथमादिसप्तर्चां जगती, (८-९) अष्टमीनवम्योश्च त्रिष्टुप् छन्दसी ॥

॥१९॥ तदस्मै नव्यमङ्गिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।
विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयत् ॥१॥
स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् ।
शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुञ्चत ॥२॥
अधाकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।
रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यक् पृथक् ॥३॥

17.

Tád asmai návyam aṅgirasvád arcata ṣúshmā yád asya pratnáthodírate | víṣvā yád gotrá sáhasā párīvṛitā máde sómasya dṛiṅhitány aírayat || 1 || sá bhūtu yó ha prathamáya dháyasa ójo mímāno mahimánam átirat | ṣúro yó yutsú tanvàm parivyáta ṣīrsháṇi dyám mahiná práty amuñcata || 2 || ádhākṛiṇoḥ prathamáṃ vīryàm mahád yád asyágre bráhmaṇā ṣúshmam aírayaḥ | ratheshṭhéna háryaṣvena vícyutāḥ prá jīráyaḥ sisrate sadhryàk príthak || 3 ||

May you conduct us to safety before the calamity comes, as a cow grazing in a meadow leads her calf (out of peril). O performer of hundreds of selfless actions, may we well receive your favours, as wives receive their loving husbands. 8

May your liberality in granting wisdom be shown to your singer. May you bestow vitality to your worshippers. May not your grace keep us out of reward. May we sing your glory loudly at this sacred assembly and be blessed with worthy descendents. 9

17

Like the fire-priests, sing a new hymn in honour of Him who has been maintaining His energies as such from immemorial times, and who breaks open with His strength all the hurdles and obstacles under the ecstasy of His divine bliss. 1

May that resplendent Lord be exalted, who manifesting His glory exhibits His might in His ecstasy of divine bliss and who stands self-defended in combats, and who by His greatness sustains the heaven, as if, on His head. 2

That great prowess you have displayed first to the worshipper in his presence, and when he sees you approaching, seated, as if, on a solar chariot, his evil thoughts of once are hurled down, get scattered and finally disappear by the spell of the prayerful hymns. 3

अधा यो विश्वा भुवनाभि मज्मनेशानकृत्प्रवया अभ्यवर्धत ।
आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥४॥
स प्राचीनान्पर्वतान्दृंहदोजसाधराचीनमकृणोदपामपः ।
अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः ॥५॥

ádhā yó víṣvā bhúvanābhí majmáneṣānakrít právayā abhy ávardhata | ấd ródasī jyótishā váhnir ấtanot sívyan támāṅsi dúdhitā sám avyayat || 4 || sá prācínān párvatān driṅhad ójasādharācínam akriṇod apā́m ápaḥ | ádhārayat prithivíṃ viṣvádhāyasam ástabhnān māyáyā dyā́m avasrásaḥ || 5 ||

॥२०॥ सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि ।
येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः ॥६॥
अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः ॥७॥

sā́smā áram bāhúbhyāṃ yám pitā́kriṇod víṣvasmād ā́ janúsho védasas pári | yénā prithivyā́ṃ ní krívim ṣayádhyai vájreṇa hatvy ávriṇak tuvishváṇiḥ || 6 || amājū́r iva pitróḥ sácā satí samānā́d ā́ sádasas tvā́m iye bhágam | kridhí praketám úpa māsy ā́ bhara daddhí bhāgáṃ tanvò yéna māmáhaḥ || 7 ||

भोजं त्वामिन्द्र वयं हुवेम ददिष्ट्वमिन्द्रापांसि वाजान् ।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥

bhojáṃ tvā́m indra vayáṃ huvema dadísh ṭvám indrā́pāṅsi vā́jān | aviḍḍhī́ndra citráyā na ūtí kridhí vrishann indra vásyaso naḥ || 8 || nūnáṃ sā́ — || 9 ||

He (the resplendent) with His prowess, supremacy and sovereignty maintains a control over all the worlds. He sustains earth and heaven with His effulgent light, and scattering the malignant gloom and darkness, He pervades the entirety. 4

He with His might makes firm the shaky and unstable mountains. He channels downwards the course of the waters. He controls the earth that nourishes us all, and with His skill, stays the heaven from falling. 5

Quite powerful is He for the protection of this world, of which He is the sole defender, and which He has fabricated with His own prowess for the sake of mankind, and over whom He is supreme by His wisdom. He also with His thunder, strikes the malicious with His adamantine forces, and consigns them to eternal sleep on the earth. 6

I pray you for good fortune, as a maiden that remains unmarried and grows old in the house of her parents and prays to get a husband. May you give us the inner vision by which we become prosperous and bodily strong. By these blessings, you have been honouring your worshippers. 7

Let us invoke you, O bounteous resplendent Leader. You are the giver of works (opportunities) and foods. May you help us, O leader, with manifold assistance, affluence, and happiness. 8

May your liberality in granting wisdom be shown to your singer. May you bestow vitality to your worshipper. May not your grace keep us out of reward. May we sing your glory loudly at the sacred assembly and be blessed with worthy descendents. 9

(१८) अष्टादशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२१॥ प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः ।
दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥१॥
सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊं जनन्त सो अन्येभिः सचते जेन्यो वृषा ॥२॥

18.

Prātā rátho návo yoji sásnis cáturyugas trikaṣáḥ saptáraṣmiḥ | dáṣāritro manushyàḥ svarshā́ḥ sá ishṭíbhir matíbhī ráṅhyo bhūt || 1 || sā́smā áram prathamáṃ sá dvitíyam utó tṛitíyam mánushaḥ sá hótā | anyásyā gárbham anyá ū jananta só anyébhiḥ sacate jényo vṛíshā || 2 ||

हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये ॥३॥

hárī nú kaṃ rátha índrasya yojam āyaí sūkténa vácasā návena | mó shú tvā́m átra baháve hí víprā ní rīraman yájamānāso anyé || 3 ||

आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥४॥
आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।
आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥५॥

á dvā́bhyāṃ háribhyām indra yāhy ā́ catúrbhir ā́ shaḍbhír hūyámānaḥ | ā́shṭābhír daṣábhiḥ somapéyam ayáṃ sutáḥ sumakha mā́ mṛídhas kaḥ || 4 || ā́ viṅṣatyā́ triṅṣátā yāhy arvā́ṅ ā́ catvāriṅṣátā háribhir yujānáḥ | ā́ pañcāṣátā surátbebhir indrā́ shashṭyā́ saptatyā́ somapéyam || 5 ||

18

In the morning the new and splendid chariot is harnessed, furnished with four yokes, three whips, seven reins, ten wheels, beneficial to mankind. May it confer happiness and be sanctified with solemn ceremonies and praises. (The verse indicates the chariot of the sun, the chariot of human body and the sacrifice). 1

That (chariot) is worthy of the resplendent sun, the great beneficiaries of mankind, to carry him through the first, the second, and even the third. The embryo of one is hatched by someone else. He goes as a noble bull. The victorious (chariot of the sun) the showerer of benefits, coordinates with the movements of other heavenly bodies. (The sun measures the universe in three steps; first step, at the morning rise, the second at the midnoon, zenith, and third at the evening setting). 2

May I now harness by means of a well-chanted new hymn the tawny horses of the sun's brilliant chariot, so that he (the resplendent sun) continues to proceed on his journey. Amongst us here are many worthy poets and priests. Beware of other institutors of sacred rites, lest they tempt you away. 3

O resplendent sun, the performer of the cosmic sacrifice, may you being invoked, come on a chariot driven by two, by four, by six, by eight or ten horses; may you come to accept precious offerings of cosmic saps, but do not scorch us to the extreme. 4

Come hither yoking your chariot with twenty, thirty, forty, fifty, sixty or seventy horses, O resplendent sun, to accept the cosmic saps. 5

॥२२॥ आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥६॥
मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व ॥७॥
न म इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥

áṣītyá navatyá yāhy arvāñ á ṣaténa háribhir uhyámānaḥ | ayám hí te ṣunáhotreshu sóma índra tvāyá párishikto mádāya || 6 || máma bráhmendra yāhy áchā víṣvā hárī dhurí dhishvā ráthasya | purutrá hí viháyvo babhúthāsmíñ chūra sávane mādayasva || 7 || ná ma índreṇa sakhyám ví yoshad asmábhyam asya dákshiṇā duhīta | úpa jyéshṭhe várūthe gábhastau prāyé-prāye jigīvāńsaḥ syāma || 8 || nūnám sá — || 9 ||

(१९.) एकोनविंशं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२३॥ अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः ॥१॥
अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त ॥२॥

19.

Ápāyy asyándhaso mádāya mánīshiṇaḥ suvānásya práyasaḥ | yásminn índraḥ pradívi vāvṛidhāná óko dadhé brahmaṇyántaṣ ca náraḥ || 1 || asyá mandānó mádhvo vájrahastó 'him índro arṇovṛítam ví vṛiṣcat | prá yád váyo ná svásarāṇy áchā práyāńsi ca nadī́nām cákramanta || 2 ||

Come hither, O resplendent sun, yoking your chariot with eighty, ninety or even a hundred horses. The cosmic sap has been poured out to you in delightful containers (that is, in Nature's wide spread beauty) for your exultation. 6

Come towards my prayer, O resplendent sun, may you yoke both your horses to the pole of your chariot. You have indeed been the object of glorification by many, but may you rejoice yourself in these celebrations. 7

Never may our appreciation of the resplendent sun be diminished. May his bounties continue to flow towards us. May we, under the excellent protection of his arm, be victorious in every struggle. 8

May your liberality in granting wisdom be shown to your singer. May you bestow vitality to your worshippers. May not your grace keep us out of reward. May we sing your glory loudly and be blessed with worthy descendents. 9

19

O wise men of learning, the worshipper has offered the libation of exhilarating spiritual bliss to the growing resplendent self (the soul), dwelling in the abode of enlightenment, which he relishes. 1

Exhilarated by this sweet spiritual bliss, the resplendent self, arming himself with the adamantine determination, controls the venomous evil tendencies, and the delicious streams of river of this bliss begin to flow as birds towards their nests. 2

स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥३॥
सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद्दाशुषे हन्ति वृत्रम् ।
सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ ॥४॥
स सुन्वत इन्द्रः सूर्यमा देवो रिणङ्मर्त्याय स्तवान् ।
आ यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥५॥

sá mâhina índro árṇo apấm praírayad ahihấchā samudrám | ájanayat sū́ryaṃ vidád gấ aktúnấhnāṃ vayúnāni sādhat || 3 || só apratíni mánave purū́ṇíndro dāṣad dāṣúshe hánti vṛitrám | sadyó yó nṛíbhyo atasấyyo bhū́t paspṛidhānébhyaḥ sū́ryasya sātaú || 4 || sá sunvatá índraḥ sū́ryam ấ devó riṇaṅ mártyāya stavā́n | ấ yád rayíṃ guhádavadyam asmai bhárad áṅṣaṃ naítaṣo daṣasyán || 5 ||

॥२५॥ स रन्धयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय ।
दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य ॥६॥
एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः ।
अश्याम तत्साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः ॥७॥
एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥

sá randhayat sadívaḥ sấrathaye ṣúshṇam aṣúshaṃ kúyavaṃ kútsāya | dívodāsāya navatíṃ ca návéndraḥ púro vy aìrac chámbarasya || 6 || evấ ta indrocátham ahema ṣravasyấ ná tmánā vājáyantaḥ | aṣyấma tát sáptam āṣushāṇấ nanámo vádhar ádevasya pīyóḥ || 7 || evấ te gṛitsamadấḥ ṣū́ra mánmāvasyávo ná vayúnāni takshuḥ | brahmaṇyánta indra te návīya ísham ū́rjaṃ sukshitíṃ sumnám aṣyuḥ || 8 || nūnáṃ sá — || 9 ||

That mighty resplendent self, the destroyer of the demon of evils, sends forth the stream of thoughts towards God; thereon he illumines the intellect, and discovers the cows of wisdom, and further accomplishes the day to day duties of life. 3

That resplendent self gives many matchless rewards to the presentor of libations and destroys the nescience for all of them, who vie with each other for the attainment of the sun of enlightenment. 4

The praiseworthy resplendent self unveils the sun of spiritual radiance for the benefit of the mortal, and provides to the munificient learned seer, mysterious and inestimable riches, as (a father gives to his son his) due share. 5

He, the resplendent self, for the benefit of the mind, the charioteer, destroys the demons of pettiness, greed, and malice; and for the devotees of the enlightened, demolishes the ninety-nine cities of the demon of violence. 6

Thus, O resplendent Lord, we address you our praise with a desire of procuring sustenance and vigour from you; may we have the privilege of your friendship. You always make the violent weapons of the infidel adversary ineffective. 7

O brave resplendent Lord, the blissful sages, seeking your favour, worship you, and sing your glory, May they, the pious, obtain food, strength, habitations, and felicity, from you. 8

May your liberality in granting wisdom be shown to your singer. May you bestow vitality to your worshippers. May not your grace keep us out of reward. May we sing your glory loudly and be blessed with worthy descendents. 9

(२०) विंशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः। इन्द्रो देवता। (१-२, ४-९) प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्यादिनृचद्वयस्य च त्रिष्टुप्, (३) तृतीयायाश्च विराड्रूपा छन्दसी ॥

॥२५॥ वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम्।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् ॥१॥
त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान्।
त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥२॥

20.

Vayáṃ te váya indra viddhí shú ṇaḥ prá bharāmahe vājayúr ná rátham | vipanyávo dídhyato manīshá sumnám íyakshantas tvávato nṝ́n || 1 || tváṃ na indra tvábhir ūtí tvāyató abhishṭipási jánān | tvám inó dāṣúsho varūtétthádhīr abhí yó nákshati tvā || 2 ||

स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता।
यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ॥३॥
तमु स्तुष इन्द्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥४॥
सो अङ्गिरसामुचथा जुजुष्वान्ब्रह्मा तूतोदिन्द्रो गातुमिष्णन्।
मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥५॥

sá no yúvéndro johū́traḥ sákhā ṣivó narám astu pātá | yáḥ ṣáñsantaṃ yáḥ ṣaṣamānám ūtí pácantaṃ ca stuvántaṃ ca praṇéshat || 3 || tám u stusha índraṃ táṃ gṛiṇīshe yásmin purá vāvṛidhúḥ ṣāṣadúṣ ca | sá vásvaḥ kámam pīparad iyānó brahmaṇyató nū́tanasyāyóḥ || 4 || só áñgirasām ucáthā jujushván bráhmā tūtod índro gātúm ishṇán | mushṇánn ushásaḥ sū́ryeṇa staván áṣṇasya cic chiṣnathat pūrvyáṇi || 5 ||

20

We bring, O resplendent Lord, this offering to you, as one desirous of obtaining food brings his waggon. We are well-skilled in devotional song, and enlightened with wisdom, and we seek great bliss from you, the benefactor of people. 1

You are our own with all your aids, and a guardian to our men, who are loyal to you, O resplendent Lord. You are rich in affluence and the protector of your devotees, who approach you with sincerity. 2

May that resplendent Lord be the saviour of our people. He is ever-young and a beneficent friend deserving to be invoked. He offers his protection to that admirer who implores, toils, collects offerings, and Him who praises. 3

May I praise our resplendent Lord; I indeed admire him, from whom since ancient days, the priests have been deriving their strength and amazing power. May He, being approached, fulfil the desire for wealth of this present day young person who is composing hymns for Him. 4

That resplendent Lord, gladly accepting the songs of energetic pious men, makes their prayers effectual and effective, forging out a way for them. He batters down the strongholds of malicious enemies as the sun snatches away the light from dawns. 5

॥२६॥ स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अव प्रियमर्शसानस्य साह्वाञ्छिरो भरद्दासस्य स्वधावान् ॥६॥
स वृत्रहेन्द्रः कृष्णयोनीः पुरन्दरो दासीरैरयद्वि ।
अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥७॥

sá ha śrutá índro náma devá ūrdhvó bhuvan mánushe dasmátamaḥ | áva priyám arṣasānásya sāhvāñ chíro bharad dāsásya svadhávān || 6 || sá vṛitrahéndraḥ kṛishṇáyonīḥ puraṃdaró dásīr airayad ví | ájanayan mánave kshám apáṣ ca satrá ṣáṅsaṃ yájamānasya tūtot || 7 ||

तस्मै तवस्यमनु दायि सत्रेन्द्राय देवेभिरर्णसातौ ।
प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥

tásmai tavasyàm ánu dāyi satréndrāya devébhir árṇasātau | práti yád asya vájram bāhvór dhúr hatví dásyūn púra áyasīr ní tārīt || 8 || nūnáṃ sá — || 9 ||

(२१) एकविंशं सूक्तम्

(१-६) षड्टचस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । (१-५) प्रथमादिपञ्चर्चां जगती, (६) षष्ठ्याश्च त्रिष्टुप् छन्दसी ॥

॥२७॥ विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।
अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजताय हर्यतम् ॥१॥

21.

Viṣvajíte dhanajíte svarjíte satrājíte nṛijíta urvarājíte | aṣvajíte gojíte abjíte bharéndrāya sómaṃ yajatáya haryatám || 1 ||

May that resplendent and victorious Lord stand up ready to act as the greatest wonder-worker for man. May the self-reliant mighty leader cast down the head of the mischievous disloyal man after overpowering him. 6

May that resplendent Lord, the killer of the enemies, the scatterer of dark clouds of evils, and the breaker of strongholds of foes batters the cities of infidels. He makes land fertile and provides irrigation to the fields. He surely makes the efforts of the worshippers effectual. 7

In the tumult of the conflict, all Nature's forces concede every bit of theirs to the supreme power of the resplendent Lord for the shower of happiness and prosperity. When they place the best of the adamantine weapons in His command, He smashes down the iron forts of the malacious, and kills them. 8

May your liberality in granting wisdom be shown to your singer. May you bestow vitality to your worshippers. May not your grace keep us out of reward. May we sing your glory loudly and be blessed with worthy descendents. 9

21

May you express sweet devotional prayers to the resplendent Lord who conquers all, who is the Lord of wealth and happiness, and Lord of time and space. He is the Lord of men and Lord of earth, Lord of horses, Lord of cattle and the Lord of waters. 1

अभिभुवेऽभिभङ्गाय वन्वतेऽषाळ्हाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥२॥

abhibhúve 'bhibhaṅgáya vanvaté 'shāḷhāya sáhamānāya vedháse | tuvigráye váhnaye dushṭárītave satrāsáhe náma índrāya vocata || 2 ||

सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः ।
वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ॥३॥

satrāsāhó janabhakshó janaṃsaháś cyávano yudhmó ánu jósham ukshitáḥ | vritaṃcayáḥ sáhurir vikshv āritá índrasya vocam prá kritáni vīryā̀ ||3||

अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत् ॥४॥

anānudó vrishabhó dódhato vadhó gambhīrá rishvó ásamashṭakāvyaḥ | radhracodáḥ snáthano viḷitás prithúr índraḥ suyajñá ushásaḥ svàr janat || 4 ||

यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत ॥५॥
इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥६॥

yajñéna gātúm aptúro vividrire dhíyo hinvānā́ usíjo manīshíṇaḥ | abhisvárā nishádā gá avasyáva índre hinvānā́ dráviṇāny āsata ||5|| índra śréshṭhāni dráviṇāni dhehi cíttiṃ dákshasya subhagatvám asmé | pósham rayīṇā́m árishṭiṃ tanū́nāṃ svādmā́naṃ vācáḥ sudinatvám áhnām || 6 ||

May you offer your reverential prayers to the resplendent Lord, who is overpowering, ever-conquering, the munificient, the invincible, the all-enduring, all-wise, all-adorable, the sustainer, the unassailable, and the ever-victorious. 2

He is ever victorious and supreme benefactor of man. He overthrows the braggart, and casts down the foes; He is a fighter. He is praised amongst men as a victorious scatterer of enemy, and is gratified by our devotions. May I proclaim the achievements and the mighty accomplishments of the resplendent Lord. 3

The resplendent Lord is unequalled in liberality, the showerer of benefits, the irresistible hero, the destroyer of the mischievous, profound and endowed with imperetrable sagacity, an inspirer of the timid, a powerful and all-round smasher of foes. He, with his benevolent nobility, is the primal source of the pleasing light of the dawn. 4

The aspirants of gratifications, sending their prayers to Him, the thought provoker, are led to the right path by worship, and thence they conquer calamities. Seeking His favour and sending their invocations and prayers to the resplendent Lord, they enjoy riches. 5

O resplendent Lord, bless us with the best of treasures, the spirit of ability and fortune. May we obtain from you an abundance of wealth, security of person, sweetness of speech and auspiciousness of days. 6

(२२) द्वाविंशं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । इन्द्रो देवता । (१) प्रथमर्चो अष्टिः, (२-४) द्वितीयादितृचस्य चातिशक्वरी, (४) चतुर्थ्या अष्टिर्वा छन्दांसि ॥

॥२८॥ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥१॥

22.

Tríkadrukeshu mahishó yavāṣiram tuvishúshmas tripát sómam apibad vishṇunā sutáṃ yáthāvaṣat | sá īm mamāda máhi kárma kártave mahā́m urúṃ saínaṃ saṣcad devó deváṃ satyám índraṃ satyá índuḥ || 1 ||

अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥२॥

ádha tvíshīmā̃ abhy ójasā kríviṃ yudhā́bhavad ā́ ródasī apriṇad asya majmánā prá vāvṛidhe | ádhattānyáṃ jaṭháre prém aricyata saínaṃ — || 2 ||

साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।
दाता राधः स्तुवते काम्यं वसु सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥३॥

sākáṃ jātáḥ krátunā sākám ójasā vavakshitha sākáṃ vṛiddhó vīryaiḥ sāsahír mṛídho vícarshaṇiḥ | dā́tā rā́dha stuvaté kā́myaṃ vásu saínaṃ — || 3 ||

22

Just as in sacred rituals, the offerings of the medicinal herbs are mixed up with barley and milk and the libations given thrice a day (morning, mid-day, and evening), similarly the resplendent self enjoys in participation with the all-pervading vital complex, the enjoyments of the divine sap of the spiritual realm during the three periods of life (youth, adult and old age). The draught of the divine sap considerably inspires the great and mighty resplendent self to perform exceedingly supreme actions. May that divine sap (of the spiritual realm) pervade the divine self. True is the self and true is the divine sap. 1

And mighty resplendent self dispels nescience with His radiance in the conflict. He fills up the earth and heaven as He grows with His prowess, after invigoration with the divine elixir. He holds a part of this, and the rest He distributes over to the gods (the sense organs). May the divine sap pervade the divine self. True is the self and true is the divine sap. 2

O Self, cognate with wisdom, and cognate with vigour, you have risen and with that you support the universe. Mighty with your heroic energies, you are the subduer of the malevolent; you are the distinguisher (between good and evil), and the giver of substantial wealth to the chosen devotee. May the divine sap (of the spiritual realm) pervade the divine self. True is the self and true is the divine sap. 3

तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः ।
भुवद्विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम् ॥४॥

táva tyán nár-
yam̥ nritó 'pa indra prathamám pūrvyám̥ diví praváçyam̥ kritám | yád devásya ṣávasā prárinā ásum̥ rinánn apáḥ | bhúvad víṣvam abhy ádevam ójasā vidád úrjam̥ ṣatákratur vidád ísham || 4 ||

(२३) त्रयोविंशं सूक्तम्

(१–१९) एकोनविंशत्यृचस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । (१, ५, ९, ११, १७, १९) प्रथमापञ्चमीनवम्येकादशीसप्तदश्येकोनविंश्यृचां ब्रह्मणस्पतिः, (२–४, ६–८, १०, १२–१६, १८) द्वितीयादिपञ्चादितृचयोर्दशम्या द्वादश्यादिपञ्चानामष्टादश्याश्च बृहस्पतिर्देवते । (१–१४, १६–१८) प्रथमादिचतुर्दशर्चां षोडश्यादितृचस्य च जगती, (१५, १९) पञ्चदश्येकोनविंश्योश्च त्रिष्टुप् छन्दसी ॥

॥२९॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥१॥
देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।
उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥२॥
आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।
बृहस्पते भीमममित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥३॥

23.

Ganánām̥ tvā ganápatim̥ havāmahe kavím̥ kavīnấm upamáṣravastamam | jyeshtharájam bráhmanām brahmanas pata á nah̥ srinvánn ūtíbhih̥ sīda sádanam || 1 || devás cit te asurya prácetaso bríhaspate yajñíyam bhāgám ānaṣuh̥ | usrá iva sū́ryo jyótishā mahó víṣveshām íj janitá bráhmanām asi || 2 || á vibádhyā parirápas támānsi ca jyótishmantam̥ rátham ritásya tishthasi | bríhaspate bhīmám amitradámbhanam̥ rakshohánam̥ gotrabhídam̥ svarvídam || 3 ||

That foremost accomplishment of yours, O Self, the delighter of all, deserves renown in heaven, when for the good of man, you arrest by force the breath of evil forces (the dark clouds), thereby sending down the rain of virtues. May the resplendent self overpower darkness of every corner with His radiance. May He, the accomplisher of hundred-fold selfless actions, procure vigour and procure food for us. 4

23

We invite you, supreme Lord, suprascient amongst preceptors, who is the head of the common folk, a supreme seer amongst seers, superb in glory, and the supreme Lord of the hymns. Listening to us may you occupy this seat at this place of worship, coming with all your protections. 1

Through your favours, even the benevolent Nature's bounties enjoy their share of worship, O mighty Lord supreme. As the sun generates dawns with his light, so you are the source of divine knowledge. 2

Having repelled the revilers and darkness out of our hearts, you, the Lord supreme, mount upon the chariot of eternal truth that is lustrous, formidable, humiliator of enemies, slayer of the evil forces, the cleaver of the clouds (of nescience) and the bestower of bliss. 3

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥४॥
न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥५॥

sunī-
tíbhir nayasi trā́yase jánam yáś túbhyam dā́śān ná tám áṅho aśnavat | brahmadvíshas tápano manyumī́r asi bṛ́haspate máhi tát te mahitvanám || 4 || ná tám áṅho ná duritám kútaś caná nā́rātayas titirur ná dvayāvínaḥ | víśvā íd asmād dhvaráso ví bādhase yám sugopā́ rákshasi brahmaṇas pate || 5 ||

॥३०॥ त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे ।
बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥६॥
उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥७॥
त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥८॥
त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ॥९॥

tvám no gopā́ḥ pathikṛ́d vicakshaṇás táva vratā́ya matíbhir jarāmahe | bṛ́haspate yó no abhí hváro dadhé svā́ tám marmartu duchúnā hárasvatī || 6 || utá vā yó no marcáyād ánāgaso 'rātīvā́ mártaḥ sānukó vṛ́kaḥ | bṛ́haspate ápa tám vartayā patháḥ sugám no asyaí devávītaye kṛdhi || 7 || trātā́ram tvā tanū́nām havāmahé 'vaspartar adhivaktā́ram asmayúm | bṛ́haspate devanído ní barhaya mā́ durévā úttaram sumnám ún naśan || 8 || tváyā vayám suvṛ́dhā brahmaṇas pate spārhā́ vásu manushyā́ dadīmahi | yā́ no dūré taḷíto yā́ árātayo 'bhí sánti jambháyā tā́ anapnásaḥ || 9 ||

With your excellent guidance you properly lead a person and protect him; no danger would overtake him who brings you his offerings. You punish the one who despites knowledge and humble the wrath of a wicked. Supreme is this greatness of yours, O Lord-supreme. 4

Neither sin nor sorrow from any quarter, neither enemies nor hypocrites and double-dealers ever harm the person, whom, you, the Lord suprascient defend and protect, for you drive away from him all that is treacherous and injurious. 5

You are our careful defender and guide on our path; with our hymns of adoration we sing in your honour, abiding by the holy laws. Whoever lays snare for us, may his own wickedness precipitate and destroy him, O Lord-supreme. 6

And also drive away from our path that hostile mortal, that greedy wolf, who harms us, the innocent, O Lord supreme. Give us fair access to the divine enlightenment. 7

We invoke you, O saviour, the preserver of our persons, our champion, our friend. Strike down, O Lord-supreme, the revilers of the divines. May not the malevolent enjoy a high favour from you. 8

May we obtain enviable riches worthy of men through you, O Lord-supreme, a great promoter; kill all those enemies of ours who attack us whether from far or near, and deprive them of all their possessions. 9

त्वया॑ व॒यमु॑त्त॒मं धी॑महे॒ वयो॒ बृह॑स्पते॒ पप्रि॑णा॒ सस्नि॑ना यु॒जा ।
मा नो॑ दुः॒शंसो॑ अभिदि॒प्सुरी॑शत॒ प्र सु॒शंसा॑ म॒तिभि॑स्तारिषीमहि ॥१०॥

॥३१॥ अ॒ना॒नु॒दो वृ॑ष॒भो जग्मि॑राह॒वं निष्ट॑प्ता॒ शत्रुं॒ पृत॑नासु सास॒हिः ।
असि॑ स॒त्य ऋ॑ण॒या ब्र॑ह्मणस्पत उ॒ग्रस्य॑ चिद्दमि॒ता वी॑ळुह॒र्षिणः॑ ॥११॥
अदे॑वेन॒ मन॑सा॒ यो रि॑ष॒ण्यति॑ शा॒सामु॒ग्रो मन्य॑मानो॒ जिघां॑सति ।
बृह॑स्पते॒ मा प्रण॒क्तस्य॑ नो व॒धो नि क॑र्म म॒न्युं दु॒रेव॑स्य॒ शर्ध॑तः ॥१२॥

tváyā vayám uttamám dhīmahe váyo bríhaspate páprinā sásninā yujā́ | mā́ no duḥsáṅsō abhidipsúr īṣata prá suṣáṅsā matíbhis tārishīmahi || 10 ||

anānudó vrishabhó jágmir āhavám níshṭaptā ṣátrum prítanāsu sāsahíḥ | ási satyá riṇayā́ brahmaṇas pata ugrásya cid damitā́ vīḷuharshíṇaḥ || 11 || ádevena mánasā yó rishaṇyáti ṣāsā́m ugró mányamāno jíghāṅsati | bríhaspate mā́ prának tásya no vadhó ní karma manyúm durévasya ṣárdhataḥ || 12 ||

भरे॑षु॒ हव्यो॒ नम॑सोप॒सद्यो॒ गन्ता॒ वाजे॑षु॒ सनि॑ता॒ धनं॑धनम् ।
विश्वा॒ इद॒र्यो अ॑भिदि॒प्स्वो॒३॒ मृधो॒ बृह॒स्पति॒र्वि व॑वर्हा॒ रथाँ॑ इव ॥१३॥
तेजि॑ष्ठया तप॒नी र॒क्षस॑स्तप॒ ये त्वा॑ नि॒दे द॑धि॒रे दृ॒ष्टवी॑र्यम् ।
आ॒विस्तत्कृ॑ष्व॒ यदस॑त्त उ॒क्थ्यं१॒ बृह॑स्पते॒ वि प॑रि॒रापो॑ अर्दय ॥१४॥
बृह॑स्पते॒ अति॒ यद॒र्यो अर्हा॑द्द्यु॒मद्वि॒भाति॒ क्रतु॑म॒ज्जने॑षु ।
यद्दी॒दय॒च्छव॑स ऋतप्रजात॒ तद॒स्मासु॒ द्रवि॑णं धेहि चि॒त्रम् ॥१५॥

bháreshu hávyo námasopasádyo gánta vā́jeshu sánitā dhánam-dhanam | víṣvā íd aryó abhidipsvò mrídho bríhaspátir ví vavarha ráthaṅ iva || 13 || tejishṭhayā tapaní rakshásas tapa yé tva nidé dadhiré drishṭávīryam | āvís tát krishva yád ásat ta ukthyàm bríhaspate ví parirā́po ardaya || 14 || bríhaspate áti yád aryó árhād dyumád vibhā́ti krátumaj jáneshu | yád dīdáyac chávasa ritaprajāta tád asmā́su dráviṇam dhehi citrám || 15 ||

May we gain highest vigour of life through you, as you are our rich and liberal associate, O Lord-supreme; may not the reproachful and deceitful person be our master. May we, with our devotion and wisdom cross over the hurdles of life. 10

You are, O Lord-suprascient, never yielding, a warrior and a showerer of benefits, ever-ready to proceed to the battlefield, a destroyer of the enemy and a victor. You are true, the discharger of debts, the humiliator of the fierce and of the boastful exultant. 11

May not the weapon of him reach us, who with a godless mind seeks to harm us and designs to kill the devotees, and who is fierce and arrogant, O Lord-supreme, may we on the other hand humble the pride of that wicked and defiant foe. 12

Fit to be invoked in battles, fit to be adored with worship, going into fights, giver of wealth and its dividend, may you, O Lord-supreme, overthrow like an armoured car, all the assailing malignant enemies. 13

Burn up with your fiery wrath the evil forces, which try to look to you with contempt. O Lord-supreme, may you manifest that valour of yours which is worthy of praises, and destroy the revilers. 14

May you bestow on us that wonderful treasure, which is worthy of the pious and righteous, is endowed by its lustre, and which may be effectively utilized for public purposes, O Lord-supreme, born of truth. 15

॥३२॥ मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥१६॥

mā́ na stenébhyo yé abhí druhás padé nirāmíṇo ripávó 'nneshu jāgṛidhúḥ | á devā́nām óhate ví vráyo hṛidí bṛíhaspate ná paráḥ sā́mno viduḥ || 16 ||

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥१७॥

víṣvebhyo hí tvā bhúvanebhyas pári tváshṭā́janat sā́mnaḥ-sāmnaḥ kavíḥ | sá ṛiṇacíd ṛiṇayā́ bráhmaṇas pátir druhó hantā́ mahá ṛitásya dhartári || 17 ||

तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥१८॥

táva ṣriyé vy àjihīta párvato gávāṃ gotrám udásṛijo yád aṅgiraḥ | índreṇa yujā́ támasā párīvṛitam bṛíhaspate nír apā́m aubjo arṇavám || 18 ||

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥१९॥

bráhmaṇas pate tvám asyá yantā́ sūktásya bodhi tánayaṃ ca jinva | víṣvaṃ tád bhadráṃ yád ávanti devā́ bṛihád vadema — || 19 ||

O Lord-supreme, deliver us not to the thieves, the enemies, who delight in violence, ever seize upon the food of others and who in their hearts bear a contempt towards righteous, and do not know the extent of your power (against evil). 16

Our Lord-architect, has created you a gem amongst the entire creation, you are a poet singer of every divine hymn. The Lord-suprascient acknowledge the debt of every performer of a great noble selfless act, and He is the acquitter of the debt and a destroyer of the oppressor. 17

The mountain, who conceals the cows (the intellects), goes asunder at your approach and thus you set free the cattle. O resplendent Lord-supreme, you force down the ocean of waters which gets enveloped by darkness. 18

The Lord-suprascient, who is the controller of this world, understands and appreciates this hymn of ours and grants us posterity. All that which the divines regard with love is blessed. May we and our family loudly praiše you in these sacrificial assemblies. 19

(२४) चतुर्विंशं सूक्तम्

(१-१६) षोडशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । (१-१०) प्रथमर्चो दशम्याश्च बृहस्पतिः, (२-९,११,१३-१६) द्वितीयाद्यष्टानामेकादश्यास्त्रयोदश्यादिचतसृणाञ्च ब्रह्मणस्पतिः, (१२) द्वादश्याश्चेन्द्राब्रह्मणस्पती देवताः । (१-११,१३-१५) प्रथमाद्येकादशर्चां त्रयोदश्यादितृचस्य च जगती. (१२,१६) द्वादशीषोडश्योश्च त्रिष्टुप् छन्दसी ॥

॥१॥ सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा ।
यथा नो मीढ्वान्त्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिम् ॥१॥
यो नन्त्वान्यनमन्न्योजसोतादर्दर्मन्युना शम्बराणि वि ।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम् ॥२॥

24.

Sémām aviḍḍhi prábhṛitiṃ yá íṣishe 'yā́ vidhema návaya mahā́ girā́ | yáthā no mīḍhvā́n stávate sákhā táva bṛ́haspate sī́shadhaḥ sótá no matím || 1 || yó nántvāny ánaman ny ójasotā́dardar manyúnā ṣámbarāṇi ví | prā́cyāvayad ácyutā bráhmaṇas pátir ā́ cāviṣad vásumantaṃ ví párvatam || 2 ||

तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदन्त वीळिता ।
उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ॥३॥
अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम् ॥४॥

tád devā́nāṃ devátamāya kártvam áṣrathnan dṛḷhā́vradanta vīḷitā́ | úd gā́ ājad ábhinad bráhmaṇā valám ágūhat támo vy àcakshayat sváḥ || 3 || áṣmāsyam avatám bráhmaṇas pátir mádhudhāram abhí yám ójasā́tṛiṇat | tám evá víṣve papire svardṛ́ṣo bahú sākáṃ sisicur útsam udríṇam ||4||

24

Would you, the one who superintends over all, be pleased with this proffered oblation. May we worship Him with this new and great poem. You are the only Lord to be invoked and are our closest friend; may you, O Lord-preceptor, such as you are, favour us with pure wisdom. 1

You are that Lord-suprascient who, by His might, bends down things which deserve to be bent, rends asunder the disrespecting infidels with His wrath, moves those who are apparently immovables and enters into the depth of knowledge which is full of wisdom. 2

That is the characterising feature of our Lord-protector, the most godly among the divines, that in His presence, the firm (closed gates of knowledge) are thrown open, and the strong (barriers) become relaxed. He sets the cows of wisdom at liberty, breaks the wall of darkness with our sacred prayers, dispels ignorance and causes the spiritual radiance to shine. 3

The Lord-suprascient breaks open with His powerful will the heavy rocky lid, covering the stores of the sweet-streaming knowledge, and thereon all they, who see the light start drinking their fill. They abundantly empty out together the fountain of blissful nectar. 4

सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरन्त वः ।
अयतन्ता चरतो अन्यदन्यदिद्या चकार वयुना ब्रह्मणस्पतिः ॥५॥

sánā tā́ ká cid bhúvanā bhávītvā mā́dbhíḥ sarádbhir dúro varanta vaḥ | áyatantā carato anyád-anyad íd yá cakā́ra vayúnā bráhmaṇas pátiḥ || 5 ||

॥२॥ अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम् ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशम् ॥६॥
ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।
ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तम् ॥७॥

abhinákshanto abhí yé tám ānasúr nidhím paṇīnā́m paramám gúhā hitám | té vidvā́ṅsaḥ praticákshyā́nṛitā púnar yáta u áyan tád úd īyur avíśam || 6 || ṛitā́vānaḥ praticákshyā́nṛitā púnar ā́ta ā́ tasthuḥ kaváyo mahás patháḥ | té bāhúbhyām dhamitám agním áśmani nákiḥ shó asty áraṇo jahúr hí tám || 7 ||

ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।
तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ॥८॥
स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः ।
चाक्ष्मो यद्वाजं भरते मती धनादित्सूर्यस्तपति तप्यतुर्वृथा ॥९॥

ṛitájyena kshipréṇa bráhmaṇas pátir yátra váshṭi prá tád aśnoti dhánvanā | tásya sādhvī́r íshavo yā́bhir ásyati nṛicákshaso dṛiśáye kárṇayonayaḥ || 8 || sá saṃnayáḥ sá vinayáḥ puróhitaḥ sá súshṭutaḥ sá yudhí bráhmaṇas pátiḥ | cākshmó yád vā́jam bhárate matī́ dhanā́d ít sū́ryas tapati tapyatúr vṛíthā ||9|||

For you (O devotees), the constant and manifold bounties of the Lord-suprascient, through months and through years, set open the gates of future rains (of divine knowledge). As a result of this, the two regions (the earth and space, or the physical and mental realms), mutually and without effort, have their shares of joy. 5

Those learned sages, searching on every side, discover the highly precious treasure (of divine wisdom), hidden wrapped in the cave of greed and malice. When they perceive the falsehood, they go back, only to come again by the same route to force an entrance. 6

The holy sages, lovers of truth, having observed the falsehood, once more pursue the main road thither, and with their hand, they set the rock cave (of ignorance) to destructive fire and keep it burning till they are sure that no evil continues to persist there. 7

With His swift-shooting bow furnished with the string of truth, stretching to the ear of the marksman, the Lord-suprascient surely accomplishes whatever He aims at. Holy are the arrows with which He shoots; human eyes being the target, thus receive His enlightenment. 8

The Lord-suprascient, with the honoured place in the first rank, adopts the doctrine of alliance and non-alliance in tne conflicts. He is the minute observer, and the bestower of food and riches with proper discrimination, and like the glowing sun, He scorches the oppressor, who harms others on no fault of theirs. 9

विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ।
इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुञ्जते विशः ॥१०॥

vibhú prabhú prathamám meh́ānāvato bríhaspáteḥ suvidátrāṇi rā́dhyā | imá sātā́ni venyásya vājíno yéna jánā ubháye bhuñjaté víṣaḥ || 10 ||

॥३॥ योऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ ।
स देवो देवान्प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ॥११॥
विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ।
अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥१२॥

yó 'vare vrijáne viṣváthā vibhúr mahā́m u raṇváḥ ṣávasā vavákshitha | sá devó devā́n práti paprathe prithú víṣvéd u tā́ paribhū́r bráhmaṇas pátiḥ || 11 || víṣvam satyám maghavānā yuvór íd ā́paṣ caná prá minanti vratám vām | áchendrābrahmaṇaspatī havír nó 'nnam yújeva vājínā jigātam || 12 ||

उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः ॥१३॥
ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः ।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥१४॥

utā́ṣishṭhā ánu ṣriṇvanti váhnayaḥ sabhéyo vípro bharate matí dhánā | vīḷudvéshā ánu váṣa riṇám ādadíḥ sá ha vājí samithé bráhmaṇas pátiḥ || 13 || bráhmaṇas páṭer abhavad yathāvaṣám satyó manyúr máhi kármā karishyatáḥ | yó gā́ udā́jat sá divé ví cābhajan mahíva rītíḥ ṣávasāsarat príthak || 14 ||

The gifts of the bounteous Lord-supreme are vast, abundant, of first grade and easily obtainable. These well-given benevolent acquisitions are from the lovable mighty Lord-supreme, whereby both classes of people, high and low, are able to enjoy. 10

He, the Lord-suprascient, is in everyway, supreme and blissful, and sustains by His strength the noble worshipper as well as one who is in true distress. He is greatly renowned amongst the divine forces, and therefore, He encompasses this entirely. 11

O Lord-suprascient, from you and from the resplendent lower self, proceed all eternal laws of Nature. Even the waters serve you and do not violate the order established by you, may both of you come to these offerings as the pair of horses go to their fodder. 12

The swift bearers of our invocations listen, whilst the priest of the assembly offers wealth along with devotional praises. May the Lord, the despiser of oppression, accept (the payment of) the debt, remitted willingly. May He be the acceptor of our food and other presents at this sacrifice. 13

The fury of the Lord-suprascient becomes effective according to His wishes when He engages Himself to perform a great deed. He restores (the stolen) wisdom-cows concealed in the dark caves of malice for the sake of enlightened ones, and divides them amongst them. Then like the channels of a big river, they, with the treasured wisdom, move away in different directions. (The wisdom flows through the channels of sense organs). 14

ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो३ वयस्वतः ।
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ॥१५॥
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥१६॥

bráhmaṇas pate suyámasya viṣváhā rāyáḥ syāma rathyò váyasvataḥ | vīréshu vīrā̃ñ úpa priñdhi nas tváṃ yád īṣāno bráhmaṇā véshi me hávam || 15 || bráhmaṇas pate tvám asya — || 16 ||

(२५) पञ्चविंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । ब्रह्मणस्पतिर्देवता । जगती छन्दः ॥

॥४॥ इन्धानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत् ।
जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥१॥
वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद्बोधति त्मना ।
तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥२॥
सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा ।
अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः ॥३॥

25.

Indhāno agníṃ vanavad vanushyatáḥ kritábrahmā ṣūṣuvad rātáhavya ít | jāténa jātám áti sá prá sarsrite yáṃ-yaṃ yújaṃ kriṇuté bráhmaṇas pátiḥ || 1 || vīrébhir vīrā́n vanavad vanushyató góbhī rayím paprathad bódhati tmánā | tokáṃ ca tásya tánayaṃ ca vardhate yáṃ-yaṃ — || 2 || síndhur ná kshódaḥ ṣímīvā̃ñ righāyató vríshevа vádhrīm̐r abhí vashṭy ójasā | agnér iva prásitir náha vártave yáṃ-yaṃ — || 3 ||

O Lord-suprascient, may we be the masters of the well-disciplined wealth of wisdom and vigour. Bestow on us waves after waves (posterity to posterity). May you, the Lord of all, listen to our invocations addressed through your divine word. 15

The Lord-suprascient, who is the controller of this (world) understands and appreciates this hymn of ours and grants us posterity. All that which divines regard with love is blessed. May we and our family loudly praise you in these sacrificial assemblies. 16

25

The one, whomsoever the Lord-suprascient takes for his friend, would surely overpower his adversaries and grow strong as he kindles the fire, repeats the hymns and offers oblations to the supreme power. He lives to behold the child of his child, and thus prospers. 1

The one, whomsoever the Lord-suprascient takes for his friend, would verily conquer his enemy's warriors with his own, increase his wealth with cows, would grow wise by himself, and his children and their children would prosper. 2

The one, whomsoever the Lord-suprascient takes for His friend, would rule over his infuriated foes with his might, like a bull over oxen and would grow impetuous like an on-rushing stream; and further, like the spreading flame of fire, it would be impossible to stop his progress. 3

तस्मा अर्षन्ति दिव्या असश्चतः स सत्वभिः प्रथमो गोषु गच्छति ।
अनिभृष्टतविषिर्हन्त्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ॥४॥
तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म दधिरे पुरूणि ।
देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥५॥

tásmā arshanti divyā́ asaṣcátaḥ sá sátvabhiḥ prathamó góshu gachati | ánibhrishṭatavishir hanty ójasā yám-yam — || 4 || tásmā íd víṣve dhunayanta síndhavó 'chidrā ṣárma dadhire purū́ṇi | devā́nām sumné subhágaḥ sá edhate yám-yam — || 5 ||

(२६) षड्विंशं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । ब्रह्मणस्पतिर्देवता । जगती छन्दः ॥

॥५॥ ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयन्तमभ्यसत् ।
सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ॥१॥
यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ।
हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ वृणीमहे ॥२॥
स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥३॥

26.

Ṛijúr íc cháṅso vanavad vanushyató devayánn íd ádevayantam abhy àsat | suprāvī́r íd vanavat pritsú dushṭáram yájvéd áyajyor ví bhajāti bhójanam || 1 || yájasva vīra prá vihi manāyató bhadrám mánaḥ kriṇushva vritratū́rye | havísh kriṇushva subhágo yáthāsasi bráhmaṇas páter áva ā́ vriṇīmahe || 2 || sá íj jánena sá viṣā́ sá jánmanā sá putraír vā́jam bharate dhánā nríbhiḥ | devā́nām yáḥ pitáram āvívāsati ṣraddhā́manā havíshā bráhmaṇas pátim || 3 ||

Any one, whomsoever the Lord-suprascient takes for His friends, the blessings of Nature's bounties descend unimpeded for his sake, goes foremost amongst the devout, he acquires wisdom—cattle, and further, of unimpaired vigour, he kills the enemies with his might. 4

Whomsoever the Lord-suprascient takes for His friend, for him all rivers of bliss flow; him do uninterrupted and numerous pleasures await, and blessed with the felicity of Nature's bounties, he ever progresses. 5

26

The honest praiser alone conquers violent enemies; the god-loving man alone overpowers the infidel. The earnest worshipper alone defeats a formidable opponent in conflicts; the selfless sacrificer alone appropriates for the common good the possessions of the faithless. 1

May you perform selfless acts, O brave devotee, and proceed resolutely against those who are provoking hostility. May your mind be of firm and best intents in the conflicts against vices and prepare the offerings so that you may be prosperous. We also solicit the favour of the Lord-suprascient. 2

That man alone who with a dedicated mind worships and offers to the Lord-suprascient, the protector of enlightened ones, acquires riches sustenance and his posterity through his people, his folk, his inheritance, his sons and leading persons. 3

यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः ।
उरुष्यतीमंहसो रक्षती रिषोंऽहोश्चिदस्मा उरुचक्रिरद्भुतः ॥४॥

yó asmai havyaír ghritávadbhir ávidhat prá tám prācā́ nayati bráhmaṇas pátiḥ | urushyátīm áṅhaso rákshatī rishó 'ṅhóś cid asmā urucákrir ádbhutaḥ || 4 ||

(२७) सप्तविंशं सूक्तम्

(१-१७) सप्तदशर्चस्यास्य सूक्तस्य गृत्समदो गार्त्समदः कूर्मो वा ऋषिः । आदित्या देवताः । त्रिष्टुप् छन्दः ॥

॥६॥ इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥१॥
इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त ।
आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः ॥२॥
त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः ।
अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति ॥३॥
धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥४॥

27.

Imá gíra ādityébhyo ghritásnūḥ sanā́d rā́jabhyo juhvā̀ juhomi | srinótu mitró aryamā́ bhágo nas tuvijātó váruṇo dáksho áṅśaḥ || 1 || imám stómam sákratavo me adyá mitró aryamā́ váruṇo jushanta | ādityā́saḥ súcayo dhā́rapūtā ávrijinā anavadyā́ árishṭāḥ || 2 || tá ādityā́sa urávo gabhīrā́ ádabdhāso dípsanto bhūryakshā́ḥ | antáḥ paśyanti vrijinótá sādhú sárvam rā́jabhyaḥ paramā́ cid ánti || 3 || dhāráyanta ādityā́so jágat sthā́ devā́ víśvasya bhúvanasya gopā́ḥ | dīrghā́dhiyo rákshamāṇā asuryàm ritā́vānaś cáyamānā riṇā́ni || 4 ||

The Lord-suprascient leads him forward to success, who honours him with love and precious presents. That munificient and wonderful (Lord) saves him from sins and sorrows, protects him from distress and raises him to greatness. 4

27

I offer my invocations with words of sacred hymns and intense love to sons of Mother Infinity, the cosmic stars of self-effulgence. May the sun, the dwarf-stars, cold-stars, giant-stars, and other twinkling ones, listen to us. 1

May those of equal splendour, the sun, the dwarf-stars, and the giant-stars be pleased today by our invocations,—they who are sons of Mother Infinity, luminous, purified by showers of effulgence, who abandon none and are irreproachable and unassailable. 2

These stars, sons of Mother Infinity are of huge dimensions, unparallel, provided with super brilliance, radiating out, as if, from innumerable eyes. Whether far from or near to the royal celestial bodies, they appear, as if, beholding from their innermost our vices and virtues both. 3

The brilliant stars (sons of Mother Infinity) are the upholders (of all gravitational bodies), movable or apparently stationary. They are the protectors of the universe (by balancing the equilibrium), are provident in acts, dispellers of darkness, true to eternal law, and the acquitters of Nature's debts. 4

विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु ।
युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम् ॥५॥

vidyā́m ādityā ávaso vo asyá yád aryaman bhayá ā́ cin mayobhú | yushmā́kam mitrāvaruṇā práṇītau pári ṣvábhreva duritā́ni vṛijyām || 5 ||

॥७॥ सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति ।
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म ॥६॥
पिपर्तु नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः ।
बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥७॥

sugó hí vo aryaman mitra pánthā anṛiksharó varuṇa sādhúr ásti | ténādityā ádhi vocatā no yáchatā no dushpariháutu ṣárma || 6 || pípartu no áditī rā́japutrā́ti dvéshāṅsy aryamā́ sugébhiḥ | bṛihán mitrásya váruṇasya ṣármópa syāma puruvī́rā árishṭāḥ || 7 ||

तिस्रो भूमीर्धारयन्त्रीँरुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥८॥
त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥९॥

tisró bhū́mīr dhārayan trī́ṅr utá dyū́n trī́ṇi vratā́ vidáthe antár eshām | ṛiténādityā máhi vo mahitvám tád aryaman varuṇa mitra cā́ru || 8 || trī́ rocanā́ divyā́ dhārayanta hiraṇyáyāḥ ṣúcayo dhā́rapūtāḥ | ásvapnajo animishā́ ádabdhā uruṣáṅsā ṛijáve mártyāya || 9 ||

May I be conscious, O suns (sons of Mother Infinity) of this protection of yours, the cause of happiness and (security) in danger. O Dwarf-stars, the sun, and the giant stars, so long as all of you stay on, may I (by Lord's grace) get over sins and sorrows, which are like pitfalls (in my path). 5

O Dwarf stars, the sun and the giant stars, (by God's grace) so long as you are, may we be led on easy path, pleasant and free from thorns. May you speak to us favourably and grant us unobstructed happiness. 6

May Goddess Infinity, the mother of royal sons carry us beyond malice by easy paths. May we, unharmed and endowed with many descendents be blessed with the motherly protection and happiness which is enjoyed by the dwarf-stars, the sun, and the giant-stars. 7

In this creation are held in balance the three regions, terrestrial, interspatial, and celestial, and the three divine realms, pertaining to body, mind, and spirit, provided with three eternal functions—physical, mental, and transcendental. O sons of Mother Infinity, the dwarf-stars, the sun and the giant-stars, you are excellent and great since you further the eternal law (of our Lord). 8

The brilliant sons of Mother Infinity, shining like golden ornaments, purified by the shower of effulgent pleasure never sleep, never close their eyelids, are unassailable and uphold the three bright celestial regions and admired by such persons as repose full confidence in eternal laws. 9

त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।
शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥१०॥

tvám víṣveshām varuṇāsi rā́jā yé ca devā́ asura yé ca mártāḥ | ṣatám no rāsva ṣarádo vicákshe 'çyā́māyū́ṅshi súdhitāni pū́rvā || 10 ||

॥८॥ न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ॥११॥
यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः ।
स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥१२॥

ná dakshiṇā́ ví cikite ná savyā́ ná prācī́nam ādityā nótá paṣcā́ | pākyā̀ cid vasavo dhīryā̀ cid yushmā́nīto ábhayam jyótir aṣyām || 11 || yó rā́jabhya ṛitaníbhyo dadā́ṣa yáṃ vardháyanti pushṭáyaṣ ca nítyāḥ | sá revā́n yāti prathamó ráthena vasudā́vā vidátheshu praṣastáḥ || 12 ||

शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥१३॥
अदिते मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः ।
उर्वश्यामभयं ज्योतिरिन्द्र मा नो दीर्घा अभि नशन्तमिस्राः ॥१४॥

ṣúcir apáḥ sūyávasā ádabdha úpa ksheti vṛiddhávayāḥ suvī́raḥ | nákish ṭáṃ ghnanty ántito ná dūrā́d yá ādityā́nām bhávati práṇītau || 13 || ádite mítra váruṇotá mṛiḷa yád vo vayáṃ cakṛimā́ káç cid ā́gaḥ | urv àṣyām ábhayam jyótir indra mā́ no dīrghā́ abhí naṣan támisrāḥ || 14 ||

O giant star (one of the sons of Mother-Infinity), the destroyer of foes, you are the sovereign over all heavenly bodies, whether they be self-luminous or terrestrial-like, (with no light of their own). May you grant unto us a long life to behold for hundred autumns, and may we enjoy blessed lives of our forefathers. 10

Neither is the right (i.e. south) nor the left (i.e. the north) do I distinguish; neither that which is in front (i.e. the east), nor the one on our back (i.e. the west). O giver of dwellings, may I, who are immature in knowledge, and timid in spirit, obtain, when guided by you, the light that is free from fear. 11

He who presents offerings to the royal and eternally true—Mother Infinity, and recognises her glory working behind her sons (the suns and celestial stars), and he whom her favours exalt, becomes wealthy, renowned, munificient and honoured, and is encouraged to perform noble acts as one proceeding to sacrifices in his chariot. 12

Those devotees who are safe in the good guidance of the Mother Infinity and her sons, become pure, live long, remain unmolested and acquire abundant food and virtuous sons, and further, enjoy sweet fruits of their noble actions. No one, whether near or far, would harm such a man. 13

O Mother Infinity, and her sons—the sun and the giant stars, may you have pity on us, even although we may have committed some offence against you (and your laws). May I obtain, O resplendent Lord, that great light which is free from peril. Let not the protracted glooms (of night and nescience) envelope us. 14

उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन् ।
उभा क्षयावाजयन्याति पृत्सूभावर्धौ भवतः साधू अस्मै ॥१५॥
या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्त्स्याम ॥१६॥
माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥१७॥

ubhé asmai pīpayataḥ samīcī́ divó vrishṭím subhágo nā́ma púshyan | ubhā́ ksháyāv ājáyan yāti pritsū́bhā́v árdhau bhavataḥ sādhū́ asmai || 15 || yā́ vo māyā́ abhidrúhe yajatrāḥ pā́śā ādityā ripáve vícṛittāḥ | aśvíva tā́ñ áti yesham ráthenárishṭā urā́v ā́ śárman syāma || 16 || mā́hám maghóno varuṇa priyásya bhūridā́vna ā́ vidam śū́nam āpéḥ | mā́ rāyó rājan suyámād áva sthām brihád vadema — || 17 ||

(२८) अष्टाविंशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य गृत्समदो गार्त्समदः कूर्मो वा ऋषिः । वरुणो देवता । त्रिष्टुप् छन्दः ॥

॥९॥ इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु मह्ना ।
अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥१॥
तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।
उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून् ॥२॥

28.

Idám kavér ādityásya svarā́jo víśvāni sā́nty abhy àstu mahnā́ | áti yó mandró yajáthāya deváḥ sukīrtím bhikshe váruṇasya bhū́reḥ || 1 || táva vraté subhágāsaḥ syāma svādhyò varuṇa tushṭuvā́ṅsaḥ | upā́yana ushásām gómatīnām agnáyo ná járamāṇā ánu dyū́n || 2 ||

Both, the loving wife and her blessed husband flourish when Mother Infinity offers them protection. Verily prosperous, the family thrives with the heavenly rain of blessings. Victorious in life's conflicts, it defends its possessions and assails that of its adversaries. To him and the family, both portions of material and spiritual realms become propitious. 15

O adorable sons of Mother-Infinity (the celestial suns), may I pass safe in your chariot over the deluding obstacles which you devise for the malignant, the snares which are spread for the enemy, in like manner as a horseman passes over a difficult stretch of road. Thus may we abide secure in infinite felicity. 16

May I never be worried, O Lord of giant stars, at the elevation of a wealthy charitable man who does good (and leads a prosperous life). May I never, O radiant one, lack in your well-awarded riches. May we, blessed with excellent descendants, worthily glorify Nature's bounties at this worship. 17

28

This is the praise of the self-radiant farseeing enlightened one. May He excell all the existing ones by His greatness. I beg for glory of this sovereign venerable one, a divine, who, when much pleased is propitious to His adorer. 1

May we, O venerable one, deeply meditating on you, earnestly praising you every day at dawn and abiding by your discipline, be prosperous; and may we shine like fires. 2

तव स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः ।
यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय देवाः ॥३॥
प्र सीमादित्यो असृजद्विधर्ता ऋतं सिन्धवो वरुणस्य यन्ति ।
न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन् ॥४॥
वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥५॥

táva syāma puruvíra-
sya śármann uruśáṅsasya varuṇa praṇetaḥ | yūyáṃ naḥ putrā aditer adabdhā abhí kshamadhvam yújyāya devāḥ || 3 || prá sīm ādityó asrijad vidhartā́ ritáṃ síndhavo váruṇasya yanti | ná śrāmyanti ná ví mucanty eté váyo ná paptū raghuyā́ párijman || 4 || ví mác chrathāya raśanā́m ivā́ga ridhyā́ma te varuṇa khā́m ritásya | mā́ tántuś chedi váyato dhíyam me mā́ mā́trā śāry apásaḥ purá ritóḥ || 5 ||

॥१०॥ अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय ।
दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ॥६॥
मा नो वधैर्वरुण ये त इष्टावेनः कृण्वन्तमसुर भ्रीणन्ति ।
मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥७॥
नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम ।
त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि ॥८॥

ápo sú myaksha varuṇa bhiyásam mát sámrāḷ ṛ́tāvó 'nu mā gribhāya | dā́meva vatsā́d ví mumugdhy áṅho nahí tvád āré nimíshaś canéśe || 6 || mā́ no vadhaír varuṇa yé ta ishṭā́v énaḥ kriṇvántam asura bhrīṇánti | mā́ jyótishaḥ pravasathā́ni ganma ví shū́ mṛ́dhaḥ śiśratho jīváse naḥ || 7 || námaḥ purā́ te varuṇotá nūnám utā́parám tuvijāta bravāma | tvé hí kam párvate ná śritā́ny ápracyutāni dūḷabha vratā́ni || 8 ||

O venerable one, chief guide of men, may we abide in the felicity of yours, who is endowed with great prowess and glorified by many. O invincible divine sons of Mother Infinity, may you have compassion, and admit us to your friendship. 3

The enlightened one, the upholder, creates the cosmic waters, and the same venerable Lord inspires the rivers to flow, which never get weary, and never stop. They have descended with swiftness, like birds upon the circumvient earth. 4

Cast off sin from me, O venerable one, as if it were a rope. May we obtain from you a channel of cosmic waters (divine cosmic intelligence). Cut not the thread of my life engaged in weaving pious works, and may not the total awards of my action be shattered before time. 5

Keep off all danger from me, O venerable one. O supreme sovereign, the sustainer of eternal laws, may you bestow your favour upon me. Cast off sin from me, like a tether from a calf. I am not even my leylid's lord without you. 6

Do not harm us, O vernerable God, repeller of foes, with those destructive weapons which are meant to demolish the person who commits sins on sacred occasions. Let us not depart (before our time) from the region of light. Destroy the malevolent that we may live. 7

As we have been offering adoration to you, O venerable Lord, in the past, so we offer it now; so may we offer it in future too, to you, the invincible. In you, as on an immovable mountain, all statutes are firmly established, and are not to be disregarded. 8

परं ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम् ।
अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ॥९॥
यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह ।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥१०॥
माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥११॥

pára riṇā́ sāvīr ádha mátkritāni mā́hám rājann anyákritena bhojam | ávyushṭā ín nú bhū́yasīr ushā́sa ā́ no jīvā́n varuṇa tā́su ṣādhi || 9 || yó me rājan yújyo vā sákhā vā svápne bhayám bhīráve máhyam áha | stenó vā yó dípsati no vríko vā tvám tásmād varuṇa pāhy asmā́n || 10 || mā́hám maghóno — || 11 ||

(२९) एकोनत्रिंशं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य गृत्समदो गार्त्समदः कूर्मो वा ऋषिः । विश्वे देवा देवताः । त्रिष्टुप् छन्दः ॥

॥१२॥ धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥१॥
यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत ।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥२॥

29.

Dhrítavratā ā́dityā íshirā āré mát karta rahasū́r ivá-gaḥ | srinvató vo váruṇa mítra dévā bhadrásya vidvā́ñ ávase huve vaḥ || 1 || yūyám devāḥ prámatir yūyám ójo yūyám dvéshāṅsi sanutár yuyota | abhikshattáro abhí ca kshámadhvam adyá ca no mriḷáyatāparám ca || 2 ||

O venerable God, may you discharge me from the debts incurred by me, or for my sake by others. May I not, O illustrious God, be dependant on the wealth earned by others. Many are the mornings that have, as it were, indeed not dawned; make us, O venerable one, alive in them. 9

Protect us, O venerable one, against every peril with which a kinsman or a friend threatens in my slumber, or from a thief or wolf or a crooked man who attempts to destroy us. 10

May I never be worried, O venerable one, the elevation of a wealthy charitable man who does good and leads a prosperous life. May I never, O radiant one, lack in your well-awarded riches. May we, blessed with excellent descendents, worthily glorify Nature's bounties at this worship. 11

29

O wise men, enlightened as suns, and upholders of law, may you remove sin far from me, as a woman who secretly delivers does hers. O divine and vital, as inbreath and outbreath, knowing your benevolent spirit, I invoke you, the listener of prayers, for my protection. 1

O illustrious ones, you are superior intelligence. You are inspiring vigour. May you drive away malevolent subduing instincts, and overcome them entirely and grant us falicity both now and in future. 2

किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ॥३॥
हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥४॥

kím ū nú vaḥ kriṇavāmāparena kím sánena vasava ā́pyena | yūyám no mitrāvaruṇādite ca svastím indrāmaruto dadhāta || 3 || hayé devā yūyám íd āpáya stha té mriḷata nā́dhamānāya máhyam | mā́ vo rátho madhyamavā́ḷ rité bhūn má yushmávatsv āpíshu sramishma || 4 || prá va éko mimaya bhū́ry ágo yán mā pitéva kitavám ṣaṣāsá | āré pā́ṣā āré aghā́ni devā mā́ mā́dhi putré vím iva grabhīshṭa || 5 ||

प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥५॥
अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥६॥
माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥७॥

arvā́ñco adyá bhavatā yajatrā ā́ vo hā́rdi bháyamāno vyayeyam | trā́dhvam no devā nijúro vríkasya trā́dhvam kartā́d avapádo yajatrāḥ || 6 || máhám maghóno — || 7 ||

What may we do for you, O learned upholders, either now or in future; what may we do, O life-bearing planets, by perpetual and practicable acts of devotion? May you yourself make us comfortable and happy. May you assist, O friendly and virtuous, benevolent as Mother Infinity, resplendent and vital as inbreaths and outbreaths, in maintaining our well-being. 3

O illustrious ones, you are our friends and well-wishers. Being so, grant falicity to us, who now implore you. Let not your moving car be slow in coming to our aid in our noble actions. Such as you are, never let us be weary of relatives. 4

You are to me as a father to his son, and therefore, alone in you I have confided my evils and offences. May all the bonding forces stay away from me; may all sins be far from me. A son, as I am of yours, do not seize me, as a fowler catches a bird. 5

O adorable illustrious ones, abide by me today, so that I cast off fear and gain your affectionate love. May you protect us from the rapacity of the wolf and wickeds. May you protect us from him who works us misfortune. 6

May I never witness, O venerable one, distress or destitution of my kinsman, who is opulent and good. May I never, O royal and radiant One, be lacking in well-earned riches. May we, be blessed with excellent descendants, and may we worthily glorify Nature's bounties at this worship. 7

(३०) त्रिंशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । (१-५, ७, ८, १०) प्रथमादिपञ्चर्चां सप्तम्या अष्टम्या उत्तरार्धर्चस्य दशम्याश्चेन्द्रः, (६) षष्ठ्या इन्द्रासोमौ, (८) अष्टम्या पूर्वार्धर्चस्य सरस्वती, (९) नवम्या बृहस्पतिः, (११) एकादश्याश्च मरुतो देवताः । (१-१०) प्रथमादिदशर्चां त्रिष्टुप्, (११) एकादश्याश्च जगती छन्दसी ॥

॥१२॥

ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम् ॥१॥
यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच ।
पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम् ॥२॥
ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार ।
मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः ॥३॥

30.

Ritám deváya krinvaté savitrá índrāyāhighné ná ramanta ápaḥ | áhar-ahar yāty aktúr apám kíyāty á prathamáḥ sárga āsām || 1 || yó vritráya sínam átrábharishyat prá tám jánitrī vidúsha uvāca | pathó rádantīr ánu jósham asmai divé-dive dhúnayo yanty ártham || 2 || ūrdhvó hy ásthād ádhy antárikshé 'dhā vritráya prá vadhám jabhāra | míham vásāna úpa hím ádudrot tigmáyudho ajayac chátrum índraḥ || 3 ||

बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।
यथा जघन्थ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिन्द्र ॥४॥
अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वाः ।
तोकस्य सातौ तनयस्य भूरेरस्माँ अर्धं कृणुतादिन्द्र गोनाम् ॥५॥

bríhaspate tápushásneva vidhya vríkadvaraso ásurasya vīrán | yáthā jaghántha dhrishatá purá cid evá jahi satrum asmákam indra || 4 || áva kshipa divó áṣmānam uccá véna sátrum mandasānó nijúrvāḥ | tokásya sātaú tánayasya bhúrer asmáñ ardhám krinutád indra gónām || 5 ||

30

The deeds, sacred or otherwise, dedicated to the supreme creator, the resplendent Lord, executor of laws, and the dispeller of serpentine darkness incessantly continue to flow day by day; who knows at what period of time does their first dedication take place ? 1

The Mother Infinity discloses to the resplendent soul name of the evil one who offers oblations to the dark forces. Obedient to the will, the stream of illustrious actions flows, day by day, to their objective goal, tracing out their assigned paths like roaring rivers. 2

As soon as the evil stands upright in the mind, the resplendent soul equips itself with adamantine will power to destroy the devil of ignorance enveloped by delusions. The soul conquers the hostile dark forces with its sharp intellect and will. 3

O the Lord supreme, strike with your blazing will power as with a bolt, the children of nesciences. You are known to destroy our sins; may you destroy them today as ever. 4

In the ecstasy of your spiritual bliss, may you hurl down the heavenly bolt of your adamantine will power, to destroy the sinful tendencies. Make us your copartners, O resplendent soul, for the acquisition of cows, children and progeny in abundance. 5

॥१३॥ प्र हि क्रतुं वृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ ।
इन्द्रासोमा युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लोकम् ॥६॥
न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम् ।
यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वन्तमुप गोभिरायत् ॥७॥
सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् ।
त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम् ॥८॥

prá hí krátuṃ vṛihátho yáṃ vanuthó radhrásya stho yájamānasya codaú | índrāsomā yuvám asmā́ñ avishṭam asmín bhayásthe kṛiṇutam u lokám || 6 || ná mā taman ná sraman nótá tandran ná vocāma mā́ sunotéti sómam | yó me pṛiṇā́d yó dádad yó nibódhād yó mā sunvántam úpa góbhir ā́yat || 7 || sárasvati tvám asmā́ñ aviḍḍhi marútvatī dhṛishatī́ jeshi ṣátrūn | tyáṃ cic chárdhantam tavishīyámā-ṇam índro hanti vṛishabháṃ ṣáṇḍikānām || 8 ||

यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य ।
बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषन्तं परि धेहि राजन् ॥९॥
अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि ।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि ॥१०॥
तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ॥११॥

yó naḥ sá-nutya utá vā jighatnúr abhikhyā́ya táṃ tigiténa vidhya | bṛíhaspata ā́yudhair jeshi ṣátrūn druhé ríshantam pári dhehi rājan || 9 || asmā́kebhiḥ sátvabhiḥ ṣūra ṣū́rair vīryā̀ kṛidhi yā́ni te kártvāni | jyóg abhūvann ánudhūpitāso hatvī́ téshām ā́ bharā no vásūni || 10 || táṃ vaḥ ṣárdham mā́ru-taṃ sumnayúr giró̀pa bruve námasā daívyam jánam | yá-thā rayíṃ sárvavīraṃ náṣāmahā apatyasā́caṃ ṣrútyaṃ divé-dive || 11 ||

O resplendent soul and blissful divine power, eradicate the effect of the painful evil. You are the inspirer of devoted worshipper. May you protect us on all occasions of peril and make the world free from fear. 6

Let it not vex me, tire me and make me slothful, and may we never say, "do not offer devotion and dedication"; for it is the resplendent one that fulfils my wishes, gives me prosperity, hears my prayers and rewards me fully. 7

May you protect us, O divine speech. May you suppress the devil of ignorance in alliance with the vital principles, and mean' while, may the resplendent soul destroy even the foremost formidable ferocity. 8

May you find out the one who is in hiding and planning to injure us, and then pierce him with sharpened weapons. May you conquer with your ingenuity, O supreme intellect. May you destroy the offending evil spirits by your sharp adamantine will, O resplendent soul. 9

May you achieve all, that you ought to, O the supreme hero, the resplendent self, in alliance with your associates, i.e. your vital organs. Our evil forces have long been inflated with pride. Destroy them and may we get the reward which was so far withheld due to obstructions. 10

Desirous of happiness and comfort, O vital principles, I glorify with prayers and offerings your divine, manifest, and congregated strength so that we may thereby daily enjoy distinguishable affluence, accompanied by valiant family members including children. 11

(३१) एकत्रिंशं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । विश्वे देवा देवताः । (१-६) प्रथमादिषड्वां जगती, (७) सप्तम्याश्च त्रिष्टुप् छन्दसी ॥

॥१४॥ अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ॥१॥
अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुम् ।
यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥२॥
उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये ॥३॥

31.

Asmákam mitrāvaruṇāvatam rátham ādityaí rudraír vásubhiḥ sacābhúvā | prá yád váyo ná páptan vásmanas pári ṣravasyávo hríshīvanto vanarshádaḥ || 1 || ádha smā na úd avatā sajoshaso rátham devāso abhí vikshú vājayúm | yád āṣávaḥ pádyābhis títrato rájaḥ prithivyáḥ sánau jáñghananta pāṇíbhiḥ || 2 || utá syá na índro visvácarshaṇir diváḥ ṣárdhena márutena sukrátuḥ | ánu nú sthāty avrikábhir ūtíbhī rátham mahé sanáye vájasātaye || 3 ||

उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम् ।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ॥४॥
उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा ।
स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ॥५॥

utá syá devó bhúvanasya sakshánis tváshṭa gnábhiḥ sajóshā jūjuvad rátham | íḷā bhágo brihaddivótá ródasī pūshá púraṃdhir asvínāv ádhā pátī || 4 || utá tyé devi subháge mithudrísoshásānákta jágatām apījúvā | stushé yád vām prithivi návyasā váca stha-túṣ ca váyas trívayā upastíre || 5 ||

31

O cosmic light and cosmic plasma, may you accompanied by self luminous-suns, the cosmic vital principles and powers conferring prosperity preserve our chariot of human body when our restless mind and senses fly away like cheerful birds from their nest in search of food, perching on trees of the woods. 1

When our senses traversing the space and raising the dust with their paces, trample with their feet upon high mental level of human earthly body, O divine power, of one accord, may you protect our ever-moving chariot gone forth in quest of food, to live in harmony with the people. 2

And may our all-beholding and powerful soul associated with the vital energies of the body support us with beneficent helps so that we may obtain ample wealth and abundant food (great wisdom and prosperity). 3

And may that glorious architect of universe, the sovereign Lord of the world, associated with the divine powers, well-disposed, guide us on the chariot of life. May He the embodiment of culture, may He, the resplendent gracious Lord, the master of the mental and physical faculties, sagacious nourisher and the divine twin-powers the protectors, guide and conduct the chariot of our activity. 4

And may those brilliant, blessed dawns and night, that appear by turns and are the inspirers of all creatures show us our true path. And may you, O cosmic powers of earth and heaven, carry our chariot of human body on the path of progress. I praise you with a fresh hymn and offer homage of three types (praise, prayer, and meditation). 5

उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्योऽज एकपादुत ।
त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ॥६॥
एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सम् ।
श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः ॥७॥

utá vaḥ sáṅsam uṣíjām iva ṣmasy áhir budhnyò 'já ékapād utá | tritá ṛibhukshā́ḥ savitā́ cáno dadhe 'pā́ṃ ñápād āṣuhémā dhiyā́ ṣámi || 6 || etā́ vo vasmy údyatā yajatrā átakshann āyávo návyase sám | ṣravasyávo vā́jaṃ cakānā́ḥ sáptir ná ráthyo áha dhītím asyāḥ || 7 ||

(३२) द्वात्रिंशं सूक्तम्

(१–८) अष्टर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । (१) प्रथमर्चो द्यावापृथिव्यौ, (२–३) द्वितीयातृतीययोरिन्द्रस्त्वष्टा वा, (४–५) चतुर्थीपञ्चम्यो राका, (६–७) षष्ठीसप्तम्योः सिनीवाली, (८) अष्टम्याश्च लिङ्गोक्ता देवताः । (१–५) प्रथमादिपञ्चर्चां जगती. (६–८) षष्ठ्यादितृचस्य चानुष्टुप् छन्दसी ॥

॥१९॥ अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः ।
ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वां महो दधे ॥१॥
मा नो गुह्या रिप आयोरहन्दभन्मा न आभ्यो रीरधो दुच्छुनाभ्यः ।
मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे ॥२॥
अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम् ।
पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥३॥

32.

Asyá me dyāvāpṛithivī ṛitāyató bhūtám avitrī́ vácasaḥ síshāsataḥ | yáyor ā́yuḥ prataráṃ té idám purá úpastute vasūyúr vām mahó dadhe || 1 || mā́ no gúhyā rípa āyór áhan dabhan mā́ na ābhyó rīradho duchúnābhyaḥ | mā́ no ví yauḥ sakhyā́ viddhí tásya naḥ sumnāyatā́ mánasā tát tvemahe || 2 || áheḷatā mánasā ṣrushṭím ā́ vaha dúhānāṃ dhenúm pipyúshīm asaṣcátaṃ | pádyābhir āṣúṃ vácasā ca vājínaṃ tváṃ hinomi puruhūta viṣváhā || 3 ||

We love to praise you, O divine powers, like those men who love to propitiate. May the divine sun, the sustaining power behind the interspersed clouds, the un-born, one-footed, and possessing three-fold attributes and endowed with cosmic eternal light and the lightning residing in water-clouds be a blessing to us. 6

I love to appreciate, O adorable ones, your benevolent services. The worshippers have composed these appreciations for your services with earnestness. May you, who are desirous of food (applause) and vigour (love of service) continue to serve like a chariot-horse. 7

32

May you, O heaven and earth, possessor of exceedingly great might and praised by all, be champion of my sacred hymns. Full of intense devotion and coming out of a worshipful heart, I glorify you. I honour you both for blessings and my prosperity. 1

May the secret intrigues of the hostile men never hurt us any day. Do not subject us to the inflictions of such evil-doers. Do not deprive us of our friendships. Grant us the prayer which we are advancing with earnestness, and with a crave for your blessings. 2

May you grant us the well-nourished, and compact divine speech, yielding milk of devotion and conferring happiness. Daily I propitiate you, with earnestness in my deeds and words, O Lord, the one praised by all. 3

राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥४॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥५॥
सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥६॥
या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी ।
तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥७॥
या गुङ्गूर्या सिनीवाली या राका या सरस्वती ।
इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥८॥

rākā́m ahā́m suhávām sushṭutī́ huve srinótu naḥ subhágā bódhatu tmánā | sī́vyatv ápaḥ sucyā́chidyamānayā dádātu vīrā́m satádāyam ukthyàm || 4 || yā́s te rāke sumatáyaḥ supéṣaso yā́bhir dádāsi dāṣúshe vásūni | tā́bhir no adyá sumánā upā́gahi sahasraposhā́m subhage rárāṇā || 5 || sínīvāli prí-thushṭuke yā́ devā́nām ási svásā | jushásva havyám ā́hutam prajā́m devi didiḍḍhi naḥ || 6 || yā́ subāhúḥ svaṅgúríḥ su-shū́mā bahusū́varī | tásyai viṣpátnyai havíḥ sinīvāíyai juho-tana || 7 || yā́ guṅgū́r yā́ sinīvālī́ yā́ rākā́ yā́ sárasvatī | in-drāṇī́m ahva ūtáye varuṇānī́m svastáye || 8 ||

[अथ चतुर्थोऽनुवाकः ॥] (३३) त्रयस्त्रिंशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । रुद्रो देवता । त्रिष्टुप् छन्दः ॥

॥१६॥ आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥१॥

33.

Ā́ te pitar marutāṃ sumnám etu mā́ naḥ sū́ryasya saṃdṛ́ṣo yuyothāḥ | abhí no vīró árvati kshameta prá jā-yemahi rudra prajā́bhiḥ || 1 ||

I invoke the praiseworthy full-moon night with my nicely-composed hymns. May she who holds great wealth listen to our prayer and appreciate it. May she stitch our fabric of actions with unbreakable needle. May she grant us brave and praiseworthy opulent children. 4

O bounteous full-moon night, possessing graceful form and excellent wisdom, may you grant prosperity to the faithful devotees. May you favourably be with us, bestowing thousandfold blessings. 5

O night of extensive and deep darkness, (the new moon night), dear as sister to Nature's bounties, may you enjoy the homage offered to you. May you bless us with prosperous children, O divine night. 6

Offer homage to that divine night of extensive and deep darkness (night of new moon), who has lovely arms, loving fingers and who gives new life to all men. 7

I solicit my well-being and protection from my Lord, the Creator of the divine speech, as also of the first night of the waxing moon, the no-moon night, and the night of the full-moon, the speech which is an embodiment of divine knowledge, the divine glory and the divine excellence. 8

33

May your favour come to us, O the sustainer of cosmic vital principles. Do not deprive us from the sight of the sun. May our brave sons, O cosmic vital physician, subdue the adversaries. May we be multiplied with continued progeny. 1

त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥२॥
श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥३॥
मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥४॥
हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥५॥

tvádattebhī rudra ṣáṃtamebhiḥ ṣatáṃ hímā aṣīya bheshajébhiḥ | vy àsmád dvésho vitaráṃ vy áṅho vy ámīvāṣ cātayasvā víshūcīḥ || 2 || ṣréshṭho jātásya rudra ṣriyā́si tavástamas tavásāṃ vajrabāho | párshi ṇaḥ pārám áṅhasaḥ svastí víṣvā abhī́tī rápaso yuyodhi || 3 || mā́ tvā rudra cukrudhāmā námobhir mā́ dúshṭutī vṛishabha mā́ sáhūtī | ún no vīrā́ṅ arpaya bheshajébhir bhishā́ktamaṃ tvā bhishájāṃ ṣṛiṇomi || 4 || hávīmabhir hávate yó havírbhir áva stómebhī rudrá ṃ dishīya | ṛidūdáraḥ suhávo mā́ no asyaí babhrúḥ suṣípro rīradhaṅ manā́yai || 5 ||

॥१७॥ उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥६॥
क्व स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥७॥

ún mā mamanda vṛishabhó marútvān tvákshīyasā váyasā nā́dhamānam | ghṛíṇīva chāyā́m arapā́ aṣīyā́ vivāseyaṃ rudrásya sumnám || 6 || kvà syá te rudra mṛiḷayā́kur hásto yó ásti bheshajó jálāshaḥ | apabhartā́ rápaso daívyasyābhí nú mā vṛishabha cakshamīthāḥ || 7 ||

May I enjoy a hundred winters with the help of the most blissful medicinal cures given by you, O cosmic vital physician. Drive away enmity and hatred from us, drive sin far away, and drive away meladies and troubles to distant quarters. 2

O cosmic vital physician, in glory greatest amongst all born, the mightiest of the mighty, wielder of the adamantine justice, may you carry us safely beyond danger; chase away from us all assaults of physical injury. 3

May we never provoke you, O cosmic vital physician, the showerer of benefits, with our ill-addressed prayers, never with a badly composed joint invocation. May you tone up our sons and heroes with your medicinal cures; I hear you to be the most competent one among physicians. 4

With my hymns may I pacify cosmic vital physician, who is invoked with calls and offerings. May he, the one easily accessible, and of beautiful form, pleasing manners, and a soft heart, never subject us to malevolent disposition. 5

The showerer of benefits, by the vital principles has filled me, His grace-seeker, with joy by giving me invigorating nourishment. Having become free from injury, may I so propitiate the cosmic vital physician, that I enjoy it as one distressed by scorching heat gets relief in shade. 6

O cosmic vital physician, where is that kind hand of yours, which heals, cures, and gives comfort ? O showerer of benefits, may you be gracious to us. 7

प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥८॥
स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥९॥
अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥१०॥

prá babhráve vrishabháya svitīcé mahó mahím sushtutím īrayāmi | namasyá kalmalīkínaṃ námobhir griṇīmási tveshám rudrásya náma || 8 || sthirébhir áñgaiḥ pururūpa ugró babhrúḥ sukrébhiḥ pipise híraṇyaiḥ | íṣanād asyá bhúvanasya bhū́rer ná vá u yoshad rudrád asuryàm || 9 || árhan bibharshi sáyakāni dhánvárhan nishkáṃ yajatáṃ viṣvárūpam | árhann idáṃ dayase víṣvam ábhvaṃ ná vá ójīyo rudra tvád asti || 10 ||

॥१८॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥११॥
कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं मत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥१२॥
या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥१३॥

stuhí ṣrutáṃ gratasádaṃ yúvānam mṛigáṃ ná bhīmám upahatnúm ugrám | mṛilá jaritré rudra stávāno 'nyáṃ te asmán ní vapantu sénāḥ || 11 || kumārás cit pitáraṃ vándamānam práti nānāma rudropayántam | bhū́rer dātáram sátpatiṃ griṇīshe stutás tvám bheshajá rāsy asmé || 12 || yá vo bheshajá marutaḥ ṣúcīni yá ṣáṃtamā vṛishaṇo yá mayobhú | yáni mánur ávṛiṇītā pitá nas tá ṣáṃ ca yóṣ ca rudrásya vaṣmi || 13 ||

I send forth a big hymn of earnest praises to the showerer of benefits, the one of pleasing manners, with spotless garments; may we bow down to Him; my homage to the brilliant one. We glorify the splendid name of the cosmic vital physician. 8

The cosmic vital physician with His sturdy and steady constitution, multi-forms and pleasing manners, is bedecked like sun with brilliant golden ornaments. The supreme vigour never goes away from Him who is the supreme ruler of this universal order. 9

Deservingly you, like the solar orb, hold the arrows and the bow, deservingly you wear the necklace of gold showing all its beautiful forms; deservingly you distribute among your worshippers all this wonderful power of yours. Nothing is mightier than you, O cosmic vital physician, Lord in the sun. 10

Glorify the cosmic vital physician (Lord in the sun), sitting high in his cosmic chariot. He is dreadful, deadly and fierce like a wild beast. Propitiated by praises, O Lord, grant happiness to him who praises you, and may your hosts overpower others who are our adversary. 11

I bow down to you, O cosmic vital power, just like a son bows to his greeting father. I praise the benevolent leader who gives much. On being praised may you grant your healing cures to us. 12

I long for those of your medicaments, O mighty vital principles, which are pure, most healing and a source of happiness. I long for those which our elders have found efficacious in their experience and also for those obtained from cosmic vital physicians for my cure and prevention. 13

परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥१४॥
एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥१५॥

pári ṇo hetí rudrásya vrijyāḥ pári tveshásya durmatír mahí gāt | áva sthirá magliávadbhyas tanushva míḍhvas tokáya tánayāya mriḷa || 14 || evá babhro vrishabha cekitāna yáthā deva ná hriṇīshé ná háṅsi | havanaśrún no rudrehá bodhi brihád v. v. s. || 15 ||

(३४) चतुस्त्रिंशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । मरुतो देवताः । (१-१४) प्रथमादिचतुर्दशर्चां जगती, (१५) पञ्चदश्याश्च त्रिष्टुप् छन्दसी ॥

॥१९॥ धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत ॥१॥
द्यावो न स्तृभिश्चितयन्त खादिनो व्य१भ्रिया न द्युतयन्त वृष्टयः ।
रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि ॥२॥
उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः ।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ॥३॥

34.

Dhārāvará marúto dhrishṇvòjaso mrigá ná bhīmás távishībhir arcínaḥ | agnáyo ná śuśucāná rijīshíṇo bhrímiṃ dhámanto ápa gá avriṇvata || 1 || dyávo ná stríbhiś citayanta khādíno vy àbhríyā ná dyutayanta vrishṭáyaḥ | rudró yád vo maruto rukmavakshaso vríshájani príśnyāḥ śukrá údhani || 2 || ukshánte áśvāñ átyāñ ivājíshu nadásya kárṇais turayanta āśúbhiḥ | híraṇyaśiprā maruto dávidhvataḥ prikshám yātha príshatībhiḥ samanyavaḥ || 3 ||

May the missiles of cosmic vital physician, Lord in the sun, avoid us. May the great wrath of the impetuous Lord go away from us. May you turn away your strong bow of destruction from our wealthy friends and bestow happiness upon our sons and grandsons. 14

O, one of pleasing manners and showerer of benefits, omniscient and divine, bearer of our invocation, may you not show your wrath on us, nor kill us. May you now hear our invocations, O cosmic vital physician, Lord in the sun. May we loudly sing your praises in the sacred public worship and be gifted with brave sons. 15

34

O dynamic mortals (verily mortals are vitals), possessed of bold spirit, formidable like wild beasts, reverencing the world by their energies. Brightly shining like fires and soft in temperament, restore the wealth of the earth by blowing up whirlwinds of doubts and superstitions. 1

Since the mighty cosmic vital power procreate you in the womb of firmament, O cloud-bearing thunder winds (verily, these winds are vitals) you shine like starry heavens. You, the showerer of rain, illuminate the world like flash of lightnings. 2

The winds charge the clouds to move with speed like the racings of swift steeds, or like the boatmen rushing through water channels with their oars. O winds, with golden forms, may you go ahead one-minded badly shaking the trees, with your multicoloured clouds to receive your sustenance. 3

पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥४॥
इन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः ।
आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ॥५॥

pṛikshé tá vísvā bhúvanā vavakshire mitráya vā sádam á jīrádānavaḥ | príshadasvāso anavabhrárādhasa ṛijipyáso ná vayúneshu dhūrshádaḥ || 4 || índhanvabhir dhenúbhī rapṣádūdhabhir adhvasmábhiḥ pathíbhir bhrājadṛishṭayaḥ | á hansáso ná svásarāṇi gantana mádhor mádāya marutaḥ samanyavaḥ || 5 ||

॥२०॥

आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ॥६॥
तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितयद्दिवेदिवे ।
इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥७॥
यद्युञ्जते मरुतो रुक्मवक्षसोऽश्वान्रथेषु भग आ सुदानवः ।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ॥८॥
यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हन्तना वधः ॥९॥

á no bráhmāṇi marutaḥ samanyavo narám ná sáṅsaḥ sávanāni gantana | ásvām iva pipyata dhenúm údhani kártā dhíyaṃ jaritré vájapesasam || 6 || tám no dāta maruto vājínaṃ rátha āpānám bráhma citáyad divé-dive | ísham stotṛíbhyo vṛijáneshu kāráve saním medhám árishṭaṃ dushṭáraṃ sáhaḥ || 7 || yád yuñjáte marúto rukmávakshasó 'svān rátheshu bhága á sudánavaḥ | dhenúr ná sísve svásareshu pinvate jánāya rātáhavishe mahím ísham || 8 || yó no maruto vṛikátāti mártyo ripúr dadhé vasavo rákshata risháḥ | vartáyata tápushā cakríyābhí tám áva rudrā aṣáso hantanā vádhaḥ || 9 ||

They, the cloud-bearing winds, are quick in giving waters to all places, as friends offer help to their friends. They bear dappled clouds as their steeds; their gifts are never small; seated in their chariots, they go straight ahead. 4

O learned mortals (for they are verily vitals) of one mind, may you come like full-uddered cow, with enlightenment like shining lances. May you come for the divine enjoyment, just as swans fly to their nests. 5

O learned mortals, moving with one common directive, may you come to the place of learning and worship, adored by all. May you be enriched with benevolence, like the udders of milch cow or a mare, and for the singer grace the songs with rich rewards. 6

Grant us, O benevolent mortals, the vigour which may lead our toil to success and that hymn which daily reaches and glorifies supreme God. May you grant food for the singers in the midst of their followers, and also liberality, wisdom, unimpaired invincible vigour. 7

When the golden-breasted learned mortals (verily they are vitals) yoke their horses to their chariots to participate in the auspicious occasions of providing learning, they promise to procure rich nourishment to the offerer of devotional homage, as the milch cow does to her young calf. 8

O mortals, the granter of shelter, (for they are vitals), may you, protect us from the malignity of the man who cherishes wolf-like enmity against us; encompass him with your burning diseases; may you save us from injury and strike down the weapon of the cursing enemy. 9

चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।
यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः ॥१०॥

citrám tád vo maruto yáma cekite príṣnyā yád ū́dhar ápy āpáyo duhúḥ | yád vā nidé návamānasya rudriyās tritám járāya juratám adābhyāḥ || 10 ||

॥२१॥ तान्वो महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृथे हवामहे ।
हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे ॥११॥
ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥१२॥
ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम् ॥१३॥
ताँ इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि ।
त्रितो न यान्पञ्च होतॄनभिष्टय आववर्तदवराञ्चक्रियावसे ॥१४॥
यया रध्रं पारयथात्यंहो यया निदो मुञ्चथ वन्दितारम् ।
अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जिगातु ॥१५॥

tā́n vo mahó marúta evayā́vno víshṇor eshásya prabhṛithé havāmahe | híraṇyavarṇān kakuhā́n yatásruco brahmaṇyántaḥ ṣáṅsyam rā́dha īmahe || 11 || té dáṣagvāḥ prathamā́ yajñám ūhire té no hinvantūsháso vyùshṭishu | ushā́ ná rāmī́r aruṇaír áporṇute mahó jyótishā ṣucatā́ góarṇasā || 12 || te kshoṇíbhir aruṇébhir nā́ñjíbhī rudrā́ ṛitásya sádaneshu vāvṛidhuḥ | niméghamānā átyena pā́jasā suṣcandrám várṇam dadhire supéṣasam || 13 || tā́ṅ iyānó máhi várūtham ūtáya úpa ghéd enā́ námasā gṛiṇīmasi | tritó ná yā́n páñca hótṛīn abhíshṭaya āvavártad ávarāñ cakríyā́vase || 14 || yáyā radhrám pārayatháty áṅho yáyā nidó muñcátha vanditā́ram | arvā́cī sā́ maruto yā́ va ūtír ó shú vāṣréva sumatír jigātu || 15 ||

O mortals, brave and gallant, your marvellous energy is well-known, whereby seizing the udder of interspaee, you milk it for your friends, and destroy your revilers of faithful adorables. 10

We call upon those learned dedicated mortals (for they are vitals) who willingly attend the worship offered to the all-pervading Lord. May we, singing our hymns and raising our well-kept, golden-hued pre-eminent ladles of the fire-ritual, invoke them for the wealth which all extol. 11

The master minds controlling ten sense organs are the first who bring offerings to the divine powers. May they inspire us at the breaking of dawn. With the blazing light of their hymns, surging with wisdom, they uncover the truth concealed under the dark covers of evil, obstructing the light of truth, as the dawns uncover the dark shadow of night by her ruddy rays. 12

Those cosmic vital powers have grown powerful, abiding by the eternal laws of nature, roaring in rhythmic tunes and decorating clouds with golden colour. Showering rains with vigour, they assume a lovely and well-decorated complexion. 13

We praise with reverence and humility those five excellent invokers (five vital breaths) for great protection and praise them with this hymn for support. May the seer of three comforts (physical, mental and spiritual) bring them here with him in the chariot (of vital complex) for superior help and favour. 14

May your favour, O vital mortals, with which you help the meek during a calamity and with which you liberate your admirers from reproach, be turned hereward. May your grace come to us well like a lowing cow (towards her calf). 15

(३५) पञ्चत्रिंशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । अपां नपात् देवता । त्रिष्टुप् छन्दः ॥

॥२२॥ उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे ।
अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि ॥१॥
इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत् ।
अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ॥२॥
समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः ॥३॥

35.

Úpem asrikshi vājayúr vacasyā́m cáno dadhīta nādyó gíro me | apā́ṃ nápād āsuhémā kuvít sá supéṣasas karati jóshishad dhí || 1 || imā́ṃ sv àsmai hridá ā́ sútashṭam mántraṃ vocema kuvíd asya védat | apā́ṃ nápād asuryà-sya mahnā́ víṣvāny aryó bhúvanā jajāna || 2 || sám anyā́ yánty úpa yanty anyā́ḥ samānám ūrvā́ṃ nadyàḥ priṇanti | tám ū ṣúciṃ ṣúcayo dīdivā́ṅsam apā́ṃ nápātam pári ta-sthur ā́paḥ || 3 ||

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥४॥
अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषन्त्यन्नम् ।
कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् ॥५॥

tám ásmerā yuvatáyo yúvānam marmri-jyámānāḥ pári yanty ā́paḥ | sá ṣukrébhiḥ ṣíkvabhī revád asmé dīdā́yānidhmó ghritánirṇig apsú || 4 || asmaí tisró avyathyā́ya nā́rīr devā́ya devī́r didhishanty ánnam | krítā ivópa hí prasarsré apsú sá pīyū́shaṃ dhayati pūrvasū́nām || 5 ||

35

I recite this poem for obtaining prosperity. May the hydrodynamic power lying latent in the flowing stream, be wealth-giver, to me, the reciter. May this impetuous electric power so utilized be decoratingly useful to me. 1

Let us sing well, in its appreciation this poem which has been well-fashioned out from the heart; who can say whether it would be appreciated ! The hydrodynamic power, the noble Nature's force, has generated good many things existing by its supreme might. 2

Some waters collect together, other's join them. As rivers they flow together to a common reservoir (ocean). The pure waters have gathered round the hydrodynamic power, pure and shining. 3

The young and modest waters, the bashful maidens, wait upon that youthful hydrodynamically produced fire repeatedly decorating him. He (the fire) has richly shone for us with his brilliant and powerful limbs in the midst of waters, unfed with fuel and yet shining as if nourished by butter. May all this bring abundance to us. 4

To this unshakable divine power (hydrodynamic), the three divine females (wisdom, speech and culture) personified, supply the sustaining elements. This power is formed, as if, in waters, but is utilized far and wide. He (the personified hydrodynamic power) enjoys the ambrosia of gravitational energy, already acting thereupon from before hand. 5

॥२३॥ अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः संपृचः पाहि सूरीन् ।
आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि ॥६॥
स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति ।
सो अपां नपादूर्जयन्नप्स्व१न्तर्वसुदेयाय विधते वि भाति ॥७॥
यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति ।
वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः ॥८॥
अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः ॥९॥
हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥१०॥

áṣvasyấtra jánimāsyá ca svàr druhó risháḥ sampŕícaḥ pāhi sūrín | āmásu pūrshú paró apramṛishyáṃ nárātayo ví naṣan nánṛitāni || 6 || svá ấ dáme sudúghā yásya dhenúḥ svadhấm pīpāya subhv ánnam atti | só apấṃ nápād ūrjáyann apsv àntár vasudéyāya vidhaté ví bhāti || 7 || yó apsv ấ ṣúcinā daívyena ṛitávājasra urviyấ vibhắti | vayấ íd anyấ bhúvanāny asya prá jāyante vīrúdhaṣ ca prajábhiḥ || 8 || apấṃ nápād ấ hy ásthād upástham jihmánām ūrdhvó vidyútaṃ vásānaḥ | tásya jyéshṭham mahimánaṃ váhantīr híraṇyavarṇāḥ pári yanti yahvíḥ || 9 || híraṇyarūpaḥ sá híraṇyasaṃdṛig apấṃ nápāt séd u híraṇyavarṇaḥ | hiraṇyáyāt pári yóner nishádyā hiraṇyadấ dadaty ánnam asmai || 10 ||

॥२४॥ तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपाम् ।
यमिन्धते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य ॥११॥

tád asyánīkam utá cáru nấmāpīcyàṃ vardhate náptur apấm | yám indháte yuvatáyaḥ sám itthấ híraṇyavarṇaṃ ghṛitám ánnam asya || 11 ||

In him (the hydrodynamic power) lies the source of mechanical horse-power, and also of other advantages. May you defend the pious patrons against malice and oppression (utilization for defence purpose). Neither the enemies nor the untruthful vilains would be blessed by this energy, whether abiding in the immature or mature waters. 6

He, the hydrodynamic power personified, abides in his own dwelling; he is a cow which can be easily milked; he augments the nectar, and eats the sacrificial food. He gathering strength (high driving or propelling forces) in the midst of waters, shines for the sake of conferring wealth upon the worshipper (the person or the organization harnessing the energy). 7

All other creatures and the creepers with their offspring are indeed born forth as the branches of this hydro-dynamic energy, who, untired and holy, shines abundantly in the midst of waters and vegetation with his pure and divine lustre. 8

The hydrodynamic energy, arrayed in lightning, ascends in the midst of curled clouds. The flowing clouds of golden colour surround him, carrying with them his exceeding glory. 9

The hydrodynamic energy in the form of fire and lightning has a golden form and a golden appearance; he (personi-fied) indeed has the same golden complexion even when he is enshrined on the altar away from his golden home. The givers of gold offer him his sacrificial food. 10

The hidden face and lovely name of this eternal fluid-dynamic energy grow powerful. Golden-coloured water (or butter) is the food of this fire divine and as such, the youthful waters of the aerial ocean enkindle him well here. 11

अस्मै बहूनामवमाय सख्ये यज्ञैर्विधेम नमसा हविर्भिः ।
सं सानु मार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वन्द ऋग्भिः ॥१२॥
स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति ।
सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥१३॥
अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम् ।
आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः ॥१४॥
अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम् ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥१५॥

asmaí bahūnám avamáya sákhye yajñaír vidhema námasā havírbhiḥ | sám sánu márjmi dídhishāmi bílmair dádhāmy ánnaiḥ pári vanda ṛigbhíḥ || 12 || sá īṃ vríshājanayat tásu gárbhaṃ sá īṃ śíśur dhayati táṃ rihanti | só apáṃ nápād ánabhimlātavarṇo 'nyásyeveha tanvā̀ vivesha || 13 || asmín padé paramé tasthiváṅsam adhvasmábhir viśváhā dīdiváṅsām | ā́po náptre ghṛitám ánnaṃ váhantīḥ svayám átkaiḥ pári dīyanti yahvī́ḥ || 14 || áyāṅsam agne sukshitím jánāyā́yāṅsam u maghávadbhyaḥ suvṛiktím | víśvaṃ tád — || 15 ||

(३६) षट्त्रिंशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । (१) प्रथमर्च इन्द्रो मधुश्च, (२) द्वितीयाया मरुतो माधवश्च, (३) तृतीयायास्त्वष्टा शुक्रश्च, (४) चतुर्थ्या अग्निः शुचिश्च, (५) पञ्चम्या इन्द्रो नभश्च, (६) षष्ठ्याश्च मित्रावरुणौ नभस्यश्च देवताः । जगती छन्दः ॥

॥२५॥ तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः ।
पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे ॥१॥

36.

Túbhyaṃ hinvānó vasishṭa gā́ apó 'dhukshan sīm ávibhir ádribhir náraḥ | píbendra svā́hā práhutaṃ váshaṭ-kṛitaṃ hotrā́d ā́ sómam prathamó yá ī́śishe || 1 ||

Let us wait upon this nearest friend among the many with the sacrifices, a prayer and offerings. I decorate his high place (the establishment), feed him with chips of wood, support him with food and exalt him with songs. 12

He is his own revealer and sows the seed of plasma in the vast expanse of universe. He indeed draws life-giving element from them and they lick him. That fluid-dynamic energy with unfaded effulgence, here unites as it were with other manifested forms of divine powers (energies). 13

The great waters bearing rich nourishment to feed their offspring flow and surround him who in his supreme position is resplendent with the rays that never perish. 14

O most adorable and effulgent Lord, the giver of good homes, I have come to you for the prosperity of my people; I have come with a good hymn for the sake of procuring opulence from you. May all auspicious gifts which Nature's bounties can give to others be ours. May we, surrounded by brave followers, loudly praise you, O Divine, in this sacrificial assembly. 15

36

O resplendent Lord, the first and foremost to rule, we invoke you by presenting these sweet songs which the poets have composed, just as a herbal oblation is pressed with stone and filtered through wool with great effort. Accept these sweet emotional expressions of homage presented by the priests with the exclamation SVAHA and VASAT (two forms of HAILS). 1

यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिर्यामञ्छुभ्रासो अञ्जिषु प्रिया उत ।
आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः ॥२॥
अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥३॥
आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि ॥४॥

yajñaíḥ sámmiṣlāḥ príshatībhir ṛishṭíbhir yámañ chubhráso añjíshu priyá́ utá | āsádyā barhír bharatasya sūnavaḥ potrád ā́ sómam pibatā divo naraḥ || 2 || améva naḥ suhavā ā́ hí gántana ní barhíshi sadatanā ráṇishṭana | átha mandasva jujushāṇó ándhasas tváshṭar devébhir jánibhiḥ sumádgaṇaḥ || 3 || ā́ vakshi devā́ñ ihá vipra yákshi coṣán hotar ní shadā yónishu trishú | práti vīhi prásthitam somyám mádhu píbā́gnīdhrāt táva bhāgásya tṛipṇuhi || 4 ||

एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः ।
तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥५॥
जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु ।
अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥६॥

eshá syá te tanvò nṛimṇavárdhanaḥ sáha ójaḥ pradívi bāhvór hitáḥ | túbhyaṃ sutó maghavan túbhyam ábhṛitas tvám asya bráhmaṇād ā́ tṛipát piba || 5 || jushéthāṃ yajñám bódhataṃ hávasya me sattó hótā nivídaḥ pūrvyā́ ánu | áchā rā́jānā náma ety ā́vṛitam praṣāstrád ā́ pibataṃ somyám mádhu || 6 ||

O cloud bearing winds, engaged in sacred dedications, while on march, you appear as if adorned with spears and riding on spotted (mares or deers), and wearing attractive ornaments; you are offsprings of the luminous heaven, leaders in the firmament. May you be enshrined in the firmament and accept sweet songs from the pious priests. 2

O Nature's forces, easy to be invoked, may you all come to us together; and the supreme Lord, architect of the universe also come to bless us, along with the brilliant consorts in this creation, with Nature's bounties and their divine counterparts and may you accept our loving prayers and be delighted. 3

Bring Nature's bounties here and worship them, O poet sage, and ardently longing for them please be seated in the three spheres (knowledge, words and action). O inviting priest, cherish the sweetness of the blissful elixir —spiritual experience—realized by you through the aid of the preceptor and be satisfied with your share. 4

O bounteous person, here is the augmenter of vigour of your body, and the strength of your arms. It has been specially prepared and dedicated to you. May you accept it, as offered to you by the high priest, and rejoice. 5

O persons incharge of the departments of welfare and benevolence, may both of you be gratified with this public functions of service, and hear our invocations. Our priest, sitting on the dias, is repeatedly reciting the traditional benedictions. May you come to accept our greetings offered to you by our director. 6

(३७) सप्तत्रिंशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य शौनको गृत्समद ऋषिः । (१-४) प्रथमादिचतुर्ऋचां द्रविणोदाः,
(५) पञ्चम्या अश्विनौ, (६) षष्ठ्याश्चाग्निर्देवताः । जगती छन्दः ॥

॥१॥ मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् ।
तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥१॥
यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥२॥

37.

Mándasva hotrád ánu jósham ándhasó 'dhvaryavaḥ sá pūrṇáṃ vashty āsícam | tásmā etám bharata tadvaṣó dadír hotrád sómaṃ draviṇodaḥ píba ṛitúbhiḥ || 1 || yám u púrvam áhuve tám idáṃ huve séd u hávyo dadír yó náma pátyate | adhvaryúbhiḥ prásthitaṃ somyám mádhu potrát sómaṃ d. p. ṛi. || 2 ||

मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥३॥
अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम् ।
तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ॥४॥

médyantu te váhnayo yébhir íyasé 'rishaṇyan vīḷayasvā vanaspate | āyū́yā dhṛishṇo abhigū́ryā tváṃ neshṭrát sómaṃ — || 3 || ápād dhotrád utá potrád amattotá neshṭrád ajushata práyo hitám | turī́yam pátram ámṛiktam ámartyaṃ draviṇodáḥ pibatu drāviṇodasáḥ || 4 ||

37

O Lord, bestower of gifts, may you by gratified by the dedicated service offered by your devotee (food-liberations offered by the priest). O priests, He loves homage in abundance. Offer this to Him; in consequence He would be your benefactor. May you, O Lord, accept the elixir of sweet devotional prayers (as if, the herbal juice) from the cup of invoking priest, appropriate to the seasons. 1

I invite Him today, whom indeed I have invited before; He indeed deserves invocation who is renowned as a benefactor. The sweet expressions of devotion have been presented to you, by the priests. O Lord, the donor of gifts, may you accept the elixir of sweet devotional prayers from the cup of purifying priest who present it, appropriate to the seasons. 2

O donor of gifts and the Lord of vegetation, may these bearers, by whom you are borne along, be gratified. You are always firm, do no injury and are strong, steadfast in your resolves. O showerer of gifts, may you accept the elixir of sweet devotional prayers from the cup of the leading priest, who, uttering the words, presents the spiritual elixir, appropriate to the seasons. 3

Lord, the bestower of gifts, has accepted the sweet devotional elixir from the cup of the invoking priest, from the cup of the purifying priest and as well from the cup of the leading priest. He also equally enjoys the fourth one, undisturbed and immortal from the offerer of gifts (the presiding priest). 4

अर्वाञ्चमद्य यय्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम् ।
पृङ्क्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू ॥५॥
जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् ।
आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने ॥१॥
यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।
सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥२॥

4.

Samíṭ-samit sumánā bodhy asmé ṣucā́-ṣucā sumatím rāsi vásvaḥ | ā́ deva devā́n yajáthāya vakshi sákhā sákhīn sumánā yakshy agne || 1 || yám devā́sas trír áhann āyájante divé-dive váruṇo mitró agníḥ | sémám yajñám mádhumantaṃ kṛidhi nas tánūnapād ghṛitáyonim vidhántam || 2 ||

O illustrious leader of the universe, the seer of all, I celebrate your glories wherewith you become blissfull. You fill the entire creation down from heaven to earth as soon as you get manifested. O fire-divine, you yourself surround all the creatures of the universe and thus provide them protection. 10

Following the deeds of the universally devoted person, one attains greatness (or prosperity). Such a sage alone bestows rewards of noble actions. This fire-divine, adoring both the parents, (heaven and earth), has become manifest, by his own supremacy. 11

4

May you be gracious to us with each kindled wood of fuel, and with every flash grant the boon of prosperity. O fire-divine, may you bring divine powers to help us in our benevolent actions. May you favour your devotees, as friends favour friends. 1

May the fire-divine, the universal protector of bodies, who is devotionally sustained thrice a day, every day, by Nature's bounties like the sun the surveyor during the morning, by terrestrical fire— the adorable, the venerable, during the day and by moon and stars, during the night, enrich the source of our devotional enlightenment with his sweetness and love. 2

प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।
अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥३॥
ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि ।
दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥४॥
सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन ।
नृपेशसो विदथेषु प्र जाता अभी३मं यज्ञं वि चरन्त पूर्वीः ॥५॥

dī́dhitir viṣvávāra jigāti hótāram iḷáḥ prathamáṃ yája-dhyai | áchā námobhir vrishabhám vandádhyai sá devā́n yakshad ishitó yájīyān || 3 || ūrdhvó vāṃ gātúr adhvaré akāry ūrdhvā́ ṣocī́ṅshi prásthitā rájāṅsi | divó va nábhā ny àsādi hótā strinīmáhi devávyacā ví barhíḥ || 4 || saptá hotrāṇi mánasā vriṇāná ínvanto víṣvam práti yann riténa | nripéṣaso vidátheshu prá jātá abhīmáṃ yajñáṃ ví caranta pūrvī́ḥ || 5 ||

॥२३॥ आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे ।
यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः ॥६॥
दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥७॥
आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक्तिस्रो देवीर्बर्हिरेदं सदन्तु ॥८॥

á bhándamāne ushása upāke utá smayete tanvā̀ vírūpe | yáthā no mitró váruṇo jújoshad índro marútvāṅ utá vā máhobhiḥ || 6 || daívyā hótārā prathamá ny ṛiñje saptá pri-kshásaḥ svadháyā madanti | ritáṃ ṣáṅsanta ritám ít tá āhur ánu vratáṃ vratapá dídhyānāḥ || 7 || á bháratī bhára-tībhiḥ sajóshā íḷā devaír manushyèbhir agníḥ | sárasvatī sārasvatébhir arvák tisró devír barhír édáṃ sadantu || 8 ||

May the universally recognized divine wisdom proceed to adore the first invoker of our sacred worship. May we honour the mighty Lord, the showerer of benefits, with our homage. Being urged may He invite the worshipful Nature's bounties to our assistance. 3

The fire is enkindled for both (the householder and the priest) to carry you upwards, in the sacred ritual. Its radiant flames soar aloft to celestial regions. The invoker has his firm seat in the midst of the navel, and the proper cushion mirth have been assigned to the learned participants. 4

Nature's bounties which gratify the universe with rain are invoked during the seven processes of the fire-ritual, when solicited with all sincerety of mind. May the personified Nature's bounties be with us for bringing prosperity in our fire-ritual. 5

Night and dawn, both being praised come here together, smiling in different forms and colours. May divine powers, such as the wind, the ocean, and the lightning (fire from electric and other sources), associated with vital principles, serve us with their glories. 6

Of all the invokers, I propitiate the two foremost celestial ones, fire and the sun. The seven ministering priests also please them by the offerings of milk, butter and food. Honouring the eternal truths and meditating on these laws, they always abide by them. 7

May the divine culture together with the masters of cultural studies, the divine wisdom, together with wise, and the divine speech, together with eloquent speakers come to us and all these three divine virtues be enshrined in our hearts. 8

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥९॥
वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥१०॥
आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥११॥

tán nas turípam ádha poshayitnú déva tvashṭar ví rarāṇáḥ syasva | yáto vīráḥ karmaṇyàḥ sudáksho yuktágrāvā jấyate devákāmaḥ || 9 || vánaspaté 'va sṛijópa devấn agnír havíḥ ṣamitấ sūdayāti | séd u hótā satyátaro yajāti yáthā devánāṃ jánimāni véda || 10 || ấ yāhy agne samidhānó arvấñ índreṇa devaíḥ saráthaṃ turébhiḥ | barhír na āstām áditiḥ suputrá sváhā devấ amṛ́tā mādayantām || 11 ||

(५) पञ्चमं सूक्तम्

(११) एकादशर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥२४॥ प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनाम् ।
पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः ॥१॥
प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः ।
पूर्वीर्ऋतस्य संदृशश्चकानः सं दूतो अद्यौदुषसो विरोके ॥२॥

5.

Práty agnír usháṣas cékitānó 'bodhi vípraḥ padavíḥ kavīnám | pṛithupájā devayádbhiḥ sámiddhó 'pa dvấrā támaso váhnir āvaḥ || 1 || préd v agnír vāvṛidhe stómebhir gīrbhí stotṝṇáṃ namasyà ukthaíḥ | pūrvī́r ṛitásya saṃdṛíṣaṣ cakānáḥ sáṃ dūtó adyaud usháso viroké || 2 ||

O supreme architect of creation, may you be generous to grant us strength and vigour so that we give birth to such a child who is intelligent, ever-active, proficient in sculpture and beloved amongst enlightened persons. 9

O master of forests, may you send forth Nature's bounties to help us. May the sustaining fire-divine ripen our corn for offerings. May He, the embodiment of great truths be our invoker, since He alone knows the divine secrets. 10

O fire-divine, kindled into flames, may you, associated with the rays of the sun and other divine powers, come here speedily as if mounted on the fast-running chariot. May the mother earth cherish us in our sacred works. May the immortal environmental divine powers appreciate our devotional exclamation 'Svaha'. 11

5

The fire-divine, the eloquent leader of the wise and the enlightened sages is awakened to greet the dawns. He, kindled by the pious priests, throws open the gates of darkness with his far-spread lustre. 1

The adorable fire-divine is magnified by laudations, sacred hymns, and praises sung by the chanters. Like eternal truths, the messenger, particularly shines forth at the first flash of dawn. 2

अधाय्यग्निर्मानुषीषु विक्ष्व१पां गर्भो मित्र ऋतेन साधन् ।
आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनाम् ॥३॥
मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥४॥
पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥५॥

ádhāyy agnír mā́nushīshu vikshv àpā́ṃ gárbho mitrá ṛiténa sā́dhan | ā́ haryató yajatáḥ sā́nv asthād ábhūd u vípro hávyo matīnā́m || 3 || mitró agnír bhavati yát sámiddho mitró hótā váruṇo jātávedāḥ | mitró adhvaryúr ishiró dámūnā mitráḥ síndhūnām utá párvatānām || 4 || pā́ti priyáṃ ripó ágram padáṃ véḥ pā́ti yahváṣ cáraṇaṃ sū́ryasya | pā́ti nā́bhā saptáṣīrshāṇam agníḥ pā́ti devā́nām upamā́dam ṛishváḥ || 5 ||

॥२५॥ ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन् ॥६॥
आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः ।
दीद्यानः शुचिर्ऋष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥७॥
सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आप इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ॥८॥

ṛibhúṣ cakra ī́ḍyaṃ cā́ru nā́ma víṣvāni devó vayúnāni vidvā́n | sasásya cárma ghṛitávat padáṃ vés tád íd agní rakshaty áprayuchan || 6 || ā́ yónim agnír ghṛitávantam asthāt prithúpragāṇam uṣántam uṣānáḥ | dī́dyānaḥ ṣúcir ṛishváḥ pāvakáḥ púnaḥ-punar mātárā návyasī kaḥ || 7 || sadyó jātá óshadhībhir vavakshe yádī várdhanti prasvò ghṛiténa | ā́pa iva pravátā ṣúmbhamānā urushyád agníḥ pitrór upásthe || 8 ||

The fire-divine is generated amidst cosmic waters through eternal truths. He is the friend of the pious and is enshrined in the homes of men. Loved and adored he mounts upon the summit (the altar) and becomes worthy of our invocations. 3

The fire-divine when duly enkindled becomes friend; and as friend, he becomes invoker, venerable, and knows of all that exists. And again as friend, he functions as an active priest, an inspirer and disciplined. Verily he is benefactor of flowing rivers and moving clouds. 4

The graceful fire-divine guards the lovely extensive summit of the moving earth. Mighty, he guards the daily course of the sun. At the navel of the earth, (i.e. between heaven and earth) he guards the seven-fold vital principles and sublime deeds of pious devotees. 5

The wise fire-divine knows all that is to be known; he shines both in his latent and manifest forms, and assumes a fair name for adoration. The fire-divine guards with care that spiritual bliss which flows unceasingly. 6

The blazing fire-divine, which is refulgent, pure, sublime, and purifier, enters his bright sweet extensive chamber and provides fresh life to his parents, i.e. earth and heaven. 7

As soon as generated he ascends to heights and the tender shoots of plants flourish along with descending waters. May this fire-divine protect us while he grows in the bosom of his parents (heaven and earth). 8

उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः ।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥९॥
उदस्तम्भीत्समिधा नाकमृष्वो३ऽग्निर्भवन्नुत्तमो रोचनानाम् ।
यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ॥१०॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥

úd u shṭutáḥ samídhā yahvó adyaud várshman divó ádhi nábhā pṛithivyā́ḥ | mitró agnír ī́ḍyo mātaríṣvā́ dūtó vakshad yajáthāya devā́n || 9 || úd astambhīt samídhā nā́kam ṛishvò 'gnír bhávann uttamó rocanā́nām | yádī bhṛ́gubhyaḥ pári mātaríṣvā gúhā sántaṃ havyavā́haṃ samīdhé || 10 || íḷām agne — || 11 ||

(६) षष्ठं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥२६॥ प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।
दक्षिणावाड्वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥१॥
आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिवश्चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ॥२॥
द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय ।
यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शुक्रमर्चिः ॥३॥

6.

Prá kāravo mananā́ vacyámānā devadrī́cīṃ nayata devayántaḥ | dakshiṇāvā́ḍ vājínī prā́cy eti havír bháranty agnáye ghṛitā́cī || 1 || ā́ ródasī apṛiṇā jā́yamāna utá prá rikthā ádha nú prayajyo | diváṣ cid agne mahinā́ pṛithivyā́ vacyántāṃ te váhnayaḥ saptájihvāḥ || 2 || dyaúṣ ca tvā pṛithivī́ yajñíyāso ní hótāraṃ sādayante dámāya | yádī víṣo mā́nushīr devayántīḥ práyasvatīr ī́ḷate ṣukrám arcíḥ || 3 ||

Being extolled, the youthful fire-divine shines with kindled fuel to the summit of the celestial region and to the navel of the earth. May he, the benefactor, the adorable, the cosmic breath, bring here Nature's bounties to help us in the accomplishment of our selfless noble deeds. 9

For the sake of enlightened sages, the cosmic wind generates the fire-divine, the bearer of oblations, so far concealed in the caves. Now himself having become the best of all luminaries, and rising aloft he supports the firmament with his radiance. 10

O fire-divine, may you grant wisdom to your most devoted worshipper and may we have sons and grandsons to perpetuate our race. May your gracious favour ever remain with us. 11

6

Inspired with the divine urge, O devout singers, bring forward the divinity-approaching ladle directed towards the ritual fire. Charged with sacrificial food and brought to the forefront (east), from the south and filled with butter, it goes forth presenting an offering to the fire. 1

From your manifestation, O cosmic fire, you fill both heaven and earth, O most adorable, you excell them. May your seven-coloured flames roll on, far and wide, beyond the expanses of heaven and earth. 2

Whenever human race, aspiring to be divine and bringing offerings, praises your splendid lustre, heaven and earth, and adorable Nature's bounties, accept you as their prime invoker in the cosmic sacrifice. 3

महान्त्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः ।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥४॥
व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥५॥

mahán sadhásthe dhruvá á níshatto 'ntár dyávā máhine háryamāṇaḥ | áskre sapátnī ajáre ámṛikte sabardúghe urugāyásya dhenú || 4 || vratá te agne maható maháni táva krátvā ródasī á tatantha | tvám dūtó abhavo jáyamānas tvám netá vṛishabha carshaṇīnám || 5 ||

॥२७॥ ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान्देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः ॥६॥
दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ॥७॥
उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥८॥
ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥९॥

ritásya vā keśínā yogyábhir ghṛitasnúvā róhitā dhurí dhishva | áthā vaha deván deva víśvān svadhvará kṛiṇuhi jātavedaḥ || 6 || diváś cid á te rucayanta roká ushó vibhātír ánu bhāsi pūrvíḥ | apó yád agna uśádhag váneshu hótur mandrásya panáyanta deváḥ || 7 || uraú vā yé antárikshe mádanti divó vā yé rocané sánti deváḥ | úmā vā yé suhávāso yájatrā āyemiré rathyo agne áśvāḥ || 8 || aíbhir agne saráthaṃ yāhy arváñ nānārathám vā vibhávo hy áśvāḥ | pátnīvatas triṅśátaṃ tríṅś ca deván anushvadhám á vaha mādáyasva || 9 ||

The great and beloved cosmic fire is surely established between heaven and earth. They (heaven and earth) may be regarded as powerful fellow brides (of the sun), or they may be compared with the two milch cows of the wide extending cosmic fire, furnishing their uninjuring nectar. 4

Great are your deeds, O great cosmic fire; you have fully spread abroad heaven and earth by your supremacy, as soon as you get manifest. You become a messenger between the two worlds and mighty leader of men. 5

May you harness with traces to your cosmic car, your long-maned ruddy steeds (solar rays) to proceed to participate in the cosmic sacrifice. O divine knower of all that is born, may you take along with you Nature's bounties and make them propitious to the divine oblation. 6

O blissful fire, when you abide in the forests and with your blazes, you dry up water at your pleasure, your brilliant lights shine right down from sky, and you beam through many a shining dawn. The learned devotees command your performance whilst you burn these forests. 7

(Along with) the divine powers who rejoice in the vast mid-region or dwell in the heaven's realm of brightness, or those, who are holy helpers and prompt to hear our calls, or who, whilst on their chariots turn their horses towards us; O cosmic fire, (may you approach us). 8

May you approach us with these, borne on one car, or on many, for your steeds (beams) are very powerful. May you then bring thirty and three divines together with their consorts (i.e. their virtues, attributes), according to your sweet will, and rejoice. 9

स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।
प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥१०॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥

sá hótā yásya ródasī cid urví yajñám-yajñam abhí vridhé grinītáh | prácī adhvaréva tasthatuh suméke ritávarī ritájātasya satyé || 10 || íḷām agne — || 11 ||

(७) सप्तमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१॥ प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घमायुः प्रयक्षे ॥१॥
दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहन्तीः ।
ऋतस्य त्वा सदसि क्षेमयन्तं पर्येका चरति वर्तनिं गौः ॥२॥
आ सीमरोहत्सुयमा भवन्तीः पतिश्चिकित्वान्रयिविद्रयीणाम् ।
प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः ॥३॥

7.

Prá yá ārúh sitiprishthásya dhāsér á mātárā vivisuh saptá vánīh | parikshítā pitárā sám carete prá sarsrāte dīrghám áyuh prayákshe || 1 || divákshaso dhenávo vríshno ásvā devír á tasthau mádhumad váhantīh | ritásya tvā sádasi kshemayántam páry ékā carati vartaním gaúh || 2 || á sīm arohat suyámā bhávantīh pátis cikitván rayivíd rayīnám | prá nílaprishtho atasásya dhāsés tá avāsayat purudhápratīkah || 3 ||

He is the priest at whose repeated worship, even the vast heaven and earth sign out for the sake of expansion and evolution in the cosmic sacrifice. They, fair holy and true, stand to offer worship to Him who is born of truth, and is truth personified. 10

O fire-divine, may you grant wealth and wisdom to your most devoted worshipper; and may we have sons and grandsons who perpetuate our race. May your gracious favour ever remain with us. 11

7

The radiations of the white-backed, all-sustaining cosmic fire, have arisen and pervaded the spacious heaven and earth, and seven channels of speeches. The encompassing parents—heaven and earth—co-operate with him, and bestow long life for the sake of assiduous worship. 1

The sky-traversing beams of the showerer of benefits are the milch kine of the cosmic fire. They dwell in sweet streams of rivers. O fire, desirous of response, one of your divine attributes—the speech, always glorifies you pacifying your flames in the abode of everlasting truth. 2

The solar fire, the careful selector of treasures, mounts upon the well-trained mares (beams). The blue-backed and multi-faced solar corona grants them a good place of rest for cherishing of their rapid speed. 3

महि त्वाष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति ।
व्यङ्गेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश ॥४॥
जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति ।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥५॥

máhi tvāshṭrám ūrjáyantīr ajuryám stabhūyámānam vaháto vahanti | vy áñgebhir didyutānáḥ sadhástha ékām iva ródasī á vivesa || 4 || jānánti vríshṇo arushásya sévam utá bradhnásya sásane raṇanti | divorúcaḥ surúco rócamānā íḷā yésham gáṇyā máhinā gíḥ || 5 ||

॥२॥ उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम् ।
उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष ॥६॥
अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः ।
प्राञ्चो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥७॥
दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥८॥
वृषायन्ते महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुयामाः ।
देव होतर्मन्द्रतरश्चिकित्वान्महो देवान्रोदसी एह वक्षि ॥९॥

utó pitríbhyām pravídānu ghósham mahó mahádbhyām anayanta sūshám | ukshá ha yátra pári dhánam aktór ánu svám dháma jaritúr vavāksha || 6 || adhvaryúbhiḥ pañcábhiḥ saptá víprāḥ priyám rakshante níhitam padám véḥ | práñco madanty ukshánọ ajuryá devá devánām ánu hí vratá gúḥ || 7 || daívyā hótārā prathamá — || 8 || vrishāyánte mahé átyāya pūrvír vríshṇe citráya raṣmáyaḥ suyāmáḥ | déva hotar mandrátaraṣ cikitván mahó deván ródasī éhá vakshi || 9 ||

Invigorating him, who is mighty and immortal source of creation, the radiant waves carry him forward. The fire-divine, radiant with his various forms in celestial region, enters both the worlds as if they were one. 4

Men comprehend the blessings of the imperishable showerer of benefits, and exult in the command of the powerful fire-divine; their frequent, earnest, bright and radiant hymns are illuminating heaven. 5

Verily the devotees get knowledge of two mighty parents, heaven and earth, and by glorifying them aloud bring strength to the fire-divine. Then the fire-divine, the bestower of bliss, radiates his own light to the worshipper to dispel the darkness of night. 6

Seven sages with five priests guard the firmly settled place which is prepared for the fast moving sacrificial fire. The undecaying divine sages with their faces turned to the east, sprinkling the lipations-rejoice as they themselves follow the path of godly sages. 7

I propitiate the two first divine offerers of worship; the seven priests rejoice in their own ecstasy. The illustrious celebrators of holy worship reciting the praises call him the true protector of eternal law. They speak of truth praising the *truth-eternal*, and declaring that living unto the truth is accepting the truth. 8

O divine invoker of Nature's bounties, the vast and wide spreading beams shed moisture for you, the powerful, the victorious, the splendourous and the showerer of benefits. May you, the omniscient and bliss-bestowing lord, bring here nature's bounties, heaven and earth. 9

पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः ।
उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥१०॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥

prikshápraya̲jo dravinah suvácah suketáva usháso revád ūshuh | utó cid agne mahiná prithivyáh kritám cid énah sám mahé daṣasya || 10 || íḷām agne — || 11 ||

(८) अष्टमं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । (१–५) प्रथमादिपञ्चर्चां यूपः, (६–१०) षष्ठ्यादिपञ्चानां यूपाः, (८) अष्टम्या विश्वे देवा वा, (११) एकादश्याश्च व्रश्चनो देवताः । (१–२, ४–६, ८–११) प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्यादितृचस्याष्टम्यादिचतसृणाञ्च त्रिष्टुप्, (३, ७) तृतीयासप्तम्योश्चानुष्टुप् छन्दसी ॥

॥३॥ अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ॥१॥
समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अजरं सुवीरम् ।
आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय ॥२॥
उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि ।
सुमिती मीयमानो वर्चो धा यज्ञवाहसे ॥३॥

8

Añjánti tvám adhvaré devayánto vánaspate mádhunā daívyena | yád ūrdhvás tíshṭhā drávineha dhattād yád vā ksháyo mātúr asyá upásthe || 1 || sámiddhasya ṣráyamāṇah purástād bráhma vanvānó ajáram suvíram | āré asmád ámatim bádhamāna úc chrayasva mahaté saúbhagāya || 2 || úc chrayasva vanaspate várshman prithivyá ádhi | súmitī mīyámāno várco dhā yajñávāhase || 3 ||

O ever-moving lord, may the dawns gleam forth in splendour for us; these are full of oblations, full of pious prayers and full of auspicious signs that confer wealth. O fire-divine, may you with the might of your diffusive flame consume all our sins committed. 10

O fire-divine, may you grant wealth and wisdom to your most devoted worshipper; and may we have sons and grandsons who perpetuate our race. May your gracious favour ever remain with us. 11

8

O Sun, the lord of beams, the faithful devotees aspiring to be divine annoint you with divine sweet melodies at the worship; whether you are at a lofty place (at the zenith) or on the lap of your mother earth (i.e. at the horizon), grant us riches. 1

May you rising on the east go up further high for the sake of our great fortune, dispensing food as the source of undecaying health and excellent progeny. May you keep off our enemy at a distance and go up high for great auspiciousness. 2

O Sun, the lord of radiance, be exalted on the loftiest spot of the earth, and may you give splendour, fixed and measured well, to him who toils on the soil. 3

युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः ॥४॥
जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः ।
पुनन्ति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचम् ॥५॥

yúvā suvā́sāḥ párivīta ā́gāt sá u ṣréyān bhavati jā́yamānaḥ | tám dhī́rāsaḥ kaváya ún nayanti svādhyò mánasā devayántaḥ || 4 || jātó jāyate sudinatvé áhnām samaryá ā́ vidáthe várdhamānaḥ | punánti dhī́rā apáso manīshā́ devayā́ vípra úd iyarti vā́cam || 5 ||

॥४॥ यान्वो नरो देवयन्तो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ।
ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषन्तु रत्नम् ॥६॥
ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः ।
ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः ॥७॥
आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम् ।
सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम् ॥८॥
हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।
उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यन्ति पाथः ॥९॥

yā́n vo náro devayánto nimimyúr vánaspate svádhitir vā tatáksha | té devā́saḥ sváravas tasthivā́ṅsaḥ prajā́vad asmé didhishantu rátnam || 6 || yé vṛiknā́so ádhi kshámi nímitāso yatásrucaḥ | té no vyantu vā́ryam devatrā́ kshetrasā́dhasaḥ || 7 || **ādityā́ rudrā́ vásavaḥ sunīthā́ dyā́vākshā́mā pṛithivī́ antáriksham | sajóshaso yajñám avantu** devā́ ūrdhvám **kṛiṇvantv adhvarásya ketúm** || 8 || **haṅsā́ iva** ṣreṇiṣó yátānāḥ **ṣukrā́ vásānāḥ sváravo na ā́guḥ | unnīyá**mānāḥ **kavíbhiḥ purástād devā́ devā́nām ápi yanti páthaḥ** || 9 ||

Well-robed and beautifully covered and the young (Sun) comes and grows glorious as soon as it springs to life. Steadfast and God-blessed forces, in a most meditating thoughtful manner, upraise him. 4

Born on the horizon of the cosmic sacrifice, it (sun) creates days, so auspicious: steadfast, active, and intelligent devotees consecrate him with wisdom, and the devout worshipper recites praises in his honour. 5

May those splendid timber trees which the God-loving forest-dwellers have firmly planted on the standing posts which their axe have trimmed, bestow upon us wealth and progeny. 6

May those timber posts which have been cut down upon the earth, and which have been fabricated by the craftsmen be helpful in accomplishing benevolent works, and bear our precious gifts to divine powers. 7

May the cosmic divine powers such as sun, wind and life-giving breath afford protection and may heaven and earth and other divine powers cherish our worshipful acts with a common consent. May they raise aloft the banner of our dedicated action of public good. 8

Arrayed in bright garments these timber posts ranging in rows erected by devoted craftsmen on our front, are seen like the row of swans. They being bright proceed, as if, on the path of divine radiance. 9

शृङ्गाणीवेच्छृङ्गिणां सं ददृश्रे चषालवन्तः स्वरवः पृथिव्याम् ।
वाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु ॥१०॥
वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥११॥

sríṅgāṇīvéc chriṅgíṇām sám dadrisre cashā́lavantaḥ sváravaḥ prithivyā́m | vāghádbhir vā vihavé sróshamāṇā asmā́ñ avantu pritanā́jyeshu || 10 || vánaspate satávalso ví roha sahásravalsā ví vayám ruhema | yám tvā́m ayám svádhitis téjamānaḥ praṇinā́ya mahaté saúbhagāya || 11 ||

(९) नवमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । अग्निर्देवता । (१-८) प्रथमाद्यष्टर्चां बृहती, (९) नवम्याश्च त्रिष्टुप् छन्दसी ॥

॥५॥ सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।
अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसम् ॥१॥
कायमानो वना त्वं यन्मातॄरजगन्नपः ।
न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥२॥
अति तृष्टं ववक्षिथाथैव सुमना असि ।
प्रप्रान्ये यन्ति पर्यन्य आसते येषां सख्ये असि श्रितः ॥३॥

9.

Sákhāyas tvā vavrimahe devám mártāsa ūtáye | apā́m nápātam subhágam sudī́ditim suprátūrtim anehásam || 1 || kā́yamāno vanā́ tvám yán mātrī́r ájagann apáḥ | ná tát te agne pramríshe nivártanam yád dūré sánn ihā́bhavaḥ || 2 || áti trishṭám vavakshithā́thaivá sumánā asi | prá-prānyé yánti páry anyá āsate yéshām sakhyé ási sritáḥ || 3 ||

Entire in all parts and girded with iron chains, they appear upon the earth like the horns of horned cattle. Having received laudations from expert craftsmen, may they protect us in the days of our conflicts. 10

O Lord of the wood, may you whom the sharpened hatchet has brought for great auspiciousness, mount up with hundred branches, so that with thousand branches, we may rise to greatness. 11

9

We as your mortal friends choose you, the divine, for our protection. You are imperishable life—force auspicious, resplendent, the best guide and sinless and as such take us across the miseries. 1

You go up to the motherly cosmic ocean through your love to stay in the woods, O cosmic fire, your tarrying away so far has now become unbearable. So, in a moment, may you come to be with us from afar. 2

O God, you exceedingly wish to provide the satisfaction to your worshippers and are well-disposed to them; of those in whose friendship you are cherished, some show steady progress, while others sit around without any. 3

ईयिवांसमति स्रिधः शश्वतीरति सश्चतः ।
अन्वीमविन्दन्निचिरासो अद्रुहोऽप्सु सिंहमिव श्रितम् ॥४॥
ससृवांसमिव त्मनाग्निमित्था तिरोहितम् ।
ऐनं नयन्मातरिश्वा परावतो देवेभ्यो मथितं परि ॥५॥

váṅsam áti srídhaḥ ṣáṣvatīr áti saṣcátaḥ | ánv īm avindan niciráso adrúho 'psú siṅhám iva ṣritám || 4 || sasrivāṅsam iva tmánāgním itthā́ tiróhitam | aínaṃ nayan mātaríṣvā parāváto devébhyo mathitám pári || 5 ||

॥६॥

तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन ।
विश्वान्यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥६॥
तद्भद्रं तव दंसना पाकाय चिच्छदयति ।
त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे ॥७॥
आ जुहोता स्वध्वरं शीरं पावकशोचिषम् ।
आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥८॥
त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥९॥

táṃ tvā mártā agribhṇata devébhyo havyavāhana | víṣvān yád yajñā́ṅ abhipási mānusha táva krátvā yavishṭhya || 6 || tád bhadrám táva daṅsánā pákāya cic chadayati | tvā́ṃ yád agne paṣávaḥ samā́sate sámiddham apiṣarvaré || 7 || ā́ juhotā svadhvarám ṣīrám pāvakáṣocisham | āṣúṃ dūtám ajirám pratnám íḍyaṃ srushṭī́ devā́ṃ saparyata || 8 || tríṇi ṣatā́ trí sahásrāṇy agníṃ triṅṣác ca devā́ náva cāsaparyan | aúkshan ghritaír ástriṇan barhír asmā́ ā́d íd dhótāraṃ ny àsādayanta || 9 ||

The benignant and long lived enlightened ones discover the inner fire hidden in vital regions like a lion in a cave, at the time of their conflict with constantly ravaging internal conflicts. 4

The cosmic wind brings from afar the fire-divine, hidden so far, for the sake of enlightened devotees, by a process of attrition like a father reclaiming his fugitive son. 5

O fire-divine, the bearer of oblations, benefactor of men, most youthful, since you guard all benevolent devotees by your selfless deeds, they accept you as their invoker. 6

O fire-divine, auspicious is your worship, for it inspires faith even in the ignorant person. The herds of cattle gather around you when kindled at the dead of might. 7

May you offer obeiseance to that fire-divine who burns with purifying glow, who is dormant in every fuel, who is a swift messenger, active, immortal and adorable. May you serve him with quiet devotion. 8

Three thousand, three hundred and thirty-nine• countless enlightened men pay homage to the fire-divine. They profusely present loving devotion to Him and enshrine Him in their worshipful hearts and make Him their invoking priest. 9

(१०) दशमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । अग्निर्देवता । उष्णिक् छन्दः ॥

॥७॥ त्वाम॑ग्ने मनी॒षिण॑: स॒म्राजं॑ चर्षणी॒नाम् । दे॒वं मर्ता॑स इन्धते॒ सम॑ध्व॒रे ॥१॥
त्वां य॒ज्ञेष्वृ॒त्विज॒मग्ने॒ होता॑रमीळते । गो॒पा ऋ॒तस्य॑ दीदिहि॒ स्वे दमे॑ ॥२॥
स घा॒ यस्ते॒ ददा॑शति स॒मिधा॑ जा॒तवे॑दसे । सो अ॑ग्ने धत्ते सु॒वीर्यं॒ स पु॑ष्यति ॥३॥
स के॒तुर॑ध्व॒राणा॑म॒ग्निर्दे॒वेभि॒रा ग॑मत् । अ॒ञ्जा॒नः स॒प्त होतृ॑भिर्ह॒विष्म॑ते ॥४॥
प्र होत्रे॑ पू॒र्व्यं वचो॒ऽग्नये॑ भरता बृ॒हत् । वि॒पां ज्योतीं॑षि॒ बिभ्र॑ते॒ न वे॒धसे॑ ॥५॥

10.

Tvám agne manīshíṇaḥ samrā́jam carshaṇīnā́m | devám mártāsa indhate sám adhvaré || 1 || tvā́ṃ yajñéshv ṛitvíjam ágne hótāram īḷate | gopā́ ṛitásya dīdihi své dáme || 2 || sá ghā yás te dádāṣati samídhā jātávedase | só agne dhatte suvī́ryaṃ sá pushyati || 3 || sá ketúr adhvarā́ṇām agnír devébhir ā́ gamat | añjānáḥ saptá hótṛibhir havíshmate || 4 || prá hótre pūrvyáṃ váco 'gnáye bharatā bṛihát | vipā́ṃ jyótīṅshi bíbhrate ná vedháse || 5 ||

॥८॥ अ॒ग्निं व॑र्धन्तु नो॒ गिरो॒ यतो॒ जाय॑त उ॒क्थ्य॑: । म॒हे वाजा॑य॒ द्रवि॑णाय दर्श॒तः ॥६॥
अग्ने॒ यजि॑ष्ठो अध्व॒रे दे॒वान्दे॑वय॒ते यज । होता॑ म॒न्द्रो वि रा॑ज॒स्यति॒ स्रिध॑: ॥७॥
स न॑: पावक दीदिहि द्यु॒मद॒स्मे सु॒वीर्य॑म् । भवा॑ स्तो॒तृभ्यो॒ अन्त॑मः स्व॒स्तये॑ ॥८॥

agníṃ vardhantu no gíro yáto jáyata ukthyàḥ | mahé vā́jāya drávinaya darṣatáḥ || 6 || ágne yájishṭho adhvaré devā́n devayaté yaja | hótā mandró ví rājasy áti srídhaḥ || 7 || sá naḥ pāvaka dīdihi dyumád asmé suvī́ryam | bhávā stotṛíbhyo ántamaḥ svastáye || 8 ||

10

The wise sages, the mortals, enshrine you in their loving hearts, O adorable Lord, resplendent like fire, and the sovereign king of people. 1

They glorify you as the priest, the invoker of Nature's bounties to help in the performance of the sacred acts. May you shine, in your own way, O Lord, the destroyer of nescience, the preserver of all noble deeds. 2

Verily he acquires good virility and prospers, who dedicates all his wealth and offers devotion to you, O omniscient Lord. 3

May our Lord, resplendent like fire, and the banner of all benevolent deeds, come along with Nature's bounties. He is honoured with love and devotion by the seven officiating priests of the universe for the benefit of the worshipper. 4

To the adorable Lord, may you offer your highest and foremost regards, for He enlightens the intellectual genius, the men of wisdom. 5

May our hymns exalt the divine fire so that his glory may be magnified and become manifest for the purpose of bestowing abundant food and riches. 6

O fire-divine, you are profoundly expected at the performance of the dedicated sacred acts. May you honour Nature's bounties on behalf of the devotees aspiring to be divine. We are under your supreme sovereignity, since you are the invoker, blissful and giver of protection against calamities. 7

May you, O purifier, bestow on us your shining, glorious virility. May you be very much close to your devoted chanters for their well-being. 8

तं त्वा विप्रा विपन्यवो जागृवांसः समिन्धते । हव्यवाहममर्त्यं सहोवृधम् ॥९॥

tám tvā víprā vipanyávo jāgrivánsaḥ sám indhate | havyaváham ámartyam sahovrídham || 9 ||

(११) एकादशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

॥१०॥ अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः । स वेद यज्ञमानुषक् ॥१॥
स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥२॥
अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः । अर्थं ह्यस्य तरणि ॥३॥
अग्निं सूनुं सनश्रुतं सहसो जातवेदसम् । वह्निं देवा अकृण्वत ॥४॥
अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् । तूर्णी रथः सदा नवः ॥५॥

11.

Agnír hótā puróhito dhvarásya vícarshaṇiḥ | sá veda yajñám ānushák || 1 || sá havyavā́ḷ ámartya uṣíg dūtáṣ cánohitaḥ | agnír dhiyā́ sám riṇvati || 2 || agnír dhiyā́ sá cetati ketúr yajñásya pūrvyáḥ | ártham hy àsya táraṇi || 3 || agním sūnúm sánaṣrutam sáhaso jātávedasam | váhnim devā́ akriṇvata || 4 || ádābhyaḥ puraetā́ viṣā́m agnír mā́nushīṇām | tū́rṇī ráthaḥ sádā návaḥ || 5 ||

॥१०॥ साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः । अग्निस्तुविश्रवस्तमः ॥६॥

sāhvā́n víṣvā abhiyújaḥ krátur devā́nām ámriktaḥ | agnís tuvíṣravastamaḥ || 6 ||

The wise, intelligent and vigilant priest kindle the divine light such as is yours (in their hearts). You are the conveyer of offerings, immortal and augmenter of strength. 9

11

The adorable God is our medium of devotion and is the supreme guide of our sacred deeds. He knows the course of all events as they proceed. 1

The adorable Lord, medium of devotion, immortal, divine carrier of enlightenment and the cherisher of our dedicated actions, inspires the devotees with divine wisdom. 2

The adorable Lord, the earliest banner of virtuous actions, knows all objectiveness through his wisdom; His radiance carries us across the darkness. 3

The enlightened ones are privileged to recognize the adorable Lord, as the source of strength; the Lord who is eternally renowned, the knower of all that is born, and carrier of divinities. 4

The adorable Lord, the precedor of human race, the speedy carrier of virtues is ever new and unsusceptable of any harm. 5

The adorable Lord is the most liberal contributor of food and is able to resist all assailants when confronted. He is the inspirer and nourisher of Nature's bounties. 6

अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः । क्षयं पावकशोचिषः ॥७॥
परि विश्वानि सुधिताग्नेरश्याम मन्मभिः । विप्रासो जातवेदसः ॥८॥
अग्ने विश्वानि वार्या वाजेषु सनिषामहे । त्वे देवास एरिरे ॥९॥

abhí práyāṅsi váhasā dāṣvā́ñ aṣnoti mártyaḥ | ksháyam pāvakáṣocishaḥ || 7 || pári víṣvāni súdhitāgnér aṣyāma mánmabhiḥ | víprāso jātávedasaḥ || 8 || ágne víṣvāni vā́ryā vā́jeshu sanishāmahe | tvé devā́sa érire || 9 ||

(१२) द्वादशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । इन्द्राग्नी देवते । गायत्री छन्दः ॥

॥११॥ इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ॥१॥
इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः । अया पातमिमं सुतम् ॥२॥

12.

Índrāgnī ā́ gatam sutám gīrbhír nábho várenyam | asyá pātam dhiyéshitā || 1 || índrāgnī jaritúḥ sácā yajñó jigāti cétanaḥ | ayā́ pātam imám sutám || 2 ||

इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे । ता सोमस्येह तृम्पताम् ॥३॥
तोशा वृत्रहणा हुवे सजित्वानापराजिता । इन्द्राग्नी वाजसातमा ॥४॥

índram agním kavichádā yajñásya jūtyā́ vriṇe | tā́ sómasyehá trimpatām || 3 || tosā́ vrítrahánā huve sajítvānā́parājitā | indrāgnī́ vājasā́tamā || 4 ||

From the adorable Lord of purifying radiance, the liberal mortal worshipper receives from all sides abundant food and prosperity. 7

May we, endowed with intelligence obtain precious rewards through our adoration to the omniscient adorable Lord. 8

O adorable Lord, may we win all precious gifts in our struggles of life, since all Nature's forces derive inspirations from you only. 9

12

O radiation from the cosmic sun and lightning within our inner conscience may you come to our acceptable libations, presented in the form of sweet hymns full of heavenly bliss; may you please enjoy them to your satisfaction. 1

O radiations from inner cosmic sun and lightning, the conscious worship of the devotee proceeds to you. May you, when invoked come to us to enjoy the devotional bliss to your satisfaction. 2

Urged by the force of faith, I implore cosmic rays of the inner sun and lightning, the protectors of the pious sages. May they be satisfied with the sweet nector of joy, here presented. 3

I invoke the rays of the inner cosmic sun and lightning, the destroyers of the foes, the removers of the darkness, the victorious, the invincible and the bestowers of abundant nourishment. 4

प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः । इन्द्राग्नी इष आ वृणे ॥५॥

prá vām arcanty ukthíno nīthāvído jaritā́raḥ | índrāgnī ísha ā́ vriṇe || 5 ||

॥१२॥ इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् । साकमेकेन कर्मणा ॥६॥
इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः । ऋतस्य पथ्या३ अनु ॥७॥
इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च । युवोरप्तूर्यं हितम् ॥८॥
इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद्वां चेति प्र वीर्यम् ॥९॥

índrāgnī navatím púro dāsápatnīr adhūnutam | sākám ékena kármaṇā || 6 || índrāgnī ápasas pā́ry úpa prá yanti dhītáyaḥ | ritásya pathyā̀ ánu || 7 || índrāgnī tavishā́ṇi vāṃ sadhásthāni práyāṅsi ca | yuvór aptū́ryaṃ hitám || 8 || índrāgnī rocanā́ diváḥ pári vā́jeshu bhūshathaḥ | tád vāṃ ceti prá vīryàm || 9 ||

[अथ द्वितीयोऽनुवाकः ॥] (१३) त्रयोदशं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य वैश्वामित्र ऋषभ ऋषिः । अग्निर्देवता । अनुष्टुप् छन्दः ॥

॥१३॥ प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै ।
गमद्देवेभिरा स नो यजिष्ठो बर्हिरा सदत् ॥१॥
ऋतावा यस्य रोदसी दक्षं सचन्त ऊतयः ।
हविष्मन्तस्तमीळते तं सनिष्यन्तोऽवसे ॥२॥

13.

Prá vo deváyāgnáye bárhishṭham arcāsmai | gámad devébhir ā́ sá no yájishṭho barhír ā́ sadat || 1 || ritā́vā yásya ródasī dáksham sácanta ūtáyaḥ | havíshmantas tám īḷate táṃ sanishyántó 'vase || 2 ||

O rays of the inner cosmic sun and lightning, the devotees who know the right path and are well-versed in the melody of divine symphony, invoke both of you. So I too beseech you for getting super nourishment. 5

O rays of the inner cosmic sun and lightning, with one united effort you overthrow ninety strong holds possessed by evil forces. 6

O rays of the inner cosmic sun and lightning, the enlightened persons always tread the paths of truth. 7

O rays of the inner cosmic sun and lightning, in you vigour and food are abiding together; your readiness for despensing justice is highly commendable. 8

O rays of the inner cosmic sun and lightning, you illuminate the lucid realms of heaven with victory in inner conflicts. So well-known is the prowess of both of you. 9

13

I loudly sign with utmost power the glory of adorable Lord, so that He, the best offerer, may come to us with the bounties of Nature and be seated in our hearts. 1

The adorable God is the observer of truth and the Lord of the inner conscience celestial and cosmic regions. The protective nature's bounties wait on Him for strength. He is adored by dedicated devotees and those who seek wealth approach Him for protection. 2

स यन्ता विप्र एषां स यज्ञानामथा हि षः ।
अग्निं तं वो दुवस्यत दाता यो वनिता मघम् ॥३॥
स नः शर्माणि वीतयेऽग्निर्यच्छतु शंतमा ।
यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा ॥४॥
दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः ।
ऋक्वाणो अग्निमिन्धते होतारं विश्पतिं विशाम् ॥५॥
उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः ।
शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः ॥६॥
नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु ।
द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ॥७॥

sá yantá vípra eshām sá yajñánām áthā hí sháḥ | agním tám vo duvasyata dátā yó vánitā maghám || 3 || sá naḥ ṣármāṇi vītáye 'gnír yachatu ṣáṃtamā | yáto naḥ prushṇávad vásu diví kshitíbhyo apsv á || 4 || dīdivánsam ápūrvyaṃ vásvībhir asya dhītíbhiḥ | ríkvāṇo agním indhate hótāraṃ viṣpátiṃ viṣám || 5 || utá no bráhmann avisha ukthéshu devahūtamaḥ | ṣáṃ naḥ ṣocā marúdvṛidhó 'gne sahasrasátamaḥ || 6 || nū́ no rāsva sahásravat tokávat pushṭimád vásu | dyumád agne suvíryaṃ várshishṭham ánupakshitam || 7 ||

(१४) चतुर्दशं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य वैश्वामित्र ऋषभ ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१४॥ आ होता मन्द्रो विदथान्यस्थात्सत्यो यज्वा कवितमः स वेधाः ।
विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत् ॥१॥

14.

Á hótā mandró vidáthāny asthāt satyó yájvā kavítamaḥ sá vedháḥ | vidyúdrathaḥ sáhasas putró agníḥ ṣocíshkeṣaḥ pṛithivyám pájo aṣret || 1 ||

He, the sage, is the guide of those who worship; He is the regulator of sacred dedicated acts. May you pay homage to Him as He is the benefactor and the bestower of great wealth. 3

May the adorable Lord, grant us more prosperous dwellings and beneficial comforts for our maintenance. So that from Him infinite wealth, whether it is derived from heaven or from earth, or from waters, may come to us. 4

The devotees kindle love for the adorable Lord, who is self-radiant, the unprecedented invoker and the protector of people through His own excellent designs. 5

May you, O adorable Lord, the most competent of Nature's bounties perfect our prayers, as well as songs. You are glorified by mortals, and are the showerer of thousands of blessings; may you augment our felicity. 6

May you now grant us wealth by thousands along with progeny, nourishment, brilliant treasure, and exalted vigour, and may you be infinite and inexhaustible in your blessings to us. 7

14

May the adorable Lord, the invoker, the exhilarator, ever-true, most-wise, and ordainer be in our thoughts whilst we are in this synod. He, the source of strength, with lightning as His chariot and with lustrous flames as his hair manifests His glory on the earth. 1

अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः ।
विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिरूतये यजत्र ॥२॥
द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ ।
यत्सीमञ्जन्ति पूर्व्यं हविर्भिरा वन्धुरेव तस्थतुर्दुरोणे ॥३॥
मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन् ।
यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयन्त्सूर्यो नॄन् ॥४॥
वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥५॥

áyāmi te námaüktiṃ jushasva ṛítāvas túbhyaṃ cétate sahasvaḥ | vidvā́ñ ā́ vakshi vidúsho ní shatsi mádhya ā́ barhír ūtā́ye yajatra || 2 || drávatāṃ ta ushásā vājáyantī ágne vā́tasya pathyā̀bhir ácha | yát sīm añjánti pūrvyáṃ havírbhir ā́ vandhúreva tasthatur duroṇé || 3 || mitrá́ṣ ca túbhyaṃ várunaḥ sahasvó 'gne víṣve marútaḥ sumnám arcan | yác chocíshā sahasas putra tíshṭhā abhí kshitī́ḥ pratháyan sū́ryo nṛ́n || 4 || vayáṃ te adyá rarimā́ hí kā́mam uttānáhastā námasopasádya | yájishṭhena mánasā yakshi devā́n ásredhatā mánmanā vípro agne || 5 ||

त्वद्धि पुत्र सहसो वि पूर्वीर्देवस्य यन्त्यूतयो वि वाजाः ।
त्वं देहि सहस्रिणं रयिं नोऽद्रोघेण वचसा सत्यमग्ने ॥६॥
तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म ।
त्वं विश्वस्य सुरथस्य बोधि सर्वं तदग्ने अमृत स्वदेह ॥७॥

tvád dhí putra sahaso ví pūrvī́r devásya yánty ūtáyo ví vā́jāḥ | tvā́ṃ dehi sahasríṇaṃ rayíṃ no 'drogheṇa vácasā satyám agne || 6 || túbhyaṃ daksha kavikrato yā́nīmā́ déva mártāso adhvaré ákarma | tvā́ṃ víṣvasya suráthasya bodhi sárvaṃ tád agne amṛita svadehá || 7 ||

To you, O adorable Lord, the sustainer of eternal laws, I offer my reverential salutatious. O possessor of strength, expounder of ceremony, may you accept them; and wise as you are, may you bring men of wisdom here. O pious one, may you enshrine hearts of devotees for protection. 2

May the food-bestowing evenings and dawns hasten towards you, O adorable Lord, come on a chariot moving as if on the paths of wind. The priests worship you at these hours as usual with offerings. May the evenings and dawns come united like a yoke to stay in our dwellings. 3

O vigorous adorable Lord, all Nature's bounties, such as the sun, ocean and space-winds offer their praises to you, O the source of strength, you stand like the sun shedding lustre on man-kind. 4

With uplifted hands, approaching you with reverence, we present to you today our deep devotion. May you, O wise lord, honour Nature's bounties with great affection and unwearied appreciation. 5

From you, verily, O source of strength, many and various benefactions and various kinds of food devolve upon the devout worshipper. May you grant us, O adorable Lord, infinite wealth and a children observant of truth and with speech devoid of guile. 6

O mighty, omniscient, radiant adorable Lord, these offerings, which we mortals present to you in our worship are for you. May you, O immortal Lord, cherish and bless everyone who is worthily virtuous. 7

(१५) पञ्चदशं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य कात्य उत्कील ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१५॥ वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ ॥१॥
त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः ।
जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ॥२॥
त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि ।
वसो नेषि च पर्षि चात्यंहः कृधी नो राय उशिजो यविष्ठ ॥३॥

15.

Ví pájasā prithúnā ṣóṣucāno bádhasva dvishó raksháso ámīvāḥ | susármaṇo brihatáḥ ṣármaṇi syām agnér ahám suhávasya práṇītau || 1 || tvám no asyá usháso vyùshṭau tvám sū́ra údite bodhi gopáḥ | jánmeva nítyam tánayam jushasva stómam me agne tanvà sujāta || 2 || tvám nricá-kshā vrishabhánu pūrvī́ḥ krishṇásv agne arushó ví bhāhi | váso néshi ca párshi cáty áṅhaḥ kridhí no rāyá uṣíjo yavishṭha || 3 ||

अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान् ।
यज्ञस्य नेता प्रथमस्य पायोर्जातवेदो बृहतः सुप्रणीते ॥४॥
अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः ।
रथो न सस्निरभि वक्षि वाजमग्ने त्वं रोदसी नः सुमेके ॥५॥

áshāḷho agne vrishabhó didīhi púro víṣvāḥ saúbhagā saṃjigīván | yajñásya netá prathamásya pāyór jấtavedo brihatáḥ supraṇīte || 4 || áchidrā ṣárma jaritaḥ purū́ṇi deváñ ácha dī́dyānaḥ sumedháḥ | rátho ná sásnir abhí vakshi vấjam ágne tvám ródasī naḥ suméke || 5 ||

15

Resplendent with your wide extending lustre (as exhibited in solar rays), may you drive away the infections and the diseases. May the supreme adorable Lord be guide and shelter to me and may I continue to be with the Lord, easily invoked. 1

May you become our protector whilst now the morn is breaking and may you be a guardian when the sun has mounted high up. O Lord, manifested by your radiance, may you be pleased with my constant prayer as a father with his son. 2

O adorable Lord, the showerer of benefits, beholder of men, radiant even amidst darkness, may you shine with abundant glow as usual. O bestowerer of comforts, lead us on righteous paths and keep us away from evils. May you, ever-young, fulfil our aspirations for prosperity. 3

O adorable Lord, mighty and showerer of benefits, may you brighten all the strongholds of the virtuous and their fortunes. O omniscient Lord, you are the foremost guide of the benevolent noble deeds. 4

You are endowed with sharp intelligence and radiance, and are the invoker of Nature's bounties. May you bring many faultless shelters and convey to them our homage as a chariot carries the food. May you illuminate the beautiful heaven and earth. 5

प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे ।
देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात् ॥६॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥७॥

prá pī-
paya vṛishabha jínva vā́jān ágne tvám ródasī naḥ sudóghe |
devébhir deva surúcā rucānó mā́ no mártasya durmatíḥ
pári shṭhāt || 6 || íḷām agne — || 7 ||

(१६) षोडशं सूक्तम्

O resplendent Lord, invoked by all, may you grind to dust the reviling evil force, associated with demonic tendencies, and increasing in might, may you deprive it of its hands and also its feet, and destroy him completely by your strength. 8

O resplendent Lord, you have established in its position the silent earth, the vast, unbounded and fertile. You are the showerer of benefits and sustain the heaven and earth; let the rain waters engendered by you flow hither. 9

O resplendent Lord, the heavy cloud, the receptacle of water, in silence has dready opened itself (i.e. rained) before you could cast your blow on him with your bolt. Then you make the path for waters to issue easy. Loud-sounding they proceed to meet the waters of the earth, invoked by many. 10

The resplendent Lord alone fills up with His magnanimity the two, earth and heaven, mutually associated and rich in treasures. May you, O hero, come with your aurora of glory as if mounted in a chariot and bring wholesome food and vigour from the firmament. 11

The resplendent sun does not transgress the ordered limits already set, days in and days out, by the Lord of radiant universe. When he approaches the terminus, his journey comes to an end; he sets free the horses of his chariot for such is his assignment. 12

All men are eager to behold the broad, bright phase of the refulgent dawn after whilst the night has disappeared. And when dawn comes in glory, all people acknowledge the manifold and glorious deeds of the resplendent Lord. 13

महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बिभ्रती गौः ।
विश्वं स्वाद्म संभृतमुस्रियायां यत्सीमिन्द्रो अदधाद्भोजनाय ॥१४॥
इन्द्र दृह्य यामकोशा अभूवन्यज्ञाय शिक्ष गृणते सखिभ्यः ।
दुर्मायवो दुरेवा मर्त्यासो निषङ्गिणो रिपवो हन्त्वासः ॥१५॥

máhi jyótir níhitam vakshánāsv āmá pakvám carati bíbhratī gaúḥ | víṣvam svádma sámbhritam usríyāyām yát sīm índro ádadhād bhójanāya || 14 || índra dríhya yāmakoṣá abhūvan yajñáya ṣiksha griṇaté sákhibhyaḥ | durmāyávo durévā mártyāso nishaṅgíṇo ripávo hántvāsaḥ || 15 ||

॥४॥ सं घोषः शृण्वेऽवमैरमित्रैर्जही न्येष्वशनिं तपिष्ठाम् ।
वृश्चेमधस्ताद्वि रुजा सहस्व जहि रक्षो मघवन्रन्धयस्व ॥१६॥
उद्वृह रक्षः सहमूलमिन्द्र वृश्चा मध्यं प्रत्यग्रं शृणीहि ।
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥१७॥
स्वस्तये वाजिभिश्च प्रणेतः सं यन्महीरिष आसत्सि पूर्वीः ।
रायो वन्तारो बृहतः स्यामास्मे अस्तु भग इन्द्र प्रजावान् ॥१८॥
आ नो भर भगमिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्ररेके ।
ऊर्व इव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनाम् ॥१९॥

sám ghóshaḥ ṣriṇve 'vamaír amítrair jahí ny èshv aṣánim tápishṭhām | vriṣcém adhástād ví rujā sáhasva jahí rákshho maghavan randháyasva || 16 || úd vriha rákshaḥ sahámūlam indra vriṣcá mádhyam práty ágram ṣriṇīhi | á kívataḥ salalúkam cakartha brahmadvíshe tápushim hetím asya || 17 || svastáye vājíbhiṣ ca praṇetaḥ sám yán mahír ísha āsátsi pūrvíḥ | rāyó vantáro brihatáḥ syāmāsmé astu bhága indra prajávān || 18 || á no bhara bhágam indra dyumántam ní te deshṇásya dhīmahi prareké | ūrvá iva paprathe kámo asmé tám á priṇa vasupate vásūnām || 19 ||

A mighty splendour rests upon the bosom of the rivers. The cow yet immature grazes in the fields bearing the ripe milk in her udders, for resplendent Lord has placed in the cow all this integrated sweetness for our nourishment. 14

O resplendent Lord, may you be firm for there are obstructors on the path of righteousness. May you secure to the worshipper and his friends, the means of completing the dedicated service. These mortal malignant enemies armed with malicious weapons and approaching with evil intentions must be destroyed. 15

The effect of your punitive justice has been heard by the foes approaching near us. May you hurl against them your fierce and blazing bolt and cut them up by the root. O bounteous Lord, may you subdue them and crush these cruel infidels completely. 16

O resplendent Lord, may you pluck up the race of these infidels by the root; cut asunder the middle and blight the summit. May you drive away the greedy people to remote regions and cast your fierce bolt of punitive justice upon those who are opposed to the Lord and the divine knowledge. 17

O resplendent Lord, supreme regulator of the universe, may you provide us with vitality for our welfare. May we become strong in your proximity, and be the winners of abundant food and riches, and may there be to us wealth accompanied by progeny. 18

O resplendent Lord, bring to us splendid affluence; we rely on the over-flow of bounties from your side. Our desire is as insatiable as the fire of the ocean. May you appease it, O Lord of infinite riches. 19

इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥२०॥
आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यं सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सु मघवन्बोधि गोदाः ॥२१॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥२२॥

imáṃ kā́mam mandayā góbhir áṣvaiṣ candrávatā rā́dhasā papráthaṣ ca | svaryávo matíbhis túbhyaṃ víprā índrāya vā́haḥ kuṣikā́so akran || 20 || ā́ no gotrā́ dardrihi gopate gā́ḥ sám asmábhyaṃ sanáyo yantu vā́jāḥ | divákshā asi vṛishabha satyáṣushmo ’smábhyaṃ sú maghavan bodhi godā́ḥ || 21 || ṣunáṃ huvema maghávānam índram asmín bháre nṛítamaṃ vā́jasātau | ṣṛiṇvántam ugrám ūtáye samátsu ghnántaṃ vṛitrā́ṇi saṃjítaṃ dhánānām || 22 ||

(३१) एकत्रिंशं सूक्तम्
(१-२२) द्वाविंशत्यृचस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऐषीरथिः कुशिको वा ऋषिः ।
इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ।
पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे ॥१॥
न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानम् ।
यदी मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन् ॥२॥

31.

Ṣā́sad váhnir duhitúr naptyàṃ gād vidvā́ñ ṛitásya dī́dhitiṃ saparyán | pitā́ yátra duhitúḥ sékam ṛiñján sáṃ ṣagmyèna mánasā dadhanvé || 1 || ná jāmáye tā́nvo rikthám āraik cakā́ra gárbhaṃ sanitúr nidhā́nam | yádī mātáro janáyanta váhnim anyáḥ kartā́ sukṛítor anyá ṛindhán || 2 ||

O resplendent Lord, with cows and horses, and with shining treasures, gratify our longings, and may you please make us renowned. The wise preceptors, desirous of heaven offer praise to you with pious prayers. 20

O Lord of earth, divide the clouds and send us rain, whence nutritions food may come to us. O showerer of benefits, you pervade the sky and your might is truth. O bounteous Lord, please consider yourself as our protector. 21

We call on our bounteous Lord for our protection. He is a distinguished guide in our struggles, and the supreme provider of food. He is terrible in battles, the destroyer of evil forces and the conqueror of wealth. 22

31

The disciplined and wise father, relying on the sanction of natural rights, honours his grandson, the son of his daughter, with valuable gifts. The father trusting to the impregnation of the daughter consoles himself with cheerful mind. 1

The son does not transfer paternal wealth to his sister. He makes her receptacle of the embryo of her husband. When parents procreate children of either sex, one (the male) becomes the performer of holy rites (he is the legal inheriter), the other (the female) is to be enriched with gifts. 2

अग्निर्जज्ञे जुह्वा३ रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे ।
महान्गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः ॥३॥
अभि जैत्रीरसचन्त स्पृधानं महि ज्योतिस्तमसो निरजानन् ।
तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः ॥४॥
वीळौ सतीरभि धीरा अतृन्दन्प्राचाहिन्वन्मनसा सप्त विप्राः ।
विश्वामविन्दन्पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश ॥५॥

agnír jajñe juhvà réjamāno mahás putráñ arushásya prayákshe | mahán gárbho máhy á jātám eshām mahí pravṛíd dháryaṣvasya yajñaíḥ || 3 || abhí jaítrīr asacanta spṛidhānám máhi jyótis támaso nír ajānan | tám jānatíḥ práty úd āyann ushásaḥ pátir gávām abhavad éka índraḥ || 4 || vīḷaú satír abhí dhírā atṛindan prācáhinvan mánasā saptá víprāḥ | víṣvām avindan pathyàm ṛitáṣya prajānánn ít tá námasá viveṣa || 5 ||

॥६॥ विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥६॥
अगच्छदु विप्रतमः सखीयन्नसूदयत्सुकृते गर्भमद्रिः ।
ससान मर्यो युवभिर्मखस्यन्नथाभवदङ्गिरः सद्यो अर्चन् ॥७॥

vidád yádī sarámā rugṇám ádrer máhi páthaḥ pūrvyáṃ sadhryàk kaḥ | ágraṃ nayat supády ákshharāṇām áchā rávam prathamá jānatí gāt || 6 || ágachad u vípratamaḥ sakhīyánn ásūdayat sukṛíte gárbham ádriḥ | sasána máryo yúvabhir makhasyánn áthābhavad áñgirāḥ sadyó árcan || 7 ||

For the worship of the resplendent Lord, the fire-divine with its glowing flames, has begotten its mighty sons (that is, rays). Great is that germ, and great is their birth, and great is their efficacy for the worship of the resplendent Lord, the source of radiant emanations. 3

The victorious vital principles of body and mind join with the soul while it contends with dark evil forces. The dawns of spiritual light issues forth from darkness. At last the soul becomes the sole sovereign of the realm of the spiritual world. 4

The seven dedicated and intelligent seekers, the seven senses having ascertained that wisdom is concealed in the strong cavern of the physical body propitiate the soul through concentrated efforts of mental devotion. They recover the lost wisdom by the path of dedicated actions. For the soul, having realized their pious acts and offerings, enters the cave of ignorance to recover wisdom. 5

When the sanctified mind discovers the broken entrance of the mountain of dark forces, then the soul first makes a straight and broad path as previously promised. Then the sure-footed mind, recognizing as if by lowing, proceeds and comes close to the imperishable cows of spirituality. 6

When the most virtuous and realized soul prompted by the friendship of the true seekers proceeds to the cave of ignorance, then the big cave hiding the wisdom behind its dark walls of embryo gives way, and yields its contents to the valiant soul. Ultimately the soul, the destroyer of the evils, recovers the cattle, and immediately, afterwards the sages become devout worshippers. 7

सतःसतः प्रतिमानं पुरोभूर्विश्वा वेद जनिमा हन्ति शुष्णम् ।
प्र णो दिवः पदवीर्गव्युरर्चन्त्सखा सखीँरमुञ्चन्निरवद्यात् ॥८॥
नि गव्यता मनसा सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुम् ।
इदं चिन्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन ॥९॥
संपश्यमाना अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः ।
वि रोदसी अतपद्घोष एषां जाते निःष्ठामदधुर्गोषु वीरान् ॥१०॥

satáḥ-sataḥ pratimánam purobhū́r víṣvā veda jánimā hánti ṣúshṇam | prá ṇo diváḥ padavī́r gavyúr árcan sákhā sákhīn̐r amuñcan nír avadyā́t ||8|| ní gavyatā́ mánasā sedur arkaíḥ kriṇvānā́so amṛitatvā́ya gātúm | idáṃ cin nú sádanam bhū́ry eshāṃ yéna mā́sān̐ ásishāsann ṛiténa || 9 || sampáṣyamānā amadann abhí svám páyaḥ pratnásya rétaso dúghānāḥ | ví ródasī atapad ghósha eshāṃ jāté nishṭhā́m ádadhur góshu vīrā́n || 10 ||

॥७॥ स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्रिया असृजदिन्द्रो अर्कैः ।
उरूच्यस्मै घृतवद्भरन्ती मधु स्वाद्म दुदुहे जेन्या गौः ॥११॥
पित्रे चिच्चक्रुः सदनं समस्मै महि त्विषीमत्सुकृतो वि हि ख्यन् ।
विष्कभ्नन्तः स्कम्भनेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन् ॥१२॥

sá jātébhir vṛitrahā́ séd u havyaír úd usríyā asṛijad índro arkaíḥ | urūcy àsmai ghṛitávad bhárantī mádhu svā́dma duduhe jényā gaúḥ || 11 || pitré cic cakruḥ sádanaṃ sám asmai máhi tvíshīmat sukṛíto ví hí khyán | vishkabhnánta skámbhanenā jánitrī ā́sīnā ūrdhváṃ rabhasáṃ ví minvan || 12 ||

May he be free from all reproach, who is the representative of all that is excellent, who is the anticipator of evil forces, who knows all that is born, who destroys petty-mindedness and has wide vision. He restores the lost wisdom, and there by becomes our friend as if having come from heaven honours us as his friend. 8

The sages, with minds intent on receiving wisdom, proceed to propitiate soul with devotional hymns, leading along the road to immortality. Great has been their perseverance, by which they seek for months to accomplish their final objective. 9

Meditating on their own recovered cows of wisdom and bestowing the milk of prolific knowledge to their progeny, the sages feel highly delighted; their shouts of joy spread through heaven and earth,—body and mind. They put their faith on the recovery of the lost wisdom and keep constant vigilance to sustain it. 10

The soul, assisted by vital organs, provided born for its aid, becomes the destroyer of evils, and thus it receives praises and oblations. The excellent cows of wisdom contribute abundantly to sacred offerings and yield butter of devotion, and the spiritual sweet nourishing milk. 11

These sages while performing pious acts make an auspicious and splendid abode for their protector soul and engage themselves in its worship. Then they establish the soul in commune with the universal soul, sustaining heaven and earth—body and mind, and upholds it providing the pillar of the firmament, the central spine of the human body. 12

मही यदि धिषणा शिश्नथे धात्सद्योवृधं विभ्वं रोदस्योः ।
गिरो यस्मिन्ननवद्याः समीचीर्विश्वा इन्द्राय तविषीरनुत्ताः ॥१३॥
मह्या ते सख्यं वश्मि शक्तीरा वृत्रघ्ने नियुतो यन्ति पूर्वीः ।
महि स्तोत्रमव आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः ॥१४॥
महि क्षेत्रं पुरु श्चन्द्रं विविद्वानादित्सखिभ्यश्चरथं समैरत् ।
इन्द्रो नृभिरजनद्दीद्यानः साकं सूर्यमुषसं गातुमग्निम् ॥१५॥

mahí yádi dhishánā șișnáthe dhát sadyovṛídham vibhvàm ródasyoḥ | gíro yásminn anavadyā́ḥ samīcī́r víșvā índrāya távishīr ánuttāḥ || 13 || máhy ā́ te sakhyám vașmi șaktī́r ā́ vṛitraghné niyúto yanti pūrvī́ḥ | máhi stotrám áva ā́ganma sūrér asmā́kam sú maghavan bodhi gopā́ḥ || 14 || máhi kshétram purú șcandrám vividvā́n ā́d ít sákhibhyaș caráthaṃ sám airat | índro nṛíbhir ajanad dī́dyānaḥ sākám sū́ryam ushásam gātúm agním || 15 ||

॥८॥ अपश्चिदेष विभ्वो३ दमूनाः प्र सध्रीचीरसृजद्विश्वश्चन्द्राः ।
मध्वः पुनानाः कविभिः पवित्रैर्द्युभिर्हिन्वन्त्यक्तुभिर्धनुत्रीः ॥१६॥
अनु कृष्णे वसुधिती जिहाते उभे सूर्यस्य मंहना यजत्रे ।
परि यत्ते महिमानं वृजध्यै सखाय इन्द्र काम्या ऋजिप्याः ॥१७॥
पतिर्भव वृत्रहन्त्सूनृतानां गिरां विश्वायुर्वृषभो वयोधाः ।
आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ॥१८॥

apáș cid eshá vibhvò dámūnāḥ prá sadhrī́cīr asṛijad vișváșcandrāḥ | mádhvaḥ punānā́ḥ kavíbhiḥ pavítrair dyúbhir hinvanty aktúbhir dhánutrīḥ || 16 || ánu kṛishṇé vásudhitī jihāte ubhé sū́ryasya maṅhánā yájatre | pári yát te mahimā́nam vṛijádhyai sákhāya indra kā́myā ṛijipyā́ḥ || 17 || pátir bhava vṛitrahan sūnṛ́tānām girā́m vișvā́yur vṛishabhó vayodhā́ḥ | ā́ no gahi sakhyébhiḥ șivébhir mahā́n mahī́bhir ūtíbhiḥ saraṇyán || 18 ||

Inasmuch as the soul, swiftly waxing, the sustainer of all senses, coordinates the activities of body and mind (earth and heaven), to it, our faultless and extensive commendations are due. And therefore, all the invincible powers belong to the soul. 13

I wish to gain your friendship and extensive powers; many energies come to you. O the destroyer of evils, O wise soul, we offer to you glorious praise and dedication. May you be, O bounteous Lord, our God and protector. 14

He (the resplendent Lord) having found vast, splendid and rich tracts of land, sends life and motion to his friends and lovers. The radiant resplendent Lord in association with the leading vital principles animantes the sun, dawn, the earth and fire with activity. 15

Resplendent Lord, the destroyer of evil forces, manifests the widespread, commingled, all-delighting cosmic vapours. These watery elements are the producers of food and they generate swift flowing streams of blissful elixir, incessently flowing have been day and night. These waters benevolent to all sanctified by sages. 16

O resplendent Lord, to you proceed the two alternations of successively revolving day and night; both of them sanctified by the might of the sun, while your sincere and acceptable friends, the cosmic vital principles, are ready to encounter your adversaries and maintain your greatness. 17

O immortal resplendent Lord, destroyer of evils, the showerer of benefits, the giver of food, may you be the lord of our true and delightful expressions; may you, O great divine leader while intending to cherish our noble deeds, come to us with loving affection and preserve us with your auspicious protection. 18

तमङ्गिरस्वन्नमसा सपर्यन्नव्यं कृणोमि सन्यसे पुराजाम् ।
द्रुहो वि याहि बहुला अदेवीः स्वश्च नो मघवन्त्सातये धाः ॥१९॥
मिहः पावकाः प्रतता अभूवन्त्स्वस्ति नः पिपृहि पारमासाम् ।
इन्द्र त्वं रथिरः पाहि नो रिषो मक्षूमक्षू कृणुहि गोजितो नः ॥२०॥
अदेदिष्ट वृत्रहा गोपतिर्गा अन्तः कृष्णाँ अरुषैर्धामभिर्गात् ।
प्र सूनृता दिशमान ऋतेन दुरश्च विश्वा अवृणोदप स्वाः ॥२१॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥२२॥

tám aṅgirasván námasā saparyán návyam̐ kriṇomi sányase purājám | drúho ví yāhi bahulá ádevīḥ svàś ca no maghavan sātáye dhāḥ || 19 || míhaḥ pāvakáḥ prátatā abhūvan svastí naḥ piprihi pārám āsām | índra tvám̐ rathiráḥ pāhi no rishó makshú-makshū kriṇuhi gojíto naḥ || 20 || ádedishṭa vritrahá gópatir gá antáḥ krishṇáñ arushaír dhámabhir gāt | prá sūnrítā diśámāna riténa dúraś ca víśvā avriṇod ápa sváḥ || 21 || śunám̐ huvema — || 22 ||

(३२) द्वात्रिंशं सूक्तम्

(१–१७) सप्तदशर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥९॥ इन्द्र सोमं सोमपते पिबेमं माध्यंदिनं सवनं चारु यत्ते ।
प्रप्रुथ्या शिप्रे मघवन्नृजीषिन्विमुच्या हरी इह मादयस्व ॥१॥

32.

Índra sómam̐ somapate píbemám mádhyam̐dinam̐ sávanam̐ cáru yát te | praprúthyā śípre maghavann rijīshin vimúcyā hárī ihá mādayasva || 1 ||

I worship you with deep reverence, as realized sages do. O eternal Lord, I glorify you with new compositions. May you destroy the many impious oppressors of your worshippers and bestow upon us, O bounteous Lord, your own wealth for our benediction. 19

O resplendent Lord, your purifying and bless-bestowing streams of water are spread on all sides. Make us worthy to swim across it with safety. May you defend us from the malevolent, and make us strong to quickly conquer the cows of wisdom. 20

The slayer of evil forces discovers the cows of wisdom and by his radiant effulgence drives away the black devils. May he, importing us eternal truth throw, open all portals of knowledge for us. 21

We invoke you for our protection the opulent Lord, who is purifier, brave, the best guide in all the combats of life, the terrible fighter in his battles, the destroyer of foes and the conqueror of wealth. 22

32

O resplendent the lower self, fountain of bliss, accept our devotion which is dedicated to you at noon-day worship. O bounteous, bliss lover, loosen your strenuous actions, relax mentally and physically, and rejoice to the fullest extent. 1

गवाशिरं मन्थिनमिन्द्र शुक्रं पिबा सोमं ररिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व ॥२॥
ये ते शुष्मं ये तविषीमवर्धन्नर्चन्त इन्द्र मरुतस्त ओजः ।
माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ॥३॥
त इन्न्वस्य मधुमद्विविप्र इन्द्रस्य शर्धो मरुतो य आसन् ।
येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म ॥४॥
मनुष्वदिन्द्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय ।
स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अर्णा सिसर्षि ॥५॥

gávāṣiram manthínam indra ṣukrám píbā sómam rarimā́ te mádāya | brahmakṛítā mā́rutenā gaṇéna sajóshā rudraís tṛipád ā́ vṛishasva || 2 || yé te ṣúshmam yé távishīm ávardhann árcanta indra marútas ta ójaḥ | mā́dhyaṃdine sávane vajrahasta píbā rudrébhiḥ ságanaḥ suṣipra || 3 || tá ín nv àsya mádhumad vivipra índrasya ṣárdho marúto yá ā́san | yébhir vṛitrásyeshitó vivédāmarmáṇo mányamānasya márma ||4|| manushvád indra sávanaṃ jushāṇáḥ píbā sómam ṣaṣvate vīryā̀ya | sá ā́ vavṛitsva haryaṣva yajñaíḥ saraṇyúbhir apó árṇā sisarshi || 5 ||

॥१०॥ त्वमपो यद्ध वृत्रं जघन्वाँ अत्याँ इव प्रासृजः सर्तवाजौ ।
शयानमिन्द्र चरता वधेन वव्रिवांसं परि देवीरदेवम् ॥६॥
यजाम इन्नमसा वृद्धमिन्द्रं बृहन्तमृष्वमजरं युवानम् ।
यस्य प्रिये ममतुर्यज्ञियस्य न रोदसी महिमानं ममाते ॥७॥

tvám apó yád dha vṛitrám jaghanvā́ñ átyāñ iva prā́sṛijaḥ sártavā́jaú | ṣáyānam indra cáratā vadhéna vavrivā́ñsam pári devī́r ádevam || 6 || yájāma ín námasā vṛiddhám índram bṛihántam ṛishvám ajáram yúvānam | yásya priyé mamátur yajñíyasya ná ródasī mahimā́nam mamā́te || 7 ||

O resplendent self, accept our devotional love, mixed with milk or butter, milk-like purity of heart and mind; we offer it for your exhilaration. May you, along with the company of devout organs and vital breath, enjoy it to your full satisfaction. 2

These are the vital organs, O resplendent self, who, worshipping your prowess, augment your strength and vigour. O possessor of the adamantine determination and splendid form, may you along with the vital breath cherish our devotion at the noon-day worship. 3

These are the vital organs who are the strength of soul and who gently encourage it. Animated by them it pierces the vital part of evil which imagines itself invulnerable. 4

O resplendent self, like an intelligent being, pleased with our homage, may you cherish our devotion for the sake of perpetual vigour. O lord of sturdy organs may you come along with adorable (vital organs), and traversers (of the cosmos) and send down the nectar of spiritual joy to blend with the joys of body. 5

O resplendent self, inasmuch as you destroy the slumbering and darkling thought, obstructing evil forces, you let forth the pure thoughts like horses rushing into battle. 6

Therefore, we worship with reverence the resplendent self, who is great and sublime, eternal and ever youthful, and whose magnitude the great heaven and earth could never measure nor can, conceive to measure in future. 7

इन्द्रस्य कर्म सुकृता पुरूणि व्रतानि देवा न मिनन्ति विश्वे ।
दाधार यः पृथिवीं द्यामुतेमां जजान सूर्यमुषसं सुदंसाः ॥८॥
अद्रोघ सत्यं तव तन्महित्वं सद्यो यज्जातो अपिबो ह सोमम् ।
न द्याव इन्द्र तवसस्त ओजो नाहा न मासाः शरदो वरन्त ॥९॥
त्वं सद्यो अपिबो जात इन्द्र मदाय सोमं परमे व्योमन् ।
यद्ध द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः ॥१०॥

índrasya kárma súkritā purū́ṇi vratā́ni devā́ ná minanti víṣve | dādhā́ra yáḥ prithivī́ṃ dyā́m utémā́ṃ jajā́na sū́ryam ushásaṃ sudáṅsāḥ || 8 || ádrogha satyáṃ táva tán mahitvám sadyó yáj jātó ápibo ha sómam | ná dyā́va indra tavásas ta ójo nā́hā ná mā́sāḥ ṣarádo varanta || 9 || tvám sadyó apibo jātá indra mádāya sómam paramé vyòman | yád dha dyā́vāprithivī́ ā́viveṣīr áthābhavaḥ pūrvyáḥ kārúdhāyāḥ || 10 ||

॥११॥ अहन्नहिं परिशयानमर्ण ओजायमानं तुविजात तव्यान् ।
न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या३ क्षामवस्थाः ॥११॥
यज्ञो हि त इन्द्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः ।
यज्ञेन यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्य आवत् ॥१२॥
यज्ञेनेन्द्रमवसा चक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्याम् ।
यः स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः ॥१३॥

áhann áhim pariṣáyānam árṇa ojāyámānam tuvijāta távyān | ná te mahitvám ánu bhūd ádha dyaúr yád anyáyā sphigyā̀ kshā́m ávasthāḥ || 11 || yajñó hí ta indra várdhano bhū́d utá priyáḥ sutásomo miyédhaḥ | yajñéna yajñám ava yajñíyaḥ sán yajñás te vájram ahihátya āvat || 12 || yajñénéndram ávasā́ cakre arvā́g aínaṃ sumnā́ya návyase vavrityām | yá stómebhir vāvridhé pūrvyébhir yó madhyamebhir utá nū́tanebhiḥ || 13 ||

Even all Nature's forces cannot belittle the greatness of the glorious exploits, and pious works of this resplendent self, of one who sustains the earth (body) and heaven (mind), and who is performer of marvels. The same self instigates the sun and dawn, source of intelligence and divine inspirations. 8

O guileless soul, this is your true greatness, that as soon as you take birth in the human form, you taste the elixir of spiritual bliss. Neither the heavens, nor days, nor nights, nor months, nor years can check your mighty powers. 9

As soon as you take birth in the highest realm of divine world, O resplendent self, you taste the elixir of spiritual bliss for your exhilaration. Thereby you command the sphere of mind and body and become the prime artificer of all activities. 10

O resplendent self, inspirer of all creative works, you with your vigorous action dispel all serpentine instincts, which envelop the dormant mind. Yet the mental complex does not apprehend your greatness, as with one of your arms, you keep the physical body concealed. 11

O soul, our devotional worship is the augmentation of your glory, for the ritual, in which we offer our regards, is acceptable to you. O most worshipful, may you protect the solemn worshippers with determination and may this sacred worship strengthen your adamantine will-power for the destruction of our demoniac impulses. 12

The worshipper by his traditional rituals establishes close proximity with the self which has always been exalted by praises of sages whether ancient, medieval or recent; may I further invoke him for new blessings. 13

विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।
अंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥१४॥
आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन्मदाय प्रदक्षिणिदभि सोमास इन्द्रम् ॥१५॥
न त्वा गभीरः पुरुहूत सिन्धुर्नाद्रयः परि षन्तो वरन्त ।
इत्था सखिभ्य इषितो यदिन्द्रा दृळ्हं चिदरुजो गव्यमूर्वम् ॥१६॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥१७॥

vivésha yán mā dhisháṇā jajána stávai purā́ pā́ryād índram áhnaḥ | áṅhaso yátra pīpárad yáthā no nāvéva yā́ntam ubháye havante || 14 || ápūrṇo asya kaláṣaḥ sváhā sékteva kóṣam sisice píbadhyai | sám u priyā́ ā́vavṛitran mádāya pradakshiṇíd abhí sómāsa índram || 15 || ná tvā gabhīráḥ puruhūta síndhur nádrayaḥ pári shánto varanta | itthā́ sákhibhya ishitó yád indrā́ dṛiḷháṃ cid árujo gávyam ūrvám || 16 || ṣunáṃ huvema — || 17 ||

(३३) त्रयस्त्रिंशं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य (१-३, ५, ७, ९, ११-१३) प्रथमादितृचस्य पञ्चमीसप्तमी-नवम्यृचामेकादश्यादितृचस्य च गाथिनो विश्वामित्र ऋषिः। (४, ६, ८, १०) चतुर्थी-षष्ठ्यष्टमीदशमीनाञ्च नद्य ऋषिकाः। (१-३, ५, ९, ११-१३) प्रथमादितृचस्य पञ्चमी-नवम्योर्ऋचोरेकादश्यादितृचस्य च नद्यः। (४, ८, १०) चतुर्थ्यष्टमीदशमीनां विश्वामित्रः। (६, ७) षष्ठीसप्तम्योश्चेन्द्रो देवताः। (१-१२) प्रथमादि-द्वादशर्चां त्रिष्टुप्, (१३) त्रयोदश्याश्चानुष्टुप् छन्दसी ॥

॥१२॥ प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ॥१॥

33.

Prá párvatānām uṣatī́ upásthād áṣve iva víshite hā́samāne | gā́veva ṣubhré mātárā rihāṇé vípāṭ chutudrī́ páyasā javete || 1 ||

When the idea of glorifying the self enters my mind, I sing praises. May I laud him before encountering distant (evil days), whereby he may lead us beyond troubles; and both of us mind and the self, as if existing in Two opposte sides invoke him (the soul), just as those on either bank of a river hail a passenger in a boat. 14

The vase is filled with elixir homage for his acceptance. I pour it out for your acceptance, O soul, as water carrier pours out water from his bag. May the sweet streams of devotional elixir flow in reverence round the soul for his exhilaration. 15

O self, the soul, summoned by all, when you break through even the firmly built stalls of dark impulses neither the deep flowing flood of waters nor the accompanying hills can arrest your movement. 16

We call on our bounteous Lord for our protection. He is a distinguished guide in our struggle and the supreme provider of food. He is terrible in battles, the destroyer of evil forces and the conqueror of wealth. 17

33

Two rivers are flowing with a variety of movements, the one is slow getting readily whilst the other flooded, both flowing from the flanks of the mountains, eager (to reach the sea) like two mares with loosened reins, contending with each other in speed, or like two fair mother-cows hastening to lick their calves, subsequently they flow rapidly beyond their confluence in one stream with united waters. 1

इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः ।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥२॥
अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म ।
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती ॥३॥
एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः ।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥४॥
रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥५॥

índreshite prasavám bhíkshamāṇe áchā samudrám rathyèva yāthaḥ | samārāṇé ūrmíbhiḥ pínvamāne anyá vām anyám ápy eti ṣubhre || 2 || áchā síndhum mātṛítamām ayāsaṃ vípāṣam urvíṃ subhágām aganma | vatsám iva mātárā saṃrihāṇé samānáṃ yónim ánu saṃcárantī || 3 || ená vayám páyasā pínvamānā ánu yónim devákṛitaṃ cárantīḥ | ná vártave prasaváḥ sárgataktaḥ kiṃyúr vípro nadyò johavīti || 4 || rámadhvam me vácase somyáya ṛítāvarīr úpa muhūrtám évaiḥ | prá síndhum áchā bṛihatí manīshávasyúr ahve kuṣikásya sūnúḥ || 5 ||

॥१३॥ इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।
देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥६॥
प्रवाच्यं शश्वधा वीर्यं तदिन्द्रस्य कर्म यदहिं विवृश्चत् ।
वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः ॥७॥

índro asmáñ aradad vájrabāhur ápāhan vṛitrám paridhíṃ nadínām | devò 'nayat savitá supāṇís tásya vayám prasavé yāma urvíḥ || 6 || praváeyaṃ ṣaṣvadhá vīryàṃ tád índrasya kárma yád áhiṃ vivṛiṣcát | ví vájreṇa parishádo jaghānáyann ápó 'yanam ichámānāḥ || 7 ||

Impelled by the sun, soliciting his commands, both of you go to the ocean like charioteers to their goal: flowing together, and swelling with your waves, bright rivers, each one of you proceeds to meet the other. 2

I go to the most resourceful rivers; I go to the one, with variety of movements flowing together to a common receptacle, like parent cows hastening to caress the calf. 3

[The rivers speak]Fertilizing the land with our current, we are flowing to the receptacle which has been appointed by the divine Lord, the course appointed for our journey permits no delay. Of what is the sage desirous, that he addresses the rivers ? 4

[The sage speaks] I, the disciple of an enlightened teacher, having acquired necessary knowledge, now desirous of protection, solicit your favour and address with earnest prayer to you the rivers before me. O rivers, charged with water, rest a moment from your course at my request. 5

[The rivers speak]The resplendent sun, wielder of the sharp rays, defines our course when he slashes obstructive forces blocking the path of waters. The sun leads us on our path, and obedient to his commands we flow as ample streams. 6

[The sage speaks] The heroic endeavours of resplendent sun are ever to be celebrated as he sets asunder the dark venomous obstructive forces and with his sharp lightning destroys the surrounding obstructors of rains. Then the waters proceed in the desired direction. 7

एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥८॥
ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ॥९॥
आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन ।
नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥१०॥

etád váco jaritar máپi mrishthā ā́ yát te ghóshān úttarā yugáni | ukthéshu kāro práti no jushasva mā́ no ní kaḥ purushatrā́ námas te || 8 || ó shú svasāraḥ kāráve srinota yayaú vo dūrā́d ánasā ráthena | ní shū́ namadhvam bhávatā supārā́ adhoakshā́ḥ sindhavaḥ srotyā́bhiḥ || 9 || ā́ te kāro srinavāmā vácāṅsi yayátha dūrā́d ánasā ráthena | ní te naṅsai pīpyānéva yóshā máryāyeva kanyā̀ sasvacaí te || 10 ||

॥१४॥ यदङ्ग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इन्द्रजूतः ।
अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम् ॥११॥
अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम् ।
प्र पिन्वध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम् ॥१२॥
उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत ।
मादुष्कृतौ व्येनसाघ्न्यौ शूनमारताम् ॥१३॥

yád aṅgá tvā bharatā́ḥ saṃtáreyur gavyán grā́ma ishitá índrajūtaḥ | árshād áha prasaváḥ sárgatakta ā́ vo vriṇe sumatím yajñíyānām || 11 || átārishur bharatā́ gavyávaḥ sám ábhakta vípraḥ sumatím nadī́nām | prá pinvadhvam ishá-yantīḥ surā́dhā ā́ vakshánāḥ priṇádhvam yātá sībham || 12 || úd va ūrmíḥ sámyā hantv ā́po yóktrāṇi muñcata | mā́dushkritau vyènasāghnyaú sū́nam ā́ratām || 13 ||

[The rivers speak] O praiser of the resplendent sun, forget not this praise, nor the words of reverence that you have addressed to us for these words will be remembered in future too. O celebrator of holy rites, be favourable to us in solemn prayers. Treat us not in the arrogant manner as usually men do. May you accept our salutation. 8

[The sage speaks] O sister streams, kindly listen to him who praises you, who has come from afar with a chariot (cart). May you bow down lowlily; become easily fordable; remain, rivers, lower than the axle of the wheel with your currents. 9

[The rivers speak] O singer of the hymn, we hear your words, that you have come from afar with a cart and a chariot. We bow down before you like a woman nursing her child and like a maiden bending to embrace a man, so will we do for you. 10

[The sage speaks] Since, rivers, you have allowed me to cross, so may the people of this land pass over your united stream. May the people desiring to cross the streams, permitted by you and impelled by the sun, pass. Then let the course appointed for your going be resumed. I appreciate and admire the wisdom of the holy ones like you. 11

Illustrious people of the land, seeking wealth, pass over; the sage enjoys the favour of the rivers. May the streams irrigate the fields to make them fertile and produce wealth and abundance. May rivers fill the fields in full. 12

Let your waves (rivers) so flow that the pin of the yoke remains above the waters. And may the two streams, exempt from misfortune or defect, and unrestrained, stay within limits for our abundance. 13

(३४) चतुस्त्रिंशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१५॥ इन्द्रः पूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् ।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे ॥१॥
मखस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन् ।
इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा ॥२॥

34.

Índraḥ pūrbhíd ā́tirad dā́sam arkaír vidádvasur dáyamāno ví ṣátrūn | bráhmajūtas tanvā̀ vāvṛidhānó bhū́ridātra ā́pṛiṇad ródasī ubhé || 1 || makhásya te tavishásya prá jūtím íyarmi vā́cam amṛítāya bhū́shan | índra kshitīnā́m asi mā́nushīṇām viṣā́m daívīnām utá pūrvayā́vā || 2 ||

इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥३॥
इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः ।
प्रारोचयन्मनवे केतुमह्नामविन्दज्ज्योतिर्बृहते रणाय ॥४॥
इन्द्रस्तुजो बर्हणा आ विवेश नृवद्दधानो नर्या पुरूणि ।
अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासाम् ॥५॥

índro vṛitrám avṛiṇoc chárdhanītiḥ prá māyínām amināḍ várpaṇītiḥ | áhan vyàṅsam uṣádhag váneshv āvír dhénā akṛiṇod rāmyā́ṇām || 3 || índraḥ svarshā́ janáyann áhāni jigā́yoṣígbhiḥ pṛítanā abhishṭíḥ | prā́rocayan mánave ketúm áhnām ávindaj jyótir bṛihaté rā́ṇāya || 4 || índras tújo barhā́ṇā ā́ viveṣa nṛivád dádhāno náryā purū́ṇi | ácetayad dhíya imā́ jaritré prémám várṇam atirac chukrám āsām || 5 ||

34

The resplendent self, dispeller of the strongholds of evils, manifesting his greatness, mercilessly destroys his adversaries and overwhelms the wicked impulses with his radiant wisdom. Inspired by prayers, he expands his stature and armed in many ways he imparts spiritual joy to both the realms of body and mind. 1

O resplendent self, adorable and mighty, decorating you, I address sincere prayers to you for the sake of obtaining immortality. You are the leader of human generations as well of Nature's heavenly bounties. 2

The resplendent self, the inspirer of glorious deeds, destroys evils; resistless in combats, he overcomes deceivers who resolve to consume him. He completely annihilates the mutilated demoniac ideas lurking in the confused human brain and recovers the stolen wisdom, hidden in the dark caves of ignorance. 3

The bliss-bestower soul, as if like the sun, brightens the days, and helping brilliant sages subdues the gloom of evil impulses. He then illumines the banner of divine consciousness for the benefit of mankind and provides divine wisdom to win over conflicts of life. 4

The powerful soul breaks through all adversities like a leader piercing through the army of wicked enemies. It radiates wisdom in the minds of devotees and widely spreads out splendour by his own radiance. 5

॥१६॥ महो महानि पनयन्त्यस्येन्द्रस्य कर्म सुकृता पुरूणि ।
वृजनेन वृजिनान्त्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ॥६॥
युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ॥७॥

mahó mahā́ni panayanty asyéndrasya kárma súkṛitā purū́ṇi | vṛijánena vṛijinā́n sám pipesha māyā́bhir dásyū́ṅr abhíbhūtyojāḥ || 6 || yudhéndro mahnā́ várivaș cakāra devébhyaḥ sátpatiș carshaṇipráḥ | vivásvataḥ sádane asya tā́ni víprā ukthébhiḥ kaváyo gṛiṇanti || 7 ||

सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः ।
ससान यः पृथिवीं द्यामुतेमामिन्द्रं मदन्त्यनु धीरणासः ॥८॥
ससानात्याँ उत सूर्यं ससानेन्द्रः ससान पुरुभोजसं गाम् ।
हिरण्ययमुत भोगं ससान हत्वी दस्यून्प्रार्यं वर्णमावत् ॥९॥
इन्द्र ओषधीरसनोदहानि वनस्पतीँरसनोदन्तरिक्षम् ।
बिभेद वलं नुनुदे विवाचोऽथाभवद्दमिताभिक्रतूनाम् ॥१०॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥

satrāsā́ham váreṇyam sahodā́m sasavā́ṅsam svàr apáș ca devī́ḥ | sasā́na yáḥ pṛithivī́m dyā́m utémā́m índram madanty ánu dhī́raṇāsaḥ || 8 || sasā́nā́tyā́ṅ utá sū́ryam sasānéndraḥ sasāna purubhójasam gā́m | hiraṇyáyam utá bhógam sasāna hatví dásyūn prā́ryam várṇam āvat || 9 || índra óshadhīr asanod áhāni vánaspátīṅr asanod antáriksham | bibhéda valám nunudé vívācó 'thābhavad damitā́bhíkratūnām || 10 || șunám huvema — || 11 ||

Many great and glorious achievements of this mighty soul are universally celebrated. It crushes the strong by its own strength, and through its overpowering prowess, it overcomes the malignant by its wondrous art and wisdom. 6

The resplendent self, the protector of the virtuous and fulfiller of the aspirations of men gives opulent rewards to the sense-organs in the fierce struggle. Therefore, prudent sages praise his achievements with sacred hymns in the sacrificial chamber of the worshipper. 7

Devout and wise worshippers propitiate resplendent self, the subduer of evils, superb, the giver of strength, the enjoyer of bliss and fruits of divine actions, and granter of consciousness to the terrestrial and cosmic realms (of body and mind). 8

The soul gives vitality and divine consciousness. He gives speech which like a cow nourishes all. He enriches men with golden wisdom. Verily, he destroys the wicked ones and protects the group of virtuous people. 9

May the resplendent Lord, day by day, give us medicinal herbs, and plants and trees, and the water-laden clouds in the mid-space. He cleaves the clouds of ignorance, scatters opponents, and subdues proud adversaries. 10

We call on our bounteous Lord for our protection. He is a distinguished guide in our struggle and the supreme provider of food. He is terrible in battles, the destroyer of evil forces and the conqueror of wealth. 11

(३५) पञ्चत्रिंशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य गाथिनो विश्वामित्र ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१७॥ तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ ।
पिबास्यन्धो अभिसृष्टो अस्मे इन्द्र स्वाहा ररिमा ते मदाय ॥१॥
उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि ।
द्रवद्यथा संभृतं विश्वतश्चिदुपेमं यज्ञमा वहात इन्द्रम् ॥२॥

35.

Tíshṭhā hárī rátha ā́ yujyámānā yāhí vāyúr ná niyúto no ácha | píbāsy ándho abhísrishṭo asmé índra sváhā rarimā́ te mádāya || 1 || úpājirā́ puruhūtā́ya sáptī hárī ráthasya dhūrshv ā́ yunajmi | dravád yáthā sámbhṛitaṃ viṣvátaṣ cid úpemáṃ yajñám ā́ vahāta índram || 2 ||

उपो नयस्व वृषणा तपुष्पोतेमव त्वं वृषभ स्वधावः ।
ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः ॥३॥
ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू ।
स्थिरं रथं सुखमिन्द्राधितिष्ठन्प्रजानन्विद्वाँ उप याहि सोमम् ॥४॥
मा ते हरी वृषणा वीतपृष्ठा नि रीरमन्यजमानासो अन्ये ।
अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः कृणवाम सोमैः ॥५॥

úpo nayasva vṛíshaṇā tapushpótém ava tváṃ vṛishabha svadhāvaḥ | grásetām áṣvā ví muccha ṣóṇā divé-dive sadṛíṣīr addhi dhānā́ḥ || 3 || bráhmaṇā te brahmayújā yunajmi hárī sákhāyā sadhamā́da āṣū́ | sthiráṃ ráthaṃ sukháṃ indrādhitíshṭhan prajānán vidvā́ñ úpa yāhi sómam || 4 || mā́ te hárī vṛíshaṇā vītápṛishṭhā ní rīraman yájamānāso anyé | atyā́yāhi ṣáṣvato vayáṃ té 'raṃ sutébhiḥ kṛiṇavāma sómaiḥ || 5 ||

35

O resplendent self, having yoked the two faculties—mental and intellectual—in the chariot of human body, come to us, as the cosmic wind rushing towards us. We offer to you with reverence our loving devotion for your exaltation. 1

I harness for you, O resplendent self, invoked by all, the swift-gliding pair of mental and physical energies—to the chariot like human form, so that they may bring you to my well-set place of sacred work. 2

O showerer of benefits and giver of nourishment, may you bring your vigorous and protective steed-like faculties here and protect your worshippers. Let your sturdy senses relax here and enjoy nourishing food. May you also find the same nourishment day by day. 3

Reciting sacred prayers I harness these faculties which are your allies and swift-paced in the struggle of life and which are to be yoked with prayerful mind. O resplendent self, may you mounting on your firm and comfortable chariot, come to our devotional worship to participate in our spiritual joy. 4

Let not your vigorous and charming faculties be attracted by other host-worshippers. May you pass by them all and hasten onward hither. With loving devotion, we shall propitiate you to your full satisfaction. 5

॥१८॥ तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि ।
अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥६॥
स्तीर्णं ते बर्हिः सुत इन्द्र सोमः कृता धाना अत्तवे ते हरिभ्याम् ।
तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि ॥७॥

távāyáṃ sómas tvám éhy arvā́ñ chaṣvattamáṃ sumánā asyá pāhi | asmín yajñé barhíshy ā́ nishádyā dadhishvé-máṃ jaṭhára índum indra || 6 || stīrṇáṃ te barhíḥ sutá in-dra sómaḥ kritā́ dhānā́ áttave te háribhyām | tádokase pu-ruṣā́kāya vríshṇe marútvate túbhyaṃ rātā́ havī́ṅshi || 7 ||

इमं नरः पर्वतास्तुभ्यमापः समिन्द्र गोभिर्मधुमन्तमक्रन् ।
तस्यागत्या सुमना ऋष्व पाहि प्रजानन्विद्वान्पथ्या३ अनु स्वाः ॥८॥
याँ आभजो मरुत इन्द्र सोमे ये त्वामवर्धन्नभवन्गणस्ते ।
तेभिरेतं सजोषा वावशानो३ऽग्नेः पिब जिह्वया सोममिन्द्र ॥९॥
इन्द्र पिब स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र ।
अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व ॥१०॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥

imáṃ náraḥ párvatās túbhyam ā́paḥ sám indra góbhir má-dhumantam akran | tásyāgátyā sumánā ṛishva pāhi prajā́-nán vidvā́n pathyā̀ ánu svā́ḥ || 8 || yā́ñ ā́bhajo marúta indra sóme yé tvā́m ávardhann ábhavan gaṇás te | tébhir etáṃ sajóshā vāvaṣānò 'gnéḥ piba jihváyā sómam indra || 9 || ín-dra píba svadháyā cit sutásyāgnér vā pāhi jihváyā yaja-tra | adhvaryór vā práyataṃ ṣakra hástād dhótur vā ya-jñáṃ havísho jushasva || 10 || ṣunáṃ huvema — || 11 ||

O resplendent self, this loving devotion is for you; hasten to approach it, and well-disposed, taste it unceasingly. May you be enshrined in our prayerful heart and accept our humble love in full. 6

O resplendent self, our hearts are opened for you; our emotional affection is poured forth. The nourishing food for the physical and mental faculties has been made available. O showerer of benefits, may you dwell in our heart, girt with vital breaths. For you, these dedications are offered. 7

The leaders of the ceremony have prepared for you, O resplendent self, this elixir which has been sweetened with intellect, austerity and pure thoughts; O beautiful self, may you be favourably disposed to accept this elixir which suits well to your characteristic aptitude. 8

O resplendent self, may you drink this divine elixir, in the company of those vital breaths who share in this libation, who encourage you and are your associates. May you with your eagerness relish it with burning enthusiasm. 9

O resplendent self, may you drink of this effused spiritual nectar either your own by relish O adorable, or by burning compulsion. Drink it, O strong and potent, offered by the hands of presenters or accept it from the hands of the pious devotees. 10

We call on our bounteous Lord for our protection. He is a distinguished guide in our struggles and the supreme provider of food. He is terrible in battles, the destroyer of evil forces and the conqueror of wealth. 11

(३६) षट्त्रिंशं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्य (१–९, ११) प्रथमादिनवर्चामेकादश्याश्च गाथिनो विश्वामित्रः, (१०) दशम्याश्चाङ्गिरसो घोर ऋषी । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१९॥ इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्यादमानः ।
सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत् ॥१॥
इन्द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः ।
प्रयम्यमानान्प्रति षू गृभायेन्द्र पिब वृषधूतस्य वृष्णः ॥२॥

36.

Imā́m ū shú prábhṛitiṃ sātáye dhāḥ ṣáṣvac-chaṣvad ūtíbhir yā́damānaḥ | suté-sute vāvṛidhe várdhanebhir yáḥ kármabhir mahádbhiḥ súṣruto bhū́t || 1 || índrāya sómāḥ pradívo vídānā ṛibhúr yébhir vṛíshaparvā víhāyāḥ | prayamyámānān práti shū́ gṛibhāyéndra píba vṛíshadhūtasya vṛíshṇaḥ || 2 ||

पिबा वर्धस्व तव घा सुतास इन्द्र सोमासः प्रथमा उतेमे ।
यथापिबः पूर्व्याँ इन्द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ॥३॥
महाँ अमत्रो वृजने विरप्श्युग्रं शवः पत्यते धृष्ण्वोजः ।
नाह विव्याच पृथिवी चनैनं यत्सोमासो हर्यश्वममन्दन् ॥४॥
महाँ उग्रो वावृधे वीर्याय समाचक्रे वृषभः काव्येन ।
इन्द्रो भगो वाजदा अस्य गावः प्र जायन्ते दक्षिणा अस्य पूर्वीः ॥५॥

píbā várdhasva táva ghā sutā́sa índra sómāsaḥ prathamā́ utémé | yáthā́pibaḥ pūrvyā́ñ indra sómāñ evā́ pāhi pányo adyā́ návīyān || 3 || mahā́ñ ámatro vṛijáne virapṣy ùgrám ṣávaḥ patyate dhṛishṇv ójaḥ | nā́ha vivyāca pṛithiví canainam yát sómāso háryaṣvam ámandan || 4 || mahā́ñ ugró vāvṛidhe vīryā̀ya samā́cakre vṛishabháḥ kā́vyena índro bhago vājadā́ asya gā́vaḥ prá jāyante dákshiṇā asya pūrvíḥ || 5 ||

36

O resplendent self, ever-ready to help your associates with protective measures, accept our offerings for the grant of wealth. You are the one who grows with augmenting energies through reiterated libations and are renowned for glorious deeds. 1

For the resplendent self, the divine happiness is derived from the innermost celestial region, and thereby it becomes strong-jointed, vast and wise. O resplendent self, may you drink in full this divine happiness a juice, as if churned out and effused, capable of exhilarating and invigorating you, and providing you control over evil tendencies. 2

O resplendent self, accept the divine happiness and thrive. These blessings are offered to you from ancient times. O self, the adorable, cherish today the recent dedications as you have been enjoying in the past (previous lives). 3

The great illustrious self is invincible in battles and he is the defier of foes. His fierce strength and resistless vigour are exerted everywhere. When verily the divine happiness exhilarates this master of vigorous strength, his glory, neither the earth could comprehend nor the other one (heaven). 4

The mighty, fierce, auspicious and illustrious self, the showerer of benefits, augments in power as he is animated for heroic acts by praises. His senses of wisdom provide prosperity, and thus his contributions are manifold. 5

॥२०॥ प्र यत्सिन्धवः प्रसवं यथायन्नापः समुद्रं रथ्येव जग्मुः ।
अतश्चिदिन्द्रः सदसो वरीयान्यदीं सोमः पृणति दुग्धो अंशुः ॥६॥
समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः ।
अंशुं दुहन्ति हस्तिनो भरित्रैर्मध्वः पुनन्ति धारया पवित्रैः ॥७॥

prá yát síndhavaḥ prasavám yátháyann ápaḥ samudrám rathyèva jagmuḥ | átaṣ cid índraḥ sádaso váriyān yád ım sómaḥ priṇáti dugdhó aṅṣúḥ || 6 || samudréṇa síndhavo yádamānā índrāya sómam súshutam bhárantaḥ | aṅṣúm duhanti hastíno bharítrair mádhvaḥ punanti dháraya pavítraiḥ || 7 ||

ह्रदा इव कुक्षयः सोमधानाः समी विव्याच सवना पुरूणि ।
अन्ना यदिन्द्रः प्रथमा व्याश वृत्रं जघन्वाँ अवृणीत सोमम् ॥८॥
आ तू भर माकिरेतत्परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् ।
इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्र यन्धि ॥९॥
अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ।
अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन् ॥१०॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥

hradá iva kuksháyaḥ somadhánāḥ sám ī vivyāca sávanā purúṇi | ánnā yád índraḥ prathamá vy áṣa vritrám jaghanváñ avriṇīta sómam || 8 || á tú bhara mákir etát pári shṭhād vidmá hí ´tvā vásupatim vásūnām | índra yát te máhinam dátram ásty asmábhyam tád dharyaṣva prá yandhi || 9 || asmé prá yandhi maghavann rijīshinn índra rāyó viṣvávārasya bhúreḥ | asmé ṣatám ṣarádo jīváse dhā asmé vīráñ cháṣvata indra ṣiprin || 10 || ṣunám huvema — || 11 ||

As the rivers pursue their course, or as the rain-waters rush to the ocean, or chariots march to a goal, in the same manner, the milk of divine happiness rushingly fills the soul in full, and in this sense, the self becomes superb in his realm. 6

As the rivers are solicitious to fill up the ocean in the same way, the sense organs milk out the divine happiness, remove the evil impurities from it through proper filters, and carry it as an offering to the resplendent self. 7

The capacity of the resplendent self (the soul) for holding and enjoying the divine happiness is immense as that of a lake, for he has been receiving it and accumulating at numerous selfless sacrifices through the series of life. Inasmuch as he has enjoyed it at the first occasion, he has been simultaneously slaying the demon nescience, and then further enjoying the divine happiness, sharing it with other faculties. 8

O resplendent self, bestow prosperity, without delay; let no one impede you, for we know you to be the Lord of wealth of abundant treasures. And since your greatness is munificence, therefore, O Lord of speedy vitality, grant us ample riches. 9

He, the resplendent Lord, is to be invoked for the destruction of the devil of ignorance. He is to be adored and worshipped. He is the donor of lasting riches. He, the bounteous Lord, gives wealth to the mortal, who offers Him sincere devotion and dedication. 2

Men verily call upon Him in the times of adversities. When the devotees, men and women both, accept Him as their sole preserver, and approach Him, the bountiful Lord, they are blessed with the gift of sons and grandsons. 3

O powerful Lord, men variously put forth their vigour, striving together in the whirl of conflicts. While struggling against each other, they call upon Him for help. 4

Thereupon the offerer verily worships the powerful resplendent Lord and prepares oblation, as if a buttered cake, to offer to Him. Thereupon, the reciter of the devotional prayers turns out the unbelievers. And finally they take delight in worshipping the Lord, showerer of benefits. 5

॥१२॥

कृणोत्यस्मै वरिवो य इत्थेन्द्राय सोममुशते सुनोति ।
सध्रीचीनेन मनसाविवेनं तमित्सखायं कृणुते समत्सु ॥६॥
य इन्द्राय सुनवत्सोममद्य पचात्पक्तीरुत भृज्जाति धानाः ।
प्रति मनायोरुचथानि हर्यन्तस्मिन्दधद्वृषणं शुष्ममिन्द्रः ॥७॥
यदा समर्यं व्यचेदृघावा दीर्घं यदाजिमभ्यख्यदर्यः ।
अचिक्रदद्वृषणं पत्न्यच्छा दुरोण आ निशितं सोमसुद्भिः ॥८॥

krinóty asmai várivo yá itthéndrāya sómam uṣaté sunóti | sadhrīcínena mánasávivenan tám ít sákhāyam krinute samátsu || 6 || yá índrāya sunávat sómam adyá pácāt paktír utá bhrijjáti dhānáḥ | práti manāyór ucáthāni háryan tásmin dadhad vríshaṇam súshmam índraḥ || 7 || yadá samaryám vy áced ríghāvā dīrghám yád ājím abhy ákhyad aryáḥ | ácikradad vríshaṇam pátny áchā duroṇá á níṣitam somasúdbhiḥ || 8 ||

भूयसा वस्नमचरत्कनीयोऽविक्रीतो अकानिषं पुनर्यन् ।
स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहन्ति प्र वाणम् ॥९॥
क इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभिः ।
यदा वृत्राणि जङ्घनदथैनं मे पुनर्ददत् ॥१०॥
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥

bhúyasā vasnám acarat kánīyo 'vikrīto akānisham púnar yán | sá bhúyasā kánīyo nárirecid dīná dákshā ví duhanti prá vāṇám || 9 || ká imám daşábhir mámendram krīṇāti dhenúbhiḥ | yadá vritrāṇi jáṅghanad áthainam me púnar dadat || 10 || ná shṭutá — || 11 ||

Resplendent Lord awards him with blessings, who emotionally worships Him. The Lord, moved by the devotion, makes the devotee an ally in his struggles of life. 6

To one who offers to the resplendent Lord his matured emotions and dedications, just as to a guest are offered refreshing drinks and rich cooked meals along with puffed corns, He, the Lord blesses him with vigour and fulfils his aspirations. 7

When the hero warrior of the cosmic world, destroyer of evils, marks out his opposing forces and when he describes his heroic actions done in the long range planned cosmic creation, the cosmic intelligence as a bride in her own dwelling, encouraged by the tributes offered by devotees, takes delight in the praises 8

A man bids small price (his material gains) for an article of great value (spiritual). Lord, the seller, speaks to the buyer: this is still unpurchased (and you can have it). But He insists to get full price of the article. The purchaser, however, does not raise the offer. The seller sticks to his demand, and the purchaser on to his offer: both look to their own interests whilst milking the udder. 9

Who can purchase the entire spirituality for the humble price of ten cows! When one has destroyed the devil of malice, through the borrowed spirituality, it has to be returned back to the resplendent Lord. 10

O lauded and glorified resplendent Lord, may you grant ample food to your worshipper, as rivers swell high and give water. O Lord of vital glory, we continue composing new hymns for you. May we, car-borne, be victors for ever. 11

(२५) पञ्चविंशं सूक्तम्

(१–८) अष्टर्चस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१३॥ को अद्य नर्यो देवकाम उशन्निन्द्रस्य सख्यं जुजोष ।
को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥१॥
को नानाम वचसा सोम्याय मनायुर्वा भवति वस्त उस्राः ।
क इन्द्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती ॥२॥

25.

Kó adyá náryo devákāma uṣánn índrasya sakhyám jujosha | kó vā mahé 'vase pā́ryāya sámiddhe agnaú sutásoma īṭṭe || 1 || kó nānāma vácasā somyā́ya manāyúr vā bhavati vásta usrā́ḥ | ká índrasya yújyam káḥ sakhitvám kó bhrātrám vashṭi kaváye ká ūtí || 2 ||

को देवानामवो अद्या वृणीते क आदित्याँ अदितिं ज्योतिरीट्टे ।
कस्याश्विनाविन्द्रो अग्निः सुतस्यांशोः पिबन्ति मनसाविवेनम् ॥३॥
तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमुच्चरन्तम् ।
य इन्द्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणाम् ॥४॥
न तं जिनन्ति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत् ।
प्रियः सुकृत्प्रिय इन्द्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी ॥५॥

kó devā́nām ávo adyā́ vriṇīte ká ādityā́ñ áditim jyótir īṭṭe | kásyāṣvínāv índro agníḥ sutásyāṅsóḥ pibanti mánasā́vivenam || 3 || tásmā agnír bhā́rataḥ ṣárma yaṅsaj jyók paṣyāt sū́ryam uccárantam | yá índrāya sunávāméty ā́ha náre náryāya nrítamāya nriṇā́m || 4 || ná tám jinanti bahávo ná dabhrā́ urv àsmā áditiḥ ṣárma yaṅsat | priyáḥ sukrít priyá índre manāyúḥ priyáḥ suprāvíḥ priyó asya somí || 5 ||

25

Who is he, who, aspiring to be divine, yearns to enjoy the comradeship of resplendent Lord ? Or who with the extracted medicinal herbs and with enkindled fire (intense devotion and enthusiasm) adores Him to win His great and unbounded protection ? 1

Who has with prayer bowed to the Lord, the lover of devotion ? Who is earnestly devoted to Him ? Who is the admirer of the spiritual radiation emanating out of him ? Who seeks His communion ? His friendship ? His fraternity ? Who has recourse to the sage for help ? 2

Who solicits today the protection of Nature's bounties ? Who seeks eternity and the source of eternal light for spiritual enlightenment ? Propitiated by whose praise the pair of twin-divines—mental and spiritual faculties—the soul and the fire of vital forces, willingly accept the love of devotee ? 3

Whosoever says, "let us offer devotional love to the resplendent Lord, the guide of all ceremonies, the friend of man, the chief amongst leaders," to him the radiant, adorable Lord, the bearer of oblations, grants felicity, and he is blessed with long life to behold the rising sun. 4

Neither many collectively nor few individuals can overcome Him. The eternal Lord grants him infinite happiness. Dear to Him is one with noble acts and the one with noble thoughts and dear to Him is one who is particularly enlightened and the one completely dedicated to Him. 5

॥१४॥ सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेन्द्रः ।
नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहन्तेदवाचः ॥६॥
न रेवता पणिना सख्यमिन्द्रोऽसुन्वता सुतपाः सं गृणीते ।
आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलो भूत् ॥७॥
इन्द्रं परेऽवरे मध्यमास इन्द्रं यान्तोऽवसितास इन्द्रम् ।
इन्द्रं क्षियन्त उत युध्यमाना इन्द्रं नरो वाजयन्तो हवन्ते ॥८॥

suprāvyaḥ prāṣushā́ḷ eshá vīráḥ sushveḥ paktím kriṇute kévaléndraḥ | nā́sushver āpír ná sákhā ná jāmír dushprāvyò 'vahantéd avācaḥ || 6 || na revatā paṇinā sakhyám índró 'sunvatā sutapā́ḥ saṃ gṛiṇīte | ā́sya védaḥ khidáti hánti nagnáṃ ví súshvaye paktáve kévalo bhūt || 7 || índram páré 'vare madhyamā́sa índraṃ yānto 'vasitāsa índram | índraṃ kshiyánta utá yúdhyamānā índraṃ náro vājayánto havante || 8 ||

(२६) षड्विंशं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य (१-३) प्रथमादितृचस्य गौतमो वामदेव इन्द्रो वा (४-७) चतुर्थ्यादिचतसृणाञ्च गौतमो वामदेव ऋषिः । (१-३) प्रथमादितृचस्येन्द्र आत्मा वा (४-७) चतुर्थ्यादिचतसृणाञ्च श्येनो देवता । त्रिष्टुप् छन्दः ॥

॥१५॥ अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः ।
अहं कुत्समार्जुनेयं न्यृञ्जेऽहं कविरुशना पश्यता मा ॥१॥

26

Ahám mánur abhavaṃ súryaș cāhám kakshívā̃ ríshir asmi vípraḥ | ahám kútsam ārjuneyáṃ ny ṛiñje 'háṃ kavír uṣánā páṣyatā mā || 1 ||

This almighty resplendent Lord, the prompt dispeller of darkness, accessible with sincere love, grants maturity to the zealous devotee. (On the contrary) He is neither a brother, nor a kinsman, nor a friend, nor a relation of him who offers no dedication. He is beyond access, and the punisher of him, who pays no tributes. 6

The resplendent Lord, the accepter of loving devotion, keeps no alliance with the one who, though wealthy, is a black marketeer and who shows no devotion. He forfeits his wealth and destroys him when destitute. He is particularly friendly to him, who offers devotion and homage. 7

The resplendent Lord is invoked by the most exalted, the Lord invoked by the most humble, the Lord invoked by the intermediate ones. The moving ones invoke Him and so the stationary. He is invoked by those staying at home, and by fighters in the field. 8

•

26

I, so speaks the Supreme Self, am the prime source of contemplation and divine light. I am the far-seeing sage and centre of cosmic orbit. I am the accomplisher of piercing intellect. I am the poet, the well-wisher of all; so may you all behold me. 1

अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय ।
अहमपो अनयं वावशाना मम देवासो अनु केतमायन् ॥२॥
अहं पुरो मन्दसानो व्यैरं नव साकं नवतीः शम्बरस्य ।
शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावम् ॥३॥
प्र सु ष विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा ।
अचक्रया यत्स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टम् ॥४॥

aháṃ bhū́mim adadām ā́ryāyāháṃ vṛishṭíṃ dāṣúshe mártyāya | aháṃ apó anayaṃ vāvaṣānā́ máma devā́so ánu kétam āyan || 2 || aháṃ púro mandasānó vy aìraṃ náva sākáṃ navatīḥ ṣámbarasya | ṣatatamáṃ ve-ṣyàṃ sarvátātā dívodāsam atithigváṃ yád ā́vam || 3 || prá sú shá víbhyo maruto vír astu prá ṣyenáḥ ṣyenébhya āṣu-pátvā | acakráyā yát svadháyā suparṇó havyám bháran mánave devájushṭam || 4 ||

भरद्यदि विरतो वेविजानः पथोरुणा मनोजवा असर्जि ।
तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥५॥
ऋजीपी श्येनो ददमानो अंशुं परावतः शकुनो मन्द्रं मदम् ।
सोमं भरद्दादृहाणो देवावान्दिवो अमुष्मादुत्तरादादाय ॥६॥
आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतं च साकम् ।
अत्रा पुरंधिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥७॥

bhárad yádi vír áto vévijānaḥ pathórúṇā mánojavā asarji | tū́yaṃ yayau mádhunā somyé-notá ṣrávo vivide ṣyenó átra || 5 || ṛijīpí ṣyenó dádamāno aṅṣúm parāvátaḥ ṣakunó mandrám mádam | sómam bha-rad dādṛihāṇó devā́vān divó amúshmād úttarād ādā́ya || 6 || ādā́ya ṣyenó abharat sómaṃ sahásraṃ savā́ñ ayútaṃ ca sākám | átrā púraṃdhir ajahād árātīr máde sómasya mūrā́ ámūraḥ || 7 ||

I give the earth to the virtuous men. I shower rain for the benefit of dedicated mortals. I let forth the resonating waters. All Nature's bounties do move with my will. 2

In the perfection of bliss, I send forth showers of ninety and nine (unbound) blessings of rain clouds. I give all round shelter to the followers of path of light. I give hundredfold habitation to the reverential people. 3

This divine bird (the sun), O cosmic vital principles, is pre-eminent over other birds,—may this fleet-winged falcon be supreme of other falcons (ever-moving planets), since he with a wheelless car, strong-pinioned, brings godly bliss to mankind, which henceforth has been dear to Nature's bounties only. 4

When this divine bird (the sun) overpowering physical forces, carries off the divine bliss from here, it flies, swift as thought, along the vast path of the firmament ; it has flown rapidly with the sweet celestial elixir, and this falcon thence acquires glory in this world. 5

This straight-flying bird carries and brings the divine delightful elixir from afar. Having taken it from that lofty heaven, he brings this celestial blessing for humanity. 6

Having taken it, the bird brings the elixir with him to a thousand and ten-thousand sacred places of work and worship, and this being provided, the performer of many selfless deeds, the faultless Sun destroys all evil forces through the ecstasy of that divine elixir. 7

27

As I lay within the womb, I know all the births of these divinities in their order; a hundred fortresses of iron confine me, but as a falcon I come forth with rapid speed. 1

That embryo does not beguile me into perfect delight, and by the powerful vision of divine wisdom, I triumph over it. And being then the impeller of all, the sustainer of many, I destroy adversaries, and expanding, pass beyond the winds of worldly troubles. 2

When the divine falcon roars loudly with exultation, on his descent from celestial region, and the guardians of the elixir perceive that the elixir has been carried away by it, then the archer, pursuing with the speed of thought, and stringing his bow, let fly an arrow against it. 3

The straight-flying falcon carries off the vast and lofty heaven, as the pair of twin divines, carries off the rescuer from the region of Supreme Lord. Then a falling feather, from the body of the divine bird, drops from him, wounded in the conflict. 4

Now after damage, let the bounteous (bird, the soul) drink the pure, nutritious, sacrificial elixir, filled in a bright pitcher, full of divine knowledge and devotion, offered by the pious priests. May he, the hero, drink this sweet spiritual elixir, drink it for his spiritual bliss. 5

(२८) अष्टाविंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः । इन्द्र इन्द्रासोमौ वा देवते । त्रिष्टुप् छन्दः ॥

॥१७॥ त्वा युजा तव तत्सोम सख्य इन्द्रो अपो मनवे सस्रुतस्कः ।
अहन्नहिमरिणात्सप्त सिन्धूनपावृणोदपिहितेव खानि ॥१॥
त्वा युजा नि खिदत्सूर्यस्येन्द्रश्चक्रं सहसा सद्य इन्दो ।
अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि ॥२॥
अहन्निन्द्रो अदहदग्निरिन्दो पुरा दस्यून्मध्यंदिनादभीके ।
दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत् ॥३॥

28.

Tvā́ yujā́ táva tát soma sakhyá índro apó mánave sasrútas kaḥ | áhann áhim áriṇāt saptá síndhūn ápāvṛiṇod ápihiteva khā́ni || 1 || tvā́ yujā́ ní khidat sū́ryasyéndraş cakráṃ sáhasā sadyá indo | ádhi shṇúnā bṛihatā́ vártamānam mahó druhó ápa viṣvā́yu dhāyi || 2 || áhann índro ádahad agnír indo purā́ dásyūn madhyáṃdinad abhī́ke | durgé duroṇé krátvā ná yātā́m purū́ sahásrā ṣárvā ní barhīt || 3 ||

विश्वस्मात्सीमधमाँ इन्द्र दस्यून्विशो दासीरकृणोरप्रशस्ताः ।
अबाधेथाममृणतं नि शत्रूनविन्देथामपचितिं वधत्रैः ॥४॥
एवा सत्यं मघवाना युवं तदिन्द्रश्च सोमोर्वमश्व्यं गोः ।
आदर्दृतमपिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना ॥५॥

víṣvasmāt sīm adhamā́ñ indra dásyūn víṣo dā́sīr akṛiṇor apraṣastā́ḥ | ábādhethām ámṛiṇataṃ ní ṣátrūn ávindethām ápacitiṃ vádhatraiḥ || 4 || evā́ satyám maghavanā́ yuvám tad índraṣ ca somorvám áṣvyaṃ góḥ | ádardṛitam ápihitāny áṣnā riricáthuḥ kshā́ṣ cit tatṛidānā́ || 5 ||

28

Through that friendship, O blissful elixir, which unites you with your friend—inner self, he makes the thoughts flow for men; he destroys the devil of ignorance, and sends forth the faculties—seven senses. He opens the hidden divine wisdom. 1

With your alliance, O blissful, the soul quickly takes off by force the wheel of the chariot of the sun, the great oppressor, rolling far above in the high summit of the firmament. 2

The inner self destroys evils, O Lord of bliss, and divine fire consumes them before the noon worship. He casts down many a thousand fortresses of evils, usually difficult to be detected. 3

O resplendent self, you make these devils devoid of all benefits ; you subdue the tendencies of oppression. May you, O soul and Lord of bliss, repel and destroy animosities and accept our homage for this glorious fight. 4

O soul and Lord of bliss, possessor of wealth, destroyer of evils, it is indeed true that you burst open the doors of wisdom and vitality, which lie concealed, and you restore the land, recovered by your strength. 5

(२९) एकोनत्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

॥१८॥ आ नः स्तुत उप वाजेभिरूती इन्द्र याहि हरिभिर्मन्दसानः ।
तिरश्चिदर्यः सवना पुरूण्याङ्गूषेभिर्गृणानः सत्यराधाः ॥१॥
आ हि ष्मा याति नर्यश्चिकित्वान्हूयमानः सोतृभिरुप यज्ञम् ।
स्वश्वो यो अभीरुर्मन्यमानः सुष्वाणेभिर्मदति सं ह वीरैः ॥२॥
श्रावयेदस्य कर्णा वाजयध्यै जुष्टामनु प्र दिशं मन्दयध्यै ।
उद्वावृषाणो राधसे तुविष्मान्करन्न इन्द्रः सुतीर्थाभयं च ॥३॥

29.

Ā́ na stutá úpa vā́jebhir ūtī́ índra yāhí háribhir mandasānáḥ | tirás cid aryáḥ sávanā purū́ṇy āñgūshébhir griṇānáḥ satyárādhāḥ || 1 || ā́ hí shma yāti náryaç cikitvā́n hūyámānaḥ sotṛíbhir úpa yajñam | svásvo yó ábhīrur mányamānaḥ sushvāṇébhir mádati sám ha vīraiḥ || 2 || srāvāyed asya kárṇā vājayádhyai júshṭām ánu pra díṣam mandayádhyai | udvāvṛishāṇó rádhase túvishmān káran na índraḥ sutīrthā́bhayaṃ ca || 3 ||

अच्छा यो गन्ता नाधमानमूती इत्था विप्रं हवमानं गृणन्तम् ।
उप त्मनि दधानो धुर्याशून्सहस्राणि शतानि वज्रबाहुः ॥४॥
त्वोतासो मघवन्निन्द्र विप्रा वयं ते स्याम सूरयो गृणन्तः ।
भेजानासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः ॥५॥

ácha yó gántā nā́dhamānam ūtī́ itthā́ vípraṃ hávamānam griṇántam | úpa tmáni dádhāno dhury ā̀ṣū́n sahásrāṇi ṣatā́ni vájrabāhuḥ || 4 || tvótāso maghavann indra víprā vayáṃ te syāma sūráyo griṇántaḥ | bhejānā́so bṛiháddivasya rāyá ākāyyàsya dāvane purukshóḥ || 5 ||

29

Revered and lauded with sacred hymns, O resplendent Lord, most virtuous, and embodiment of truth, may you come with the speed of rays, through the ecstasy of your strength, to our places of work and worship, for our protection. 1

May He, the best friend of man, the omniscient, come to the place of worship, invoked by the singers of sacred hymns. He is possessed of vital energies, fearless, honoured by the seekers of spiritual joy. He rejoices the company of heroic forces. 2

May you make his ears listen, that he may be vigorous and show his delight from all sides. May He, the vigorous Lord, pouring forth his bounteous blessings, show us the right path and confer perfect safety, free from danger. 3

That resplendent Lord comes to His implorer, to the sage, who with his songs invites Him. He is armed with the bolt of punitive justice, and possesses hundreds and thousands of swift-going horse-like vital elements in the shafts of His divine chariot. 4

O [illegible] resplendent Lord, may we, the singers, the highly enlightened priests, protected by you, share the riches, sent from lofty heaven, which yield brilliant wealth and abundant food, cherished by all. 5

(३०) त्रिंशं सूक्तम्

(१-२४) चतुर्विंशत्यृचस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः। (१-८, १२-२४) प्रथमाद्यष्टर्चां द्वादश्यादित्रयोदशानाञ्चेन्द्रः, (९-११) नवम्यादितृचस्य चेन्द्रोषसौ देवते। (१-७, ९-२३) प्रथमादिसप्तर्चां नवम्यादिपञ्चदशानाञ्च गायत्री, (८, २४) अष्टमीचतुर्विंश्योश्चानुष्टुप् छन्दसी॥

॥१९॥ नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्। नकिरेवा यथा त्वम्॥१॥
सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः। सत्रा महाँ असि श्रुतः॥२॥
विश्वे चनेदना त्वा देवास इन्द्र युयुधुः। यदहा नक्तमातिरः॥३॥
यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते। मुषाय इन्द्र सूर्यम्॥४॥
यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत्। त्वमिन्द्र वनूँरहन्॥५॥

30.

Nákir indra tvád úttaro ná jyā́yāñ asti vṛitrahan | ná-kir evā́ yáthā tvám || 1 || satrā́ te ánu krishṭáyo víṣvā ca-kréva vāvṛituḥ | satrā́ mahā́ñ asi ṣrutáḥ || 2 || víṣve canéd anā́ tvā devā́sa indra yuyudhuḥ | yad áhā náktam ā́tiraḥ || 3 || yátrotá bādhitébhyaṣ cakrám kútsāya yúdhyate | mu-shāyá indra sū́ryam || 4 || yátra devā́ñ ṛighāyató víṣvāñ áyudhya éka ít | tvám indra vanū́ñr áhan || 5 ||

॥२०॥ यत्रोत मर्त्याय कमरिणा इन्द्र सूर्यम्। प्रावः शचीभिरेतशम्॥६॥
किमादुतासि वृत्रहन्मघवन्मन्युमत्तमः। अत्राह दानुमातिरः॥७॥
एतद्घेदुत वीर्यमिन्द्र चकर्थ पौंस्यम्।
स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः॥८॥
दिवश्चिद्घा दुहितरं महान्महीयमानाम्। उषासमिन्द्र सं पिणक्॥९॥

yátrotá mártyāya kám áriṇā indra sū́ryam | prā́vaḥ ṣá-cībhir étaṣam || 6 || kím ā́d utā́si vṛitrahan mághavan man-yumáttamaḥ | átrā́ha dā́num ā́tiraḥ || 7 || etád ghéd utá vī-ryàm índra cakártha paúṅsyam | stríyam yád durhaṇāyú-vam vádhīr duhitáram diváḥ || 8 || diváṣ cid ghā duhitáram mahā́n mahīyámānām | ushā́sam indra sám piṇak || 9 ||

30

There is no one, O resplendent dispeller of darkness, superior to you; no one better than you; there is no one, verily, such as you are. 1

Verily, men are attached to you, as the wheels to the chariot. In truth, you are great and renowned. 2

Verily, all Nature's forces, associated with you to obtain strength, confront with evil forces, then you destroy the opposing forces by day and by night. 3

In that contest, for the sake of wise sage, and his allies, you raise the wheel of the sun—the source of divine illumination. 4

In that contest indeed you singly fight with all those opposing forces. You strike down the malignant. 5

In that contest, O Lord, you speedily send forth the force of the sun (light-divine) for the sake of a mortal, and protect the diligent and wise man, like a skilled horse, by your divine radiance. 6

O opulent Lord, destroyer of evils, do you not thereupon become most eager, and, in consequence, strike down the evil forces. 7

Inasmuch as O Lord, you display such manly prowess, you smite down such forces, who conceive ill, like the sun wiping off the dawn — the daughter of the sky. 8

O supreme mighty Lord, you wipe off the evil, as the sun wipes off the glorious dawn, the daughter of heaven, whilst lifting herself with pride. 9

अपोषा अनसः सरत्संपिष्टादह बिभ्युषी । नि यत्सीं शिश्नथद्वृषा ॥१०॥

áposhā́ ánasaḥ sarat sáṃpishṭād áha bibhyúshī | ní yát sīṃ śiśnáthad vṛ́ishā || 10 ||

॥२१॥ एतदस्या अनः शये सुसंपिष्टं विपाश्या । ससार सीं परावतः ॥११॥
उत सिन्धुं विबाल्यं वितस्थानामधि क्षमि । परि ष्ठा इन्द्र मायया ॥१२॥
उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनम् । पुरो यदस्य संपिणक् ॥१३॥
उत दासं कौलितरं बृहतः पर्वतादधि । अवाहन्निन्द्र शम्बरम् ॥१४॥
उत दासस्य वर्चिनः सहस्राणि शतावधीः । अधि पञ्च प्रधीँरिव ॥१५॥

etád asyā ánaḥ śaye súsampishṭaṃ vípāśy ā́ | sasā́ra sīṃ parā́vátaḥ || 11 || utá síndhuṃ vibālyàṃ vitasthānā́m ádhi kshámi | pári shṭhā indra māyáyā || 12 || utá śúshṇasya dhṛishṇuyā́ prá mṛiksho abhí védanam | púro yád asya sampiṇák || 13 || utá dāsáṃ kaulitarám bṛihatáḥ párvatād ádhi | ávāhann indra śámbaram || 14 || utá dāsásya varcínaḥ sahásrāṇi śatā́vadhīḥ | ádhi páñca pradhī́ṅr iva || 15 ||

॥२२॥ उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः । उक्थेष्विन्द्र आभजत् ॥१६॥
उत त्या तुर्वशायदू अस्नातारा शचीपतिः । इन्द्रो विद्वाँ अपारयत् ॥१७॥
उत त्या सद्य आर्या सरयोरिन्द्र पारतः । अर्णाचित्ररथावधीः ॥१८॥
अनु द्वा जहिता नयोऽन्धं श्रोणं च वृत्रहन् । न तत्ते सुम्नमष्टवे ॥१९॥

utá tyám putrám agrúvaḥ párāvṛiktaṃ śatákratuḥ | ukthéshv índra ábhajat || 16 || utá tyā́ turváśāyádū asnātā́rā śácīpátiḥ | índro vidvā́ñ apārayat || 17 || utá tyā́ sadyá ā́ryā saráyor indra pārátaḥ | árṇācitrárathāvadhīḥ || 18 || ánu dvā́ jahitā́ nayo 'ndháṃ śroṇáṃ ca vṛitrahan | ná tát te sumnám áshṭave || 19 ||

Like the terrified dawn, the evil force descends from the broken chariot of cosmos, when the showerer of benefits smash it. 10

Then her shattered chariot starts journey on unobstructed paths, and she flies far away. 11

You sustain over-flowing stream of rivers over the land by your contrivance. 12

Valiantly you seize and carry off the wealth of exploiter, amassed by him, and then demolish his strong-holds. 13

Like the sun, may you strike down the dark clouds of evils, the source of all sins, hurling them off from the lofty mountain. 14

You annihilate the hundred, thousand and the five followers of the powerful infidels surrounding him like the fellies round the spokes of the wheel. 15

O resplendent Lord, performer of hundred noble deeds, may you make the descendants of brave leader, participants in singing sacred hymns. 16

The Lord of deeds, the all-wise, bears the stout and hard-working persons, denied of sacred rituals, across their difficulties. 17

You destroy at once those two kinds of people of status who are either money hoarders or are the power-blinds, living across the borders. 18

O destroyer of evils, you restore the two—the blind and the crippled, both abandoned. What more happiness could they have than the one given by you ! 19

शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत् । दिवोदासाय दाशुषे ॥२०॥

ṣatám aṣmanmáyīnam purám índro vy àsyat | dívodāsāya dāṣúshe || 20 ||

॥२३॥ अस्वापयद्दभीतये सहस्रा त्रिंशतं हथैः । दासानामिन्द्रो मायया ॥२१॥
स घेदुतासि वृत्रहन्त्समान इन्द्र गोपतिः । यस्ता विश्वानि चिच्युषे ॥२२॥
उत नूनं यदिन्द्रियं करिष्या इन्द्र पौंस्यम् । अद्या नकिष्टदा मिनत् ॥२३॥
वामंवामं त आदुरे देवो ददात्वर्यमा ।
वामं पूषा वामं भगो वामं देवः करूळती ॥२४॥

ásvāpayad dabhítaye sahásrā triṅṣátaṃ háthaiḥ | dāsánām índro māyáyā || 21 || sá ghéd utási vṛitrahan samāná indra gópatiḥ | yás tá víṣvāni cicyushé || 22 || utá nūnáṃ yád indriyáṃ karishyá indra paúṅsyam | adyá nákish ṭád á minat || 23 || vāmáṃ-vāmaṃ ta ādure devó dadātv aryamá | vāmám pūshá vāmám bhágo vāmáṃ deváḥ kárūḷatī || 24 ||

(३१) एकत्रिंशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः । इन्द्रो देवता । (१-२, ४-१५) प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्यादिद्वादशानाञ्च गायत्री, (३) तृतीयायाश्च पादनिचृच्छन्दसी ॥

॥२४॥ कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥१॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृळ्हा चिदारुजे वसु ॥२॥

31.

Káyā naṣ citrá á bhuvad ūtí sadávṛidhaḥ sákhā | káyā ṣácishṭhayā vṛitá || 1 || kás tvā satyó mádānām máṅhishṭho matsad ándhasaḥ | dṛiḷhá cid ārúje vásu || 2 ||

O resplendent Lord, you overthrow hundred stone-built cities for the benefit of a dedicated and loyal devotee. 20

The Lord put to sleep, by device and violent forces thirty thousand of law-breakers, for the sake of law and order. 21

O destroyer of evils, you are the same to all your worshippers. You are the Lord of wisdom, who cast down all adversaries. 22

Indeed, O Lord, when you are in the best of your vigour, none be there now to resist it. 23

O destroyer of evils, may the divine ordainer, grant us more and more of precious wealth. May the Lord nourisher grant us splendid wealth. May the gracious Lord and lover of craftsmen give all charming things to us. 24

31

By what means may He, who is ever augmenting, wonderful and friendly, come to us, and by what most effective contribution ? 1

What genuine and most earnest devotional offerings—like nourishing food, would inspirit you to win over evil thoughts and procure formidable treasures. 2

अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः ॥३॥
अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः । नियुद्भिश्चर्षणीनाम् ॥४॥
प्रवता हि क्रतूनामा हा पदेव गच्छसि । अभक्षि सूर्ये सचा ॥५॥

abhí shú ṇaḥ sákhīnām avitá jaritṝṇā́m | ṣatám bhavāsy ūtíbhiḥ || 3 || abhí na á vavṛitsva cakrám ná vṛittám árvataḥ | niyúdbhiṣ carshaṇīnā́m || 4 || pravátā hí krátūnām á hā padéva gáchasi | ábhakshi sū́rye sácā || 5 ||

॥२५॥ सं यत्त इन्द्र मन्यवः सं चक्राणि दधन्विरे । अध त्वे अध सूर्ये ॥६॥
उत स्मा हि त्वामाहुरिन्मघवानं शचीपते । दातारमविदीधयुम् ॥७॥
उत स्मा सद्य इत्परि शशमानाय सुन्वते । पुरू चिन्मंहसे वसु ॥८॥
नहि ष्मा ते शतं चन राधो वरन्त आमुरः । न च्यौत्नानि करिष्यतः ॥९॥
अस्माँ अवन्तु ते शतमस्मान्त्सहस्रमूतयः । अस्मान्विश्वा अभिष्टयः ॥१०॥

sáṃ yát ta indra manyávaḥ sáṃ cakrā́ṇi dadhanviré | ádha tvé ádha sū́rye || 6 || utá sma hí tvā́m āhúr in maghávānaṃ ṣacīpate | dā́tāram ávidīdhayum || 7 || utá smā sadyá ít pári ṣaṣamānā́ya sunvaté | purū́ cin maṅhase vásu || 8 || nahí shmā te ṣatáṃ caná rā́dho váranta āmúraḥ | ná cyautnā́ni karishyatáḥ || 9 || asmā́ñ avantu te ṣatám asmā́n sahásram ūtáyaḥ | asmā́n víṣvā abhíshṭayaḥ || 10 ||

॥२६॥ अस्माँ इहा वृणीष्व सख्याय स्वस्तये । महो राये दिवित्मते ॥११॥
अस्माँ अविड्ढि विश्वहेन्द्र राया परीणसा । अस्मान्विश्वाभिरूतिभिः ॥१२॥
अस्मभ्यं ताँ अपा वृधि व्रजाँ अस्तेव गोमतः । नवाभिरिन्द्रोतिभिः ॥१३॥

asmā́ñ ihá vṛiṇīshva sakhyā́ya svastáye | mahó rāyé divítmate || 11 || asmā́ñ aviḍḍhi viṣváhéndra rāyā́ párīṇasā | asmā́n víṣvābhir ūtíbhiḥ || 12 || asmábhyaṃ tā́ñ ápā vṛidhi vrajā́ñ ásteva gómataḥ | návābhir indrotíbhiḥ || 13 ||

May you, the protector of us, your friends and admirers, come to us with a hundred protections. 3

Attracted by the praises of men, may you come speedily to us like a horse-driven, revolving wheel. 4

You swiftly come in a downward direction to sacred places of worship, as if to your own abode. I glorify you along with your divine refulgence. 5

Our adorations, and these sacred ceremonies when addressed to you, first proceed to you, and then to your effulgence. 6

O Lord of all holy acts, men call you bounteous, munificent, and free from all blemishes. 7

And verily, you give promptly abundant wealth to him, who praises you, and offers loving devotion. 8

Adversaries cannot deprive you of hundred-fold opulence, nor resist your great forces when you react. 9

May your hundred and thousand protections preserve us ; may all your desires be our blessings. 10

May you prefer to select us, on this occasion, for your friendship, and our prosperity and for great celestial opulence. 11

Favour us, O resplendent Lord, daily with infinite riches and protection and bless us with all. 12

With fresh protections, O Lord supreme, like an archer, open for us the doors of pastures with grazing cattles. 13

अस्माकं धृष्णुया रथो द्युमाँ इन्द्रानपच्युतः । गव्युरश्वयुरीयते ॥१४॥
अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य । वर्षिष्ठं द्यामिवोपरि ॥१५॥

asmákam dhrishṇuyá rátho dyumáñ indránapacyutaḥ | gavyúr aṣvayúr īyate || 14 || asmā́kam uttamáṃ kṛidhi ṣrávo devéshu sūrya | várshishṭhaṃ dyám ivopári || 15 ||

(३२) द्वात्रिंशं सूक्तम्

(१–२४) चतुर्विंशत्यृचस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः । (१–२२) प्रथमादिद्वाविंशत्यृचामिन्द्रः, (२३–२४) त्रयोविंशीचतुर्विंश्योश्चेन्द्रस्याश्वौ देवताः । गायत्री छन्दः ॥

॥२७॥ आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि । महान्महीभिरूतिभिः ॥१॥
भृमिश्चिद्घासि तूतुजिरा चित्र चित्रिणीष्वा । चित्रं कृणोष्यूतये ॥२॥
दभ्रेभिश्चिच्छशीयांसं हंसि व्राधन्तमोजसा । सखिभिर्ये त्वे सचा ॥३॥
वयमिन्द्र त्वे सचा वयं त्वाभि नोनुमः । अस्माँअस्माँ इदुदव ॥४॥
स नश्चित्राभिरद्रिवोऽनवद्याभिरूतिभिः । अनाधृष्टाभिरा गहि ॥५॥

32.

Ā tū́ na indra vṛitrahann asmā́kam ardhám ā́ gahi | mahā́n mahíbhir ūtíbhiḥ || 1 || bhṛ́imiṣ cid ghāsi tū́tujir ā́ citra citríṇīshv ā́ | citráṃ kṛiṇoshy ūtáye || 2 || dabhrébhiṣ cic chāṣīyā́ṅsaṃ háṅsi vrā́dhantam ójasā | sákhibhir yé tvé sácā || 3 || vayám indra tvé sácā vayáṃ tvābhí nonumaḥ | asmā́ñ-asmā́ñ íd úd ava || 4 || sá naṣ citrā́bhir adrivo 'navadyā́bhir ūtíbhiḥ | ánādhṛishṭābhir ā́ gahi || 5 ||

May our victory-chariot, the winner of cows and horses, brilliant and unfailing, O resplendent Lord, proceed everywhere unobstructed. 14

O Lord, may you make our fame exalted among the learned just as the sun places the rain—shedding celestial region over all the lower ones. 15

32

O mighty resplendent Lord, dispeller of darkness, may you come to help us with your mighty protections. 1

You the swift and ever moving, O marvellous Lord, amazing are your deeds, for the protection of those who are engaged in wondrous works. 2

You destroy, by your strength, the fierce and assailing evil forces to help faithful friends, howsoever humble. 3

O resplendent Lord, we are close friends to you, and glorify you with reverence. May you protect us from all sides. 4

O wielder of the punitive justice, may you come to us, with wondrous, irreproachable and irresistible protections. 5

॥२८॥ भूयामो षु त्वावतः सखाय इन्द्र गोमतः । युजो वाजाय घृष्वये ॥६॥
त्वं ह्येक ईशिष इन्द्र वाजस्य गोमतः । स नो यन्धि महीमिषम् ॥७॥
न त्वा वरन्ते अन्यथा यद्दित्ससि स्तुतो मघम् । स्तोतृभ्य इन्द्र गिर्वणः ॥८॥
अभि त्वा गोतमा गिरानूषत प्र दावने । इन्द्र वाजाय घृष्वये ॥९॥
प्र ते वोचाम वीर्या३ या मन्दसान आरुजः । पुरो दासीरभीत्य ॥१०॥

bhūyámo shú tvávataḥ sákhāya indra gómataḥ | yújo vájāya ghṛishvaye || 6 || tvám hy éka íṣisha índra vájasya gómataḥ | sá no yandhi mahī́m ísham || 7 || ná tvā varante anyáthā yád dítsasi stutó magháṃ | stotṛíbhya indra girvaṇaḥ || 8 || abhí tvā gótamā giránushata prá dāváne | índra vájāya ghṛíshvaye || 9 || prá te vocāma vīryā̀ yá mandasāná árujaḥ | púro dásīr abhítya || 10 ||

॥२९॥ ता ते गृणन्ति वेधसो यानि चकर्थ पौंस्या । सुतेष्विन्द्र गिर्वणः ॥११॥
अवीवृधन्त गोतमा इन्द्र त्वे स्तोमवाहसः । ऐषु धा वीरवद्यशः ॥१२॥
यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम् । तं त्वा वयं हवामहे ॥१३॥
अर्वाचीनो वसो भवास्मे सु मत्स्वान्धसः । सोमानामिन्द्र सोमपाः ॥१४॥
अस्माकं त्वा मतीनामा स्तोम इन्द्र यच्छतु । अर्वागा वर्तया हरी ॥१५॥

tá te gṛiṇanti vedháso yáni cakártha paúṅsyā | sutéshv indra girvaṇaḥ || 11 || ávīvṛidhanta gótamā índra tvé stómavāhasaḥ | áishu dhā vīrávad yáṣaḥ || 12 || yác cid dhí ṣáṣvatām ásíndra sádhāraṇas tvám | táṃ tvā vayáṃ havāmahe || 13 || arvācīnó vaso bhavāsmé sú matsvándhasaḥ | sómānām indra somapāḥ || 14 || asmákaṃ tvā matīnám á stóma indra yachatu | arvág á vartayā hárī || 15 ||

May we be friends of one like you, O resplendent Lord, the possessor of wisdom, for the sake of abundant wealth and vigour. 6

O resplendent Lord, you alone are the master of our cattle and crop. May you grant us ample food. 7

You decide to bestow wealth to devotees, O resplendent Lord worthy of adoration; none can dare change you from your decision. 8

The most enlightened devotees glorify you with praise, that you may grant ample wealth and vigour. 9

We proclaim your prowess, whereby, through the ecstasy of joy, you proceed to attack the evil-minded and overpower their strong-holds. 10

O resplendent Lord, lauded by sacred hymns, the pious sages celebrate your heroic deeds, performed through the exhilaration of devotional love. 11

The most enlightened sages, offerers of praise, exalt you, O resplendent Lord! may you bestow upon them fame and posterity. 12

Verily your blessings are ever showered on all equally, and hence do we invoke you. 13

O resplendent Lord, the giver of all comforts, accepter of devotional love, be present with us, and be delighted by the sweet melodies of our prayers. 14

O resplendent Lord, may these praises, which we present to you bring you to us. May you turn both of your horses (of chariot) hitherward. 15

पुरोळाशं च नो घसो जोषयासे गिरश्च नः । वधूयुरिव योषणाम् ॥१६॥

purolá-
sam ca no gháso josháyāse gíraṣ ca naḥ | vadhūyúr iva
yóshaṇām || 16 ||

॥२०॥ सहस्रं व्यतीनां युक्तानामिन्द्रमीमहे । शतं सोमस्य खार्यः ॥१७॥
सहस्रा ते शता वयं गवामा च्यावयामसि । अस्मत्रा राध एतु ते ॥१८॥
दश ते कलशानां हिरण्यानामधीमहि । भूरिदा असि वृत्रहन् ॥१९॥
भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर । भूरि घेदिन्द्र दित्ससि ॥२०॥
भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन् । आ नो भजस्व राधसि ॥२१॥
प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात् । माभ्यां गा अनु शिश्रथः ॥२२॥
कनीनकेव विद्रधे नवे द्रुपदे अर्भके । बभ्रू यामेषु शोभेते ॥२३॥
अरं म उस्रयाम्णेऽरमनुस्रयाम्णे । बभ्रू यामेष्वस्रिधा ॥२४॥

sahásram vyátīnām yuktánām índram īmahe | ṣatám só-
masya khāryàḥ || 17 || sahásrā te ṣatá vayám gávām á cyā-
vayāmasi | asmatrá rádha etu te || 18 || dáṣa te kaláṣānām
híraṇyānām adhīmahi | bhūridá asi vṛitrahan || 19 || bhúridā
bhúri dehi no má dabhrám bhúry á bhara | bhúri ghéd in-
dra ditsasi || 20 || bhūridá hy ási ṣrutáḥ purutrá ṣūra vṛi-
trahan | á no bhajasva rádhasi || 21 || prá te babhrú vica-
kshaṇa ṣáṅsāmi goshaṇo napāt | mábhyām gá ánu ṣiṣra-
thaḥ || 22 || **kanīnakéva vidradhé náve drupadé arbhaké |
babhrú yámeshu ṣobhete || 23 || áram ma usráyāmṇé 'ram
ánusrayāmṇe | babhrú yámeshv asrídhā || 24 ||**

May you accept our offerings of butter and cakes and be delighted by our praises, as a libertine by the caresses of a woman. 16

We solicit resplendent Lord, for swift moving transport vehicles in response to our hundreds of devotional prayers. 17

We seek to bring down from you, thousands and hundreds of cattles. May your wealth flow to us freely. 18

May we obtain from you, ten pitchers of gold; for you, O dispeller of darkness, are a bountiful giver. 19

A bountiful giver you are, O resplendent Lord; may you give us bountifully, not little, give plenty; for verily you desire to give more and ever more. 20

O brave dispeller of darkness, verily you are renowned among many as a bountiful giver. Make us partner of your treasures. 21

O eternal omniscient protector and sustainer of wisdom, I praise the pair of your horse-like energies. May you not let our cow of mind be frightened with them. 22

Like two puppets, on an arranged new and slender stage, your two faculties—mental and vital—are brilliant at the cosmic sacrifice. 23

Blessed are your brown steeds when they move to the upper solstice, and blessed are they when move to the opposite one; they are innocuous at both the sacrifices. 24

(३३) त्रयस्त्रिंशं सूक्तम्
(१-११) एकादशर्चस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः । ऋभवो देवताः । त्रिष्टुप् छन्दः ॥

॥१॥ प्र ऋभुभ्यो दूतमिव वाचमिष्य उपस्तिरे श्वैतरीं धेनुमीळे ।
ये वातजूतास्तरणिभिरेवैः परि द्यां सद्यो अपसो बभूवुः ॥१॥
यदारमक्रन्नृभवः पितृभ्यां परिविष्टी वेषणा दंसनाभिः ।
आदिद्देवानामुप सख्यमायन्धीरासः पुष्टिमवहन्मनायै ॥२॥
पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा शयाना ।
ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तो मधुप्सरसो नोऽवन्तु यज्ञम् ॥३॥

33.

Prá ribhúbhyo dūtám iva vā́cam ishya upastíre ṣvaíta-rīm dhenúm īḷe | yé vā́tajūtās taráṇibhir évaiḥ pári dyā́m sadyó apáso babhūvúḥ || 1 || yadā́ram ákrann ribhávaḥ pitṛíbhyām pariviṣhṭī́ veshánā daṅsánābhiḥ | ā́d íd devā́nām úpa sakhyám āyan dhī́rāsaḥ pushṭím avahan manā́yai || 2 || púnar yé cakrúḥ pitárā yúvānā sánā yū́peva jaraṇā́ sá-yānā | té vā́jo víbhvāñ ribhúr índravanto madhupsaraso no 'vantu yajñám || 3 ||

यत्संवत्समृभवो गामरक्षन्यत्संवत्समृभवो मा अपिंशन् ।
यत्संवत्समभरन्भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः ॥४॥
ज्येष्ठ आह चमसा द्वा करेति कनीयान्त्रीन्कृणवामेत्याह ।
कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत्पनयद्वचो वः ॥५॥

yát saṃvátsam ribhavo gām árakshan yát saṃvátsam ribhávo mā́ ápiṅṣan | yát saṃvátsam ábharan bhā́so asyā́s tā́bhiḥ ṣámībhir amṛitatvám āṣuḥ || 4 || jyeshṭhá āha camasā́ dvā́ karéti kánīyān trī́n kṛiṇavāmety āha | kanishṭhá āha catúras karéti tváshṭa ribhavas tát panayad váco vaḥ || 5 ||

33

I send my prayer as a messenger to the intellectuals; I solicit of them the words of sacred wisdom, the yielder of untinted truth. These words are swift as the wind, and the inspirers of noble deeds. These words of advice move freely across the dimension of space and time as if borne by rapid waves of the cosmic wind. 1

When the wise sages, by serving their parents with renovated youth, and by other works, achieve enough, they thereupon proceed to the society of the enlightened, and being friendly they bring nourishment to the devout worshipper. 2

May the physically, intellectually and spiritually advanced sages, always dedicated to resplendent Lord, and lovers of sweet spiritual joy, protect our noble deeds. These sages who render service to their decrepid and dropsy parents, who were laying like two dry posts, make them young again for ever. 3

When for a year, the wise sages preserve the barren land, for a year they invest it with fertility; for a year they continue effort to make it fertile; they obtain immortality by their noble deeds. 4

The eldest of the intellectuals said, "The universe is made of two hemispheres". The younger said, "There are three (the upper, the middle, the lower)." The youngest said, "It consists of four quadrants." The creator applauds this version. 5

॥२॥ सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेताम् ।
विभ्राजमानांश्चमसाँ अहेवावेनत्त्वष्टा चतुरो ददृश्वान् ॥६॥
द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः ।
सुक्षेत्राकृण्वन्ननयन्त सिन्धून्धन्वातिष्ठन्नोषधीर्निम्नमापः ॥७॥
रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम् ।
त आ तक्षन्त्वृभवो रयिं नः स्ववसः स्वपसः सुहस्ताः ॥८॥
अपो ह्येषामजुषन्त देवा अभि क्रत्वा मनसा दीध्यानाः ।
वाजो देवानामभवत्सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा ॥९॥

satyám ūcur nára evā́ hí cakrúr ánu svadhā́m ṛibhávo jagmur etā́m | vibhrā́jamānāṅṣ camasā́ṅ áhevā́venat tváshṭā catúro dadṛisvā́n || 6 || dvā́daṣa dyū́n yád ágohyasyātithyé ráṇann ṛibhávaḥ sasántaḥ | sukshétrākṛiṇvann ánayanta sín-dhūn dhánvātishṭhann óshadhīr nimnám ā́paḥ || 7 || rátham yé cakrū́ḥ suvṛ́tam nareshṭhā́m yé dhenúm viṣvajúvam vi-ṣvárūpām | tá ā́ takshantv ṛibhávo rayím naḥ svávasaḥ svápasaḥ suhástāḥ || 8 || ápo hy èshām ájushanta devā́ abhí krátvā mánasā dī́dhyānāḥ | vā́jo devā́nām abhavat sukár-méndrasya ṛibhukshā́ váruṇasya víbhvā || 9 ||

ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा ।
ते रायस्पोषं द्रविणान्यस्मे धत्त ऋभवः क्षेमयन्तो न मित्रम् ॥१०॥
इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रान्तस्य सख्याय देवाः ।
ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन्त्सवने दधात ॥११॥

yé hárī me-dháyokthā́ mádanta índrāya cakrúḥ suyújā yé áṣvā | té rā-yás pósham dráviṇāny asmé dhattá ṛibhavaḥ kshemayánto ná mitrám || 10 || idā́hnaḥ pītím utá vo mádam dhur ná ṛité ṣrāntásya sakhyā́ya devā́ḥ | té nūnám asmé ṛibhavo vásūni tṛitíye asmín sávane dadhāta || 11 ||

The leaders of men speak truth, and so they classify the universe. Thereupon the intellectuals follow their inspired version. The supreme creator, beholding the quadrant classification, radiant as the day, expresses satisfaction. 6

When the intellectuals reposing for twelve days, remain in the close proximity of the unconcealable sun (the truth), they render the fields fertile. Let the rivers flow forth, let plants spring upon the hitherto barren land, and let waters spread over the low places. 7

These experienced intellectuals construct the firm abiding, wheel-conducting car; they rear many breads of milch-cow and are the bestowers of food, the doers of great deeds and dexterous. May they grant us riches. 8

The enlightened men are delighted by the work of sages. The mechanical technicians become favourite of the enlightened ones, electrical of the resplendent ones, and hydrodynamical of the venerable. 9

May these electrical technicians, deserving appreciation, who devise motors of vehicles, and construct for the resplendent the two docile engines (for roadways and waterways), bestow upon us satiety of riches and wealth of cattle, like those who devise prosperity for a friend. 10

The godly persons verily give you the exhilarating appreciation today. Not without toil, the divines get friendly with men. Therefore, O eminent sages, grant us wealth at this third term of worship. 11

(३४) चतुस्त्रिंशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः। ऋभवो देवताः। त्रिष्टुप् छन्दः॥

॥३॥ ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेमं यज्ञं रत्नधेयोप यात।
इदा हि वो धिषणा देव्यह्नामधात्पीतिं सं मदा अग्मता वः॥१॥
विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋभवो मादयध्वम्।
सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वम्॥२॥
अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत्प्रदिवो दधिध्वे।
प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः॥३॥

34.

Ribhúr víbhvā vā́ja índro no áchemáṃ yajñáṃ ratnadhéyópa yāta | idā́ hí vo dhishánā devy áhnām ádhāt pītíṃ sám mádā agmatā vaḥ || 1 || vidānā́so jánmano vājaratnā utá ṛitúbhir ṛibhavo mādayadhvam | sáṃ vo mádā ágmata sám púraṃdhiḥ suvī́rām asmé rayím érayadhvam || 2 || ayáṃ vo yajñá ṛibhavo 'kāri yám ā́ manushvát pradívo dadhidhvé | prá vó 'chā jujushāṇā́so asthur ábhūta víṣve agriyótá vājāḥ || 3 ||

अभूदु वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय।
पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय॥४॥
आ वाजा यातोप न ऋभुक्षा महो नरो द्रविणसो गृणानाः।
आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्व इव ग्मन्॥५॥

ábhūd u vo vidhaté ratnadhéyam idā́ naro dāṣushe mártyāya | píbata vājā ṛibhavo dadé vo máhi tṛitī́yaṃ sávanam mádāya || 4 || ā́ vājā yātópa na ṛibhukshā mahó naro dráviṇaso gṛiṇānā́ḥ | ā́ vaḥ pītáyo 'bhipitvé áhnām imā́ ástaṃ navasvà iva gman || 5 ||

34

The illustrious technicians, electrical, hydrodynamical and physical, may grace our work and worship, to distribute precious things. These people of genius have toiled hard in their craft, the essence. Their exhilarating experience is collected for you all. 1

O brilliant sages of spiritual and physical realms, wise from the day of birth, may you rejoice together in appropriate seasons. The exhilarating appreciation is offered to you as well as the intellectual offerings. May you confer upon us riches with excellent posterity. 2

O spiritual leaders, this benevolent work is instituted for you. Being eminently resplendent, you have been doing it, like common men. These propitiatory offerings have been placed for you. O masters of physical realm, verily you are foremost leaders of the world. 3

Now, O leaders, this precious treasure is to be granted as gift to the dedicated mortal worshipper, who serves you. O leaders of physical and spiritual realms, this elixir is to gladden you in the third-afternoon—solemn ceremony. 4

O leaders of material and spiritual realm, come to us with the delight of accepting this rich and great offering. These sacred essences proceed to you, as the day is closing, as cows whose calves are newly born, return to their cow-shed. 5

॥४॥ आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः ।
सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इन्द्रवन्तः ॥६॥
सजोषा इन्द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ।
अग्रेपाभिर्ऋतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥७॥
सजोषस आदित्यैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः ।
सजोषसो दैव्येना सवित्रा सजोषसः सिन्धुभी रत्नधेभिः ॥८॥
ये अश्विना ये पितरा य ऊती धेनुं ततक्षुर्ऋभवो ये अश्वा ।
ये अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥९॥

ā́ napātaḥ ṣavaso yātanópemáṃ yajñáṃ námasā hūyámānāḥ | sajóshasaḥ sūrayo yásya ca sthá mádhvaḥ pāta ratnadhā́ índravantaḥ || 6 || sajoshā indra váruṇena sómaṃ sajóshāḥ pāhi girvaṇo marúdbhiḥ | agrepábhir ṛitupábhiḥ sajóshā gnáspátnībhī ratnadhā́bhiḥ sajóshāḥ || 7 || sajóshasa ādityaír mādayadhvaṃ sajóshasa ṛibhavaḥ párvatebhiḥ | sajóshaso daívyenā savitrā́ sajóshasaḥ síndhubhī ratnadhébhiḥ || 8 || yé aṣvínā yé pitárā yá ūtī́ dhenúṃ tatakshúr ṛibhávo ye áṣvā | yé áṅsatrā yá ṛídhag ródasī yé víbhvo náraḥ svapatyáni cakrúḥ || 9 ||

ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तं पुरुक्षुम् ।
ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति ॥१०॥
नापाभूत न वोऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन् ।
समिन्द्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥११॥

yé gómantaṃ vā́javantaṃ suvī́raṃ rayíṃ dhatthá vásumantam purukshúm | té agrepā́ ṛibhavo mandasānā́ asmé dhatta yé ca rātíṃ gṛiṇánti || 10 || nā́pābhūta ná vo 'tītṛishāmánihṣastā ṛibhavo yajñé asmín | sám índreṇa mádatha sáṃ marúdbhiḥ sáṃ rā́jabhī ratnadhéyaya devāḥ || 11 ||

O source of strength, may you come to this worship, invoked with reverence. May you, associated with resplendent self, with whom you are wisely in full accord, drink this precious sweet essence. 6

O spiritual self, may you drink and relish the essence in the company of mental ego. O praised by hymns, drink it in company with vital elements. Drink it with love in company with the fore-most guardians at the ceremonies connected with the seasons. May you drink it in company with rich guardians of wives. 7

O leaders of spiritual realms, be exhilarated, in company with the enlightened, in company with public servants controlling hilly products, ecclesiastical duties, creative arts, river projects, and, mines and minerals. 8

Spiritual leaders, by your assistance, the physicians and surgeons have been able to treat the elders, as well as cattle and kine; and technicians have been able to fabricate motors, engines and armour, and have shown skill as ground and space engineers, they have been notable for their fruitful works. 9

The technicians and architects possess wealth, comprising cattle, food, progeny, dwellings, and abundant sustenance; may you, being the first drinkers of the sacred knowledge when exhilarated grant prosperity to those, who glorify your generosity. 10

O men of experience and wisdom; go not away, let us not leave you; may you be present unreproached at this worship; rejoice along with resplendent leader and with the brave warriors, and with other brilliant dignitories for the distribution of wealth. 11

(३५) पञ्चत्रिंशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य गौतमो वामदेव ऋषिः । ऋभवो देवताः । त्रिष्टुप् छन्दः ॥

॥१॥ इहोप यात शवसो नपातः सौधन्वना ऋभवो माप भूत ।
अस्मिन्हि वः सवने रत्नधेयं गमन्त्विन्द्रमनु वो मदासः ॥१॥
आगन्नृभूणामिह रत्नधेयमभूत्सोमस्य सुषुतस्य पीतिः ।
सुकृत्यया यत्स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा ॥२॥

35.

Ihópa yāta ṣavaso napātaḥ saúdhanvanā ṛibhavo mápa bhūta | asmín hí vaḥ sávane ratnadhéyaṃ gámantv índram ánu vo mádāsaḥ || 1 || ágann ṛibhūṇáṃ ihá ratnadhéyam ábhūt sómasya súshutasya pītíḥ | sukṛityáyā yát svapasyáyā caṅ ékaṃ vicakrá camasáṃ caturdhá || 2 ||

व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत ।
अथैत वाजा अमृतस्य पन्थां गणं देवानामृभवः सुहस्ताः ॥३॥
किंमयः स्विच्चमस एष आस यं काव्येन चतुरो विचक्र ।
अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य ॥४॥
शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानम् ।
शच्या हरी धनुतरावतष्टेन्द्रवाहावृभवो वाजरत्नाः ॥५॥

vy àkṛiṇota camasáṃ caturdhá sákhe ví ṣikshéty abravīta | áthaita vājā amṛítasya pánthāṃ gaṇáṃ deváṇām ṛibhavaḥ suhastāḥ || 3 || kimmáyaḥ svic camasá eshá āsa yáṃ kávyena catúro vicakrá | áthā sunudhvaṃ sávanam mádāya pātá ṛibhavo mádhunaḥ somyásya || 4 || ṣácyākarta pitárā yúvānā ṣácyākarta camasáṃ devapánam | ṣácyā hárī dhánutarāv atashṭendraváhāv ṛibhavo vājaratnāḥ || 5 ||

35

O men of strength, not allowing themselves to decline, O expert in war-weapons, and persons of experience and wisdom, come to us, please stay not away. May these exhilarating gifts proceed first to the resplendent Lord and then to you, at this sacred ceremony. 1

May the munificence of the men of experience and wisdom come to us on this occasion; they have accepted our well-composed devotional prayers, and they have given to us by their dexterous and excellent work the concept of dividing the globe into four quadrants. (See hymn 33, verse 5). 2

You have outlined the details of dividing the globe into four quadrants and said, O friend, teach the same to others. O physically strong and spiritually elevated, deft-handed men of wisdom, may you accept the concept of four and act accordingly; and thereby attain the realm of immortal enlightened ones. 3

What sort of global ladle was that which by your art and wisdom, you have made four-fold? Now pour forth the elixir of knowledge for exhilaration and inspiration; and, O leaders of experience and wisdom, may this knowledge be for your relish and enjoyment. 4

By your marvellous thinking, you have made the old young; by your marvellous deeds, you have provided the ladle to enlightened ones for drinking. O jewels among men of physicial and spiritual strength: by your marvellous skill, may you fabricate fast moving transports and projects, and bring afflunce and fame. 5

॥६॥ यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय ।
ná tvád dhótā pū́rvo agne yájīyān ná kā́vyaiḥ paró asti svadhāvaḥ | viṣáṣ ca yásyā átithir bhávāsi sá yajñéna vanavad deva mártān || 5 ||

3

O adorable God, when your glory is revealed, you become venerable to all, and when enkindled, your glory shines like the Sun. In you, O source of strength, all the powers of Nature's forces are centred. You are like a bounteous king to men, who offer sincere devotion to you. 1

O self-sustained fire-divine, you bear mysterious name, you become upholder of law in relation to maidens. They anoint you, like a welcomed friend, with milk and butter, when you make husband and wife of one mind. 2

For your glory, the cloudbearing winds sweep the firmament. O Lord of cosmic vitality, your manifestation is charming and wonderful. Since the pervading lord has placed cosmic waters at the high place, you uphold the mysterious name. 3

O adorable Lord, Nature's forces are lovely. Through your glory and by their liberal gifts they gain immortality. Men desirous of long life, adore the fire-divine, the conveyor of offerings by homage and prayers. 4

There has been no granter of rewards, more venerable than you, O adorable God, nor shall there be one worthier of invocations through hymns of praises. The man, within whose house you live as guest, shall surely obtain prosperity and progeny through his noble deeds. 5

व॒यम॑ग्ने वनुयाम॒ त्वोता॑ वसू॒यवो॑ ह॒विषा॒ बुध्य॑मानाः ।
व॒यं स॑म॒र्ये वि॒दथे॒ष्वह्नां॑ व॒यं रा॒या स॑हसस्पुत्र॒ मर्ता॑न् ॥६॥

vayám agne vanuyāma tvótā vasūyávo havíshā búdhyamānāḥ | vayáṃ samaryé vidátheshv áhnāṃ vayáṃ rāyá sahasas putra mártān || 6 ||

॥१७॥ यो न॒ आगो॑ अ॒भ्येनो॒ भर॒त्यधी॒दघ॑म॒घशं॑से दधात ।
ज॒ही चि॑कित्वो अ॒भिश॑स्तिमे॒तामग्ने॒ यो नो॑ म॒र्चय॑ति द्व॒येन॑ ॥७॥
त्वाम॒स्या व्यु॑षि देव॒ पूर्वे॑ दू॒तं कृ॑ण्वा॒ना अ॑यजन्त ह॒व्यैः ।
सं॒स्थे यद॑ग्न॒ ईय॑से रयी॒णां दे॒वो मर्तै॒र्वसु॑भिरि॒ध्यमा॑नः ॥८॥
अव॑ स्पृधि पि॒तरं॒ योधि॑ वि॒द्वान्पु॒त्रो यस्ते॑ सहसः सून ऊ॒हे ।
क॒दा चि॑कित्वो अ॒भि च॑क्षसे॒ नोऽग्ने॑ क॒दाँ ऋ॑त॒चिद्या॑तयासे ॥९॥
भूरि॒ नाम॒ वन्द॑मानो दधाति पि॒ता व॑सो॒ यदि॒ तज्जो॒षया॑से ।
कु॒विद्दे॒वस्य॒ सह॑सा चका॒नः सु॒म्नम॒ग्निर्व॑नते वावृ॒धा॒नः ॥१०॥
त्वम॒ङ्ग ज॑रि॒तारं॑ यविष्ठ॒ विश्वा॒न्यग्ने॑ दुरि॒ताति॑ पर्षि ।
स्ते॒ना अ॑दृश्रन्रि॒पवो॒ जना॒सोऽज्ञा॑तकेता वृजि॒ना अ॑भूवन् ॥११॥

yó na ágo abhy éno bhárāty ádhíd aghám aghásaṅse dadhāta | jahí cikitvo abhíṣastim etám ágne yó no marcáyati dvayéna || 7 || tvám asyá vyúshi deva pū́rve dūtáṃ kriṇvāná ayajanta havyaíḥ | saṃsthé yád agna íyase rayīṇáṃ devó mártair vásubhir idhyámānaḥ || 8 || áva spridhi pitáraṃ yódhi vidván putró yás te sahasaḥ sūna ūhé | kadá cikitvo abhí cakshase nó 'gne kadáñ ritacíd yātayāse || 9 || bhū́ri náma vándamāno dadhāti pitá vaso yádi táj josháyāse | kuvíd devásya sáhasā cakānáḥ sumnám agnír vanate vāvridhānáḥ || 10 || tvám aṅgá jaritáraṃ yavishṭha víṣvāny agne duritáti parshi | stená adriṣran ripávo jánāsó 'jñātaketā vrijiná abhūvan || 11 ||

O adorable God, may we, the aspirants of wealth, aided by you, be safe under your protection ; may we acquire riches, through our devotion, be victorious in our struggles, and be successful in our worship every day; and may we, O source of strength, obtain prosperous sons and grandsons. 6

May adorable Lord inflict evil upon the evil-plotter, who commits sin or wickedness against us. May the sagacious Lord destroy the calumniator, who injures us with double-dealing. 7

At the dawn's flushing, O adorable Lord, people from the earliest times have been serving you with offerings, accepting you as the envoy of Nature's bounties. You, O bright shining fire-divine enkindled by the mortal devotees, please go to places of worship, the places where the wealth is stored. 8

May you carry him across the troubles, O Lord, the source of strength, who offers to you reverence, like a wise son to his father. O sagacious Lord, when will you look upon us ? When will you, O Lord, ordainer of eternal law, direct us to noble path ? 9

Glorifying you, he addresses you with many a name, when you, O Lord, the bestower of dwellings, as father are pleased to accept this. Verily the Lord, proud of His strength and splendour, bestows happiness upon His true devotee. 10

Most youthful adorable God, verily you bear your adorer safely beyond all his troubles. We now know our thieves and hostile people. We have, however, to guard against those who have gone underground. 11

इमे यामासस्त्वद्रिगभूवन्वसवे वा तदिदागो अवाचि ।
नाहायमग्निरभिशस्तये नो न रीषते वावृधानः परा दात् ॥१२॥

imé yā́māsas tvadríg abhūvan vásave vā tád íd ā́go avāci | nā́hāyám agnír abhíśastaye no ná ríshate vāvṛidhānáḥ párā dāt || 12 ||

(४) चतुर्थं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्यात्रेयो वसुश्रुत ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१८॥ त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे अध्वरेषु राजन् ।
त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानाम् ॥१॥
हव्यवाळग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे ।
सुगार्हपत्याः समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि ॥२॥
विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् ।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ॥३॥
जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य ।
जुषस्व नः समिधं जातवेद आ च देवान्हविरद्याय वक्षि ॥४॥

4.

Tvā́m agne vásupatiṃ vásūnām abhí prá mande adhvaréshu rājan | tváyā vā́jaṃ vājayánto jayemābhí shyāma pritsutī́r mártyānām || 1 || havyavā́ḷ agnír ajáraḥ pitā́ no vibhúr vibhā́vā sudṛíṣīko asmé | sugārhapatyā́ḥ sám ísho didīhy asmadryàk sám mimīhi ṣrávāṅsi || 2 || viṣā́ṃ kavíṃ viṣpátim mā́nushīṇāṃ ṣúcim pāvakáṃ ghṛitápṛishṭham agním ní hótāraṃ viṣvavídaṃ dadhidhve sá devéshu vanate vā́ryāṇi || 3 || jushásvāgna íḷayā sajóshā yátamāno raṣmíbhiḥ sū́ryasya | jushásva naḥ samídhaṃ jātaveda ā́ ca devā́n havirádyāya vakshi || 4 ||

These eulogies have been directed towards you, and we have also confessed our crimes, O Lord, the giver of dwellings. May the adorable Lord, well-pleased by our praises, never yield us to the maligner or the malevolent. 12

4

O adorable Lord, sovereign king of wealth and treasures, I glorify you whilst busy at the selfless noble deeds. May we obtain the strength we long for, through you ; and through you, may we overcome the fierce attacks of the forces of wicked persons. 1

The eternal adorable Lord, the bearer of oblations, is our protector. He is all-pervading, resplendent, and pleasing in appearance. May He supply us plenty of food, in return of our well-maintained household fire and measure out to us abundant food and fame. 2

O men enshrine the cosmic fire in your hearts, as Lord of the Society of human beings, the pure, the purifying, balmed with water or butter and invoker of divine powers. He bestows upon His learned worshippers the choicest gifts. 3

O cosmic fire, competing with solar rays may you relish our offerings, and in this let your effulgence also participate. May you enjoy, O universally present fire, this fuel of ours, and bring here other Nature's bounties also to have their share. 4

जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥५॥

júshṭo dámūnā átithir duroṇá imám no yajñám úpa yāhi vidvā́n | víṣvā agne abhiyújo vihátyā ṣatrūyatā́m ā́ bharā bhójanāni || 5 ||

॥१९॥ वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै ।
पिपर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान् ॥६॥
वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे ।
अस्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ॥७॥

vadhéna dásyum prá hí cātáyasva váyaḥ kriṇvānás tanvè svā́yai | píparshi yát sahasas putra devā́n só agne pāhi nritama vā́je asmā́n || 6 || vayáṃ te agna ukthaír vidhema vayáṃ havyaíḥ pāvaka bhadraṣoce | asmé rayíṃ viṣvávāraṃ sám invāsmé víṣvāni drávinạ̄ni dhehi || 7 ||

अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम् ।
वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि ॥८॥
विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितानि पर्षि ।
अग्ने अत्रिवन्नमसा गृणानो३ऽस्माकं बोध्यविता तनूनाम् ॥९॥

asmā́kam agne adhvaráṃ jushasva sáhasaḥ sūno trishadhastha havyám | vayáṃ devéshu sukrítaḥ syāma ṣármaṇā nas trivárūthena pāhi || 8 || víṣvāni no durgáhā jātavedaḥ síndhuṃ ná nāvā́ duritā́ti parshi | ágne atriván námasā grinānò 'smā́kam bodhy avitā́ tanū́nām || 9 ||

O adorable Lord, you are loving, generous and honoured as respectable guest in our homes. May you come to bless our fire-ritual. May you having scattered all our adversaries, bring to us the possessions of our foe-men. 5

O adorable Lord, may you demolish, with your weapon, the wicked, appropriating possessions for the benefit of such persons, as belong to you. O source of strength, chief of leaders, inasmuch as you satisfy Nature's bounties, so may you, protect us in our struggles. 6

O Lord of auspicious lustre, and purifier, we adore you, with our hymns and offerings. May you bestow upon us all desired riches ; bestow upon us all sorts of treasures. 7

O source of strength, dweller in three regions, accept our devotion and offerings. May we be regarded among learned as the doers of good. May you protect us with triply-guarding shelter. 8

May you bear us, O omniscient Lord, over all unsurmountable woes and evils, as on a boat across a river. O Lord, we, like any other person liberated glorify you with reverence. You very well known that you alone are the guardian of our person. 9

यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥१०॥
यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् ।
अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥११॥

yás tvā hridā́ kīríṇā mányamānó 'martyam mártyo jóhavīmi | jā́tavedo yáṣo asmā́su dhehi prajā́bhir agne amritatvám aṣyām || 10 || yá-smai tvám sukríte jātaveda u lokám agne krinávah syo-nám | aṣvínam sá putríṇam vīrávantam gómantam rayím naṣate svastí || 11 ||

(५) पञ्चमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्यात्रेयो वसुश्रुत ऋषिः । (१) प्रथमर्च इध्मः समिद्धो वाग्निः. (२) द्वितीयाया नराशंसः. (३) तृतीयाया इळः. (४) चतुर्थ्या बर्हिः. (५) पञ्चम्या देवीर्द्वारः. (६) षष्ठ्या उषासानक्ता. (७) सप्तम्या दैव्यौ होतारौ प्रचेतसौ. (८) अष्टम्यास्तिस्रो देव्यः सरस्वतीळाभारत्यः. (९) नवम्यास्त्वष्टा (१०) दशम्या वनस्पतिः (११) एकादश्याश्च स्वाहाकृतयो देवताः । गायत्री छन्दः ॥

२०॥ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे ॥१॥
नराशंसः सुषूदतीमं यज्ञमदाभ्यः । कविर्हि मधुहस्त्यः ॥२॥
ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् । सुखै रथेभिरूतये ॥३॥
ऊर्णम्रदा वि प्रथस्वाभ्यर्का अनूषत । भवा नः शुभ्र सातये ॥४॥
देवीर्द्वारो वि श्रयध्वं सुप्रायणा न ऊतये । प्रप्र यज्ञं पृणीतन ॥५॥

5.

Súsamiddhāya ṣocíshe ghritám tīvrám juhotana | agnáye jātávedase || 1 || nárāṣáñsah sushūdatīmám yajñám ádā-bhyah | kavír hí mádhuhastyah || 2 || īlitó agna á vahén-dram citrám ihá priyám | sukhaí ráthebhir ūtáye || 3 || ū́r-ṇamradā ví prathasvābhy àrkā́ anūshata | bhávā nah ṣu-bhra sātáye || 4 || dévīr dvāro ví ṣrayadhvam suprāyaṇā́ na ūtáye | prá-pra yajñám priṇītana || 5 ||

Though mortal, I earnestly invoke you, O immortal Lord, praising you with a devoted heart. O omniscient Lord, may you vouchsafe me, fame and repute, and may I obtain immortality through the continuance of my posterity. 10

O omniscient adorable God, upon whatsoever performer of noble acts, you cast a favourable regard, he enjoys welfare and wealth, and becomes the possessor of horses, brave sons, cows and cattle. 11

5

Offer hot and clarified butter to the well-kindled shining omnipresent fire-divine. 1

Ever-praised by men, the fire-divine inspires sacred acts, He is wise, uninjurable, and sweet-handed. 2

Adored, O fire-divine, bring hither the splendid and friendly sun, with his easy-going chariot for our protection. 3

May you spread your grassy seats soft as a sooly blanket, and sing holy hymns. May the splendrous Lord grant rewards to us. 4

O divine doors, be easy of access for our protection ; may our sacred worship be a success. 5

॥२१॥ सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा । दोषामुषासमीमहे ॥६॥
वातस्य पत्मन्नीळिता दैव्या होतारा मनुषः । इमं नो यज्ञमा गतम् ॥७॥
इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदन्त्वस्रिधः ॥८॥
शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना । यज्ञेयज्ञे न उदव ॥९॥
यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय ॥१०॥
स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः । स्वाहा देवेभ्यो हविः ॥११॥

suprátīke vayovṛ́dhā yahvī́ ṛtásya mātárā | doshā́m ushā́sam īmahe || 6 || vā́tasya pátmann īḷitā́ daívyā hótārā mánushaḥ | imám no yajñám ā́ gatam || 7 || íḷā sárasvatī — || 8 || ṣivás tvashṭar ihā́ gahi vibhúḥ pósha utá tmánā | yajñé-yajñe na úd ava || 9 || yátra véttha vanaspate devā́nāṃ gúhyā nā́māni | tátra havyā́ni gāmaya || 10 || svā́hāgnáye várunāya svā́héndrāya marúdbhyaḥ | svā́hā devébhyo havíḥ || 11 ||

(६) षष्ठ सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्यात्रेयो वसुश्रुत ऋषिः । अग्निर्देवता । पङ्क्तिश्छन्दः ॥

॥२२॥ अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥१॥

6.

Agním tám manye yó vásur ástaṃ yáṃ yánti dhenávaḥ | ástam árvanta āṣávó 'staṃ nítyāso vājína íshaṃ stotṛ́bhya ā́ bhara || 1 ||

We supplicate the evening and dawn who are lovely, givers of longevity, mighty and the abiders of eternal laws. 6

Glorified may you, O divine invokers of Nature's bounties come with the speed of wind to bless the sacred worship of this man, the institutor. 7

May the divine spirit of wisdom, speech and prosperity, the benevolent sources of happiness, perpetually have the proper seat within our hearts. 8

O benevolent and plentiful architect of universe, being propitious, come of your own accord, and help us in our every sacred act. 9

Wherever you know, O Lord of vegetation, the secret forms of Nature's bounties to be, thither may you send our offerings. 10

Hail to the adorable, hail to the venerable, and hail to the resplendent Lord ; hail to the vital principles and hail with oblations to other Nature's bounties. 11

6

I glorify that adorable Lord, who provides habitation ; gives shelter to the milch-kine, and to the fleet-foot coursers. The constant offerers of homage also seek him. May you, O Lord, grant nourishment to those, who adore you. 1

सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥२॥
अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर ॥३॥
आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥४॥
आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥५॥

só agnír yó vásur griṇé sáṃ yám āyánti dhenávaḥ | sám árvanto raghudrúvaḥ sáṃ sujātā́saḥ sūráya ísham — || 2 || agnír hí vājínam viṣé dádāti viṣvácarshaṇiḥ | agní rāyé svābhúvaṃ sá prītó yāti vā́ryam ísham — || 3 || ā́ te agna idhīmahi dyumántaṃ devājáram | yád dha syā́ te pánīyasī samíd dīdáyati dyávísham — || 4 || ā́ te agna ricā́ havíḥ ṣúkrasya ṣocishas pate | súṣcandra dásma víṣpate hávyavāṭ túbhyaṃ hūyata ísham — || 5 ||

॥२३॥ प्रो त्ये अग्नयोऽग्निषु विश्वं पुष्यन्ति वार्यम् ।
ते हिन्विरे त इन्विरे त इषण्यन्त्यानुषगिषं स्तोतृभ्य आ भर ॥६॥
तव त्ये अग्ने अर्चयो महि व्राधन्त वाजिनः ।
ये पत्वभिः शफानां व्रजा भुरन्त गोनामिषं स्तोतृभ्य आ भर ॥७॥

pró tyé agnáyo 'gníshu víṣvam pushyanti vā́ryam | té hinvire tá invire tá ishaṇyanty ānushág ísham — || 6 || táva tyé agne arcáyo máhi vrādhanta vājínaḥ | yé pátvabhiḥ ṣaphā́nāṃ vrajā́ bhuránta gónām ísham — || 7 ||

He is the adorable Lord praised as the giver of dwellings to whom the milch-kine, the short-paced horse and devout worshippers of high descent come. May you, O Lord, grant nourishment to those, who adore you. 2

Adorable God, the observer of all mankind, gives energised food to the man who worships Him. When pleased, He bestows to the aspirants that wealth, which is precious on its own. May you, O Lord, grant nourishment to those, who adore you. 3

O adorable Lord, we kindle your light, bright and undiminishing, so that its blazes keep shining deep in our hearts. May you, O Lord, grant nourishment to those, who adore you. 4

O adorable God, Lord of bright light, bestower of bliss, splendrous, protector of men, the accepter of devotions, to you the worship is offered with the sacred hymns. May you, O Lord, grant nourishment to those, who adore you. 5

These divine flames, enshrined in the worshipful hearts, cherish everything that is precious. They give delight, spread wide within, and perpetually crave for fresh feed. May you, O Lord, grant nourishment to those, who adore you. 6

O adorable Lord, when nourished, these flames of devotion, spread out with the swift speed of horses, and reach the centre, the seat of wisdom and knowledge. May you grant, O Lord, nourishment to those, who adore you. 7

नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः ।
ते स्याम य आनृचुस्त्वादूतासो दमेदम इषं स्तोतृभ्य आ भर ॥८॥
उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ॥९॥
एवाँ अग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक् ।
दधदस्मे सुवीर्यमुत त्यदाश्वश्व्यमिषं स्तोतृभ्य आ भर ॥१०॥

návā no agna á bhara stotṛíbhyaḥ sukshitír íshaḥ | té syáma yá ānṛicús tvā́dūtāso dáme-dama ísham — || 8 || ubhé suṣcandra sarpísho dárvī ṣrīṇīsha āsáni | utó na út pupūryā ukthéshu ṣavasas pata ísham — || 9 || evā́ṅ agním ajuryamur gīrbhír yajñébhir ānushák | dádhad asmé suvíryam utá tyád āṣváṣvyam ísham — || 10 ||

(७) सप्तम सूक्तम

(१–१०) दशर्चस्यास्य सूक्तस्यात्रेय इष ऋषि । अग्निर्देवता । (१–९) प्रथमादिनवर्चामनुष्टुप्, (१०) दशम्याश्च पङ्क्तिश्छन्दसी ॥

॥२४॥ सखायः सं वः सम्यञ्चमिषं स्तोमं चाग्नये ।
वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥१॥
कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने ।
अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः ॥२॥

7.

Sákhāyaḥ sáṃ vaḥ samyáñcam ísham stómaṃ cāgnáye | várshishṭhāya kshitīnā́m ūrjó náptre sáhasvate || 1 || kútrā cid yásya sámṛitau raṇvā́ náro nṛishádane | árhantaṣ cid yám indhaté saṃjanáyanti jantávaḥ || 2 ||

O adorable Lord, grant fresh food, and happy homes to those who praise you. For us who worship you, you are envoy in every house. May you grant, O Lord, nourishment to those, who adore you. 8

O adorable, the Lord of strength, and bestower of bliss, in order that you fulfil our aspirations, may you accept our devotion as the fire receiving in its mouth the oblations of butter, two ladles full at our solemn rites. May you, O Lord, grant nourishment to those, who adore you. 9

Thus, O adorable Lord, we duly serve you with praises and with offerings successively. So, may you give us what we crave,—lot of brave sons, and wealth of fleet steeds. May you, O Lord, grant nourishment to those, who adore you. 10

7

Friends, offer best homage and praise to the fire-divine, the most liberal benefactor of men, and the powerful son of strength. 1

Where is that cosmic fire in whose presence men rejoice, while offering homage in congregational halls, whom worthy devotees enkindle, and all living beings generate. 2

सं यदिषो वनामहे सं हव्या मानुषाणाम् ।
उत द्युम्नस्य शवस ऋतस्य रश्मिमा ददे ॥३॥
स स्मा कृणोति केतुमा नक्तं चिद्दूर आ सते ।
पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः ॥४॥
अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति ।
अभीमह स्वजेन्यं भूमा पृष्ठेव रुरुहुः ॥५॥

sáṃ yád ishó vánāmahe sáṃ havyá mánushāṇām | utá dyumnásya ṣávasa ṛitásya raṣmím á dade || 3 || sá smā kṛiṇoti ketúm á náktaṃ cid dūrá á saté | pāvakó yád vánaspátīn prá smā mináty ajáraḥ || 4 || áva sma yásya véshaṇe svédam pathíshu júhvati | abhīm áha svájenyam bhū́mā pṛishṭhéva ruruhuḥ || 5 ||

॥२५॥

यं मर्त्यः पुरुस्पृहं विदद्विश्वस्य धायसे ।
प्र स्वादनं पितूनामस्ततातिं चिदायवे ॥६॥
स हि ष्मा धन्वाक्षितं दाता न दात्या पशुः ।
हिरिश्मश्रुः शुचिदन्नृभुरनिभृष्टतविषिः ॥७॥
शुचिः ष्म यस्मा अत्रिवत्प्र स्वधितीव रीयते ।
सुषूरसूत माता क्राणा यदानशे भगम् ॥८॥
आ यस्ते सर्पिरासुतेऽग्ने शमस्ति धायसे ।
ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः ॥९॥

yám mártyaḥ puruspṛíhaṃ vidád víṣvasya dháyase | prá svádanam pitūnám ástatātiṃ cid āyáve || 6 || sá hí shmā dhánvákshitaṃ dátā ná dáty á paṣúḥ | híriṣmaṣruḥ ṣúcidann ṛibhúr ánibhṛishṭatavishiḥ || 7 || ṣúciḥ shma yásmā atrivát prá svádhitīva ríyate | sushū́r asūta mātá krāṇá yád ānaṣé bhágam || 8 || á yás te sarpirāsuté 'gne ṣám ásti dháyase | aíshu dyumnám utá ṣráva á cittám mártyeshu dhāḥ || 9 ||

When we present to him devotional homage, and when he accepts the offerings of men, then by the strength of his divine splendour, he assumes the radiance of eternal truth. 3

Verily he gives a signal during the darkness of night to one, who is far off, when he, the purifier, the undecaying, consumes the forest tree. 4

At whose worship the devotees pour the dripping butter upon the ritual fire, and streams mount along the flames, as if ones own son riding upon the back of his father. 5

Him whom, the desired of many, the devout man recognizes as the sustainer of all, the giver of flavour to food and the provider of home to every living man. 6

He, who is vast and possessor of irresistible strength, crops the dry ground strewn with grass and wood, like a herd, while grazing ; he, as if, with a golden beard, and shining teeth. 7

Bright as an axe is he, to whom the mortal sage, exempt from the three types of pains, offers worship ; he, whom his prolific mother, the fire-stick, has given birth to. The benefactor fire then receives the offerings. 8

O adorable Lord, the accepter of homage, like the fire accepting butter, the upholder of all, be delighted by our praise. May you bestow upon the worshippers fame, food and intelligence. 9

इति चिन्मन्युमध्रिजस्त्वादातमा पशुं ददे ।
आदग्ने अपृणतोऽत्रिः सासह्याद्दस्यूनिषः सासह्यान्नॄन् ॥१०॥

íti cin manyúm adhríjas tvádātam á́ paṣúṃ dade | ád agne ápriṇató 'triḥ sāsahyād dásyūn isháḥ sāsahyān nṛ́n || 10 ||

(८) अष्टमं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्यात्रेय इष ऋषिः । अग्निर्देवता । जगती छन्दः ॥

॥२६॥ त्वामग्न ऋतायवः समीधिरे प्रत्नं प्रत्नास ऊतये सहस्कृत ।
पुरुश्चन्द्रं यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यम् ॥१॥
त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे ।
बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषम् ॥२॥
त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमम् ।
गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियम् ॥३॥

8.

Tvám agna ṛitāyávaḥ sám īdhire pratnám pratnása ūtáye sahaskṛita | puruṣcandráṃ yajatáṃ viṣvádhāyasaṃ dámūnasaṃ gṛihápatiṃ várenyam || 1 || tvám agne átithim pūrvyáṃ víṣaḥ ṣocíshkeṣaṃ gṛihápatiṃ ní shedire | bṛihát-ketum pururūpaṃ dhanaspṛítaṃ suṣármāṇaṃ svávasaṃ ja-radvísham || 2 || tvám agne mánushīr īḷate víṣo hotrāvídaṃ vívicim ratnadhátamam | gúhā sántaṃ subhaga viṣvádarṣa-taṃ tuvishvaṇásaṃ suyájaṃ ghṛitaṣríyam || 3 ||

O adorable Lord, may he, the triply liberated sage, take all the gifts of cattle and wealth, offered to you, and with that aid subdue the hostile men. 10

8

O adorable Lord, you are inspirer of strength. From the earliest times, ancient devotees, the lovers of truth, have been enkindling your love in their hearts for their preservation. You are eternal, bliss-bestower, adorable, nourisher of universe, liberal giver, lord of the home holder, and venerable. 1

O adorable Lord, men enshrine you in their hearts, as their dear ancient guest, and master of their homes. You are brilliant like the blazing flame of fire, highly enlightened, and multiform. You are dispenser of wealth, bestower of happiness, kind protector and destroyer of decay and rot. 2

Human beings glorify you, O gracious adorable Lord, the appreciator of offerings, the discriminator between virtue and vice and the most liberal giver of precious things. You the auspicious, stay concealed in the innermost cavity and yet at times visible to all, and your loud voice is heard by them. You just as fire with butter, are honoured by holy hymns and glorified by loving devotion. 3

त्वामग्ने धर्णसिं विश्वधा वयं गीर्भिर्गृणन्तो नमसोप सेदिम ।
स नो जुषस्व समिधानो अङ्गिरो देवो मर्तस्य यशसा सुदीतिभिः ॥४॥
त्वमग्ने पुरुरूपो विशेविशे वयो दधासि प्रत्नथा पुरुष्टुत ।
पुरूण्यन्ना सहसा वि राजसि त्विषिः सा ते तित्विषाणस्य नाधृषे ॥५॥
त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनम् ।
उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ॥६॥
त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे ।
स वावृधान ओषधीभिरुक्षितोऽभि ज्रयांसि पार्थिवा वि तिष्ठसे ॥७॥

tvā́m agne dharṇasíṃ viśvádhā vayáṃ gīrbhír gṛiṇánto námasópa sedima | sá no jushasva samidhānó aṅgiro devó mártasya yaśása sudītíbhiḥ || 4 || tvám agne pururū́po viśé-viśe váyo dadhāsi pratnáthā purushṭuta | purū́ṇy ánnā sáhasā ví rājasi tvíshiḥ sā́ te titvishāṇásya nádhṛíshe || 5 || tvā́m agne samidhānáṃ yavishṭhya devā́ dūtáṃ cakrire havyavā́hanam | urujráyasaṃ ghṛitáyonim ā́hutaṃ tveshā́ṃ cákshur dadhire codayánmati || 6 || tvā́m agne pradíva ā́hutaṃ ghṛitaíḥ sumnāyávaḥ sushamídhā sám idhire | sá vāvṛidhāná óshadhībhir ukshitò 'bhí jráyāṅsi pā́rthivā ví tishṭhase || 7 ||

(९) नवमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्यात्रेयो गय ऋषिः । अग्निर्देवता । (१-४, ६) प्रथमादिचतुर्ऋचां षष्ठ्याश्चानुष्टुप्
(५, ७) पञ्चमीसप्तम्योश्च पङ्क्तिश्छन्दसी ॥

॥१॥ त्वामग्ने हविष्मन्तो देवं मर्तास ईळते ।
मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥१॥

9.

Tvám agne havíshmanto devám mártāsa īḷate | mánye tva jātávedasaṃ sá havyá vakshy ānushák || 1 ||

We are drawn near you, O all-sustaining adorable God, adoring you in many ways, singing songs and with reverence. May you, O self-illumined Lord, when enkindled like fire, be propitious to us and with your radiance make us glorious. 4

O adorable Lord, multiform, you grant nourishment to each and every mortal. You by your might, are sovereign over all sorts of nourishing food. Your splendour, when blazing brightly, is unrivalled. 5

O adorable God, ever young, when you are pleased, Nature's bounties are inspired by you and take you as the bearer of homage. Your glory is wide-reaching. Your love to the devotee when invoked, is enkindled as fire with butter. The men inspired by their understanding accept you as the brilliant eye of the universe. 6

From the earliest times, men seeking joy have been kindling you with earnest invocations and devotion, just as fire with fuel and butter. Again, just as sprinkled with butter and fed with plants, the fire spreads all over the layers of land, similarly, you, by the devotion, enlighten the entire life of the worshipper. 7

9

Mortal men with reverential homage, glorify you, O fire-divine. I adore you, O Lord, cognizant of all that is born, so that you may please convey my offerings to Nature's forces. 1

अग्निर्होता दास्वतः क्षयस्य वृक्तबर्हिषः ।
सं यज्ञासश्चरन्ति यं सं वाजासः श्रवस्यवः ॥२॥
उत स्म यं शिशुं यथा नवं जनिष्टारणी ।
धर्तारं मानुषीणां विशामग्निं स्वध्वरम् ॥३॥
उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम् ।
पुरू यो दग्धासि वनाग्ने पशुर्न यवसे ॥४॥
अध स्म यस्यार्चयः सम्यक्संयन्ति धूमिनः ।
यदीमह त्रितो दिव्युप ध्मातेव धमति शिशीते ध्मातरी यथा ॥५॥

agnír hótā dāsvataḥ ksháyasya vriktábarhishaḥ | sáṃ yajñāsaṣ cáranti yáṃ sáṃ vā́jāsaḥ ṣravasyávaḥ || 2 || utá sma yáṃ ṣíṣuṃ yathā návaṃ jánishṭāráṇī | dhartā́ram mā́nushīṇāṃ viṣā́m agníṃ svadhvarám || 3 || utá sma durgṛibhīyase putró ná hvāryā́ṇām | purū́ yó dágdhási vánā́gne paṣúr ná yávase || 4 || ádha sma yásyārcáyaḥ samyák saṃyánti dhūmínaḥ | yád īm áha tritó divy úpa dhmā́teva dhámati ṣíṣīte dhmātárī yathā || 5 ||

तवाहमग्न ऊतिभिर्मित्रस्य च प्रशस्तिभिः ।
द्वेषोयुतो न दुरिता तुर्याम मर्त्यानाम् ॥६॥
तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।
स क्षेपयत्स पोषयद्भुवद्वाजस्य सातय उतैधि पृत्सु नो वृधे ॥७॥

távāhám agna ūtíbhir mitrásya ca práṣastibhiḥ | dveshoyúto ná duritā́ turyā́ma mártyānām || 6 || táṃ no agne abhí náro rayíṃ sahasva ā́ bhara | sá kshepayat sá poshayad bhúvad vā́jasya sātáya utaídhi pṛitsú no vṛidhé || 7 ||

Adorable Lord evokes Nature's bounties to proceed to the home of that person who liberally gives and whose heart is free of impurities ; and further, in whom congregate all sacrifices, securing food and fame. 2

It (the attrition fire) is the one which the two wooden sticks have engendered, like a new-born infant. This has become the supportor of men, and therefore, it fully deserves our adoration for peaceful purposes. 3

It is very hard to harness this fire, like the taming of the offsprings of wriggling snakes. O terrestrial fire, you have the capacity of burning forests as an animal consuming fodder. 4

The fire emits forth the smoke and the flames intensely collect and then diffuse to the three regions. The fire inflates in the firmament like the blower of a bellows and then sharpens its flames as the fire blazing from the blast of the blower. 5

O fire may we through your friendly and protective aids, and by our praises of you, subdue the wickedness of mortal men, and destroy the malignant. 6

O powerful fire, upon us, the institutors of holy acts, please bestow affluence. May this fire lay off our foes, and protect and nourish us and help in procuring energised food. May it be with us in our struggles for success. 7

(१०) दशमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्यात्रेयो गय ऋषिः । अग्निर्देवता । (१-३, ५-६) प्रथमादितृचस्य पञ्चमी षष्ठ्योर्ऋचोश्चानुष्टुप् (४, ७) चतुर्थीसप्तम्योश्च पङ्क्तिश्छन्दसी ॥

॥२१॥ अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।
प्र नो राया परीणसा रत्सि वाजाय पन्थाम् ॥१॥
त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना ।
त्वे असुर्यमारुहत्क्राणा मित्रो न यज्ञियः ॥२॥
त्वं नो अग्न एषां गयं पुष्टिं च वर्धय ।
ये स्तोमेभिः प्र सूरयो नरो मघान्यानशुः ॥३॥
ये अग्ने चन्द्र ते गिरः शुम्भन्त्यश्वराधसः ।
शुष्मेभिः शुष्मिणो नरो दिवश्चिद्येषां बृहत्सुकीर्तिर्बोधति त्मना ॥४॥
तव त्ये अग्ने अर्चयो भ्राजन्तो यन्ति धृष्णुया ।
परिज्मानो न विद्युतः स्वानो रथो न वाजयुः ॥५॥
नू नो अग्न ऊतये सबाधसश्च रातये ।
अस्माकासश्च सूरयो विश्वा आशास्तरीषणि ॥६॥
त्वं नो अग्ने अङ्गिरः स्तुतः स्तवान आ भर ।
होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे ॥७॥

10.

Agna ójishṭham ā́ bhara dyumnám asmábhyam adhrigo | prá no rāyā́ párīṇasā rátsi vā́jāya pánthām || 1 || tvám̐ no agne adbhuta krátvā dákshasya maṅhánā | tvé asuryàm ā́ruhat krāṇā́ mitró ná yajñíyaḥ || 2 || tvám̐ no agna eshām̐ gáyam pushṭím̐ ca vardhaya | yé stómebhiḥ prá sūráyo náro maghány ānaśúḥ || 3 || yé agne candra te gíraḥ śumbhánty áśvarādhasaḥ | śúshmebhiḥ śushmíṇo náro diváś cid yéshām bṛihát sukīrtír bódhati tmánā || 4 || táva tyé agne arcáyo bhrā́janto yanti dhṛishṇuyā́ | párijmāno ná vidyútaḥ svānó rátho ná vājayúḥ || 5 || nū́ no agna ūtáye sabā́dhasaś ca rātáye | asmā́kāsaś ca sūráyo víśvā ā́śās tarīsháṇi || 6 || tvám̐ no agne aṅgira stutá stávāna ā́ bhara | hótar vibhvāsáham̐ rayím̐ stotṛíbhya stávase ca na utaídhi pṛitsú no vṛidhé || 7 ||

10

O adorable Lord of irresistible powers, bring to us most powerful and resistless splendour, may you invest us with over-flowing store of wealth, and mark out for us the paths to spiritual enlightenment. 1

O marvellous adorable Lord, gratified by our noble acts, invest in us greatness of vigour. In you abides the strength, necessary to destroy wickedness and evils. You, the O embodiment of holiness, are actively engaged like the radiant sun. 2

O adorable Lord, increase means of sustenance and house and home of ours who are wise and have acquired prosperity through the chanting of vedic hymns. 3

O blissful supreme Lord, those who glorify you with hymns, obtain richness of vitality and are invigorated with the foe-destroying energies. Their fame reaches the height of firmament. This they gain by your own accord (i.e. by your favour). 4

O adorable Lord, these your bright and fierce flames of glory spread all over like the lightnings flashing around and are like a rattling car forcibly procuring foodgrains. 5

Now O adorable Lord, come swiftly for our protection, and for bestowing riches to the needy and oppressed. And may all the aspirations of our enlightened ones be fulfilled. 6

O adorable Lord, dear as our life, glorified in the past, glorified at present, invoker of Nature's forces, bring unto us riches enabling us to overcome the mighty. May you give to your praisers ability to extol you, and be near us for success in struggles. 7

(११) एकादशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्यात्रेयः सुतम्भर ऋषिः । अग्निर्देवता । जगती छन्दः ॥

॥३॥ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥१॥
यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समीधिरे ।
इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥२॥
असंमृष्टो जायसे मात्रोः शुचिर्मन्द्रः कविरुदतिष्ठो विवस्वतः ।
घृतेन त्वावर्धयन्नग्न आहुत धूमस्ते केतुरभवद्दिवि श्रितः ॥३॥

11.

Jánasya gopá ajanishṭa jágrivir agníḥ sudákshaḥ suvitáya návyase | ghritápratīko brihatá divisprísā dyumád ví bhāti bharatébhyaḥ súciḥ || 1 || yajñásya ketúm prathamám puróhitam agním náras trishadhasthé sám īdhire | índreṇa devaíḥ saráthaṃ sá barhíshi sídan ní hótā yajáthāya sukrátuḥ || 2 || ásammrishṭo jāyase mātróḥ súcir mandráḥ kavír úd atishṭho vivásvataḥ | ghriténa tvāvardhayann agna āhuta dhūmás te ketúr abhavad diví sritáḥ || 3 ||

अग्निर्नो यज्ञमुप वेतु साधुयाग्निं नरो वि भरन्ते गृहेगृहे ।
अग्निर्दूतो अभवद्धव्यवाहनोऽग्निं वृणाना वृणते कविक्रतुम् ॥४॥
तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे ।
त्वां गिरः सिन्धुमिवावनीर्महीरा पृणन्ति शवसा वर्धयन्ति च ॥५॥

agnír no yajñám úpa vetu sādhuyágníṃ náro ví bharante grihé-grihe | agnír dūtó abhavad dhavyavāhano 'gníṃ vriṇāná vriṇate kavíkratum || 4 || túbhyedám agne mádhumattamaṃ vácas túbhyam manīshá iyám astu sáṃ hridé | tváṃ gíraḥ síndhum ivāvánīr mahír á priṇanti sávasā vardháyanti ca || 5 ||

11

The glory of the powerful adorable Lord, the protector of man, ever vigilant, is revealed again and again for the fresh prosperity of the world. Whilst pleased with devotion, his intense radiance appears to the devotee as if touching lofty heavens and His glory shines brilliantly for the liberal benefactors. 1

Men, engaged in meditation first kindle the glory of adorable Lord in all the three realms ; physical, vital and mental. The meditating mind, the divine light, the self and the inner organs of cognition, all the four are channelized into one direction, as if riding in one and the same car. He, the one engaged in meditation, sets in the comfortable posture for the transcendental concentration. 2

O adorable Lord, may your glory be manifested in our innermost consciousness, just as the fire (of attrition) is generated unobstructed of the two mothers, and when fed with butter and offerings, it gives out smoke, spreading abroad in the sky, like the banner of your glory. 3

May fire divine, the fulfiller of our aspirations, come to the holy place our work and worship. Devotees cherish the fire-divine in every dwelling which is the bearer of oblations, and becomes an envoy, the bearer of our gifts. Wise men adore the fire-divine as the accomplisher of benevolent works. 4

O adorable Lord, to you, this sweetest prayer is addressed. May this praise, product of my thought, be dear to your heart. May my pious hymns fill you, and make you, for us, yet more mighty in strength, as large rivers replenish the sea. 5

त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥६॥

tvām agne áṅgiraso gúhā hitám ánv avindañ chiśriyāṇáṃ váne -vane | sá jāyase mathyámānaḥ sáho mahát tvām ahuḥ sáhasas putrám aṅgiraḥ || 6 ||

(१२) द्वादशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्यात्रेयः सुतम्भर ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥४॥
प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म ।
घृतं न यज्ञ आस्ये३ सुपूतं गिरं भरे वृषभाय प्रतीचीम् ॥१॥
ऋतं चिकित्व ऋतमिच्चिकिद्ध्यृतस्य धारा अनु तृन्धि पूर्वीः ।
नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः ॥२॥
कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः ।
वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः ॥३॥
के ते अग्ने रिपवे बन्धनासः के पायवः सनिषन्त द्युमन्तः ।
के धासिमग्ने अनृतस्य पान्ति क आसतो वचसः सन्ति गोपाः ॥४॥

12.

Prágnáye brihaté yajñíyāya ṛitásya vríshṇe ásurāya mánma | ghṛitáṃ ná yajñá āsyè súpūtaṃ gíram bhare vṛishabhā́ya pratīcím || 1 || ṛitáṃ cikitva ṛitám íc cikiddhy ṛitásya dhā́rā ánu tṛindhi pūrvī́ḥ | nāhám yātúm sáhasā ná dvayéna ṛitáṃ sapāmy arushásya vríshṇaḥ || 2 || káyā no agna ṛitáyann ṛiténa bhúvo návedā ucáthasya návyaḥ | védā me devá ṛitupā́ ṛitūnā́ṃ nāhám pátiṃ sanitúr asyá rāyáḥ || 3 || ké te agne ripáve bándhanāsaḥ ké pāyávaḥ sanishanta dyumántaḥ | ké dhāsím agne ánṛitasya pānti ká ásato vácasaḥ santi gopā́ḥ || 4 ||

O adorable Lord, earnest seekers discover your knowledge, which remains hidden in mystery, like flames taking refuge from wood to wood. Similar to fire by attrition, your glory is manifested by hard toil and great endurance. Therefore devotees call you, O dearest Lord, the source of strength. 6

12

Like well-purified butter poured into the mouth of ritual fire, I offer the usual sincere and thoughtful praise to the adorable Lord, the supreme, the venerable, the guide of eternal truth, the vigorous, the showerer of benefits. 1

O adorable Lord, best knowing the purpose of our truthful prayers, may you listen to our words and thereon send forth full streams of eternal order. I do not use my might for the purposes of violence, and for duplicity in matters of truth and untruth. I faithfully follow the Lord of the eternal law. 2

O adorable Lord, bestower of blessings, by what eternal law will you be giving recognition to our adoration ? May you, O guardian of the laws be pleased to know my purpose. I know not the Lord, who has been distributing riches among us. 3

O adorable Lord, who among us are the subduers of adversaries ? Who among us are the protectors, and distributors of splendid wealth ? Who among us, are the defenders of falsehood and who are the encouragers of evil deeds ? 4

सखायस्ते विषुणा अग्न एते शिवासः सन्तो अशिवा अभूवन् ।
अधूर्षत स्वयमेते वचोभिर्ऋजूयते वृजिनानि ब्रुवन्तः ॥५॥
यस्ते अग्ने नमसा यज्ञमीट्ट ऋतं स पात्यरुषस्य वृष्णः ।
तस्य क्षयः पृथुरा साधुरेतु प्रसर्स्राणस्य नहुषस्य शेषः ॥६॥

sákhāyas te víshuṇā agna eté ṣivā́saḥ sánto áṣivā abhūvan | ádhūrshata svayám eté vácobhir ṛijūyaté vṛijināni bruvántaḥ || 5 || yás te agne námasā yajñám íṭṭa ṛitáṃ sá pāty arushásya vṛíshṇaḥ | tásya ksháyaḥ pṛithúr ā́ sādhúr etu prasársrāṇasya náhushasya ṣéshaḥ || 6 ||

(१३) त्रयोदश सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्यात्रेय सुतम्भर ऋषि । अग्निर्देवता । गायत्री छन्द ॥

अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि । अग्ने अर्चन्त ऊतये ॥१॥
अग्नेः स्तोम मनामहे सिध्रमद्य दिविस्पृशः । देवस्य द्रविणस्यवः ॥२॥
अग्निर्जुषत नो गिरो होता यो मानुषेष्वा । स यक्षद्दैव्यं जनम् ॥३॥
त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वि तन्वते ॥४॥

13.

Árcantas tvā havāmahé 'rcantaḥ sám idhīmahi | ágne árcanta ūtáye || 1 || agné stómam manāmahe sidhrám adyá divispṛíṣaḥ | devásya draviṇasyávaḥ || 2 || agnír jushata no gíro hótā yó mánusheshv ā́ | sá yakshad daívyaṃ jánam || 3 || tvám agne saprátha asi júshṭo hótā váreṇyaḥ | tváyā yajñáṃ ví tanvate || 4 ||

These widely-dispersed friends of yours, O adorable Lord have been unhappy (whilst abandoning your worship) but are now again enjoying (on renewal of their devotion). May they who utter wicked words against the righteous, suffer by their own words and perish. 5

O resplendent, adorable Lord, the showerer of blessings, may his home be wide and prosperous, who performs your worship with reverence, and lives true to the law eternal. And may the noble aspirations of men, who diligently worship you be fulfilled. 6

13

O adorable Lord, with songs of praise we invoke you ; with invocations we enkindle your glory ; we invoke you for help. 1

Aspiring to be rich, we recite today the effectual praise of adorable Lord, whose radiance touches the luminous heaven. 2

May the adorable Lord, inspirer of Nature's bounties seated in the innerconscience of men, take delight in our praises and honour the wishes of enlightened persons. 3

O adorable Lord, you are the supreme reliance, most venerable, bounteous, and most gracious. Verily it is through you that the sacred works flourish to glory. 4

त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम । स नो रास्व सुवीर्यम ॥५॥
अग्ने नेमिरराँ इव देवाँस्त्वं परिभूरसि । आ राधश्चित्रमृञ्जसे ॥६॥

tvā́m agne vājasā́tamaṃ víprā vardhanti súshṭutam | sá no rāsva suvī́ryam || 5 || ágne nemír arā́ṅ iva devā́ṅs tvám paribhū́r asi | ā́ rádhas citrám ṛiñjase || 6 ||

(१४) चतुर्दशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्यात्रेय सुतम्भर ऋषि । अग्निर्देवता । गायत्री छन्दः ॥

॥६॥ अग्निं स्तोमेन बोधय समिधानो अमर्त्यम । हव्या देवेषु नो दधत ॥१॥
तमध्वरेष्वीळते देवं मर्ता अमर्त्यम । यजिष्ठं मानुषे जने ॥२॥
तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुता । अग्निं हव्याय वोळ्हवे ॥३॥
अग्निर्जातो अरोचत घ्नन्दस्यूञ्ज्योतिषा तमः । अविन्दद्गा अपः स्वः ॥४॥
अग्निमीळेन्यं कविं घृतपृष्ठं सपर्यत । वेतु मे शृणवद्धवम् ॥५॥
अग्निं घृतेन वावृधुः स्तोमेभिर्विश्वचर्षणिम । स्वाधीभिर्वचस्युभिः ॥६॥

14.

Agníṃ stómena bodhaya samidhānó ámartyam | havyā́ devéshu no dadhat || 1 || tám adhvaréshv īḷate devám mártā ámartyam | yájishṭham mánushe jáne || 2 || tám hí ṣáṣvanta īḷate srucā́ devám ghṛitaṣcútā | agníṃ havyā́ya vóḷhave || 3 || agnír jātó arocata ghnán dásyūñ jyótishā támaḥ | ávindad gā́ apáḥ sváḥ || 4 || agním īḷényaṃ kavíṃ ghṛitá-prishṭhaṃ saparyata | vétu me ṣriṇávad dhávam || 5 || agníṃ ghṛiténa vāvṛidhu stómebhir viṣvácarshaṇim | svādhī́bhir vacasyúbhiḥ || 6 ||

Wise worshippers exalt you with praises, O adorable Lord, you are bountiful giver of strength. May you bestow upon us excellent vitality and virility. 5

O adorable Lord, you encompass Nature's forces, as the felly rings the spokes, may you bestow manifold wealth upon us. 6

14

May you arouse the grace of immortal Lord with your prayers ; so that, when pleased, may He, like the flame of fire, bear our homage to Nature's bounties. 1

Mortals extol this immortal, divine supreme, at high solemnities, most adorable among mankind. 2

All glorify the spiritual fire pouring out love from their heart as if butter to fire with sacrificial ladle. They glorify the spiritual fire, so that it conveys their homage to Nature's forces. 3

The spiritual fire as soon as manifested, blazes brightly, destroying the wicked and dispersing the darkness by its lustre. It restores wisdom, action and happiness. 4

May you honour the spiritual fire, the source of wisdom, whose summit blazes with love. May it respond to my invocation. 5

They exalt the spiritual fire, the universal illuminator of the inner realm with intense devotions and hymns of praise singularly meditative and eloquent. 6

(१५) पञ्चदशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्याङ्गिरसो धरुण ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥७॥ प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय ।
घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः ॥१॥
ऋतेन ऋतं धरुणं धारयन्त यज्ञस्य शाके परमे व्योमन् ।
दिवो धर्मन्धरुणे सेदुषो नॄञ्जातैरजाताँ अभि ये ननक्षुः ॥२॥
अंहोयुवस्तन्वस्तन्वते वि वयो महद्दुष्टरं पूर्व्याय ।
स संवतो नवजातस्तुतुर्यात्सिंहं न क्रुद्धमभितः परि ष्ठुः ॥३॥

15.

Prá vedháse kaváye védyāya gíram bhare yaṣáse pūrvyā́ya | ghṛitáprasatto ásuraḥ suṣévo rāyó dhartā́ dharúṇo vásvo agníḥ || 1 || ṛiténa ṛitám dharúṇam dhārayanta yajñásya ṣākė́ paramé vyòman | divó dhárman dharúṇe sedúsho nṛīñ jātaír ájātāñ abhí yé nanakshúḥ || 2 || aṅhoyúvas tanvàs tanvate ví váyo mahád dushṭáram pūrvyā́ya | sá saṃváto návajātas tuturyāt siṅháṃ ná kruddhám abhítaḥ pári shṭhuḥ || 3 ||

मातेव यद्भरसे पप्रथानो जनंजनं धायसे चक्षसे च ।
वयोवयो जरसे यद्दधानः परि त्मना विषुरूपो जिगासि ॥४॥
वाजो नु ते शवसस्पात्वन्तमुरुं दोघं धरुणं देव रायः ।
पदं न तायुर्गुहा दधानो महो राये चितयन्नत्रिमस्पः ॥५॥

mātéva yád bhárase paprathānó jánaṃ-janaṃ dhā́yase cákshase ca | váyo-vayo jarase yád dádhānaḥ pári tmánā víshurūpo jigāsi || 4 || vā́jo nú te ṣávasas pātv ántam urúṃ dógham dharúṇam deva rāyáḥ | padáṃ ná tāyúr gúhā dádhāno mahó rayé citáyann átrim aspaḥ || 5 ||

15

Devotion live alone pleases our adorable Lord. He is strong, blissful, the possessor of riches, the acceptor of homage and the bestower of habitations. To such a far-seeing, renowned, eternal, glorious, all-wise Lord, the praise I offer. 1

They, who, with the help of mortal priests, gain favour of the immortal leading divine powers, the firm sustainers of the loftiest heaven, by sacred prayers, enshrine in their hearts the Lord of universal fire, who is upholder of all noble deeds, and embodiment of truth. 2

They, who present to the eternal universal fire, the sacred oblations, unattainable by others, their minds and bodies become free from sin and disease. May the Lord, newly-revealed and realized help him to conquer his adversaries, gathered around him, like an angry lion. 3

While pervading everywhere, you support all men like a mother, and being adored for sustaining and imparting knowledge, you mature every kind of food, then, O universal fire, assuming many forms, you comprise all beings in yourself. 4

O divine universal fire, may the sacrificial food, the vast yielder of benefits to men, the sustainer of riches, support the utmost of your vigour ; and may you, like a thief, who keeps his refuge secret, help the sage, exempt from three types of miseries to obtain true wisdom and affluence. 5

(१६) षोडशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यात्रेयः पूरुर्ऋषिः । अग्निर्देवता । (१-४) प्रथमादिचतुर्ऋचामनुष्टुप् ,
(५) पञ्चम्याश्च पङ्क्तिश्छन्दसी ॥

॥८॥

बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः ॥१॥
स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः ।
वि हव्यमग्निरानुषग्भगो न वारमृण्वति ॥२॥
अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः ।
विश्वा यस्मिन्तुविष्वणि समर्ये शुष्ममादधुः ॥३॥

16

Brihád váyo hí bhānávé 'rcā deváyāgnáye | yám mitrám ná práṣastibhir mártāso dadhiré puráḥ || 1 || sá hí dyúbhir jánānāṃ hótā dákshasya bāhvóḥ | ví havyám agnír ānushág bhágo ná váram riṇvati || 2 || asyá stóme maghónaḥ sakhyé vriddháṣocishaḥ | víṣvā yásmin tuvishváṇi sám aryé ṣúshmam ādadhúḥ || 3 ||

अधा ह्यग्न एषां सुवीर्यस्य मंहना ।
तमिद्यह्वं न रोदसी परि श्रवो बभूवतुः ॥४॥
नू न एहि वार्यमग्ने गृणान आ भर ।
ये वयं ये च सूरयः स्वस्ति धामहे सचोतैधि पृत्सु नो वृधे ॥५॥

ádhā hy àgna eshāṃ suvíryasya maṅhánā | tám íd yahváṃ ná ródasī pári ṣrávo babhūvatuḥ || 4 || nú na éhi váryam ágne griṇāná á bhara | yé vayaṃ yé ca sūráyaḥ svastí dhámahe sácotaídhi pritsú no vridhé || 5 ||

16

Sing abundant devotional praises to the divine and radiant adorable God, whom men, by laudations, assign the foremost place, as given to a friend. 1

That adorable Lord, by the strength and splendour, becomes the ministrant priest of men, who conveys their homage straight to Nature's bounties, and like a gracious friend distributes desirable wealth. 2

May we surrender ourselves to Lord just as persons surrender their strength to the loud-sounding and all-ruling fire. May we the devotees through our love and praise of the rich and extremely radiant Lord, obtain all sorts of prosperity. 3

O adorable Lord, may you be disposed for bestowing excellent strength on these worshippers. In your brilliance, you surpass the glory of heaven and, earth, and even the mighty sun. 4

Glorified by us, O adorable Lord, come quickly, and bring to us precious wealth ; we who are your worshippers, we who are your adorers, offer you welcome, and these devotional oblations. May you be favourable to us, and near to us in the struggles for our victory. 5

(१७) सप्तदशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यात्रेयः पूरुर्ऋषिः । अग्निर्देवता । (१-४) प्रथमादिचतुर्ऋचामनुष्टुप् . (५) पञ्चम्याश्च पङ्क्तिश्छन्दसी ॥

॥९॥

आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये ।
अग्निं कृते स्वध्वरे पूरुरीळीतावसे ॥१॥
अस्य हि स्वयशस्तर आसा विधर्मन्मन्यसे ।
तं नाकं चित्रशोचिषं मन्द्रं परो मनीषया ॥२॥
अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा ।
दिवो न यस्य रेतसा बृहच्छोचन्त्यर्चयः ॥३॥

17.

Á yajñaír deva mártya itthá távyāṅsam ūtáye | agníṃ krité svadhvaré pūrúr īḷītávase || 1 || ásya hí sváyaṣastara āsá vidharman mányase | táṃ nákaṃ citráṣocisham mandrám paró manīsháyā || 2 || asyá vásá u arcíshā yá áyukta tujá girá | divó ná yásya rétasā brihác chócanty arcáyaḥ || 3 ||

अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ ।
अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते ॥४॥
नू न इद्धि वार्यमासा सचन्त सूरयः ।
ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उतैधि पृत्सु नो वृधे ॥५॥

asyá krátvā vícetaso dasmásya vásu rátha á | ádhā víṣvāsu hávyo 'gnír vikshú prá ṣasyate || 4 || nú na íd dhí váryam āsá sacanta sūráyaḥ | úrjo napād abhíshṭaye pāhí ṣagdhí svastáya utaídhi — || 5 ||

17

The enlightened man for his help, calls upon the radiant adorable Lord, with sacred worship. He invokes Him for preservation, whenever a sacred work is solemnized. 1

O performer of sacred works, being renowned, may you praise, by your well-conceived words, that adorable Lord, who is possessed of wonderful splendour, is exempt from pain, is venerable, and is supreme, beyond the conception of man. 2

Verily, men gain glory through Him, whose glory is increased by powerful praise, whose various beams of splendour flash on high as though they spring from heavenly seed. 3

Wise devotees obtain prosperity and high nobility through the worship of omniscient Lord, who is full of splendour. Adorable Lord is invoked and glorified by all people. 4

O adorable Lord, may you give us such precious wealth, as is obtained by a devout worshipper, by singing songs of praise. O source of strength, be gracious to us to fulfil our aspirations, and protect us for our welfare. May you bear in our struggles for our prosperity. 5

(१८) अष्टादशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य मृक्तवाहा आत्रेयो द्वित ऋषिः । अग्निर्देवता । (१-४) प्रथमादिचतुर्ऋचामनुष्टुप्, (५) पञ्चम्याश्च पङ्क्तिश्छन्दसी ॥

॥१०॥

प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः ।
विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति ॥१॥
द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना ।
इन्दुं स धत्त आनुषक्स्तोता चित्ते अमर्त्य ॥२॥
तं वो दीर्घायुशोचिषं गिरा हुवे मघोनाम् ।
अरिष्टो येषां रथो व्यश्वदावन्नीयते ॥३॥

18.

Prātár agníḥ purupriyó viśá stavetâtithiḥ | víśvāni yó ámartyo havyá márteshu ráṇyati || 1 || dvitáya mṛiktávāhase svásya dákshasya maṅhánā | índuṃ śá dhatta ānushák stotá cit te amartya || 2 || táṃ vo dīrgháyuṣocishaṃ girá huve maghónām | árishṭo yéshām rátho vy àṣvadāvann íyate || 3 ||

चित्रा वा येषु दीधितिरासन्नुक्था पान्ति ये ।
स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि ॥४॥
ये मे पञ्चाशतं ददुरश्वानां सधस्तुति ।
न्यस्मै देवी स्वधितिर्जिहीत इन्द्राय गातुरुशतीव येमे ।
सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमन्त ॥१०॥
एकं नु त्वा सत्पतिं पाञ्चजन्यं जातं शृणोमि यशसं जनेषु ।
तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इन्द्रम् ॥११॥
एवा हि त्वामृतुथा यातयन्तं मघा विप्रेभ्यो ददतं शृणोमि ।
किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः काममिन्द्र ॥१२॥

kó asya ṣúshmam̱ távishīm̱ varāta éko dhánā bharate ápratītaḥ | imé cid asya jráyaso nú deví índrasyaújaso bhiyásā jihāte || 9 || ny àsmai deví svádhitir jihīta índrāya gātúr uṣatíva yeme | sám̱ yád ójo yuváte víṣvam ābhir ánu svadhāvne kshitáyo namanta || 10 || ékam̱ nú tvā sátpatim pāñcajanyam̱ jātám̱ ṣriṇomi yaṣásam̱ jáneshu | tám me jagribhra āṣáso návishṭham̱ doshā́ vástor hávamānāsa índram || 11 || evā́ hí tvā́m rituthā́ yātáyantam maghā́ víprebhyo dádatam̱ ṣriṇómi | kím̱ te brahmā́ṇo grihate sákhāyo yé tvāyā́ nidadhúḥ kā́mam indra || 12 ||

(३३) त्रयस्त्रिंशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य प्राजापत्यः संवरण ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१॥ महि महे तवसे दीध्ये नॄनिन्द्रायेत्था तवसे अतव्यान् ।
यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत ॥१॥

33.

Máhi mahé taváse dīdhye nrī́n índrāyetthā́ taváse **átavyān** | **yó** asmai sumatím̱ vā́jasātau stutó jáne samaryàṣ ci**kéta** || 1 ||

Who may arrest his strength or resist his vigour ? Verily alone and irresistible, He bears off all the riches. Even these two (physical and mental faculties), through the fear retire and submit to the supremacy of the fast-approaching Soul. 9

Even the divine, and self-sustaining powers of intellect and mind bow before the potent self, and the body resigns to the Soul like a loving wife. As he shares his vigour with all of them, men straightaway offer reverence to him. 10

Verily, I hear that you from the very birth are supreme Lord, the protector of the good, and friendly to the five people, the five senses. May all, representing their wishes and uttering praises propitiate the resplendent self—evening and morning. 11

So, too, I hear of you that you favour and readily enrich the learned from season to season on their approach. But what do your loyal friends and those who rest their hopes in you receive, O Soul ? 12

33

Feeble as I am, I offer praise to the great and vigorous resplendent Lord for granting strength to all these people. He, with his band, shows favour to these brave people, interested in struggle against evils. 1

स त्वं न इन्द्र धियसानो अर्कैर्हरीणां वृषन्योक्त्रमश्रेः ।
या इत्था मघवन्ननु जोषं वक्षो अभि प्रार्यः सक्षि जनान् ॥२॥
न ते त इन्द्राभ्य१स्मदृष्वायुक्तासो अब्रह्मता यदसन् ।
तिष्ठा रथमधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः ॥३॥
पुरू यत्त इन्द्र सन्त्युक्था गवे चकर्थोर्वरासु युध्यन् ।
ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित् ॥४॥
वयं ते त इन्द्र ये च नरः शर्धो जज्ञाना याताश्च रथाः ।
आस्माञ्जगम्यादहिशुष्म सत्वा भगो न हव्यः प्रभृथेषु चारुः ॥५॥

sá tvám̥ na indra dhiyasānó arkaír hárīṇām̥ vṛishan yóktram aṣreḥ | yā́ itthā́ maghavann ánu jósham̥ vákshо abhí prā́ryáḥ sakshi jánān || 2 || ná té ta indrābhy àsmád ṛishváyuktāso abrahmátā yád ásan | tíshṭhā rátham ádhi tám̥ vajrahastā́ raṣmím̥ deva yamase sváṣvaḥ || 3 || purū́ yát ta indra sánty ukthā́ gáve cakárthorvárāsu yúdhyan | tatakshé sū́ryāya cid ókasi své vṛíshā samátsu dāsásya nā́ma cit || 4 || vayám̥ té ta indra yé ca náraḥ ṣárdho jajñāná yātā́ṣ ca ráthāḥ | ā́smāñ jagamyād ahiṣushma sátvā bhágo ná hávyaḥ prabhṛithéshu cā́ruḥ || 5 ||

पपृक्षेण्यमिन्द्र त्वे ह्योजो नृम्णानि च नृतमानो अमर्तः ।
स न एनीं वसवानो रयिं दाः प्रार्यः स्तुषे तुविमघस्य दानम् ॥६॥
एवा न इन्द्रोतिभिरव पाहि गृणतः शूर कारून् ।
उत त्वचं ददतो वाजसातौ पिप्रीहि मध्वः सुषुतस्य चारोः ॥७॥

papṛikshéṇyam indra tvé hy ójo nṛimṇáni ca nṛitámāno ámartaḥ | sá na énīm̥ vasavāno rayím̥ dāḥ prā́ryá stushe tuvimaghásya dánam || 6 || evā́ na indrotíbhir ava pāhí gṛiṇatáḥ ṣūra kārū́n | utá tvácam̥ dádato vā́jasātau piprīhí mádhvaḥ súshutasya cā́roḥ || 7 ||

O resplendent Lord, showerer of blessings, you are delighted when adored through sacred hymns. May you be pleased to fasten the traces of horses and drive hither to assist us in a victory over your hostile people. 2

O resplendent Lord, those persons do not deserve your favour, who differing from us, have no faith in you through their ignorance. O the wielder of admantine will-power, ascend this chariot, and hold the reins, O Lord, of your noble horses. 3

In as much as, O resplendent these praises are offered to you, may you make our fields fertile with a free supply of unobstructed water of wisdom. You are radiant like the sun and in your own dwelling, may you destroy the name of the darkness of nescience, the devil slave in battle. 4

O resplendent self, we are yours, and yours are they, who are the leaders, confident of their strength, and whose energy is directed to you. O resplendent, capable of destroying the evil darkness, splendid in struggles, and easy to be invoked, may you, come to us and likewise come with all your riches. 5

O resplendent Lord, glorious is your strength ; you are immortal, and enwrap the world with light. May you give us splendid riches. I shall always greatly praise the munificence of the opulent Lord (as you are). 6

Thus favour us, O resplendent Lord, with your succour and protect the singers who chant your praises. May you be friendly to those who offer fully-dedicated love of ecstasy that yields a defensive covering in struggles. 7

उत त्ये मा पौरुकुत्स्यस्य सूरेस्त्रसदस्योर्हिरणिनो रराणाः ।
वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे ॥८॥
उत त्ये मा मारुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ ।
सहस्रा मे च्यवतानो ददान आनूकमर्यो वपुषे नार्चत् ॥९॥
उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः ।
मह्ना रायः संवरणस्य ऋषेर्व्रजं न गावः प्रयता अपि ग्मन् ॥१०॥

utá tyé mā paurukutsyásya sūrés trasádasyor hiraṇíno rárāṇāḥ | váhantu mā dáṣa ṣyétāso asya gairikshitásya krátubhir nú saṣce || 8 || utá tyé mā mārutáṣvasya ṣóṇāḥ krátvāmaghāso vidáthasya rātaú | sahásrā me cyávatāno dádāna ānūkám aryó vápushe nárcat || 9 || utá tyé mā dhvanyàsya júshṭā lakshmaṇyàsya surúco yátānāḥ | mahnā́ rāyáḥ saṃváraṇasya ṛ́isher vrajáṃ ná gā́vaḥ práyatā ápi gman || 10 ||

(३४) चतुस्त्रिंशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य प्राजापत्यः संवरण ऋषिः । इन्द्रो देवता । (१-८) प्रथमाद्यष्टर्चां जगती (९) नवम्याश्च त्रिष्टुप् छन्दसी ॥

॥३॥ अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दस्ममीयते ।
सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥१॥
आ यः सोमेन जठरमपिप्रतामन्दत मघवा मध्वो अन्धसः ।
यदीं मृगाय हन्तवे महावधः सहस्रभृष्टिमुशना वधं यमत् ॥२॥

34.

Ájātaṣatrum ajárā svàrvaty ánu svadhā́mitā dasmám īyate | sunótana pácata bráhmavāhase purushṭutā́ya prataráṃ dadhātana || 1 || ā́ yáḥ sómena jaṭháram ápipratámandata maghávā mádhvo ándhasaḥ | yád īm mṛigā́ya hántave mahávadhaḥ sahásrabhṛishṭim uṣánā vadhám yámat || 2 ||

May those ten (five sense organs and five vital breaths) resplendent in their brightness, the gift of those whom the devils fear, exceedingly brilliant and wise, occupying highest places, carry me for the fulfilment of my assigned duties. 8

And may we also be the possessors of powerful, well-actioned, swift transport vehicles, yoked with wind-like horses, and constructed in well-reputed workshops, and may we also receive the gift of thousands of treasures from generous sources, and further may we get ample dresses and decorations for our fighting soldiers. 9

Or, may the bright and dynamic steeds (transport motors) be bestowed upon me by experts and from the concerns well-known for their supreme quality ; and may we be the possessors of riches endowed with generosity. And may all these proceed to reliable experts, like cows to their stalls. 10

34

The undecaying, heavenly, unlimited offering goes to the one (resplendent) who is not born and who is the performer of wondrous deeds. Therefore press-out (the medicinal herbs), prepare, cook and dress, and offer oblation to him, who is the acceptor of prayer, and who is glorified by many. 1

The bounteous, who fills his heart with spiritual bliss, and is exhilarated by experiencing the sweet celestial elixir, lifts up his mighty thousand-fold adamantine will-power, desiring to lay down the monstrous of wickedness. 2

यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह ।
अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः ॥३॥
यस्यावधीत्पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते ।
वेतीद्वस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः ॥४॥
न पञ्चभिर्दशभिर्वष्ट्यारभं नासुन्वता सचते पुष्यता चन ।
जिनाति वेदमुया हन्ति वा धुनिरा देवयुं भजति गोमति व्रजे ॥५॥

yó asmai ghraṅsá utá vā yá ū́dhani sómam sunóti bhávati dyumā́ṅ áha | ápāpa ṣakrás tatanúshṭim ūhati tanū́ṣubhram maghávā yáḥ kavāsakháḥ || 3 || yásyā́vadhīt pitáram yásya mātáram yásya ṣakró bhrā́taram nā́ta īshate | vétī́d v asya práyatā yataṃkaró ná kílbishād īshate vásva ākaráḥ || 4 || ná pañcábhir daṣábhir vashṭy ārábham nā́sunvatā sacate púshyatā caná | jináti véd amuyā́ hánti vā dhúnir ā́ devayúm bhajati gómati vrajé || 5 ||

¹४॥ वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः ।
इन्द्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः ॥६॥
समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु ।
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत ॥७॥
सं यज्जनौ सुधनौ विश्वशर्धसाववेदिन्द्रो मघवा गोषु शुभ्रिषु ।
युजं ह्यन्यमकृत प्रवेपन्युदीं गव्यं सृजते सत्वभिर्धुनिः ॥८॥

vitvákshaṇaḥ sámṛitau cakramāsajó 'sunvato víshuṇaḥ sunvató vṛidháḥ | índro víṣvasya damitā́ vibhī́shaṇo yathāvaṣáṃ nayati dā́sam ā́ryaḥ || 6 || sám īm paṇér ajati bhójanam mushé ví dāṣúshe bhajati sūnáraṃ vásu | durgé caná dhriyate víṣva ā́ purú jáno yó asya távishīm ácukrudhat || 7 || sáṃ yáj jánau sudhánau viṣváṣardhasāv áved índro maghávā góshu ṣubhríshu | yújaṃ hy ànyám ákṛita pravepany úd īm gávyaṃ sṛijate sátvabhir dhúniḥ || 8 ||

Illustrious is the man who expresses devotional love to that bounteous, by day or by night. The supra-powerful Lord is the friend of sages, but He disregards the man, who suffers from vanity and family snobs. 3

The supra-powerful Lord does not necessarily disfavour the one, whose father, mother, or brother he has punished (for justifiable reasons) and is willing to accept his devotions and offerings. He is the upholder (of justice). The Lord, the bestower of riches, does not subscribe to the sins. 4

He places no impediments in the normal functions of the five sense organs or ten vital breaths. He does not associate with the man who performs not the benevolent acts, though prospering well. The terrifier of foes, however, punishes or destroys the wicked. But, to the virtuous, he gives a cattle-farm in reward. 5

Exceedingly strong in struggles, he accelerates the wheels of his chariot, and turns away from him who offers no prayer. He, however, augments him who prays. The resplendent Lord is the subduer of all, and formidable, and He keeps the undisciplines under His full control. 6

He proceeds to confiscate the wealth of the avaricious and bestows precious riches to His faithful devotee. A man, who provokes the mighty to indignation, dares not stand secure even in his wide stronghold. 7

When the resplendent Lord, the opulent, discriminates between two wealthy persons fighting amongst themselves over the precious knowledge, he chooses one of them on merits, and frightens the other one. He takes the meritorious one as his close ally, and associated with the vital faculties, bestows wisdom upon him. 8

सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः ।
तस्मा आपः संयतः पीपयन्त तस्मिन्क्षत्रममवत्त्वेषमस्तु ॥९॥

sahasrasā́m ā́gniveśiṃ griṇīshe śátrim agna upamā́ṃ ketúm aryáḥ | tásmā ápaḥ saṃyátaḥ pīpayanta tásmin kshatram ámavat tveshám astu || 9 ||

(३५) पञ्चत्रिंशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्याङ्गिरस प्रभूवसुर्ऋषिः । इन्द्रो देवता । (१-७) प्रथमादिसप्तर्चामनुष्टुप्, (८) अष्टम्याश्च पङ्क्तिश्छन्दसी ॥

॥५॥

यस्ते साधिष्ठोऽवस इन्द्र क्रतुष्टमा भर ।
अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम् ॥१॥
यदिन्द्र ते चतस्रो यच्छूर सन्ति तिस्रः ।
यद्वा पञ्च क्षितीनामवस्तत्सु न आ भर ॥२॥
आ तेऽवो वरेण्यं वृषन्तमस्य हूमहे ।
वृषजूतिर्हि जज्ञिष आभूभिरिन्द्र तुर्वणिः ॥३॥
वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः ।
स्वक्षत्रं ते धृषन्मनः सत्राहमिन्द्र पौंस्यम् ॥४॥
त्वं तमिन्द्र मर्त्यममित्रयन्तमद्रिवः ।
सर्वरथा शतक्रतो नि याहि शवसस्पते ॥५॥

35.

Yás te sā́dhishṭhó 'vasa índra krátush ṭám ā́ bhara | asmábhyaṃ carshaṇīsáhaṃ sásniṃ vā́jeshu dushṭáram || 1 || yád indra te cátasro yác chūra sánti tisráḥ | yád vā páñca kshitīnā́m ávas tát sú na ā́ bhara || 2 || ā́ té 'vo váreṇyaṃ vṛíshantamasya hūmahe | vṛíshajūtir hí jajñishá ābhū́bhir indra turváṇiḥ || 3 || vṛíshā hy ási rā́dhase jajñishé vṛíshṇi te śávaḥ | svákshatraṃ te dhṛishán mánaḥ satrāhám indra paúṅsyam || 4 || tváṃ tám indra mártyam amitrayántam adrivaḥ | sarvarathā́ śatakrato ní yāhi śavasas pate || 5 ||

O adorable Lord, I praise the one who is the dispeller of distress, energy-personified, and dynamic, the bestower of thousands (of blessings) and beyond comparison. May the streams of cherished desires of the devotee be acceptable to the Lord. May the devotee be favoured with wealth, strength and glory. 9

35

O resplendent Lord. may you grant for our protection that of your holy and effectual power, which conquers men for us, which is invincible in life-struggles. 1

Whatever aids, O resplendent Lord, are yours, whether four (physical, vital, mental and spiritual) or three (physical, mental and spiritual), or those accorded to the five classes of men, bring them quickly all that help to us. 2

We invoke for the choicest and mightiest help of yours, O the most liberal showerer of blessings. As soon as manifest you are quick in showering of benefits, and destroying evils. May you associated with the vital principles, grant us protection. 3

You are the showerer of boons, and as such as soon as manifest, you bestow riches. Your strength is the fulfiller of aspirations. Your self-invigorated mind is firm in determination, and your manly vigour subdues multitudes. 4

O resplendent Lord, performer of hundreds of selfless deeds, wielder of the punitive justice, may you, with your all-pervading chariot's force, proceed against the mortal, who entertains hostility towards you. 5

॥६॥

त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः ।
उग्रं पूर्वीषु पूर्व्यं हवन्ते वाजसातये ॥६॥
अस्माकमिन्द्र दुष्टरं पुरोयावानमाजिषु ।
सयावानं धनेधने वाजयन्तमवा रथम् ॥७॥
अस्माकमिन्द्रेहि नो रथमवा पुरंध्या ।
वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे ॥८॥

tvā́m íd vṛitrahantama jánāso vṛiktábarhishaḥ | ugrám pūrvíshu pūrvyáṃ hávante vā́jasātaye || 6 || asmā́kam indra dushṭáram puroyā́vānam ājíshu | sayā́vānaṃ dháne-dhane vājayántam avā rátham || 7 || asmā́kam indréhi no rátham avā púraṃdhyā | vayáṃ ṣavishṭha vā́ryam diví ṣrávo dadhīmahi diví stómam manāmahe || 8 ||

३६ षट्त्रिंशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्याङ्गिरसः प्रभूवसुर्ऋषिः । इन्द्रो देवता । १-२, ४-६ प्रथमाद्वितीययोर्ऋचो-श्चतुर्थ्यादितृचस्य च त्रिष्टुप्, ३ तृतीयायाश्च जगती छन्दसी ॥

॥७॥

स आ गमदिन्द्रो यो वसूनां चिकेतद्दातुं दामनो रयीणाम् ।
धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुम् ॥१॥
आ ते हनू हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे ।
अनु त्वा राजन्नर्वतो न हिन्वन्गीर्भिर्मदेम पुरुहूत विश्वे ॥२॥

36.

Sá á gamad índro yó vásūnāṃ cíketad dā́tuṃ dā́mano **rayīṇā́m** | dhanvacaró ná váṅsagas tṛishāṇáṣ cakamānáḥ **pibatu dugdhám** aṅṣúm || 1 || ā́ te hánū harivaḥ ṣūra ṣípre **rúhat sómo ná** párvatasya pṛishṭhé | ánu tvā rājann árvato **ná hinván gīrbhír** madema puruhūta víṣve || 2 ||

O, the mightiest destroyer of evils, fierce and foremost among many, men with humility and purity of heart invoke you for aid in life-struggles. 6

Defend, O resplendent Lord, our life-chariot, that proceeds foremost in struggles, followed by attendants, and eagerly striving for repeated gains. 7

May you come to us, O resplendent Lord, and defend our life-chariot by your divine intelligence. May we, O mightiest one, offer oblations at the break of day, and chant prayers at dawn. 8

36

May the resplendent Lord, who knows how to distribute riches from His store of treasure, come to us. May He, the bestower of riches, come as a thirsty bird who roams in the midspace and eagerly relish the elixir of our offered devotional love. 1

O Lord of vitality and vigour, may the elixir of our devotion rise to your sweet lips, as if a herbal creeper to the summit of a mountain. May we, O king, invoked by all, give pleasure to you with our hymns, as to horses with fodder. 2

चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः ।
रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः ॥३॥
एष ग्रावेव जरिता त इन्द्रेयर्ति वाचं बृहदाशुषाणः ।
प्र सव्येन मघवन्यंसि रायः प्र दक्षिणिद्धरिवो मा वि वेनः ॥४॥
वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्याम् ।
स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन्भरे धाः ॥५॥
यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट ।
यूने समस्मै क्षितयो नमन्तां श्रुतरथाय मरुतो दुवोया ॥६॥

cakráṃ ná vṛittám puruhūta vepate máno bhiyā́ me ámater íd adrivaḥ | ráthād ádhi tvā jaritā́ sadāvṛidha kuvín nú stoshan maghavan purūvásuḥ || 3 || eshá grā́veva jaritā́ ta indréyarti vā́cam bṛihád āṣushāṇáḥ | prá savyéna maghavan yáṅsi rāyáḥ prá dakshiṇíd dharivo mā́ ví venaḥ || 4 || vṛ́ishā tvā vṛ́ishaṇaṃ vardhatu dyaúr vṛ́ishā vṛ́ishabhyām vahase háribhyām | sá no vṛ́ishā vṛisharathaḥ suṣipra vṛ́ishakrato vṛ́ishā vajrin bháre dhāḥ || 5 || yó róhitau vājínau vājínīvān tribhíḥ ṣataíḥ sácamānāv ádishṭa | yū́ne sám asmai kshitáyo namantāṃ ṣrutárathāya maruto duvoyā́ || 6 ||

(३७) सप्तत्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य भौमोऽत्रिऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वञ्चाः ।
तस्मा अमृध्रा उषसो व्युच्छान्य इन्द्राय सुनवामेत्याह ॥१॥

37.

Sám bhānúnā yatate sū́ryasyājúhvāno ghṛitápṛishṭhaḥ sváñcaḥ | tásmā ámṛidhrā usháso vy ùchān yá índrāya sunávāmety ā́ha || 1 ||

O wielder of the punitive justice, invoked by all, my mind trembles through dread of poverty, like a whirling wheel. O ever prosperous, bounteous Lord, may your affluent worshipper praise you promptly and abundantly, merged in devotion as if with you in your chariot. 3

O resplendent Lord, like the press stone, your devotee offers laudations to you. With your left hand, O bounteous Lord, you bestow riches, and so with your right too; be not reluctant. 4

May the effective eulogium melt you, O showerer of blessings. Your radiance is borne by actinic rays. So, O showerer of blessings, splendid in form, wielder of the punitive justice, with mighty chariot, may you defend us in struggles. 5

O cosmic vital forces, may all men bow down in obedience to that young possessor of well-known chariots, who rich in steeds gives me two dark red horses (the colourful dawn and dusk) together with three hundred and more cattle (the days of the year). 6

37

Bedewed with clarified butter and worshipped earnestly, the swift flames vies with the splendour of the sun. May the dawns rise without cessation for him who says, "let us offer devotional love to the resplendent Lord." 1

समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते ।
ग्रावाणो यस्येषिरं वदन्त्ययदध्वर्युर्हविषाव सिन्धुम् ॥२॥
वधूरियं पतिमिच्छन्त्येति य ईं वहाते महिषीमिषिराम् ।
आस्य श्रवस्याद्रथ आ च घोषात्पुरू सहस्रा परि वर्तयाते ॥३॥
न स राजा व्यथते यस्मिन्निन्द्रस्तीव्रं सोमं पिबति गोसखायम् ।
आ सत्वनैरजति हन्ति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन् ॥४॥
पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति ।
प्रियः सूर्ये प्रियो अग्ना भवाति य इन्द्राय सुतसोमो ददाशत् ॥५॥

sámiddhāgnir vanavat stīrṇábarhir yuktágravā sutásomo jarate | grávāṇo yásyeshirám vádanty áyad adhvaryúr havíshāva síndhum || 2 || vadhū́r iyám pátim ichánty eti yá īm váhāte máhishīm ishirám | ā́sya ṣravasyād rátha ā́ ca ghoshāt purū́ sahásrā pári vartayāte || 3 || ná sá rā́jā vyathate yásminn índras tīvrám sómam píbati gósakhāyam | ā́ satvanaír ájati hánti vṛitrám kshéti kshitīḥ subhágo nā́ma púshyan || 4 || púshyāt kshéme abhí yóge bhavāty ubhé vṛítau saṃyatī sáṃ jayāti | priyáḥ sū́rye priyó agnā́ bhavāti yá índrāya sutásomo dā́dāṣat || 5 ||

(३८) अष्टात्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य भौमोऽत्रिर्ऋषिः । इन्द्रो देवता । अनुष्टुप् छन्दः ॥

उरोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय ॥१॥

38

Urósh ṭa indra rā́dhaso vibhvī́ rātíḥ ṣatakrato | ádhā no viṣvacarshaṇe dyumnā́ sukshatra maṅhaya || 1 ||

With kindled inner fire and heart trimmed like strewn grass, let the devotee worship and pour forth the devotions as if the juice effused from the press-stones. And may the priest chant praises, like the press-stones uttering sounds, and enjoy with his oblations as a swimmer going to a sea. 2

When the soul loves his charming wife, the wisdom, the lady fond of husband comes to the ceremony. May his car seek fame, thunder loudly, and its wheel make thousands of revolutions. 3

That prince suffers no evil in whose realm, the resplendent Lord accepts earnest devotional prayers, profusely mixed with love. Attended by faithful followers, he moves in all directions. He destroys his enemy and cherishing that name of the resplendent Lord, he guards his people. 4

He, who sings devotional prayers, composed for the praise of the resplendent Lord, attains ability to win riches and preserve. He is victorious in the struggles, present or future. Dear shall he be to the Sun, and dear to fire his devotional expressions, he offers homage to the resplendent. 5

38

O resplendent Lord, performer of hundreds of benevolent deeds, liberal is your munificience and extensive your bounty. So, O observer of all, and benevolent guardian, may you grant us opulence by your grace and glory. 1

यदीमिन्द्र श्रवाय्यमिषं शविष्ठ दधिषे ।
पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरम् ॥२॥
शुष्मासो ये ते अद्रिवो मेहना केतसापः ।
उभा देवावभिष्टये दिवश्च ग्मश्च राजथः ॥३॥
उतो नो अस्य कस्य चिद्दक्षस्य तव वृत्रहन् ।
अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे ॥४॥
नू त आभिरभिष्टिभिस्तव शर्मञ्छतक्रतो ।
इन्द्र स्याम सुगोपाः शूर स्याम सुगोपाः ॥५॥

yád īm indra ṣravā́yyam ísham ṣavishṭha dadhishé | paprathé dīrghaṣrúttamam híraṇyavarṇa dushṭáram || 2 || ṣúshmāso yé te adrivo mehánā ketasā́paḥ | ubhā́ devā́v abhíshṭaye diváṣ ca gmáṣ ca rājathaḥ || 3 || utó no asyá kásya cid dákshasya táva vṛitrahan | asmábhyam nṛimṇám ā́ bharāsmábhyam nṛimaṇasyase || 4 || nū́ ta ābhír abhíshṭibhis táva ṣárman̄ chatakrato | índra syā́ma sugopā́ḥ ṣū́ra syā́ma sugopā́ḥ || 5 ||

(३९) एकोनचत्वारिंशं सूक्तम्
(१-५) पञ्चर्चस्यास्य सूक्तस्य भौमोऽत्रिर्ऋषिः । इन्द्रो देवता । (१-४) प्रथमादिचतुर्ऋचामनुष्टुप्, (५) पञ्चम्याश्च पङ्क्तिश्छन्दसी ॥

॥१०॥ यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः ।
राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥१॥

39.

Yád indra citra mehánāsti tvā́dātam adrivaḥ | rā́dhas tán no vidadvasa ubhayāhasty ā́ bhara || 1 ||

O mighty resplendent Lord, golden hued, you are the possessor of widely-famed abundance, and yet it is, as extensiyely known, very hard to obtain. 2

O wielder of the adamantine justice, these powers, who readily obey you, are very generous, extensive and strong. You and your powers, both divinities, at their pleasure dominate over heaven and earth. 3

O destroyer of evils, may you bring to us the wealth and heroic strength with the aid of power that you possess. May you bless us with wealth, as you are keen to make us wealthy. 4

With these aids of yours, may we, O doer of the selfless acts, live under your protection ; may we, O resplendent, be safe and may we, O hero, be well secured. 5

39

O wondrous resplendent Lord, wielder of the adamantine justice, master of precious treasures, what wealth is meant to be showered to us, that bounty, may you, filling both your hands, bring to us. 1

यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर ।
विद्याम तस्य ते वयमकूपारस्य दावने ॥२॥
यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
तेन दृळ्हा चिदद्रिव आ वाजं दर्षि सातये ॥३॥
मंहिष्ठं वो मघोनां राजानं चर्षणीनाम् ।
इन्द्रमुप प्रशस्तये पूर्वीभिर्जुजुषे गिरः ॥४॥
अस्मा इत्काव्यं वच उक्थमिन्द्राय शंस्यम् ।
तस्मा उ ब्रह्मवाहसे गिरो वर्धन्त्यत्रयो गिरः शुम्भन्त्यत्रयः ॥५॥

yán mányase várenyam índra dyukshám tád á́ bhara | vidyā́ma tásya te vayám ákūpārasya dāváne || 2 || yát te ditsú prarā́dhyam máno ásti srutám brihát | téna drilhā́ cid adriva ā́ vā́jam darshi sātáye || 3 || máṅhishtham vo maghónām rā́jānam carshanīnā́m | índram úpa prásastaye pūrvī́bhir jujushe gíraḥ || 4 || ásmā ít kā́vyam váca ukthám índrāya sáṅsyam | tásmā u bráhmavāhase gíro vardhanty átrayo gíraḥ sumbhanty átrayaḥ || 5 ||

(४०) चत्वारिंशं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य भौमोऽत्रिर्ऋषिः । (१–४) प्रथमादिचतुर्ऋचामिन्द्रः, (५) पञ्चम्याः सूर्यः, (६–९) षष्ठ्यादिचतसृणाञ्चात्रिर्देवताः । (१–३) प्रथमादितृचस्योष्णिक्, (४,६–८) चतुर्थ्याः षष्ठ्यादितृचस्य च त्रिष्टुप्, (५, ९) पञ्चमीनवम्योश्चानुष्टुप् छन्दांसि ॥

॥११॥ आ याह्यद्रिभिः सुतं सोमं सोमपते पिब । वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥१॥
वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः । वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥२॥

40.

Á yā́hy ádribhiḥ sutám sómam somapate piba | vríshann indra vríshabhir vritrahantama || 1 || vríshā grā́vā vríshā mádo vríshā sómo ayám sutáḥ | vríshann indra — || 2 ||

May you, O resplendent Lord, grant us whatever you deem worth the wish and blessed. May we continue to be your in your boundless munificence. 2

O wielder of justice, since your generous and praise-worthy liberality is far-renowned, may you with that lofty spirit break open the stronghold of adversaries, and distribute substantial food to the deserving. 3

In the praise of the resplendent Lord, people chant ancient hymns and please Him, who is extremely rich among opulents and sovereign king among men. 4

To that resplendent Lord, must be sung the poems and hymns of praise. The sages, free from three folds of miseries, glorify Him with their hymns. He is the acceptor of praises. The three-fold free sages augment His glory through praises. 5

40

Come to cherish our devotional love, which has been effused out with sincerity and integrity as the invigorating extracts from herbs by pressing stones. O showerer, the resplendent Lord, the destroyer of evils come with the showerers (the vital faculties). 1

Showerer is the cloud, showerer is the spiritual delight, showerer is the effused herbal juice. O showerer, the resplendent Lord, the destroyer of evils, come with the showerers (the vital faculties). 2

वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः । वृषन्निन्द्र वृषभिर्वृत्रहन्तम ॥३॥
ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा ।
युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यंदिने सवने मत्सदिन्द्रः ॥४॥
यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः ।
अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ॥५॥

vṛ́shā tvā vṛ́shaṇaṃ huve vájriñ citrā́bhir ūtíbhiḥ | vṛ́shann indra — || 3 || ṛijīshī́ vajrī́ vṛishabhás turāshā́ṭ chushmī́ rā́jā vṛitrahā́ somapā́vā | yuktvā́ háribhyām úpa yāsad arvā́ñ mā́dhyaṃdine sávane matsad índraḥ || 4 || yát tvā sūrya svàrbhānus támasā́vidhyad āsuráḥ | ákshetravid yáthā mugdhó bhúvanāny adīdhayuḥ || 5 ||

॥१२॥ स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्तमाना अवाहन् ।
गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविन्ददत्रिः ॥६॥
मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो भियसा नि गारीत् ।
त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा ॥७॥
ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन् ।
अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत् ॥८॥
यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः ।
अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन् ॥९॥

svàrbhāno ádha yád indra māyā́ avó divó vártamānā avā́han | gūḷháṃ sū́ryaṃ támasā́pavratena turī́yeṇa bráhmaṇāvindad átriḥ || 6 || mā́ mā́m imáṃ táva sántam atra irasyā́ drugdhó bhiyásā ní gārīt | tvám mitró asi satyárādhās taú mehā́vataṃ váruṇaś ca rā́jā || 7 || grā́vṇo brahmā́ yuyujānáḥ saparyán kīríṇā devā́n námasopaśíkshan | átriḥ sū́ryasya diví cákshur ā́dhāt svàrbhānor ápa māyā́ aghukshat || 8 || yáṃ vaí sū́ryaṃ svàrbhānus támasā́vidhyad āsuráḥ | átrayas tám ánv avindan nahy ànyé áśaknuvan || 9 ||

As strong, I invoke you, O strong the wielder of adamantine justice, for your marvellous protective means. O showerer, the resplendent Lord, destroyer of evils come with the showerer (the vital faculties). 3

May the acceptor of simple and sincere homage, the wielder of punitive justice, the showerer of benefits, the queller of the mighty (foes), the powerful the monarch, the dispeller of darkness, the acceptor of devotional love, speedily as if mounted on courser, come down to us. May the resplendent Lord be exhilarated at the mid-day worship. 4

When, O sun, the mighty devil, the nescience, eclipses you with darkness, all creatures look bewildered like one who knows not the place where he actually is. 5

When, O Sun, you dissipate those illusions of the eclipsing nescience which are spread below the sky, then the three fold free sage, by his fourth vision (the innate instinct, beyond the physical mental and intellectual) discovers the sun concealed by the darkness impeding his functions. 6

Let not the violator, with his dread, through anger swallow me up, for I (the sun) am your true friend, O three fold free sage. May you and the brilliant venerable divine, both protect me. 7

Then the wise three fold free sage, collecting the material for sacred worship, and propitiating divine powers with praise, and adoring them with reverence, places the eye of the sun in the sky and causes the delusion of the nescience to vanish. 8

The sun, whom the demon envelops with darkness, the three fold fire, sages subsequently recover not but them is able to make his release effective. 9

(४१) एकचत्वारिंशं सूक्तम्

(१-२०) विंशत्यृचस्यास्य सूक्तस्य भौमोऽत्रिऋषिः । विश्वे देवा देवताः । (१-१५, १८-१९) प्रथमादिपञ्चदशर्चामष्टादश्येकोनविंश्योश्च त्रिष्टुप्, (१६-१७) षोडशीसप्तदश्योरतिजगती, (२०) विंश्याश्चैकपदा विराट् छन्दांसि ॥

॥१३॥ को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थिवस्य वा दे ।
ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान् ॥१॥
ते नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतो जुषन्त ।
नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ॥२॥
आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्रथ्यस्य पुष्टौ ।
उत वा दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ॥३॥

41.

Kó nú vām mitrāvaruṇāv ṛitāyán divó vā maháḥ pắrthivasya vā dé | ṛitásya vā sádasi trắsīthāṃ no yajñāyaté vā paṣushó ná vắjān || 1 || té no mitró váruṇo aryamắyúr índra ṛibhukshấ marúto jushanta | námobhir vā yé dádhate suvṛiktíṃ stómaṃ rudrắya mīḷhúshe sajóshāḥ || 2 || ấ vāṃ yéshṭhāṣvinā huvádhyai vắtasya pátman ráthyasya pushṭaú | utá vā divó ásurāya mánma prắndhāṅsīva yájyave bharadhvam || 3 ||

प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः ।
पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः ॥४॥
प्र वो रयिं युक्ताश्वं भरध्वं राय एषेऽवसे दधीत धीः ।
सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणाम् ॥५॥

prá sakshấṇo divyáḥ kánvahotā trító diváḥ sajóshā vắto agníḥ | pūshắ bhágaḥ prabhṛithé viṣvá-bhojā ājíṃ ná jagmur āṣvàṣvatamāḥ || 4 || prá vo rayíṃ yuktấṣvam bharadhvaṃ rāyá éshé 'vase dadhīta dhíḥ | suṣéva évair auṣijásya hótā yé va évā marutas turắṇām || 5 ||

41

O Lord of light and bliss, who is truly devoted to you? May you, whether abiding in the region of heaven, or of the vast earth, or of the firmament, protect us, and give us physical strength and vitality. 1

May these divinities,—the cosmic bounties—like the divine light, cosmic plasma, eternal order, the parameter of time, the spirituality, the soul force and the cosmic vital principles be gracious to us. And in the same way, the other ones of one mind with benevolent cosmic vitality accept our hymns, adorations and laudations. 2

I invoke you, the pair of twin divines, the restrainers of desire, for the acceleration of your chariot with the swiftness of wind. We offer praise to the worshipful celestial ordainer as it were a libation. 3

May the divine accepter of worship come speedily to the sacrifice as the fleetest courses rushes to the battle. In this sacrifice may the wisest participate as priest; and the triple bounty, the fire on the earth, the air in midspace, and the Sun in the heaven may also come in concurrence (with our Lord). May the other bounties of grace and sustenance, the protectors of the universe also come. 4

O vital principles, may you bring wealth, comprising horses. Let wise men acquire and preserve riches. May the ministrant priest, the disciple of brilliant sage, be made happy by those swift-going horses, which are rapid in motion. 5

॥१४॥ प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः ।
इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः ॥६॥
उप व एषे वन्द्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः ।
उषासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञम् ॥७॥
अभि वो अर्चे पोष्यावतो नॄन्वास्तोष्पतिं त्वष्टारं रराणः ।
धन्या सजोषा धिषणा नमोभिर्वनस्पतीँरोषधी राय एषे ॥८॥
तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः ।
पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ ॥९॥
वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति ।
गृणीते अग्निरेतरी न शूषैः शोचिष्केशो नि रिणाति वना ॥१०॥

prá vo vāyúṃ rathayújaṃ kriṇudhvam prá deváṃ vípram panitā́ram arkaíḥ | ishudhyáva ṛitasā́paḥ púraṃdhīr vásvīr no átra pátnīr ā́ dhiyé dhuḥ || 6 || úpa va éshe vándyebhiḥ ṣūshaíḥ prá yahvī́ divā́ṣ citáyadbhir arkaíḥ | ushā́sānáktā vidúshīva víṣvam ā́ hā vahato mártyāya yajñám || 7 || abhí vo arce poshyā́vato nṛī́n vā́stosh pátiṃ tváshṭāraṃ rárāṇaḥ | dhányā sajóshā dhishā́ṇā námobhir vánaspátīñr óshadhī rāyá éshe || 8 || tujé nas táne párvatāḥ santu svaítavo yé vásavo ná vīrā́ḥ | panitá āptyó yajatáḥ sádā no várdhān naḥ ṣáṅsaṃ náryo abhíshṭau || 9 || vríshṇo astoshi bhūmyásya gárbhaṃ tritó nápātam apā́ṃ suvṛiktí | gṛiṇīté agnír etárī ná ṣūshaíḥ ṣocíshkeṣo ní riṇāti vánā || 10 ||

॥१५॥ कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय ।
आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः ॥११॥

kathā́ mahé rudríyāya bravāma kád rāyé cikitúshe bhágāya | ā́pa óshadhīr utá no 'vantu dyaúr vánā giráyo vṛikshákeṣāḥ || 11 ||

May you, by your prayers, bring him, the air-divine, here who is the fulfiller of desires, and adorable ; and let him yoke the chariot. May the tender lovely and excellent copartners, as if wives, also come hither to inspire us with wisdom. 6

O mighty divine day and night, to you and to the other adorables, I present homage with prayers, delighting and explicit. May you, like two learned lady-sages, inspire mortals for accomplishing noble deeds. 7

We extol, with offerings the architect of creation, the nourisher of men, and the Lord of homes. We glorify with obeisance the goddess of speech, bestower of opulence, and also those who share opulence, the Lord of the forest, and the herbs, with the expectation that we may obtain riches. 8

May the clouds, the establishers of the world, like heroes, free moving, liberally shower their bounties on us. May the persons of authority and reliance, who are ever friendly to men, and whom we all respect, grant us fame and prosperity. 9

I glorify with unqualified praise the lightning in the clouds, the embryo of the earth-fertilizing rain, the off-spring of the waters. He, who is threefold, who with might neighs loudly like a charger, when flashing through clouds with fiery hairs and withering rays, he (the lightning) consumes the forests. 10

How shall we speak to the mighty posterity of the Lord of cosmic vitality, or to the all-knowing gracious Lord, for the sake of obtaining riches. May the waters, plants, the heaven, the woods, and the mountains, whose tresses are trees, preserve us. 11

शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ।
शृण्वन्त्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ॥१२॥
विदा चिन्नु महान्तो ये व एवा ब्रवाम दस्मा वार्यं दधानाः ।
वयश्चन सुभ्व आव यन्ति क्षुभा मर्तमनुयतं वधस्नैः ॥१३॥
आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचम् ।
वर्धन्तां द्यावो गिरश्चन्द्राग्रा उदा वर्धन्तामभिषाता अर्णाः ॥१४॥
पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च ।
सिषक्तु माता मही रसा नः स्मत्सूरिभिरृजुहस्त ऋजुवनिः ॥१५॥

sriṇótu na ūrjā́ṃ pátir gíraḥ sá nábhas tárīyāñ ishiráḥ párijmā | sriṇvántv ā́paḥ púro ná subhrā́ḥ pári srúco babrihāṇásyā́dreḥ || 12 || vidā́ cin nu mahā́nto yé va évā brávāma dasma vā́ryaṃ dádhānāḥ | váyas caná subhvà ā́va yanti kshubhā́ mártaṃ ánuyataṃ vadhasnaíḥ || 13 || ā́ daívyāni pā́rthivāni jánmāpás cā́chā súmakhāya vocam | várdhantāṃ dyā́vo gíras candrā́grā udā́ vardhantām abhíshātā árṇāḥ || 14 || padé-pade me jarimā́ ní dhāyi várūtrī vā sakrā́ yā́ pāyúbhis ca | síshaktu mātā́ mahī́ rasā́ naḥ smát sūríbhir rijuhásta rijuvániḥ || 15 ||

कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ ।
मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ॥१६॥
इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो वनते मर्त्यो वः ।
अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निरृतिर्जग्रसीत ॥१७॥

kathā́ dāsema námasā sudā́nūn evayā́ marúto áchoktau prásravaso marúto áchoktau | mā́ nó 'hir budhnyò rishé dhād asmā́kam bhūd upamātivániḥ || 16 || íti cin nú prajā́yai pasumátyai dévāso vánate mártyo va ā́ devāso vanate mártyo vaḥ | átrā sivā́ṃ tanvò dhasím asyā́ jarā́ṃ cin me nírritir jagrasīta || 17 ||

May the Lord of vitality, who traverses through cloudy heaven, the circumambrient listen to our prayers. And may the crystal clear waters, bright like marble cities, hear us, as they flow round the towering mountains. 12

O mighty cloud bearing winds, we know your ways. O charming ones, we, furnished with choicest offerings, sing your glory. May they, well disposed, come down to us, destroying with their weapons, the agitated mortals, who try to oppose them. 13

I offer adoration to the cloud bearing winds, of celestial and terrestrial origin, deserving sacred worship, in order to obtain the waters. May my joy—bestowing noble aspirations prosper, and so my songs. May our cherished rivers be full of waters. 14

My praise has been continually offered to each one. May the strong force, with her powers of perservation protect us. May the great venerable mother-earth, adored by enlightened straight-handed, possessor of benevolent treasures, confer precious things to us. 15

How may we present offerings to the liberal ones with reverence ? How to adore the vital principles with present praises in a fitting manner ? The vital ones are universally recognized as worthy of our invocations. May not the cloud ever contrive for our harm. May he be the destroyer of our adversaries. 16

The mortal devotee worships you, O divine powers, at all times for the increase of progeny and prosperity. Verily, the mortal devotee wins you O divine powers. Here and now, they sustain my body with salutary food. May my mother-earth keep off my old age. 17

तां वो देवाः सुमतिमूर्जयन्तीमिषमश्याम वसवः शसा गोः ।
सा नः सुदानुर्मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः ॥१८॥
अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः ॥१९॥
सिषक्तु न ऊर्जव्यस्य पुष्टेः ॥२०॥

tā́m vo devāḥ sumatím ūrjáyantīm ísham aṣyāma vasavaḥ ṣásā góḥ | sá naḥ sudánur mṛiḷáyantī deví práti drávantī suvitáya gamyāḥ || 18 || abhí na íḷā yūthásya mātá smán nadíbhir urváṣī vā gṛiṇātu | urváṣī vā bṛihaddivá gṛiṇānábhyūrṇvāná prabhṛithásyāyóḥ || 19 || síshaktu na ūrjavyàsya pushṭéḥ || 20 ||

(४२) द्विचत्वारिंशं सूक्तम्

(१-१८) अष्टादशर्चस्यास्य सूक्तस्य भौमोऽत्रिर्ऋषिः । (१-१०, १२-१८) प्रथमादिदशर्चां द्वादश्यादिसप्तानाञ्च विश्वे देवाः, (११) एकादश्याश्च रुद्रो देवताः । (१-१६, १८) प्रथमादिषोडशर्चामष्टादश्याश्च त्रिष्टुप्, (१७) सप्तदश्याश्चैकपदा विराट् छन्दसी ॥

॥१७॥ प्र शंतमा वरुणं दीधिती गीर्मित्रं भगमदितिं नूनमश्याः
पृषद्योनिः पञ्चहोता शृणोत्वतूर्तपन्था असुरो मयोभुः ॥१॥
प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवम् ।
ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु ॥२॥

42.

Prá ṣáṃtamā váruṇaṃ dídhitī gír mitrám bhágam áditim nunám aṣyāḥ | príshadyoniḥ páñcahotā ṣriṇotv átūrtapanthā ásuro mayobhúḥ || 1 || práti me stómam áditir jagṛibhyāt sūnúṃ ná mātá hṛídyaṃ suṣévam | bráhma priyáṃ deváhitaṃ yád ásty ahám mitré váruṇe yán mayobhú || 2 ||

O divine providers of riches, may we obtain from the mother-earth (and also the cow), invigorating and mind-sustaining food. May that liberal and gracious goddess, come speeding near us for our well-being. 18

May the goddess earth, the mother of herds of cattle, and the damsel of lightning with all streams of flashes be favourable to us. May the bright shining damsel of lightning come to us, accepting our devotion, to invest us, the worshippers, with light. 19

May the divine powers listen to our prayers for life and energy. 20

42

May our most sweetest song, with the deep devotion, successfully reach the virtuous, friendly, gracious, and eternal Lord. May the ministrant of the five vital airs, hear us, who pervades the dappled cosmos, and who is unimpeded and the bestower of life and happiness. 1

May the infinite and indivisible Lord accept my affectionate and delightful praise, as a mother welcomes her son. I address this inspired, bliss-giving prayer to the virtuous and friendly Lord, which he surely would love to accept. 2

उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन ।
स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ॥३॥
समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यज्ञियानाम् ॥४॥
देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम् ।
ऋभुक्षा वाज उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः ॥५॥

úd īraya kavítamaṃ kavīnā́ṃ unáttainaṃ abhí mádhvā ghriténa | sá no vásūni práyatā hitā́ni candrā́ṇi deváḥ savitā́ suvāti || 3 || sám indra ṇo mánasā neshi góbhiḥ sáṃ sūríbhir harivaḥ sám svastí | sám bráhmaṇā deváhitaṃ yád ásti sáṃ devā́nāṃ sumatyā́ yajñíyānām || 4 || devó bhágaḥ savitā́ rāyó áṅśa índro vritrásya saṃjíto dhánānām | ribhukshā́ vā́ja utá vā púraṃdhir ávantu no amrítāsas turā́saḥ || 5 ||

॥१८॥

मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि ।
न ते पूर्वे मघवन्नापरासो न वीर्यं नूतनः कश्चनाप ॥६॥
उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानाम् ।
यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागमज्जोहुवानम् ॥७॥
तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।
ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास्तेषु रायः ॥८॥

marútvato ápratītasya jishṇór ájūryataḥ prá bravāmā kritā́ni | ná te pū́rve maghavan nā́parāso ná vīryàṃ nū́tanaḥ káṣ canā́pa || 6 || úpa stuhi prathamáṃ ratnadhéyaṃ bríhaspátiṃ sanitā́raṃ dhánānām | yáḥ ṣáṅsate stuvaté ṣámbhavishṭhaḥ purūvásur āgámaj jóhuvānam || 7 || távotíbhiḥ sácamānā árishṭā bríhaspate maghávānaḥ suvī́rāḥ | yé aṣvadā́ utá vā sánti godā́ yé vastradā́ḥ subhágās téshu rā́yaḥ || 8 ||

Inspirit him, the sagest of the sages, imbue him with the sweet devotion, and may the divine creator provide us with abundance, all attainables, benevolences, and gold and silver. 3

With a willing mind, may the resplendent Lord grant us wisdom and wealth ; may the Lord of light, associate us with pious men of learning, with prosperity, with sacrificial food, and that which is acceptable to Nature's bounties and with the favour of the adorable godly men. 4

May the divine, gracious, creator, the Lord of wealth, the resplendent self, the winner of the strength of evils and also from amongst us the enlightened sages, persons strong and healthy, and distinguished intellectuals, as well as the people of immortal fame, hasten to bless our sacred performances, and protect us from calamities. 5

Let us celebrate the deeds of Lord of vital principle, beyond visibility and cognition, victorious and undecaying. Neither the ancients, O bounteous Lord, nor their successors have attained your prowess, nor any present one would attain it. 6

May you glorify the supreme Lord of universe, the first donor of precious treasure, the distributor of riches, the bestower of happiness, the burthen of every recitation and chants, and who comes ladden with ample wealth to His invoker. 7

O Supreme Lord of universe, tended with your protections, men are unharmed by foes, and become opulent and blessed with descendants. The wealth of those only is blessed and meaningful who are the liberal givers of horses, of cows and of garments. 8

विसर्माणं कृणुहि वित्तमेषां ये भुञ्जते अपृणन्तो न उक्थैः ।
अपव्रतान्प्रसवे वावृधानान्ब्रह्मद्विषः सूर्याद्यावयस्व ॥९॥
य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात ।
यो वः शमीं शशमानस्य निन्दात्तुच्छ्यान्कामान्करते सिष्विदानः ॥१०॥

visarmāṇam krinubi vittám eshām yé bhuñjáte ápriṇanto na ukthaíḥ | ápavratān prasavé vāvṛidhānā́n brahmadvíshaḥ sū́ryād yāvayasva || 9 || yá óhate raksháso devávītāv acakrébhis tám maruto ní yāta | yó vaḥ ṣámīṃ ṣaṣamānásya níndāt tuchyā́n kā́mān karate sishvidānáḥ || 10 ||

॥१९॥

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥११॥
दमूनसो अपसो ये सुहस्ता वृष्णः पत्नीर्नद्यो विभ्वतष्टाः ।
सरस्वती बृहद्दिवोत राका दशस्यन्तीर्वरिवस्यन्तु शुभ्राः ॥१२॥
प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम् ।
य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः ॥१३॥

tám u shṭuhi yáḥ svishúḥ sudhánvā yó víṣvasya ksháyati bheshajásya | yákshvā mahé saumanasā́ya rudrám námobhir devám ásuraṃ duvasya || 11 || dámūnaso apáso yé suhástā vríshṇaḥ pátnīr nadyò vibhvatashṭā́ḥ | sárasvatī bṛihaddivótá rākā́ daṣasyántīr varivasyantu ṣubhrā́ḥ || 12 || prá sū́ mahé suṣaraṇā́ya medhā́ṃ gíram bhare návyasīṃ jā́yamānām | yá āhanā́ duhitúr vakshánāsu rūpā́ minānó ákṛiṇod idáṃ naḥ || 13 ||

Take away the riches from them, who even on asking do not partake their wealth to the needy, and continue to enjoy their riches alone. May you keep them far from the sunshine, who do not perform benevolent deeds, and who, though prospering in their vocation are averse to devotion. 9

O Lord of vitality, may you send them into darkness, with wheelless chariots, who invite undesirable elements to the sacred performances of the virtuous ; and who revile those who offer prayers and belittle the wishes of those who toil to serve you. 10

May you praise him who has the sure arrow, and the strong bow, who is the Lord of every balm that heals. May you worship the Lord of cosmic vitality for a comprehensive and sound understanding, and adore the powerful divinity with salutations. 11

May we have the assistance from and good-will of generous people, persons of activity, skilled artisans, ladies of high status, and the like ; and may we derive advantage from the streams or water ways, carved out by marine engineers. May we have the blessings from the divine goddess of learning, the highly enlightened, possessing the grace of full moon night, bestowers of boons and aspirations. 12

I offer devoutly, this freshly inspired song to the great and sure protector, the showerer, who makes for us this all. In fond love for His daughter, the earth, He (the resplendent Lord) has provided this water for our use to the rivers of varied dimensions and forms. 13

प्र सुष्टुतिः स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः ।
यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ॥१४॥
एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः ।
कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः ॥१५॥
प्रैष स्तोमः पृथिवीमन्तरिक्षं वनस्पतीँरोषधी राये अश्याः ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥१६॥
उरौ देवा अनिबाधे स्याम । ॥१७॥
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥१८॥

prá sushṭutí stanáyantam ruvántam iḷás pátim jaritar nūnám aṣyāḥ | yó abdimāñ udanimāñ íyarti prá vidyútā ródasī ukshámāṇaḥ || 14 || eshá stómo mā́rutam ṣárdho áchā rudrásya sūnū́ñr yuvanyū́ñr úd aṣyāḥ | kā́mo rāyé havate mā svasty úpa stuhi príshadaṣvāñ ayā́saḥ || 15 || praíshá stómaḥ pṛithivī́m antáriksham vánaspátīñr óshadhī rāyé aṣyāḥ | devó-devaḥ suhávo bhūtu máhyam mā́ no mātā́ pṛithiví durmataú dhāt || 16 || uraú devā anibādhé syāma || 17 || sám aṣvínor ávasā nū́tanena mayobhúvā supráṇītī gamema | ā́ no rayím vahatam ótá vīrā́n ā́ víṣvāny amṛitā saúbhagāni || 18 ||

(४३) त्रिचत्वारिंशं सूक्तम्

(१-१७) सप्तदशर्चस्यास्य सूक्तस्य भौमोऽत्रिर्ऋषिः । विश्वे देवा देवता । (१-१५, १७) प्रथमादि पञ्चदशर्चा सप्तदश्याश्च त्रिष्टुप्, (१६) षोडश्याश्चैकपदा विराट् छन्दसी ॥

॥२०॥ आ धेनवः पयसा तूर्ण्यर्था अमर्धन्तीरुप नो यन्तु मध्वा ।
महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति ॥१॥

43.

Ā́ dhenávaḥ páyasā tū́rṇyarthā ámardhantīr úpa no yantu mádhvā | mahó rāyé bṛihatī́ḥ saptá vípro mayobhúvo jaritā́ johavīti || 1 ||

May your pious praise, Oh worshipper, assuredly reach the thundering, roaring Lord of the earth, who proceeds, illuminating the heaven and earth with his lightning and impelling the clouds distributes the rain. 14

May this hymn reach up to the mighty clould-bearing wind, the youthful offspring of cosmic vitality. My intent desires incite me to earn riches for the good of all. May every one glorify them who go to their sacred assignment speedily as if mounted on spotted steeds. 15

May our invocations reach the divine bounties on earth and in the mid-region and the forest trees, the plants, for the sake of riches. May each individual divine bounty be easily invoked by me. May not the mother earth be unfavourably disposed to me. 16

O divines, may we ever enjoy great and uninterrupted bliss. 17

May we obtain the very fresh favour of the twin divines (bounties on the earth and in the heaven) and gain their unprecedented, joy-conferring and well-guided protection. May the immortals grant us riches, brave youths and all round prosperity. 18

43

May the harmless speech, in different metres, like milch-cows, who hasten to their destination come to us, with their sweetness. The wise worshipper invokes the seven-metred divine speech vast and joy-diffusing for gaining ample riches. 1

आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम् ॥२॥
अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम् ।
होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय ॥३॥
दश क्षिपो युञ्जते बाहू अद्रिं सोमस्य या शमितारा सुहस्ता ।
मध्वो रसं सुगभस्तिर्गिरिष्ठां चनिश्चदद्दुदुहे शुक्रमंशुः ॥४॥
असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय ।
हरी रथे सुधुरा योगे अर्वागिन्द्र प्रिया कृणुहि हूयमानः ॥५॥

á sushṭutí námasā vartayádhyai dyā́vā vā́jāya pṛithivī́ ámṛidhre | pitā́ mātā́ mádhuvacāḥ suhástā bháre-bhare no yaṣásāv avishṭām || 2 || ádhvaryavaṣ cakṛivā́ṅso mádhūni prá vāyáve bharata cā́ru ṣukrám | hóteva naḥ prathamáḥ pāhy asyá déva mádhvo rarimā́ te mádāya || 3 || dáṣa kshípo yuñjate bāhū́ ádriṃ sómasya yā́ ṣamitā́rā suhástā | mádhvo rásaṃ sugábhastir girishṭhā́ṃ cániṣcadad duduhe ṣukrám aṅṣúḥ || 4 || ásāvi te jujushā́ṇāya sómaḥ krátve dákshāya bṛihaté mádāya | hárī ráthe sudhúrā yóge arvā́g índra priyā́ kṛiṇuhi hūyámānaḥ || 5 ||

२२ आ नो महीमरमतिं सजोषा ग्नां देवीं नमसा रातहव्याम् ।
मधोर्मदाय बृहतीमृतज्ञामाग्ने वह पथिभिर्देवयानैः ॥६॥
अञ्जन्ति यं प्रथयन्तो न विप्रा वपावन्तं नाग्निना तपन्तः ।
पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि ॥७॥

á no mahím arámatiṃ sajóshā gnā́ṃ devīṃ námasā rātáhavyām | mádhor mádāya bṛihatím ṛitajñā́m ā́gne vaha pathíbhir devayā́naiḥ || 6 || añjánti yáṃ pratháyanto ná víprā vapā́vantaṃ nā́gninā tápantaḥ | pitúr ná putrá upási préshṭha ā́ gharmó agním ṛitáyann asādi || 7 ||

With pious praise, and reverence, I invoke exhaustless heaven and earth. May the father (heaven) and mother (earth), both sweet in speech, loving in treatment, and well-reputed protect us in every struggle. 2

Priests, who are composing sweet tunes, first offer to the wind-divine, the delightful and brilliant sweet drink. May you, like an invoker, O priestly wind-divine, be the first to accept this sweet offering, which we are presenting to you for your exhilaration. 3

The ten expressers of the juice (the ten fingers of both the hands) and the two arms of the worker, are actively engaged in effusing out the juice from the medicinal herbs, with the help of pressing stones. The exulting expert worker toils on the assignment, big as a mountain, and finally for the spiritual joy he is able to press out the sweet extracts. 4

The devotional love (like the extract of herbs) has been effused, O resplendent Lord, for your delight and for impelling your strength in action, and for your great exhilaration ; therefore, O resplendent Lord, when invoked by us, put your two dear, docile, well-trained horses in your chariot, with fire axle. 5

O fire divine, being well pleased with us, bring to us, by paths frequented by the divine powers, the divine queen of knowledge, who is mighty and omnipresent, to whom oblations are offered with reverence, and who is vast and cognizant of sacred worship, to partake of the exhilaration of the sweet devotion. 6

A priest offers butter to the fire, in the same way as wise men nourish the seed and extend the realm of knowledge. The sacred caldron when placed on fire of the altar looks as if the son sitting on his father's lap. 7

अच्छा मही बृहती शंतमा गीर्दूतो न गन्त्वश्विना हुवध्यै ।
मयोभुवा सरथा यातमर्वाग्गन्तं निधिं धुरमाणिर्न नाभिम् ॥८॥
प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि ।
या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन् ॥९॥
आ नामभिर्मरुतो वक्षि विश्वाना रूपेभिर्जातवेदो हुवानः ।
यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती ॥१०॥

ácha mahí brihatí sáṃtamā gír dūtó ná gantv asvínā huvádhyai | mayobhúvā saráthā yātam arvāg gantáṃ nidhíṃ dhúram āṇír ná nā́bhim ||8|| prá távyaso námaüktiṃ turásyāhám pūshṇá utá vāyór adikshi | yā́ rā́dhasā coditā́rā matīnā́ṃ yā́ vā́jasya draviṇodā́ utá tmán || 9 || ā́ nā́mabhir marúto vakshi vísvān ā́ rūpébhir jātavedo huvānáḥ | yajñáṃ gíro jaritúḥ sushṭutíṃ ca vísve ganta maruto vísva ūtí || 10 ||

॥२२॥ आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ॥११॥
आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम् ।
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ॥१२॥
आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गन्त्वोमभिर्हुवानः ।
ग्ना वसान ओषधीरमृध्रस्त्रिधातुशृङ्गो वृषभो वयोधाः ॥१३॥

ā́ no divó brihatáḥ párvatād ā́ sárasvatī yajatā́ gantu yajñám | hávaṃ deví jujushāṇā́ ghritā́cī sagmā́ṃ no vā́cam usatí sriṇotu || 11 || ā́ vedhásaṃ nílaprishṭham brihántam bríhaspátiṃ sádane sādayadhvam | sādádyonim dáma ā́ dīdivā́ṅsaṃ híraṇyavarṇam arusháṃ sapema ||12|| ā́ dharṇasír brihá̱ddivo rárāṇo vísvebhir gantv ómabhir huvānáḥ | gnā́ vásāna óshadhīr ámridhras tridhátusriṅgo vrishabhó vayodhā́ḥ ||13||

May this adoring, earnest and gratifying praise go like a messenger to summon the twin divines hither. Come O twin divines, givers of happiness, riding in one chariot. May you come down to the cherished loving devotion, as the bolt to the axle of the wagon. 8

I offer adoration with reverence to the nourishing bounty and victorious wind-divine, who both are inspirers of wise thoughts and granters of strength and of food, and also both of them are distributors of riches. 9

O omniscient Lord, invoked by us all, may you bring here vital principles, under their several names and forms. May you, O vital faculties, come with all your protecting impulses to bless our benevolent deeds, the prayers, and the adoration of the worshipper. 10

May the radiant divine speech come to bless our benevolent works from heavenly regions and cloudy-realms. May she, glittering with glory, and appreciating our offerings, eagerly hear our melodious songs. 11

May you enshrine in your hearts the Supreme Lord of universe, the creator, whose dark-blue sky is the back. Let us serve this Lord, seated in the inner chamber of our body and shining everywhere. He is golden-hued, and resplendent. 12

May the sustainer of all, (the fire divine), greatly radiant, the delighter, come with all his protecting faculties, when invoked. He is clothed with flames and with plants, and is invincible. His horns, as if flames, are of three colours (white, red and black), and is the showerer of blessings and the bestower of life. 13

मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन् ।
सुशेव्यं नमसा रातहव्याः शिशुं मृजन्त्यायवो न वासे ॥१४॥
बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचन्त ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥१५॥
उरौ देवा अनिबाधे स्याम ॥१६॥
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥१७॥

mātúsh padé paramé ṣukrá āyór vipanyávo rāspiráso agman | suṣévyam námasā rātáhavyāḥ ṣíṣum mṛi-janty āyávo ná vāsé || 14 || bṛihád váyo bṛihaté túbhyam agne dhiyājúro mithunásaḥ sacanta | devó-devaḥ suhávo bhūtu máhyam mā́ no mātā́ pṛithivī́ durmataú dhāt || 15 || uraú devā — || 16 || sám aṣvínor ávasā — || 17 ||

(४४) चतुश्चत्वारिंशं सूक्तम्

(१–१५) पञ्चदशर्चस्यास्य सूक्तस्य काश्यपोऽवत्सारो लिङ्गोक्ताश्च ऋषयः । विश्वे देवा देवताः ।
(१–१३) प्रथमादित्रयोदशर्चां जगती, (१४–१५) चतुर्दशीपञ्चदश्योश्च त्रिष्टुप् छन्दसी ॥

॥२३॥ तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे ॥१॥

44.

Tám pratnáthā pūrváthā víṣváthemáthā jyeshṭhátātim barhishádaṃ svarvídam | pratīcīnáṃ vṛijánaṃ dohase girā́-ṣúṃ jáyantam ánu yā́su várdhase || 1 ||

The priests, equipped with all the accessories of the fire ritual have come to the bright and most excellent place of the mother earth. As men clean and wash and then deck and decorate the infant child, similarly the priests foster and take care of the new born auspicious fire with reverence. 14

Married pairs (husband and wife) getting old in their devotion, jointly offer abundant sacred oblations to you, O fire divine. May the most divine among all divine powers, be invoked by me, and may the mother earth keep no ill-thoughts for me. 15

O divine powers, may we ever dwell in your uninterrupted bliss. 16

May we obtain the very fresh favour of twin divines and gain their unprecedented joy-conferring and well-guided protection. May the immortals grant riches, sons and grandsons and all round prosperity. 17

44

As ancient sages, our predecessors, and all sages of the present generation have been drawing strength by prayers of the resplendent Lord, so, may you also draw power, from Him who is the oldest and best of the divine powers. Enshrine to Him in your pure hearts, who is the bestower of bliss, and is swift and victorious. May you extol to Him by such prayers. 1

श्रिये मुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते ।
मुगोपा असि न दभाय मुक्रतो परो मायाभिर्ऋत आस नाम ते ॥२॥
अत्यं हविः मचते मच्च धातु चारिष्टगातुः म होता महोभरिः ।
प्रमस्त्राणो अनु वर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः ॥३॥
प्र व एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः ।
सुयन्तुभिः मर्वशामैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति ॥४॥
संजर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु मुस्वरुः ।
धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ॥५॥

ṣriyé sudṛíṣīr úparasya yā́ḥ svàr virócamānaḥ kakúbhām aeodáte | sugopā́ asi ná dábhāya sukrato paró māyā́bhir ṛitá āsa nā́ma te || 2 || átyaṃ havíḥ sacate sáe ca dhā́tu eā́rishṭagātuḥ sá hótā sahobhá́riḥ | prasársrāṇo ánu barhír vṛíshā ṣíṣur mádhye yúvājáro visrúhā hitáḥ || 3 || prá va eté suyújo yā́mann ishṭáye nīcīr amúshmai yamyà ṛitāvṛídhaḥ | suyántubhiḥ sarvaṣāsaír abhī́ṣubhiḥ krívir nā́māni pravaṇé mushāyati || 4 || saṃjárbhurāṇas tárubhiḥ sutegṛíbhaṃ vayākínaṃ cittágarbhāsu susváruḥ | dhāravākéshv ṛijugātha ṣobhase várdhasva pátnīr abhí jīvó adhvaré || 5 ||

॥२४॥ यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा ।
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः ॥६॥

yādṛíg evá dádṛiṣe tādṛíg ucyate sáṃ chāyáyā dadhire sidhráyāpsv ā́ | mahī́m asmábhyam urushā́m urú jráyo bṛihát suvī́ram ánapacyutaṃ sáhaḥ || 6 ||

Being self-radiant, your glory spreads through the regions and through the beautiful waters of unyielding clouds for the good of mankind. O performer of good deeds, the preserver of men, you are in no way to cause injury to creatures. You excel all wisdom. Your name abides in truth. 2

He, the fire-divine, is associated with the perpetual offerings, and is the sustainer of all. Nothing restricts him, the showerer, in his way whilst gliding to the place of ceremony. He is an infant, later on ever-young, exempt from decay and rests in the midst of plants. 3

These well-combined rays of the Sun, are descending with intent to proceed to the place of the fire ritual amplifying the gains in the interests of the worshipper. Operating with these swift-moving all-regulating rays, he takes up waters flowing in low places (to heights to form clouds). 4

Object of honest eulogium, enkindled with fire-sticks, accepting devotional prayers animated by the heartfelt love, and giver of life, it shines among the inner chambers of the enlightened worshippers, and upholders of the sacred words. May you increase your protecting flames, the consorts in the sacred fire-ritual. 5

Like as it is beheld, so it is described to be. It, with its extensive splendour in the waters, makes earth yield us room enough and amply wide. May it grant us great vigour undecaying energy, and invincible strength, together with brave progeny. 6

वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः ।
घ्रंसं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः ॥७॥
ज्यायांसमस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते ।
यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ॥८॥
समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता ।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबन्धनी ॥९॥
स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः ।
अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम् ॥१०॥

véty ágrur jánivān vā́ áti spṛídhaḥ samaryatā́ mánasā sū́ryaḥ kavíḥ | ghraṅsáṃ rákshantam pári viṣváto gáyam asmā́kaṃ ṣárma vanavat svā́vasuḥ || 7 || jyā́yāṅsam asyá yatúnasya ketúna ṛishisvaráṃ carati yā́su nā́ma te | yādṛíṣmin dhā́yi tám apasyáyā vidad yá u svayáṃ váhate só áraṃ karat || 8 || samudrám āsā́m áva tasthe agrimā́ ná rishyati sávanaṃ yásminn ā́yatā | átrā ná hā́rdi kravaṇásya rejate yátrā matír vidyáte pūtabándhanī || 9 || sá hí kshatrásya manasásya cíttibhir evāvadásya yajatásya sádhreḥ | avatsārásya spṛiṇavāma ráṇvabhiḥ ṣávishṭhaṃ vā́jaṃ vidúshā cid árdhyam || 10 ||

॥२५॥ श्येन आसामदितिः कक्ष्यो मदो विश्ववारस्य यजतस्य मायिनः ।
समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते ॥११॥

ṣyená āsā́m áditiḥ kakshyò mádo viṣvávārasya yajatásya māyínaḥ | sám anyám-anyam arthayanty étave vidúr vishā́ṇam paripā́nam ánti té || 11 ||

The creator is the foremost poet of vision, radiant like the sun, she advances with his superior conscient power. He is ever intent or combat with his adversaries in advancement. May we adore the all round illuminator of bright heavens and may he secure our entire felicity, and grant us a sheltering home, that wards fierce heat of the day off on every side. 7

Your name, sung by seers in the hymns, goes to the superior one with this swift-moving banner like luminous flame. By devotion, he wins the blessing, where on his heart is set. He, who himself stirs and strives acquires abundant riches. 8

The chief and best of these our praises proceed to the ocean—like sun ; that worship does not fail where in these sacred hymns are extended. There the heart's desire of the worshipper remains not unfulfilled where the mind is pure. 9

He verily is to be glorified. Let us with pleasant thoughts of such high values of life as the spirit of voluntary assistance, good-will, security, reverence, co-existence and safety, strive to win the super strength to be shared by everyone, wise and sensible. 10

The bird, the son of Infinity is the master of this elixir, the spiritual joy. It fills the heart with ecstasy, and as such everyone craves to have this universally covetable reverential and inspiring elixir, and all urge one another to enjoy. Everyone finds in this wonderful elixir this invigorating blissful drink. 11

सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तर्यो वः सचा ।
उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः ॥१२॥
सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदञ्चनः ।
भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन् ॥१३॥
यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥१४॥
अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति ।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥१५॥

sadāprinó yajató ví dvísho vadhīd bāhuvriktáḥ srutavít táryo vaḥ sácā | ubhā́ sá várā práty eti bhā́ti ca yád īṃ gaṇám bhájate suprayā́vabhiḥ || 12 || sutambharó yájamānasya sátpatir víṣvāsām ū́dhaḥ sá dhiyā́m udáñcanaḥ | bhárad dhenū́ rásavac chiṣriye páyo 'nubruvāṇó ádhy eti ná svapán || 13 || yó jāgā́ra tám ṛ́caḥ kāmayante yó jāgā́ra tám u sā́māni yanti | yó jāgā́ra tám ayáṃ sóma āha távāhám asmi sakhyé nyòkāḥ || 14 || agnír jāgāra tám ṛ́caḥ kāmayante 'gnír jāgāra tám u sā́māni yanti | agnír jāgāra tám ayáṃ sóma āha távāhám asmi sakhyé nyòkāḥ || 15 ||

(४५) पञ्चचत्वारिंशं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्यात्रेयः सदापृण ऋषिः । विश्वे देवा देवताः । त्रिष्टुप् छन्दः ॥

॥२६॥ विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः ।
अपावृत व्रजिनीरुत्स्वर्गाद्वि दुरो मानुषीर्देव आवः ॥१॥

45.

Vidā́ divó vishyánn ádrim ukthaír āyatyá usháso arcíno guḥ | ápāvṛita vrajínīr út svàr gād ví dúro mā́nushīr devá āvaḥ || 1 ||

A devotee in the company of such cirtuous ones as are ever rich in wealth, pious worshippers, destroyer of the crooked by strong hands, fully-learned and skilful, would always destroy his enemies. Such a person would surely gain his wishes in both worlds, and would shine brightly. 12

He becomes the defender of the sons of the pious institutor of ceremony, a benevolent guardian and uplifter of all holy thoughts, the milch-cows (scriptures) offer sweet wisdom, which is distributed all over. But only he knows this who learns and speaks the holy texts, not he who sleeps. 13

The Rk hymns love him who wakes and watches ; the Saman tunes also bless him, who is ever vigilant. The loving Lord also addresses thus to the man, who is vigilant, "I am yours, my dwelling in your friendship". 14

The Rk hymns love the one enlightened, who ever wakes and watches. The Saman tunes also bless the one enlightened who is ever vigilant. and to that enlightened one the loving Lord also addresses thus : "I am yours ; my dwelling in your friendship." 15

45

The self of the realized devotee recovers the lost wisdom, praying and hurling his bolt of determination from the innermost realm. The rays of the approaching dawn are spread around the divine source of light, scattering the clustered gloom, has risen and set open the doors of knowledge of men. 1

वि सूर्यो अमतिं न श्रियं सादोर्वाद्गवां माता जानती गात् ।
धन्वर्णसो नद्यः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः ॥२॥
अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।
वि पर्वतो जिहीत साधत द्यौराविवासन्तो दसयन्त भूम ॥३॥
सूक्तेभिर्वो वचोभिर्देवजुष्टैरिन्द्रा न्वग्नी अवसे हुवध्यै ।
उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासन्तो मरुतो यजन्ति ॥४॥
एतो न्वद्य सुध्यो भवाम प्र दुच्छुना मिनवामा वरीयः ।
आरे द्वेषांसि सनुतर्दधामायाम प्राञ्चो यजमानमच्छ ॥५॥

ví sū́ryo amátim ná ṣríyam sād órvā́d gávām mātā́ jānatí gāt | dhánvarṇaso nadyàḥ khā́doarṇā sthū́ṇeva súmitā driṅhata dyaúḥ || 2 || asmā́ ukthā́ya párvatasya gárbho mahī́nām janúshe pūrvyā́ya | ví párvato jíhīta sā́dhata dyaúr āvívāsanto dasayanta bhū́ma || 3 || sūktébhir vo vácobhir devájushṭair índrā nv àgnī́ ávase huvádhyai | ukthébhir hí shmā kaváyaḥ suyajñā́ āvívāsanto marúto yájanti || 4 || éto nv àdyá sudhyò bhávāma prá duchúnā minavāmā várīyaḥ | āré dvéshāṅsi sanutár dadhāmā́yāma prā́ñco yájamānam ácha || 5 ||

एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः ।
यया मनुर्विशिशिप्रं जिगाय यया वणिग्वङ्कुरापा पुरीषम् ॥६॥
अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो नवग्वाः ।
ऋतं यती सरमा गा अविन्दद्विश्वानि सत्याङ्गिराश्चकार ॥७॥

étā dhíyam krinávāmā sakhāyó 'pa yā́ mātā́ṅ riṇutá vrajám góḥ | yáyā mánur viṣiṣiprám jigā́ya yáyā vaṇíg vaṅkúr ā́pā púrīsham || 6 || ánūnod átra hástayato ádrir ā́rcan yéna dáṣa māsó návagvāḥ | ritám yatī́ sarámā gā́ avindad víṣvāni satyā́ṅgirāṣ cakāra || 7 ||

The sun of enlightenment spreads his light as splendour personified. Dawn, the mother of the light, knowing his approach, comes from the spacious firmament. The rivers with running waters flow, breaking down their banks. The heaven is stable like a firm-set pillar. 2

These traditional hymns cause the burthen of the cloud to descend to fertilize the fields. The sky performs its assigned duty (and pours down the rain). The assiduous farmers tire themselves out with more work. 3

O resplendent and adorable Lord, I invoke you for my protection with God-pleasing and well composed words to obtain your favour. Preceptors excelling in academic pursuits and assiduous men also adore you with reverence. 4

Come today quickly ; may our thoughts be holy. May we cast away mis-fortune far from us. May we then keep them at distance, who hate us and hasten to meet the institutor of the sacred works. 5

Come friends, let us strive to attain that solemn purpose, wherewith the gate of (the stolen) mother-cow (the divine wisdom) could be thrown open, wherewith man could overcome evil-desires attractive in appearance and wherewith the wandering merchant could obtain his wealth. 6

At this place of work and worship, the preparation is set in motion by the hands of the priests for singing praises, whereby the progressive ministrants celebrate the ten-months worship. And when the divine intuition comes straight and discovers the wisdom, fire-priests render all the worship effective. 7

विश्वे अस्या व्युषि माहिनायाः सं यद्गोभिरङ्गिरसो नवन्त ।
उत्सं आसां परमे सधस्थ ऋतस्य पथा सरमा विदद्गाः ॥८॥
आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे ।
रघुः श्येनः पतयदन्धो अच्छा युवा कविर्दीदयद्गोषु गच्छन् ॥९॥
आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः ।
उद्ना न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन् ॥१०॥
धियं वो अप्सु दधिषे स्वर्षां ययातरन्दश मासो नवग्वाः ।
अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः ॥११॥

víṣve asyā́ vyúshi máhināyāḥ sáṃ yád góbhir áṅgiraso návanta | útsa āsām paramé sadhástha ṛitásya pathā́ sarámā vidad gā́ḥ || 8 || ā́ sū́ryo yātu saptā́ṣvaḥ kshétraṃ yád asyorviyā́ dīrghayāthé | raghúḥ ṣyenáḥ patayad ándho áchā yúvā kavír dīdayad góshu gáchan || 9 || ā́ sū́ryo aruhac chukrám árṇó ’yukta yád dharíto vītápṛishṭhāḥ | udnā́ ná nā́vam anayanta dhī́rā āṣṛiṇvatī́r ā́po arvā́g atishṭhan || 10 || dhíyaṃ vo apsú dadhishe svarshā́ṃ yáyā́taran dáṣa māsó návagvāḥ | ayā́ dhiyā́ syāma devágopā ayā́ dhiyā́ tuturyāmā́ty áṅhaḥ || 11 ||

(४६) षट्चत्वारिंश सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्यात्रेय प्रतिक्षत्र ऋषिः । (१-६) प्रथमादिषडृचां विश्वे देवाः, (७-८) सप्तम्यष्टम्योश्च देवपत्न्यो देवताः । (१, ३-७) प्रथमर्चस्तृतीयादिपञ्चानाञ्च जगती, (२, ८) द्वितीयाष्टम्योश्च त्रिष्टुप् छन्दसी ॥

॥२८॥ हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम् ।
नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति ॥१॥

46.

Háyo ná vidvā́ñ ayuji svayáṃ dhurí tā́ṃ vahāmi pratáraṇīm avasyúvam | nā́syā vaṣmi vimúcaṃ nā́vṛítam púnar vidvā́n patháḥ puraetā́ ṛijú neshati || 1 ||

When the fire-priests on the opening of this adorable dawn, could recover the lost cattle (the lost wisdom) they milched the cows and distributed the milk (the spiritual joy) to the august assembly, for intuitive instinct could find wisdom by the path of truth. 8

May the sun (the self) the Lord of seven steeds (sense organs), arrive, for he has a distant goal to reach by a tedious journey. Fleet as a hawk, he pounces upon the offered sacrificial food, ever young and far-seeing, he shines, moving amidst rays of light. 9

The sun has ascended above the shining ocean, as soon as he yokes his bright-backed steeds. The wise sage draws him, like a ship, across the ocean. The rain waters, hearing his commands, have come down. 10

I offer to you, for the sake of rain, an all-bestowing worship, whereby the progressive ministrants have completed the ten-months rite. May we, by this worship, invoke Nature's bounties to guard us against ills. May we, by this worship, pass safe beyond affliction and sin. 11

46

The enlightened person of his own accord, attaches himself to his assigned task, like a trained horse to a chariot. I also bear that task which is transcendent and preservative. I seek for no release, neither see way of turning back therefrom. May he, who knows the way, conduct me by the right path. 1

अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥२॥
इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥३॥
उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् ।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते ॥४॥
उत त्यन्नो मारुतं शर्ध आ गमद्दिविक्षयं यजतं बर्हिरासदे ।
बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं वरुणो मित्रो अर्यमा ॥५॥

ágna índra váruṇa mítra dévāḥ ṣárdhaḥ prá yanta mấrutotá vishṇo | ubhấ nấsatyā rudró ádha gnấḥ pūshấ bhágaḥ sárasvatī jushanta || 2 || indrāgnī́ mitrávárunáditiṃ svàḥ pṛithivī́ṃ dyấm marútaḥ párvatāñ̐ apáḥ | huvé víshṇuṃ pūsháṇam bráhmaṇas pátim bhágaṃ nú ṣáṅsaṃ savitấram ūtáye || 3 || utá no víshṇur utá vấto asrídho draviṇodấ utá sómo máyas karat | utá ṛibháva utá rāyé no aṣvínotá tváshṭotá víbhvấnu maṅsate || 4 || utá tyán no mấrutaṃ ṣárdha ấ gamad divikshayáṃ yajatám barhír āsáde | bṛíhaspátiḥ ṣárma pūshótá no yamad varū́thyàṃ váruṇo mitró aryamấ || 5 ||

उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्यस्त्रामणे भुवन् ।
भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवम् ॥६॥
देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥७॥

utá tyé naḥ párvatāsaḥ suṣastáyaḥ sudītáyo nadyàs trấmaṇe bhuvan | bhágo vibhaktấ ṣávasávasấ gamad uruvyácā áditiḥ ṣrotu me hávam || 6 || devấnām pátnīr uṣatī́r avantu naḥ prấvantu nas tujáye vấjasātaye | yấḥ pấrthivāso yấ apấm ápi vraté tấ no devīḥ suhavấḥ ṣárma yachata || 7 ||

May you the cosmic divine powers, such as the lightning, the vapours, the vital principles, the pervading ethereal element and the sun confer strength upon us. May the twin-divines (dawn and dusk) cosmic vitality, the speech, the nourishments, the gracious elements, and the divine enlightenment be blessings to us. 2

I invoke for protection the nature's bounties like lightning and fire, light and plasma, the mother infinity, the heaven, the earth, the vital principles, the clouds, the waters, the air-divine, the nourisher, as well as, above all, the Supreme Lord of the universe, the creator. 3

May all pervading Lord and lord of the divine wind who harms non give us felicity. May the blissful Lord, the bestower of riches give us joy. May the spiritual preceptors, the pair of physicians and surgeons, the architects and other intellectuals, be favourably disposed to our aspirations. 4

And may the adorable celestial company of the vital principles, grace our assembly devoted to sacred work, and may the Supreme Lord, provider of nourishment, the venerable, friendly and the maintainer of law and order guard and grant shelter to us. 5

And may the glorious mountains, the beneficent rivers, keep us safe from harm. May the gracious, the apportioner of wealth, come with abundance and protection. May this wide-pervading infinity hear my invocation. 6

May Nature's motherly bounties, help us of their own accord. May they so protect us, that we obtain vigorous children and abundant food. O mothers, the goddesses, whether terrestrial, or those in charge of the waters in the firmament, may you on our earnest invocation bestow upon us felicity. 7

उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥८॥

utá gnā́
vyantu devápatnīr indrāṇy àgnā́yy aṣvínī rā́ṭ | ā́ ródasī varuṇānī́ ṣriṇotu vyántu devī́r yá ṛitúr jánīnām || 8 ||

(४७) सप्तचत्वारिंशं सूक्तम्

(१–७) सप्तचत्वारिंशस्य सूक्तस्यात्रेय प्रतिरथ ऋषि । विश्वे देवा देवता । त्रिष्टुप् छन्द ।

॥१॥ प्रयुञ्जती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयन्ती ।
आविवासन्ती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना ॥१॥
अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तास उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः ॥२॥
उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥३॥
चत्वार ईं बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ॥४॥

47.

Prayuñjatī́ divá eti bruvāṇā́ mahī́ mātā́ duhitúr bodháyantī | āvívāsantī yuvatír manīshā́ pitṛíbhya ā́ sádane jóhuvānā || 1 || ajirā́sas tádapa ī́yamānā ātasthivā́ṅso amṛítasya nā́bhim | anantā́sa urávo viṣvátaḥ sīm pári dyā́vāpṛithivī́ yanti pánthāḥ || 2 || ukshā́ samudró arusháḥ suparṇáḥ pū́rvasya yónim pitúr ā́ viveṣa | mádhye divó nī́hitaḥ pṛíṣnir áṣmā ví cakrame rájasas pāty ántau || 3 || catvā́ra īm bibhrati kshemayánto dáṣa gárbhaṃ carā́se dhāpayante | tridhā́tavaḥ paramā́ asya gā́vo divás caranti pári sadyó ántān || 4 ||

And may Nature's motherly bounties accept the offering. May mother-lightning, mother-fire, mother-pair of healing bounties, mother-pair of earth and heaven and queen of waters, each of them hear our prayers. May the mothers-divine partake of our homage. May the motherly time-parameter, manifested in the sequence of seasons also accept our invocations. 8

47

Urging men to their labours, the adorable dawn, a great mother, comes from the heaven, she is the awakener of her daughter-earth; and is pious, ever young and glorified. She comes, when invoked, to the chamber of worship, with the protecting divine powers.

The rays of light, extending round, fulfilling their task of bringing on the day, abiding in contact with the orb of the immortal sun, unlimited and diffusive, spread everywhere through heaven and earth. 2

The showerer of rain, the shedder of dew, the radiant and the one of splendid wings,—such as the sun, has entered the region of the paternal east. The many-tinted and pervading luminary proceeds to both extremities of the firmament, and guards the two limits. 3

The four directions bear him up and seek their own welfare. The ten regions of space invigorate this babe to travel his daily course. His three-fold elementary rays swiftly traverse round the boundaries of the sky. 4

इदं वपुर्निवचनं जनासश्चरन्ति यन्नद्यस्तस्थुरापः ।
द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या३ सबन्धू ॥५॥
वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति ।
उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ ॥६॥
तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥७॥

idáṃ vápur nivácanaṃ janāsaṣ cáranti yán nadyàs tasthúr ā́paḥ | dvé yád īm bibhritó mātúr anyé ihéha jāté yamyā̀ sábandhū || 5 || ví tanvate dhíyo asma ápāṅsi vástrā putrā́ya mātáro vayanti | upaprakshé vríshaṇo módamanā divás pathā́ vadhvò yanty ácha || 6 || tád astu mitrāvaruṇā tád agne ṣáṃ yór asmábhyam idám astu ṣastám | aṣīmáhi gādhám utá pratishṭhā́ṃ námo divé brihaté sádanāya || 7 ||

(४८) अष्टचत्वारिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यात्रेय प्रतिभानुर्ऋषि । विश्वे देवा देवता । जगती छन्दः ॥

॥२॥ कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।
आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥१॥
ता अत्नत वयुनं वीरवक्षणं समान्या वृतया विश्वमा रजः ।
अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः ॥२॥

48.

Kád u priyā́ya dhā́mne manāmahe svákshatrāya sváyaṣase mahé vayám | āmenyásya rájaso yád abhrá ā́ñ apó vriṇāná vitanóti māyínī || 1 || tā́ atnata vayúnaṃ vīrávakshaṇaṃ samānyā́ vritáyā víṣvam ā́ rájaḥ | ápo ápācīr áparā ápejate prá pū́rvābhis tirate devayúr jánaḥ || 2 ||

O men, indescribable is the mystic knowledge: who can say from whence the rivers flow, and where the waters dwell; how the visible two (day and night), associated and closely united, support the mother (i.e. the mother of the sun), who herself is invisible ? 5

For him worshippers lengthen praises and works of adoration, and for him mothers (cosmos) sew garments of rays. Rejoicing in the contact of their impregnation, the rays, the consorts, of the sun, come to our presence, by the path of the sky, to meet him. 6

May this our praise, O Lord of light and bliss, be appreciated by you. May it, O adorable Lord, be valued by you, as the means of health and happiness to us. May we then obtain depth (of life) and stability. We offer reverence to the vast celestial region. 7

48

How and when shall we offer adoration to the great resplendent dear to all, self-renowned, self-sovereign, and who, as the master of cosmic intelligence, investing heavens, spreads the waters above the clouds over the immeasurable firmament. 1

These dawns diffuse the consciousness, that gives strength to pious men and overspread the whole world with uniform light. The devout man does not worry about the dawns which have disappeared and those which are yet to come, but he lengthens the field of action with those that are before him. 2

आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि ।
शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयन्तो वि च वर्तयन्नहा ॥३॥
तामस्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः ।
सचा यदि पितुमन्तमिव क्षयं रत्नं दधाति भरहूतये विशे ॥४॥
स जिह्वया चतुरनीक ऋञ्जते चारु वसानो वरुणो यतन्नरिम् ।
न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यम् ॥५॥

á grávabhir ahanyèbhir aktúbhir várishṭhaṃ vájram á jigharti māyíni | ṣatáṃ vā yásya pracáran své dáme saṃvartáyanto ví ca vartayann áhā || 3 || tám asya rītím paraṣór iva práty ánīkam akhyam bhujé asya várpasaḥ | sácā yádi pitumántam iva ksháyaṃ rátnaṃ dádhāti bhárahūtaye viṣé || 4 || sá jihváyā cáturanīka ṛiñjate cáru vásāno váruṇo yátann arím | ná tásya vidma purushatvátā vayáṃ yáto bhágaḥ savitá dáti váryam || 5 ||

(४९) एकोनपञ्चाशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्यात्रेय प्रतिप्रभ ऋषिः । विश्वे देवा देवताः । त्रिष्टुप् छन्दः ॥

॥३॥ देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः ।
आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन् ॥१॥
प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सवितारं दुवस्य ।
उप ब्रुवीत नमसा विजानञ्ज्येष्ठं च रत्नं विभजन्तमायोः ॥२॥

49.

Deváṃ vo adyá savitáram éshe bhágaṃ ca rátnaṃ vibhájantam āyóḥ | á vāṃ narā purubhujā vavṛityāṃ divédive cid aṣvina sakhīyán || 1 || práti prayáṇam ásurasya vidván sūktaír deváṃ savitáraṃ duvasya | úpa bruvīta námasā vijānáñ jyéshṭhaṃ ca rátnaṃ vibhájantam āyóḥ || 2 ||

The resplendent sun, whose hundred rays attend in his own abode, drives the days afar and brings the revolving days back again. Animated by the libations offered by day and by night, the sun sharpens his vast bolt of rays against the beguiler, the cloudy darkness. 3

I know the form of that fire-divine which is like an axe's edge. His resplendent form is designed for the welfare of mankind. To the man, who invokes him in struggle, he gives such opulence, as is like a dwelling place, full of precious treasure. 4

Blazing with his fiery tongue in the four quarters, and wearing beautiful lustre, the venerable proceeds onwards, dispelling darkness. With our human limitations, we would never know the omnipotency of the gracious supreme creator, whereby He bestows his blessings. 5

49

Today, I approach the divine gracious creator, who allots the gracious treasure amongst men. O the fast moving twins, the leading divines, conferrers of all enjoyable things, seeking your friendship, I call on you every day. 1

Knowing fully well the approach of the expeller (of darkness), i.e. the time of sunrise may you worship the divine creator with holy hyms and praises. Let him, who rightly knows, speak with reverence to him who distributes precious treasures amongst men. 2

अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्रः ।
इन्द्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयन्त दस्माः ॥३॥
तन्नो अनर्वा सविता वरूथं तत्सिन्धव इषयन्तो अनु ग्मन् ।
उप यद्वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः ॥४॥
प्र ये वसुभ्य ईवदा नमो दुर्ये मित्रे वरुणे सूक्तवाचः ।
अवैत्वभ्वं कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम ॥५॥

adatrayā́ dayate vā́ryāṇi pūshā́ bhágo áditir vásta usráḥ | índro víshṇur váruṇo mitró agnír áhāni bhadrā́ janayanta dasmā́ḥ || 3 || tán no anarvā́ savitā́ várūthaṃ tát síndhava isháyanto ánu gman | úpa yád vóce adhvarásya hótā rāyáḥ syāma pátayo vā́jaratnāḥ || 4 || prá yé vásubhya ī́vad ā́ námo dúr yé mitré váruṇe sūktávācaḥ | ávaitv ábhvaṃ kṛiṇutā́ várīyo divásprithivyór ávasā madema || 5 ||

(५०) पञ्चाशं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्यात्रेयः स्वस्त्यात्रेय ऋषिः । विश्वे देवा देवता । (१–४) प्रथमादिचतुर्ऋचामनुष्टुप्, (५) पञ्चम्याश्च पङ्क्तिश्छन्दसी ॥

॥४॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥१॥
ते ते देव नेतर्ये चेमाँ अनुशसे ।
ते राया ते ह्याऽऽपृचे सचेमहि सचथ्यैः ॥२॥
अतो न आ नॄनतिथीनतः पत्नीर्दशस्यत ।
आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः ॥३॥

50.

Víṣvo devásya netúr márto vurīta sakhyám | víṣvo rāyá ishudhyati dyumnáṃ vriṇīta pushyáse || 1 || té te deva netar yé cemā́n anuṣáse | té rāyā́ té hy ā̀príce sácemahi sacathyaìḥ || 2 || áto na ā́ nrī́n átithīn átaḥ pátnīr daṣasyata | ā́ré víṣvam patheshṭhā́ṃ dvishó yuyotu yū́yuviḥ || 3 ||

The nourisher, the gracious, the infinite Lord, whose garb is splendour, bestows the excellent viands. Lord, the resplendent, the omnipresent, the venerable, the friendly, and adorable gives birth to auspicious days. 3

May the invincible creator grant us the covetable wealth, and may the flowing rivers hasten to convey it to us, for which I, the ministering priest of worship, repeat pious praises. Affluent in food, may we be the lords of wealth and rich treasures. 4

May ample wealth be granted to those, who present homage to the Lord of wealth and comforts, and to those, who have repeated praises to the Lord of light and bliss. O divines grant them uninterrupted happiness. May we all rejoice through the grace of heaven and earth. 5

50

Let every man solicit the friendship of the divine leader. Each one seeks glory and obtains affluence through his grace. 1

O divine leader, those who serve you are yours and the others too who serve the divine powers. We are sure both of them would be blessed with opulence and may the aspirations of all of us be fulfilled. 2

Therefore, serve the leaders of our sacred works, like guests, and also honour their wives. May the divine discriminator drive to a distance every adversary, and all who block our way. 3

यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः ।
नृमणा वीरपस्त्योऽर्णा धीरेव सनिता ॥४॥
एष ते देव नेता रथस्पतिः शं रयिः ।
शं राये शं स्वस्तय इषःस्तुतो मनामहे देवस्तुतो मनामहे ॥५॥

yátra vahnir abhíhito dudrávad drónyaḥ paśúḥ | nṛimáṇā vīrápastyó 'rṇā dhíreva sánitā || 4 || eshá te deva netā ráthaspátiḥ śáṃ rayíḥ | śáṃ rāyé śáṃ svastáya ishastúto manāmahe devastúto manāmahe || 5 ||

(५१) एकपञ्चाशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्यात्रेयः स्वस्त्यात्रेय ऋषिः । (१-३, ८-१५) प्रथमादितृचस्याष्टम्याद्यष्टर्चाश्च विश्वे देवाः, (४, ६-७) चतुर्थ्याः षष्ठीसप्तम्योश्चेन्द्रवायू, (५) पञ्चम्याश्च वायुर्देवताः । (१-४) प्रथमादिचतुरृचां गायत्री, (५-१०) पञ्चम्यादिषण्णामुष्णिक्, (११-१३) एकादश्यादितृचस्य जगती त्रिष्टुब् वा (१४-१५) चतुर्दशीपञ्चदश्योश्चानुष्टुप् छन्दांसि ॥

अग्ने सुतस्य पीतये विश्वैरूमेभिरा गहि । देवेभिर्हव्यदातये ॥१॥
ऋतधीतय आ गत सत्यधर्माणो अध्वरम् । अग्नेः पिबत जिह्वया ॥२॥
विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि । देवेभिः सोमपीतये ॥३॥
अयं सोमश्चमू सुतोऽमत्रे परि षिच्यते । प्रिय इन्द्राय वायवे ॥४॥
वायवा याहि वीतये जुषाणो हव्यदातये । पिबा सुतस्यान्धसो अभि प्रयः ॥५॥

51.

Ágne sutásya pītáye víśvair ū́mebhir ā́ gahi | devébhir havyádātaye || 1 || ṛ́tadhītaya ā́ gata sátyadharmāṇo adhvarám | agnéḥ pibata jihváyā || 2 || víprebhir vipra santya prātaryā́vabhir ā́ gahi | devébhiḥ sómapītaye || 3 || ayáṃ sómaś camū́ sutó 'matre pári shicyate | priyá índrāya vāyáve || 4 || vā́yav ā́ yāhi vītáye jushāṇó havyádātaye | píbā sutásyándhaso abhí práyaḥ || 5 ||

Where fire is set and swiftly runs the cow's milk and butter, placed in the vessel, there the Lord, friendly to men, like the benevolent household wife, gives special opulence of dwellings and children. 4

O Lord, the divine leader, may your protecting chariot, laden with riches, be blessed to us,—blessed to us for wealth and well. We glorify him for well-being, peace and prosperity. We, the devout worshippers, adore him. 5

51

Come, O adorable Lord, with all your divine protecting measures, to accept our devotional love and to grant blessings. 1

Come to our sacred work and worship, O possessors of divine wisdom, and performers of righteous deeds. May you relish our love, as the ritual fire consumes oblation with tongue like flames. 2

O wise and ever gracious Lord, come to accept our devotional love with those wise and virtuous divine forces, who move from the early morning. 3

This loving devotion is expressed as if effused into the ladles and poured forth into the vase of heart, acceptable to resplendent Lord of cosmic vitality. 4

Come, O Lord of vitality, propitious to the offerer of homage, to accept our devotional love, as one drinks the extracts of foods and relishing herbs. 5

॥६॥ इन्द्रश्च वायवेषां सुतानां पीतिमर्हथः । ताञ्जुषेथामरेपसावभि प्रयः ॥६॥
सुता इन्द्राय वायवे सोमासो दध्याशिरः । निम्नं न यन्ति सिन्धवोऽभि प्रयः ॥७॥
सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः । आ याह्यग्ने अत्रिवत्सुते रण ॥८॥

índras ca vāyav eshām sutánām pītím arhathaḥ | táñ jushethām arepásāv abhí práyaḥ || 6 || sutá índrāya vāyáve sómāso dádhyāṣiraḥ | nimnám ná yanti síndhavo 'bhí práyaḥ || 7 || sajúr víṣvebhir devébhir aṣvíbhyām ushásā sajúḥ | á yāhy agne atrivát sutè raṇa || 8 ||

सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना । आ याह्यग्ने अत्रिवत्सुते रण ॥९॥
सजूरादित्यैर्वसुभिः सजूरिन्द्रेण वायुना । आ याह्यग्ने अत्रिवत्सुते रण ॥१०॥

sajúr mitrávárunābhyām sajúḥ sómena víshṇunā | á yāhy — || 9 || sajúr ādityaír vásubhiḥ sajúr índreṇa vāyúnā | á yāhy — || 10 ||

॥३॥ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥११॥
स्वस्तये वायुमुप ब्रवामहे सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥१२॥

svastí no mimītām aṣvínā bhágaḥ svastí devy áditir anarváṇaḥ | svastí pūshá ásuro dadhātu naḥ svastí dyávāprithiví sucetúnā || 11 || svastáye vāyúm úpa bravāmahai sómam svastí bhúvanasya yás pátiḥ | bríhaspátim sárvagaṇam svastáye svastáya ādityáso bhavantu naḥ || 12 ||

You are, O resplendent Lord and Lord of vitality, ever worthy of accepting our drinks of devotional love. May you with all kindness cherish them fully, and accept the pleasant offerings also. 6

The devotional prayers, expressed with love and earnestness are poured out as if plant juices mixed with milk creams, to resplendent Lord, the Lord of vitality. May the sacrificial viands proceed to you as rivers flow to a lower level. 7

Accompanied by all the divine powers and accompanied by the twin divines, and by dawns, O adorable Lord, come and cherish our dedications and appreciations, like three fold free sage. 8

Associaied with cosmic light and plasma, also with the sun and moon, may you come, and cherish our dedications, O divine fire, like the three-fold-free sage. 9

Accompanied by the element of eternity and comforts, also accompanied by the elements of resplendence and of vitality, may you come and cherish our dedications, O fire divine, like the three fold free sage. 10

May the pair of twin-divines, the gracious Lord and the divine eternity, contribute to our prosperity. May the irresistible sun, the scatterer of light and the dispenser of darkness, bestow upon us prosperity. May the most vital heaven and earth vouch safe us happiness. 11

We glorify Lord of vitality for prosperity—Lord of bliss for prosperity, who is the protector of world. We praise the Supreme Lord, associated with all divine powers. May the radiant rays of all the suns and luminaries bring us health and happiness. 12

विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥१३॥
स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥१४॥
स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नता जानता सं गमेमहि ॥१५॥

víșve devá no adyá svastáye vaișvānaró vásur agníḥ svastáye | devá avantv ṛibhávaḥ svastáye svastí no rudráḥ pātv áṅhasaḥ || 13 || svastí mitrāvaruṇā svastí pathye revati | svastí na índraș cāgníș ca svastí no adite kṛidhi || 14 || svastí pánthām ánu carema sūryācandramásāv iva | púnar dádatághnatā jānatá sám gamemahi || 15 ||

(५२) द्विपञ्चाशं सूक्तम्

(१-१७) सप्तदशर्चस्यास्य सूक्तस्यात्रेय श्यावाश्व ऋषिः । मरुतो देवताः । (१-५, ७-१५) प्रथमादिपञ्चर्चां सप्तम्यादिनवानाञ्चानुष्टुप्, (६, १६-१७) षष्ठ्याः षोडशी-सप्तदश्योश्च पङ्क्तिश्छन्दसी ॥

॥८॥

प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः ।
ये अद्रोघमनुष्वधं श्रवो मदन्ति यज्ञियाः ॥१॥
ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया ।
ते यामन्ना धृषद्विनस्त्मना पान्ति शश्वतः ॥२॥

52.

Prá șyāvāșva dhṛishṇuyárcā marúdbhir ṛíkvabhiḥ | yé adrohám anushvadhám șrávo mádanti yajñíyāḥ || 1 || té hí sthirásya șávasaḥ sákhāyaḥ sánti dhṛishṇuyá | té yámann á dhṛishadvínas tmánā pānti șáșvataḥ || 2 ||

May all the divine powers be with us today for our prosperity. May the divine fire, the benefactor of all men, and giver of dwellings, be with us, for our prosperity. May the divine wise sages protect us for our prosperity. May the fear of the Lord of terror keep us off from crimes and calamity. 13

May the Lord of light and bliss grant us prosperity. May the guiding spirit of firmament and the goddess of riches, grant us prosperity. May the adorable and resplendent Lord prosper us. And O the spirit of indivisible fullness bestow prosperity upon us. 14

May we ever pursue our path of prosperity like the sun and moon; may we move in full cooperation in mutual give and take, without causing injury to each other, and in the mutual right understanding. 15

52

O divine winds, moving speedily along the brown clouds as if riding on such horses, and associated with the praise-deserving vital principles, sing boldly the glory of those who are holy on their own accounts and who enjoy their reputation, free from guile. 1

For, in their boldness, they are the firm friends of steady and sure vigour. They are, in their course, resolute and guard innumerable men with willingness and pleasure. 2

ते स्यन्द्रासो नोक्षणोऽति ष्कन्दन्ति शर्वरीः ।
मरुतामधा महो दिवि क्षमा च मन्महे ॥३॥
मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।
विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ॥४॥
अर्हन्तो ये सुदानवो नरो असामिशवसः ।
प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ॥५॥

té syandrā́so nókshaṇó 'ti shkandanti ṣárvarīḥ | marútām ádhā máho diví kshamā́ ca manmahe || 3 || marútsu vo dadhīmahi stómam yajñám ca dhrishṇuyā́ | víṣve yé mā́nushā yugā́ pā́nti mártyam risháḥ || 4 || árhanto yé sudā́navo náro ásāmiṣavasaḥ | prá yajñám yajñíyebhyo divó arcā marúdbhyaḥ || 5 ||

॥१॥ आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत ।
अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ॥६॥
ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ ।
वृजने वा नदीनां सधस्थे वा महो दिवः ॥७॥
शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसम् ।
उत स्म ते शुभे नरः प्र स्यन्द्रा युजत त्मना ॥८॥
उत स्म ते परुष्ण्यामूर्णा वसत शुन्ध्यवः ।
उत पव्या रथानामद्रिं भिन्दन्त्योजसा ॥९॥

ā́ rukmaír ā́ yudhā́ nára rishvā́ rishṭír asrikshata | ánv enā́ñ áha vidyúto marúto jájhjhatīr iva bhānúr arta tmánā diváḥ || 6 || yé vāvridhánta pā́rthivā yá urā́v antáriksha ā́ | vrijáne vā nadī́nām sadhásthe vā mahó diváḥ || 7 || ṣárdho mā́rutam úc chaṅsa satyáṣavasam ríbhvasam | utá sma té ṣubhé náraḥ prá syandrā́ yujata tmánā || 8 || utá sma té párushṇyām ū́rṇā vasata ṣundhyávaḥ | utá pavyā́ ráthānām ádrim bhindanty ójasā || 9 ||

Gliding along, and shedding moisture, they pass through the nights; therefore we now celebrate the might of these cloud bearing winds, manifested in both heaven and earth. 3

Let us earnestly offer praise and worship to the cloud-bearing winds, who through all ages of mankind have been protecting the mortal worshipper against calamities. 4

May you offer reverence to the adorable cloud bearing winds, who come from heaven, and are worthy of worship, who are munificent leaders, and possessors of unequalled strength. 5

The leaders (of rains) and the mighty divine winds, shine like soldier hurling javelins of gleaming gold. Following these divines winds, proceeds the lightning roaring from the sky, a splendour which spontaneously breaks forth. 6

The cloud-bearing winds who are close to the earth, are augmented, so are those who are in the vast firmament. They too wax who proceed along the rivers, and so those winds who move in the vast midspace. 7

Glorify the truth-invigorated and infinite strength of the cloud-bearing winds, for they, the leaders of the rains, gliding along, are working voluntarily for our good. 8

Whether they abide on the cumulus clouds, along with a river, or, purifying all, they clothe themselves with light, or whether they cleave the rock asunder with strength by the wheels of their chariots. 9

आपथयो विपथयोऽन्तस्पथा अनुपथाः ।
एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते ॥१०॥

ápathayo vípathayó 'ntaspathā ánupathāḥ | etébhir máhyam nắmabhir yajñám vishṭārá ohate || 10 ||

॥१०॥

अधा नरो न्योहतेऽधा नियुत ओहते ।
अधा पारावता इति चित्रा रूपाणि दर्श्या ॥११॥
छन्दःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः ।
ते मे के चिन्न तायव ऊमा आसन्दृशि त्विषे ॥१२॥
य ऋष्वा ऋष्टिविद्युतः कवयः सन्ति वेधसः ।
तमृषे मारुतं गणं नमस्या रमया गिरा ॥१३॥
अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणा ।
दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत ॥१४॥
नू मन्वान एषां देवाँ अच्छा न वक्षणा ।
दाना सचेत सूरिभिर्यामश्रुतेभिरञ्जिभिः ॥१५॥

ádhā náro ny òhaté 'dhā niyúta ohate | ádhā pā́rāvatā íti citrā́ rūpā́ṇi dárṣyā || 11 || chandastúbhaḥ kubhanyáva útsam ā́ kīríṇo nṛituḥ | té me ké cin ná tāyáva ū́mā āsan dṛiṣí tvishé || 12 || yá ṛishvā́ ṛishṭívidyutaḥ kaváyaḥ sánti vedhásaḥ | tám ṛishe mā́rutaṃ gaṇáṃ namasyā́ ramáyā girā́ || 13 || ácha ṛishe mā́rutaṃ gaṇáṃ dānā́ mitráṃ ná yoshā́ṇā | divó vā dhṛishṇava ójasā stutā́ dhībhír ishaṇyata || 14 || nū́ manvāná eshāṃ devā́ñ áchā ná vakshā́ṇā | dānā́ saceta sūríbhir yā́maṣrutebhir añjíbhiḥ || 15 ||

Whether, following the paths that lead to us, or that spread diversely, or those that sink into the hollows (of the mountains) or those that extend smoothly, they, however scattered, tend well the cosmic sacrifice for my benefit. 10

These leaders of the rains uphold the world, at one time blending together, whilst the other time remaining aloof, they are manifest in varied forms. 11

Singing hymns, seeking water, dancing and praising, they provide water as if from a well. Some of them move in secret like thieves, but only to help us, and some are splendid to behold. 12

Glorify, O sage, with grateful songs, the group of these clouds, who are bright with lightning lances, who are melodious like poets, and full of wisdom. 13

Approach, O sage, with offerings and with praise, the group of the clouds, as a maid goes to her friend. May you, O clouds, hasten here from heaven, bold in your strength, and glorified by our hymns. 14

Glorifying them promptly, may you go to them, who are like an escort of Nature's bounties. They are characterized by their wisdom, by their velocity, and by the generosity of distributing rewards. 15

प्र ये मे बन्ध्वेषे गां वोचन्त सूरयः पृश्निं वोचन्त मातरम् ।
अधा पितरमिष्मिणं रुद्रं वोचन्त शिक्वसः ॥१६॥
सप्त मे सप्त शाकिन एकमेका शता ददुः ।
यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ॥१७॥

prá yé me bandhveshé gắm vócanta sūráyaḥ príṣnim vocanta mātáram | ádhā pitáram ishmíṇam rudrám vocanta ṣíkvasaḥ || 16 || saptá me sapta sākína ékam-ekā ṣatā́ daduḥ | yamúnāyām ádhi ṣrutám ud rā́dho gávyam mṛije ní rā́dho áṣvyam mṛije || 17 ||

(५३) त्रिपञ्चाशं सूक्तम्

(१–१६) षोडशर्चस्यास्य सूक्तस्यात्रेयः श्यावाश्व ऋषिः । मरुतो देवताः । (१, ५, १०–११, १५) प्रथमा-पञ्चमीदशम्येकादशीपञ्चदशीनामृचां ककुभ् . (२) द्वितीयाया बृहती. (३) तृतीयाया अनुष्टुप् . (४) चतुर्थ्याः पुर उष्णिक्. (६–७, ९, १३–१४, १६) षष्ठीसप्तमीनवमीत्रयोदशीचतुर्दशी-षोडशीनां सतोबृहती. (८, १२) अष्टमीद्वादश्योश्च गायत्री छन्दांसि ॥

॥११॥ को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुताम् । यद्युयुज्रे किलास्यः ॥१॥
ऐतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ॥२॥
ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे ।
नरो मर्या अरेपस इमान्पश्यन्निति ष्टुहि ॥३॥

53.

Kó veda jā́nam eshām kó vā purā́ sumnéshv āsa marútām | yád yuyujré kilāsvàḥ || 1 || aítā́n rátheshu tasthúshaḥ káḥ ṣuṣrāva kathā́ yayuḥ | kásmai sasruḥ sudā́se ánv āpáya íḷābhir vṛishṭáyaḥ sahá || 2 || té ma āhur yá āyayúr úpa dyúbhir víbhir máde | nā́ro máryā arepása imā́n páṣyann íti shṭuhi || 3 ||

To me, inquiring of their kin, the sage—clouds have given an answer. They declare the earth to be their mother. And the same mighty ones declare the food-bestowing cosmic vitality to be their father. 16

May the seven times, seven all-potent clouds, aggregated as a single troop, bestow upon me hundred gifts. May I possess wealth of cows, renowned upon the banks of confluent channels. May I possess wealth of horses. 17

53

Who knows the birth of these cloud-bearing winds? Who has formerly been participant of the enjoyments of them, and when are the deer-like spotted waves yoked to their chariots? 1

When standing in their cars, who has heard them tell the way whither to go? Who is the liberal worshipper to whom their kindred rains descend with manifold food? 2

To me have they spoken whilst having come with radiance to cherish noble deeds. O leaders and heroes, free from blemishes or stain, whenever you behold them, admire and appreciate. 3

ये अञ्जिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु । श्राया रथेषु धन्वसु ॥४॥
युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः । वृष्टी द्यावो यतीरिव ॥५॥

yé añjíshu yé vấṣīshu svábhānavaḥ srakshú rukméshu khādíshu | ṣrāyấ rátheshu dhánvasu || 4 || yushmấkaṃ smā ráthāñ ánu mudé dadhe maruto jīradānavaḥ | vṛishṭí dyấvo yatír iva || 5 ||

॥१२॥

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ॥६॥
ततृदानाः सिन्धवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा ।
स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तन्त एन्यः ॥७॥
आ यात मरुतो दिव आन्तरिक्षादमादुत । मावं स्थात परावतः ॥८॥
मा वो रसानितभा कुभा क्रुमुर्मा वः सिन्धुर्नि रीरमत् ।
मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥९॥
तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम् । अनु प्र यन्ति वृष्टयः ॥१०॥

ấ yáṃ náraḥ sudánavo dadāṣúshe diváḥ kóṣam ácucyavuḥ | ví parjányaṃ sṛijanti ródasī ánu dhánvanā yanti vṛishṭáyaḥ || 6 || tatṛidānấḥ síndhavaḥ kshódasā rájaḥ prá sasrur dhenávo yathā | syannấ ásvā ivấdhvano vimócane ví yád vártanta enyàḥ || 7 || ấ yāta maruto divá ấntárikshād amấd utá | mấva sthāta parāvátaḥ || 8 || mấ vo rasấnitabhā kúbhā krúmur mấ vaḥ síndhur ní rīramat | mấ vaḥ pári shṭhāt saráyuḥ purīshíṇy asmé ít sumnám astu vaḥ || 9 || táṃ vaḥ ṣárdhaṃ ráthānāṃ tveshám gaṇám mấrutaṃ návyasīnām | ánu prá yanti vṛishṭáyaḥ || 10 ||

They the self-luminous, whilst arrayed in chariots, are decorated with ornaments, swords, and bows, breast-plates, bracelets, and wreaths. 4

I look upon your chariots, O munificent cloud-bearing wind with delight, like wandering lights in the rains. 5

These munificent heroes bring the heaven's treasury as if down to the earth for the benefit of the worshipper. They set the rain cloud free to stream through both the worlds and desert spots are flooded with rains. 6

The bursting torrents (from the clouds) overspread the firmament with water, as milch cows yield milk and just as swift horses hasten to their journey's resting place, the glittering brooks run in various directions. 7

Come, O cloud bearing winds, from heaven, from mid-air, or from near at hand. Tarry not far away from us. 8

Let not the dust nuclei, nor the indefinite variation of heat and light, neither the motion of the earth, nor the wide-roving ocean hold you back. Let not the fully flowing river oppose you on your way. May the happiness of yours be ours. 9

My appreciations of the brilliant group of cloud-bearing winds, who have the strength of the latest chariots, and whose appearance is followed by good rains. 10

शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः । अनु क्रामेम धीतिभिः ॥११॥
कस्मा अद्य सुजाताय रातहव्याय प्र ययुः । एना यामेन मरुतः ॥१२॥
येन तोकाय तनयाय धान्यं१ बीजं वहध्वे अक्षितम् ।
अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगम् ॥१३॥

ṣárdhaṃ-ṣardhaṃ va eshāṃ vrātaṃ-vrātaṃ gaṇáṃ-gaṇaṃ suṣastíbhiḥ | ánu krāmema dhītíbhiḥ || 11 || kásmā adyá sújātāya rātáhavyāya prá yayuḥ | enā́ yā́mena marútaḥ || 12 || yéna tokā́ya tánayāya' dhānyàm bī́jaṃ váhadhve ákshitam | asmábhyaṃ tád dhattana yád va ī́mahe rā́dho viṣvā́yu saúbhagam || 13 ||

अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः ।
वृष्ट्वी शं योरापं उस्रि भेषजं स्याम मरुतः सह ॥१४॥
सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः । यं त्रायध्वे स्याम ते ॥१५॥
स्तुहि भोजान्स्तुवतो अस्य यामनि रणन्गावो न यवसे ।
यतः पूर्वाँ इव सखीँरनु ह्वय गिरा गृणीहि कामिनः ॥१६॥

átīyāma nidás tiráḥ svastíbhir hitvā́vadyám árātīḥ | vrishṭvī́ ṣáṃ yór ā́pa usrí bheshajáṃ syā́ma marutaḥ sahá || 14 || sudeváḥ samahāsati suvī́ro naro marutaḥ sá mártyaḥ | yáṃ trā́yadhve syā́ma té || 15 || stuhí bhojā́n stuvató asya yā́mani ráṇan gā́vo ná yávase | yatáḥ pū́rvāñ iva sákhīñr ánu hvaya girā́ gṛiṇīhi kāmínaḥ || 16 ||

With praises and holy hymns, may we follow and greet your moving army unit by unit, troop by troop and band by band. 11

To what nobly-born and oblation-giving worshipper are the clouds proceeding on this course today. 12

With the same grace that you bestow imperishable grain-seed upon the sons or grandsons, may you bestow it upon us, that for we implore of you the life-sustaining auspicious bliss. 13

O cloud-bearing winds, may we overcome our crooked and reviling adversaries, dispelling evils, with goodwill. And may we through rain be blessed with unmixed happiness, water, cattle, and curative herbs. 14

O leading cloud-bearing winds, verily that mortal shall be favoured by the divine powers, and blessed with progeny, whom you protect. May we also be graced with that blessing. 15

Praise the givers of enjoyment, at the holy place of worshipper, for they delight in pious praise just as cows enjoy the barley-husk. So let them come close to you, as if your old friends; praise them with songs, as they love adoration. 16

(५४) चतुष्पञ्चाशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्यात्रेयः श्यावाश्व ऋषिः । मरुतो देवताः । (१-१३, १५) प्रथमादित्रयोदशर्चां पञ्चदश्याश्च जगती, (१४) चतुर्दश्याश्च त्रिष्टुप् छन्दसी ॥

॥१४॥ प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते ।
घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत ॥१॥
प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः ।
सं विद्युता दधति वाशति त्रितः स्वरन्त्यापोऽवना परिज्रयः ॥२॥
विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वतच्युतः ।
अब्दया चिन्मुहुरा ह्रादुनीवृतः स्तनयदमा रभसा उदोजसः ॥३॥

54.

Prá ṣárdhāya mā́rutāya svábhānava imā́ṃ vā́cam anajā parvatacyúte | gharmastúbhe divá ā́ prishṭhayájvane dyumnáṣravase máhi nrimṇám arcata || 1 || prá vo marutas tavishā́ udanyávo vayovrídho aṣvayújaḥ párijrayaḥ | sáṃ vidyútā dádhati vā́ṣati tritáḥ sváranty ā́po 'vánā párijrayaḥ || 2 || vidyúnmahaso náro áṣmadidyavo vā́tatvisho marútaḥ parvatacyútaḥ | abdayā́ cin múhur ā́ hrādunīvríta stanáyadamā rabhasā́ údojasaḥ || 3 ||

व्यक्तून्रुद्रा व्यहानि शिक्वसो व्यन्तरिक्षं वि रजांसि धूतयः ।
वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ॥४॥
तद्वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनम् ।
एता न यामे अगृभीतशोचिषोऽनश्वदां यन्न्ययातना गिरिम् ॥५॥

vy àktū́n rudrā vy áhāni ṣikvaso vy àntárikshaṃ ví rájāṅsi dhūtayaḥ | ví yád ájrāñ ájatha nā́va īṃ yathā ví durgā́ṇi maruto nā́ha rishyatha || 4 || tád vīryàṃ vo maruto mahitvanáṃ dīrgháṃ tatāna sū́ryo ná yójanaṃ | étā ná yā́me ágribhītaṣocishó 'naṣvadāṃ yán ny áyātanā girím || 5 ||

54

Offer praise to the group of the cloud-bearing winds, who are self-irradiating, who can cast the mountains down. May you present liberal oblations to the illustrious divine winds, who absorb the heat; to those who come from the sky, for sacred acts; and to the givers of abundant food. 1

O cloud-bearing winds, your troops are rich in water; they are strengtheners of life, and are your strong bonds; they shed water and augment food, and are harnessed with steads (waves) that wander far and spread everywhere. Combined with lightning, the triple-group (of wind, cloud and lightning) roars aloud, and the circumambient waters fall upon the earth. 2

The clouds appear gleaning with lightning; they are leaders (of rain) armed with adamantine weapons, blazing with the wind and are the over-throwers of mountains; they further are the repeated distributors of water and wielders of the thunder-bolt. Roaring in concert, they send rain, and are of exceeding strength. 3

O powerful cosmic winds, you terribly upset nights and days, you violently shake the firmament and the worlds. You toss the clouds like ships on the sea and you throw down the strongholds of enemy. But, O vital principles you even then do no harm. 4

Your glory, O cloud-winds, is spread far and wide like the sun extending his radiance. Even without hopes, you travel fast on your courses with unbounded lustre, you cleave those clouds which withhold water. 5

॥१५॥ अभ्राजि शर्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः ।
अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यन्तमनु नेषथा सुगम् ॥६॥
न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति ।
नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ॥७॥

ábhrāji ṣárdho maruto yád arṇasám móshathā vṛikshám kapanéva vedhasaḥ | ádha smā no arámatiṃ sajoshasaṣ cákshur iva yántam ánu neshathā sugám || 6 || ná sá jīyate maruto ná hanyate ná sredhati ná vyathate ná rishyati | nā́sya rā́ya úpa dasyanti nótáya ṛíshiṃ vā yáṃ rā́jānaṃ vā súshūdatha || 7 ||

नियुत्वन्तो ग्रामजितो यथा नरोऽर्यमणो न मरुतः कबन्धिनः ।
पिन्वन्त्युत्सं यदिनासो अस्वरन्व्युन्दन्ति पृथिवीं मध्वो अन्धसा ॥८॥
प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः ।
प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः ॥९॥
यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः ।
न वोऽश्वाः श्रथयन्ताह सिस्रतः सद्यो अस्याध्वनः पारमश्नुथ ॥१०॥

niyútvanto grāmajíto yáthā náro 'ryamáṇo ná marútaḥ kabandhínaḥ | pínvanty útsaṃ yád inā́so ásvaran vy ùndanti pṛithivím mádhvo ándhasā || 8 || pravátvatīyám pṛithiví marúdbhyaḥ pravátvatī dyaúr bhavati prayádbhyaḥ | pravátvatīḥ pathyā̀ antárikshyāḥ pravátvantaḥ párvatā jīrádānavaḥ || 9 || yán marutaḥ sabharasaḥ svarṇaraḥ sū́rya údite mádathā divo naraḥ | ná vó 'ṣvāḥ ṣrathayantáha sísrataḥ sadyó asyā́dhvanaḥ pārám aṣnutha || 10 ||

O cloud-bearing winds, dispensers of rain, your strength is manifested, when, you shake the water-laden clouds, and make them loose the shower. Conjointly propitiated, may you conduct us by an easy path leading to prosperity, as the eye guides the way. 6

The sage, or the sovereign, whom you, O divine wind, direct, is never overcome nor slain. He does not perish, nor suffers pain, nor undergoes injury, nor are his riches or his safety imperilled. 7

These lords of speedy waves, over-comers of multitudes, leaders (of rites), radiant as the ordainers, are the dispensers of water. These loud-sounding sovereign lords fill the clouds, and moisten the earth with sweet watery sustenance. 8

This earth becomes widely extended for the cloud-bearing winds, the heaven becomes spacious for the spreading clouds. The paths of the mid-space become wide extended to provide way to their course. The expanding clouds quickly bestow (their gifts). 9

O clouds of combined strength, leaders and divine guides to the goal of happiness, you are delighted, when the sun has risen up. Then may your rapid waves know no relaxation, but quickly reach the limits of this road. 10

॥२६॥ अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः ।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ॥११॥
तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ ।
समच्यन्त वृजनातित्विषन्त यत्स्वरन्ति घोषं विततमृतायवः ॥१२॥
युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः ।
न यो युच्छति तिष्यो३ यथा दिवो३ऽस्मे रारन्त मरुतः सहस्रिणम् ॥१३॥

áṅseshu va ṛishṭáyaḥ patsú khādáyo vákshassu rukmā́ maruto ráthe ṣúbhaḥ | agníbhrājaso vidyúto gábhastyoḥ ṣíprāḥ ṣīrshásu vítatā hiraṇyáyīḥ || 11 || táṃ nā́kam aryó ágṛibhītaṣocishaṃ rúṣat píppalam maruto ví dhūnutha | sám acyanta vṛijánātitvishanta yát sváranti ghóshaṃ vítatam ṛitāyávaḥ || 12 || yushmā́dattasya maruto vicetaso rāyáḥ syāma rathyò váyasvataḥ | ná yó yúchati tishyò yáthā divò 'smé rāranta marutaḥ sahasríṇam || 13 ||

यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रम् ।
यूयमर्वन्तं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम् ॥१४॥
तद्वो यामि द्रविणं सद्यऊतयो येना स्व१र्ण ततनाम नॄँरभि ।
इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥१५॥

yūyáṃ rayím maruta spārhávīraṃ yūyám ṛíshim avatha sā́mavipram | yūyám árvantam bharatā́ya vā́jaṃ yūyáṃ dhattha rā́jānaṃ ṣrushṭimántam || 14 || tád vo yāmi dráviṇaṃ sadyaūtayo yénā svàr ṇá tatánāma nṝ́ñr abhí | idáṃ sú me maruto haryatā váco yásya tárema tárasā ṣatáṃ hímāḥ || 15 ||

Lances gleam, O clouds, upon your shoulders, anklets on your feet, golden chains are on your breasts, and purity shines in your chariots, lightnings blazing with fire glow in your hands, and golden tiaras are laid upon your heads. 11

O clouds, when moving, you shake the vault of splendid heaven beyond conception, and stir the bright water. When you combine your energies and shine brilliantly, and when purposing to send forth the rain you utter aloud shout. 12

O most wise cloud-bearing winds, may we, be the drivers of the car of riches, full of life, that have been bestowed by you. Let that wealth in thousands dwell with us, which never vanishes like the sun or the *tisya* constellation (eighth lunar mansion) in the sky. 13

You bestow, O clouds, wealth and enviable posterity; you offer protection to the Seer, learned in the chanting of verses. You grant vitality and nutrition to the enlightened priests; you provide prosperity to a prince even. 14

Therefore do I solicit wealth of you, from those who are prompt to grant protection, whereby we may multiply our descendants, as the sun spreads wide his rays. Be propitiated O divine clouds, and accept graciously this hymn of mine, so that by the efficacy whereof, may we pass over hundred winters. 15

(५५) पञ्चपञ्चाशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्यात्रेयः श्यावाश्व ऋषिः । मरुतो देवता । (१-९) प्रथमादिनवर्चां जगती, (१०) दशम्याश्च त्रिष्टुप् छन्दसी ॥

॥१७॥ प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः ।
ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत ॥१॥
स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ ।
उतान्तरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत ॥२॥
साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः ।
विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत ॥३॥

55.

Práyajyavo marúto bhrā́jadṛishṭayo bṛihád vā́yo dadhire rukmávakshasaḥ | ī́yante áṣvaiḥ suyámebhir āṣúbhiḥ ṣúbham yātā́m ánu ráthā avṛitsata || 1 || svayáṃ dadhidhve távishīṃ yáthā vidá bṛihán mahānta urviyā́ ví rājatha | utántárikshaṃ mamire vy ójasā ṣúbhaṃ yātā́m — || 2 || sākáṃ jātā́ḥ subhvàḥ sākám ukshitā́ḥ ṣriyé cid ā́ pratarā́ṃ vāvṛidhur náraḥ | virokíṇaḥ sū́ryasyeva raṣmáyaḥ ṣúbhaṃ yātā́m — || 3 ||

आभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणम् ।
उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत ॥४॥
उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ॥५॥

· ābhūshéṇyaṃ vo maruto mahitvanáṃ didṛikshéṇyaṃ sū́ryasyeva cákshaṇam | utó asmā́ñ amṛitatvé dadhātana ṣúbhaṃ yātā́m — || 4 || úd īrayathā marutaḥ samudrató yūyáṃ vṛishṭíṃ varshayathā purīshiṇaḥ | ná vo dasrā úpa dasyanti dhenávaḥ ṣúbhaṃ yātā́m — || 5 ||

55

The adorable cloud-bearing winds, armed with bright lances and with their breasts adorned with gold rushing onwards hold vigorous existence. They move on swift, well-controlled horses. May their chariots incessantly move onward when they proceed for our welfare. 1

O clouds, you yourself maintain vigour according to your judgment. You shine most widely and majestically. You pervade the mid-air with your power. May their chariots incessantly move onward when they proceed for our welfare. 2

These simultaneously formed mighty clouds, co-dispensers of moisture, grow to great majesty. They are leaders, and resplendent, as the rays of the sun. May their chariots incessantly move onward when they proceed for our welfare. 3

Your mightiness, O clouds, deserves to be adorned. A visit to you is worthy to be longed for, for your beauty is like the orb of the sun. So, lead us with your aid to immortality. May their chariots incessantly move onward when they proceed for our welfare. 4

O cloud-bearing winds, you uplift waters from the ocean and charged with moisture, you shower down the rain. O destroyers of foes, your milch kine are never dry. May their chariots incessantly move onward, when they proceed for our welfare. 5

॥१८॥ यदश्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यत्काँ अमुग्ध्वम् ।
विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ॥६॥
न पर्वता न नद्यो वरन्त वो यत्राचिध्वं मरुतो गच्छथेदु तत् ।
उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत ॥७॥
यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते ।
विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत ॥८॥

yád áṣvān dhūrshú príshatīr áyugdhvam hiraṇyáyān práty átkāñ ámugdhvam | víṣvā ít sprídho maruto vy àsyatha ṣúbham yātám — || 6 || ná párvatā ná nadyò varanta vo yátrácidhvam maruto gáchathéd u tát | utá dyávāprithiví yāthanā pári ṣúbham yātám — || 7 || yát pūrvyám maruto yác ca nūtanam yád udyáte vasavo yác ca ṣasyáte | víṣvasya tásya bhavathā návedasaḥ ṣúbham yātám — || 8 ||

मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यन्तन ।
अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत ॥९॥
यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः ।
जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम् ॥१०॥

mriḷáta no maruto má vadhishṭanāsmábhyam ṣárma bahulám ví yantana | ádhi stotrásya sakhyásya gātana ṣúbham yātám — || 9 || yūyám asmán nayata vásyo áchā nír aṅhatíbhyo maruto griṇānáḥ | jushádhvam no havyádātim yajatrā vayám syāma pátayo rayīṇám || 10 ||

When you yoke your spotted draught-animals (or tracting motors) to the poles of your chariots, you put your golden mantles on, O cloud-bearing winds, you disperse all hostile elements. May their chariots incessantly move onward when they proceed for our welfare. 6

Let not the mountains, let not the rivers keep you back; whither you resolve to go, O clouds, thither you proceed, and compass heaven and earth. May their chariots incessantly move onward when they proceed for our welfare. 7

O cloud-bearing winds, whatever is old, whatever is of recent time, whatever is recited, O Lords of comforts, whatever prayer is repeated, may you take cognizant of all that. May the chariots incessantly move onward when they proceed for our welfare. 8

Be gracious unto us, O cloud-bearing winds; harm us not, extend unto us uninterrupted happiness. May you pay due regards unto our friendship and our praise. May the chariots incessantly move onward when they proceed for our welfare. 9

May you, O cloud-bearing winds, propitiated by our praise, lead us to opulence. May you extricate us from sin. Accept, O adorable clouds, our offered oblation. And may we be the possessors of abundant riches. 10

(५६) षट्पञ्चाशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्यात्रेयः श्यावाश्व ऋषिः । मरुतो देवताः । (१-२, ४-६, ८-९) प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्यादितृचस्याष्टमीनवम्योश्च बृहती, (३, ७) तृतीयासप्तम्योश्च सतोबृहती छन्दसी ॥

॥१९॥

अग्ने शर्धन्तमा गणं पिष्टं रुक्मेभिरञ्जिभिः ।
विशो अद्य मरुतामव ह्वये दिवश्चिद्रोचनादधि ॥१॥
यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः ।
ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः ॥२॥

56.

Ágne ṣárdhantam ā́ gaṇám pishṭám rukmébhir añjíbhiḥ | víṣo adyá marútām áva hvaye diváṣ cid rocanā́d ádhi || 1 || yáthā cin mányase hṛidā́ tád ín me jagmur āṣásaḥ | yé te nédishṭhaṃ hávanāny āgáman tā́n vardha bhīmásaṃdṛiṣaḥ || 2 ||

मीळ्हुष्मतीव पृथिवी पराहता मदन्त्येत्यस्मदा ।
ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः ॥३॥
नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः ।
अश्मानं चित्स्वर्यं पर्वतं गिरिं प्र च्यावयन्ति यामभिः ॥४॥
उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानाम् ।
मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये ॥५॥

mīḻhúshmatīva pṛithivī́ párāhatā mádanty ety asmád ā́ | ṛíksho ná vo marutaḥ ṣímīvāñ ámo dudhró gaúr iva bhīmayúḥ || 3 || ní yé riṇánty ójasā vṛíthā gā́vo ná durdhúraḥ | áṣmānaṃ cit svaryàm párvataṃ girím prá cyāvayanti yā́mabhiḥ || 4 || út tishṭha nūnám eshāṃ stómaiḥ sámukshitānām | marútām purutámam ápūrvyaṃ gávāṃ sárgam iva hvaye || 5 ||

56

O adorable God, I invoke the victorious group of divine impulses decorated with brilliant enlightenment, to descend today from the luminous realm of innermost consciousness. 1

In whatever manner you honour them in your heart, may they come to me as benefactors. May you strengthen those impulses, frustrating and fierce in the first appearance, who most promptly come to your invocations. 2

As persons on this earth ruled by powerful Lord, have recourse to him when oppressed, so comes the host of divine impulses clouds exulting to us. O impulses, your group, active as fire, is as difficult to be resisted as a formidable bull. 3

These, the divine impulses, who with mighty prowess over-throw evil ideas, like bulls difficult to be restrained, cause even the heavenly stone to shake,—may you shake the rocky mountains as these (impulses) rush on with speed. 4

Rise up, O divine impulses. Verily, by my praises, I invoke the mighty and unpreceded troop of these exalted group of impulses, strong like a herd of kine. 5

॥२०॥ युङ्ग्ध्वं ह्यरुषी रथे युङ्ग्ध्वं रथेषु रोहितः ।
युङ्ग्ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥६॥
उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः ।
मा वो यामेषु मरुतश्चिरं करत्प्र तं रथेषु चोदत ॥७॥
रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।
आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥८॥
तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ।
यस्मिन्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ॥९॥

yuñgdhvám̱ hy árushī ráthe yuñgdhvám̱ rátheshu rohítaḥ | yuñgdhvám̱ hárī ajirá dhurí vólhave váhishṭhā dhurí vólhave || 6 || utá syá vājy àrushás tuvishváṇir ihá sma dhāyi darṣatáḥ | mā́ vo yā́meshu marutaṣ cirám̱ karat prá tám̱ rátheshu codata || 7 || rátham̱ nú mā́rutam̱ vayám̱ ṣravasyúm ā́ huvāmahe | ā́ yásmin tasthaú suráṇāni bíbhratī sácā marútsu rodasí || 8 || tám̱ vaḥ ṣárdham̱ rathesúbham̱ tveshám̱ panasyúm ā́ huve | yásmin sújātā subhágā mahīyáte sácā marútsu mīlhushī́ || 9 ||

(५७) सप्तपञ्चाशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्यात्रेय श्यावाश्व ऋषिः । मरुतो देवता । (१-६) प्रथमादिषडृचां जगती (७-८) सप्तम्यष्टम्योश्च त्रिष्टुप् छन्दसी ॥

॥२१॥ आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।
इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ॥१॥

57.

Ā́ rudrāsa índravantaḥ sajóshaso híraṇyarathāḥ suvitáya gantana | iyám̱ vo asmát práti haryate matís tṛishṇáje ná divá útsā udanyáve || 1 ||

Yoke the bright horses (pure and soothing motivations) to your chariot, yoke the red horses (active and pleasing motivations) to your chariot, yoke the swift pair of horses to bear the burthen; the strong bearing to bear the burthen. 6

And let not that horse bright-shining, loud-neighing, of graceful form, who has been yoked, delay you, O divine impulses, on your journey, may you urge him on in the chariot. 7

We invoke the glorious chariot, in which the supracons-cious and outer most realms of human complex are mounted along with the divine impulses, bearing the delightful bliss. 8

I invoke that brilliant troop of yours in the chairot, adorable and graceful, amidst which the auspicious bliss-bestowing goddess of divine origin, is invoked with the divine impulses. 9

57

Of one accord, with the resplendent sun, O cosmic vital principles, come borne on your golden chariot, for our prosperity. This praise is addressed to you, as unto one who is thirsty for water of heavenly springs. 1

वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषङ्गिणः ।
स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम् ॥२॥
धूनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया ।
कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम् ॥३॥
वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।
पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥४॥
पुरुद्रप्सा अञ्जिमन्तः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः ।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥५॥

vā́sīmanta rishṭimánto manīshíṇaḥ sudhánvāna íshumanto nishaṅgíṇaḥ | svásvā stha suráthāḥ prisnimātaraḥ svāyudhā́ maruto yāthanā súbham || 2 || dhūnuthá dyā́m párvatān dāsúshe vásu ní vo vánā jihate yā́mano bhiyā́ | kopáyatha prithivī́m prisnimātaraḥ subhé yád ugrāḥ príshatīr áyugdhvam || 3 || vā́tatvisho marúto varshánirṇijo yamā́ iva súsadrisaḥ supésasaḥ | pisáñgāsvā aruṇā́svā arepásaḥ prátvakshaso mahinā́ dyaúr ivoróvaḥ || 4 || purudrapsā́ añjimántaḥ sudā́navas tveshásaṃdriso anavabhrárādhasaḥ | sujātā́so janúshā rukmávakshaso divó arkā́ amrítaṃ nā́ma bhejire || 5 ||

॥२२॥ ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम् ।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ॥६॥
गोमदश्वावद्रथवत्सुवीरं चन्द्रवद्राधो मरुतो ददा नः ।
प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ॥७॥

rishṭáyo vo maruto áṅsayor ádhi sáha ójo bāhvór vo bálaṃ hitám | nrimṇā́ sīrshásv ā́yudhā rátheshu vo vísvā vaḥ srī́r ádhi tanū́shu pipise || 6 || gómad ásvāvad ráthavat suvī́raṃ candrávad rā́dho maruto dadā naḥ | prásastiṃ naḥ krinuta rudriyāso bhakshīyá vó 'vaso daívyasya || 7 ||

O cloud-bearing winds, full of wisdom, armed with swords, with lances, with bows, with arrows, with quivers, you are well mounted and have handsome chariots: O sons of mid-air, you are well armed, come for our good. 2

You agitate the clouds in the sky. You give wealth to the donor of oblations. Through the fear of your approach the forests bow down. O sons of mid-air, you make earth tremble, when, for the purpose of sending water, you, fierce clouds, yoke your colourful chariots. 3

The cloud-bearing winds are brilliantly radiant and wrapped in their robes of rain water. They are charming like noble twins and of graceful form. They are masters of tawny and of ruddy horses, devoid of guile, destroyers of foes and vast in magnitude as the sky. 4

They (the cloud-bearing winds) are shedders of abundant showers, wearers of ornaments, munificent, of brilliant aspect, yielders of inexhaustible wealth, noble by birth, are adorned with gold upon their breast, singers of the sky, entitled to adoration, they enjoy their immortal fame. 5

Lances rest, O cloud-bearing winds, upon your shoulders. Strength of foe-destroying power rests in your arms and golden turbans are on your head. Your weapons are placed in your chariots and all glorious majesty is moulded on your bodies. 6

O cloud-bearing winds, bestow upon us affluence in cattle and steeds, in cars, treasure, and male descendants. O sons of cosmic principles, grant us high distinction. May I ever enjoy your divine favour and protection. 7

हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥८॥

hayé náro máruto mriḷátā nas túvīmaghāso ámritā rítajñāḥ | sátyaṣrutaḥ kávayo yúvāno bríhadgirayo brihád ukshámāṇāḥ || 8 ||

(५८) अष्टपञ्चाशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्यात्रेयः श्यावाश्व ऋषिः । मरुतो देवताः । त्रिष्टुप् छन्दः ॥

॥२३॥ तमु नूनं तविषीमन्तमेषां स्तुषे गणं मारुतं नव्यसीनाम् ।
य आश्वश्वा अमवद्वहन्त उतेशिरे अमृतस्य स्वराजः ॥१॥
त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारम् ।
मयोभुवो ये अमिता महित्वा वन्दस्व विप्र तुविराधसो नॄन् ॥२॥
आ वो यन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति ।
अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥३॥
यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ।
युष्मदेति मुष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः ॥४॥

58.

Tám u nūnáṃ távishīmantam eshāṃ stushé gaṇám mārutaṃ návyasīnām | yá āṣvàṣvā ámavad váhanta utéṣire amrítasya svarā́jaḥ || 1 || tveshám gaṇáṃ tavásaṃ khā́dihastaṃ dhúnivratam māyínaṃ dā́tivāram | mayobhúvo yé ámitā mahitvā́ vándasva vipra tuvirā́dhaso nrī́n || 2 || ā́ vo yantūdavāhā́so adyá vrishṭíṃ yé víṣve marúto junánti | ayáṃ yó agnír marutaḥ sámiddha etáṃ jushadhvaṃ kavayo yuvānaḥ || 3 || yūyáṃ rā́jānam íryaṃ jánāya vibhvatashṭáṃ janayathā yajatrā́ḥ | yushmád eti mushṭihā́ bāhújūto yushmád sádasvo marutaḥ suvī́raḥ || 4 ||

O cloud-bearing winds, leaders of ceremonies, be propitious to us. You are infinitely opulent, immortal, be gracious to us. You are rich in treasures, renowned for truth, wise and young. You are greatly glorified and worshipped with copious oblations. 8

58

I glorify today that self-brilliant group of the adorable cosmic cloud-bearing winds, lords of swift moving forces, who pass along in strength, who are self-radiant, and maintain control over ambrosial rains. 1

O devotee, glorify extremely brilliant and powerful troop of clouds, decorated with hand-bracelets, and which is agitator and wise; whose individuals are conferers of wealth, bestowers of felicity, and whose greatness is unbounded. May you glorify these leaders. 2

May the universal divine winds, who impell the rain, come to you, today laden with water. They are very wise and ever-young. This fire, rain-bearing clouds, is newly-kindled; may it find favour with you. 3

O benevolent divine winds, with your blessings a son is born to the man, who would be a ruler and over-comer of adversaries or who would be skilled architect. From your blessings, comes a valiant descendant, strong-fisted (a boxer), mighty-armed; and by your grace, he becomes a possessor of excellent horses. 4

अरा इवेदचरमा अहेव प्रप्र जायन्ते अकवा महोभिः ।
पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ॥५॥
यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः ।
क्षोदन्त आपो रिणते वनान्यवोस्रियो वृषभः क्रन्दतु द्यौः ॥६॥
प्रथिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः ।
वातान्ह्यश्वान्धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः ॥७॥
हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥८॥

arấ ivéd ácaramā áheva prá-pra jāyante ákavā máhobhiḥ | príṣneḥ putrấ upamấso rábhishṭhāḥ sváyā matyấ marútaḥ sám mimikshuḥ || 5 || yát prấyāsishṭa príshatībhir áṣvair vīḷupavíbhir maruto ráthebhiḥ | kshódanta ấpo riṇaté vánāny ávosríyo vṛishabháḥ krandatu dyaúḥ || 6 || práthishṭa yấman pṛithiví cid eshām bhárteva gárbhaṃ svám íc chávo dhuḥ | vấtān hy áṣvān dhury ấyuyujré varsháṃ svédaṃ cakrire rudríyāsaḥ || 7 || hayé náro máruto — || 8 ||

(५९) एकोनषष्टितमं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्यात्रेयः श्यावाश्व ऋषिः । मरुतो देवता । (१-७) प्रथमादिसप्तर्चां जगती (८) अष्टम्याश्च त्रिष्टुप् छन्दसी ॥

॥२४॥ प्र वः स्पळक्रन्त्सुविताय दावनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे ।
उक्षन्ते अश्वान्तरुषन्त आ रजोऽनु स्वं भानुं श्रथयन्ते अर्णवैः ॥१॥

59.

Prá va spáḷ akran suvitấya dāváné 'rcā divé prá pṛithivyấ ṛitám bhare | ukshánte áṣvān tárushanta ấ rájó 'nu svám bhānúm ṣrathayante arṇavaíḥ || 1 ||

Like the spokes of a wheel, none of you are inferior to the rest, but equal in measure as days. These sons of mid-air are born off all alike. None is inferior in splendour, and all are rapid in speed; these divine winds pour rain of their own free will. 5

O divine winds, when you come with stout-axled cars drawn by coloured horses, the waters are disturbed, the forests are shattered; let the sky the showerer of rain thunder and pierced by the solar rays, may it send his roar downward. 6

On their approach the earth becomes capable of fertility, and they deposit water in her as their germ, as the husband generates the embryo of the child. They harness their vital horses' fleet as the wind. The clouds are offsprings of cosmic vita principles whose sweat becomes the rain. 7

O divine winds, the leading heroes, be gracious to us. You are infinitely opulent, immortal, law-abiding, renowned for truth, youthful poets, greatly glorified, and worshipped with profuse adorations. 8

59

The priest glorifies you, O divine winds, for the good of the donor of the oblation. May he offer worship to the shining midspace and to the earth. They (the cloud-bearing winds) scatter the rapid rain and traverse the firmament. They extend far and wide their radiance up to the sea. 1

अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ।
दूरेदृशो ये चितयन्त एमभिरन्तर्महे विदथे येतिरे नरः ॥२॥
गवामिव श्रियसे शृङ्गमुत्तमं सूर्यो न चक्षू रजसो विसर्जने ।
अत्या इव सुभ्वश्चारवः स्थन मर्या इव श्रियसे चेतथा नरः ॥३॥
को वो महान्ति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या ।
यूयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दावने ॥४॥

ámād eshām bhiyásā bhū́mir ejati naúr ná pūrṇā́ ksharati vyáthir yatī́ | dūredṛ́ṣo yé citáyanta émabhir antár mahé vidáthe yetire nárah || 2 || gávām iva ṣriyáse ṣṛ́ṅgam uttamám sū́ryo ná cákshū rájaso visárjane | átyā iva subhvàṣ cárava sthana máryā iva ṣriyáse cetathā narah || 3 || kó vo mahā́nti mahatā́m úd aṣnavat kás kā́vyā marutaḥ kó ha paúṅsyā | yūyám ha bhū́mim kiráṇam ná rejatha prá yád bháradhve suvitā́ya dāváne || 4 ||

अश्वा इवेदरुषासः सबन्धवः शूरा इव प्रयुधः प्रोत युयुधुः ।
मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः ॥५॥
ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः ।
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ॥६॥
वयो न ये श्रेणीः पप्तुरोजसान्तान्दिवो बृहतः सानुनस्परि ।
अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ॥७॥

áṣvā ivéd arushā́sah sábandhavaḥ ṣū́rā iva prayúdhaḥ prótá yuyudhuḥ | máryā iva suvṛ́dho vāvṛdhur náraḥ sū́ryasya cákshuḥ prá minanti vṛishṭíbhiḥ || 5 || té ajyeshṭhā́ ákanishṭhāsa udbhídó 'madhyamāso máhasā ví vāvṛdhuḥ | sujātā́so janúshā pṛ́ṣnimātaro divó máryā ā́ no áchā jigātana || 6 || váyo ná yé ṣréṇīḥ paptúr ójasā́ntān divó bṛihatáḥ sā́nunas pári | áṣvāsa eshām ubháye yáthā vidúḥ prá párvatasya nabhanū́ṅr acucyavuḥ || 7 ||

The earth shakes and reels in terror at their onward rush as a crowded boat goes quivering. Visible from afar, they are recognized by their movements. The divine winds, heroes, pass between heaven and earth to the place of work and worship. 2

You bear, for your decoration, an excellent (diadem) like the horn of cattle. And like the sun. the eye (of day), dispell darkness. You are diligent, graceful, and rapid as horses, and you are conscious to earn glory like mortals. 3

O mighty divine winds, who may exalt the great mighty excellencies of you? Who may (offer you fitting) praises? Who may glorify your manly deeds? For, you verily make the earth tremble like a ray of light, when you confer the gift of rain for fertility. 4

Resplendent as steeds of one kindred, they engage in combat like valiant champions. Like prosperous men, they, the leaders, augment in strength and cover the eye of the sun with their showers. 5

None of them are older, not one the younger than the others, the destroyers of foes, none hold a middle rank, but all excell in glory. Noble by birth, having mid-space for your mother, may you, O divine wind, come from heaven to our presence, and be gracious to mankind. 6

Like birds of air, they flow with might in rows from heaven's high ridges to the borders of the sky. Their motivations cause the waters of the cloud to descend, as both mortals know. 7

मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम् ।
आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ॥८॥

mí-
mātu dyaur áditir vītáye naḥ sám dánucitrā usháso yatantām | ắcucyavur divyám kóśam etá ṛíshe rudrásya marúto gṛiṇānáḥ || 8 ||

(६०) षष्टितमं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्यात्रेय श्यावाश्व ऋषिः । मरुतोऽग्नामरुतौ वा देवते । (१-६) प्रथमादिषडृचामस्य त्रिष्टुप् (७-८) सप्तम्यष्टम्योर्ऋचोश्च जगती छन्दसी ॥

॥२५॥ ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्याम् ॥१॥
आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु ।
वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वतश्चित् ॥२॥
पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः ।
यत्क्रीळथ मरुत ऋष्टिमन्त आप इव सध्र्यञ्चो धवध्वे ॥३॥

60.

Íle agním svavasam namobhír iha prasattó ví cayat kṛitám naḥ | ráthair iva prá bhare vājayádbhiḥ pradakshiṇín marútām stómam ṛidhyam || 1 || á yé tasthúḥ príshatīshu srutásu sukheshu rudra marúto rátheshu | váná cid ugrā jihate ní vo bhiyá pṛithiví cid rejate párvataṣ cit || 2 || párvataṣ cin máhi vṛiddhó bibhāya diváṣ cit sắnu rejata svané vaḥ | yát krílatha maruta ṛishṭimánta ápa iva sadhryàñco dhavadhve || 3 ||

May the heaven and the earth yield rain for our sustenance; may the wonderfully bounties dawns toil for us glittering with moisture. May these sons of cosmic vitals, lauded by sages, send down the heavenly treasure. 8

60

I praise with reverence the gracious adorable Lord with hymns. May he, propitiated on this occasion, approve of our acts. May I be full of riches like a chariot full of precious treasures. May I divinely blessed exalt vital principles and thereby become prosperous. 1

O fierce divine winds, offsprings of cosmic vitality, (when you come) mounted, on aura of waves, drawn by speedy currents to the woods bow down in terror, and the earth, even the mountains, tremble. 2

The mountain, though vast and lofty, is alarmed at your roaring, and the summit of the firmament trembles, when, lance-armed cloud-bearing winds move sportingly. You rush along together like the waters. 3

वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे ।
श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ॥४॥
अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥५॥
यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ ।
अतो नो रुद्रा उत वा न्वस्याग्ने वित्ताद्धविषो यद्यजाम ॥६॥

varā́ ivéd raivatā́so híraṇyair abhí svadhā́bhis tanvàḥ pipiṣre | ṣriyé ṣréyāṅsas taváso rátheshu satrā́ máhāṅsi cakrire tanū́shu || 4 || ajyeshṭhā́so ákanishṭhāsa eté sám bhrā́taro vāvṛidhuḥ saúbhagāya | yúvā pitā́ svápā rudrá eshāṃ sudúghā pṛíṣniḥ sudínā marúdbhyaḥ || 5 || yád uttamé maruto madhyamé vā yád vāvamé subhagāso diví shṭhá | áto no rudrā utá vā nv àsyā́gne vittā́d dhavísho yád yájāma || 6 ||

अग्निश्च यन्मरुतो विश्ववेदसो दिवो वहध्व उत्तरादधि ष्णुभिः ।
ते मन्दसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते ॥७॥
अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मन्दसानो गणश्रिभिः ।
पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः ॥८॥

agníṣ ca yán maruto viṣvavedaso divó váhadhva úttarād ádhi shṇúbhiḥ | té mandasānā́ dhúnayo riṣā́daso vāmáṃ dhatta yájamānāya sunvaté || 7 || ágne marúdbhiḥ ṣubháyadbhir ṛíkvabhiḥ sómam piba mandasānó gaṇaṣríbhiḥ | pāvakébhir viṣvaminvébhir āyúbhir vaíṣvānara pradívā ketúnā sajū́ḥ || 8 ||

Like wealthy bridegrooms, who have decorated their persons with glittering golden ornaments, the noble and powerful cloud-bearing winds, seated together in their speedy chariots, set their splendours on their forms for ever. 4

Like brothers, of whom no one is elder, no one younger, they grow up together for their mutual prosperity. Their father, the cosmic vitality, is ever-youthful, doer of good deeds, and their mother, the midspace, who is easy to be milked, make their days favourable for their growth. 5

Auspicious cloud-bearing winds, may you come to us, whether you abide in the upper, the middle, or the lower heaven. O cosmic vital principles, come to us from thence; and O fire-divine, accept our homage offered to you today. 6

O divine winds, lords of all, since you and fire-divine abide above the summits of the upper region of the sky, may you, who cause your enemies to tremble, and who rejoice in destroying the adverse elements be pleased to bestow prosperity upon the dedicated workers and devotees. 7

Associated with cloud-bearing winds, gleaming, singing and gathering in groups, whilst purifying and animating the universe, O fire-divine, the universal leaders, the possessor of banner-like bright flames, may you accept our devotional love, with delight. 8

(६१) एकषष्टितमं सूक्तम्

(१-१९) एकोनविंशत्यृचस्यास्य सूक्तस्यात्रेयः श्यावाश्व ऋषिः। (१-४, ११-१६) प्रथमादिचतुर्ऋचा-मेकादश्यादिषण्णाञ्च मरुतः, (५-८) पञ्चम्यादिचतसृणां तरन्तमहिषी शशीयसी, (९) नवम्या वैददश्विः पुरुमीळ्हः, (१०) दशम्या वैददश्विस्तरन्तः, (१७-१९) सप्तदश्यादि-तृचस्य च दार्भ्यो रथवीतिर्देवताः। (१-४, ६-८, १०-१९) प्रथमादि-चतुर्ऋचां षष्ठ्यादितृचस्य दशम्यादिदशानाञ्च गायत्री, (५) पञ्चम्या अनुष्टुप्, (९) नवम्याश्च सतोबृहती छन्दांसि॥

॥२६॥ के ष्ठा नरः श्रेष्ठतमा य एकएक आयय। परमस्याः परावतः ॥१॥
क्व वोऽश्वाः क्वाभीशवः कथं शेक कथा यय। पृष्ठे सदो नसोर्यमः ॥२॥
जघने चोद एषां वि सक्थानि नरो यमुः। पुत्रकृथे न जनयः ॥३॥
परा वीरास एतन मर्यासो भद्रजानयः। अग्नितपो यथासथ ॥४॥
सनत्साश्व्यं पशुमुत गव्यं शतावयम्।
श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत् ॥५॥

61.

Ké shṭhā naraḥ ṣréshṭhatamā yá éka-eka āyayá | paramásyāḥ parāvátaḥ || 1 || kvà vó 'ṣvāḥ kvā̀bhíṣavaḥ kathám̐ ṣeka kathā́ yaya | prishṭhé sádo nasór yámaḥ || 2 || jagháne códa eshām̐ ví sakthā́ni náro yamuḥ | putrakṛithé ná jánayaḥ || 3 || párā vīrāsa etana máryāso bhádrajānayaḥ | agnitápo yáthā́satha || 4 || sánat sā́ṣvyam paṣúm utá gávyam̐ ṣatā́vayam | ṣyāvā́ṣvastutāya yā́ dór vīrā́yopabárbṛihat || 5 ||

॥२७॥ उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी। अदेवत्रादराधसः ॥६॥
वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम्। देवत्रा कृणुते मनः ॥७॥
उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः। स वैरदेय इत्समः ॥८॥

utá tvā strí ṣáṣīyasī puṅsó bhavati vásyasī | ádevatrād arādhásaḥ || 6 || ví yā́ jānā́ti jásurim̐ ví tríshyantam̐ ví kāmínam | devatrā́ kṛiṇuté mánaḥ || 7 || utá ghā némo ástutaḥ púmāñ íti bruve paṇíḥ | sá vaíradeya ít samáḥ || 8 ||

61

Who are you, O most excellent leaders, that come one by one from a region exceedingly remote ? 1

Where are your horses ? Where are the reins ? What is your capability ? Where are you going ? Do you have the saddle on your back and the rein in your nostrils ? 2

The whip is laid upon their flanks. The rider forces them to spread their thighs apart, like women in bringing forth children. 3

O heroes, blazing, as if, with fire, since you are friendly to men and of noble birth, may you proceed far and wide on your mission. 4

She, (the Mother Nature), stretches her arms round the hero, who is accomplished with brown speedy horses and she, the same one, gives in wealth and vigour, and hundreds of cattles. 5

An accomplisher of praiseworthy deeds, may she be a woman, is more excellant than a man, who reverences not the God and does not offer wealth in charity. 6

For she discerns one who is weak and worn, one who thirsts and is in want and she sets her mind towards God. 7

And I proclaim that the man, her other half, the greedy, is not worthy of commendation until he also becomes equally liberal in munificient donations. 8

उत मेऽरपद्युवतिर्ममन्दुषी प्रति श्यावाय वर्तनिम् ।
वि रोहिता पुरुमीळ्हाय येमतुर्विप्राय दीर्घयशसे ॥९॥
यो मे धेनूनां शतं वैददश्विर्यथा ददत् । तरन्त इव मंहना ॥१०॥

utá me 'rapad yuvatír mamandúshī práti ṣyāvā́ya vartaním | ví róhitā purumī̆ḷhā́ya yematur víprāya dīrgháyaṣase || 9 || yó me dhenūnā́ṃ ṣatáṃ vaídadaṣvir yáthā dádat | tarantá iva maṅhánā || 10 ||

॥२८॥ य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु । अत्र श्रवांसि दधिरे ॥११॥
येषां श्रियाधि रोदसी विभ्राजन्ते रथेष्वा । दिवि रुक्म इवोपरि ॥१२॥
युवा स मारुतो गणस्त्वेषरथो अनेद्यः । शुभंयावाप्रतिष्कुतः ॥१३॥
को वेद नूनमेषां यत्रा मदन्ति धूतयः । ऋतजाता अरेपसः ॥१४॥
यूयं मर्तं विपन्यवः प्रणेतारं इत्था धिया । श्रोतारो यामहूतिषु ॥१५॥

yá īṃ váhanta āṣúbhiḥ píbanto madirám mádhu | átra ṣrávāṅsi dadhire || 11 || yéshāṃ ṣriyā́dhi ródasī vibhrájante rátheshv ā́ | diví rukmá ivopári || 12 || yúvā sá mā́ruto gaṇás tvesháratho ánedyaḥ | ṣubhaṃyā́vā́pratishkutaḥ || 13 || kó veda nūnám eshāṃ yátrā mádanti dhū́tayaḥ | ṛitájātā arepásaḥ || 14 || yūyám mártaṃ vipanyavaḥ praṇetā́ra itthā́ dhiyā́ | ṣrótāro yā́mahūtishu || 15 ||

॥२९॥ ते नो वसूनि काम्या पुरुश्चन्द्रा रिशादसः । आ यज्ञियासो ववृत्तन ॥१६॥
एतं मे स्तोममूर्म्ये दार्भ्याय परा वह । गिरो देवि रथीरिव ॥१७॥

té no vásūni kā́myā puruṣcandrā́ riṣādasaḥ | ā́ yajñiyāso vavṛittana || 16 || etám me stómam ūrmye dārbhyā́ya párā vaha | gíro devi rathī́r iva || 17 ||

Young and affable, she divulges the path to me, the possessor of brown speedy horses and the two ruddy horses bear me to the widely reputed sage, who is valiant and renowned. 9

He (the widely reputed sage) the knower of the cosmic mystery, gives me hundreds of treasures, and like a swimmer, takes me across by his spacious boat. 10

These cloud-bearing winds are brought hither by swift horses like waves. They, drinking the inebriating elixir, attain high glory here. 11

They, by whose glory heaven and earth are over-spread, shine splendid in their aura of chariots like the radiant sun in the heaven above. 12

That band of cloud-bearing winds is ever young, riding in bright chariots, irreproachable, auspicious, supra-mobile and unobstructed and steady. 13

Who knows of a certainty where these intimidators of their foes live and rejoice ? They are born of the eternal law and are exempt from defects. 14

You are admirable guides to happiness of the man, who propitiates you by his pious deeds. You are quick in response to him, who cries for help. 15

You are destroyers of the malevolent, and are worshipful and abounding in bright wealth. May you bestow upon us the riches that we crave. 16

O goddess, the night, may you convey my praises to divine cloudy winds, who shower water as a charioteer conveys the contents of his vehicle to his destination. 17

उत मे वोचतादिति सुतसोमे रथवीतौ । न कामो अप वेति मे ॥१८॥
एष क्षेति रथवीतिर्मघवा गोमतीरनु । पर्वतेष्वपश्रितः ॥१९॥

utá me vocatād íti sutásome ráthavītau | ná kā́mo ápa veti me || 18 || eshá ksheti ráthavītir maghávā gómatīr ánu | párvateshv ápaṣri-taḥ || 19 ||

(६२) द्विषष्टितमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्यात्रेय श्रुतविदृषि । मित्रावरुणौ देवते । त्रिष्टुप् छन्दः ॥

॥३२॥ ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्यश्वान् ।
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम् ॥१॥
तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे ।
विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त ॥२॥
अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः ।
वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥३॥

62.

Ṛiténa ṛitám ápihitam dhruvám vām sū́ryasya yátra vimucánty áṣvān | dáṣa ṣatā́ sahá tasthus tád ékam devā́nām ṣréshṭham vápushām apaṣyam || 1 || tát sú vām mitrā-varuṇā mahitvám īrmā́ tasthúshīr áhabhir duduhre | víṣvāḥ pinvathaḥ svásarasya dhénā ánu vām ékaḥ pavír ā́ vavarta || 2 || ádhārayatam pṛithivī́m utá dyā́m mítrarājānā varuṇā máhobhiḥ | vardháyatam óshadhīḥ pínvatam gā́ áva vṛi-shṭím sṛijatam jīradānū || 3 ||

And when the devotional affection is presented, say on my behalf to the chariot-moving ones (cloud-winds) that my loving regards remain the same. 18

This opulent charioteer cloud still dwells upon the banks of the flooded river, and on the skirts of mountains far away. 19

62

I have beheld the stationary eternal orb of yours, the Sun, (the source eternal of cosmic energy and cosmic plasma), concealed by cosmic vapours; wherefrom the rays are released. A thousand rays abide together here. This is the most excellent of the embodied forms of Nature's bounties. 1

Exceeding is that your greatness, O Lord of cosmic energy and Lord of cosmic plasma, whereby the felly of the chariot of one amongst you two, the ever revolving, has, through (succeeding) days, milked forth the stationary waters. The felly of the other enables the chariot to go round perpetually. Thus both of you augment all the world-illumining rays of the self-revolving sun. 2

O splendorous Lord of light and Lord of plasma, by your energies, you uphold earth and heaven. O prompt benefactors, you cause the plants to flourish and give nourishment to the cattle. May you send down the rain. 3

आ वामश्वासः सुयुजो वहन्तु यतरश्मय उप यन्त्वर्वाक् ।
घृतस्य निर्णिगनु वर्तते वामुप सिन्धवः प्रदिवि क्षरन्ति ॥४॥
अनु श्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा ।
नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः ॥५॥

á vām ásvāsaḥ suyújo vahantu yatárasmaya úpa yantv arvák | ghritásya nirnig ánu vartate vām úpa síndhavaḥ pradívi ksharanti || 4 || ánu srutám amátim várdhad urvím barhír iva yájushā rákshamāṇā | námasvantā dhritadakshádhi gárte mítrásāthe varuṇélāsv antáḥ || 5 ||

॥३१॥

अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वन्तः ।
राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ॥६॥
हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्यश्वाजनीव ।
भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥७॥
हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥८॥
यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।
तेन नो मित्रावरुणावविष्टं सिषासन्तो जिगीवांसः स्याम ॥९॥

ákravihastā sukríte paraspá yám trásāthe varuṇéḷāsv antáḥ | rájānā kshatrám áhriṇīyamānā sahásrasthūṇam bibhrithaḥ sahá dvaú || 6 || híraṇyanirṇig áyo asya sthúṇā ví bhrājate divy àsvájanīva | bhadré kshétre nímitā tílvile vā sanéma mádhvo ádhigartyasya || 7 || híraṇyarūpam usháso vyùshṭāv áyasthūṇam úditā sūryasya | á rohatho varuṇa mitra gártam átaṣ cakshāthe áditim dítim ca || 8 || yád báṅhishṭham nátivídhe sudānū áchidram ṣárma bhuvanasya gopā | téna no mitrāvaruṇāv avishṭam síshāsanto jigīváṅsaḥ syāma || 9 ||

May your well-harnessed horses bear you both hither, and with well-guided reins come down. The embodied form of water,—the clouds, follow you and the rivers flow to us as ever. 4

O Lord of light and plasma, with all your power and glory, you go on augmenting your reputation more and more, and you give protection to earth, just as the sacrifices are protected with veneration in verses. Abound in food and viands, may you ascend your chariots in the midst of the places of work and worship. 5

You are open-handed and benignant to the performer of pious acts. You protect him in all benevolent works. You two (Lord of energy and plasma), who are sovereigns, and free from wrath, uphold together a dominion based on thousand pillars. 6

Their chariot is adorned with gold; its pillars are of iron, and it glitters in heaven like lightning. The sacrificial altar has been established in an auspicious place along with all devotional requisites. May we share the meath that loads the car-seat. 7

The late Shri Prakash Vir Shastri was the main architect of Veda Pratisthana. It was to him that we owed the initial organization, the basic conception and the purposeful momentum of the project. Indeed, we are only trying to translate his dream into a reality. An eminent and gifted parliamentarian, whose cascading eloquence, sparkling wit, mature wisdom and intrinsic goodness had a singular charm, Parkash Vir Shastri was an articulate exponent and a selfless missionary of the fundamental values of India's creative and spiritual culture. Spun and woven with the warp and woof of Indian sensitivity and perception, the tapestry of his life and work was as authentic as it was inspiring. He shunned the pettiness and parochialism of politics and strove to reinforce our national life with the tensile strength of our quintessential heritage. He lived and worked for national goals. In national politics he was the ambassador of the larger cultural claims on life. In his tragic and untimely death, Mother India lost an illustrious son who distinguished himself not by the office he held, nor by his wealth or material acquisitions, but by his dedicated and singleminded service to the cause of the nation. In his death, Veda Pratisthana lost its moving spirit, regained mainly because his memory is a motive force. We savour the exhilarating fragrance and see the inspiring and exhorting presence of his personality, pervasive, permeating and perdurable, in the fruition of this project and pay our affectionate homage to his everlasting memory.

Deepavali, 1978.

Preface

The Vedas are the Word of God. At the very beginning of the Creation, man received knowledge of the Vedas. The Ṛgveda is the most ancient of all the holy scriptures in the world.

Knowledge of the Vedas is not intended for a particular race or country. God revealed this knowledge for the greatest good of mankind. This noble objective is reflected in the following words of the Vedic sages :

May all be happy and rid of diseases,
May all have a happy and harmonious life,
May nobody ever be afflicted with suffering.

The Vedas have been translated into several languages. Scholars like Griffith, Wilson and Max Müller have written commentaries on the Vedas in English. But the need for bringing out an unconventional and standard translation of the Vedas has been felt for quite sometime. The task, however, involved dedication, hard work and considerable financial resources.

Col. Ved Ratna Mohan, ex-M.P., was a promising youngman, the scion of a family which had implicit faith in the Vedas. His brilliant career was cut short by untimely death in 1973. His father, late Shri Narendra Mohan, was a leading industrialist of India. Devoted to social service, he took keen interest in the dissemination and distribution of religious literature. He had unshakable faith in God. Daily he would perform *yajna* and once in a year he would perform this on a big scale when all the *mantras* of one of the four Vedas would be recited. He had named his eldest son Ved Ratna (Jewel of the Vedas). He had desired the late Ved Ratna to do some service to

the Vedas. But fate had willed otherwise. Col. Ved Ratna died before he could fulfil his father's wish.

His younger brother Major Kapil Mohan, who has great reverence for the Vedas like his father, made the noble resolve to get all the four Vedas translated into English and publish them on behalf of the Narendra Mohan Foundation in the sacred memory of his elder brother. This Foundation was endowed by the sons of the late Shri Narendra Mohan, the founder of the Mohan Industries, in accordance with the wishes of their father. A hospital, a college, and several other charitable institutions devoted to public service are being run by the Foundation.

The task of rendering the four Vedas into English was entrusted to the Veda Pratishthana by the Foundation. Dr. Govardhan Lal Dutta, a famous educationist and Head of the Pratishthana, requested the Vedic scholar Svami Satya Prakash Sarasvati to undertake the highly onerous responsibility. Indeed one could think of no other scholar better qualified than Svami Satya Prakashji to accomplish this task. I am happy that Svamiji was kind enough to accede to the request. He is devoting most of his time to the translation work though he is a *parivrajaka*, a peripatetic monk. In this task, he is collaborating with Pandit Satyakam Vidyalankar.

Thanks are particularly due to Shri Vishwanath for his unstinted cooperation in the excellent printing of this work. No words would be adequate to express my warm appreciation and grateful thanks to Major Kapil Mohan, Svami Satya Prakashji and other colleagues and co-workers of the Veda Pratisthana who have generally helped in the accomplishment of this sacred task.

Our labours would be fully rewarded if through this English translation of the four Vedas, attempted for the first time in India, the divine message enshrined in the Vedas impregnates human consciousness everywhere.

Shravani Poornima,
Vikramiya Samvat 2034,
August 28, 1977.

Prakash Vir Shastri
Secretary, Veda Pratishthana
New Delhi

ऋग्वेद संहिता

ṚGVEDA SAMHITĀ

ऋग्वेद संहिता

षष्ठं मण्डलम्

---

(१) प्रथमं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥३५॥

त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता ।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ॥१॥
अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् ॥२॥

1.

Tvám̩ hy àgne prathamó manótāsyá dhiyó ábhavo dasma hótā | tvám̩ sīm̩ vrishann akrinor dushtárītu sáho víṣvasmai sáhase sáhadhyai || 1 || ádhā hótā ny àsīdo yájīyān iḷás padá isháyann ī́ḍyaḥ sán | tám̩ tvā nárah prathamám̩ devayánto mahó rāyé citáyanto ánu gman || 2 ||

ṚGVEDA SAMHITĀ

BOOK SIX

1

O adorable, magnificent Lord of universe, verily, you are the foremost, swift as mind and invoker of the cosmic forces. You are the sole inspirer of the consequent actions, and bestower of wisdom. You give us strength, which none may resist and wherewith we overcome all evil forces. 1

Being invoker and inspirer of universal sacrifice, you are glorified by us, and accepting our offerings you are established at the loftiest seat of divine wisdom. So, the meditating aspirants from the very beginning turn their mind towards you for obtaining great wealth and wisdom. 2

वृतेव यन्तं बहुभिर्वसव्यै३स्त्वे रयिं जागृवांसो अनु ग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ॥३॥
पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् ।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥४॥

vritéva yántam bahúbhir vasavyaìs tvé rayím jāgrivánso ánu gman | rúṣantam agním darṣatám brihántam vapávantam viṣváhā dīdivánsam || 3 || padám devásya námasā vyántaḥ ṣravasyávaḥ ṣráva āpann ámriktam | námāni cid dadhire yajñíyāni bhadráyām te raṇayanta sámdrishṭau || 4 ||

त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ॥५॥

tvám vardhanti kshitáyaḥ prithivyám tvám ráya ubháyāso jánā-nām | tvám trātá taraṇe cétyo bhūḥ pitá mātá sádam ín mánushāṇām || 5 || 35 ||

॥३६॥ सपर्येण्यः स प्रियो विक्ष्व१ग्निर्होता मन्द्रो नि षसादा यजीयान् ।
तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥६॥
तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥७॥

saparyéṇyaḥ sá priyó vikshv àgnír hótā mandró ní sha-sādā yájīyān | tám tvā vayám dáma á dīdivánsam úpa jñu-bádho námasā sadema || 6 || tám tvā vayám sudhyò návyam agne-sumnāyáva īmahe devayántaḥ | tvám víṣo anayo dí-dyāno divó agne brihatá rocanéna || 7 ||

Those persons follow you with rich offerings, O adorable Lord, to obtain wealth and wisdom who are spiritually awakened. O adorable, you are brilliant, evermore charming, assiduously active and glorified with mature dedications. 3

Men, aspiring for divine glory, obtain abundant untinted fame when they offer you reverential homage. They, verily, gain titles of reputations, and find delight in your auspicious presence. 4

Men exalt you greatly upon this earth when you bestow on them celestial and terrestrial riches of all kinds. You extricate us from evil, and as such, you are known as preserver and unfailing father and mother of mankind for all times. 5

Lord, who is adorable, affectionate, giver of gifts, bestower of bliss—is always with the mankind. So let us approach him and kindle his glory in our hearts and offer him praises with humility and respect. 6

O adorable Lord, we, the intelligent devotees, desirous of happiness, and aspiring for divinity, glorify you with respects. O Lord, may you with your exceeding lustre lead men to the heaven's exalted splendour. 7

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ॥८॥
सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।
य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः ॥९॥

viṣā́ṃ kavíṃ viṣpátiṃ ṣáṣvatīnāṃ nitóṣanaṃ vṛishabháṃ carshaṇīnā́m | prétīshaṇim isháyantam pāvakáṃ rā́jantam agníṃ yajatáṃ rayīṇā́m || 8 || só agna ījc ṣaṣamé ca márto yás ta ā́naṭ samídhā havyádātim | yá ā́hutim pári védā námobhir víṣvét sá vāmā́ dadhate tvótaḥ || 9 ||

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम ॥१०॥

asmā́ u te máhi mahé vidhema námobhir agne samídhotá havyaíḥ | védī sūno sahaso gīrbhír ukthaír ā́ te bhadrā́yāṃ sumataú yatema || 10 ||

आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्यस्तरुत्रः ।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ॥११॥
नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु ॥१२॥
पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥१३॥

ā́ yás tatántha ródasī ví bhāsā́ ṣrávobhiṣ ca ṣravasyàs tárutraḥ | bṛihádbhir vā́jai sthávirebhir asmé revádbhir agne vitaráṃ ví bhāhi || 11 || nṛivád vaso sádam íd dhehy asmé bhū́ri tokā́ya tánayāya paṣváḥ | pūrvī́r ísho bṛihatī́r āré-aghā asmé bhadrā́ sauṣravasā́ni santu || 12 || purū́ṇy agne purudhā́ tvāyā́ vásūni rājan vasútā te aṣyām | purū́ṇi hí tvé puruvāra sánty ágne vásu vidhaté rā́jani tvé || 13 || 36 ||

We glorify the Lord, the wisest amongst His ever-existing people, the destroyer of adversities, the bestower of all benefits on mankind, the moving inspirer, the provider of food, the resplendent, the purifier, and the one who is worshipped for riches. 8

O adorable Lord, the man who worships, praises, and offers homage to you with loving devotion as if with kindled fuel, and who commits himself with humility unto your favours, verily, is blessed with your protection and abundant wealth. 9

O adorable Lord, the source of strength, we offer our devotion to you with complete surrender, with reverence, hymns and oblations on the sacred place of worship. May we succeed in gaining your auspicious favours. 10

O refulgent, you have covered heaven and earth with splendour and glory. You are saviour of men, hence adored by devotional praises. May your everlasting glory shine on us with abundance of food, wealth and wisdom. 11

O Lord of affluence, bestow upon us, at all times, opulence conjoined with descendants, and (grant) abundance of cattle to our sons and grandsons. May we obtain needful and abundant nourishment, along with noble, untinted, and auspicious fame. 12

Mav I for my enrichment obtain many and various treasures through your love and grace, O effulgent Lord. O widely loved and worshipped Lord, infinite are the boons, aggregated in you, to be delivered to him who serves you. 13

(२) द्वितीयं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । (१-१०) प्रथमादिदशर्चामनुष्टुप्, (११) एकादश्याश्च शक्वरी छन्दसी ॥

॥१॥ त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥१॥

2.

Tváṃ hí kshaítavad yáṣó 'gne mitró ná pátyase | tváṃ vicarshaṇe ṣrávo váso pushṭíṃ ná pushyasi || 1 ||

त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते ।
त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ॥२॥

सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते ।
यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ॥३॥

ऋधद्यस्ते सुदानवे धिया मर्तः शशमते ।
ऊती ष बृहतो दिवो द्विषो अंहो न तरति ॥४॥

समिधा यस्त आहुतिं निशितिं मर्त्यो नशत् ।
वयावन्तं स पुष्यति क्षयमग्ने शतायुषम् ॥५॥

tvā́ṃ hí shma carshaṇáyo yajñébhir gīrbhír ī́ḷate | tvā́ṃ vājī́ yāty avṛikó rajastū́r viṣvácarshaṇiḥ || 2 || sajóshas tvā divó náro yajñásya ketúm indhate | yád dha syá mā́nusho jánaḥ sumnāyúr juhvé adhvaré || 3 || ṛídhad yás te sudā́nave dhiyā́ mártaḥ ṣaṣámate | ūtī́ shá bṛiható divó dvishó áṅho ná tarati || 4 || samídhā yás ta ā́hutiṃ níṣitim mártyo náṣat | vayā́vantaṃ sá pushyati ksháyam agne ṣatā́yusham || 5 || 1 ||

2

O adorable Lord, your princely glory sustains us like the sun. O Lord of treasures, beholder of all, you cherish us with food and nourishment. 1

Men verily adore you with selfless acts and praises, the friendly sun, the sender of rain and the beholder of universe moves to your proximity. 2

Verily, men of one accord, serve you with noble deeds and with praises. As you are the emblem of all sacred works, the benevolent, enlightened devotee kindles your glory. All rational beings aspiring for bliss invoke you in their benign selfless works. 3

May the mortal who propitiates the benefactor and the bountiful Lord with intelligent actions, with the assistance of divine resplendent powers come safe through the straits of enmity and sin. 4

The mortal, who approaches you with his intensive, enflamed dedication, enjoys the comforts of descendents from all sides and a prosperous life of a hundred years. 5

॥२॥

त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥६॥
अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः ।
रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः ॥७॥

tveshás te dhūmá ṛiṇvati diví sháñ chukrá ā́tataḥ | sū́ro ná hí dyutā́ tvám̐ kṛipā́ pāvaka rócase || 6 || ádhā hí vikshv íḍyó 'si priyó no átithiḥ | raṇváḥ purī̀va jū́ryaḥ sūnúr ná trayayā́yyaḥ || 7 ||

क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः ।
परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः ॥८॥
त्वं त्या चिदच्युताग्ने पशुर्न यवसे ।
धामा ह यत्ते अजर वना वृश्चन्ति शिक्वसः ॥९॥

वेषि ह्यध्वरीयतामग्ने होता दमे विशां ।
समृधो विश्पते कृणु जुषस्व हव्यमङ्गिरः ॥१०॥
अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥११॥

krátvā hí dróṇe ajyásé 'gne vājī́ ná kṛ́tvyaḥ | párijmeva svadhā́ gáyó 'tyo ná hvāryáḥ śíśuḥ || 8 || tvám̐ tyā́ cid ácyutā́gne paśúr ná yávase | dhā́mā ha yát te ajara vánā vṛiścánti śíkvasaḥ || 9 || véshi hy àdhvarīyatā́m ágne hótā dáme viśā́m | samṛ́dho viśpate kṛiṇu jushásva havyám aṅgiraḥ || 10 || áchā no mitramaho deva devā́n ágne vócaḥ sumatím ródasyoḥ | vīhí svastím̐ sukshitím̐ divó nṛ́n dvishó áṅhāṅsi duritā́ tarema tā́ tarema távā́vasā tarema || 11 || 2 ||

O Lord of divine radiance, your pure bright glory like the bright smoke, lifts itself aloft, and shines far-extended in heaven. You shine with radiance like the sun when propitiated by sacred hymns. 6

You must be glorified as a well-loved guest amongst the people. You are like an elder in a venerated city and to be cherished, for protection like a son. 7

O adorable Lord, you just like fire by attrition of wood. You are manifested in the physical world by your creation. You are vigorous as a horse and circumbiant like wind. You are dear like food and home and eager like a young courser that runs astray. 8

O supreme Lord, you, as fire from fuel, or like a grazing ox consume the apparently imperishable. And O eternal one, your mighty flames swallow the whole forest of universe. 9

O refulgent, the benefactor, the adorable Lord of the people, you enter as the ministrant priest into the home of those men who wish to perform noble deeds. You render them prosperous;—may you accept their homage. 10

O divine mighty adorable Lord, may you call hither the favour of Nature's bounties, extending from earth to heaven. May you bring wealth from heaven, so that men may dwell securely. May we overcome the malign oppressions of enemies, our iniquities and our difficulties. May we overcome them the sins of the past; may we overcome all of them through your help. 11

(३) तृतीय सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥३॥ अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।
यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः ॥१॥
ईजे यज्ञेभिः शशमे शमीभिरृधद्वारायाग्नये ददाश ।
एवा चन तं यशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः ॥२॥
सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः ।
हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः ॥३॥

3.

Ágne sá k'sheshad ṛitapā́ ṛitejā́ urú jyótir naṣate devayúsh ṭe | yáṃ tvám mitréṇa váruṇaḥ sajóshā déva pā́si tyájasā mártam áṅhaḥ || 1 || ījé yajñébhiḥ ṣaṣamé ṣámībhir ṛidhádvārāyāgnáye dadāṣa | evā́ caná táṃ yaṣásām ájushṭir nā́ṅho mártaṃ naṣate ná prádṛiptiḥ || 2 || sū́ro ná yásya dṛiṣatír arepā́ bhīmā́ yád éti ṣucatás ta ā́ dhī́ḥ | héshasvataḥ ṣurúdho nā́yám aktóḥ kútrā cid raṇvó vasatír vanejā́ḥ || 3 ||

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा ।
विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ॥४॥
स इदस्तेव प्रति धादसिष्यञ्छिशीत तेजोऽयसो न धाराम् ।
चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः ॥५॥

tigmáṃ cid éma máhi várpo asya bhásad áṣvo ná yamasānā́ āsā́ | vijéhamānaḥ paraṣúr ná jihvā́ṃ dravír ná drāvayati dā́ru dhákshat || 4 || sá íd ásteva práti dhād asishyáñ chíṣīta téjó 'yaso ná dhā́rām | citrádhrajatir aratír yó aktór vér ná drushádvā raghupátmajaṅhāḥ || 5 || ३ ||

3

O adorable Lord, your devotee , the offerer of sacrifice, born of eternal truth, attains wide radiance from you and against all iniquities gets protection from you, strengthened by your divine light and spiritual bliss. 1

The one, who serves adorable Lord by performing beneficial acts with dedication, and offers homage, and completely surrenders his ego to the bounteous supreme Lord, such a mortal is never afflicted with the want of glory, nor do sin and false pride overwhelm his personality. 2

The fire-divine is spreading on all sides with awe-inspiring flames and characteristic sounds; her appearance is as faultless as that of the sun. The fire, the child of wood, the asylum of all, looks charmingly resplendent everywhere. 3

Sharp is his (fire-divine's) path, and his vast form shines like a horse champing fodder with his mouth, darting forth his tongue as it were a hatchet. He burns physical waste to ashes, like a smelter, who fuses metal. 4

He casts afar his flames as an archer and sharpens when about to dart his radiance; as a warrior he whets the edge of his iron weapons. He keeps moving along brilliant pathways, through the night, like a roosting bird of rapid pinion. 5

॥४॥ स ईं रेभो न प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः ।
नक्तं य ईमरुषो यो दिवा नॄनमर्त्यो अरुषो यो दिवा नॄन् ॥६॥
दिवो न यस्य विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत् ।
घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी ॥७॥
धायोभिर्वा यो युज्येभिरर्कैर्विद्युन्न दविद्योत्स्वेभिः शुष्मैः ।
शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत् ॥८॥

sá īm rebhó ná práti vasta usráḥ ṣocíshā rārapīti mitrámahāḥ | náktam yá īm arushó yó dívā nṛ́̄n ámartyo arushó yó dívā nṛ́̄n || 6 || divó ná yásya vidható návīnod vṛ́shā rukshá óshadhīshu nūnot | ghṛ́ṇā ná yó dhrájasā pátmanā yánn ā́ ródasī vásunā dáṃ supátnī || 7 || dhā́yobhir vā yó yújyebhir arkaír vidyún ná davidyot svébhiḥ ṣúshmaiḥ | ṣárdho vā yó marútāṃ tatáksha ṛibhúr ná tveshó rabhasānó adyaut || 8 || 4 ||

(४) चतुर्थं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥५॥ यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ॥१॥
स नो विभावा चक्षणिर्न वस्तोरग्निर्वन्दारु वेद्यश्चनो धात् ।
विश्वायुर्यो अमृतो मर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः ॥२॥

4.

Yáthā hotar mánusho devátātā yajñébhiḥ sūno sahaso yájāsi | evá no adyá samaná samānā́n uṣánn agna uṣató yakshi devā́n || 1 || sá no vibhā́vā cakshánir ná vástor agnír vandā́ru védyaṣ cáno dhāt | viṣvā́yur yó amṛ́to mártyeshūsharbhúd bhū́d átithir jātávedāḥ || 2 ||

Like the adorable sun, he clothes himself with beams of morning, diffusing friendly light, and resounding along with his radiance. He is the one who is luminous by night, and who inspires men to their work by day. He is immortal and radiant, and as such, verily, inspires men by day. 6

Of whom, the mysterious voice in cosmos, as if of the sun, is heard when he scatters his glow amongst the plants. He is brilliant showerer of blessings, who, among manifested creation, moving with his glow, rushes forth to fill both the worlds—well-wedded earth and heaven—with divine treasure. 7

He goes with sacred rays, as if with self-harnessed, well-governed steeds, and shines like lightning with his own scorching flames. He, associated with cosmic vital principles, glows radiant and moves rapid as the wide-sunshine. 8

4

O adorable Lord, you are source of strength, and invoker of cosmic forces, in the same manner as a man offering homage by means of selfless deeds. May you willingly invoke for us the assenting Nature's bounties, regarding them as your equal. 1

May that adorable Lord, who, like the illuminator of the day, is resplendent and cognizable by all, grant us commendable food. He is dear as a guest, is the life of all and immortal among mortals. He is always awake at dawn and knows all that exists. 2

द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः ।
वि य इनोत्यजरः पावकोऽश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥३॥
वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम् ।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः ॥४॥
नितिक्ति यो वारणमन्नमत्ति वायुर्न राष्ट्र्यत्येत्यक्तून् ।
तुर्याम यस्त आदिशामरातीरत्यो न ह्रुतः पततः परिह्रुत् ॥५॥

dyávo ná yásya panáyanty ábhvam bhásāṅsi vaste sū́ryo ná ṣukráḥ | ví yá inóty ajáraḥ pāvakó 'ṣnasya cic chiṣnathat pūrvyā́ṇi || 3 || vadmā́ hí sūno ásy admasádvā cakré agnír janúshā́jmā́nnam | sá tvám̐ na ūrjasana ū́rjam dhā rā́jeva jer avriké ksheshy antáḥ || 4 || nítikti yó vāraṇám ánnam átti vāyúr ná rā́shṭry áty ety aktū́n | turyā́ma yás ta ādíṣām árātīr átyo ná hrútaḥ pátataḥ parihrút || 5 || 5 ||

॥६॥ आ सूर्यो न भानुमद्भिरर्कैरग्ने ततन्थ रोदसी वि भासा ।
चित्रो नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ॥६॥
त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥७॥

ā́ sū́ryo ná bhānumádbhir arkaír ágne tatántha ródasī ví bhāsā́ | citró nayat pári támāṅsy aktáḥ ṣocíshā pátmann auṣijó ná díyan || 6 || tvám̐ hí mandrátamam arkaṣokaír vavrimáhe máhi naḥ ṣróshy agne | índram ná tvā ṣávasā devátā vāyúm priṇanti rā́dhasā nrítamāḥ || 7 ||

His worshippers celebrate His great deeds and appreciate them with wonder. Radiant as the sun, He clothes himself with lustre. He is exempt from decay and is purifier. He illumines all things and destroys the unsatiated desires. 3

Adorable Lord, the source of strength is to be praised when His glory is established in the sacred works. Since His manifestation, He grants habitation and food. He is giver of strength—a source vitality to us, He triumphs like a prince, so that foes may not trouble us in our unassailed dwellings. 4

He is the one, who whets his gloom-dispersing radiance, and accepts reverential homage, and as a Lord of vitality, He overcomes dark forces. May He prevail on them who resist His command, and may you, O Lord, with the swiftness of a horse, be the destroyer of the assailing adversaries. 5

O adorable Lord, you overspread our inner realms with enlightenment and refulgent radiance, like the sun with his lustrous rays on the heaven and earth. The wonderful Lord disperses the glooms of conscience like the adorned sun moving on his path, imbued with light. 6

We celebrate your glory which is most adorable, and deserves to be glorified by sacred praises; the leaders earnestly honour you with offerings. Your divine resplendence is manifest in lightning and your strength in wind. 7

नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः ।
ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः ॥८॥

nū́ no agne 'vṛikébhiḥ svastí véshi rāyáḥ pathíbhiḥ párshy áṅhaḥ | tā́ sūríbhyo gṛiṇaté rāsi sumnám mádema ṣatáhimāḥ suvī́rāḥ || 8 || 6 ||

(५) पञ्चमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥ ७॥ हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठम् ।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक् ॥१॥
त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके ॥२॥

5.

Huvé vaḥ sūnúṃ sáhaso yúvānam ádroghavācam matíbhir yávishṭham | yá ínvati dráviṇāni prácetā viṣvávārāṇi puruvā́ro adhrúk || 1 || tvé vásūni purvaṇīka hotar doshā́ vástor érire yajñíyāsaḥ | kshā́meva víṣvā bhúvanāni yásmin sáṃ saúbhagāni dadhiré pāvaké || 2 ||

त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम् ।
अत इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि ॥३॥
यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात् ।
तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान् ॥४॥

tváṃ vikshú pradívaḥ sīda āsú krátvā rathī́r abhavo vā́ryāṇām | áta inoshi vidhaté cikitvo vy ā̀nushág jātavedo vásūni || 3 || yó naḥ sánutyo abhidā́sad agne yó ántaro mitramaho vanushyā́t | tám ajárebhir vṛ́shabhis táva svaís tápā tapishṭha tápasā tápasvān || 4 ||

May you quickly conduct us, O Lord, by unmolested paths, to riches and prosperity. Convey us beyond sin. Those delights which you give to your adorers, may you extend them to him, who glorifies you; and may we, living for a hundred winters, and blessed with excellent posterity, be happy. 8

5

I invoke you with hymns, O prime source of strength. You are youthful, ever-young, irreproachable God, full of wisdom, praised by all, merciful and devoid of malice, and the one who bestows prosperity to all. 1

O fire-divine of multi-blazing flames, the invoker, you are the one on whom all the performers of sacred acts repose their confidence night and day. These performers offer all good things to the sacrificial fire as Nature's bounties establish all living beings firmly on this earth. 2

O fire-divine, the cognizant of all that is born, you have been abiding since eternity among living people of the creation. You have ever been bestowing to them, by your design, all divine blessings, and have been continually granting treasures to those who have been constantly serving you. 3

O supreme resplendent Lord, mighty saviour of loyal devotees, may you, blazing with your radiance, consume him with your own imperishable flames, who, living in neighbourhood or secretly, desings to harm and assail us. 4

यस्ते यज्ञेन समिधा य उक्थैरर्केभिः सूनो सहसो ददाशत् ।
स मर्त्येष्वमृत प्रचेता राया द्युम्नेन श्रवसा वि भाति ॥५॥
स तत्कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा सहस्वान् ।
यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जुषस्व जरितुर्घोषि मन्म ॥६॥
अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥७॥

yás te yajñéna samídhā yá ukthaír arkébhiḥ sūno sahaso dádāṣat | sá mártyeshv amṛita prácetā rāyā́ dyumnéna ṣrávasā ví bhāti || 5 || sá tát kṛidhīshitás tū́yam agne spṛídho bādhasva sáhasā sáhasvān | yác chasyáse dyúbhir aktó vácobhis táj jushasva jaritúr ghóshi mánma || 6 || aṣyā́ma táṃ kā́mam agne távotī́ aṣyā́ma rayíṃ rayivaḥ suvī́ram | aṣyā́ma vā́jam abhí vājáyanto 'ṣyā́ma dyumnám ajarājáraṃ te || 7 || 7 ||

(६) षष्ठं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥८॥ प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमव इच्छमानः ।
वृश्चद्वनं कृष्णयामं रुशन्तं वीती होतारं दिव्यं जिगाति ॥१॥
स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन् ॥२॥
वि ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्चरन्ति ।
तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥३॥

6.

Prá návyasā sáhasaḥ sūnúm áchā yajñéna gātúm áva ichámānaḥ | vṛiṣcádvanaṃ kṛishṇáyāmaṃ rúṣantaṃ vītí hótāraṃ divyáṃ jigāti || 1 || sá ṣvitānás tanyatū́ rocanasthā́ ajárebhir nā́nadadbhir yávishṭhaḥ | yáḥ pāvakáḥ purutámaḥ purū́ṇi pṛithū́ny agnír anuyā́ti bhárvan || 2 || ví te víshvag vā́tajūtāso agne bhā́māsaḥ ṣuce ṣúcayaṣ caranti | tuvimrakshā́so divyā́ návagvā vánā vananti dhṛishatā́ rujántaḥ || 3 ||

O source of strength, immortal Lord, verily, the person who serves you with selfless and dedicated actions and sings your sacred hymns, shines out, among men. He becomes eminent in wisdom, and possesses splendid opulence and food. 5

O adorable Lord, may you quickly accomplish that for which we solicit you. May you with your might subdue our adversaries. May you be pleased when you are glorified with melodious sacred verses of the devotee and shine with radiance decked with brightness. 6

O adorable Lord, may we obtain all that we aspire for through your grace. O bestower of wealth and wisdom, may we, desiring food and progeny, be provided with them and be blessed with that eternal glory, of which you are the sole possessor. 7

6

He (the devotee), who seeks furtherance and grace, proceeds to the proximity of the fire-divine, the prime source of strength, with his everfresh devotional songs, calling the divine ministrant to share the banquet of Lord of comsic sacrificial acts. The fire-divine consumes the physical desires, just as ordinary fire consumes a forest. Bright and shining it moves forward leaving black traces (of burnt plants) on the path. 1

This cosmic fire-divine is white-hued, vociferous and dwells in firmament. He is eternal, ever-young and is loud-voiced. He is purifier, and assuming many forms proceeds feeding upon numerous and substantial forests. 2

O pure cosmic fire-divine, your bright flames impelled by vital elements spread wide in every direction, consuming all physical forms i. e. forests. Your ever-riding beams of radiance play upon the woods, boldly enveloping them in lustre. 3

ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः ।
अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ॥४॥
अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना ।
शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि ॥५॥

yé te sukrâsah súcayah sucishmah kshâm vápanti víshitāso áṣvāḥ | ádha bhramás ta urviyâ ví bhāti yātáyamāno ádhi sânu príṣneḥ || 4 || ádha jihvâ pāpatīti prá vríshṇo goshuyúdho náṣánih srijāná | ṣûrasyeva prásitiḥ kshātír agnér durvártur bhīmó dayate vánāni || 5 ||

आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततन्थ ।
स बाधस्वाप भया सहोभिः स्पृधो वनुष्यन्वनुषो नि जूर्व ॥६॥
स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र चन्द्राभिर्गृणते युवस्व ॥७॥

â bhānúnā pârthivāni jráyāṅsi mahás todásya dhrishatâ tatantha | sá bādhasvâpa bhayâ sáhobhi sprídho vanushyán vanúsho ni jūrva || 6 || sá citra citrám citáyantam asmé cítrakshatra citrátamam vayodhâm | candrám rayím puruvíram brihántam cándra candrâbhir grinaté yuvasva || 7 || 8 ||

(७) सप्तमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । वैश्वानरोऽग्निर्देवता । (१-५) प्रथमादिपञ्चर्चां त्रिष्टुप्, (६-७) षष्ठीसप्तम्योश्च जगती छन्दसी ॥

॥१०॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥१॥

7.

Mūrdhânam divó aratím prithivyâ vaiṣvānarám ritá â jātám agním | kavím samrâjam átithim jánānām āsánn â pâtram janayanta deváḥ || 1 ||

O resplendent fire-divine, when your pure and bright speedy rays like horses are loosened from their bound, they shear the many-tinted ground beneath them. Your flames, haunting about the high lands of earth, shine out far and wide and their rapidly moving flickers, mounting over earth's high ridges, blaze fiercely. 4

The flames of this mighty cosmic fire descend like the hurled thunderbolt of the powerful Lord of heaven. Its fierce flame has the energy of destroying all material forms. He, being irresistible and fearful, consumes all superficial material forms, as fire consumes the forests. 5

You over-spread on all the accessible places of the earth with light, energetic power and impelling force. May you drive away all perils with your conquering might and fighting out against our adversaries burn up those who harm us. 6

O splendrous divine fire, possessing splendid strength, the bestower of delight, may you grant to us, your loyal devotees praising you with delightful sacred hymns, the most wonderful life-giving treasures. O vast bright cosmic divine fire, may you confer on us great glory, supply nourishment and provide heroic progeny. 7

7

Divine forces of cosmos manifest the universal leader, the protective fire-divine who is a messenger of earthly beings and symbol of heavenly luminaries. He, an offspring of eternal order, is wise, sovereign, a guest dear to men and eternally existing. 1

नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त ।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥२॥
त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः ।
वैश्वानर त्वमस्मासु धेहि वसूनि राजन्त्स्पृहयाय्याणि ॥३॥
त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥४॥

nā́bhim yajñā́nām sádanam rayīṇā́m mahā́m āhāvā́m abhí sám navanta | vaiṣvānarā́m rathyàm adhvarā́ṇām yajñásya ketúm janayanta devā́ḥ || 2 || tvád vípro jāyate vājy àgne tvád vīrā́so abhimātishā́haḥ | vaíṣvānara tvám asmā́su dhehi vásūni rājan spṛihayā́yyāṇi || 3 || tvā́m víṣve amṛita jā́yamānam ṣíṣum ná devā́ abhí sám navante | táva krátubhir amṛitatvám āyan vaíṣvānara yát pitrór ádīdeḥ || 4 ||

वैश्वानर तव तानि व्रतानि महान्यग्ने नकिरा दधर्ष ।
यज्जायमानः पित्रोरुपस्थेऽविन्दः केतुं वयुनेष्वह्नाम् ॥५॥
वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना ।
तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः ॥६॥
वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः ।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता ॥७॥

vaíṣvānara táva tā́ni vratā́ni mahā́ny agne nákir ā́ dadharsha | yáj jā́yamānaḥ pitrór upásthé 'vindaḥ ketúm vayúneshv áhnām || 5 || vaiṣvānarásya vímitāni cákshasā sā́nūni divó amṛítasya ketúnā | tásyéd u víṣvā bhúvanādhi mūrdhā́ni vayā́ iva ruruhuḥ saptá visrúhaḥ || 6 || ví yó rájāṅsy ámimīta sukrátur vaiṣvānaró ví divó rocanā́ kavíḥ | pári yó víṣvā bhúvanāni paprathé 'dabdho gopā́ amṛítasya rakshitā́ || 7 || ७ ||

Cosmic forces manifest and praise him, who is navel of all noble deeds, sustainer of all sacred offerings, base of all treasures, conveyer of oblations, the universal leader, and an ensign of all selfless benevolent actions. 2

From your blessings, O fire-divine, the universal leader, the wise devotee derives strength and wisdom and blessed by you, the heroes subdue evil tendencies. O sovereign ruler, bestow on us excellent treasures, worthy to be longed for. 3

O immortal universel leader, when manifested as if born infant, all cosmic forces glorify you. When you shine in the parental mid-space, these forces, the offsprings of cosmos gain immortality. 4

O universal leader, the fire-divine, when you spring forth in the bosom of parental cosmos and establish the banner of days on the paths of cosmic world, no one can ever resist your mighty ordinances. 5

The summits of the firmament are measured by the immortal radiance of universal leader, the fire-divine. The base of all regions is stationed upon his brow. The seven gliding streams spring forth from there like branches of a tree. 6

The all-wise, performer of sacred deeds, universal leader the fire-divine, is the prime cause of all luminaries of cosmos and of the inter-space in the mid-region. He spreads them throughout the universe. He is the irresistible guardian of all immortal elements. 7

(८) अष्टमं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । वैश्वानरोऽग्निर्देवता । (१–६) प्रथमादितृचद्वयस्य जगती, (७) सप्तम्या ऋचश्च त्रिष्टुप् छन्दसी ॥

पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः ।
वैश्वानराय मतिर्नव्यसी शुचिः सोम इव पवते चारुरग्नये ॥१॥
स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ।
व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् ॥२॥

8.

Prikshásya vríshṇo arushásya nū́ sáhaḥ prá nú vocaṃ vidáthā jātávedasaḥ | vaiṣvānarā́ya matír návyasī ṣúciḥ sóma iva pavate cā́rur agnáye || 1 || sá jā́yamānaḥ paramé vyòmani vratā́ny agnír vratapā́ arakshata | vy àntáriksham amimīta sukrátur vaiṣvānaró mahinā́ nā́kam asprisat || 2 ||

व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदकृणोज्ज्योतिषा तमः ।
वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम् ॥३॥
अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुरृग्मियम् ।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥४॥
युगेयुगे विदथ्यं गृणद्भ्योऽग्ने रयिं यशसं धेहि नव्यसीम् ।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ॥५॥

vy àstabhnād ródasī mitró ádbhuto 'ntarvā́vad akriṇoj jyótishā támaḥ | ví cármaṇīva dhishánc avartayad vaiṣvānaró víṣvam adhatta vríshṇyam || 3 || apā́m upásthe mahishā́ agribhṇata víṣo rā́jānam úpa tasthur rigmíyam | ā́ dūtó agním abharad vivásvato vaiṣvānarám mātaríṣvā parāvátaḥ || 4 || yugé-yuge vidathyàṃ griṇádbhyó 'gne rayíṃ yaṣásaṃ dhehi návyasīm | pavyéva rājann aghásaṅsam ajara nīcā́ ní vriṣca vanínaṃ ná téjasā || 5 ||

8

I commemorate promptly at the holy congregation the might of the all-pervading cosmic fire, all-knowing, the showerer, and the radiant; ever-fresh, pure, and graceful hymns flow from me for this universal leader, in the same way, as the herbal juice flows from the filter. 1

That cosmic fire, who, as soon as manifest in the loftiest heaven, becomes the protector of our sacred rites. He protects the pious acts of men, and measures out the manifold firmament. On account of his grandeur and wonderful deeds, he, the universal leader, attains the highest glory in the cosmos. 2

This shining, wonderful, cosmic fire, the universal leader, upholds heaven and earth, also covers and conceals the darkness within his light. He spreads out the two bowls of universe like two skins. He comprehends all his creative energy in his task. 3

The mighty vital principles join him on the lap of vaporous firmament. Men acknowledge him as their adorable sovereign. The divine wind, the messenger of the cosmic forces brings divine fire the universal leader, from the distant sphere of the sun. 4

O glorious immortal, worthy of reverence, may you bestow riches and illustrious children upon such devotees, as continue singing your praises from age to age. May you strike the sinner with your sharp punitive justice, as lightning strikes down a tree. 5

अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यम् ।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥६॥
अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन् ।
रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ॥७॥

asmákam agne maghávatsu dhārayā́nāmi kshatrám ajáram suvī́ryam | vayáṃ jayema ṣatínaṃ sahasríṇaṃ vaíṣvānara vā́jam agne távotíbhiḥ || 6 || ádabdhebhis táva gopā́bhir ishṭe 'smā́kam pāhi trishadhastha sūrī́n | rákshā ca no dadúshāṃ ṣárdho agne vaíṣvānara prá ca tārī stávānaḥ || 7 || 10 ||

(९) नवमं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः ।
वैश्वानरोऽग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥११॥ अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥१॥
नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।
कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा ॥२॥
स इत्तन्तुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति ।
य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन् ॥३॥

9.

Áhaṣ ca krishṇám áhar árjunaṃ ca ví vartete rájasī vedyábhiḥ | vaiṣvānaró jā́yamāno ná rā́jā́vātiraj jyótishāgnís támāṅsi || 1 || nā́háṃ tántuṃ ná ví jānāmy ótuṃ ná yáṃ

váyanti samaré 'tamānāḥ | kásya svit putrá ihá váktvāni paró vadāty ávareṇa pitrā́ || 2 || sá ít tántuṃ sá ví jānāty ótuṃ sá váktvāny ṛituthá vadāti | yá īṃ cíketad amṛ́tasya gopā́ avás cáran paró anyéna páṣyan || 3 ||

O the universal leader, the fire-divine, may you grant to our benevolent offerers, wealth and strength which is exempt from decay and which cannot be taken away. May we win for our strength, O fire divine, hundredfold and thousandfold ways through your grace. 6

O adorable divine Lord, present in all the three worlds, keep your grace effective with your irresistible guards. May you preserve the strength of us who offer homage. May you, when glorified by us, take us across evils and miseries. 7

9

The dark night and the bright day revolve alternate, affecting the world by their appreciable qualities. Universal leader, the cosmic fire, manifested like a prince, dispels darkness by His lustre. 1

I neither understand the threads of the warp, nor the threads of the woof, nor that cloth which, those, who are assiduous in united exertion, weave. No one knows of the source of the words that have been spoken by a father hither and are to be used by the son thither. 2

He verily understands both, the warp and woof, and in due time. He shall tell what should be told. He very much knows all about this. He is the protector of all that is eternal and immortal, and freely moves through hither and thither, above or below, with a constant eye on both of them. 3

अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ॥४॥
ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः ।
विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु ॥५॥
वि मे कर्णा पतयतो वि चक्षुर्वी३दं ज्योतिर्हृदय आहितं यत् ।
वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ॥६॥
विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसम् ।
वैश्वानरोऽवतूतये नोऽमर्त्योऽवतूतये नः ॥७॥

ayáṃ hótā prathamáḥ páśyatemám idáṃ jyótir amŕ̥tam mártyeshu | ayáṃ sá jajñe dhruvá ā́ níshattó 'martyas tanvā̀ várdhamānaḥ || 4 || dhruváṃ jyótir níhitaṃ dr̥śáye kám máno jávishṭhaṃ patáyatsv antáḥ | víśve devā́ḥ sámanasaḥ sáketā ékaṃ krátum abhí ví yanti sādhú || 5 || ví me kárṇā patayato ví cákshur vìdáṃ jyótir hŕ̥daya ā́hitaṃ yát | ví me mánaś carati dūráādhīḥ kíṃ svid vakshyā́mi kím u nū́ manishye || 6 || víśve devā́ anamasyan bhiyānā́s tvā́m agne támasi tasthivā́ṅsam | vaiśvānarò 'vatū́táye nó 'martyo 'vatū́táye naḥ || 7 || 11 ||

(१०) दशमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । (१-६) प्रथमादिऋच-द्वयस्य त्रिष्टुप्, (७) सप्तम्या ऋचश्च द्विपदा विराट् छन्दसी ॥

॥१२॥ पुरो वो मन्द्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वम् ।
पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः ॥१॥

10.

Puró vo mandráṃ divyáṃ suvr̥ktíṃ prayatí yajñé agním adhvaré dadhidhvam | purá ukthébhiḥ sá hí no vibhā́vā svadhvarā́ karati jātávedāḥ || 1 ||

This Lord of the cosmic fire is the first offerer of cosmic offerings. Behold Him ! He is the light immortal amongst mortals; He is immovable, all-pervading, immortal and ever-waxing in His body,—the manifested creation. 4

His steady light, swifter than mind, stationed among moving world, pointedly indicates the way to happiness. All the cosmic powers of one accord and of one intention, proceed unobstructed to the single purpose. 5

My ears are turned to hear Him, and my eyes to behold Him. The divine light, that is placed in my heart, is also eager to know him. My mind, the receptacle of distant objects, hastens towards Him. What shall I speak? How shall I comprehend Him? 6

All the cosmic forces, alarmed, adore you, O Lord of the cosmic fire, abiding in mysterious darkness. May the immortal adorable divine preserve us with His protection; afford us all His protection. 7

10

May you propitiate with praises and install this adorable, divine, infallible Lord at the place of all your progressive and uninterrupted sacred deeds. For He, the resplendent omniscient Lord makes us prosperous in our sacred endeavours. 1

तमु द्युमः पुर्वणीक होतरग्ने अग्निभिर्मनुष इधानः ।
स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवन्ते ॥२॥
पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः ।
चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्य साता गोमतो दधाति ॥३॥

tám u dyumaḥ purv-
aṇīka hotar ágne agníbhir mánusha idhānáḥ | stómam yám
asmai mamáteva ṣūshám ghritám ná ṣúci matáyaḥ pavante
|| 2 || pīpáya sá ṣrávasā mártyeshu yó agnáye dadā́ṣa vípra
ukthaíḥ | citrábhis tám ūtíbhiṣ citráṣocir vrajásya sātá gó-
mato dadhāti || 3 ||

आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा ।
अध बहु चित्तम ऊर्म्यायास्तिरः शोचिषा ददृशे पावकः ॥४॥
नू नश्चित्रं पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि ।
ये राधसा श्रवसा चात्यन्यान्त्सुवीर्येभिश्चाभि सन्ति जनान् ॥५॥
इमं यज्ञं चनो धा अग्न उशन्यं त आसानो जुहुते हविष्मान् ।
भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य सातौ ॥६॥

á yáḥ papraú jáyamāna urví dūredríṣā
bhāsá krishṇádhvā | ádha bahú cit táma ū́rmyāyās tiráḥ
ṣocísha dadriṣe pavakáḥ || 4 || nú naṣ citrám puruvā́jābhir
ūtí ágne rayím maghávadbhyaṣ ca dhehi | yé rā́dhasā ṣrá-
vasā cáty anyán suvíryebhiṣ cābhí sánti jánān || 5 || imám
yajñám cáno dhā agna uṣán yám ta āsānó juhuté havísh-
mān | bharádvājeshu dadhishe suvriktím ávīr vā́jasya gádh-
yasya sātaú || 6 ||

O adorable fire-divine with multi-blazing flames, radiant and showerer of blessings, may you, glorified at the fires enkindled, listen and bless your devotee who for self-advantage adores you with a loving heart, pure as sacred butter. 2

Amongst mortal men, only that wise devotee thrives in glory, who offers homage with hymns of praise to adorable Lord. The wonderfully radiant adorable Lord grants him marvellous protection and helps him to obtain wealth and a pasturage filled with herds of cattle. 3

At His manifestation, the cosmic fire-divine, the dark-pathed, fills up spacious heaven and earth with His widely visible splendour. And He Himself, the purifier, is now seen, dispersing the thick gloom of night with His radiance. 4

O adorable Lord, may you, with your mightiest aid, confer magnificent wealth on us and on our illustrious leaders, who stand pre-eminent, surpassing others in liberal gifts, in fame, and in virtues. 5

O adorable Lord, accept this homage with delight, which the worshipper, seated before you, is offering. May you accept melodious hymns of wise devotees; bless them so that they may obtain all sorts of nourishment. 6

वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः ॥७॥

ví dvéshāṅsīnuhí vardháyéḷām mádema ṣatáhimāḥ suvírāḥ || 7 || 12 ||

(११) एकादशं सूक्तम्

(१–६) षडृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१३॥ यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति ।
आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः ॥१॥
त्वं होता मन्द्रतमो नो अध्रुगन्तर्देवो विदथा मर्त्येषु ।
पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वाम् ॥२॥
धन्या चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्म गृणते यजध्यै ।
वेपिष्ठो अङ्गिरसां यद्ध विप्रो मधु च्छन्दो भनति रेभ इष्टौ ॥३॥
अदिद्युतत्स्वपाको विभावाग्ने यजस्व रोदसी उरूची ।
आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसं पञ्च जनाः ॥४॥

11.

Yájasva hotar ishitó yájīyān ágne bádho marútām ná práyukti | á no mitráváruṇā násatyā dyávā hotráya prithiví vavrityāḥ || 1 || tvám hótā mandrátamo no adhrúg antár devó vidáthā mártyeshu | pāvakáyā juhvà váhnir āságne yájasva tanvàm táva svám || 2 || dhányā cid dhí tvé dhi-sháṇā váshṭi prá deváñ jánma griṇaté yájadhyai | vépi-shṭho áñgirasām yád dha vípro mádhu chandó bhánati re-bhá ishṭaú || 3 || ádidyutat sv ápāko vibhávágne yájasva ródasī urūcí | āyúm ná yám námasā rātáhavyā añjánti su-prayásam páñca jánāḥ || 4 ||

May you scatter our adversaries, augment our abundant store of wealth and may we, blessed with brave youths of character, enjoy happiness for a hundred winters. 7

11

O adorable Lord, the invoker, the most reverential and granter of blessings, may you being revered by us invoke the foe-destroying cosmic vital principles to come in aid of our holy synods and bring the never failing cosmic light and bliss, and the forces of heaven and earth. 1

O adorable Lord, you are divine invoker of cosmic forces amid mortals, most praise-worthy, never harming and bearer of oblations. May you constantly perform cosmic sacrifice of this universe with your purifying flames born as if out of your mouth. 2

O adorable Lord, our heart-felt craving for wealth and wisdom impels us to praise you, because your manifested form inspires the worshipper to honour the cosmic powers. The pious sage, the most earnest adorer amongst the preceptors, the poet, sings the sweet melodious songs at the solemn service. 3

The brilliant, adorable Lord is mature in wisdom, and most resplendent. May you offer honour to the wide-spread heaven and earth. All the well-fed, five categories of people, bearing oblations, propitiate you with homage as if you were a mortal guest. 4

वृञ्जे ह यन्नमसा बर्हिरग्नावयामि स्रुग्घृतवती सुवृक्तिः ।
अम्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः ॥५॥
दशस्या नः पुर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः ।
रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः ॥६॥

vriñjé ha yán námasā barhír agnáv áyāmi srúg ghritávatī suvriktíḥ | ámyakshi sádma sádane prithivyá́ áṣrāyi yajñáḥ sū́rye ná cákshuḥ || 5 || daṣasyá́ naḥ purvaṇīka hotar devébhir agne agníbhir idhānáḥ | rāyáḥ sūno sahaso vāvasāná́ áti srasema vrijánam ná́ṅhaḥ || 6 || 13 ||

(१२) द्वादशं सूक्तम्

(१–६) षडृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१४॥ मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै ।
अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा ततान ॥१॥
आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्सर्वतातेव नु द्यौः ।
त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै ॥२॥
तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत् ।
अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु ॥३॥

12.

Mádhye hótā duroṇé barhísho rā́ḷ agnís todásya ródasī yájadhyai | ayám sá sūnúḥ sáhasa ritávā dūrā́t sū́ryo ná ṣocíshā tatāna || 1 || á́ yásmin tvé sv ápāke yajatra yákshad rājan sarvátāteva nú dyaúḥ | trishadhásthas tatarúsho ná jáṅho havyá́ maghā́ni mā́nushā yájadhyai || 2 || téjishṭhā yásyāratír vanerā́ṭ todó ádhvan ná vridhasānó adyaut | adroghó ná dravitá́ cetati tmánn ámartyo ’vartrá óshadhīshu || 3 ||

When with reverence the grass of my worldly comforts is clipped to be dedicated as an oblation to the fire-divine and left, the well-trimmed ladle (of may soul), full of butter (of benevolence) then alone, the receptacle (the cosmic fire-altar) becomes complete on the surface of earth for the cosmic sacred rites—The sacrifice, verily, is related to the earth in the same way as eye to the sun. 5

O possessor of multiblazing flames, invoker of Nature's bounties, shining with brilliant radiance, bestow upon us riches; and may we, O source of strength, having overcome our adversaries envelop you with reverential homage. 6

12

The cosmic fire, the invoker of divine powers, the Lord of cosmic sacrifice, abides in the hearts of the institutor of the sacred works, who offers homage to heaven and earth. He is the source of strength, and the observer of truth. He over-spreads the world from afar, like the sun with light. 1

O most wise, adorable and resplendent cosmic fire, the worshipper offers homage to you at every sacred ceremony. May you, being present in all the three realms, move with the speed of the traverser of the sky, the sun, to convey the valuable oblations of men to the cosmic forces. 2

His pure and spreading radiance blazes in the forest, and shines with increasing intensity, like the sun on His celestial path. His glow rushes like the innoxious wind amongst the plants. Immortal and unimpeded, He lights up all things by His own lustre. 3

सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः ।
द्रुन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ॥४॥
अध स्मास्य पनयन्ति भासो वृथा यत्तक्षदनुयाति पृथ्वीम् ।
सद्यो यः स्पन्द्रो विषितो धवीयानृणो न तायुरति धन्वा राट् ॥५॥
स त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः ।
वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ॥६॥

sásmákebhir etárī ná ṣūshaír agní shṭave dáma á jātávedāḥ | drvànno vanván krátvā nárvosráḥ pitéva jārayáyi yajñaíḥ || 4 || ádha smāsya panayanti bháso vṛíthā yát tákshad anuyáti pṛithvím | sadyó yáḥ syandró víshito dhávīyān ṛiṇó ná tāyúr áti dhánvā rāṭ || 5 || sá tváṃ no arvan nídāyā víṣvebhir agne agníbhir idhānáḥ | véshi rāyó ví yāsi duchúnā mádema ṣatáhimāḥ suvírāḥ || 6 || 14 ||

(१३) त्रयोदशं सूक्तम्

(१–६) षडृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

॥१५॥ त्वद्विश्वा सुभग सौभगान्यग्ने वि यन्ति वनिनो न वयाः ।
श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् ॥१॥
त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः ।
अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्य देव भूरेः ॥२॥

13.

Tvád víṣvā subhaga saúbhagāny ágne ví yanti vaníno ná vayáḥ | ṣrushṭí rayír vájo vṛitratúrye divó vṛishṭír íḍyo rītír apám || 1 || tvám bhágo na á hí rátnam ishé párijmeva kshayasi dasmávarcāḥ | ágne mitró ná bṛihatá ṛitásyási kshattá vāmásya deva bhúreḥ || 2 ||

The cosmic fire, who knows all that exists, is propitiated in our dwellings by us and our friends like a steed for vigour. This fire feeds upon trees, and consumes forests, He fights with evil, like a champion. He is glorified by the praises in sacred ceremonies. 4

They glorify His glow in this world. When thinning the woods with ease, He spreads over the broad earth. He glides along unarrested, and rapid in movement, like a flying thief, He shines over the desert. 5

O quick-moving cosmic fire, kindled with all your fires, guard us from reproach. You bestow opulence and drive away adversaries. May we, along with descendents, brave and cultured, enjoy happiness through a hundred winters. 6

13

O auspicious adorable Lord, all beneficial works proceed from you like branches from the trunk of a tree. All benevolent wealth, including vigour in struggles against evils, and rain from sky, come through your blessings. Therefore, O sender of rains, you are glorified by all. 1

O divine adorable Lord, may you bestow upon us precious wealth. You are beautiful with your radiance, and swift like the circumambient wind. You, like the sun, are the upholder of eternal laws and giver of plentiful wealth. 2

स सत्पतिः शवसा हन्ति वृत्रमग्ने विप्रो वि पणेर्भर्ति वाजम् ।
यं त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि ॥३॥
यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट् ।
विश्वं स देव प्रति वारमग्ने धत्ते धान्यं पत्यते वसव्यैः ॥४॥
ता नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः ।
कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये ॥५॥

sá sátpatiḥ ṣávasā hanti vṛitrám ágne vípro ví panér bharti vā́jam | yáṃ tvám praceta ṛitajāta rāyā́ sajóshā náptrāpā́ṃ hinóshi || 3 || yás te sūno sahaso gīrbhír ukthaír yajñaír márto níṣitiṃ vedyā́naṭ | víṣvaṃ sá deva práti vā́ram agne dhatté dhānyàm pátyate vasavyaìḥ || 4 || tā́ nṛíbhya ā́ sauṣravasā́ suvīrā́gne sūno sahasaḥ pushyáse dhāḥ | kṛiṇóshi yác chávasā bhū́ri paṣvó váyo vṛíkāyāráye jásuraye || 5 ||

वद्मा सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजि नो दाः ।
विश्वाभिर्गीर्भिरभि पूर्तिमश्यां मदेम शतहिमाः सुवीराः ॥६॥

vadmá sūno sahaso no víhāyā ágne tokáṃ tánayaṃ vājí no dāḥ | víṣvābhir gīrbhír abhí pūrtím aṣyām mádema ṣatáhimāḥ suvírāḥ || 6 || 15 ||

(१४) चतुर्दशं सूक्तम्

(१–६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । (१–५) प्रथमादिपञ्चर्चामनुष्टुप्, (६) षष्ठ्या ऋचश्च शक्करी छन्दसी ॥

॥१६॥ अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः ।
भसन्नु ष प्र पूर्व्य इषं वुरीतावसे ॥१॥

14.

Agná yó mártyo dúvo dhíyaṃ jujósha dhītíbhiḥ | bhásan nú shá prá pūrvyá íshaṃ vurītávase || 1 ||

O adorable Lord, all-wise, the source of eternal truth, that man becomes the protector of the virtuous, and destroyer of his enemy by his strength, and that person alone crushes the might of evil forces with his wisdom, whom you, the consentient with the grandson of waters, inspire to achieve prosperity. 3

O adorable Lord, the source of strength, the person, who by praises, by prayers, and by selfless deeds, attracts your radiant fervour to his altar, enjoys all glory and prosperity, and abounds in precious treasures. 4

O source of strength, may you confer those abundant viands, excellent descendants, and those means of copious sustenance to devotee which you take away from a churlish and malignant adversary. 5

O adorable Lord, source of most powerful, may you be our councillor, and give us sons and grandsons, together with food. May I, by all my praises, obtain the fulfilment of my aspirations. May we, blessed with excellent descendants, enjoy happiness for a hundred winters. 6

14

May the person, who serves adorable Lord by devotion, worship, and praises, quickly become distinguished as the first amongst men, and acquire ample food for the support of his children. 1

अ॒ग्निरिद्धि प्रचे॑ता अ॒ग्निर्वे॒धस्त॑म॒ ऋषिः॑ ।
अ॒ग्निं होता॑रमीळते य॒ज्ञेषु॒ मनु॑षो॒ विशः॑ ॥२॥
नाना॒ ह्य॑ग्नेऽव॑से॒ स्पर्ध॑न्ते॒ रायो॑ अ॒र्यः ।
तूर्व॑न्तो॒ दस्यु॑मा॒यवो॑ व्र॒तैः शीक्ष॑न्तो अव्र॒तम् ॥३॥

agnír íd dhí práecetā agnír vedhástama ríshiḥ | agním hótāram īḷate yajñéshu mánusho víśaḥ || 2 || nắnā hy àgné 'vase spárdhante ráyo aryáḥ | tűrvanto dásyum āyávo vrataíḥ śíkshanto avratám || 3 ||

अ॒ग्निर॑प्सामृ॑ती॒षहं॑ वी॒रं द॑दाति॒ सत्प॑तिम् ।
यस्य॒ त्रस॑न्ति॒ शव॑सः सं॒चक्षि॒ शत्र॑वो भि॒या ॥४॥
अ॒ग्निर्हि वि॒द्मना॑ नि॒दो दे॒वो मर्त॑मुरु॒ष्यति॑ ।
स॒हावा॒ यस्यावृ॑तो र॒यिर्वाजे॒ष्ववृ॑तः ॥५॥
अच्छा॑ नो मित्रमहो देव दे॒वानग्ने॒ वोचः॑ सुम॒तिं रोद॑स्योः ।
वी॒हि स्व॒स्तिं सु॑क्षि॒तिं दि॒वो नॄन्द्वि॒षो अंहां॑सि दुरि॒ता त॑रेम॒ ता त॑रेम॒ तवाव॑सा तरेम ॥६॥

agnír apsắm ṛitīsháham vīrám dadāti sátpatim | yásya trásanti śávasaḥ saṃcákshi śátravo bhiyā́ || 4 || agnír hí vidmánā nidó devó mártam urushyáti | sahā́vā yásyā́vrito rayír vā́jeshv ávṛitaḥ || 5 || áchā no mitramaho — || 6 || 16 ||

Adorable Lord is most wise and cherisher of sacred works and a holy sage. Thoughtful people have been glorifying Him as the invoker of the cosmic forces to bless their selfless benevolent deeds. 2

Adorable Lord takes manifold treasures of disbelievers for the preservation of the worshippers. Faithful devotees triumph over wicked and unrighteous and humble him who does not abide by the prescribed conduct of life. 3

Adorable Lord bestows upon His worshippers such a descendant, who overcomes evil forces, protects virtuous, and at whose appearance, adversaries tremble through fear of his prowess. 4

The mighty, divine, and all-wise adorable Lord protects the pious devotee from reproach, and makes his path of glory and his wealth unrivalled. 5

O divine adorable Lord, revered as a friend, who abiding in heaven and earth, communicates our praises to the divines, conduct the offerer of adoration to domestic felicity, may we overcome our adversaries, our iniquities, our difficulties; may we overcome them by your protection. 6

(१५) पञ्चदशं सूक्तम्

(१–१९) एकोनविंशत्यृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज आङ्गिरसो वीतहव्यो वा ऋषिः । अग्निर्देवता । (१–२, ४–५, ७–९) प्रथमाद्वितीययोर्ऋचोश्चतुर्थीपञ्चम्योः सप्तमीनवम्योश्च जगती. (३, १५) तृतीयापञ्चदश्योः शक्वरी. (६) षष्ठ्या अतिशक्वरी. (१०–१४, १६, १९) दशम्यादिपञ्चानां षोडश्या एकोनविंश्याश्च त्रिष्टुप्. (१७) सप्तदश्या अनुष्टुप्. (१८) अष्टादश्याश्च बृहती छन्दांसि ॥

॥१७॥ इमम् षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृञ्जसे गिरा ।
वेतीद्दिवो जनुषा कच्चिदा शुचिर्ज्योक्चिदत्ति गर्भो यदच्युतम् ॥१॥
मित्रं न यं सुधितं भृगवो दधुर्वनस्पतावीड्यमूर्ध्वशोचिषम् ।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे ॥२॥
स त्वं दक्षस्यावृको वृधो भूरर्यः परस्यान्तरस्य तरुषः ।
रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः ॥३॥

15.

Imám ū shú vo átithim usharbúdham víṣvāsām viṣā́m pátim riñjase girā́ | vétī́d divó janúshā kác cid ā́ ṣúcir jyók cid atti gárbho yád ácyutam || 1 || mitrám ná yám súdhitam bhrígavo dadhúr vánaspátāv ī́dyam ūrdhváṣocisham | sá tvám súprīto vītáhavye adbhuta práṣastibhir mahayase divé-dive || 2 || sá tvám dákshasyāvrikó vridhó bhū́r aryáḥ párasyántarasya tárushaḥ | rāyáḥ sūno sahaso mártyeshv ā́ chardír yacha vītáhavyāya saprátho bharádvājāya sapráthaḥ || 3 ||

द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरम् ।
विप्रं न द्युक्षवचसं सुवृक्तिभिर्हव्यवाहमरतिं देवमृञ्जसे ॥४॥
पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच उषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥५॥

dyutānám vo átithim svàrṇaram agním hótāram mánushaḥ svadhvarám | vípram ná dyukshávacasam suvriktíbhir havyavā́ham aratím devám riñjase || 4 || pāvakáyā yáṣ citáyantyā kripā́ kshā́man rurucá usháso ná bhānúnā | tū́rvan ná yā́mann étaṣasya nū́ ráṇa ā́ yó ghriṇé ná tatrishāṇó ajáraḥ || 5 || 17 ||

15

May you O devotees, propitiate by praises the Lord, who is dear as a guest and whose glory wakes at the early dawn. He is the cherisher of all people. On all occasions, He comes as if from heaven and rests as an embryo (in wood). He remains embodiment of purity from eternity and instantly accepts the offerings presented to Him with reverence. 1

Spiritually enlightened sages regard this upward-flaming, adorable-divine, deposited in wood, as a friend. May He be pleased with dedicated offerer of oblations, who glorifies Him with praises every day. 2

You are unresisted, and benefactor of him who is skilled in sacred rites, and defender against his near or distant enemies. O ever-renowned Lord, may you grant wealth and a dwelling to selfless dedicated offerer of oblations, a bearer of spiritual enlightenment. 3

Propitiate with pious praises the radiant adorable fire-divine, who is your dear guest, the guide to heaven, and the invoker of Nature's bounties for the welfare of humanity. He, the divine, is the cherisher of noble deeds, the speaker of brilliant words like a learned sage, and the bearer of oblations. 4

Propitiate Him, the adorable Lord, who shines upon the earth with purifying and enlightening lustre, as the dawns shine with light; He is like a warrior, who, discomfiting His foes, quickly blazes forth in defence of virtuous instincts. He is satiated with food, and exempt from decay. 5

॥१८॥ अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि ।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः ॥६॥
समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ॥७॥
त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥८॥

agním-agnim vaḥ samídhā duvasyata priyám-priyam vo átithim griṇīsháṇi | úpa vo gīrbhír amṛ́tam vivāsata devó devéshu vánate hí vā́ryam devó devéshu vánate hí no dúvaḥ || 6 || sámiddham agním samídhā girā́ griṇe śúcim pāvakám puró adhvaré dhruvám | vípram hótāram puruvā́ram adrúham kavím sumnaír imahe jātávedasam || 7 || tvā́m dūtám agne amṛ́tam yugé-yuge havyavā́ham dadhire pāyúm ī́ḍyam | devā́sas ca mártāsas ca jā́grivim vibhúm viśpátim námasā ní shedire || 8 ||

विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे ।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥९॥
तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम ।
स यक्षद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत् ॥१०॥

vibhū́shann agna ubháyāñ ánu vratā́ dūtó devā́nām rájasī sám īyase | yát te dhītím sumatím āvriṇīmáhé 'dha smā nas trivárūthaḥ sivó bhava || 9 || tám suprátīkam sudṛ́śam svā́ñcam ávidvāṅso vidúshṭaram sapema | sá yakshad víśvā vayúnāni vidvā́n prá havyám agnír amṛ́teshu vocat || 10 || 18 ||

May you worship repeatedly the adorable Lord with dedication. He is ever your dear friend, and dear as guest. May you glorify with hymns the immortal Lord, for He is most divine among divine, and accepts our homage with love. 6

We glorify with praise the effulgent, adorable Lord, who is pure, purifying, and immortal. Let us celebrate with pleasant hymns the all-wise Lord, the invoker of Nature's bounties. He is revered by all. Verily, He is benevolent, omniscient and full of wisdom. 7

O adorable Lord, you have been in every age commanding the ways and works of the divine powers of both worlds as their envoy. You are immortal bearer of homage, beneficent, and worthy of praise. You are vigilant, pervading and the protector of mankind. Therefore all enshrine you in the chamber of their heart, as the fire is placed on a sacred altar. 8

O adorable Lord, envoy of Nature's bounties, you traverse both earth and heaven. When we lay claim to your regard, and gracious care, O guardian of the three regions, may you be auspicious to us. 9

We of little wisdom adore you, the most wise fire-divine, the well-formed, the well-looking, and the graceful-moving. May the Lord, who knows all things that are to be known, offer the cosmic sacrifice. May we announce the oblation to the immortals. 10

॥१९॥ तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिम् ।
यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया ॥११॥
त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥१२॥
अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः ।
देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा ॥१३॥

tám agne pāsy utá tám piparshi yás ta ā́naṭ kaváye ṣūra dhītím | yajñásya vā níṣitiṃ vóditiṃ vā tám ít priṇakshi ṣávasotá rāyā́ || 11 || tvám agne vanushyató ní pāhi tvám u naḥ sahasāvann avadyā́t | sáṃ tvā dhvasmanvád abhy ètu pā́thaḥ sáṃ rayí sprihayā́yyaḥ sahasrī́ || 12 || agnír hótā grihápatiḥ sá rā́jā víṣvā veda jánimā jātávedaḥ | devā́nām utá yó mártyānāṃ yájishṭhaḥ sá prá yajatām ritā́vā || 13 ||

अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा ।
ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥१४॥

ágne yád adyá viṣó adhvarasya hotaḥ pā́vakaṣoce vésh ṭvám hí yájvā | ritā́ yajāsi mahinā́ ví yád bhū́r havyā́ vaha yavishṭha yā́ te adyá || 14 ||

You cherish and protect that man who offers worship to you, O radiant and farseeing Lord. You endow him with strength and riches, who initiates and accomplishes selfless noble works. 11

O mighty Lord, may you guard us from the malignant, and preserve us from the wicked. O victorious, may our offerings reach you free from dishonour and may desirable riches reach us by thousands. 12

Our adorable Lord is the invoker of Nature's bounties, protector of homes, and a sovereign ruler. He knows all that is; He knows all that exists. He is the most assiduous performer of benevolent acts amongst mortals and divines.

May He, who is truth-incarnate, constantly perform the divine cosmic sacrifice. 13

O adorable Lord, minister of the sacrifice, bright with purifying lustre, may you approve of that worship, which is being celebrated by the institutor of the holy ceremonies. Verily, you are the doer of cosmic sacrifice. Therefore, may you inspire divine powers; and since by your greatness you are all-pervading, O ever-young, accept the offerings presented to you today. 14

अभि प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै ।
अवा नो मघवन्वाजसातावग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम ॥१५॥

अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम् ।
कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु ॥१६॥
इममु त्यमथर्ववदग्निं मन्थन्ति वेधसः । यमङ्कूयन्तमानयन्नमूरं श्याव्याभ्यः ॥१७॥

abhí práyāṅsi súdhitāni hí khyó ní tvā dadhīta ródasī yájadhyai | ávā no maghavan vájasātāv ágne víṣvāni duritá tarema tá tarema távávasā tarema || 15 || 19 ||

ágne víṣvebhiḥ svanīka devaír ū́rṇāvantam prathamáḥ sīda yónim | kulāyínaṃ ghṛitávantaṃ savitré yajñám naya yájamānāya sādhú || 16 || imám u tyám atharvavád agním manthanti vedhásaḥ | yám aṅkūyántam ā́nayann ámūraṃ ṣyāvyā̀bhyaḥ || 17 ||

जनिष्वा देववीतये सर्वताता स्वस्तये ।
आ देवान्वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः ॥१८॥
वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहन्तम् ।
अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सं शिशाधि ॥१९॥

jánishvā devávītaye sarvátātā svastáye | á devā́n vakshy amṛítāñ ṛitāvṛídho yajñám devéshu pispṛiṣaḥ || 18 || vayám u tvā gṛihapate janānām ágne ákarma samídhā bṛihántam | asthūrí no gā́rhapatyāni santu tigména nas téjasā sáṃ ṣiṣādhi || 19 || 20 ||

O bounteous Lord, may you inspect and bless the sacrificial viands duly deposited upon the altar of our noble deeds. Heaven and earth invoke you to perform cosmic sacrifice. O opulent Lord, protect us in struggles, whereby we may pass safe over all evils; and may we pass over those of a prior existence and trouble us. May we overcome them through your protection. 15

O adorable Lord, shining with your own splendour, may you enshrine the nest—like soft heart of man, bedewed with devotion, upon the altar lined with wool, a nest of perfumes and suffused with butter, and rightly convey to Nature's bounties the devotion of the institutor of the ceremony; —of the presenter of homage. 16

The holy devotees make efforts to re-establish firmly the glory of Lord and remove the glooms of ignorance. This faith is often shaken badly, but not lost altogether. 17

O adorable Lord, may your glorious faith be enshrined at our sacred works for the welfare of devotees. May you bring hither the immortal divine powers, the augmenters of the ceremonies. May the benefits of our fire ritual reach the environmental Nature's bounties. 18

O adorable Lord, the guardian of our family, we, amongst men, promote your glory with ever-increasing dedication. May our domestic fires be supplied with all that is essential, may you enliven us with brilliant radiance. 19

(१६) षोडशं सूक्तम्

(१–४८) अष्टचत्वारिंशदृचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । अग्निर्देवता । (१, ६) प्रथमाषष्ठ्योर्ऋचोर्वर्धमाना, (२–५, ७–२६, २८–४५) द्वितीयादिचतसृणां सप्तम्यादिविंशतेरष्टाविंश्याद्यष्टादशानाञ्च गायत्री, (२७, ४७–४८) सप्तविंश्याः सप्तचत्वारिंश्यष्टचत्वारिंश्योश्चानुष्टुप्, (४६) षट्चत्वारिंश्याश्च त्रिष्टुप् छन्दांसि ॥

॥२१॥ त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने ॥१॥
स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः । आ देवान्वक्षि यक्षि च ॥२॥
वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा । अग्ने यज्ञेषु सुक्रतो ॥३॥
त्वामीळे अध द्विता भरतो वाजिभिः शुनम् । ईजे यज्ञेषु यज्ञियम् ॥४॥
त्वमिमा वार्या पुरु दिवोदासाय सुन्वते । भरद्वाजाय दाशुषे ॥५॥

16.

Tvám agne yajñā́nām̐ hótā víśveshām̐ hitáḥ | devébhir mā́nushe jáne || 1 || sá no mandrā́bhir adhvaré jihvā́bhir yajā maháḥ | ā́ devā́n vakshi yákshi ca || 2 || vétthā hí vedho ádhvanaḥ patháś ca devā́ñjasā | ágne yajñéshu sukrato || 3 || tvā́m īḷe ádha dvitā́ bharató vājíbhiḥ śunám | ījé yajñéshu yajñíyam || 4 || tvám imā́ vā́ryā purú dívodāsāya sunvaté | bharádvājāya dāśúshe || 5 || 21 ||

॥२२॥ त्वं दूतो अमर्त्य आ वहा दैव्यं जनम् । शृण्वन्विप्रस्य सुष्टुतिम् ॥६॥
त्वामग्ने स्वाध्यो३ मर्तासो देववीतये । यज्ञेषु देवमीळते ॥७॥
तव प्र यक्षि संदृशमुत क्रतुं सुदानवः । विश्वे जुषन्त कामिनः ॥८॥

tvám̐ dūtó ámartya ā́ vahā daívyam̐ jánam | śriṇván víprasya sushṭutím || 6 || tvā́m agne svādhyò mártāso devá vītaye | yajñéshu devám īḷate || 7 || táva prá yakshi saṃdṛ́śam utá krátum̐ sudā́navaḥ | víśve jushanta kāmínaḥ || 8 ||

16

O adorable Lord, the inspirer of benevolent deeds, the divine powers honour you as the benefactor of all. You are the inspirer of men and mankind. 1

So, may you illumine the great cosmic powers with your exhilarating glories, and may you bring hither the divine forces and help them in their assigned functions. 2

O adorable Lord, creator, doer of great deeds, and the performer of cosmic sacrifice, you know the paths and ways, and how to travel and function with speed. 3

The nourisher, the household head, has been joyfully praising you for your two-fold functions (creative and sustaining) and has been worshipping you, O adorable, with sacrifices. 4

As you confer many of such blessings upon the servants of people, whilst they present libations, so now may you grant them the same to the actual offerer, the sustainer of the family with food and wealth. 5

O immortal messenger, may you bring hither the enlightened people, on hearing the adoration of the wise. 6

O adorable Lord, whilst engaged in noble deeds, the mortals of pious thoughts invoke you for the satisfaction of the enlightened ones. 7

O Lord, those who are liberal givers, and well-wishers of all, enjoy your splendour and perform the selfless deeds. May you bless them. 8

त्वं होता मनुर्हितो वह्निरासा विदुष्टरः । अग्ने यक्षि दिवो विशः ॥९॥
अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥१०॥

tvám hótā mánurhito váhnir āsā́ vidúshṭaraḥ | ágne yákshi divó víṣaḥ || 9 || ágna ā́ yāhi vītáye griṇānó havyádātaye | ní hótā satsi barhíshi || 10 || 22 ||

॥२३॥ तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य ॥११॥
स नः पृथु श्रवाय्यमच्छा देव विवाससि । बृहदग्ने सुवीर्यम् ॥१२॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥१३॥
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरन्दरम् ॥१४॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयं रणेरणे ॥१५॥

tám tvā samídbhir aṅgiro ghriténa vardhayāmasi | briháe chocā yavishṭhya || 11 || sá naḥ prithú ṣravā́yyam áchā deva vivāsasi | brihád agne suvíryam || 12 || tvám agne púshkarad ádhy átharvā nír amanthata | mūrdhnó víṣvasya vāghátaḥ || 13 || tám u tvā dadhyáññ ríshiḥ putrá īdhe átharvaṇaḥ | vritrahánam puraṃdarám || 14 || tám u tvā pāthyó vríshā sám īdhe dasyuhántamam | dhanaṃjayáṃ ráṇe-raṇe || 15 || 23 ||

O adorable Lord, ever a help to people, the bearer of offerings to Nature's bounties, as if by your own mouth, the most wise and the liberal giver, may you cherish the godly people by your blessings. 9

Having been praised by us, come O adorable Lord, to bless the dedicated devotee with prosperity. May you be seated in our innermost heart, O liberal giver. 10

O vital Lord, we augment your glory with fuel of austerity and oil of love. May your glory blaze high, O ever-young Lord. 11

O adorable Lord, verily bestow upon us extensive, respectful and great heroic vigour. 12

O fire-divine, after deep meditation and attrition, the resolute seeker has discovered you out from the lotus-leaf-like interspace, which is the head and the support of universe. 13

The thoughtful seers, and the resolute discoverers kindle your glory, O fire-divine, the destroyer of the formidable evils. 14

The virtuous sage, the showerer, kindles you, the destroyer of evil forces on the occasion of each and every struggle to win prosperity. 15

॥२४॥ एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥१६॥
यत्र क्व च ते मनो दक्षं दधस उत्तरम् । तत्रा सदः कृणवसे ॥१७॥
नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो । अथा दुवो वनवसे ॥१८॥
आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः ॥१९॥

éhy ū shú brávāṇi té 'gna itthétarā gíraḥ | ebhír vardhāsa índubhiḥ || 16 || yátra kvà ca te máno dáksham dadhasa úttaram | tátrā sádaḥ kriṇavase || 17 || nahí te pūrtám akshipád bhúvan nemānām vaso | áthā dúvo vanavase || 18 || ágnír agāmi bhárato vritrahá purucétanaḥ | dívodāsasya sátpatiḥ || 19 ||

स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना । वन्वन्नवातो अस्तृतः ॥२०॥
॥२५॥ स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता । बृहत्ततन्थ भानुना ॥२१॥
प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया । अर्च गाय च वेधसे ॥२२॥
स हि यो मानुषा युगा सीदद्धोता कविक्रतुः । दूतश्च हव्यवाहनः ॥२३॥
ता राजाना शुचिव्रतादित्यान्मारुतं गणम् । वसो यक्षीह रोदसी ॥२४॥

sá hí víṣvāti pắrthivā rayím dắṣan mahitvanắ | vanvánn ávāto ástritaḥ || 20 || 24 ||

sá pratnaván návīyasâgne dyumnéna saṃyátā | brihát tatantha bhānúnā || 21 || prá vaḥ sakhāyo agnáye stómam yajñám ca dhrishṇuyắ | árca gắya ca vedháse || 22 || sá hí yó mánushā yugắ sídad dhótā kavíkratuḥ | dūtáṣ ca havyavắhanaḥ || 23 || tắ rắjānā ṣúcivratâdityắn mārutam gaṇám | váso yákshīhá ródasī || 24 ||

O adorable Lord, may you be with us. We shall augment you with drops of divine love. 16

Where-so-ever and upon what-so-ever your kindness is directed, you make him eminent, and give uncommon vigour, and in his heart you make your own abode. 17

Let not the blaze of your full glory be distressing to the eye, O the giver of dwellings to your humble votaries; may you be pleased to accept our services. 18

Adorable Lord, the sustainer of all, the destroyer of the enemies of enlightened, the cognizant of all and the benign protector of people's servants, has been invoked hither by our praises. 19

Surpassing all earthly things, may He, unresisted and unassailed, destroy our enemies by His greatness, and bestow prosperity on us. 20

O adorable Lord, you have overspread this vast firmament with radiant concentrated lustre, always fresh and new. 21

May you sing praises, and offer worship, my friends, to the foe-discomfiting supreme adorable creator. 22

May the adorable Lord, the eternal invoker of Nature's bounties, the doer of wise deeds, the messenger of divine powers, and bearer of oblations, be with us as ever, whilst we perform selfless acts. 23

May you honour on this occasion the two regal divinities (the light and bliss or the sun and the ocean), the numerous suns, the company of vital winds, also heaven and earth. 24

वस्वी ते अग्ने संदृष्टिरिषयते मर्त्याय । ऊर्जो नपादमृतस्य ॥२५॥

॥२६॥ क्रत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वन्वन्त्सुरेक्णाः । मर्त आनाश सुवृक्तिम् ॥२६॥

ते ते अग्ने त्वोता इषयन्तो विश्वमायुः ।
तरन्तो अर्यो अरातीर्वन्वन्तो अर्यो अरातीः ॥२७॥

अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् । अग्निर्नो वनते रयिम् ॥२८॥

सुवीरं रयिमा भर जातवेदो विचर्षणे । जहि रक्षांसि सुक्रतो ॥२९॥

त्वं नः पाह्यंहसो जातवेदो अघायतः । रक्षा णो ब्रह्मणस्कवे ॥३०॥

vásvī te agne sáṃdrishṭir ishayaté mártyāya | ū́rjo napād amṛ́tasya || 25 || 25 ||

krátvā dā́ astu ṣréshṭho 'dyá tvā vanván surékṇāḥ | márta ānāṣa suvṛiktím || 26 || té te agne tvótā isháyanto víṣvam ā́yuḥ | táranto aryó árātīr vanvánto aryó árātīḥ || 27 || agnís tigména ṣocíshā yā́sad víṣvaṃ ny àtríṇam | agnír no vanate rayím || 28 || suvī́raṃ rayím ā́ bhara jā́tavedo vícarshaṇe | jahí rákshā́ṅsi sukrato || 29 || tváṃ naḥ pāhy áṅhaso jā́tavedo aghāyatáḥ | rákshā ṇo brahmaṇas kave || 30 || 26 ||

॥२७॥ यो नो अग्ने दुरेव आ मर्तो वधाय दाशति । तस्मान्नः पाह्यंहसः ॥३१॥

त्वं तं देव जिह्वया परि बाधस्व दुष्कृतम् । मर्तो यो नो जिघांसति ॥३२॥

भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य । अग्ने वरेण्यं वसु ॥३३॥

yó no agne durévа ā́ márto vadhā́ya dā́ṣati | tásmān naḥ pāhy áṅhasaḥ || 31 || tvám táṃ deva jihváyā pári bādhasva dushkṛ́tam | márto yó no jíghāṅsati || 32 || bharádvājāya sapráthaḥ ṣárma yacha sahantya | ágne vāreṇyaṃ vásu || 33 ||

O source of strength, The immortal adorable Lord, may your glorious radiance bestow food upon your mortal worshipper. 25

May the donor of the oblation, propitiating you by his acts today be exalted, and rendered very opulent: may such mortal be diligent in your praise. 26

O adorable Lord, may they who are protected by you, and who wish for themselves the whole term of life, fight down the malice of the foe and overcome the hostile assailants. 27

May the Lord, with His sharp flame, cast down each destructive devourer; may He grant us precious treasures. 28

O all-knowing, all-wise sage, bring us wealth with good posterity. O performer of benevolent deeds, destroy the demoniac forces. 29

Preserve us, O omniscient Lord, from sin; O poet of the divine verses, protect us from the malevolent. 30

O Lord, may you defend us from sin, and the malevolent mortal, who threatens us with murderous weapon. 31

O fire-divine, may you drive from us with your flame that evil doer, the mortal who seeks to kill us. 32

O subduer of adversaries, grant infinite happiness and most agreeable wealth to the person who uses his riches for the service of others. 33

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥३४॥
गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे । सीदन्नृतस्य योनिमा ॥३५॥

॥२७॥ ब्रह्म प्रजावदा भर जातवेदो विचर्षणे । अग्ने यद्दीदयद्दिवि ॥३६॥
उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत । अग्ने ससृज्महे गिरः ॥३७॥
उप च्छायामिव घृणेरगन्म शर्म ते वयम् । अग्ने हिरण्यसंदृशः ॥३८॥

agnír vritrā́ṇi jaṅghanad draviṇasyúr vipanyáyā | sámiddhaḥ sukrá áhutaḥ || 34 || gárbhe mātúḥ pitúsh pitā́ vididyutānó akshárc | sídann ritásya yónim á || 35 || 27 ||

bráhma prajávad á bhara jātavedo vícarshaṇe | ágne yád dīdáyat diví || 36 || úpa tvā raṇvásaṃdrisam práyasvantaḥ sahaskrita | ágne sasrijmáhe gíraḥ || 37 || úpa chāyám iva ghríṇer áganma sárma te vayám | ágne híraṇyasaṃdrisaḥ || 38 ||

य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः । अग्ने पुरो रुरोजिथ ॥३९॥
आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति । विशामग्निं स्वध्वरं ॥४०॥

॥२८॥ प्र देवं देववीतये भरता वसुवित्तमम् । आ स्वे योनौ नि षीदतु ॥४१॥
आ जातं जातवेदसि प्रियं शिशीतातिथिम् । स्योन आ गृहपतिम् ॥४२॥

yá ugrá iva sarvahá tigmásringo ná váṃsagaḥ | ágne púro rurójitha || 39 || á yáṃ háste ná khādínaṃ síśuṃ jātáṃ ná bíbhrati | visám agníṃ svadhvarám || 40 || 28 ||

prá deváṃ devávītaye bhárata vasuvíttamam | á své yónau ní shīdatu || 41 || á jātám jātávedasi priyáṃ sisītátithim | syoná á grihápatim || 42 ||

May radiant, adorable Lord, glorified by virtuous actions of devotees, propitiated by praise, and served with dedication, destroy all adversaries. 34

He is radiant in the embryo of maternal (earth), also on the imperishable altar, and is the cherisher of the paternal heaven. He is always present with us in an inner conscience, the seat of holy law. 35

O omniscient Lord, all-beholder, bring to us food and progeny, such nourishing elements, as may shine to heaven. 36

O resplendent fire-divine, offering readily inflammable, food. We enkindle you from time to time by our prayers. 37

O resplendent Lord, glittering like gold, we come to you for shelter, as men seek shade, to avoid scorching heat. 38

O adorable Lord, you are like a fierce archer, or like a sharp-horned bull, capable of breaking the forts of evils. 39

May we worship adorable Lord, whom priests bear in their arms like an infant, newly-born babe; He is the consumer of holy offerings of men. 40

May you enshrine the divine Lord, the bestower of infinite wealth, to receive the favour of Nature's bounties. Let Him be seated in the chamber of your heart, His appropriate seat. 41

May you welcome Him like a beloved guest as soon as He is revealed and enshrine the Lord, the head of the family as if, in the soft corner of your heart. 42

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्ति मन्यवे ॥४३॥
अच्छा नो याह्या वहाभि प्रयांसि वीतये । आ देवान्त्सोमपीतये ॥४४॥
उदग्ने भारत द्युमदजस्रेण दविद्युतत् । शोचा वि भाह्यजर ॥४५॥

ágne yukshvá hí yé távāsvaso deva sādhávaḥ | áram váhanti manyáve || 43 || ácha no yāhy á vahābhí práyāṅsi vītáye | á deván sómapītaye || 44 || úd agne bhārata dyumád ájasreṇa dávidyutat | ṣócā ví bhāhy ajara || 45 || 29 ||

॥३०॥ वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान् ।
होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत ॥४६॥
आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि ।
ते ते भवन्तूक्षण ऋषभासो वशा उत ॥४७॥
अग्निं देवासो अग्रियमिन्धते वृत्रहन्तमम् ।
येना वसून्याभृता तृळ्हा रक्षांसि वाजिना ॥४८॥

vītí yó devám márto duvasyéd agním īḷītādhvaré havíshmān | hótāram satyayájam ródasyor uttānáhasto námasā́ vivāset || 46 || á te agna ṛicá havír hṛidā́ tashṭám bharāmasi | té te bhavantūkshána ṛishabháso vaṣā́ utá || 47 || agním deváso agriyám indhate vṛitrahántamam | yénā vásūny ábhṛitā tṛiḷhá rákshāṅsi vājínā || 48 || 30 ||

Harness, O divine Lord, your well-trained vital forces, who bear you quickly to our benevolent desired ends. 43

Come, O Lord, towards us and bring along with you the divine powers, for participation and enjoyment. 44

Blaze up, O Lord, bearer of homage. May you shine undecaying, O radiant Lord; shine with undecaying lustre. 45

Who-so-ever offers homage to any of the powers, let him at his ceremony worship with uplifted hands the adorable Lord, the invoker of heaven and earth, the performer of the sacrifice with the oblations of truth. 46

We offer to you, O Lord, the homage issuing forth from our hearts, and transmitted in the words of the Vedic verses. May the virile bulls, bullocks and cows be dear to you as your own. 47

The enlightened devotees kindle fire-divine, the prime inspirer, the one who dispels the clouds of ignorance, reprocures for us the lost wisdom and destroys evil tendencies. 48

(१७) सप्तदशं सूक्तम्

(१–१५) पञ्चदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । (१–१४) प्रथमादिचतुर्दशर्चां त्रिष्टुप्, (१५) पञ्चदश्याश्च द्विपदा त्रिष्टुप् छन्दसी ॥

॥ हरिः ॐ ॥

॥१॥ पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान इन्द्र ।
वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रममित्रिया शवोभिः ॥१॥
स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनाम् ।
यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान् ॥२॥
एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि ॥३॥

17.

Píbā sómam abhí yám ugra tárda ūrvám gávyam máhi griṇāná indra | ví yó dhrishṇo vádhisho vajrahasta víṣvā vritrám amitríyā ṣávobhiḥ || 1 || sá īm pāhi yá rijīshí tárutro yáḥ ṣípravān vrishabhó yó matīnám | yó gotrabhíd vajrabhríd yó harishṭhāḥ sá indra citrán abhí trindhi vájān || 2 || evá pāhi pratnáthā mandatu tvā ṣrudhí bráhma vāvridhásvotá gīrbhíḥ | āvíḥ sūryam kriṇuhí pīpihísho jahí ṣátrūnr abhí gá indra trindhi || 3 ||

ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम् ।
महामनूनं तवसं विभूतिं मत्सरासो जर्हृषन्त प्रसाहम् ॥४॥
येभिः सूर्यमुषसं मन्दसानोऽवासयोऽप दृळ्हानि दर्द्रत् ।
महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसस्परि स्वात् ॥५॥

té tvā mádā brihád indra svadhāva imé pītá ukshayanta dyumántam | mahám ánūnam tavásam víbhūtim matsaráso jarhrishanta prasáham || 4 || yébhiḥ sūryam ushásam mandasānó 'vāsayó 'pa driḷháni dárdrat | mahám ádrim pári gá indra sántam nutthá ácyutam sádasas pári svát || 5 || 1 ||

17

O powerful resplendent self, be delighted by the draught of spiritual joy, inspired by which, you restore the lost treasure of knowledge, and subdue evil tendencies. O possessor of adamantine will power, you overcome the devil of ignorance and all obstructive forces. 1

Cherish, O innerself, the preserver, the possessor of beautiful form, the showerer of blessings on those who praise you; the breaker of formidable obstructions, the user of adamantine will power and the controller of sense organs. May you relish our spiritual joy and bestow upon us all sorts of nourishment. 2

Drink it as of old, and may it exhilarate you. Hear our prayer, and be exalted by our praises; make the sun of spiritual radiance visible; provide us nourishment, and destroy our enemies, and restore the subdued wisdom. 3

Abounding in knowledge, O resplendent soul, let these exhilarating experiences inspire you exceedingly. O mighty one, let the inebriating joy delight you, who are deficient in no way and are powerful, manifold, and the overcomer of evil forces. 4

O innerself, through the exhilaration of this spiritual joy, you have given splendour to the sun and the dawn, in order to drive away the gloom of ignorance. Your light penetrates the rocks of formidable obstructions, which have concealed the true knowledge. 5

॥२॥ तव॒ क्रत्वा॒ तव॒ तद्दंसना॑भिरा॒मासु॑ प॒क्वं शच्या॒ नि दी॑धः ।
औ॑र्णो॒र्दुर॑ उ॒स्रिया॑भ्यो॒ वि दृ॒ळ्होदू॒र्वाद्गा अ॑सृजो॒ अङ्गि॑रस्वान् ॥६॥

प॒प्राथ॒ क्षां महि॒ दंसो॒ व्यु१॒॑र्वीमुप॒ द्यामृ॒ष्वो बृ॒हदि॑न्द्र स्तभायः ।
अधा॑रयो॒ रोद॑सी दे॒वपु॑त्रे प्र॒त्ने मा॒तरा॑ य॒ह्वी ऋ॒तस्य॑ ॥७॥
अध॑ त्वा॒ विश्वे॑ पु॒र इ॑न्द्र दे॒वा एकं॑ त॒वसं॑ दधिरे॒ भरा॑य ।
अदे॑वो॒ यद॒भ्यौहि॑ष्ट दे॒वान्त्स्व॑र्षाता वृणत॒ इन्द्र॒मत्र॑ ॥८॥

táva krátvā táva tád daṅsánābhir āmā́su pakvám̐ śácyā ní dīdhaḥ | aúrṇor dúra usríyābhyo ví dṛiḷhód ūrvā́d gā́ asṛijo ā́ṅgirasvān || 6 || paprā́tha kshā́m máhi dáṅso vy ùrvī́m úpa dyā́m ṛishvó bṛihád indra stabhāyaḥ | ádhārayo ródasī devápūtre pratné mātárā yahvī́ ṛitásya || 7 || ádha tvā víśve purá indra devā́ ékam̐ tavásam̐ dadhire bhárāya | ádevo yád abhy aúhishṭa devā́n svàrshātā vṛiṇata índram átra || 8 ||

अध॒ द्यौश्चि॑त्ते॒ अप॒ सा नु वज्रा॑द्द्वि॒ताऽन॑मद्भि॒यसा॒ स्वस्य॑ म॒न्योः ।
अहिं॒ यदिन्द्रो॑ अ॒भ्योह॑सा॒नं नि चि॑द्वि॒श्वायुः॑ श॒यथे॑ ज॒घान॑ ॥९॥
अध॒ त्वष्टा॑ ते म॒ह उ॑ग्र॒ वज्रं॑ स॒हस्र॑भृष्टिं ववृ॒तच्छ॒ताश्रि॑म् ।
निका॑मम॒रम॑णसं॒ येन॒ नव॑न्त॒महिं॒ सं पि॑ण॒गृजी॑षिन् ॥१०॥

ádha dyaúś cit te ápa sā́ nú vájrād dvitā́namad bhiyásā svásya manyóḥ | áhim̐ yád índro abhy óhasānam̐ ní cid viśvā́yuḥ śayáthe jaghā́na || 9 || ádha tváshṭā te mahá ugra vájram̐ sahásrabhṛishṭim̐ vavṛitac chatā́śrim | níkāmam arámaṇasam̐ yéna návantam áhim̐ sám piṇag ṛijīshin || 10 || 2 ||

By your wisdom, by your deeds, through your power, you develop the mature wisdom in the immature mind, you open the strong doors for fresh thinking. Associated with vital energies of body, you liberate thoughts from their bondage. 6

O soul, you have filled the whole body with your functions. You the superior, has given support to the activity of mind. You sustain the body and mind both, whose children are the sense organs and who are the old and mighty parents of sacrifice of our physical existence. 7

All the senses accept you, O inner-self, as their mighty chief for fighting life's battle in front. When impious vices assail the senses, the vital complex of body gives support to the inner-self in the conflict of life. 8

When the inner-self the giver of strength, strikes the assailing dragon of vices, the mind bows down in the two-fold dread of your resolute will power, and your personal wrath. 9

Mighty inner-self, the architect of universe, constructs for you the spiritual weapon, which is like a thousand edged, the hundred-angled thunderbolt, wherewith you crush the ambitious, audacious, loud-shouting dragon of ignorance. 10

॥३॥

वर्धान्यं विश्वे मरुतः सजोषाः पचच्छतं महिषाँ इन्द्र तुभ्यम् ।
पूषा विष्णुस्त्रीणि सरांसि धावन्वृत्रहणं मदिरमंशुमस्मै ॥११॥
आ क्षोदो महि वृतं नदीनां परिष्ठितमसृज ऊर्मिमपाम् ।
तासामनु प्रवत इन्द्र पन्थां प्रार्दयो नीचीरपसः समुद्रम् ॥१२॥
एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम् ।
सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात् ॥१३॥

várdhān yáṃ víṣve marútaḥ sajóshāḥ pácac chatáṃ mahishā́ñ indra túbhyam | pūshā́ víshṇus trī́ṇi sárāñsi dhāvan vṛitrahánam madirám añṣúm asmai || 11 || ā́ kshódo máhi vṛitáṃ nadī́nām párishṭhitam asṛija ūrmím apā́m | tā́sām ánu praváta indra pánthām prā́rdayo nī́cīr apásaḥ samudrám || 12 || evā́ tā́ víṣvā cakṛivā́ñsam índram mahā́m ugrám ajuryáṃ sahodā́m | suvī́raṃ tvā svāyudháṃ suvájram ā́ bráhma návyam ávase vavṛityāt || 13 ||

स नो वाजाय श्रवस इषे च राये धेहि द्युमत इन्द्र विप्रान् ।
भरद्वाजे नृवत इन्द्र सूरीन्दिवि च स्मैधि पार्ये न इन्द्र ॥१४॥
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥१५॥

sá no vā́jāya ṣrávasa ishé ca rāyé dhehi dyumáta indra víprān | bharádvāje nṛiváta indra sūrī́n diví ca smaidhi pā́rye na indra || 14 || ayā́ vā́jaṃ deváhitaṃ sanema mádema ṣatáhimāḥ suvī́rāḥ || 15 || 3 ||

O inner-self, all the vital faculties of human body, with one accord, exalt you. Hundreds of great gifts are provided to you by the all pervading and all sustaining vital breaths. May the three joy-giving streams of nectar flow to him for exhilaration and cure. 11

You set free the rushing channels of thoughts, the arrested and flooded ones. You direct them to their downward paths; you send them rapidly down to the ocean. 12

O inner-self, you are the source of all these faculties, you are mighty, formidable, undecaying, and the giver of strength; you are brave and well-armed, the bearer of resolute will-power; may our new prayer bring you to our protection. 13

May you, O resplendent Lord, uphold us, the devout, for the sake of food, for sustenance, for nourishment, for wealth; bestow upon the wise devotees pious posterity, with numerous attendants; be with us, O inner-self, on the day of trial. 14

May we, by this prayer, obtain food by your grace; may we, blessed with excellent progeny, be happy for a hundred winters. 15

(१८) अष्टादशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥४॥ तमु ष्टुहि यो अभिभूत्योजा वन्वन्नवातः पुरुहूत इन्द्रः ।
अषाळ्हमुग्रं सहमानमाभिर्गीर्भिर्वर्ध वृषभं चर्षणीनाम् ॥१॥
स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी ।
बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत्सहावा ॥२॥
त्वं ह नु त्यददमायो दस्यूँरेकः कृष्टीरवनोरार्याय ।
अस्ति स्विन्नु वीर्यं तत्त इन्द्र न स्विदस्ति तदृतुथा वि वोचः ॥३॥

18.

Tám u shṭuhi yó abhíbhūtyojā vanvánn ávātaḥ puruhūtá índraḥ | áshāḷham ugrám sáhamānam ābhír gīrbhír vardha vrishabhám carshaṇīnám || 1 || sá yudhmáḥ sátvā khajakrít samádvā tuvimrakshó nadanumā́ñ rijīshī́ | bribád-reṇuś cyávano mā́nushīṇām ékaḥ krishṭīnā́m abhavat sahā́vā || 2 || tvám ha nú tyád adamāyo dásyūñr ékaḥ krishṭír avanor ā́ryāya | ásti svin nú vīryàm tát ta indra ná svid asti tád rituthā́ ví vocaḥ || 3 ||

सदिद्धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस्तुरस्य ।
उग्रमुग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतुरो बभूव ॥४॥
तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमङ्गिरोभिः ।
हन्नच्युतच्युद्दस्मेषयन्तमृणोः पुरो वि दुरो अस्य विश्वाः ॥५॥

sád íd dhí te tuvijātásya mánye sáhaḥ sahishṭha turatás turásya | ugrám ugrásya tavásas távīyó 'radhrasya radhratúro babhūva || 4 || tán naḥ pratnám sakhyám astu yushmé itthā́ vádadbhir valám áṅgirobhiḥ | hánn acyutacyud dasmesháyantam riṇóḥ púro ví dúro asya víśvāḥ || 5 || 4 ||

18

May you adore the resplendent Lord, who is invoked by many, is formidable in vigour, the destroyer of enemies and unharmed by foes and magnify His glory through these hymns. He is the one, whose laws cannot be transcended and who is strong, victorious and showerer of benefits on mankind. 1

He is ever the combatant, heroic, impartial, sympathetic, loud-voiced, benefactor of everyone, straight forward, The one who whirls up the dust high, sympathiser and the sole protector of human race. 2

O Lord, you are the one who alone dominates over the evil, subdues the vicious forces and rescues virtuous men. Is this or is it not your accomplishments O Lord? If it be not, then declare it now, without reservation. 3

O powerful, resplendent Lord, I believe that this power is always within you, which is manifest in your benevolent deeds. You are the enemy of the animosity; you are strong of the strong, most mighty of the mighty and conquerer of the apparently unassailable evil. 4

May our eternal bond of friendship with you and vital forces endowed with strength be determined. O wondrous, the caster down of firm rocks of darkness, may you destroy the fresh strongholds of evils and force open the cities and all the gates. 5

स हि धीभिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये ।
स तोकसाता तनये स वज्री वितन्तसाय्यो अभवत्समत्सु ॥६॥
स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे ।
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः ॥७॥

sá hí dhībhír hávyo ásti ugrá īṣānakrín mahatí vritratū́rye | sá tokásātā́ tánaye sá vajrí vitantasā́yyo abhavat samátsu || 6 || sá majmánā jánima mā́nushāṇām ámartyena nā́mnáti prá sarsre | sá dyumnéna sá ṣávasotá rāyā́ sá vīryèṇa nrítamaḥ sámokāḥ || 7 ||

स यो न मुहे न मिथू जनो भूत्सुमन्तुनामा चुमुरिं धुनिं च ।
वृणक्पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नू चित् ॥८॥
उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिन्द्र तिष्ठ ।
धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मन्द पुरुदत्र मायाः ॥९॥
अग्निर्न शुष्कं वनमिन्द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा ।
गम्भीरय ऋष्वया यो रुरोजाध्वानयद्दुरिता दम्भयच्च ॥१०॥

sá yó ná muhé ná míthū jáno bhū́t sumántunāmā cúmurim dhúnim ca | vriṇák píprum ṣámbaram ṣúshṇam índraḥ purā́m cyautnā́ya ṣayáthāya nū́ cit || 8 || udā́vatā tvákshasā pányasā ca vritrahátyāya rátham indra tishṭha | dhishvá vájram hásta ā́ dakshiṇatrā́bhí prá manda purudatra māyā́ḥ || 9 || agnír ná ṣúshkam vánam indra hetī́ rákshho ní dhakshy aṣánir ná bhīmā́ | gambhīráya rishváyā yó ruróјādhvānayad duritā́ dambháyac ca || 10 || 5 ||

He the supreme Lord is to be invoked through these sacred hymns, while He shows His strength in conquering evil forces. He has adamantine will power to wield, and is the one who is to be glorified in conflicts for the sake of sons and grandsons. 6

He with His immortal, foe-humiliating might promote the capacity of all human generations to multiply. He, the chief-leader, dwells in the universe with splendour, with glory, valour and riches. 7

The supreme Lord destroys those who are greedy, proud, selfish, cruel, violent and suckers. He is strong enough to crush the guile; he never goes astray, and is never false. He promptly exerts to over-throw the castles of evils. 8

O resplendent Lord, may you with your praiseworthy and laudable might, ascend your chariot to destroy the devil of ignorance. In your right hand, you hold fast the formidable punitive justice and shatter delusions around us. 9

O resplendent Lord, your fearful adamantine bolt of justice burns to ashes all ill-tendencies, in like manner as fire consumes dry trees. With your great, resistless and mighty power, you destroy all evil passions. 10

॥६॥

आ सहस्रं पथिभिरिन्द्र राया तुविद्युम्न तुविवाजेभिरर्वाक् ।
याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः ॥११॥
प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः ।
नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः ॥१२॥

á sahásram pathíbhir indra rāyā́ túvidyumna tuvivā́jebhir arvā́k | yāhí sūno sahaso yásya nū́ cid ádeva ī́ṣe puruhūta yótoḥ || 11 || prá tuvidyumnásya sthávirasya ghṛ́shver divó rarapṣe mahimā́ pṛithivyā́ḥ | nā́sya ṣátrur ná pratimā́nam asti ná pratishṭhíḥ purumāyásya sáhyoḥ || 12 ||

प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथिग्वमस्मै ।
पुरू सहस्रा नि शिशा अभि क्षामुत्तूर्वयाणं धृषता निनेथ ॥१३॥
अनु त्वाहिघ्ने अध देव देवा मदन्विश्वे कवितमं कवीनाम् ।
करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः ॥१४॥
अनु द्यावापृथिवी तत्त ओजोऽमर्त्या जिहत इन्द्र देवाः ।
कृष्वा कृत्नो अकृतं यत्ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः ॥१५॥

prá tát te adyā́ káraṇaṃ kṛitám bhūt kútsaṃ yád āyúm atithigvám asmai | purū́ sahásrā ní ṣiṣā abhí kshā́m út tū́rvayāṇaṃ dhṛishatā́ ninetha || 13 || ánu tvā́highne ádha deva devā́ mádan víṣve kavítamaṃ kavīnā́m | káro yátra várivo bādhitā́ya divé jánāya tanvè gṛiṇānáḥ || 14 || ánu dyā́vāpṛithivī́ tát ta ójó 'martyā jihata indra devā́ḥ | kṛishvā́ kṛitno ákṛitaṃ yát te ásty ukthám návīyo janayasva yajñaíḥ || 15 || 6 ||

O most opulent resplendent Lord, source of strength, invoked by all, may you come here by thousand paths, bestowing thousands of riches; no demoniac power is able to keep you at a distance. 11

The vastness of this opulent ancient, the demolisher, exceeds that of the heaven and earth. There is no opponent, no counterpart, no rival to Him, the victorious one, abounding in wisdom. 12

The blessings, you bring for the men of intuitive knowledge, men of perseverance and the renounced persons are being celebrated today and you have granted many thousands of gifts to them and you quickly elevate the most rapid and active devotee over the earth by your power. 13

O resplendent Lord, the wisest of the wise, all enlightened sages have glorified you since you destroy the devil of ignorance, deadly as serpent. When propitiated, you liberally give wealth to the distressed worshipper and happiness to his people. 14

O resplendent Lord, all immortal powers of the heaven and the earth acknowledge your might. O doer of many deeds, now may you accomplish that which is left undone so far. May you give us a new hymn to be sung at your worship. 15

(१९) एकोनविंशं सूक्तम्

(१–१३) त्रयोदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥७॥ महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥१॥
इन्द्रमेव धिषणा सातये धाद्बृहन्तमृष्वमजरं युवानम् ।
अषाळ्हेन शवसा शूशुवांसं सद्यश्चिद्यो वावृधे असामि ॥२॥

19.

Mahán índro nriváḍ á carshaniprá utá dvibárhā amináḥ sáhobhiḥ | asmadryàg vāvridhe vīryàyorúḥ prithúḥ súkritaḥ kartríbhir bhūt || 1 || índram evá dhishánā sātáye dhād brihántam rishvám ajáram yúvānam | áshāḷhena ṣávasā ṣūṣuvánsam sadyáṣ cid yó vāvridhé ásāmi || 2 ||

पृथू करस्ना बहुला गभस्ती अस्मद्र्यक्सं मिमीहि श्रवांसि ।
यूथेव पश्वः पशुपा दमूना अस्माँ इन्द्राभ्या ववृत्स्वाजौ ॥३॥
तं व इन्द्रं चतिनमस्य शाकैरिह नूनं वाजयन्तो हुवेम ।
यथा चित्पूर्वे जरितार आसुरनेद्या अनवद्या अरिष्टाः ॥४॥
धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः ।
सं जग्मिरे पथ्या रायो अस्मिन्त्समुद्रे न सिन्धवो यादमानाः ॥५॥

prithú karásnā bahulá gábhastī asmadryàk sám mimīhi ṣrávānsi | yūthéva paṣváḥ paṣupá dámūnā asmán indrābhy á vavritsvājaú || 3 || tám va índram catínam asya ṣākair ihá nūnám vājayánto huvema | yáthā cit púrve jaritára āsúr ánedyā anavadyá árishṭāḥ || 4 || dhritávrato dhanadáḥ sómavriddhaḥ sá hí vāmásya vásunaḥ purukshúḥ | sám jagmire pathyà ráyo asmin samudré ná síndhavo yádamānāḥ || 5 || 7

19

May the great resplendent Lord, who is divine as an emperor, come here; may He who is Lord of the two regions, uninjurable by efforts, increase for heroism in our presence. May He who is of great personality and eminent in quality be greeted by the performers of pious acts. 1

Our prayer inspires the resplendent Lord to shower on us ample gifts. Born with broad-mindedness, full of inspirations, ageless, undecaying and endowed with unsurpassable power, He reaches the apex of His glory within no time. 2

O resplendent, extend your great resolute and youthful philanthropic hands to provide us with glory and food, and guide us through the conflicts of life as a cowherd steers his cattle. 3

Now for the gain of strength, we invoke you, the renowned resplendent Lord, on this occasion, who, along with His allies, is the destroyer of enemies. May we, desirous of wealth and food, become free from all blames, irreproachable and uninjured, as those who have been singing of old His praises. 4

He is resolute in His duties, full of ecstasy and joy, giver of wealth and wisdom, possessor of boundless food to feed us. All paths, that lead to riches, unite in Him, like rivers flowing into the ocean. 5

॥८॥ शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रम् ।
विश्वा द्युम्ना वृष्ण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै ॥६॥
यस्ते मदः पृतनाषाळमृध्र इन्द्र तं न आ भर शूशुवांसम् ।
येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः ॥७॥
आ नो भर वृषणं शुष्ममिन्द्र धनस्पृतं शूशुवांसं सुदक्षम् ।
येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामीँरजामीन् ॥८॥

ṣávishṭhaṃ na á bhara ṣūra ṣáva ójishṭham ójo abhibhūta ugrám | víṣvā dyumná vríshṇyā mánushāṇām asmabhyaṃ dā harivo mādayádhyai || 6 || yás te mádaḥ pritanāshāḷ ámridhra índra táṃ na á bhara ṣūṣuváṅsam | yéna tokásya tánayasya sātaú maṅsīmáhi jigīváṅsas tvótāḥ || 7 || á no bhara vríshaṇaṃ ṣúshmam indra dhanaspritaṃ ṣūṣuváṅsaṃ sudáksham | yéna váṅsāma prítanāsu ṣátrūn távotíbhir utá jāmíṅr ájāmīn || 8 ||

आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥९॥
नृवत्त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ।
ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महि स्थूरं बृहन्तम् ॥१०॥

á te ṣúshmo vrishabhá etu paṣcád óttarád adharád á purástāt | á viṣváto abhí sám etv arváṅ índra dyumnáṃ svàrvad dhehy asmé || 9 || nrivát ta indra nrítamābhir ūtí vaṅsīmáhi vāmáṃ ṣrómatebhiḥ | íkshe hí vásva ubháyasya rājan dhá rátnam máhi sthūrám brihántam || 10 ||

O brave one, Lord of vigour and strength, may you, enrich us with the mightiest might; bless us with the potent force, that would enable us to subdue sinful tendencies. Vouchsafe all splendid vigorous powers, befitting of men, to make us full of joy. 6

O resplendent, bless us with such beneficient and rapturous, indefeatable sense of joy as to enable us to conquer evils, and under your protection may we emerge triumphant. With gladdened hearts, we beg of you to endow us with children and grandchildren. 7

O resplendent, bestow on us the heroic vigour, skill and strength, that will enable us to obtain affluence, wherewith, through your assistance, we may conquer such evil persons, kins or strangers, as obstruct our ways through conflicts. 8

O illustrious one, let invigorating strength, emerging out of you, come from behind or from front, from above or from below. From every side may it come. May you shower on us light and happiness. 9

O illustrious one, you are an emperor with supreme authority, and the Lord of material and divine worlds. You are the master of vast and boundless heavenly treasures. May we, with your heroic aid and protection win splendrous fame and prosperity. 10

मुरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥११॥
जनं वज्रिन्महि चिन्मन्यमानमेभ्यो नृभ्यो रन्धया येष्वस्मि ।
अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु ॥१२॥
वयं त एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर इत्स्याम ।
घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः ॥१३॥

marutvántaṃ vṛishabháṃ — || 11 || jánaṃ vajrin máhi cin mányamānam ebhyó nṛíbhyo randhayā yéshv ásmi | ádhā hí tvā pṛithivyā́ṃ ṣū́rasātau hávāmahe tánaye góshv apsú || 12 || vayáṃ ta ebhíḥ puruhūta sakhyaíḥ ṣátroḥ-ṣatror úttara ít syāma | ghnánto vṛitrā́ṇy ubháyāni ṣūra rāyā́ madema bṛihatā́ tvótāḥ || 13 || ४ ||

(२०) विंशं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । (१-६, ८-१३) प्रथमादितृचद्वयस्याष्टम्यादितृचद्वयस्य च त्रिष्टुप्, (७) सप्तम्याश्च विराट् छन्दसी ॥

॥९॥ द्यौर्न य इन्द्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु जनान् ।
तं नः सहस्रभरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरम् ॥१॥
दिवो न तुभ्यमन्विन्द्र सत्रासुर्यं देवेभिर्धायि विश्वम् ।
अहिं यद्वृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः ॥२॥

20.

Dyaúr ná yá indrābhí bhū́māryás tasthaú rayíḥ ṣávasā pṛitsú jánān | táṃ naḥ sahásrabharam urvarāsā́ṃ daddhí sūno sahaso vṛitratúram || 1 || divó ná túbhyam ánv indra satrā́suryàṃ devébhir dhāyi víṣvam | áhiṃ yád vṛitrám apó vavrivā́ṅsaṃ hánn ṛijīshin víshṇunā sacānáḥ || 2 ||

Associated with vital principles, He is the showerer of benefits, is one with ever-increasing strength, unreviled of foes, the celestial ruler, mighty, victory-giver and all-conquering. Today, we invoke that resplendent one, with a view of seeking His protection. 11

O the wielder of adamantine justice, humble that man who regards himself as superior to others, living in our midst. We invoke you now on the earth, in the conflict of life, to seek wisdom, vigour and children. 12

Invoked by all as you are, O illustrious one, make us triumphant under your friendship by destroying both classes of enemies (the known ones and the strangers). May we be happy, helped by you, with abundant riches. 13

20

O powerful source of strength, may you give us a son that subdues enemies, become possessor of thousands of riches and owns cultivated lands and also give us the riches, to help us in vanguishing enemies just as the sun by his light overspreads the earth. 1

O earnest and glorious soul, with the blessings of pervading Lord, you become the seeker of truth. The divine powers have blessed you with ample strength as they give light to the sun. Endowed with boundless life-force, you are able to annihilate the evil that obstructs progress. 2

तूर्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेन्द्रो वृद्धमहाः ।
राजाभवन्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्त्नुमावत् ॥३॥
शतैरपद्रन्पणय इन्द्रात्र दशोणये कवयेऽर्कसातौ ।
वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत्किं चन प्र ॥४॥
महो द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः ।
उरु ष सरथं सारथये करिन्द्रः कुत्साय सूर्यस्य सातौ ॥५॥

tū́rvann ójīyān tavásas távīyān kritábrahméndro vriddhámahāḥ | rā́jābhavan mádhunaḥ somyásya víṣvāsām yát purā́m dartnúm ā́vat || 3 || ṣataír apadran paṇáya indrā́tra dásoṇaye kaváye 'rkásātau | vadhaíḥ ṣúshṇasyāṣúshasya māyā́ḥ pitvó nā́rirecīt kím caná prá || 4 || mahó druhó ápa viṣvā́yu dhāyi vájrasya yát pátane pā́di ṣúshṇaḥ | urú shá sarátham sā́rathaye kar índraḥ kútsāya sū́ryasya sātaú || 5 || ७ ||

॥१०॥ प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ।
प्रावन्नमीं साप्यं ससन्तं पृणग्राया समिषा सं स्वस्ति ॥६॥
वि पिप्रोरहिमायस्य दृळ्हाः पुरो वज्रिञ्छवसा न दर्दः ।
सुदामन्तद्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः ॥७॥

prá ṣyenó ná madirám aṅṣúm asmai ṣíro dāsásya námucer mathāyán | prā́van námīm sāpyám sasántam priṇág rāyā́ sám ishā́ sám svastí || 6 || ví pípror áhimāyasya driḷhā́ḥ púro vajriñ chávasā ná dardaḥ | súdāman tád rékṇo apramrishyám rijíṣvane dātrám dāṣúshe dāḥ || 7 ||

When the illustrious and glorious soul, mightier than the mighty, adored by prayers, perfect in his splendour, breaks with his resoluteness the strongholds of evils, he becomes the king of the nector of spiritual joy. 3

O glorious soul, the evil powers that are full of mischief run away in fear of hundred blows, when light of intelligence appears, for the benefit of widely learned persons. The greedy magical devices of powerful wicked are also subdued by the resoluteness of soul. Not only that, but it uproots them completely, and leaves no ground for their sustenance. 4

When the adamantine austerity has been practised to destroy the wickedness of sensuality and all life support to it withdrawn, the universal strength of that oppressor, the Nescience, gets annihilated. Thereafter, the resplendent soul, accompanying the charioteer, the mind in the common car of the body, proceeds to get blessings from Lord, the source of enlightenment. 5

The soul sips the elixir of spiritual joy given to him by God and severes the head of lust, as a hawk does to his victim, and gives protection to the humble, flickering, and erring mind, and he makes it worthy of achieving food, success and riches. 6

O glorious, equipped with resolute mind, you shatter the powerful centres of illusive and proud evil tendencies with dazzling light because you know the wiles of snakes,—the treacherous. You give affluence to the righteous and liberal persons to sacrifice their lives for the sake of good. 7

स वेतसुं दशमायं दशोणिं तूतुजिमिन्द्रः स्वभिष्टिसुम्नः ।
आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ॥८॥
स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ ।
तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इन्द्रमृष्वम् ॥९॥
सनेम तेऽवसा नव्य इन्द्र प्र पूरवः स्तवन्त एना यज्ञैः ।
सप्त यत्पुरः शर्म शारदीर्दर्द्धन्दासीः पुरुकुत्साय शिक्षन् ॥१०॥

sá vetasúṁ dáṣamāyam dáṣonim tū́tujim índraḥ svabhishṭísumnaḥ | ā́ túgram ṣáṣvad íbham dyótanāya mātúr ná sīm úpa sṛijā iyádhyai || 8 || sá īm spṛídho vanate ápratīto bíbhrad vájram vṛitrahánam gábhastau | tíshṭhad dhárī ádhy ásteva gárte vacoyújā vahata índram ṛishvám || 9 || sanéma té 'vasā návya indra prá pūráva stavanta enā́ yajñaíḥ | saptá yát púraḥ ṣárma ṣāradīr dárd dhán dā́sīḥ purukútsāya ṣíkshan || 10 ||

त्वं वृध इन्द्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय ।
परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातम् ॥११॥
त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥१२॥
तव ह त्यदिन्द्र विश्वमाजौ सस्तो धुनीचुमुरी या ह सिष्वप् ।
दीदयदित्तुभ्यं सोमेभिः सुन्वन्दभीतिरिध्मभृतिः पक्थ्य१र्कैः ॥१३॥

tvám vṛidhá indra pūrvyó bhūr varivasyánn uṣáne kāvyā́ya | párā návavāstvam anudéyam mahé pitré dadātha svám nápātam || 11 || tvám dhúnir indra — || 12 || táva ha tyád indra víṣvam ājaú sastó dhúnīcúmurī yā́ ha síshvap | dīdáyad ít túbhyam sómebhiḥ sunván dabhítir idhmábhṛitiḥ pakthy àrkaíḥ || 13 || 10 ||

The resplendent self, the granter of felicity, encourages the widely-known propensities like popularity, steadfastness firm-mindedness, vigour, virility and fearlessness to come submissively to inner-conscience, as a son comes to his mother. 8

Bearing in his hand the foe-destroying weapon of adamantine will-power, the soul, unresisted demolishes evil tendencies. He mounts his chariot harnessed with two vital faculties, as a warrior ascends his charriot. At the signal of his words, the vital senses carry the mighty soul along his journey. 9

O glorious soul, by your blessed protection we gain your fresh favours. Your devotees glorify you at our sacred worship. With your bolt, you destroy the seven centres of impediments subduing evil desires. And thus you award men of immense wisdom. 10

Desirous of opulence, O soul, ever since you have been granting favours and strength to the enlightened mind the source of inspiration. May you hand over the destitute to proper guardians. 11

O resplendent soul, you make your opponents tremble and you direct the stream of thoughts obstructed by passions to flow like rushing waters. So having reached the other shore yourself, you help the well-intentioned and hard-working persons to cross the waters safely. 12

O resplendent soul, in the strife of life the greatness of your prowess is revealed. You put to sleep even the suppressed passions and allurements of the subconscious region. Your oppressed devotee offers devotional prayers to you, enkindles your glory with fuel, hymns, and fuel of austerity, libation of dedication, oblation of devotion and offerings of affection. 13

(२१) एकविंशं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । (१-८, १०, १२) प्रथमाद्यष्टर्चां दशमीद्वादश्योश्चेन्द्रः, (९, ११) नवम्येकादश्योश्च विश्वे देवा देवताः । त्रिष्टुप् छन्दः ॥

॥११॥ इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवन्ते ।
धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या ॥१॥

तमु स्तुष इन्द्रं यो विदानो गिर्वाहसं गीर्भिर्यज्ञवृद्धम् ।
यस्य दिवमति मह्ना पृथिव्याः पुरुमायस्य रिरिचे महित्वम् ॥२॥

21.

Imá́ u tvā purutámasya kārór hávyam̐ vīra hávyā havante | dhíyo rathesh̥ṭhā́m ajáram̐ návīyo rayír víbhūtir īyate vacasyā́ || 1 || tám u stusha índram̐ yó vídāno gírvāhasam̐ gīrbhír yajñávṛiddham | yásya dívam áti mahnā́ pṛithivyā́ḥ purumāyásya ririce mahitvám || 2 ||

स इत्तमोऽवयुनं ततन्वत्सूर्येण वयुनवच्चकार ।
कदा ते मर्ता अमृतस्य धामेयक्षन्तो न मिनन्ति स्वधावः ॥३॥
यस्ता चकार स कुह स्विदिन्द्रः कमा जनं चरति कासु विक्षु ।
कस्ते यज्ञो मनसे शं वराय को अर्क इन्द्र कतमः स होता ॥४॥
इदा हि ते वेविषतः पुराजाः प्रत्नास आसुः पुरुकृत्सखायः ।
ये मध्यमास उत नूतनास उतावमस्य पुरुहूत बोधि ॥५॥

sá ít támo 'vayunám̐ tatanvát sū́ryeṇa vayúnavac cakāra | kadā́ te mártā amṛítasya dhā́méyakshanto ná minanti svadhāvaḥ || 3 || yás tā́ cakā́ra sá kúha svid índraḥ kám ā́ jánam̐ carati kā́su vikshú | kás te yajñó mánase śám̐ várāya kó arká indra katamáḥ sá hótā || 4 || idā́ hí te vévishataḥ purājā́ḥ pratnā́sa āsúḥ purukṛit sákhāyaḥ | yé madhyamā́sa utá nū́tanāsa utā́vamásya puruhūta bodhi || 5 || 11 ||

21

O heroic resplendent Lord, these earnest adorations of the much-aspiring worshipper glorify you. You are ageless and young. Your presence is everywhere felt as if you move on a speedy chariot. To Him alone, reach the eloquent prayers and rich oblations. 1

I glorify that resplendent Lord, propitiated by praises, who knows all things and is exalted whilst we perform sacred deeds. The greatness of this Lord, the possessor of ample wisdom, transcends the magnitude of heaven and earth. 2

He transforms the darkness of Nesciences into light with the rising of the sun. Whenever the enlightened mortals yearn to seek the abode of yours,—the immortal, they never violate your laws. 3

What is He, and who has performed these deeds? Amongst which group of persons does He move? To what people does He belong? O Lord, what sacred action does give satisfaction to your self and what sort of worship and which of the invokers you prefer? 4

O resplendent Lord, your friends, highly active and agile, reversed and respected by all, born in former times, medieval and recent, and engaged in sacred acts, have been, as they are now, your devotee. May you please take notice of the tributes offered to you by your present devotee as well. 5

॥१२॥ तं पृच्छन्तोऽवरासः पराणि प्रत्ना त इन्द्र श्रुत्यानु येमुः ।
अर्चामसि वीर ब्रह्मवाहो यादेव विद्म तात्त्वा महान्तम् ॥६॥
अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ ।
तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व ॥७॥

tám prichántó 'varāsaḥ párāṇi pratná ta indra ṣrútyánu yemuḥ | árcāmasi vīra brahmavāho yád evá vidmá tát tvā mahántam || 6 || abhí tvā pájo rakshaso ví tasthe máhi jajñānám abhí tát sú tishṭha | táva pratnéna yújyena sákhyā vájreṇa dhrishṇo ápa tá nudasva || 7 ||

स तु श्रुधीन्द्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः ।
त्वं ह्यापिः प्रदिवि पितॄणां शश्वद्बभूथ सुहव एष्टौ ॥८॥
प्रोतये वरुणं मित्रमिन्द्रं मरुतः कृष्वावसे नो अद्य ।
प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधीः पर्वतांश्च ॥९॥
इम उ त्वा पुरुशाक प्रयज्यो जरितारो अभ्यर्चन्त्यर्कैः ।
श्रुधी हवमा हुवतो हुवानो न त्वावाँ अन्यो अमृत त्वदस्ति ॥१०॥

sá tú ṣrudhīndra nū́tanasya brahmaṇyató vīra kārudhāyaḥ | tvám̱ hy āpíḥ pradívi pitṝṇám̱ ṣáṣvad babhū́tha suháva éshṭau || 8 || prótáye váruṇam mitrám índram marútaḥ krishvávase no adyá | prá pūsháṇam̱ víshṇum agním púram̱dhim̱ savitáram ósha-dhīḥ párvatāṅs ca || 9 || imá u tvā purusāka prayajyo jari-táro abhy àrcanty arkaíḥ | ṣrudhí hávam á huvató huvānó na tvávāñ anyó amrita tvád asti || 10 ||

O resplendent Lord, your humble devotees commemorate you through their prayers and follow the excellent traditions. The sacred hymns are chanted in honour of your glory. We praise your great mighty deeds for which you are so well reputed. 6

O resplendent Lord, the strength of evil forces is gathered fast against your laws; please bear up well against that might manifested effort. Destroy these evils with your adamantine resoluteness, an eternal friend and associate of yours. 7

O Lord, brave, the guardian of devotees, listen to the prayers of your persent admirers. From times immemorial, you have been fulfilling the desires of your followers. You have been hearing the invocations of our ancestors, and it is admirable that you are swift to listen to their supplication. 8

May you bring to our help and protection Nature's bounties, such as ocean, the sun, the nourishing elements, the sky, the fire of several regions, the solar system, plants and mountains. 9

O respectable, powerful and most holy God, your devotees exalt your glory with hymns and praises. O eternal Lord, please listen carefully to our prayers, when invoked. For there is no one else to match you, O immortal. 10

नू म आ वाचमुप याहि विद्वान्विश्वेभिः सूनो सहसो यजत्रैः ।
ये अग्निजिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय ॥११॥
स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद्विदानः ।
ये अश्रमास उरवो वहिष्ठास्तेभिर्न इन्द्राभि वक्षि वाजम् ॥१२॥

nū́ ma ā́ vā́cam úpa yāhi vidvā́n víṣvebhiḥ sūno sahaso yájatraiḥ | yé agnijihvā́ ṛitasā́pa āsúr yé mánuṃ cakrúr úparaṃ dásāya || 11 || sá no bodhi puraetā́ sugéshūtá durgéshu pathikṛíd vídānaḥ | yé áṣramāsa urávo váhishṭhās tébhir na indrābhí vakshi vā́jam || 12 || 12 ||

(२२) द्वाविंशं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१३॥ य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः ।
यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥१॥
तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः ।
नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठम् ॥२॥

तमीमह इन्द्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ।
यो अस्कृधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै ॥३॥

22.

Yá éka íd dhávyaṣ carshaṇīnā́m índraṃ táṃ gīrbhír abhy àrca ābhíḥ | yáḥ pátyate vṛishabhó vṛíshṇyāvān satyáḥ sátvā purumāyáḥ sáhasvān || 1 || tám u naḥ pū́rve pitáro návagvāḥ saptá víprāso abhí vājáyantaḥ | nakshaddābhám táturim parvateshṭhā́m ádroghavācam matíbhiḥ ṣávishṭham || 2 || tám īmaha índram asya rāyáḥ puruvírasya nṛivátaḥ purukshóḥ | yó áskṛidhoyur ajáraḥ svàrvān tám ā́ bhara harivo mādayádhyai || 3 ||

O resplendent Lord, cognizant of all, please come and listen to my prayers. O source of strength, come with those powers, who have glorious tongue of fire, who give us the benefit of eternal law, and who make men victorious over their adversaries. 11

O resplendent Lord, may you be our leader on paths, difficult or easy. You are known to all of us as path-carver. May you unwearingly grant us instantly such large transports, as are best to bear our burthens without wear and difficulty. 12

22

I glorify that resplendent Lord through my prayers, for He is the only one, who is to be invoked by mortals. He is the showerer of blessings, invincible, truthful, all-knowing, destroyer of ominous impediments. 1

From time immemorial, our seven sense organs, (five senses, mind and intellect) while performing ever-new functions, have been manifesting the glory of our Lord. The supreme Lord is the destroyer of opponents, swift, of the highest order in rank, true to every word and is dynamic. 2

We have but this to beg of the resplendent Lord, that we desire to have his blessings that bring reward of riches, good progeny and heroic followers. Bless us, O Lord of vitality and vigour, to make us joyful with abundant and undecaying wealth and celestial happiness. 3

तन्नो वि वोचो यदि ते पुरा चिज्जरितार आनशुः सुम्नमिन्द्र ।
कस्ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरूवसोऽसुरघ्नः ॥४॥
तं पृच्छन्ती वज्रहस्तं रथेष्ठामिन्द्रं वेपी वक्वरी यस्य नू गीः ।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ ॥५॥

tán no ví voco yádi te purā́ cij jaritā́ra ānaśúḥ sumnám indra | kás te bhāgáḥ kíṃ váyo dudhra khidvaḥ púruhūta purūvaso 'suraghnáḥ || 4 || tám pṛicchántī vájrahastaṃ ratheshṭhā́m índraṃ vépī vákvarī yásya nū́ gī́ḥ | tuvigrābháṃ tuvikūrmíṃ rabhodā́ṃ gātúm ishe nákshate túmram ácha || 5 || 13 ||

॥१४॥ अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन ।
अच्युता चिद्वीळिता स्वोजो रुजो वि दृळ्हा धृषता विरप्शिन् ॥६॥
तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै ।
स नो वक्षदनिमानः सुवह्मेन्द्रो विश्वान्यति दुर्गहाणि ॥७॥
आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा ।
तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे शोचय क्षामपश्च ॥८॥

ayā́ ha tyám māyáyā vāvṛidhānám manojúvā svatavaḥ párvatena | ácyutā cid vīḷitā́ svojo rujó ví dṛiḷhā́ dhṛishatā́ virapśin || 6 || táṃ vo dhiyā́ návyasyā śávishṭham pratnám pratnavát paritaṅsayádhyai | sá no vakshad animānáḥ suváhméndro víśvāny áti durgáhāṇi || 7 || ā́ jánāya drúhvaṇe pā́rthivāni divyā́ni dīpayo 'ntárikshā | tápā vṛishan viśvátaḥ śocíshā tā́n brahmadvíshe śocaya kshā́m apáś ca || 8 ||

O Lord, you are strong, subduer of evils, destroyer of demoniac tendencies, rich and invoked by everyone. Tell us, if in ancient times, earlier devotees have been obtaining good fortune at your hand. O, the destroyer of evil forces, what is your share and position, and what is your oblation? 4

The resplendent Lord is armed with adamantine power, and has the mobility of the speediest car, is lover of hymns, wise and fluent in speech. Further, He is firmly-grasping, exceedingly functioning and strength-bestowing. The one, whose ceremonial and eulogistic hymn commemorates such a Lord, proceeds promptly to acquire happiness and with a sense of confidence he gains victory over malevolent forces. 5

With your strength, you control the illusory forces of the world with the bolt of justice, which is gigantic and swift as mind. O mighty God, you rend into pieces the firmly fixed and formidable citadels of sin and injustice with your ceaseless judiciousness. 6

Here is a new hymn similar to the old ones, extending the glory of the resplendent Lord, who is mighty and ancient. May you, O boundless and most reliable leader conduct us over all the impediments. 7

Make hot the regions of earth, of heaven, of midspace for the oppressive vicious forces. O showerer of benefits, may you consume these vices everywhere with you radiant enlightenment, and make the heaven and mid-air hot for the impious propensities. 8

भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक् ।
धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः ॥९॥
आ संयतमिन्द्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्राम् ।
यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका नाहुषाणि ॥१०॥
स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गहि प्रयज्यो ।
न या अदेवो वरते न देव आभिर्याहि तूयमा मद्र्यद्रिक् ॥११॥

bhúvo jánasya divyásya rájā párthivasya jágatas tveshasaṃdṛik | dhishvá vájram dákshiṇa indra háste víṣvā ajurya dayase ví māyáḥ || 9 || á saṃyátam indra naḥ svastím ṣatrutúryāya bṛihatím ámṛidhrām | yáyā dásāny áryāṇi vṛitrá káro vajrin sutúkā náhushāṇi || 10 || sá no niyúdbhiḥ puruhūta vedho viṣvávārābhir á gahi prayajyo | ná yá ádevo várate ná devá ábhir yāhi túyam á madryadrík || 11 || 14 ||

(२३) त्रयोविंशं सूक्तम्

(१—१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१५॥ सुत इत्त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे ।
यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिन्द्र यासि ॥१॥
यद्वा दिवि पार्ये सुष्विमिन्द्र वृत्रहत्येऽवसि शूरसातौ ।
यद्वा दक्षस्य बिभ्युषो अबिभ्यदरन्धयः शर्धत इन्द्र दस्यून् ॥२॥

23.

Sutá ít tváṃ nímiṣla indra sóme stóme bráhmaṇi ṣasyámāna ukthé | yád vā yuktábhyām maghavan háribhyām bíbhrad vájram bāhvór indra yási || 1 || yád vā diví párye súshvim indra vṛitrahátyé 'vasi ṣúrasātau | yád vā dákshasya bibhyúsho ábibhyad árandhayaḥ ṣárdhata indra dásyūn || 2 ||

O bright-flaming resplendent Lord, you are the king of the people of heaven and of the moving races of earth. May you grasp in your right hand the bolt of punitive justice, and baffle all the devices of the wicked. 9

O resplendent Lord, bring to us concentrated, vast and unassailable prosperity beyond the reach of wicked, and by which, O wielder of adamantine justice, you render human enemies, whether wicked or virtuous, easy to be overcome. 10

Invoked by everyone, O revered creator, object of worship, come in our midst with your all-admired vital forces, whom neither demons nor divine powers can resist. Please do come to us soon with these forces. 11

23

O bounteous Lord, whilst the atmosphere is surcharged with devotional prayers, and when the hymns are being chanted, please be prepared to harness the horses in your chariot, or in case they have been already harnessed, please come speedily holding the adamantine of justice. 1

O resplendent Lord, at the appropriate time, you protect the devotee by helping him to destroy the devil of ignorance, or at the time of conflicts, equipped with adamantine punitive justice and undaunted, you destroy violent passion that torments your faithful devotees. 2

पाता सुतमिन्द्रो अस्तु सोमं प्रणेनीरुग्रो जरितारमूती ।
कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुवते कीरये चित् ॥३॥
गन्तेयान्ति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ।
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः ॥४॥

अस्मै वयं यद्वावान तद्विविष्म इन्द्राय यो नः प्रदिवो अपस्कः ।
सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथासत् ॥५॥

pátā sutám índro astu sómam praṇenír ugró jaritáram ūtí | kártā vīráya súshvaya u lokáṃ dátā vásu stuvaté kīráye cit || 3 || gántéyānti sávanā háribhyām babhrír vájram papíḥ sómaṃ dadír gáḥ | kártā vīráṃ náryaṃ sárvavīraṃ ṣrótā hávaṃ gṛiṇatá stómavāhāḥ || 4 || ásmai vayáṃ yád vāvána tád vivishma índrāya yó naḥ pradívo ápas káḥ | suté sóme stumási ṣáṅsad ukthéndrāya bráhma várdhanaṃ yáthásat || 5 || 15 ||

॥१६॥ ब्रह्माणि हि चकृषे वर्धनानि तावत्त इन्द्र मतिभिर्विविष्मः ।
सुते सोमे सुतपाः शंतमानि रान्द्या क्रियास्म वक्षणानि यज्ञैः ॥६॥
स नो बोधि पुरोळाशं रराणः पिबा तु सोमं गोऋजीकमिन्द्र ।
एदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकम् ॥७॥

bráhmāṇi hí cakṛishé várdhanāni távat ta indra matíbhir vivishmaḥ | suté sóme sutapāḥ ṣáṃtamāni ráṇḍyā kriyāsma vákshaṇāni yajñaíḥ || 6 || sá no bodhi puroḷáṣaṃ ráráṇaḥ píbā tú sómaṃ góṛijīkam indra | édám barhír yájamānasya sīdorúṃ kṛidhi tvāyatá u lokám || 7 ||

May the resplendent mighty Lord sip the elixir of sweet devotion, and lead his devotees along the path of righteousness. May He, be the giver of honour to the presenter of. homage and give wealth to the man who adores Him. 3

He blesses even the humblest performer good deeds with his speedy vital powers and resoluteness. He wields the bolt of justice and enjoys drinking the nectar of devotion, and showers wealth and progeny. He makes the valiant rich and receives tributes and hears chanter's invocations. 4

We have been singing hymns from the days of old in honour of the resplendent supreme Lord, who is pleased with them. Let us adore Him while our heart is full of divine love, and repeat prayers so that our adoration may augment His glory. 5

O resplendent Lord, we sing these divine hymns to you for, you have made the prayers for your exhilaration. Therefore, we wait on you with hymns. May we, O acceptor of our devotion, offer to you our dedicated homage and acceptable eulogies with our benevolent works, to you. 6

O divine Lord, be delighted to accept the cakes of dedication and herbal juice of prayer mixed with the curds of praises. Be seated, O Lord, in the hearts of the devoted worshipper and bestow popularity on the dedicated devotee. 7

स मन्दस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञास इमे अश्नुवन्तु ।
प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीरवस इन्द्र यम्याः ॥८॥
तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिन्द्रम् ।
कुवित्तस्मा असति नो भराय न सुष्विमिन्द्रोऽवसे मृधाति ॥९॥
एवेदिन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः ।
असद्यथा जरित्र उत सूरिरिन्द्रो रायो विश्ववारस्य दाता ॥१०॥

sá mandasvā hy ánu jósham ugra prá tvā yajñása imé aṣnuvantu | prémé hávāsaḥ puruhūtám asmé ā́ tveyáṃ dhír ávasa indra yamyāḥ || 8 || táṃ vaḥ sakhāyaḥ sáṃ yáthā sutéshu sómebhir īm pṛiṇatā bhojám índram | kuvít tásmā ásati no bhárāya ná súshvim índró 'vase mṛidhāti || 9 || evéd índraḥ suté astāvi sóme bharádvājeshu ksháyad ín maghónaḥ | ásad yáthā jaritrá utá sūrír índro rāyó viṣvávarasya datá || 10 || 16 ||

(२४) चतुर्विंशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१७॥ वृषा मद इन्द्रे श्लोक उक्था सचा सोमेषु सुतपा ऋजीषी ।
अर्चत्र्यो मघवा नृभ्य उक्थैर्द्युक्षो राजा गिरामक्षितोतिः ॥१॥
ततुरिर्वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः ।
वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजम् ॥२॥

24.

Vṛíshā máda índre ṣlóka ukthá sácā sómeshu sutapá ṛijīshí | arcatryò maghávā nṛíbhya ukthaír dyukshó rā́jā girā́m ákshitotiḥ || 1 || táturir vīró náryo vícetāḥ ṣrótā hávaṃ gṛiṇatá urvyū̀tiḥ | vásuḥ ṣáṅso narā́ṃ kārúdhāyā vājí stutó vidáthe dāti vā́jam || 2 ||

O mighty resplendent Lord, be pleased with our selfless sacrificial acts according to your discretion. May our invocations reach you, who is respected by all; we offer prayers to you for our protection. 8

Friends, whilst the elixir of devotion is being expressed, may you duly replenish the bounteous Lord with that elixir. Let there be plenty for Him, enough to provide nourishment for us. The resplendent Lord never neglects the care of him, who presents copious libation. 9

Thus, the resplendent Lord, the bounteous, has been glorified by the possessors of knowledge, while the loving devotion is expressed, so that the Lord may become the patron of His eulogist and give him all desirable riches. 10

24

At the sacred ceremonies, at which the hymns are chanted, prayers are recited and elixir of love offered, the sense of delight is produced; and thereby the resplendent Lord, becomes the showerer of blessings. The Lord, who is the acceptor of devotional love, the straightforward and the liberal giver is to be propitiated by men. He is dweller in heaven, the Lord of sacred songs, the one whose help is lasting. 1

He, the vanquisher of the evils, friend of man, all-wise, listener of devotional hymns, protector of the devotees and provider of comfort to all the ruler of men, the inspirer of all great deeds, the bestower of food, and one who is respected in holy synod, grants us sustenance. 2

अक्षो न चक्र्योः शूर बृहन्प्र ते मह्ना रिरिचे रोदस्योः ।
वृक्षस्य नु ते पुरुहूत वया व्यूतयो रुरुहुरिन्द्र पूर्वीः ॥३॥
शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः संचरणीः ।
वत्सानां न तन्तयस्त इन्द्र दामन्वन्तो अदामानः सुदामन् ॥४॥
अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिन्द्रः ।
मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति ॥५॥

ákshо ná cakryòḥ ṣūra bri-hán prá te mahnā́ ririce ródasyoḥ | vrikshásya nú te puruhūta vayā́ vy ūtáyo ruruhur indra pūrvī́ḥ || 3 || ṣácīvatas te puruṣāka ṣā́kā gávām iva srutáyaḥ saṃcáraṇīḥ | vatsā́nāṃ ná tantáyas ta indra dā́manvanto adāmā́naḥ sudāman || 4 || anyád adyá kárvaram anyád u ṣvó 'sac ca sán múhur ācakrír índraḥ | mitró no átra várunaṣ ca pūshāryó váṣasya paryetā́sti || 5 || 17 ||

॥१८॥ वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिन्द्रानयन्त यज्ञैः ।
तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मुर्गिर्वाहो अश्वाः ॥६॥
न यं जरन्ति शरदो न मासा न द्याव इन्द्रमवकर्शयन्ति ।
वृद्धस्य चिद्वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना ॥७॥

ví tvád ā́po ná párvatasya prishṭhā́d ukthébhir indrā-nayanta yajñaíḥ | táṃ tvābhíḥ sushṭutíbhir vājáyanta ājíṃ ná jagmur girvāho áṣvāḥ || 6 || ná yáṃ járanti ṣarádo ná mā́sā ná dyā́va índram avakarṣáyanti | vriddhásya cid vardhatām asya tanū́ stómebhir ukthaíṣ ca ṣasyámānā || 7 ||

O resplendent Lord, mighty hero, invoked by many, your greatness transcends the boundaries of heaven and earth, like the lofty axle of the wheels. The manifold benefits of your blessings grow and grow like the branches of the tree. 3

O resplendent Lord, accomplisher of many acts, your powers, endowed with vigour, are manifold like converging tracks of cattle. They are elastic like tithers that hold a calf; but remain unfettered themselves. 4

The resplendent Lord performs one sort of action today, the creative, another sort tomorrow, the destructive. May He, the friendly, the beneficient one, the one provider of nourishments and the one virtuous, help us to overcome the domination of evils. 5

The resplendent Lord, as water descends from mountain tops, your devotees desirous of wealth, approach you with eulogies. In eagerness and vigour they are like warriors, mounted on coursers rushing to the battle-field, and bringing blessings from you, for you are accessible by praises only. 6

May the manifested person of resplendent Lord, glorified by praises and prayers, ever increase. He is the one, whom neither months nor autumns make old, nor days enfeeble. 7

न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ।
अज्रा इन्द्रस्य गिरयश्चिदृष्वा गम्भीरे चिद्भवति गाधमस्मै ॥८॥
गम्भीरेण न उरुणामत्रिन्प्रेषो यन्धि सुतपावन्वाजान् ।
स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायाम् ॥९॥
सचस्व नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः ।
अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः ॥१०॥

ná vīḷáve námate ná sthiráya ná śárdhate dásyujūtāya stavấn | ájrā índrasya giráyaś cid ṛishvấ gambhīré cid bhavati gādhám asmai || 8 || gambhīréṇa na urúṇāmatrin préshó yandhi sutapāvan vấjān | sthấ ū shú ūrdhvá ūtí árishaṇyann aktór vyùshṭau páritakmyāyām || 9 || sácasva nāyám ávase abhī́ka itó vā tám indra pāhi risháḥ | amấ cainam áraṇye pāhi rishó mádema śatáhimāḥ suvī́rāḥ || 10 || 18 ||

(२५) पञ्चविंशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१९॥ या त ऊतिरवमा या परमा या मध्यमेन्द्र शुष्मिन्नस्ति ।
ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र ॥१॥
आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र ।
आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽव तारीर्दासीः ॥२॥

25.

Yấ ta ūtír avamấ yấ paramấ yấ madhyaméndra śushminn ásti | tấbhir ū shú vṛitrahátye 'vīr na ebhíś ca vấjair mahấn na ugra || 1 || ā́bhi spṛ́dho mithatī́r árishaṇyann amítrasya vyathayā manyúm indra | ā́bhir víśvā abhiyújo víshūcīr ā́ryāya víśó 'va tārīr dā́sīḥ || 2 ||

Extolled by us He bends not to the robust, nor to the resolute, nor to the bold incited by wicked. High mountains are easy of access to the resplendent Lord. Even in the deep waters, He finds firm ground to rest on. 8

Admired by devotees as you are, O irresistible, actuated by a profound and comprehensive purpose, grant us food and strength. May you be ever diligent, and unreluctant to help us at the time when the gloom of night brightens to morning. 9

O resplendent Lord, steer our leader along the war-path and protect him; defend him against a near or distant calamity. Provide him with security when he is at home or in a forest. And may we, blessed with brave sons be happy through a hundred winters. 10

25

O mighty resplendent Lord, grant us protection on all the levels of the conflict of life, low, high or middling. May you support us to subdue our foes; supply us, O supreme Lord, with your strength-giving food. 1

O resplendent Lord, extolled by our hymns, while protecting our capacity to fight the evil forces, may you check the wrath of opponents. Also overthrow the attack of the servile evil races, abiding everywhere, in favour of virtuous ones. 2

इन्द्र जामय उत येऽजामयोऽर्वाचीनासो वनुषो युयुज्रे ।
त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही पराचः ॥३॥
शूरो वा शूरं वनते शरीरैस्तनूरुचा तरुषि यत्कृण्वैते ।
तोके वा गोषु तनये यदप्सु वि क्रन्दसी उर्वरासु ब्रवैते ॥४॥
नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध ।
इन्द्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि ॥५॥

índra jāmáya utá yé 'jāmayo 'rvācīnáso vanúsho yuyujré | tvám eshāṃ vithurá ṡávāṅsi jahí vríshṇyāni kriṇuhí párācaḥ || 3 || ṡū́ro vā ṡū́raṃ vanate ṡárīrais tanūrúcā tárushi yát kriṇvaíte | toké vā góshu tánaye yád apsú ví krándasī urvárāsu brávaite || 4 || nahí tvā ṡū́ro ná turó ná dhrishṇúr ná tvā yodhó mányamāno yuyódha | índra nákish ṭvā práty asty eshāṃ víṡvā jātány abhy àsi táni || 5 || 19 ||

॥२०॥ स पत्यत उभयोर्नृम्णमयोर्यदी वेधसः समिथे हवन्ते ।
वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदि वितन्तसैते ॥६॥
अध स्मा ते चर्षणयो यदेजानिन्द्र त्रातोत भवा वरूता ।
अस्माकासो ये नृतमासो अर्य इन्द्र सूरयो दधिरे पुरो नः ॥७॥

sá patyata ubháyor nrimṇám ayór yádī vedhásaḥ samithé hávante | vritré vā mahó nriváti ksháye vā vyácasvantā yádi vitantasaíte || 6 || ádha smā te carshaṇáyo yád éjān índra trātótá bhavā varūtá | asmákāso yé nrítamāso aryá índra sūráyo dadhiré puró naḥ || 7 ||

O resplendent Lord, may you subdue the strength of all evil opponents whether our kinsmen or otherwise, when they present themselves before us and fight against us. May you enfeeble their strength and drive them away from us. 3

The enlightened person, the hero, assuredly kills evil tendencies by his inner strength under your protection, O Lord and (with your blessings) he wins in this conflict of equals in bodily prowess and personal strength, whilst both of them clamourously dispute over the possession of sons, grandsons, cattle, water or land. 4

But no one dares stand against you, neither a brave, nor a coward, nor a resolute, nor a fighter trusting in his valour. None of them is a match to you. Verily, you are the most powerful of all these persons. 5

Amidst the two disputants, that one acquires wealth, whose priests invoke Lord at worship in conflicts against powerful adversaries or in contention to gain dwellings among one's own relations. 6

O resplendent Lord, may you be the protector of our leading men at the time when they tremble with fear. May you be their saviour. Let those, who are chief leaders, be enjoyers and the worshippers who install them on high position be blessed by your favours. 7

अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।
अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥८॥
एवा नः स्पृधः समजा समत्स्विन्द्र रारन्धि मिथतीरदेवीः ।
विद्याम वस्तोरवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम् ॥९॥

ánu te dāyi mahá indriyáya satrá te víṣvam ánu vṛitrahátye | ánu kshatrám ánu sáho yajatréndra devébhir ánu te nṛisháhye || 8 || evá na spṛídhaḥ sám ajā samátsv índra rārandhí mithatír ádevīḥ | vidyáma vástor ávasā gṛiṇánto bharádvājā utá ta indra nūnám || 9 || 20 ||

(२६) षड्विंशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२१॥ श्रुधी न इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः ।
सं यद्विशोऽयन्त शूरसाता उग्रं नोऽवः पार्ये अहन्दाः ॥१॥
त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ ।
त्वां वृत्रेष्विन्द्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन् ॥२॥
त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् ।
त्वं शिरो अमर्मणः पराहन्नतिथिग्वाय शंस्यं करिष्यन् ॥३॥

26.

Ṣrudhí na indra hváyāmasi tvā mahó vájasya sātaú vāvṛishāṇáḥ | sáṃ yád víṣó 'yanta ṣúrasātā ugráṃ nó 'vaḥ párye áhan dāḥ || 1 || tváṃ vājí havate vājineyó mahó vájasya gádhyasya sātaú | tváṃ vṛitréshv indra sátpatiṃ tárutraṃ tváṃ cashṭe mushṭihá góshu yúdhyan || 2 || tváṃ kavíṃ codayo 'rkásātau tváṃ kútsāya ṣúshṇaṃ dāṣúshe vark | tváṃ ṣíro amarmáṇaḥ párāhann atithigváya ṣáṅsyaṃ karishyán || 3 ||

O adorable Lord, all mighty powers have been successively conceded to you by Nature's bounties for the destruction of evil forces. O revered one, verily, in you is centered appropriate vigour and strength as well. 8

O powerful resplendent Lord, grant us the courage to fight the forces of evil. Inspire us to overthrow the godless demoniac forces that fight against us. May we the bearers of the light of knowledge adore you and thereby be privileged to obtain your favour. 9

26

O resplendent Lord, we invoke you with these spontaneously flowing streams of hymns for obtaining abundant food. Hear us and give us sure help when on a future day we assemble on the battle-field of life. 1

O resplendent Lord, the descendants of learned men place all their affluence at your feet and entreat you to acquire wealth and wisdom. You are the patron of those who are good and saviour when evil forces assail them. It is with your encouragement and guidance that he continues his duel as if with fists to win land and cattle. 2

You encourage the sage for the attainment of food of knowledge. It is you again who undo the evil for the safety of your wise devotee, the offerer of homage. For the welfare of the faithful one, dear as a guest, you humble down the wicked, the one who wrongly imagines himself invulnerable. 3

त्वं रथं प्र भरो योधमृष्वमावो युध्यन्तं वृषभं दशद्युम् ।
त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं गृणन्तमिन्द्र तूतोः ॥४॥
त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि ।
अव गिरेर्दासं शम्बरं हन्प्रावो दिवोदासं चित्राभिरूती ॥५॥

tvám̐ rátham prá bharo yodhám ṛishvám ávo yúdhyantam̐ vṛishabhám̐ dáṣadyum | tvám̐ túgram̐ vetasáve sácāhan tvám̐ tújim̐ gṛiṇántam indra tūtoḥ || 4 || tvám̐ tád ukthám indra barháṇā kaḥ prá yác chatá sahásrā ṣūra dárshi | áva girér dā́sam̐ ṣámbaram̐ han prā́vo dívodāsam̐ citrā́bhir ūtī́ || 5 || 21 ||

॥२२॥ त्वं श्रद्धाभिर्मन्दसानः सोमैर्दभीतये चुमुरिमिन्द्र सिष्वप् ।
त्वं रजिं पिठीनसे दशस्यन्षष्टिं सहस्रा शच्या सचाहन् ॥६॥
अहं चन तत्सूरिभिरानश्यां तव ज्याय इन्द्र सुम्नमोजः ।
त्वया यत्स्तवन्ते सधवीर वीरास्त्रिवरूथेन नहुषा शविष्ठ ॥७॥
वयं ते अस्यामिन्द्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः ।
प्रातर्दनिः क्षत्रश्रीरस्तु श्रेष्ठो घने वृत्राणां सनये धनानाम् ॥८॥

tvám̐ ṣraddhā́bhir mandasānáḥ sómair dabhī́taye cúmurim indra sishvap | tvám̐ rajím̐ píṭhīnase daṣasyán shashṭím̐ sahásrā ṣácyā sácāhan || 6 || ahám̐ caná tát sūríbhir ānaṣyām̐ táva jyā́ya indra sumnám ójaḥ | tváyā yát stávante sadhavīra vīrā́s trivárūthena náhushā ṣavishṭha || 7 || vayám̐ te asyā́m indra dyumnáhūtau sákhāyaḥ syāma mahina préshṭhāḥ | prā́tardaniḥ kshatraṣrī́r astu ṣréshṭho ghané vṛitrā́ṇām̐ sanáye dhánānām || 8 || 22 ||

O resplendent Lord, you grant to the liberal giver a great chariot to contest in the struggle of life. You protect him while he is engaged in fighting for a long period. You subdue violent elements along with arrogance and you encourage the steadfast, who adores you. 4

O brave resplendent Lord, you accomplish a great task when you destroy hundred-thousand forees of the wicked. You put an end to the immoral thoughts coming out of our brain, and you bless the faithful and loyal devotees with your marvellous protections. 5

O Lord, pleased by libation offered with faith, you destroy the clinging sinful tendencies with a view to protect the disciplined people. You equip the faithful persons with ability, annihilate with your right lot of innumerable evils (as if sixty thousand warriors). 6

O resplendent, mightiest and brave, vanquisher of the evil, O triply-strong defender, may I along with my virtuous helpers, acquire your most excellent felicity and vigour which, as men believe, have been bestowed on your faithful devotees. 7

O revered resplendent Lord, may we, your friends, become most dear to you at this place of holy worship. May our illustrious defenders and preceptors be most glorious. May they be able to overcome the demoniac forces and may you shower on us affluence and prosperity. 8

(२७) सप्तविंशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः। (१-७) प्रथमादिसप्तर्चामिन्द्रः,
(८) अष्टम्याश्च चायमानस्याभ्यावर्तिनो दानं देवते। त्रिष्टुप् छन्दः॥

॥२३॥ किम॑स्य॒ मदे॒ किम्व॑स्य पी॒ताविन्द्रः॒ किम॑स्य स॒ख्ये च॑कार।
रणा॑ वा॒ ये नि॒षदि॒ किं ते अ॑स्य पु॒रा वि॑विद्रे॒ किमु॒ नूत॑नासः॥१॥
सद॑स्य॒ मदे॒ सद्व॑स्य पी॒ताविन्द्रः॒ सद॑स्य स॒ख्ये च॑कार।
रणा॑ वा॒ ये नि॒षदि॒ सत्ते अ॑स्य पु॒रा वि॑विद्रे॒ सदु॒ नूत॑नासः॥२॥
न॒हि नु ते॑ महि॒मनः॑ समस्य॒ न म॑घवन्मघव॒त्त्वस्य॑ वि॒द्म।
न राध॑सोराधसो॒ नूत॑न॒स्येन्द्र॒ नकि॑र्ददृश इन्द्रि॒यं ते॑॥३॥
ए॒तत्त्यत्त॑ इन्द्रि॒यम॑चेति॒ येनाव॑धीर्व॒रशि॑खस्य॒ शेषः॑।
वज्र॑स्य॒ यत्ते॒ निह॑तस्य॒ शुष्मा॑त्स्व॒नाच्चि॑दिन्द्र पर॒मो द॒दार॑॥४॥

27.

Kím asya máde kím v asya pītáv índraḥ kím asya sakhyé cakāra | ráṇā vā yé nishádi kíṃ té asya purá vividre kím u nútanāsaḥ || 1 || sád asya máde sád v asya pītáv índraḥ sád asya sakhyé cakara | ráṇā vā yé nishádi sát té asya purá vividre sád u nútanāsaḥ || 2 || nahí nú te mahimánaḥ samasya ná maghavan maghavattvásya vidmá | ná rádhaso-radhaso nútanasyéndra nákir dadṛiṣa indriyáṃ te || 3 || etát tyát ta indriyám aceti yénávadhīr varáṣikhasya ṣéshaḥ | vájrasya yát te níhatasya ṣúshmāt svanác cid indra paramó dadára || 4 ||

व॒धीदिन्द्रो॑ व॒रशि॑खस्य॒ शेषो॑ऽभ्याव॒र्तिने॑ चायमा॒नाय॒ शिक्ष॑न्।
वृ॒चीव॑तो॒ यद्ध॑रियू॒पीया॑यां॒ हन्पूर्वे॒ अर्धे॑ भि॒यसाप॑रो॒ दर्त्॥५॥

vádhīd índro varáṣikhasya ṣésho
'bhyāvartíne cāyamānáya ṣíkshan | vṛicívato yád dhariyūpíyāyāṃ hán púrve árdhe bhiyásáparo dárt || 5 || 23 ||

27

What has resplendent Lord done in the exhilaration (of the devotional prayers from us)? What has he done on quaffing this ? What has he done in friendship for this ? What have former, what have recent adorers, obtained from you in the chamber of their hearts ? 1

Verily, in the rapturous joy of divine love, the resplendent performs noble deeds, once quaffing the elixir of praises; or in friendship for this devotion the Lord accomplishes wonderful task. Adorers of old and recent times continue to obtain many benefits out of this to gladden the chamber of their hearts. 2

O bounteous Lord, we know not the extent of your vast magnitude, also we know not the limit of your abundance; no one has yet discerned the bounds of your power which reveals fresh forms every moment. 3

O resplendent Lord, we have witnessed with our eyes the resoluteness wherewith you subdue the vices of sense organs. The boldest of them was controlled at the mere noise of your bolt of punitive justice, hurled with all your force. 4

Favouring the wise persons, vigilant from all sides, born in the families of people serving with dedication, the resplendent Lord destroys the root of deceptive ignorance, killing crookedly wicked tendencies, resting in the front part of the heart, whilst the host of evils on the other part themselves scatter through fear. 5

॥२४॥ त्रिंशच्छतं वर्मिण इन्द्र साकं यव्यावत्यां पुरुहूत श्रवस्या ।
वृचीवन्तः शरवे पत्यमानाः पात्रा भिन्दाना न्यर्थान्यायन् ॥६॥
यस्य गावावरुषा सूयवस्यू अन्तरू षु चरतो रेरिहाणा ।
स सृञ्जयाय तुर्वशं परादाद्वृचीवतो दैववाताय शिक्षन् ॥७॥
द्वयाँ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं सम्राट् ।
अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम् ॥८॥

triṁśácchatam varmíṇa indra sākám yavyávatyām puruhūta ṣravasyá | vṛicívantaḥ ṣárave pátyamānāḥ pátrā bhindāná nyarthány āyan || 6 || yásya gávāv arushá sūyavasyú antár ū shú cárato rérihāṇā | sá sṛíñjayāya turváṣam párādād vṛicívato daivavātáya ṣíkshan || 7 || dvayāñ agne rathíno viṁṣatím gá vadhúmato maghávā máhyam samrát | abhyavartí cāyamānó dadāti dūṇáṣeyám dákshiṇā pārthavánām || 8 || 24 ||

(२८) अष्टाविंशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । (१, ३-७) प्रथमर्चस्तृतीयादिपञ्चानाञ्च गावः, (२, ८) द्वितीयाष्टम्योरिन्द्रो गावो वा देवताः । (१, ५-७) प्रथमर्चः पञ्चम्यादितृचस्य च त्रिष्टुप्, (२-४) द्वितीयादितृचस्य जगती, (८) अष्टम्याश्चानुष्टुप् छन्दांसि ॥

॥२५॥ आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥१॥
इन्द्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ॥२॥

28.

Ā́ gávo agmann utá bhadrám akran sídantu goshṭhé raṇáyantv asmé | prajávatīḥ pururúpā ihá syur índrāya pūrvír usháso dúhānāḥ || 1 || índro yájvane pṛiṇaté ca ṣikshaty úpéd dadāti ná svám mushāyati | bhúyo-bhūyo rayím íd asya vardháyann ábhinne khilyé ní dadhāti devayúm || 2 ||

O revered resplendent Lord, invoked by all, the host of evil passions, amounting to three thousand and odd, collect together in our body to acquire glory, but you render them ineffective. Your virtues defend the attack of an arrow and proceed ahead for the destruction of evils. 6

He, whose bright prancing steers (rays), delighted with suitable sustaining elements, proceed between heaven and earth, impels the benefactors to devote to a constructive work and the vigilant reformers to remove crooked and wicked elements. 7

O Lord revered, all-pervading, the sovereign of all, on both of us, rich and poor seated in chariots may you bestow charming divine damsels, and twenty divine cows, a gift hard to assure from any other source. 8

28

May cows come and bring us good fortune; let them stay in our cowsheds and enjoy in our company. May many coloured cows bring here prolific milk for offerings to the resplendent Lord at many dawns. 1

The resplendent Lord bestows affluence on the devotee who offers worship and oblations. He takes not what belongs to the worshipper and gives him more; thereby increasing his wealth more and ever-more, he places the devotee in fortified positions, free from danger. 2

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ॥३॥
न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥४॥
गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः ।
इमा या गावः स जनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् ॥५॥

May our earnest praise proceed to pay tribute to the Lord of vital wind, the possessor of vast riches, loved by all, filler of its chariot and most wealthy. May this most adorable Lord of harnessed horses, promptly show favour to his adorer. 4

May that splendid cosmic chariot of twin-divines, harnessed at mere thought, envelop my soul and body with radiance. O ever-true promotors of sacred works, you grace the home of the leading worshipper with your presence to give strengthening food to us and our children. 5

O cloud-bearing winds, showerers of rain, may you send all available waters from firmament. O sagacious vital principles, listeners of eulogies, sustainers of the world, may you multiply the moveable wealth of your praisers. 6

पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात ।
ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् ॥७॥
पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम् ।
स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा ॥८॥
प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वम् ।
होता यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा ॥९॥

pā́vīravī kanyā̀ citrā́yuḥ sárasvatī vīrápatnī dhíyam dhāt | gnā́bhir áchidram ṣaranám sajóshā durādhársham grinaté ṣárma yaṅsat || 7 || pathás-pathaḥ páripatim vacasyā́ kā́mena kritó abhy ā̀naḷ arkám | sá no rāsac churúdhaṣ candrā́grā dhíyam-dhiyam sīshadhāti prá pūshā́ || 8 || prathamabhā́jam yaṣásam vayodhā́m supāṇím devám sugábhastim ríbhvam | hótā yakshad yajatám pastyā̀nām agnís tváshtāram suhávam vibhā́vā || 9 ||

भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ।
बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ॥१०॥
॥७॥ आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम् ।
अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अङ्गिरस्वत् ॥११॥
प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम् ।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः ॥१२॥

bhúvanasya pitáram gīrbhír ābhí rudrám dívā vardháyā rudrám aktaú | brihántam rishvám ajáram sushumnám rídhag ghuvema kavíneshitásaḥ || 10 || 6 ||

á yuvānaḥ kavayo yajñiyāso máruto gantá grinató varasyám | acitrám cid dhí jínvathā vridhánta itthā́ nákshanto naro aṅgirasvát || 11 || prá vīrā́ya prá tavásc turā́yājā yūthéva paṣurákshir ástam | sá pispriṣati tanvì ṣrutásya stríbhir ná nā́kam vacanásya vípaḥ || 12 ||

May the purifying, amiable and graceful divine speech, the damsel of brave, lord of heaven, bless our pious rite; may she, together with all dearest associates of Nature's bounties ; be well-pleased, and bestow upon her devotee comfortable home, flawless and impenetrable to wind and rain, and grant him felicity. 7

May the worshipper, inspired by expectation of obtaining rewards, approach with praise the adorable provider of food, the guardian of one and every path. May He grant us weapons provided with penetrating golden arrow-heads. May the provider of nutritions make our intellects effective. 8

May the enkindled fire-divine, glorious, the invoker of Nature's bounties, bring for worship the architect of universe, the first maker of forms, the giver of life-span and liberal donor and acceptor like hands. He is worthy of adoration by householders and easy to be invoked. 9

With these hymns, we exalt the breath-divine by day, the breath-divine by night. Inspired by the poet sages, we invoke Him, the mighty, the blissful, undecaying, endowed with felicity, and the source of prosperity. 10

O ever-youthful, wise and adorable wind-divine, may you please come to your admirer and inspire the leading priests. Please spread through the firmament, like rays of light, and refresh the desert with rain. 11

I admire the valiant, powerful band of clouds, swift-moving ; swift like herdsman who drives his herd to the stall. May this band of clouds be adorned with the symphony of pious worshippers, just as the firmament is studded with the galaxy of stars. 12

यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधिताय ।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३ तना च ॥१३॥
तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता चनो धात् ।
तदोषधीभिरभि रातिषाचो भगः पुरंधिर्जिन्वतु प्र राये ॥१४॥
नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम् ।
क्षयं दाताजरं येन जनान्त्स्पृधो अदेवीरभि च क्रमाम विश आदेवीरभ्य१श्नवाम ॥१५॥

yó rájāṅsi vimamé pā́rthivāni tríṣ cid víshṇur mánave badhitā́ya | tásya te ṣármann upadadyámāne rāyā́ madema tanvā̀ tánā ca || 13 || tán nó 'hir budhnyò adbhír arkaís tát párvatas tát savitā́ cáno dhāt | tád óshadhībhir abhí rātisháco bhágaḥ púraṃdhir jinvatu prá rāyé || 14 || nú no rayíṃ rathyàṃ carshaṇiprā́m puruvī́ram mahá ṛitásya gopā́m | kshárayaṃ dātājáraṃ yéna jánān spṛ́dho ádevīr abhí ca krámāma víṣa ā́devīr abhy àṣnávāma || 15 || 7 ||

(५०) पञ्चाशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य भारद्वाज ऋजिश्वा ऋषिः । विश्वे देवा देवताः । त्रिष्टुप् छन्दः ॥

॥८॥ हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निम् ।
अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्त्सवितारं भगं च ॥१॥
सुज्योतिषः सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि देवान् ।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ॥२॥

50

Huvé vo devī́m áditim námobhir mṛiḷīkā́ya váruṇam mitrám agním | abhikshadā́m aryamáṇaṃ suṣévaṃ tratṝ́n devā́n savitā́ram bhágaṃ ca || 1 || sujyótishaḥ sūrya dákshapitṝn anāgāstvé sumaho vīhi devā́n | dvijánmāno yá ṛitasā́paḥ satyā́ḥ svàrvanto yajatā́ agnijihvā́ḥ || 2 ||

O all pervading Lord, may we be happy in a home, in riches, in person, and in children, bestowed upon us by you. You measure out all the terrestrial regions in three steps, and guard mankind from the calumny of the forces of darkness. 13

Sweet be the song of mine to the cloud of the midspace, the mountains, the sun, floods, and lightning. Sweet be the plants to Nature's bounties, which accept oblations. May the all-wise, gracious Lord be propitious to us for the acquirement of riches. 14

Grant us, O universal Nature's bounties, riches consisting of vehicles, numerous help-mates, many offsprings, wealth for providing efficiency to our solemn ceremonies, and a lasting home, free from decay, wherewith we may overcome malevolent and unrighteous people and afford support to those to whom the supreme Lord is gracious. 15

50

I invoke with adoration, the Lord who is infinite, virtuous, friendly, guide, judicious, the overcomer of adversaries, worthy of praise, and source of creative genius, and the gracious. I invoke all protective powers also for felicity and happiness. 1

O radiant source of all illuminations, may you render the luminous cosmic powers of divine origin, kind and tender towards us. They are twice-born (once in the space, and secondly on the earth), desirous of worship, observants of truth, possessors of wealth and worthy of honour. Their tongue is like the flames of fire. 2

उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने ।
महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः ॥३॥
आ नो रुद्रस्य सूनवो नमन्तामद्या हूतासो वसवोऽधृष्टाः ।
यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ॥४॥
मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।
श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ॥५॥

utá dyā-
vāpṛithivī kshatrám urú bṛihád rodasī ṣaraṇám sushumne | mahás karatho várivo yáthā no 'smé ksháyāya dhishaṇe anehāḥ || 3 || ā́ no rudrásya sūnávo namantām adyā́ hūtáso vásavó 'dhṛishṭāḥ | yád īm árbhe mahatí vā hitáso bādhé marúto áhvāma devā́n || 4 || mimyáksha yéshu rodasī nú devī́ síshakti pūshā́ abhyardhayájvā | ṣrutvā́ hávam maruto yád dha yāthá bhū́mā rejante ádhvani právikte || 5 || 8 ||

॥० ॥ अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन ।
श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः ॥६॥
ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥७॥

abhí tyáṃ vīráṃ gírvaṇasam arcéndram bráhmaṇā jaritar návena | ṣrávad íd dhávam úpa ca stávāno rā́sad vā́jāñ úpa mahó gṛiṇānáḥ || 6 || omā́nam āpo mānushīr ámṛiktaṃ dhāta tokā́ya tánayāya ṣáṃ yóḥ | yūyáṃ hí shṭhā́ bhishájo mātṛítamā víṣvasya sthātúr jágato jánitrīḥ || 7 ||

May you, O mighty heaven and earth, provide us strength and spacious habitation for our comfort. May you bless us so that immense wealth becomes ours. May you, O beneficent powers, keep sinful tendencies away from us. 3

May the offsprings of cosmic vitality, granters of dwellings, invincible, invoked on this occasion lovingly bend down to lift us up. Hence, we call upon the divine vital principles, so that they become our helpers in difficulty, great or small. 4

They are the ones, with whom the divine powers of heaven and earth are associated and whom the granter of nourishment, the granter of prosperity, honours. When O cloud-bearing winds, on our invocation, you come hither, then on your diverse paths, all beings tremble. 5

O worshipper, may you glorify that supreme resplendent Lord, with a new hymn, who is worthy of adoration. May He, so glorified, hear our invocation. May He, so lauded, bestow upon us abundant nourishment. 6

O waters, friendly to mankind, may you unceasingly provide life-preserving food for the perpetuation of our sons and grandsons. May you grant us security and cast off all evils from us. Verily, you are more than motherly physicians to us, you are the father of the stationary and moveable creation. 7

आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥८॥
उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
स्यामहं ते सदमिद्रातौ तव स्यामग्नेऽवसा सुवीरः ॥९॥
उत त्या मे हवमा जग्म्यातं नासत्या धीभिर्युवमङ्ग विप्रा ।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके ॥१०॥
॥२०॥ ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ।
दशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ॥११॥

á no deváḥ savitā́ trā́yamāṇo híraṇyapāṇir yajató jagamyāt | yó dátravāñ usháso ná prátīkam vyūrṇuté dāṣúshe vā́ryāṇi || 8 || utá tvā́m sūno sahaso no adyā́ devā́ñ asmínn adhvaré vavṛityāḥ | syā́m ahám te sádam íd rātaú táva syām agné 'vasā suvī́raḥ || 9 || utá tyā́ me hávam ā́ jagmyātam nā́satyā dhībhír yuvám aṅgá viprā | átrim ná mahás támaso 'mumuktam tū́rvatam narā duritā́d abhī́ke || 10 || 9 ||

té no rāyó dyumáto vā́javato dātā́ro bhūta nṛivátaḥ purukshóḥ | daṣasyánto divyā́ḥ pā́rthivāso gójātā ápyā mṛiḷátā ca devāḥ || 11 ||

ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर्मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः ॥१२॥
उत स्य देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः ।
त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः ॥१३॥

té no rudráḥ sárasvatī sajóshā mīḷhúshmanto víshṇur mṛiḷantu vāyúḥ | ṛibhukshā́ vā́jo daívyo vidhātā́ parjányavā́tā pipyatām ísham naḥ || 12 || utá syá deváḥ savitā́ bhágo no 'pā́m nápād avatu dā́nu pápriḥ | tváshṭa devébhir jánibhiḥ sajóshā dyaúr devébhiḥ pṛithiví samudraíḥ || 13 ||

May the adorable creator, the preserver, the possessor of golden radiance, come to bless us. He, who is splendid like the first light of the dawn, disperses excellent riches to the offerer of the oblation. 8

And may you, O source of strength, bring back today the divine forces to bless our noble deeds. May I always enjoy your favours. May I, through your protection, O adorable Lord, be blessed with excellent descendants. 9

O wise, ever-true twin-divines, come quickly to my invocation, supported by dedicatory acts. May you extricate us from thick darkness, as you could extricate the three-fold free sage and protect us. May you O leaders, protect us from the danger of life-conflicts. 10

O divine powers, may you bestow on us splendid riches, and brave sons, admired by all. O celestial luminaries and terrestrial vital powers, offsprings of midspace and children of waters, please grant us our wishes and make us happy. 11

May the Lord of cosmic vitality, the vital breath, the divine speech, and the all-pervading wind send to us rains and make us happy. May the divine powers, rich in spiritual, physical, and creative energy, grant us abundant nourishment. 12

And may the divine Lord of creativity, and the Lord of lightning, whilst pouring down gifts be gracious to us ; and may the creator of the cosmic forces, along with Nature's bounties, such as the firmament, the earth, and the oceans protect us. 13

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु ॥१४॥
एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः ।
ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ॥१५॥

utá nó 'hir budhnyàḥ srinotv ajá ékapāt prithiví samudráḥ | víṣve devā́ ritāvrídho huvānā́ stutā́ mántrāḥ kaviṣastā́ avantu || 14 || evā́ nápāto máma tásya dhībhír bharádvājā abhy àrcanty arkaíḥ | gnā́ hutā́so vá·savó 'dhrishṭā víṣve stutā́so bhūtā yajatrāḥ || 15 || 10 ||

(५१) एकपञ्चाशं सूक्तम्

(१–१६) षोडशर्चस्यास्य सूक्तस्य भारद्वाज ऋजिश्वा ऋषिः । विश्वे देवा देवताः । (१–१२) प्रथमादि-द्वादशर्चां त्रिष्टुप्, (१३–१५) त्रयोदश्यादितृचस्योष्णिक्, (१६) षोडश्याश्चानुष्टुप् छन्दांसि ॥

॥११॥ उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुणयोरदब्धम् ।
ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् ॥१॥
वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः ।
ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान् ॥२॥
स्तुष उ वो मह ऋतस्य गोपानदितिं मित्रं वरुणं सुजातान् ।
अर्यमणं भगमदब्धधीतीनच्छा वोचे सधन्यः पावकान् ॥३॥

51.

Úd u tyác cákshur máhi mitráyor ā́ṅ éti priyám váruṇayor ádabdham | ritásya ṣúci darṣatám ánīkam rukmó ná divá úditā vy àdyaut || 1 || véda yás trī́ṇi vidáthāny eshām devā́nāṃ jánma sanutár ā́ ca vípraḥ | rijú mártesha vrijinā́ ca páṣyann abhí cashṭe sū́ro aryá évān || 2 || stushá u vo mahá ritásya gopā́n áditim mitrám váruṇam sujātā́n | aryamáṇam bhágam ádabdhadhītīn áchā voce sadhanyàḥ pāvakā́n || 3 ||

May the eternal and infinite Lord of universe hear us. May the earth and ocean hear us ; may the universal divine powers, who are exalted by our adoration and invoked and praised by us, protect us. Our mystical prayers are addressed to them and they have been glorified by sages of all times. 14

Thus we, the sons of the race of sagacious devotees, worship you, O Lord, along with your cosmic forces. And to that effect, we perform our sacred rites and chant holy hymns. O adorable powers, you have been showing respect and regard ; you are givers of dwellings and are invincible. May you, along with your associated energies, ever be adored. 15

51

That expansive unobstructive, and dear radiant sun, as if, an eye of the cosmic light and plasma, is moving upward. The pure and lovely face of the holy order shines like golden ornament of heaven in its rising. 1

He, the sage, the sun-divine, knows the three cognizable worlds ; and also the mysterious birth of Nature's bounties, be it near or far. He, the sun divine, is seen, as if, beholding good and evil acts of mortals ; and thenceforth manifests the merits of their intentions. 2

I glorify you, O sun-divine, O protector of mighty eternal law, you are known by your attributive names, like the mother infinite, the Lord of cosmic light and the Lord of plasma, the venerable justice personified, and supreme grace. I celebrate Nature's bounties, whose acts are unimpeded, who are bestowers of wealth, and dispensers of purity. 3

रिशादसः सत्पतीँरदब्धान्महो राज्ञः सुवसनस्य दातॄन् ।
यूनः सुक्षत्रान्क्षयतो दिवो नॄनादित्यान्याम्यदितिं दुवोयु ॥४॥
द्यौ३ष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ॥५॥
॥११॥ मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव ॥६॥

rišádasaḥ sátpatīṁr ádabdhān mahó rā́jñaḥ suvasanásya datrı́n | yū́naḥ sukshatrā́n ksháyato divó nṛ́n ādityā́n yāmy áditiṃ duvoyú || 4 || dyaùsh pítaḥ pŕ̥thivi mátar ádhrug ágne bhrātar vasavo mṛiḷátā naḥ | víšva ādityā adite sajóshā asmábhyaṃ šárma bahuláṃ ví yanta || 5 || 11 ||

mā́ no vŕ̥kāya vṛikyè samasmā aghāyaté rīradhatā yajatrāḥ | yuyáṃ hí shṭhā́ rathyò nas tanū́nāṃ yūyáṃ dákshasya vácaso babhūvá || 6 ||

मा व एनो अन्यकृतं भुजेम मा तत्कर्म वसवो यच्चयध्वे ।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट ॥७॥
नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम् ।
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ॥८॥
ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान् ।
ताँ आ नमोभिरुरुचक्षसो नॄन्विश्वान्व आ नमे महो यजत्राः ॥९॥

mā́ va éno anyákṛitam bhujema mā́ tát karma vasavo yác cáyadhve | víšvasya hí ksháyatha višvadevāḥ svayáṃ ripús tanvàṃ rīrishīshṭa || 7 || náma íd ugráṃ náma ā́ vivāse námo dādhāra pṛithivím utá dyā́m | námo devébhyo náma īša eshāṃ kṛitáṃ cid éno námasā́ vivāse || 8 || ṛitásya vo rathyàḥ pūtádakshān ṛitásya pastyasádo ádabdhān | tā́ñ ā́ námobhir urucákshaso nṛ́n víšvān va ā́ name mahó yajatrāḥ || 9 ||

O divinities, the suns-divine, the offsprings of mother-infinity, the scatterers of the malevolent, the defender of virtuous, the irresistible, the mighty, the donors of good dwellings, ever-young, very powerful over wide dominions, and leaders of heaven, I seek your refuge with adoration. 4

O father heaven, the infallible mother earth, the brother fire, and you, O giver of life-breath, may you all grant us happiness. O mother infinite and sons of mother infinity, may you, with one mind, bestow upon us your manifold protection. 5

Subject us not, O adorable bounties, to evil creatures, wolf-like, or like a robber, nor to any one designing us harm. Verily, you are the one who guide us aright and you are the rulers of our vigour and speech. 6

Let us not suffer for the sin of others, nor do that which, O regions-divine, you prohibit. O universal cosmic powers, controllers of the universe, may the one, who hurts us, be the victim of his own designs. 7

Reverence be to the mighty ; reverence I adopt. Reverence sustains earth and heaven; reverence to Nature's bounties; reverence overwhelms them. I offer penance in the form of reverence for sins, which may have been committed by me. 8

O adorable Nature's bounties, I venerate you with reverential salutations. You are mighty, the regulators of cosmic sacrifice, pure in your spirit, infallible, dwellers in the chamber of cosmic worship, unsubdued, far-seeing and leaders of cosmic order. 9

ते हि श्रेष्ठवर्चसस्त उं नस्तिरो विश्वानि दुरिता नयन्ति ।
सुक्षत्रासो वरुणो मित्रो अग्निर्ऋतधीतयो वक्मराजसत्याः ॥१०॥

॥१३॥ ते न इन्द्रः पृथिवी क्षाम वर्धन्पूषा भगो अदितिः पञ्च जनाः ।
सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ॥११॥
नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।
आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववन्द ॥१२॥

té hí sréshtha-varcasas tá u nas tiró vísvāni duritā́ náyanti | sukshatrā́so váruṇo mitró agnír ritádhītayo vakmarā́jasatyāḥ || 10 || 12 ||

té na índraḥ prithivī́ kshā́ma vardhan pūshā́ bhágo áditiḥ páñca jánāḥ | susármāṇaḥ svávasaḥ sunīthā́ bhávantu naḥ sutrātrā́saḥ sugopā́ḥ || 11 || nū́ sadmā́naṃ divyáṃ náṅsi devā bhā́radvājaḥ sumatíṃ yāti hótā | āsānébhir yájamāno miyédhair devā́nāṃ jánma vasūyúr vavanda || 12 ||

अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् ।
दविष्ठमस्य सत्पते कृधी सुगम् ॥१३॥
ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः ।
जही न्यत्रिणं पणिं वृको हि षः ॥१४॥
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः ।
कर्ता नो अध्वन्ना सुगं गोपा अमा ॥१५॥
अपि पन्थामगन्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥१६॥

ápa tyáṃ vrijinám ripúṃ stenám agne durādhyàm | davishthám asya satpate kridhí sugám || 13 || grā́vāṇaḥ soma no hí kaṃ sakhitvanā́ya vāvasúḥ | jahí ny àtríṇam paṇím vríko hí sháḥ || 14 || yūyáṃ hí shthā́ sudānava índrajyeshthā abhídyavaḥ | kártā no ádhvann ā́ sugáṃ gopā́ amā́ || 15 || ápi pánthām aganmahi svastigā́m anehásam | yéna vísvāḥ pári dvísho vriṇákti vindáte vásu || 16 || 13 ||

For, these are they who excell in splendour. They guide us safely through all our troubles. They are friendly, shining, adorable, mighty rulers, true-minded and faithful to those who are intensely dedicated to your service. 10

May they, the earth, the mother infinite, the sun, the gracious, the provider of food and the five-fold people increase our habitable land. May they, giving good help, good refuge, and good guidance, be our good deliverers and good preservers. 11

O divine powers, may the bearer of wisdom, the invoker, quickly obtain divine shelter as he solicits your goodwill. He is the promoter of sacred works, and along with his pious associates, seeks wisdom and pays tributes to Nature's bounties. 12

O fire-divine, may you drive far far away the wicked, foe and felonious, malignant enemy. O protector of virtuous, may you make our path easy. 13

O blissful Lord, our two faculties, emotional and physical, like two grinding stones, are anxious for your love. May you destroy the voracious instinct of greed, for verily, it is a wolf. 14

O Nature's bounties, resplendent Lord being your chief, you are most munificent and illustrious. May you give us good paths for travel and guard well at home. 15

We have travelled along a road that leads to peace and prosperity and is free from evil. This is the road whereon a man escapes all hurdles and attains riches. 16

(५२) द्विपञ्चाशं सूक्तम्

(१–१७) सप्तदशर्चस्यास्य सूक्तस्य भारद्वाज ऋजिश्वा ऋषिः । विश्वे देवा देवताः । (१–६, १३, १५–१७) प्रथमादितृचद्वयस्य त्रयोदश्या ऋचः पञ्चदश्यादितृचस्य च त्रिष्टुप्, (७–१२) सप्तम्यादितृचद्वयस्य गायत्री, (१४) चतुर्दश्याश्च जगती छन्दांसि ॥

॥१४॥ न तद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः ।
उब्जन्तु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा ॥१॥
अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः ॥२॥

52.

Ná tád divá ná prithivyánu manye ná yajñéna nótá sámībhir ābhíḥ | ubjántu tám subhvàḥ párvatāso ní hīyatām atiyājásya yashṭā || 1 || áti vā yó maruto mányate no bráhma vā yáḥ kriyámāṇam nínitsāt | tápūṅshi tásmai vrijināni santu brahmadvísham abhí tám ṣocatu dyaúḥ || 2 ||

किमङ्ग त्वा ब्रह्मणः सोम गोपां किमङ्ग त्वाहुरभिशस्तिपां नः ।
किमङ्ग नः पश्यसि निद्यमानान्ब्रह्मद्विषे तपुषिं हेतिमस्य ॥३॥
अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः ।
अवन्तु मा पर्वतासो ध्रुवासोऽवन्तु मा पितरो देवहूतौ ॥४॥
विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम् ।
तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः ॥५॥

kím aṅgá tvā bráhmaṇaḥ soma gopám kím aṅgá tvāhur abhiṣastipám naḥ | kím aṅgá naḥ paṣyasi nidyámānān brahmadvíshe tápushim hetím asya || 3 || ávantu mám usháso jáyamānā ávantu mā síndhavaḥ pínvamānāḥ | ávantu mā párvatāso dhruvásó 'vantu mā pitáro deváhūtau || 4 || viṣvadánīm sumánasaḥ syāma páṣyema nú sūryam uccárantam | táthā karad vásupatir vásūnām deváñ óhānó 'vaságamishṭhaḥ || 5 || 14 ||

52

I do not regard the force on the earth or the power in heaven, as comparable to the sanctity of sacrifice and sacred rites. Let, then, the mighty mountains crush him down. Let the worship of a boastful worshipper be made humble. 1

O vital principles, may the sun in heaven scorch that man and may agonies of burning be inflicted on that faithless who thinks himself superior to us, and who seeks to depreciate the worship, that we offer. 2

Why then, do they, O blissful Lord, call you the protector of god-loving people ? And our defender against calumny ? Why do you let us be humiliated ? May you cast your bolt of justice at him who denies devotion. 3

May the dawns, as they spring to life, preserve me ; and may the rivers, as they swell preserve me, may the first-set mountains preserve me ; may the progenitors, when I call on divine powers, preserve me. 4

May we, at all seasons be possessed of healthy minds; and may we behold the sun, when he arises. May the affluent Lord of riches, observant, conveyer of our oblations to Nature's bounties, make us worthy of these rewards. 5

॥१५॥ इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना ।
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ॥६॥
विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ॥७॥
यो वो देवा घृतस्नुना हव्येन प्रतिभूषति । तं विश्व उप गच्छथ ॥८॥
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृळीका भवन्तु नः ॥९॥
विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ॥१०॥

indro nédishtham ávasā́gamishthah sárasvatī síndhubhih pínvamānā | parjányo na óshadhībhir mayobhúr agníh suśáṅsah suhávah pitéva || 6 || víśve devāsa ā́ gata śrinutā́ ma imáṃ hávam | édám barhír ní shīdata || 7 || yó vo devā ghritásnunā havyéna pratibhū́shati | táṃ víśva úpa gachatha || 8 || úpa naḥ sūnávo gírah śriṇvántv amrítasya yé | sumrilīkā́ bhavantu naḥ || 9 || víśve devā́ ritāvrídha ritúbhir havanaśrútah | jushántāṃ yújyam páyaḥ || 10 || 15 ||

॥१६॥ स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा । इमा हव्या जुषन्त नः ॥११॥
इमं नो अग्ने अध्वरं होतर्वयुनशो यज । चिकित्वान्दैव्यं जनम् ॥१२॥
विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥१३॥
विश्वे देवा मम शृण्वन्तु यज्ञिया उभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ॥१४॥

stotrám índro marúdgaṇas tváshtrimān mitró aryamā́ | imā́ havyā́ jushanta naḥ || 11 || imáṃ no agne adhvaráṃ hótar vayunaśó yaja | cikitvā́n daívyaṃ jánam || 12 || víśve devāḥ śriṇutémáṃ hávam me yé antárikshe yá úpa dyávi shṭhá | yé agnijihvā́ utá vā yájatrā āsádyāsmín barhíshi mādayadhvam || 13 || víśve devā́ máma śriṇvantu yajñíyā ubhé ródasī apā́ṃ nápāc ca mánma | mā́ vo vácāṅsi paricákshyāṇi vocaṃ sumnéshv íd vo ántamā madema || 14 ||

May the sun be most prompt to favour us for our protection. May the river with its tributary, and may the clouds with herbs and vegetation be givers of happiness to us and may we invoke the fire-divine with earnestness to be like a father to us. 6

Come, O universal divine powers, hear my invocation ; and be seated in our hearts, as if, on sacred grass. 7

O divines, may you, one and all, come to him who approaches you with butter-dripped oblations, i.e. loving devotions. 8

May all sons of the immortal hear our words and be the source of happiness to us. 9

May all divine powers of universe, the augmenters of eternal law, listening to praises, chanted at due seasons, accept our appropriate homage, which is sacred as milk. 10

May the resplendent Lord, along with vital elements, the divine architect and provider of law and order, accept our praises and these offerings. 11

O fire-divine, the invoker, cognizant of the divine assembly, may you offer, as ordained by rules, our dedicated services. 12

O divine powers, hear my invocation, whether you inhabit the mid-region or the celestial. You receive oblations conveyed by the flame of fire-divine. May you, seated in our hearts, rejoice. 13

May all the divine powers, and both heaven and earth and the fire-divine, the grandson of water, hear our songs; may we not utter such words as you may disregard. Let us, closely allied with you, rejoice in bliss. 14

ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः ॥१५॥
अग्नीपर्जन्याववतं धियं मेऽस्मिन्हवे सुहवा सुष्टुतिं नः ।
इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे ॥१६॥
स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।
अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम् ॥१७॥

yé ké ca jmá mahíno áhimāyā divó jajñiré apám sadhásthe | té asmábhyam isháye víṣvam áyuḥ kshápa usrá varivasyantu deváḥ || 15 || ágnīparjanyāv ávatam dhíyam me 'smín háve suhavā sushṭutím naḥ | íḷām anyó janáyad gárbham anyáḥ prajávatīr ísha á dhattam asmé || 16 || stīrṇé barhíshi samidhāné agnaú sūkténa mahá námasá vivāse | asmín no adyá vidáthe yajatrā víṣve devā havíshi mādayadhvam || 17 || 16 ||

(५३) त्रिपञ्चाशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । (१-७, ९-१०) प्रथमादिसप्तर्चां नवमीदशम्योश्च गायत्री, (८) अष्टम्याश्चानुष्टुप् छन्दसी ॥

॥१७॥ वयमु त्वा पथस्पते रथं न वाजसातये । धिये पूषन्नयुज्महि ॥१॥
अभि नो नर्यं वसु वीरं प्रयतदक्षिणम् । वामं गृहपतिं नय ॥२॥

53.

Vayám u tvā pathas pate rátham ná vájasātaye | dhiyé pūshann ayujmahi | 1 || abhí no náryam vásu vīrám práyatadakshiṇam | vāmám gṛihápatim naya | 2 ||

May those mighty, with the mystic powers, born on earth or in heaven, or in the waters of interspace, condescend to grant us life of full duration for our prosperity. May Nature's bounties kindly bless us nights and mornings. 15

May the fire-divine and clouds be swift to hear my laudations and prayers. One of you generates good, the other posterity. May you, therefore, grant us food productive of descendants. 16

When the sacred grass is strewn, the fire enkindled, with hymns and with profound veneration, then O adorable divine powers, take joy in the offerings presented to you in this ceremonial congregation. 17

53

O nourisher, Lord of the path, we engage and bind you to our hymns, like a chariot yoked for bringing food. 1

May you kindly conduct us to a gracious householder, friendly to men, liberal in wealth, and giver of profuse donations. 2

अदि॑त्सन्तं चिदाघृणे॒ पूष॒न्दाना॑य चोदय । प॒णेश्चि॒द्वि म्र॑दा॒ मनः॑ ॥३॥
वि प॒थो वाज॑सातये चिनु॒हि वि मृधो॑ जहि । साध॑न्तामुग्र नो॒ धियः॑ ॥४॥
परि॑ तृन्धि प॒णीना॒मार॑या॒ हृद॑या कवे । अथे॑म॒स्मभ्यं॑ रन्धय ॥५॥
॥१८॥ वि पू॑षन्नार॑या तुद प॒णेरि॑च्छ हृ॒दि प्रि॒यम् । अथे॑म॒स्मभ्यं॑ रन्धय ॥६॥
आ रि॑ख किकि॒रा कृ॑णु प॒णीनां॒ हृद॑या कवे । अथे॑म॒स्मभ्यं॑ रन्धय ॥७॥

áditsantaṃ cid āghriṇe pū́shan dā́nāya codaya | paṇéś cid ví mradā mánaḥ || 3 || ví pathó vā́jasātaye cinuhí ví mṛ́dho jahi | sā́dhantām ugra no dhíyaḥ || 4 || pári tṛindhi paṇīnā́m ā́rayā hṛ́dayā kave | áthem asmábhyaṃ randhaya || 5 || 17 ||

ví pūshann ā́rayā tuda paṇér iccha hṛidí priyám | áthem — || 6 || ā́ rikha kikirā́ kṛiṇu paṇīnā́ṃ hṛ́dayā kave | áthem — || 7 ||

यां पू॑षन्ब्रह्म॒चोद॑नी॒मारां॒ बिभ॑र्ष्याघृणे ।
तया॑ समस्य॒ हृद॑य॒मा रि॑ख किकि॒रा कृ॑णु ॥८॥
या ते॒ अष्ट्रा॒ गोओ॑पशा॒घृणे पशु॒साध॑नी । तस्या॑स्ते सु॒म्नमी॑महे ॥९॥
उ॒त नो॑ गो॒षणिं॒ धिय॑मश्व॒सां वा॑ज॒सामु॒त । नृ॒वत्कृ॑णुहि वी॒तये॑ ॥१०॥

yā́m pūshan brahmacódanīm ā́rām bíbharshy āghriṇe | táyā samasya hṛ́dayam ā́ rikha kikirā́ kṛiṇu || 8 || yā́ te áshṭrā góopaśāghriṇe paśusā́dhanī | tásyās te sumnám īmahe || 9 || utá no goshā́ṇiṃ dhíyam aśvasā́ṃ vājasā́m utá | nṛivát kṛiṇuhi vītáye || 10 || 18 ||

O resplendent nourisher, urge even the niggard to give us liberally, and make the heart of the miser to grow soft. 3

O powerful nourisher, make the roads comfortable for the passage of provisions; drive away all hurdles and obstructions, so that our holy works may be accomplished. 4

O wise nourisher, penetrate with an awl the hearts of the avaricious churls and so render them complacent towards us. 5

Pierce with a goad, O nourisher, the heart of the avaricious; generate generosity in his heart, and so render him complacent towards us. 6

O wise nourisher, tear up and rend in pieces the hearts of avaricious churls, and so render them complacent towards us. 7

Resplendent nourisher, with that godly-blessed ploughshare which you carry, tear up the heart of every miser and render it soft. 8

Resplendent nourisher, we ask of you the details of that goad that guides the cows and directs cattle. 9

Give us that pious wisdom which is productive of cows, of horses, of food and of dependents for our delight and use. 10

(५४) चतुष्पञ्चाशं सूक्तम्

(१–१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । गायत्री छन्दः ॥

॥१९॥ सं पूषन्विदुषा नय यो अञ्जसानुशासति । य एवेदमिति ब्रवत् ॥१॥
समु पूष्णा गमेमहि यो गृहाँ अभिशासति । इम एवेति च ब्रवत् ॥२॥
पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते । नो अस्य व्यथते पविः ॥३॥

54.

Sám pūshan vidúshā naya yó áñjasānuṣā́sati | yá evédám íti brávat || 1 || sám u pushṇā́ gamemahi yó gṛihā́n abhiṣā́sati | imá evéti ca brávat || 2 || pushṇás cakrám ná rishyati ná kóṣó 'va padyate | nó asya vyathate pavíḥ || 3 ||

यो अस्मै हविषाविधन्न तं पूषापि मृष्यते । प्रथमो विन्दते वसु ॥४॥
पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजं सनोतु नः ॥५॥
॥२०॥ पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः । अस्माकं स्तुवतामुत ॥६॥
माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे । अथारिष्टाभिरा गहि ॥७॥
शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम् । ईशानं राय ईमहे ॥८॥
पूषन्तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥९॥
परि पूषा परस्ताद्धस्तं दधातु दक्षिणम् । पुनर्नो नष्टमाजतु ॥१०॥

yó asmai havíshávidhan ná tám pūshápi mṛishyate | prathamó vindate vásu || 4 || pūshā́ gā́ ánv etu naḥ pushā́ rakshatv árvataḥ | pūshā́ vā́jam sanotu naḥ || 5 || 19 ||

pū́shann ánu prá gā́ ihi yā́jamānasya sunvatáḥ | asmā́kam stuvatā́m utá || 6 || mā́kir neṣan mā́kīm rishan mā́kīm sáṃ ṣāri kévaṭe | áthārishṭābhir ā́ gahi || 7 || ṣriṇvántam pūshā́ṇam vayám íryam ánashṭavedasam | ī́ṣānam rāyá īmahe || 8 || pū́shan táva vraté vayáṃ ná rishyema kádā caná | stotā́ras ta ihá smasi || 9 || pári pūshā́ parástād dhástaṃ dadhātu dákshiṇam | púnar no nashtā́m ā́jatu || 10 || 20 ||

54

Bring us, O Lord, the nourisher, into communication with a wise man who may rightly direct us, who may even say, this is so. 1

May we, by the favour of the nourisher, come in communication with the man who may direct us to the houses, and may say, verily, these are they. 2

The chariot-wheel of the nourisher is never damaged, its cover never falls on ground and its edge does not harm us. 3

The nourisher inflicts not the least injury on the man who propitiates him by oblations ; he is the first who acquires wealth. 4

May the nourisher come to guard our cattle, may He keep our horses safe ; may nourisher give us food. 5

Come, O Lord, the nourisher to guard the cattle of the institutor of the sacred worship and presenter of homage and also guard our cattle, of those who sing his praises. 6

O Lord, the nourisher, let not, our cattle perish ; let them not be injured ; let them not be hurt by falling into a well ; return along with them, all safe and sound. 7

We solicit riches of the nourisher, who hears our eulogies, whose wealth is never lost, who is averter of poverty and who is the ruler over all. 8

O Lord, the nourisher, may we never suffer detriment when engaged in your worship ; we are here to sing your praise. 9

May the nourisher stretch His right hand to restrain our cattle from going astray ; may He bring again to us that, which has been lost. 10

(५५) पञ्चपञ्चाशं सूक्तम्

(१-६) षड्ऋचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । गायत्री छन्दः ॥

॥२१॥ एहि वां विमुचो नपादाघृणे सं सचावहै । रथीर्ऋतस्य नो भव ॥१॥
रथीतमं कपर्दिनमीशानं राधसो महः । रायः सखायमीमहे ॥२॥
रायो धारास्याघृणे वसो राशिरजाश्व । धीवतोधीवतः सखा ॥३॥

55.

Éhi vā́ṃ vimuco napād ā́ghriṇe sā́ṃ sacāvahai | rathír ṛitásya no bhava || 1 || rathítamam kapardínam íṣānaṃ rā́dhaso maháḥ | rāyáḥ sákhāyam īmahe || 2 || rāyó dhā́rāsy ā́ghriṇe váso rāṣír ajāṣva | dhívato-dhīvataḥ sákhā || 3 ||

पूषणं न्व१जाश्वमुप स्तोषाम वाजिनम् । स्वसुर्यो जार उच्यते ॥४॥
मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः । भ्रातेन्द्रस्य सखा मम ॥५॥
आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः ॥६॥

pū-shánaṃ nv àjáṣvam úpa stoshāma vājínam | svásur yó jārá ucyáte || 4 || mātúr didhishúm abravaṃ svásur jāráḥ ṣṛiṇotu naḥ | bhrā́téndrasya sákhā máma || 5 || ā́jā́saḥ pūsháṇaṃ ráthe niṣṛimbhā́s té janaṣríyam | deváṃ vahantu bíbhrataḥ || 6 || 21 ||

55

Come, O illustrious source of deliverence to me, your worshipper ; let both of us work in harmony and become the promoter of sacred works. 1

We solicit riches of our friend (Lord, the nourisher), the chief of charioteers, the wearer of a braid (of hair), the Lord of infinite wealth. 2

O illustrious nourisher, the sun, you are a stream of riches ; a heap of wealth ; the friend of every pious man. Goat-like is your courser (your rays lie on the low energy side), whilst your chariot moves in the firmament. 3

We glorify, O nourisher, the sun, the rider on the goat-driven chariot, the giver of food, and the one who is called the gallant of his sister, the dawn. 4

I glorify nourisher, the sun, who is called the protector of his mother, the night ; may the gallant of his sister dawn hear us ; may the brother of the sun be our friend. 5

May the harnessed ponies—the goat-size coursers, drawing the sun in their car, bring hither the nourisher, the benefactor of man. 6

(५६) षट्पञ्चाशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । (१-५) प्रथमादि-
पञ्चर्चां गायत्री, (६) षष्ठ्याश्चानुष्टुप् छन्दसी ॥

॥२२॥ य एनमादिदेशति करम्भादिति पूषणम् । न तेन देव आदिशे ॥१॥
उत घा स रथीतमः सख्या सत्पतिर्युजा । इन्द्रो वृत्राणि जिघ्नते ॥२॥

56.

Yá enam ādídeṣati karambhád íti pūsháṇam | ná téna devá ādíṣé || 1 || utá ghā sá rathítamaḥ sákhyā sátpatir yujá | índro vṛitráṇi jighnate || 2 ||

उतादः परुषे गवि सूरश्चक्रं हिरण्ययम् । न्यैरयद्रथीतमः ॥३॥
यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः । तत्सु नो मन्म साधय ॥४॥
इमं च नो गवेषणं सातये सीषधो गणम् । आरात्पूषन्नसि श्रुतः ॥५॥
आ ते स्वस्तिमीमह आरेअघामुपावसुम् ।
अद्या च सर्वतातये श्वश्च सर्वतातये ॥६॥

utádáḥ parushé gávi sū́raṣ cakráṃ hiraṇyáyam | ny àirayad rathítamaḥ || 3 || yád adyá tvā purushṭuta brávāma dasra mantumaḥ | tát sú no mánma sādhaya || 4 || imáṃ ca no gavéshaṇaṃ sātáye sīshadho gaṇám | ārát pūshann asi ṣrutáḥ || 5 || á te svastím īmaha āréaghām úpāvasum | adyá ca sarvátātaye ṣváṣ ca sarvátātaye || 6 || 22 ||

56

Whosoever has worshipped the nourishing sun-divine of the southern solstice, with the offering of meal and butter, need not think of any other sun-divine. 1

The resplendent sun of the northern solstice is best of charioteers and the protector of the virtuous. He, allied with his friend, the nourishing sun of the southern solstice, destroys his adversaries. 2

He, the nourishing sun of the southern solstice, is the impeller, the chief of charioteers. He guides the golden wheel of the radiant sun. 3

O wise, wondrous, the nourishing sun of the southern solstice, adored by all, we celebrate your glory today. So grant us the desired wealth. 4

O the nourishing sun, you are renowned afar. May you lead our groups of people ; aspiring for the acquisition of wealth and wisdom. 5

We crave from you that prosperity, which is far from evil and near to real wealth ; and which leads to universal happiness today, and universal happiness tomorrow. 6

(५७) सप्तपञ्चाशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्रापूषणौ देवते । गायत्री छन्दः ॥

॥२३॥ इन्द्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥१॥
सोममन्य उपासदत्पातवे चम्वोः सुतम् । करम्भमन्य इच्छति ॥२॥
अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता । ताभ्यां वृत्राणि जिघ्नते ॥३॥

57.

Índrā nú pūsháṇā vayáṃ sakhyáya svastáye | huvéma vájasātaye || 1 || sómam anyá úpāsadat pátave camvòḥ sutám | karambhám anyá ichati || 2 || ajá anyásya váhnayo hárī anyásya sámbhṛitā | tábhyāṃ vṛitráṇi jighnate || 3 ||

यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः । तत्र पूषाभवत्सचा ॥४॥
तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव । इन्द्रस्य चा रभामहे ॥५॥
उत्पूषणं युवामहेऽभीशूँरिव सारथिः । मह्या इन्द्रं स्वस्तये ॥६॥

yád índro ánayad ríto mahír apó vríshantamaḥ | tátra pūshábhavat sácā || 4 || tám pūshṇáḥ sumatíṃ vayáṃ vṛikshásya prá vayám iva | índrasya cá rabhāmahe || 5 || út pūsháṇaṃ yuvamahe 'bhíṣūnr iva sárathiḥ | mahyá índraṃ svastáye || 6 || 23 ||

57

O the resplendent sun of the northern solstice and the nourishing sun of the southern one, we invoke you, for obtaining your friendship, our well-being, and for obtaining food. 1

One of you, of the northern solstice, approaches to relish extracted herbal juices, poured out into ladles. The other, the southern, desires the buttered meal. 2

Goat-like are the coursers of the one, two well-fed horse-like of the other, and with them he destroys his foes. 3

When the showerer, the resplendent sun of the northern solstice, sends down the streams and mighty water-floods, the divine nourishing sun also joins with him. 4

We depend upon the goodwill of both the nourishing sun of the southern solstice and of the resplendent sun of the northern solstice as we closely cling to the extended branches of a tree. 5

We draw to us, for our great success, the nourishing sun (of the southern solstice) and the resplendent, one of the northern, as a charioteer pulls tight his reins. 6

(५८) अष्टपञ्चाशं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । पूषा देवता । (१, ३-४) प्रथमर्चस्तृतीयाचतुर्थ्योश्च त्रिष्टुप्, (२) द्वितीयायाश्च जगती छन्दसी ॥

॥२४॥ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥१॥
अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षाणो भुवना देव ईयते ॥२॥

58.

Ṣukrám te anyád yajatám te anyád vísharūpe áhanī dyaúr ivasi | víṣvā hí māyā́ ávasi svadhāvo bhadrā́ te pūshann ihá rātír astu || 1 || ajā́ṣvaḥ paṣupā́ vā́japastyo dhiyaṃjinvó bhúvane víṣve árpitaḥ | áshṭrām pūshā́ ṣithirā́m udvárīvṛijat saṃcákshaṇo bhúvanā devá īyate || 2 ||

यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ॥३॥
पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम् ॥४॥

yā́s te pūshan nā́vo antáḥ samudré hiraṇyáyīr antárikshe cáranti | tā́bhir yāsi dūtyā́ṃ sū́ryasya kā́mena kṛita ṣráva ichámānaḥ || 3 || pūshā́ subándhur divá ā́ pṛithivyā́ iḷás pátir maghávā dasmávarcāḥ | yáṃ deváso ádaduḥ sūryā́yai kā́mena kṛitáṃ tavásaṃ sváñcam || 4 || 24 ||

58

O the nourishing sun of the southern solstice, one of your forms is luminous, the other is venerable. And such, the day is of various complexion. Verily, you bestow all forms of intellect. May your auspicious liberality be manifested on this occasion. 1

The rider of the goat-like courser, the protector of animals, holder of abundant food, inspirer of hymns, is set over all the world. The divine nourisher, brandishing here and there his lightly-moving goad, proceeds in the sky, beholding every creature. 2

With your golden vessels, that navigate within the ocean-firmament, you discharge the function of a messenger of the sun. Desirous of glory, you are propitiated by whatever is willingly offered. 3

The nourishing sun of the southern solstice is the kind kinsman of heaven and earth ; the Lord of food, the possessor of opulence, and of wondrous lustre. He is vigorous, well-moving, and is propitiated by that which is willingly offered. He is in no way different from the sun of the northern solstice. 4

(५९) एकोनषष्टितमं सूक्तम्

(१–१०) दशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्राग्नी देवते । (१–६) प्रथमादितृचद्वयस्य बृहती, (७–१०) सप्तम्यादिचतुर्ऋचश्चानुष्टुप् छन्दसी ॥

॥२५॥

प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः ।
हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम् ॥१॥

59.

Prá nú vocā sutéshu vāṃ vīryā̀ yā́ni cakráthuḥ | hatáso vām pitáro devásatrava índrāgnī jívatho yuvám || 1 ||

बळित्था महिमा वामिन्द्राग्नी पनिष्ठ आ ।
समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा ॥२॥
ओकिवांसा सुते सचाँ अश्वा सप्ती इवादने ।
इन्द्रा न्वग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥३॥
य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ।
जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ॥४॥
इन्द्राग्नी को अस्य वां देवौ मर्तश्चिकेतति ।
विषूचो अश्वान्युयुजान ईयत एकः समान आ रथे ॥५॥

báḷ itthā́ mahimā́ vām índrāgnī pánishṭha ā́ | samānó vāṃ janitā́ bhrā́tarā yuvám yamā́v ihéhamātarā || 2 || okivā́ṅsā suté sácāṅ áṣvā sáptī ivā́dane | índrā nv àgnī́ ávasehá vajríṇā vayáṃ devā́ havāmahe || 3 || yá indrāgnī sutéshu vāṃ stávat téshv ṛitāvṛidhā | joshavākáṃ vádataḥ pajrahoshiṇā ná devā bhasáthaṣ caná || 4 || índrāgnī kó asyá vāṃ dévau mártaṣ ciketati | víshūco áṣvān yuyujāná īyata ékaḥ samāná ā́ ráthe || 5 || 25 ||

59

While the celestial nectar is effused, I celebrate, O cosmic divine powers of lightning and fire, your heroic noble deeds. The old-time enemies of the virtuous powers have been eliminated by you, and you survive. 1

Thus O divine powers, fire and lightning, verily, your greatness deserve loftiest praise. Sprung from one and the same progenitor, you are twin brethren ; your common mother is present here and everywhere. 2

You approach together, when the heavenly nectar is effused, like fellow horses at their forage. We invoke you today, O divine forces of lightning and fire, armed with thunderbolt, to our worship for our preservation. 3

O lightning-divine and fire-divine, augmenters of sacred works, friends of eternal law, may you not partake of the homage of him, who, when the prayer is chanted, praises you improperly, uttering unacceptable eulogies. 4

O lightning and fire-divine, how can a mortal evaluate your acts, whom even one of you proceeds in a common car, with harnessed horses capable of moving on any side. 5

॥२६॥ इन्द्रा॑ग्नी अ॒पादि॒यं पूर्वाग॑त्प॒द्वती॑भ्यः ।
हि॒त्वी शिरो॑ जि॒ह्वया॒ वाव॑द॒च्चर॑त्त्रिं॒शत्प॒दा न्य॑क्रमीत् ॥६॥
इन्द्रा॑ग्नी॒ आ हि त॑न्व॒ते नरो॒ धन्वा॑नि बा॒ह्वोः ।
मा नो॑ अ॒स्मिन्म॑हाध॒ने परा॑ वर्क्तं॒ गवि॑ष्टिषु ॥७॥
इन्द्रा॑ग्नी॒ तप॑न्ति मा॒घा अ॒र्यो अरा॑तयः ।
अप॒ द्वेषां॒स्या कृ॑तं युयु॒तं सूर्या॒दधि॑ ॥८॥

índrāgnī apā́d iyám pū́rvā́gāt padvátībhyaḥ | hitvī́ śíro jihváyā vā́vadac cárat triṁśát padā́ ny àkramīt || 6 || índrāgnī ā́ hí tanvaté náro dhánvāni bāhvóḥ | mā́ no asmín mahādhané párā varktaṃ gávishṭishu || 7 || índrāgnī tápanti māghā́ aryó árātayaḥ | ápa dvéshāṅsy ā́ kṛitaṃ yuyutáṃ sū́ryād ádhi || 8 ||

इन्द्रा॑ग्नी यु॒वोरपि॒ वसु॑ दि॒व्यानि॒ पार्थि॑वा ।
आ न॑ इ॒ह प्र य॑च्छतं र॒यिं वि॒श्वायु॑पोषसम् ॥९॥
इन्द्रा॑ग्नी उक्थवाहसा॒ स्तोमे॑भिर्हवनश्रुता ।
विश्वा॑भिर्गी॒र्भिरा ग॑तम॒स्य सोम॑स्य पी॒तये॑ ॥१०॥

índrāgnī yuvór ápi vásu divyā́ni pā́rthivā | ā́ na ihá prá yachataṃ rayíṃ viśvā́yuposhasam || 9 || índrāgnī ukthavāhasā stómebhir havanaśrutā | víśvābhir gīrbhír ā́ gatam asyá sómasya pītáye || 10 || 26 ||

This dawn, O lightning and fire-divine, though herself footless, comes before the footed sleepers, and stretching her head, she awakens people, who then utter loud sounds with their tongues, and passing onward she traverses thirty steps. 6

O Lord of cosmic lightning and fire, men, verily, stretch their bows with their arms. May you not desert us, while we are contending in the great conflict for obtaining wisdom. 7

O Lord of cosmic light and lightning, murderous aggressive enemies harass us. May you drive away our adversaries, and keep them afar from the light of the sun. 8

O Lord of cosmic fire and lightning, yours are all the treasures of heaven and earth. Bestow upon us, on this occasion, opulence that prospers every living man. 9

O Lord of cosmic lightning and fire, acceptors of hymns, may you hear our invocation, praises and all adorations. Please come hither to participate in our sparkling joy of devotion. 10

(६०) षष्टितमं सूक्तम्

(१–१५) पञ्चदशर्चस्यास्य सूक्तस्य बार्हस्पत्यो भरद्वाज ऋषिः । इन्द्राग्नी देवते । (१–३, १३) प्रथमादितृचस्य त्रयोदश्या ऋचश्च त्रिष्टुप्, (४–१२) चतुर्थ्यादिनवानां गायत्री, (१४) चतुर्दश्या बृहती, (१५) पञ्चदश्याश्चानुष्टुप् छन्दांसि ॥

॥२७॥ श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥१॥
ता योधिष्टमभि गा इन्द्र नूनमपः स्वरुषसो अग्न ऊळ्हाः ।
दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥२॥
आ वृत्रहणा वृत्रहभिः शुष्मैरिन्द्र यातं नमोभिरग्ने अर्वाक् ।
युवं राधोभिरकवेभिरिन्द्राग्ने अस्मे भवतमुत्तमेभिः ॥३॥

60.

Ṣnáthad vṛitrám utá sanoti vájam índrā yó agní sáhurī saparyát | irajyántā vasavyàsya bhū́reḥ sáhastamā sáhasā vājayántā || 1 || tá yodhishṭam abhí gá indra nūnám apáḥ svàr usháso agna ūḷháḥ | díṣaḥ svàr ushása indra citrá apó gá agne yuvase niyútvān || 2 || á vṛitrahaṇā vṛitrahá-bhiḥ ṣúshmair índra yātám námobhir agne arvák | yuvám rádhobhir ákavebhir indrágne asmé bhavatam uttamébhiḥ || 3 || |

ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् । इन्द्राग्नी न मर्धतः ॥४॥
उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृळात ईदृशे ॥५॥
॥२८॥ हतो वृत्राण्यार्या हतो दासानि सत्पती । हतो विश्वा अप द्विषः ॥६॥
इन्द्राग्नी युवामिमे३ऽभि स्तोमा अनूषत । पिबतं शंभुवा सुतम् ॥७॥
या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरा गतम् ॥८॥

tá huve yáyor idám papné víṣvam purá kṛitám | in-drāgní ná mardhataḥ || 4 || ugrá vighanínā mṛídha indrāgní havāmahe | tá no mṛiḷāta īdṛíṣe || 5 || 27 ||

ható vṛitráṇy áryā ható dásāni sátpatī | ható víṣvā ápa dvíshaḥ || 6 || índrāgnī yuvám imè 'bhí stómā anūshata | pí-batam ṣambhuvā sutám || 7 || yá vām sánti puruspṛ́ho ni-yúto dāṣúshe narā | índrāgnī tábhir á gatam || 8 ||

60

He overcomes evil, and acquires strength, who honours victorious lightning-divine and fire-divine, the lords of infinite opulence, most powerful in strength, desirous of sacrificial food. 1

O divine lightning and fire, verily you have striven for the recovery of wisdom, the water, the sun, the dawn, that had been carried away by evil forces. You reunite, O lightning-divine, the space with the quarters of the horizon, the sun, the wonderful waters, the dawns, the cattle, and so also you, O the fire-divine, who controls momentum of creation. 2

Slayers of opposing forces, O cosmic energies of lightning and fire, come down to us with your foe-subduing powers, to be invigorated by our homage. Please be manifest to us, O cosmic energies, with your supreme and unrestricted bounties. 3

I invoke these two, whose deeds have been celebrated since ancient days. Lords of cosmic forces of lightning and fire, may you never harm us. 4

We invoke the fierce forces of lightning and fire of cosmos, the destroyers of adversaries ; may they be kind to one like me. 5

May you counteract all oppressions committed by the pious; counteract all oppressions committed by the impious. O protectors of the virtuous, drive away everyone that hates us. 6

O forces of lightning and fire of cosmos, these songs of praise glorify you both ; may you accept our ecstatic offerings, O bestowers of happiness. 7

O cosmic energies of lightning and fire, leaders of sacred works, whose forces of speed are appreciated by all, come with them to the presenter of homage. 8

ताभिरा गच्छतं नरोपेदं सवनं सुतम् । इन्द्राग्नी सोमपीतये ॥९॥
तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वया ॥१०॥
॥२८॥ य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः । द्युम्नाय सुतरा अपः ॥११॥
ता नो वाजवतीरिष आशून्पिपृतमर्वतः । इन्द्रमग्निं च वोळ्हवे ॥१२॥

tábhir á gachatam narópedám sávanam sutám | índrāgnī sómapītaye || 9 || tám īḍishva yó arcíshā vánā víśvā parishvájat | krishṇá kriṇóti jihváyā || 10 || 28 ||

म॒हे क्ष॒त्राय॒ शव॑से॒ हि ज॒ज्ञेऽतू॑तुजिं चि॒त्तूतु॑जिरशिश्नत् ॥३॥
ए॒भिर्न॑ इन्द्राह॑भिर्दशस्य दु॒र्मित्रा॑सो॒ हि क्षि॒तयः॒ पव॑न्ते ।
प्रति॒ यच्चष्टे॒ अनृ॑तमने॒ना अव॑ द्वि॒ता वरु॑णो मा॒यी नः॑ सात् ॥४॥
वो॒चेमेदिन्द्रं॑ म॒घवा॑नमेनं म॒हो रा॒यो राध॑सो॒ यद्दद॑न्नः ।
यो अर्च॑तो॒ ब्रह्म॑कृति॒मवि॑ष्ठो यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥५॥

táva práṇītīndra jóhuvānān sáṃ yán nṛín ná ródasī ninétha | mahé kshatráya śávase hí jajñé 'tūtujiṃ cit tū́tujir aśiśnat || 3 || ebhír na indráhabhir daśasya durmitráso hí kshitáyaḥ pávante | práti yác cáshṭe ánṛitam anená áva dvitá váruṇo māyí naḥ sāt || 4 || vocéméd índram maghávānam enam mahó rāyó rádhaso yád dádan naḥ | yó árcato bráhmakṛitim ávishṭho yūyám pāta — || 5 || 12 ||

28

O resplendent Lord, come to our adoration. Let your energies be harnessed and directed here. Being obliged by you, all mortal men severally invoke you, and as such please give ears to our invocation also, O all-impeller. 1

You are endowed with strength, O resplendent Lord, hence you grant prayers of the seers ; may your greatness extend to your invoker also. O the fierce one, when you hold the bolt of punitive justice in your hand, then formidable by your exploits, you become invincible. 2

O resplendent Lord, by your guidance, you conduct your leading men, your zealous worshippers, through space and earth. By nature, you are the giver of strength and protection. May you bestow strength so that the active may overcome the sluggish. 3

O resplendent Lord, presently bless us so that unfriendly men may make atonement. The untruth, which the wise, sinless, and virtuous men find in us, may that through your favour, doubly disappear. 4

We invoke this opulent resplendent Lord for ample and valuable riches. He is the chief protector of the pious ceremonies of the worshipper. (O Lord), may you and your divine forces ever cherish us with blessings. 5

(२९) एकोनत्रिंशं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठ ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१३॥ अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः ।
पिबा त्व१स्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः ॥१॥
ब्रह्मन्वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयम् ।
अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः ॥२॥
का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन्दाशेम ।
विश्वा मतीरा ततने त्वायाधा म इन्द्र शृणवो हवेमा ॥३॥

29.

Ayáṃ sóma indra túbhyaṃ sunva ấ tú prá yāhi harivas tádokāḥ | píbā tv àsyá súshutasya cáror dádo maghấni maghavann iyānáḥ || 1 || bráhman vīra bráhmakṛitiṃ jushāṇò 'rvācīnó háribhir yāhi tū́yam | asmínn ū shú sávane mādayasvópa bráhmāṇi ṣṛiṇava imấ naḥ || 2 || kấ te asty áraṃkṛitiḥ sūktaíḥ kadấ nūnáṃ te maghavan dāṣema | víṣvā matír ấ tatane tvāyā́dhā ma indra ṣṛiṇavo hávemấ || 3 ||

उतो घा ते पुरुष्या३ इदासन्येषां पूर्वेषामशृणोर्ऋषीणाम् ।
अधाहं त्वा मघवञ्जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव ॥४॥
वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥५॥

utó ghā té purushyā̀ íd āsan yéshām pū́rveshām áṣṛiṇor ṛíshīṇām | ádhāhám tvā maghavañ johavīmi tváṃ na indrāsi prámatiḥ pitéva || 4 || vocéméd índram — || 5 || 13 ||

29

This devotional love is, verily, offered to you, O resplendent Lord ; be with us in the dwellings of our hearts, O master of both the faculties (mental and physical). May you accept this well-effused offering and give us wealth, O bounteous Lord, when we implore you. 1

O hero, the resplendent Lord, accepting our devotion, may you presently come to us speedily with your vigorous faculties, and be exhilarated at our worship, and listen to the prayers that we offer. 2

O bounteous Lord, what satisfaction is to you from our hymns when we offer them to you ? For you alone, we have composed these hymns, indeed. May you hear them, our invocations, O resplendent Lord. 3

These ancient sages, whose praises you have been listening to, are, verily, gem among common men. Hence O bounteous, resplendent Lord, I invoke you. You are our providence, even as a father. 4

We address this opulent resplendent Lord, that He grants us ample and valuable riches. He is the chief protector of the pious ceremonies of the worshipper ; (O Lord), may you and your divine forces ever cherish us with blessings. 5

(३०) त्रिंशं सूक्तम

(१–५) पञ्चर्चस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठ ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१४॥ आ नो देव शवसा याहि शुष्मिन्भवा वृध इन्द्र रायो अस्य ।
महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर ॥१॥
हवन्त उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ ।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु ॥२॥
अहा यदिन्द्र सुदिना व्युच्छान्दधो यत्केतुमुपमं समत्सु ।
न्य१ग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान् ॥३॥

30.

Á no deva ṣávasā yāhi ṣushmin bhávā vṛidhá indra rāyó asyá | mahé nṛimṇáya nṛipate suvajra máhi kshatráya paúṅsyāya ṣūra || 1 || hávanta u tvā hávyam vívāci tanū́shu ṣū́rāḥ sū́ryasya sātaú | tvám víṣveshu sényo jáneshu tvám vṛitrā́ṇi randhayā suhántu || 2 || áhā yád indra sudínā vyucchā́n dádho yát ketúm upamám samátsu | ny àgníḥ sīdad ásuro ná hótā huvānó átra subhágāya devā́n || 3 ||

वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि ।
यच्छा सूरिभ्य उपमं वरूथं स्वाभुवो जरणामश्नवन्त ॥४॥
वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥५॥

vayám té ta indra yé ca deva stávanta ṣūra dádato maghā́ni | yáchā sūríbhya upamám várūtham svābhúvo jaraṇā́m aṣnavanta || 4 || vocéméd índram — || 5 || 14 ||

30

O divine, powerful and resplendent Lord, be with us with your strength ; be the augmenter of our riches ; be to us, O king of men, wielder of the punitive justice, to inspire in us vigour, formidable courage, and manliness. 1

O the one worthy to be invoked, warriors call you in the din of life-struggles for safety of their person, and for the long enjoyment of sun-light. You are the foremost fighter among men. May you annihilate our adversaries without difficulty. 2

O resplendent Lord, when shall fair bright days dawn on us and you shall bring your banner near in battles? The valiant ritual fire would sit here as the herald, calling other Nature's bounties for our benefit. 3

O effulgent, resplendent Lord, we are yours, and all they, who adore you and offer rich libations are yours. May you grant to your worshippers excellent abode. May they be hale and hearty, even in old age. 4

We address this opulent resplendent Lord, that He grant us ample and valuable riches. He is the chief protector of the pious ceremonies of the worshipper. (O Lord), may you and your divine forces ever cherish us with blessings. 5

(३१) एकत्रिंशं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठ ऋषिः । इन्द्रो देवता । (१-९) प्रथमादिनवर्चां गायत्री, (१०-१२) दशम्यादितृचस्य च विराट् छन्दसी ॥

॥१५॥ प्र व इन्द्राय मादनं हर्यश्वाय गायत । सखायः सोमपाव्ने ॥१॥
शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः । चकृमा सत्यराधसे ॥२॥
त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो । त्वं हिरण्ययुर्वसो ॥३॥

31.

Prá va índrāya mádanaṃ háryaṣvāya gāyata | sákhāyaḥ somapávne || 1 || ṣáṅséd ukthám sudánava utá dyukshám yáthā náraḥ | cakṛimá satyárādhase || 2 || tvám na indra vājayús tvám gavyúḥ ṣatakrato | tvám hiraṇyayúr vaso || 3 ||

वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन् । विद्धी त्वस्य नो वसो ॥४॥
मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे । त्वे अपि क्रतुर्मम ॥५॥
त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन् । त्वया प्रति ब्रुवे युजा ॥६॥

vayám indra tvāyávo 'bhí prá ṇonumo vṛishan | viddhí tv àsyá no vaso || 4 || má no nidé ca váktave 'ryó randhīr árāvṇe | tvé ápi krátur máma || 5 || tvám vármāsi saprátha̱ḥ puroyodhás ca vṛitrahan | tváyā práti bruve yujá || 6 || 15 ||

॥१६॥ महाँ उतासि यस्य तेऽनु स्वधावरी सहः । मम्नाते इन्द्र रोदसी ॥७॥
तं त्वा मरुत्वती परि भुवद्वाणी सयावरी । नक्षमाणा सह द्युभिः ॥८॥

mahā́ṅ utási yásya té 'nu svadhávarī sáhaḥ | mamnáte indra ródasī || 7 || tám tvā marútvatī pári bhúvad váṇī sayávarī | nákshamāṇā sahá dyúbhiḥ || 8 ||

31

O friends, sing a delightful hymn to the resplendent Lord, the supreme master of vital powers and the acceptor of devotional love. 1

Let us chant to the bounteous Lord such hymns as other men have been doing ; let us offer it to Him who is truth personified. 2

O resplendent Lord, may you be the winner of nourishment for us ; O the performer of hundreds of benevolent works, may you be the winner of cattle ; O the winner of wealth, be the winner of gold for us. 3

O showerer of blessing, we are faithful to you and glorify you. May you be cognizant of this, O giver of wealth. 4

Subject us not to the reviler, to the abuser, to the miser. In you alone is my strength. 5

O resplendent Lord, destroyer of evils, you are our extensive armour and our front line fighter. With you as my ally, I brave the evils of life. 6

Verily, you are great. Heaven and earth, abounding with food pay homage to your strength, O supreme Lord. 7

May the praises of your adorers ever-going along with you, such as you are, and spreading around with radiance reach you. 8

ऊर्ध्वासस्त्वान्विन्दवो भुवन्दस्ममुप द्यवि । सं ते नमन्त कृष्टयः ॥९॥
प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
विशः पूर्वीः प्र चरा चर्षणिप्राः ॥१०॥
उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः ।
तस्य व्रतानि न मिनन्ति धीराः ॥११॥
इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
हर्यश्वाय बर्हया समापीन् ॥१२॥

ūrdhvásas tvánv índavo bhúvan dasmám úpa dyávi | sáṃ te namanta krishṭáyaḥ || 9 || prá vo mahé mahivrídhe bharadhvam prácetase prá sumatím krinudhvam | víṣaḥ pūrvíḥ prá carā carshaṇipráḥ || 10 || uruvyácase mahíne suvriktím índrāya bráhma janayanta víprāḥ | tásya vratáni ná minanti dhírāḥ || 11 || índraṃ vánīr ánuttamanyum evá satrá rájānaṃ dadhire sáhadhyai | háryaṣvāya barhayā sám āpín || 12 || 16 ||

(३२) द्वात्रिंशं सूक्तम्

(१–२७) सप्तविंशत्यृचस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठः, (२६) षड्विंश्या ऋचः पूर्वार्धस्य वासिष्ठः शक्तिर्वा ऋषिः । इन्द्रो देवता । (१–२, ४–२७) प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्यादिचतुर्विंशतेश्च प्रगाथः (विषमर्चां बृहती, समर्चां सतोबृहती), (३) तृतीयायाश्च द्विपदा विराट् छन्दसी ॥

॥१.७॥ मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन् ।
आरात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधि ॥१॥
इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥२॥

32.

Mó shú tvā vāghátaṣ canāré asmán ní rīraman | ārā́ttāc cit sadhamádaṃ na á gahīhá vā sánn úpa ṣrudhi || 1 || imé hí te brahmakrítaḥ suté sácā mádhau ná máksha ásate | índre kámaṃ jaritáro vasūyávo ráthe ná pádam á dadhuḥ || 2 ||

May the ascending drops of devotion reach you, O the destroyer of evils, in heaven. Let all men bow before you in reverence. 9

Pay homage to the great, the great giver, the all-wise. The fulfiller of the aspirations of men moves with them (in various forms). 10

The sages compose sacred praises and engender oblations for the sublime, the far pervading resplendent Lord. The wise never violate His statutes. 11

The words of praises truly magnify the glory of the resplendent Lord, the universal monarch, whose wrath is irresistible to overcome. May you urge all associates to glorify the Lord of vital powers. 12

32

Let none, not even your worshippers, for a moment detain you far away from us. Even from long distances, come to our place of worship and hear our prayers. 1

When the homage is effused to you, these hymn-chanters gather like flies swarming round honey. The pious praisers desiring blessings set their hope upon the resplendent Lord, as men set their foot upon a chariot. 2

रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे ॥३॥
इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥४॥
श्रवच्छुत्कर्ण ईयते वसूनां नू चिन्नो मर्धिषद्गिरः ।
सद्यश्चिद्यः सहस्राणि शता ददन्नकिर्दित्सन्तमा मिनत् ॥५॥

rāyáskāmo vájrahastam sudákshiṇam putró ná pitáram huve || 3 || imá índrāya sunvire sómāso dádhyāṣiraḥ | tā́ṅ ā́ mádāya vajrahasta pītáye háribhyām yāhy óka ā́ || 4 || ṣrávac chrútkarṇa īyate vásūnām nū́ cin no mardhishad gíraḥ | sadyáṣ cid yáḥ sahásrāṇi ṣatā́ dádan nákir dítsantam ā́ minat || 5 || 17 ||

॥१८॥ स वीरो अप्रतिष्कुत इन्द्रेण शूशुवे नृभिः ।
यस्ते गभीरा सवनानि वृत्रहन्त्सुनोत्या च धावति ॥६॥
भवा वरूथं मघवन्मघोनां यत्समजासि शर्धतः ।
वि त्वाहतस्य वेदनं भजेमह्या दूणाशो भरा गयम् ॥७॥
सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥८॥

sá vīró ápratishkuta índreṇa ṣūṣuve nṛíbhiḥ | yás te gabhīrā́ sávanāni vṛitrahan sunóty ā́ ca dhāvati || 6 || bhávā várūtham maghavan maghónām yát samájāsi ṣárdhataḥ | ví tvā́hatasya védanam bhajemahy ā́ dūṇā́ṣo bharā gáyam || 7 || sunótā somapā́vne sómam índrāya vajríṇe | pácatā paktír ávase kṛiṇudhvám ít pṛiṇánn ít pṛiṇaté máyaḥ || 8 ||

Longing for wealth I call on Him, the benevolent wielder of punitive justice, as a son calls on his father. 3

These elixirs of devotional prayers mixed with the curds of pious action are dedicated to the resplendent Lord. Come to our heart, O wielder of the bolt of justice, with your two vital and mental powers to bless them for our spiritual joy. 4

May He, with ears ever open, listen to our requests for wealth and never despise our prayers. He is the giver of hundreds and thousands. None can desist Him when He is willing to give. 5

O the resplendent Lord, the destroyer of evil, the brave worshipper, who offers prayer to you and eagerly approaches you, he with your blessings is undeterred by any one and is honoured by men. 6

O bounteous Lord, be a defence to the sincere devotees, may you drive the warriors together, and be the discomfiter of our adversaries. May we divide the wealth of him whom you punish. May you, O imperishable, deliver his possessions to us. 7

May you offer the elixir of devotion to its drinker, the possessor of adamentine justice. Make ready the sweet preparations of dedication to please him for winning His favour, for He bestows happiness on him who pleases Him. 8

मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे ।
तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे ॥९॥
नकिः सुदासो रथं पर्यास न रीरमत् ।
इन्द्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे ॥१०॥

mā́ sredhata somino dákshatā mahé krinudhvám rāyá ātúje | taránir íj jayati kshéti púshyati ná devā́sah kavatnáve || 9 ||
nákih sudā́so rátham páry āsa ná rīramat | índro yásyāvitā́ yásya marúto gámat sá gómati vrajé || 10 || 18 ||

॥१९॥ गमद्वाजं वाजयन्निन्द्र मर्त्यो यस्य त्वमविता भुवः ।
अस्माकं बोध्यविता रथानामस्माकं शूर नृणाम् ॥११॥
उदिन्न्वस्य रिच्यतेंऽशो धनं न जिग्युषः ।
य इन्द्रो हरिवान्न दभन्ति तं रिपो दक्षं दधाति सोमिनि ॥१२॥
मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ।
पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥१३॥

gámad vā́jam vājáyann indra mártyo yásya tvám avitā́ bhúvah | asmā́kam bodhy avitā́ ráthānām asmā́kam sūra nrinā́m || 11 || úd ín nv àsya ricyaté 'ṅso dhánam ná jigyúshah | yá índro hárivān ná dabhanti tám rípo dáksham dadhāti somíni || 12 || mántram ákharvam súdhitam supésasam dádhāta yajñíyeshv ā́ | pūrvís caná prásitayas taranti tám yá índre kármanā bhúvat || 13 ||

कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति ।
श्रद्धा इत्ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥१४॥
मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।
तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥१५॥

kás tám indra tvā́vasum ā́ mártyo dadharshati | sraddhā́ ít te maghavan pā́rye diví vājī́ vā́jam sishāsati || 14 || maghónah sma vritrahátyeshu codaya yé dádati priyā́ vásu | táva pránītī haryasva sūríbhir vísvā tarema duritā́ || 15 || 19 ||

O chanters of hymns, do not hesitate ; be active ; pay homage to the great benefactor for riches. Only the active conquers, dwells in peace and thrives. The divine powers favour not the sluggish. 9

No one overturns, or stops the chariot of one who freely gives. The man whom the resplendent Lord and vital principles protect, walks in pastures full of cattle and riches. 10

O resplendent Lord, only that man shall obtain wealth and wisdom, who works hard with devotion and gains your favours for protection. O brave Lord, may you be the preserver of our chariots and our men. 11

Verily, the resplendent Lord's share exceeds that of any one else, like the reward of a victorious. Nobody can overcome Him who is the Lord of vital forces and who gives strength to the participator in noble works. 12

Chant a hymn that is comprehensive, well-uttered and graceful. Never so happens that snares and bonds entangle him who has surrendered himself to Lord by his devotion. 13

O resplendent Lord, what mortal can assail a man who has favour of your support ? O bounteous Lord, the one who offers homage to you with faith, shall immediately win the reward on the day of completion. 14

Inspire those who for the destruction of their opponents offer valuable homage dear to you. O Lord of vital energies, may we with our noble devotees, pass through all perils under your guidance. 15

॥२०॥ तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते ॥१६॥
त्वं विश्वस्य धनदा असि श्रुतो य ईं भवन्त्याजयः ।
तवायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते ॥१७॥
यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय ॥१८॥
शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन ॥१९॥

távéd indrāvamáṃ vásu tvám pushyasi madhyamám | satrá víṣvasya paramásya rājasi nákish ṭvā góshu vriṇvate || 16 || tvám víṣvasya dhanadá asi ṣrutó yá īm bhávanty ājáyaḥ | távāyáṃ víṣvaḥ puruhūta párthivo 'vasyúr náma bhikshate || 17 || yád indra yávatas tvám etávad ahám íṣīya | stotáram íd didhisheya radāvaso ná pāpatváya rāsīya || 18 || ṣíksheyam ín mahayaté divé-dive rāyá á kuhacidvíde | nahí tvád anyán maghavan na ápyaṃ vásyo ásti pitá caná || 19 ||

तरणिरित्सिषासति वाजं पुरंध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् ॥२०॥

॥२१॥ न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत् ।
सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥२१॥

taráṇir ít sishāsati vájam púraṃdhyā yujá | á va índram puruhūtáṃ name girá nemíṃ táshṭeva sudrvàm || 20 || २० ||

ná dushṭutí mártyo vindate vásu ná srédhantaṃ rayír naṣat | suṣáktir ín maghavan túbhyaṃ mávate deshṇáṃ yát párye diví || 21 ||

O resplendent Lord, you cherish the vast wealth of the lower order ; also cherish the middling, and you rule over the one that is most precious. In the recovery of wealth and wisdom, no one can resist you. 16

You are renowned as the giver of wealth to every one in all the struggles that occur. O much invoked, all these people of the earth craving your protection implore your name. 17

O resplendent Lord, the granter of wealth, if I were the possessor of as much wealth as you do, then I would favour sincere worshippers only and not squander it ever upon wickedness. 18

Each day I would enrich the man who sings my praise, in whatsoever place he were. O bounteous Lord, no kinship is there better than yours; no other is as excellent protector to us as you are. 19

Only an active man who solemnly worships acquires wealth and wisdom. O resplendent Lord, invoked by all, I bend down with the words of reverence to you, as a carpenter bends the wooden circumference of the wheel. 20

A man does not acquire wealth by an unbecoming praise. Wealth does not come to one who obstructs. O bounteous Lord, in you rests the power of giving to one like me on the day of completion (of this work). 21

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥२२॥
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥२३॥
अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः ।
पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः ॥२४॥

abhí tvā ṣūra nonumó 'dugdhā iva dhenávaḥ | íṣānam asyá jágataḥ svardṛíṣam íṣānam indra tasthúshaḥ || 22 || ná tvấvāñ anyó divyó ná pấrthivo ná jātó ná janishyate | aṣvāyánto maghavann indra vājíno gavyántas tvā havāmahe || 23 || abhí shatás tád ấ bharéndra jyấyaḥ kánīyasaḥ | purūvásur hí maghavan sanấd ási bhá́re-bhare ca hávyaḥ || 24 ||

परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि ।
अस्माकं बोध्यविता महाधने भवा वृधः सखीनाम् ॥२५॥
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥२६॥
मा नो अज्ञाता वृजना दुराध्यो३ माशिवासो अव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥२७॥

párā ṇudasva maghavann amítrān suvédā no vásū kṛidhi | asmákam bodhy avitá́ mahādhané bhávā vṛidháḥ sákhīnām || 25 || índra krátuṃ na á́ bhara pitá́ putrébhyo yáthā | ṣíkshā ṇo asmín puruhūta yámani jīvá́ jyótir aṣīmahi || 26 || má́ no ájñātā vṛijánā durādhyò má́ṣivāso áva kramuḥ | tváyā vayám pravátaḥ ṣáṣvatīr apó 'ti ṣūra tarāmasi || 27 || 21 ||

O brave resplendent Lord, the Lord of all movable and stationary things, the beholder of the universe, we call loudly to you like an unmilked cow (with udders full). 22

No other such as you are, on the earth and heaven, has been in the past or shall be in future O bounteous resplendent Lord, we invoke you for possessing vigour, wealth and wisdom. 23

O victorious resplendent Lord, you are the eldest whilst I am the youngest and you have been possessing infinite treasure from the beginning, and therefore, bestow upon me that wealth. We adore you at every solemn worship. 24

O bounteous Lord, may you drive away from us our adversities and render riches easy of acquisition. May you be our good defender in the strife of winning awards. May you be augmenter of prosperity of your friends (such one as I am). 25

O resplendent Lord, give us wisdom as a father giving to his sons. O much invoked Lord, bestow wealth upon us on this occasion so that we may live long to see the divine light. 26

Let no unknown wicked, malevolent, malignant overpower us. May we, protected by you, cross over all the obstructing streams that are rushing down. 27

(३३) त्रयस्त्रिंशं सूक्तम्

(१-१४) चतुर्दशर्चस्यास्य सूक्तस्य (१-९) प्रथमादिनवर्चां मैत्रावरुणिर्वसिष्ठः, (१०-१४) दशम्यादिपञ्चानाञ्च वसिष्ठपुत्रा इन्द्रो वा ऋषयः । (१-९) प्रथमादिनवर्चां वसिष्ठपुत्राः, (१०-१४) दशम्यादिपञ्चानाञ्च वसिष्ठो देवताः । त्रिष्टुप् छन्दः ॥

॥२२॥ श्वित्यञ्चो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।
उत्तिष्ठन्वोचे परि बर्हिषो नॄन्न मे दूरादवितवे वसिष्ठाः ॥१॥

33.

Ṣvityáñco mā dakshiṇatáskapardā dhiyaṃjinváso abhí hí pramandúḥ | uttíshṭhan voce pári barhísho nṛ́n ná me dūrā́d ávitave vásishṭhāḥ || 1 ||

दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम् ।
पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणीता वसिष्ठान् ॥२॥
एवेन्नु कं सिन्धुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान ।
एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः ॥३॥
जुष्टी नरो ब्रह्मणा वः पितॄणामक्षमव्ययं न किला रिषाथ ।
यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधाता वसिष्ठाः ॥४॥
उद्द्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम् ॥५॥

dūrā́d índram anayann ā́ suténa tiró vaiṣantám áti pā́ntam ugrám | pā́ṣadyumnasya vāyatásya sómāt sutā́d índro 'vṛiṇītā vásishṭhān || 2 || evén nú kaṃ síndhum ebhis tatārevén nú kam bhedám ebhir jaghāna | evén nú kaṃ dāṣarājñé sudā́sam prā́vad índro bráhmaṇā vo vasishṭhāḥ || 3 || júshṭī naro bráhmaṇā vaḥ pitṝṇā́m áksham avyayaṃ ná kílā rishātha | yác chákvarīshu bṛihatā́ rávenéndre ṣúshmam ádadhātā vasishṭhāḥ || 4 || úd dyā́m ivét tṛishṇájo nāthitā́só 'dīdhayur dāṣarājñé vṛitā́saḥ | vásishṭhasya stuvatá índro aṣrod urúṃ tṛ́tsubhyo akṛiṇod u lokám || 5 || २२ ||

33

My wisest disciples are the ones who are the accomplishers of holy ceremonies and of white complexion. They bear lock of hair on the right side. They give me delight, I call these disciples to sit on the sacred grass (near the altar). May they never stay far from me. 1

Disgracing (the worldly entangling tendencies), they bring from a great distance the mighty soul busy at the pleasures of the lower order, to receive the spiritual offerings (of the liberal donor). The resplendent soul thus hastens to leave the enjoyments offered by impulses originated at the worldly physical level and comes to the camp where it enjoys spiritual experiences of the highest type. 2

In the same manner, the liberal giver is enabled by them to easily cross the river ; in the same manner, through them he easily destroys his adversaries. In like manner, the wisest disciples of the spiritual order through prayer and thereby the resplendent Self defends the liberal devotees in their encounter with the ten senses. 3

O leader of rituals, your progenitors are pleased by your praises. I set in motion the axle of chariot. May you not become inert, since O celebrated sages, by your resounding voices, the resplendent Self gets exhilaration. 4

Suffering from thirst, soliciting rain-water, supported by the fighter for justice in the struggle with ten senses, the sages make the inner-self radiant as the sun. The resplendent Self hears the words of the celebrated sages while they glorify him, and bestows to the fighters for the truth ample room and freedom. 5

॥२३॥ दृण्डा इवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः ।
अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त ॥६॥
त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः ।
त्रयो घर्मास उषसं सचन्ते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः ॥७॥
सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥८॥

daṇḍá ivéd goájanāsa āsan párichinnā bharatá arbhakásaḥ | ábhavac ca puraetá vásishṭha ád ít trítsūnām víśo aprathanta || 6 || tráyaḥ kriṇvanti bhúvaneshu rétas tisráḥ prajá áryā jyótiragrāḥ | tráyo gharmása ushásam sacante sárvāñ ít táñ ánu vidur vásishṭhāḥ || 7 || súryasyeva vakshátho jyótir eshām samudrásyeva mahimá gabhīráḥ | vátasyeva prajavó nányéna stómo vasishṭhā ánvetave vaḥ || 8 ||

त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति ।
यमेन ततं परिधिं वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः ॥९॥
विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा ।
तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ॥१०॥

tá ín niṇyám hṛ́dayasya práketaiḥ sahásravalśam abhí sám caranti | yaména tatám paridhím váyanto 'psarása úpa sedur vásishṭhāḥ || 9 || vidyúto jyótiḥ pári saṃjíhānam mitrávaruṇā yád ápaśyatām tvā | tát te jánmotaíkam vasishṭhāgástyo yát tvā viśá ājabhára || 10 || 23 ||

The illustrious people find themselves like the stripped bare staves wherewith the herdman drives the cattle. The illustrious people are found defenceless. The celebrated sage, then, becomes their chief and leader. Then the fighters for justice flourish. 6

Three fertilize the world with genial moisture, three are their glorious progeny, of which the chief is the sun, casting light before them. Three communicators of warmth accompany the dawn. Verily, the celebrated sages discover them all. 7

The glory of these sages is like the splendour of the sun and their greatness is as profound as the depth of the ocean. Their course has the velocity of the wind, which can never be surpassed by anyone else. 8

They, by their wisdom, seated in the heart, traverse the hidden thousand-branched world, and the wondrous glories of the firmament, wearing the vesture spread out by the creator. 9

O wisest sage, the faultless preceptor sustains the people. That life of yours is really worth while one in which you know the secrets of cosmic light and plasma and the lustre springing from the lightning. 10

॥२४॥ उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥११॥
स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः ।
यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥१२॥
सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम् ।
ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठम् ॥१३॥
उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत्प्र वदात्यग्रे ।
उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः ॥१४॥

utā́si maitrāvaruṇó vasishṭhorvásyā brahman mánasó 'dhi jātáḥ | drapsám skannám bráhmaṇā daívyena víśve deváḥ púshkare tvādadanta || 11 || sá praketá ubháyasya pravidvā́n sahásradāna utá vā sádanaḥ | yaména tatám paridhím vayishyánn apsarásaḥ pári jajñe vásishṭhaḥ || 12 || satré ha jātā́v ishitā́ námobhiḥ kumbhé rétaḥ sishicatuḥ samānám | táto ha mā́na úd iyāya mádhyāt táto jātám ríshim āhur vásishṭham || 13 || ukthabhrítam sāmabhrítam bibharti grā́vāṇam bíbhrat prá vadāty ágre | úpainam ādhvam sumanasyámānā ā́ vo gachāti pratrido vásishṭhaḥ || 14 || 24 ||

(३४) चतुस्त्रिंशं सूक्तम्

(१-२५) पञ्चविंशत्यृचस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठ ऋषिः । (१-१५, १८-२५) प्रथमादिपञ्चदशर्चामष्टादश्याद्यष्टानाञ्च विश्वे देवाः, (१६) षोडश्या अहिः, (१७) सप्तदश्याश्चाहिर्बुध्न्यो देवताः । (१-२१) प्रथमाद्येकविंशत्यृचां द्विपदा विराट्, (२२-२५) द्वाविंश्यादिचतसृणाञ्च त्रिष्टुप् छन्दसी ॥

॥२५॥ प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी ॥१॥

34

Prá śukraitu deví manīshā́ asmát sútashṭo rátho ná vājī́ || 1 ||

Verily, O celebrated sage, you are the son of cosmic light and plasma, born of their mind. Nature's bounties endowed with celestial fervour lay you as a fallen drop on a lotus blossom. 11

He, the sage, cognizant of both worlds (heaven and earth) endowed with many a gift, bestows thousands. He is destined to wear the vesture spun by the creator, and springs forth to life from the wondrous glories of firmament. 12

Consecrated for the sacrifice, propitiated by praises, they, the lords of cosmic light and plasma, pour their life-essence into a water jar from the midst of which uprises cosmic intelligence and from which also, they say, the intelligence of the wise sage is born. 13

O destroyers of nescience, the faultless preceptor comes to you. Welcome him with devoted minds, and he in the foremost station directs the worshipper engaged in prayer, the chanter of the hymn, the assiduous offerer of dedication and he repeats what is to be repeated. 14

34

May our divine and brilliant hymn, well-composed and well-sung, go forth, like a swift chariot. 1

विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्यापो अध क्षरन्तीः ॥२॥
आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ॥३॥
आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ॥४॥
अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्त्मना हिनोत ॥५॥
त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम् ॥६॥

vidúḥ prithivyá divó janítram srinvánty ápo ádha kshárantīḥ || 2 || ápaṣ cid asmai pínvanta prithvír vritréshu ṣúrā máṅsanta ugráḥ || 3 || á dhūrshv àsmai dádhātáṣvān índro ná vajrí híranyabāhuḥ || 4 || abhí prá sthātáheva yajñám yáteva pátman tmánā hinota || 5 || tmánā samátsu hinóta yajñám dádhāta ketúm jánāya vīrám || 6 ||

उदस्य शुष्माद्भानुर्नार्त बिभर्ति भारं पृथिवी न भूम ॥७॥
ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ॥८॥
अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम् ॥९॥
आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥१०॥
॥२६॥ राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ॥११॥
अविष्टो अस्मान्विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः ॥१२॥
व्येतु दिद्युद्द्विषामशेवा युयोत विष्वग्रपस्तनूनाम् ॥१३॥

úd asya ṣúshmād bhānúr nárta bíbharti bhārám prithiví ná bhúma || 7 || hváyāmi deváñ áyātur agne sádhann riténa dhíyam dadhāmi || 8 || abhí vo devím dhíyam dadhidhvam prá vo devatrá vácam krinudhvam || 9 || á cashṭa āsām pátho nadínām váruna ugráḥ sahásracakshāḥ || 10 || 25

rájā rāshṭrāṇām péṣo nadínām ánuttam asmai kshatrám viṣváyu || 11 || ávishṭo asmán víṣvāsu vikshv ádyum krinota ṣáṅsam ninitsóḥ || 12 || vy ètu didyúd dvishám áṣevā yuyóta víshvag rápas tanúnām || 13 ||

The waters listen to us as they flow along. They know the origin of heaven and earth. The vast rivers swell to greet him. The strong and brave men remember him when beset by adversities. 2 3

May you keep the horses of your senses bound to the pole (of chariot) like the golden-armed resplendent soul, the possessor of adamantine will power. 4

May you wake up at the dawn like the sun, ready to perform cosmic sacrifice, and march forward with delight, like a pilgrim on his way. 5

Proceed swiftly to the battle of life and set up a new flag of your victory, O hero, in the service of mankind. 6

Through his own power, he, the sun, ascends as a source of light. It upholds the load of creation, as earth bears living creatures. 7

O fire-divine, I invoke nature's bounties, and not the demons. And I compose a hymn and complete it invoking truth and eternal law. 8

Closely around you, may you revolve your heavenly song and send your invocations to Nature's bounties. 9

The mighty Lord of Venerability beholds with a thousand eyes, the paths, wherein these streams of thoughts run. 10

He is kind of Kings, the glory of the thoughts and his is the resistless sway over all that lives. 11

May He assist us among all people and make song of envious men devoid of light. 12

May the threatening arrow of our opponent passby without harming us. May he put far from us the sins of our bodies. 13

अवींन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥१४॥
सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥१५॥
अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन् ॥१६॥
मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः ॥१७॥
उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥१८॥
तपन्ति शत्रुं स्वर्ण भूमा महासेनासो अमेभिरेषाम् ॥१९॥
आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥२०॥

ávīn no agnír havyán námobhiḥ préshṭho asmā adhāyi stómaḥ || 14 || sajúr devébhir apám̐ nápātam sákhāyam kṛidhvam ṣivó no astu || 15 || abjám ukthaír áhim̐ grinīshe budhné nadínām̐ rájassu shídan || 16 || má nó 'hir budhnyo rishé dhān má yajñó asya sridhad ṛitayóḥ || 17 || utá na eshú nṛíshu ṣrávo dhuḥ prá rāyé yantu ṣárdhanto aryáḥ || 18 || tápanti ṣátrum svàr ṇá bhúmā mahásenāso ámebhir eshām || 19 || á yán naḥ pátnīr gámanty áchā tváshṭa supāṇír dádhātu vīrán || 20 || 26 ||

॥२७॥ प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ॥११॥ २१
ता नो रासन्रातिषाचो वसून्या रोदसी वरुणानी शृणोतु ।
वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ॥२२॥
तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः ।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ॥२३॥
अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इन्द्रसखा ।
अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै ॥२४॥

práti na stómam̐ tváshṭā jusheta syád asmé arámatir vasūyúḥ || 21 || tá no rāsan rātishácо vásūny á ródasī varuṇāní ṣriṇotu | várūtrībhiḥ suṣaraṇó no astu tváshṭā sudátro ví dadhātu ráyaḥ || 22 || tán no ráyaḥ párvatās tán na ápas tád rātisháca óshadhīr utá dyaúḥ | vánaspátibhiḥ prithiví sajóshā ubhé ródasī pári pāsato naḥ || 23 || ánu tád urví ródasī jihātām ánu dyukshó váruṇa índrasakhā | ánu víṣve marúto yé saháso rāyáḥ syāma dharúṇam̐ dhiyádhyai || 24 ||

O fire-divine, acceptor of our dedications, may you help us through our prayer ; we sing our dearest song to please him. 14

In accord with the divine cosmic forces, may the grand son of the waters—the fire-divine, be helpful to us. 15

With laudations I glorify the serpent of clouds, born of waters. He stays beneath the streams of the middle air. 16

Never may the cloud of mid-space harm us ; let not the sacrificial acts of this faithful servant be disregarded. 17

May they grant food to our people. Let our foes contending for our riches perish. 18

The leading great groups, with their fierce attacks, burn their opponents as the sun (scorches) the earth. 19

When our wives come near to us, may He, the divine creator give us brave sons. 20

May the creator find our hymn of praise acceptable and may He, who is of comprehensive understanding, be inclined to give us wealth. 21

May they, who are lavish in gifts, bestow upon us treasures, that we long for. May the bounties of heaven and earth along with the bounties of ocean listen to our prayers. May the generous creator, together with these protectresses be our sure refuge ; may he, our lord, give us riches. 22

So, may rich mountains and the flowing waters, the liberal ones, and herbs growing on the band, the pair of heaven and the earth consentient with the forest lords, and both the world-halves, pressure for us those riches. 23

May both the wide worlds consent, and the celestial ocean associated with the sun consent. May all the victorious vital principles consent, so that, who become worthy possessors of long-lasting precious wealth. 24

तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥२५॥

tán na índro váruṇo mitró agnír ā́pa óshadhīr vaníno jushanta | ṣárman syāma marútām upásthe yūyám pāta — || 25 || 27 ||

(३५) पञ्चत्रिंशं सूक्तम्

(१–१५) पञ्चदशर्चस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठ ऋषिः । विश्वे देवा देवताः । त्रिष्टुप् छन्दः ॥

॥२८॥ शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥१॥
शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥२॥
शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥३॥
शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥४॥
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ॥५॥

35.

Ṣáṃ na indrāgní bhavatām ávobhiḥ ṣáṃ na índrāváruṇā rātáhavyā | ṣáṃ índrāsómā suvitáya ṣáṃ yóḥ ṣáṃ na índrāpūsháṇā vā́jasātau || 1 || ṣáṃ no bhágaḥ ṣám u naḥ ṣáṅso astu ṣáṃ naḥ púraṃdhiḥ ṣám u santu rā́yaḥ | ṣáṃ naḥ satyásya suyámasya ṣáṅsaḥ ṣáṃ no aryamā́ purujātó astu || 2 || ṣáṃ no dhātā́ ṣám u dhartā́ no astu ṣáṃ na urūcí bhavatu svadhā́bhiḥ | ṣáṃ ródasī brihatí ṣáṃ no ádriḥ ṣáṃ no devā́nāṃ suhávāni santu || 3 || ṣáṃ no agnír jyótiranīko astu ṣáṃ no mitrā́váruṇāv aṣvínā ṣám | ṣáṃ naḥ sukrítāṃ sukritā́ni santu ṣáṃ na ishiró abhí vātu vā́taḥ || 4 || ṣáṃ no dyā́vāprithiví pūrváhūtau ṣám antárikshaṃ driṣáye no astu | ṣáṃ na óshadhīr vaníno bhavantu ṣáṃ no rájasas pátir astu jishṇúḥ || 5 || 28 ||

May our Lord, the master of all Nature's bounties such as, the lightning, the ocean, the sun, the fire, rivers, herbs and trees accept the praise we offer. May we, reclining on the bosom of vital principles, attain fertility. May they all ever cherish us with blessings. 25

35

May the sun and fire, with their blessing aids, be for our happiness ; may the sun and the ocean, to whom homage is offered, be for our happiness ; may the sun and moon be for our happiness, and comfort, along with prosperity ; may the sun and sustenance be for happiness in life struggles. 1

May the prosperity be for our happiness ; may the discipline be for happiness ; may the intellectual pursuits be for our happiness ; may the riches be for happiness ; may the variously-manifested law and order be for our happiness. 2

May the people of creativity be for happiness ; may the people incharge of sustenance be for our happiness ; may the wide earth, with its provisions, be for happiness. May the vast heaven and earth be for happiness ; may the mountains be for happiness ; may our pious invocations of Nature's bounties secure us happiness. 3

May the fire, with the splendour of countenance be for our happiness ; may the cosmic light and plasma, and the pair of twin-divines be for our happiness. May the noble actions of the pious be for our happiness ; may the impetuous wind blow for our happiness. 4

May the heaven and earth invoked from the earliest times, be for our happiness ; may the mid-space be for our happiness with charming appearance. May the herbs and the forest trees, be for our happiness, may the victorious Lord of the distant regions, be favourable to our felicity. 5

॥२९॥ शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥६॥
शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः शम्वस्तु वेदिः ॥७॥

śáṃ na índro vásubhir devó astu śam ādityébhir várunaḥ suśáṅsaḥ | śaṃ no rudró rudrébhir jálāshaḥ śáṃ nas tvashṭā gnābhir ihá śriṇotu || 6 || śáṃ naḥ sómo bhavatu bráhma śáṃ naḥ śáṃ no grávāṇaḥ śám u santu yajñáḥ | śaṃ naḥ svárūṇam mitáyo bhavantu śaṃ naḥ prasvàḥ śám v astu védiḥ || 7 ||

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥८॥
शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥९॥
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥१०॥

śáṃ naḥ sū́rya urucákshā úd etu śáṃ nas cátasraḥ pradíśo bhavantu | śáṃ naḥ párvatā dhruváyo bhavantu śáṃ naḥ síndhavaḥ śám u santv ā́paḥ || 8 || śáṃ no áditir bhavatu vratébhiḥ śáṃ no bhavantu marútaḥ svarkā́ḥ | śáṃ no víshṇuḥ śáṃ u pūshā́ no astu śáṃ no bhavítram śám v astu vāyúḥ || 9 || śáṃ no deváḥ savitā́ trā́yamāṇaḥ śáṃ no bhavantūsháso vibhātī́ḥ | śáṃ naḥ parjányo bhavatu prajā́bhyaḥ śáṃ naḥ kshétrasya pátir astu śambhúḥ || 10 || 29 ||

May the divine sun, with the life-giving elements, grant us happiness ; may the justly-praised ethereal ocean with the numerous suns, be friendly to our happiness ; may the grief-assuaging cosmic vitality, with the vital breaths, bless us for our happiness ; may the architect of universe, with attributes of Nature's bounties, be with us for our happiness ; and hear us at this solemnity. 6

May the moon be source of our happiness ; may the prayers promote our happiness ; may the clouds be source of our happiness. May the sacred work and worship be source of our happiness ; may the measured lengths of the pillars of ceremonial hall be conducive to our felicity ; may the well-grown herbs be for our happiness ; may the altar be raised for our happiness. 7

May the sun with extensive radiance rise for our happiness ; may the four quarters of the horizon be auspicious to us. May the firm-set mountains bless us for our happiness ; may the rivers, may the waters be for our happiness. 8

May the mother infinity, through holy observances, be for our happiness ; may the glowing vital principles be for our happiness ; may the all-pervading one, the nourishing one, be for our happiness ; may the cosmic waters be propitious to us ; may the wind blow for our happiness. 9

May the divine refulgent Lord, the saviour, be for happiness ; may the radiant dawns be propitious to us. May the clouds be propitious for our people ; may the sovereign Lord of universe bless us for happiness. 10

॥३०॥ शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥११॥
शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥१२॥

ṣáṃ no devā́ viṣvádevā bhavantu ṣáṃ sárasvatī sahá dhībhír astu | ṣám abhishā́caḥ ṣám u rātishā́caḥ ṣáṃ no divyā́ḥ pā́rthivāḥ ṣáṃ no ápyāḥ || 11 || ṣáṃ naḥ satyásya pátayo bhavantu ṣáṃ no árvantaḥ ṣám u santu gā́vaḥ | ṣáṃ na ṛibhávaḥ sukṛítaḥ suhástāḥ ṣáṃ no bhavantu pitáro háveshu || 12 ||

शं नो अज एकपाद्देवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः ।
शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥१३॥
आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥१४॥
ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥१५॥

ṣáṃ no ajá ékapād devó astu ṣáṃ nó 'hir budhnyàḥ ṣáṃ samudráḥ | ṣáṃ no apā́ṃ nápāt perúr astu ṣáṃ naḥ pṛíṣnir bhavatu devágopā || 13 || ādityā́ rudrā́ vásavo jushantedáṃ bráhma kriyámāṇaṃ návīyaḥ | ṣṛiṇvántu no divyā́ḥ pā́rthivāso gójātā utá yé yajñíyāsaḥ || 14 || yé devā́nāṃ yajñíyā yajñíyānām mánor yájatrā amṛítā ṛitajñā́ḥ | té no rāsantām urugāyám adyá yūyám pāta — || 15 || 30 ||

May all the divine universal Nature's bounties be for our happiness ; may the divine speech, with holy thoughts, be gracious ; may the persons assisting at our sacred works and those who liberally and large-heartedly give, be conducive to our happiness ; may all celestial, terrestrial, and aquatic powers be for our happiness. 11

May the sustainers of eternal truths, be propitious to our happiness ; may the horses, the cattle, contribute to our happiness ; may the virtuous, the dextrous men of experience and wisdom, confer felicity to us ; may the senior sages be kind to us and respond to our invocations in rituals and ceremonies. 12

May the divine unborn Lord, the one-footed (in whose one foot measure is the entire universe) bless us for our happiness ; may the clouds of mid-space confer happiness ; may the cosmic oceans be for happiness ; may the heat and electricity, born of water, be gracious, and may the mid-space, the sky, guarded by divine powers, be for our happiness. 13

May the cosmic suns, the cosmic winds, and the planets of abode be gratified by this new hymn, which we now repeat ; may all the divines of celestial and terrestrial worlds, progeny of cows and those, who perform worship, hear our invocations. 14

May those, who are most adorable among divinely revered, those who have been honoured by all men, those who are immortal, the observers of truth, grant us today widely-spoken reputation ; and may you Lord along with the divine forces ever cherish us with blessings. 15

(३६) षट्त्रिंशं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठ ऋषिः । विश्वे देवा देवता । त्रिष्टुप् छन्दः ॥

॥१॥ प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः ।
वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे अग्निः ॥१॥
इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः ।
इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ॥२॥

36.

Prá bráhmaitu sádanād ṛitásya ví raṣmíbhiḥ sasṛije súryo gā́ḥ | ví sā́nunā pṛithiví sasra urví pṛithú prátīkam ádhy édhe agníḥ ‖ 1 ‖ imā́ṃ vām mitrāvaruṇā suvṛiktím ísham ná kṛiṇve asurā návīyaḥ | inó vām anyáḥ padavír ádabdho jánaṃ ca mitró yatati bruvāṇáḥ ‖ 2 ‖

आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः ।
महो दिवः सदने जायमानोऽचिक्रदद्वृषभः सस्मिन्नूधन् ॥३॥
गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू ।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम् ॥४॥
यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन् ।
वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम् ॥५॥

á vā́tasya dhrájato ranta ityá ápīpayanta dhenávo ná sū́dāḥ | mahó diváḥ sádane jā́yamānó 'cikradad vṛishabháḥ sásminn ū́dhan ‖ 3 ‖ girá yá etā́ yunájad dhárī ta índra priyā́ suráthā ṣūra dhāyū́ | prá yó manyúṃ ríríkshato mináty á sukrátum aryamáṇaṃ vavṛityām ‖ 4 ‖ yájante asya sakhyáṃ váyaṣ ca namasvínaḥ svá ṛitásya dhā́man | ví pṛíksho bābadhe nṛíbhi stávāna idáṃ námo rudrā́ya préshṭham ‖ 5 ‖ 1 ‖

Let the prayer proceed from the hall of the sacrifice, to the distant sun, the rays of which cause waters to flow. The spacious earth far extends with lofty mountains studded, as if, and fire blazes on the extensive plains. 1

O powerful light-divine and plasma-divine, and the vital breath, to you I offer this new praise, as if it were sacrificial food ; one of you (plasma-divine), the invincible lord is the guide to the path of virtue, and second one (light-divine) when praised, animates men to action. 2

The movements of the gliding wind sport around, like milk-yielding kine. The springs are filled to overflowing. The mighty rain-cloud, generated in the dwelling of the lofty heaven, has been roaring in his place of residence in the midspace. 3

O brave, radiant sun, may I bring here with my song the wise ordainer, the expert who yokes dear, graceful and vigorous horses to your chariot and who baffles the wrath of the malevolent. 4

Let the offerers of adoration, engaged in pious acts, worship the Lord of cosmic vitality, in their own hall of ceremony. Praised by the leaders of sacred worship, he lavishes food upon them. This most acceptable adoration is addressed to the Lord of cosmic vitality. 5

॥२॥ आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता ।
याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥६॥
उत त्ये नो मरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु ।
मा नः परि ख्यदक्षरा चरन्त्यवीवृधन्युज्यं ते रयिं नः ॥७॥
प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं न वीरम् ।
भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरंधिम् ॥८॥
अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः ।
उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः ॥९॥

á yát sākáṃ yaṣáso vāvaṣānáḥ sárasvatī saptáthī síndhumātā | yáḥ sushváyanta sudúghāḥ sudhārá abhí svéna páyasā pípyānāḥ || 6 || utá tyé no marúto mandasāná dhíyaṃ tokáṃ ca vājíno 'vantu | má naḥ pári khyad áksharā cáranty ávīvṛidhan yújyaṃ té rayíṃ naḥ || 7 || prá vo mahím arámatiṃ kṛiṇudhvam prá pūsháṇaṃ vidathyàṃ ná vīrám | bhágaṃ dhiyò 'vitáraṃ no asyáḥ sātaú vájaṃ rātisháćam púraṃdhim || 8 || áchāyáṃ vo marutaḥ ṣlóka etv áchā víshṇuṃ nishiktapám ávobhiḥ | utá prajáyai gṛiṇaté váyo dhur yūyám pāta — || 9 || 2 ||

(३७) सप्तत्रिंशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठ ऋषिः । विश्वे देवा देवताः । त्रिष्टुप् छन्दः ॥

॥३॥ आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः ।
अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वम् ॥१॥
यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृश ऋभुक्षणो अमृक्तम् ।
सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम् ॥२॥

37.

Á vo váhishṭho vahatu stavádhyai rátho vājā ṛibhukshaṇo ámṛiktaḥ | abhí tripṛishṭhaíḥ sávaneshu sómair máde suṣiprā mahábhiḥ pṛiṇadhvam || 1 || yūyáṃ ha rátnam maghávatsu dhattha svardṛíṣa ṛibhukshaṇo ámṛiktam | sáṃ yajñéshu svadhāvantaḥ pibadhvaṃ ví no rádhāṅsi matíbhir dayadhvam || 2 ||

May the seventh stream of the cosmic river, the mother of the ocean, and those rivers that flow copious and fertilizing, bestowing abundance of food, and nourishing the people by their waters, come at once together. 6

May these joyous and swift-going, cloud-bearing winds be favourable to our worship and our offspring ; let not the imperishable divine speech of wisdom ignore us ; may she be kind to us and may both jointly augment our riches. 7

May you, (O devotees), invoke the unresisting earth, and the adorable hero, the Lord, that nourishes. May you invoke the gracious Lord, the protector of our worship, the source of strength, the sustainer of old, the liberal giver of gifts to our solemnity. 8

ávyo váre pári priyó hárir váneshu sīdati | rebhó vanushyate matí || 6 || sá vāyúm índram asvínā sākám mádena gachati | ráṇā yó asya dhármabhih || 7 || á mitrávárunā bhágam mádhvah pavanta ūrmáyah | vidāná asya sákmabhih || 8 ||

7

The excellent streams of divine love, knowing that they have a relation with the resplendent self, flow forth during this sacrifice along the path of the eternal truth. 1

Among all oblations, the oblation of this divine elixir is superb; after effusion, the elixir is mixed with holy waters; the streams of this sweet bliss flow forth pre-eminent. 2

The pre-eminent divine love is the showerer of benefits, ever-true and imperishable. It flows to the sacrificial hall, mixed with waters, uttering continuous thrilling sounds. 3

When the seer, the love divine, full of ample treasures, goes round in the midst of the recitations (by devotees), then the mighty resplendent self seated in the heaven (of heart) rejoices and accepts the invocations. 4

When it (the love divine) is invoked by devotees, the effused elixir, like a king, destroys the malignant persons (the inner wicked tendencies) as well as those who oppose. 5

The green-tinted (love divine), dear to the cosmic forces (or spiritual instincts), blends with the water, and then moves forward for filtration on the ultra-psychic woollen seive in the midst of the thrilling chants by the welcoming priests. 6

He, the householder, who is assiduous in the technique of effusion and filtration of the divine elixir, is blessed by bounties like wind, fire and the twin divines. 7

The stream of sweet divine love flows to the Lord of light and bliss and to the gracious Lord. The worshippers who accept the virtues of this elixir are rewarded with happiness. 8

अस्मभ्यं॑ रोदसी र॒यिं मध्वो॒ वाज॑स्य सा॒तये॑ । श्रवो॒ वसू॑नि॒ सं जि॑तम् ॥९॥

asmábhyam rodasī rayím mádhvo vājasya sātáye sŕávo vásūni sám jitam || 9 || २९ ||

(८) अष्टमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥३०॥ ए॒ते सोमा॑ अ॒भि प्रि॒यमिन्द्र॑स्य॒ काम॑मक्षरन् । वर्ध॑न्तो अस्य वी॒र्य॑म् ॥१॥
पु॒ना॒नास॑श्चमू॒षदो॒ गच्छ॑न्तो वा॒युम॒श्विना॑ । ते नो॑ धान्तु सु॒वीर्य॑म् ॥२॥
इन्द्र॑स्य सोम॒ राध॑से पु॒ना॒नो हार्दि॑ चोदय । ऋ॒तस्य॒ योनि॑मा॒सद॑म् ॥३॥
मृ॒जन्ति॑ त्वा॒ दश॒ क्षिपो॑ हि॒न्वन्ति॑ स॒प्त धी॒तयः॑ । अनु॒ विप्रा॑ अमादिषुः ॥४॥
दे॒वेभ्य॑स्त्वा॒ मदा॑य॒ कं सृ॑जा॒नमति॒ मे॒ष्यः॑ । सं गोभि॑र्वासयामसि ॥५॥

8.

Eté sómā abhí priyám índrasya kámam aksharan | várdhanto asya vīryàm || 1 || punānásas camūshádo gáchanto vāyúm aṣvínā | té no dhāntu suvíryam || 2 || índrasya soma rádhase punānó hárdi codaya | ṛitásya yónim āsádam || 3 || mṛijánti tvā dáṣa kshípo hinvánti saptá dhītáyaḥ | ánu víprā amādishuḥ || 4 || devébhyas tvā mádāya kám sṛijānám áti meshyàḥ | sám góbhir vāsayāmasi || 5 || 30 ||

O heaven and earth, for the acquisition of this exhilarating divine love, may you win for us fame and riches. 9

8

The divine elixirs instil into the self the pleasing aspirations, enhancing his vigour. 1

Pure-flowing, filling the ladles, these (streams of divine love) proceed to the wind and the twin divines. May they sustain our strength and vigour. 2

O pure effusing divine elixir, you provide gratification to the resplendent self. May you impel him to participate in the place of benevolent works. 3

The ten fingers effuse you and the seven participating priests caress you; the sages gladden you. 4

When you (O divine love) effuse forth along with water, and pass through ultra-psychic fleecy sieve, we wrap you up with the milk of devotion and offer you to Nature's all bounties. 5

॥३१॥ पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः । परि गव्यान्यव्यत ॥६॥
मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इन्दो सखायमा विश ॥७॥
वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि । सहो नः सोम पृत्सु धाः ॥८॥
नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम् । भक्षीमहि प्रजामिषम् ॥९॥

punānáḥ kaláṣeshv á vástrāṇy arushó háriḥ | pári gávyāny avyata || 6 || maghóna á pavasva no jahí víṣvā ápa dvíshaḥ | índo sákhāyam á viṣa || 7 || vṛishṭíṃ diváḥ pári srava dyumnám pṛithivyá ádhi | sáho naḥ sóma pṛitsú dhāḥ || 8 || nṛicákshasaṃ tvā vayám índrapītaṃ svarvídam | bhakshīmáhi prajám ísham || 9 || 31 ||

(९) नवमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥३२॥ परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः । सुवानो याति कविक्रतुः ॥१॥
प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे । वीत्यर्ष चनिष्ठया ॥२॥

9.

Pári priyá diváḥ kavír váyāṅsi naptyòr hitáḥ | suvānó yāti kavíkratuḥ || 1 || prá-pra ksháyāya pányase jánāya júshṭo adrúhe | vīty àrsha cánishṭhayā || 2 ||

When (the divine love) is purified in the pitcher of heart, it comes out radiant and green-tinted; when it is further mixed up with milk, it appears that it has put on the raiment derived from cow. 6

Flow on to us, who are your effluent devotees; drive away all our adversaries, O divine love; may you enter into the heart of the resplendent self, your real friend. 7

Pour down rain from heaven, and abundance upon the earth; uphold our strength, O love divine, in our struggle of life. 8

(O divine elixir) you are the contemplator of men, the loving beverage of the resplendent self and the knower of all things; may we, while adoring you, be blessed with progeny and food. 9

9

Not only wise, but you work with your penetrating wisdom; you are rightly placed at the source where effusion takes place. The one who enjoys and accepts you is raised to the highest statures, dear to heaven. 1

(O divine elixir), go forth in a most abundant stream, rich in sustenance; go to the guileless man, your owner, who praises you. 2

That mighty and pure elixir, when born, illumines the mighty parents (heaven and earth), the progenitors (of everything that is born) and the augmenters of eternal truths. 3

Effused by (the ten) fingers, the (love divine) gladdens seven guileless streams of sensation. May you magnify it, the one and undecaying. 4

O resplendent Lord, at your worship, they (the ten fingers) provide the ever-lasting and ever-youthful joy (the divine elixir) for your solemn service. 5

(The divine elixir) is an immortal bearer (of oblations to Nature's bounties); it beholds the seven rivers (of enlightenment), i.e. the elixir is mixed with water, full as a well; he quenches the thirst of the divine elements. 6

Protect us, O lord of bliss, manly in functions, during our undertaking and destroy that power of darkness against which we must contend (unitedly). 7

(O love divine), may you without delay speed on the road for our new praiseworthy hymns; as of old, please continue to display your radiance. 8

O purifier (love divine), you are always good to grant us abundant food, brave offsprings, cattle and horses. May you give us the discriminating wisdom, and also all that we need and cherish. 9

(१०) दशमं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥३४॥ प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः । सोमासो राये अक्रमुः ॥१॥
हिन्वानासो रथा इव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥२॥
राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते । यज्ञो न सप्त धातृभिः ॥३॥
परि सुवानास इन्दवो मदाय बर्हणा गिरा । सुता अर्षन्ति धारया ॥४॥
आपानासो विवस्वतो जनन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥५॥

10.

Prá svanáso ráthā ivárvanto ná śravasyávaḥ | sómāso rāyé akramuḥ || 1 || hinvānáso ráthā iva dadhanviré gábhastyoḥ | bhárāsaḥ kārínām iva || 2 || rā́jāno ná práśastibhiḥ sómāso góbhir añjate | yajñó ná saptá dhātṛ́bhiḥ || 3 || pári suvānā́sa índavo mádāya barhánā girā́ | sutā́ arshanti dhā́raya || 4 || āpānā́so vivásvato jánanta usháso bhágam | sū́rā áṇvaṃ ví tanvate || 5 || 34 ||

॥३५॥ अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ॥६॥
समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः ॥७॥
नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा । कवेरपत्यमा दुहे ॥८॥

ápa dvā́rā matīnā́m pratnā́ ṛiṇvanti kārávaḥ | vṛ́shṇo hárasa āyávaḥ || 6 || samīcīnā́sa āsate hótāraḥ saptájāmayaḥ | padám ékasya píprataḥ || 7 || nā́bhā nā́bhiṃ na ā́ dade cákshuś cit sū́rye sácā | kavér ápatyam ā́ duhe || 8 ||

10

The elixirs of bliss, longing for food and strength, uttering a sound like chariots, or like horses, have come here for the sake of excellence and prosperity. 1

Coming like chariots (to the place of work and worship), they (the stems of the plant of divine juices) are upheld in the arms (of the priests) or as a load in the arms of a toiler. 2

The libations (of the herbal juices) are anointed with milk (of devotion) as kings with praises and tended as a worship by seven priests. 3

The blissful elixirs are effused and poured forth, in the midst of loud chants (of verses), and they proceed in a stream to excite exhilaration. 4

The elixirs of cosmic brilliance generate the glory, as if of the dawn and whilst they issue forth, and spread, they do so with a thrilling sound. 5

The ancient singers of hymns and the offerers of divine love throw open the doors of cosmic sacrifice. 6

The seven associated ministers (the sense organs) like so many kinsmen. participate with delight in the sacrifice, and with single devotion, bring success to the objective. 7

I take into my navel the navel of the cosmic sacrifice, my eyes become associated with the sun and I effuse out the offspring (i.e. the juice) of the parent sage (i.e. of stems of the plant). 8

अ॒भि प्रि॒या दि॒वस्प॒दम॑ध्व॒र्युभि॒र्गुहा॑ हि॒तम् । सूरः॑ पश्यति॒ चक्ष॑सा ॥९॥

abhí priyā́ divás padám adhvaryúbhir gúhā hitám | sū́raḥ paśyati cákshasā || 9 || 35 ||

(११) एकादशं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥३६॥ उपा॑स्मै गायता नरः॒ पव॑माना॒येन्द॑वे । अ॒भि दे॒वाँ इय॑क्षते ॥१॥
अ॒भि ते॒ मधु॑ना॒ पयोऽथ॑र्वाणो अशिश्रयुः । दे॒वं दे॒वाय॑ देव॒यु ॥२॥
स नः॑ पवस्व॒ शं गवे॒ शं जना॑य॒ शमर्व॑ते । शं रा॑ज॒न्नोष॑धीभ्यः ॥३॥
ब॒भ्रवे॒ नु स्वत॑वसेऽरु॒णाय॑ दिवि॒स्पृशे॑ । सोमा॑य गा॒थम॑र्चत ॥४॥
हस्त॑च्युतेभि॒रद्रि॑भिः सु॒तं सोम॑ं पुनीतन । मधा॒वा धा॑वता॒ मधु॑ ॥५॥

11.

Úpāsmai gāyatā naraḥ pávamānāyéndave | abhí devā́n íyakshate || 1 || abhí te mádhunā páyó 'tharvāṇo aśiśrayuḥ | devám devā́ya devayú || 2 || sá naḥ pavasva śám gáve śám jánāya śám árvate | śám rājann óshadhībhyaḥ || 3 || babhráve nú svátavase 'ruṇā́ya divispṛ́śe | sómāya gāthám arcata || 4 || hástacyutebhir ádribhiḥ sutám sómam punītana | mádhāv ā́ dhāvatā mádhu || 5 || 36 ||

The mighty self has seen with his own hidden eye, that all the priests (the sense organs) have in their heart enjoyed their divine share of elixir. 9

11

Sing, O leaders of ceremonies, to the glory of this pure-flowing drop of divine love. It is keen to offer worship to Nature's bounties (the verses are chanted whilst the juice is extracted). 1

To the exhilarating juice, the celebrated sages mix the sweet milk which is divine and favourite of all divinties. 2

O radiant divine love, may you grant health and happiness to our people, happiness to our cattle and horses and long life to our herbal plants. 3

May you recite praises to the bright and brown, self-vigorous, and heaven-touching divine elixir. 4

Purify the divine elixir, which has been crushed between stones, whirled by the hands and squeezed. May you mix the sweet milk of devotion in the inebriating elixir. 5

॥३७॥ नमसेदुप सीदत दध्नेदभि श्रीणीतन । इन्दुमिन्द्रे दधातन ॥६॥
अमित्रहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो अनुकामकृत् ॥७॥
इन्द्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥८॥
पवमान सुवीर्यं रयिं सोम रिरीहि नः । इन्दविन्द्रेण नो युजा ॥९॥

·námaséd úpa sīdata dadhnéd abhí srīṇītana | índum índre dadhātana || 6 || amitrahá vícarshaṇiḥ pávasva soma sám gáve | devébhyo anukāmakrít || 7 || índrāya soma pátave mádāya pári shicyase | manascín mánasas pátiḥ || 8 || pávamāna suvíryam rayím soma rirīhi naḥ | índav índreṇa no yujá || 9 || 37 ||

(१२) द्वादशं सूक्तम्

(१–९) नवर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥३८॥ सोमा असृग्रमिन्दवः सुता ऋतस्य सादने । इन्द्राय मधुमत्तमाः ॥१॥
अभि विप्रा अनूषत गावो वत्सं न मातरः । इन्द्रं सोमस्य पीतये ॥२॥
मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् । सोमो गौरी अधि श्रितः ॥३॥

12.

Sómā asrigram índavaḥ sutá ritásya sádane | índrāya mádhumattamāḥ || 1 || abhí víprā anūshata gávo vatsám ná mātáraḥ | índram sómasya pītáye || 2 || madacyút ksheti sádane síndhor ūrmá vipascít | sómo gaurí ádhi sritáḥ || 3 ||

(O priests), may you come with reverence; mix the juices of elixir with curds and offer the mixed juices to the resplendent self. 6

O divine elixir, the subduer of enmity, the most wise, fulfiller of aspirations of godly men, may you shower prosperity on our cows and cattle. 7

O elixir of divine love, cognizant of the mind, and its controller as well, you are poured forth as a drink for the exhilaration of the resplendent self. 8

O joy-bestowing effused elixir, may you give us by the grace of the resplendent Lord, such wealth of prosperity, as increases our vigour. 9

12

The sweetest and most flavoured juices of divine elixir (the spiritual love) are effused and poured forth for the acceptance of the resplendent self in the hall of this eternal sacrifice. 1

The wise men call upon the resplendent self to enjoy the divine elixir, as the mother kine low to their calves. 2

The exhilarating elixir, the wise, dwells in its own station; it is further mixed with waters taken from rivers. At the place of sacrifice, it remains under the control of speech (or chants in the middle tone). 3

दि॒वो नाभा॑ विचक्ष॒णोऽव्यो॒ वारे॑ महीयते । सोमो॒ यः सु॒क्रतुः॑ क॒विः ॥४॥
यः सोमः॑ क॒लशे॒ष्वाँ अ॒न्तः प॒वित्र॒ आहि॑तः । तमिन्दुः॒ परि॑ षस्वजे ॥५॥

divó nā́bhā vicakshanó 'vyo vā́re mahīyate | sómo yáḥ su-krátuḥ kavíḥ || 4 || yáḥ sómaḥ kaláśeshv ā́ñ antáḥ pavítra ā́hitaḥ | tám índuḥ pári shasvaje || 5 || 38 ||

॥३९॥ प्र वाच॒मिन्दु॑रिष्यति समु॒द्रस्याधि॑ वि॒ष्टपि॑ । जिन्व॒न्कोशं॑ मधु॒श्चुत॑म् ॥६॥
नित्य॑स्तोत्रो॒ वन॒स्पति॑र्धी॒नाम॒न्तः स॑ब॒र्दुघः॑ । हि॒न्वा॒नो मानु॑षा यु॒गा ॥७॥
अ॒भि प्रि॒या दि॒वस्प॒दा सोमो॑ हिन्वा॒नो अ॑र्षति । विप्र॑स्य॒ धार॑या क॒विः ॥८॥
आ प॑वमान धारय र॒यिं स॒हस्र॑वर्चसम् । अ॒स्मे इ॑न्दो स्वा॒भुव॑म् ॥९॥

prá vā́cam índur ishyati samudrásyā́dhi vishṭápi | jínvan kóśam madhuścútam || 6 || nítyastotro vánaspátir dhīnā́m antáḥ sabardúghaḥ | hinvānó mā́nushā yugā́ || 7 || abhí priyā́ divás padā́ sómo hinvānó arshati | víprasya dhā́rayā kavíḥ || 8 || ā́ pavamāna dhāraya rayíṃ sahásravarcasam | asmé indo svābhúvam || 9 || 39 ||

(१३) त्रयोदशं सूक्तम्
(१-९) नवर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१॥ सोमः॑ पुना॒नो अ॑र्षति स॒हस्र॑धारो॒ अत्य॑विः । वा॒योरिन्द्र॑स्य निष्कृ॒तम् ॥१॥

13.

Sómaḥ punānó arshati sahásradhāro átyaviḥ | vāyór índrasya nishkṛitám || 1 ||

The elixir of bliss, the keen observant, the wise seer, is worshipped in the navel of the sky, and is purified by filtering it through a fleecy filter. 4

The one collected in the vats or pots, has now been filtered through the ultra-psychic fleecy filters, and the filtrates are all mixed together. 5

The drops of elixir, abiding in the firmament of the sky, as they fall and flow, make a sound, that delights the nectar-shedding cloud. 6

The praise of the elixir of love is eternal; the plant is known as the lord of forests; and is the shedder of nectar. It inspires many generations of men. Such an elixir enlightens the intellects to their core. 7

The sagacious elixir has been brought from heaven; it flows in a stream to the happy and fortunate houses of the devouts. 8

O purifying divine elixir, may you shower upon us wealth of a thousand radiances, excellent in all respects. 9

13

The purifying love divine, flowing in a thousand streams and passing through the celestial fleecy filters, proceeds to Nature's bounties, such as the wind and the solar rays. 1

पवमानमवस्यवो विप्रमभि प्र गायत । सुष्वाणं देववीतये ॥२॥
पवन्ते वाजसातये सोमाः सहस्रपाजसः । गृणाना देववीतये ॥३॥
उत नो वाजसातये पवस्व बृहतीरिषः । द्युमदिन्दो सुवीर्यम् ॥४॥
ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ॥५॥

pávamānam avasyavo vípram abhí prá gāyata | sushvāṇáṃ devávītaye || 2 || pávante vā́jasātaye sómāḥ sahásrapājasaḥ | griṇānā́ devávītaye || 3 || utá no vā́jasātaye pávasva brihatī́r íshaḥ | dyumád indo suvī́ryam || 4 || té naḥ sahasríṇaṃ rayím pávantām ā́ suvī́ryam | suvānā́ devā́sa índavaḥ || 5 || 1 ||

॥२॥ अत्या हियाना न हेतृभिरसृग्रं वाजसातये । वि वारमव्यमाशवः ॥६॥
वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः । दधन्विरे गभस्त्योः ॥७॥
जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् । विश्वा अप द्विषो जहि ॥८॥
अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः । योनावृतस्य सीदत ॥९॥

átyā hiyānā́ ná hetríbhir ásrigram vā́jasātaye | ví vā́ram ávyam āśávaḥ || 6 || vāśrā́ arshantíndavo 'bhí vatsáṃ ná dhenávaḥ | dadhanviré gábhastyoḥ || 7 || júshṭa índrāya matsaráḥ pávamāna kánikradat | víśvā ápa dvísho jahi || 8 || apaghnánto árāvṇaḥ pávamānāḥ svardríśaḥ | yónāv ritásya sīdata || 9 || 2 ||

May you, who are desirous of divine protection, sing aloud praises of the cosmic elixir which is being effused for Nature's bounties as their favourite beverage. 2

The elixir of divine love flows for the attainment of nourishment, giving strength in thousands. It secures affection from Nature's bounties when glorified through sacred hymns. 3

O divine love, may you pour forth abundant streams and splendid and excellent vigour for our attainment of food. 4

May those divine libations of spiritual elixir, when effused, bring to us thousand-fold wealth and excellent vigour. 5

Like horses urged to battle by their drivers, the swift-flowing elixir of divine love, hastens through the texture of the cosmic fleecy filter. 6

While flowing, the drops of elixir of divine love make thrilling sounds as if cows lowing to their calves. They are welcome to priests (as guests) received in arms. 7

O pure blissful love divine, you are acceptable and pleasing to the resplendent self. While uttering thrilling sound, may you destroy all our adversaries. 8

May you (O love divine), the beholder of the path of enlightenment, purifying our mind and destroying the infidels who refuse to offer worship, come and stay in the prime position of the eternal sacrifice. 9

(१४) चतुर्दशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥३॥ परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः । कारं बिभ्रत्पुरुस्पृहम् ॥१॥
गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः । परिष्कृण्वन्ति धर्णसिम् ॥२॥
आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत । यदी गोभिर्वसायते ॥३॥
निरिणानो वि धावति जहच्छर्याणि तान्वा । अत्रा सं जिघ्नते युजा ॥४॥
नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा । गाः कृण्वानो न निर्णिजम् ॥५॥

14.

Pári prásishyadat kavíḥ síndhor ūrmáv ádhi ṣritáḥ | kārám bíbhrat puruspṛíham || 1 || girá yádī sábandhavaḥ páñca vrátā apasyávaḥ | parishkṛiṇvánti dharṇasím || 2 || ád asya ṣushmíṇo ráse víṣve devá amatsata | yádī góbhir vasāyáte || 3 || niriṇānó ví dhāvati jáhac cháryāṇi tánvā | átrā sám jighnate yujá || 4 || naptíbhir yó vivásvataḥ ṣubhró ná māmṛijé yúvā | gáḥ kṛiṇvānó ná nirṇíjam || 5 || 3 ||

॥४॥ अति श्रिती तिरश्चता गव्या जिगात्यण्व्या । वग्नुमियर्ति यं विदे ॥६॥
अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम् । पृष्ठा गृभ्णत वाजिनः ॥७॥
परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा । वसूनि याह्यस्मयुः ॥८॥

áti ṣrití tiraṣcátā gavyá jigāty áṇvyā | vagnúm iyarti yáṃ vidé || 6 || abhí kshípaḥ sám agmata marjáyantīr ishás pátim | pṛishṭhá gṛibhṇata vājínaḥ || 7 || pári divyáni már- mṛiṣad víṣvāni soma párthivā | vásūni yāhy asmayúḥ || 8 || 4 ||

14

The divine elixir of penetrating insight, when effused, flows widely round and is taken to the waves of a river (i.e. it is mixed with water), and with a thrilling sound pleasing to all, (it comes to a receptacle). 1

All the five types of men, full of zeal and faith, and desirous of accomplishing sacred acts, honour the sustaining love divine with their chants of praises. 2

At that time, all Nature's bounties rejoice in expectation of getting their share of elixir, now enveloped (i.e. mixed) with milk and curds. 3

Descending from the cosmic (or ultra-psychic) filters, it hastens and passes through the interstices of the woollen cloth. Finally, it imparts the ecstatic feeling of unity with its friend, the resplendent self. 4

The divine extract is squeezed and cleansed by the fingers of the sacrificer, and it looks fresh and bright like a handsome young (horse). It makes the milk as one's own abode (i.e. it is mixed with milk and curds). 5

Expressed by the fingers, it proceeds obliquely to the produce of the cow (i.e. it is mixed with milk); it utters a thrilling sound which is familiar to the worshipper. 6

The fingers express the juice from the plant which is the lord of nourishment. They, the fingers, come close to each other at the time of cleansing, and hold vigorously the plant of the elixir. 7

O divine love, may you, holding all the treasures of heaven and earth, come favourably disposed to us. 8

(१५) पञ्चदशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥५॥ एष धिया यात्यण्व्या शूरो रथेभिराशुभिः । गच्छन्निन्द्रस्य निष्कृतम् ॥१॥
एष पुरू धियायते बृहते देवतातये । यत्रामृतास आसते ॥२॥
एष हितो वि नीयतेऽन्तः शुभ्रावता पथा । यदी तुञ्जन्ति भूर्णयः ॥३॥
एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा । नृम्णा दधान ओजसा ॥४॥

15.

Eshá dhiya yaty áṇvya śúro ráthebhir aśúbhiḥ | gáchann índrasya nishkṛitám || 1 || eshá purú dhiyayate bṛihaté devátātaye | yátrāmṛitasa ásate || 2 || eshá hitó vi nıyate 'ntáḥ śubhrávatā pathá | yádi tuñjánti bhúrṇayaḥ || 3 || eshá śríngaṇi dódhuvac chíśite yuthyo vrísha | nṛimṇá dádhana ójasā || 4 ||

एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः । पतिः सिन्धूनां भवन् ॥५॥
एष वसूनि पिब्दना परुषा ययिवाँ अति । अव शादेषु गच्छति ॥६॥
एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः । प्रचक्राणं महीरिषः ॥७॥
एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः । स्वायुधं मदिन्तमम् ॥८॥

eshá rukmíbhir ıyate vājı śubhrébhir aṅśúbhiḥ | pátiḥ síndhūnam bhávan || 5 || eshá vásuni pibdaná párushā yayiváṅ áti | áva śádeshu gachati || 6 || etám mṛijanti márjyam úpa dróṇeshv ayávaḥ | pracakraṇám mahır íshaḥ || 7 || etám u tyáṃ dáśa kshípo mṛijánti saptá dhıtáyaḥ | svayudhám madíntamam || 8 || 5 ||

15

This love divine is heroic. Expressed intelligently by fingers, it proceeds further and hastens as if on a swift chariot to the abode of the resplendent self. 1.

This love divine engages in many sacred performances and promotes divine virtues, which adorn the men of immortal fame. 2

The effused elixir is brought to the place of sacrifice by a path that shines with brilliant light; then the priests offer it (to the resplendent self and to Nature's bounties). 3

He (the divine elixir) tosses his horn, and whets on high like a bull; the lord of the herd thus manifests his might, and thereby brings for us his treasures. 4

Becoming the lord of streams, he (the divine elixir) proceeds along with enthusiasm and vigour (to the place of sacrifice), adorned with brilliant golden rays. 5

At the right time, he overpowers the discomfited concealers of wealth, destroys them and moves to the side of those who abide by his discipline. 6

The priests express the sap of the divine plant into the vessels, which is thereafter purified. The sap is the provider of abundant food. 7

The ten fingers, the seven priests, effuse out this well-weaponed divine elixir which yields great exhilaration. 8

(१६) षोडशं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

१६॥ प्र ते सोतार ओण्योः रसं मदाय घृष्वये । सर्गो न तक्त्येतशः ॥१॥
क्रत्वा दक्षस्य रथ्यमपो वसानमन्धसा । गोषामण्वेषु सश्चिम ॥२॥
अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे ॥३॥
प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति । क्रत्वा सधस्थमासदत् ॥४॥

16.

Prá te sotára onyo rásam mádaya ghríshvaye | sárgó ná takty étasah || 1 || krátva dákshasya rathyàm apó vásanam ándhasa | goshám ánveshu sascima || 2 || ánaptam apsú dushtáram sómam pavítra á srija | punihíndraya pátave || 3 || prá punanásya cétasa sómah pavítre arshati | krátva sadhástham ásadat || 4 ||

प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत । महे भराय कारिणः ॥५॥
पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥६॥
दिवो न सानु पिप्युषी धारा सुतस्य वेधसः । वृथा पवित्रे अर्षति ॥७॥
त्वं सोम विपश्चितं तना पुनान आयुषु । अव्यो वारं वि धावसि ॥८॥

pra tva námobhir índava índra sóma asrikshata | mahé bhárava karínah || 5 || punanó rūpé avyáye vísvā árshann abhí sríyah | súro na góshu tishthati || 6 || divó ná sánu pipyúshī dhára sutásya vedhásah | vrítha pavítre arshati || 7 || tvám soma vipascítam tána punaná ayúshu | ávyo váram ví dhavasi || 8 || 6 ||

16

O elixir of divine love, the persons who extract and effuse you out, do it for an exhilaration that is capable of destroying evils. You are a sap that pervades the entire space existing between heaven and earth. May your flow flash like a swift horse. 1

This (elixir) provides strength and speed. In sacred rites, it is mingled with food and water and mixed with milk of cow by our fingers. 2

This unassailable, invincible divine love abides in the cosmic vapours of firmament. May you pour it and purify on the ultra-psychic filter for the enjoyment of the resplendent self. 3

The loving elixir of that devotee who is purified by worship flows upon the ultra-psychic filter and settles at a worthy place, duly assigned in the ceremony. 4

O resplended self, these drops of love divine flow to you with praises and give you vigour for the impending great struggle of life. 5

Purified through the ultra-psychic woollen filter, the divine elixir attains all honours. It stands as if it is a hero in the midst of kine. 6

Nutritious stream of the invigorating love divine falls easily upon the straining cloth as the lofty rain from heaven. 7

O bliss divine, most wise, may you extend your grace and purify men. May your stream of love divine flow unceasingly through the ultra-psychic woollen filters. 8

(१७) सप्तदशं सूक्तम्

(१–८) अष्टर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥७॥ प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः । सोमा असृग्रमाशवः ॥१॥
अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव । इन्द्रं सोमासो अक्षरन् ॥२॥
अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥३॥
आ कलशेषु धावति पवित्रे परि षिच्यते । उक्थैर्यज्ञेषु वर्धते ॥४॥

17.

Prá nimnéneva síndhavo ghnánto vritráni bhúrṇayaḥ | sómā asṛigram āṣávaḥ || 1 || abhí suvānása índavo vṛishṭá-yaḥ prithivím iva | índram sómāso aksharan || 2 || átyūrmir matsaró mádaḥ sómaḥ pavítre arshati | vighnán rákshāṅsi devayúḥ || 3 || á kaláṣeshu dhāvati pavítre pári shicyate | ukthaír yajñéshu vardhate || 4 ||

अति त्री सोम रोचना रोहन्न भ्राजसे दिवम् । इष्णन्त्सूर्यं न चोदयः ॥५॥
अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः । दधानाश्चक्षसि प्रियम् ॥६॥
तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः । मृजन्ति देवतातये ॥७॥
मधोर्धारामनु क्षर तीव्रः सधस्थमासदः । चारुर्ऋताय पीतये ॥८॥

áti tri soma rocaná róhan ná bhrājase dívam | ishṇán súryam ná codayaḥ || 5 || abhí víprā anūshata mūrdhán yajñásya kārávaḥ | dádhānāṣ cá-kshasi priyám || 6 || tám u tvá vājínam náro dhībhír víprā avasyávaḥ | mṛijánti devátātaye || 7 || mádhor dhárām ánu kshara tīvráḥ sadhástham ásadaḥ | cárur ṛitáya pītáye || 8 || 7 ||

17

Like rivers flowing along a steep descent, the rapid streams of divine love flow with full zeal (through the strainers). They are the destroyers of dark forces. 1

The drops of love divine, as they are expressed, flow to the resplendent self like the rains falling upon the ground. 2

The elixir of divine love flows across the strainer with swelling waves. It is exhilarating, inebriating and it destroys the wicked. It is ever keen to go to the divine. 3

It flows to the receptacles of hearts, is strained through the ultra-psychic filters, and is glorified at worship by praises. 4

The divine love, mounting beyond the three worlds, illumines heaven and it voluntarily provides impulsion to the sun as well. 5

The enlightened performers of pious ceremonies glorify it (the elixir) at the time of worship, entertaining affection for the one all-beholding. 6

The sages, leaders of sacred rites, desirous of sustenance, filter and purify you, to be used in the sacred performances; you are the giver of strengthening food. 7

May you flow onward to pour forth streams of the sweet elixir of divine love. May you stay in your receptacle, O sharp-flavoured, for the fulfilment of the eternal rites and for enjoyment. 8

(१८) अष्टादशं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥८॥ परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः । मदेषु सर्वधा असि ॥१॥
त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः । मदेषु सर्वधा असि ॥२॥
तव विश्वे सजोषसो देवासः पीतिमाशत । मदेषु सर्वधा असि ॥३॥

18.

Pári suvānó girishṭhā́ḥ pavítre sómo akshāḥ | mádeshu sarvadhā́ asi || 1 || tvám̐ vípras tvám̐ kavír mádhu prá jā-tám ándhasaḥ | mádeshu — || 2 || táva víṣve sajóshaso de-vā́saḥ pītím āṣata | mádeshu — || 3 ||

आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे । मदेषु सर्वधा असि ॥४॥
य इमे रोदसी मही सं मातरेव दोहते । मदेषु सर्वधा असि ॥५॥
परि यो रोदसी उभे सद्यो वाजेभिरर्षति । मदेषु सर्वधा असि ॥६॥
स शुष्मी कलशेष्वा पुनानो अचिक्रदत् । मदेषु सर्वधा असि ॥७॥

á yó víṣvāni vā́ryā vásūni hástayor dadhé | mádeshu — || 4 || yá imé ródasī mahī́ sám mātáreva dóhate | mádeshu — || 5 || pári yó ró-dasī ubhé sadyó vā́jebhir árshati | mádeshu — || 6 || sá ṣushmī́ kaláṣeshv á punānó acikradat | mádeshu — || 7 || 8 ||

18

O elixir of bliss, with your habitat on hill-tops, when effused, you flow on the ultra-psychic woollen strainers. You, O nectar, are the supreme sustaining among those who give us ecstatic delight. 1

You are wise; you are a seer; you bestow the sweet honey as if produced from food (herbal plants). You are the supreme sustainer among those who give us ecstatic delight. 2

All divines (the organs of senses and actions) together are pleased to enjoy the drinking of this embrosia. You are the supreme sustainer among those who give us ecstatic delight. 3

You are the one who places in the hands of the worshipper all desirable riches; you are the supreme sustainer among those who give us ecstatic delight. 4

You are the one who milks this great heaven and earth, like two mothers; you are the supreme sustainer among those who give us ecstatic delight. 5

You are the one who in no time goes around and serves both heaven and earth with viands; you are the supreme sustainer among those who give us ecstatic delight. 6

This vigorous nectar of love divine, stocked in vessels, gives thrilling sounds while proceeding for purification; you are the supreme sustainer among those who give us ecstatic delight. 7

(१९) एकोनविंशं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥९॥ यत्सो॑म चि॒त्रमु॒क्थ्यं॑ दि॒व्यं पार्थि॑वं॒ वसु॑ । तन्न॑: पुना॒न आ भ॑र ॥१॥
यु॒वं हि स्थः स्व॑र्पती॒ इन्द्र॑श्च सोम॒ गोप॑ती । ई॒शा॒ना पि॑प्यतं॒ धियः॑ ॥२॥
वृषा॑ पुना॒न आ॒युषु॑ स्त॒नय॒न्नधि॑ ब॒र्हिषि॑ । हरि॒: सन्योनि॒मास॑दत् ॥३॥

19.

Yát soma citrám ukthyàm divyám párthivam vásu | tán naḥ punāná á bhara || 1 || yuvám hí stháḥ svàrpatī índraș ca soma gópatī | īṣāná pipyatam dhíyaḥ || 2 || vríshā punāná āyúshu stanáyann ádhi barhíshi | háriḥ sán yónim ásadat || 3 ||

अवा॑वशन्त धी॒तयो॑ वृष॒भस्याधि॒ रेत॑सि । सू॒नोर्व॒त्सस्य॑ मा॒तर॑: ॥४॥
कु॒विद्वृ॑षण्यन्ती॑भ्यः पुना॒नो गर्भ॑मा॒दध॑त् । याः शु॒क्रं दु॑ह॒ते पय॑: ॥५॥
उप॑ शिक्षापत॒स्थुषो॑ भि॒यस॒मा धे॑हि॒ शत्रु॑षु । पव॑मान वि॒दा र॒यिम् ॥६॥
नि शत्रो॑: सोम॒ वृष्ण्यं॒ नि शुष्मं॒ नि वय॑स्तिर । दू॒रे वा॑ स॒तो अन्ति॑ वा ॥७॥

ávāvaṣanta dhītáyo vrishabhásyádhi rétasi | sūnór vatsásya mātáraḥ || 4 || kuvíd vrishaṇyántībhyaḥ punānó gárbham ādádhat | yáḥ ṣukrám duhaté páyaḥ || 5 || úpa ṣikshāpatasthúsho bhiyásam á dhehi ṣátrushu | pávamāna vidá rayím || 6 || ní ṣatroḥ soma vríshṇyam ní ṣúshmam ní váyas tira | dūré vā sató ánti vā || 7 || 9 ||

19

Whatever wonderful wealth of glory there be in heaven or on earth, may you, O nectar of bliss, being purified, bring it to us. 1

O nectar of bliss, you and resplendent self both are the lords of everyone; also the lords of our organs of senses; may you, O master, bless us in our intellectual assignments. 2

The celestial elixir, the showerer (of benefit), is purified in the midst of chants of men (the priests), uttering thrilling noise. It lies green-tinted, on its assigned seat. 3

Like the mothers of the born children, the fingers cleanse (the stems of the plant) under waters and crave for the invigorating and strength-giving (elixir of bliss). 4

For purification, the plant of the mighty elixir is washed with waters; the effused elixir stays under water and implants numerous germs (ferments) of activity, and finally the effused elixir after purification is mixed with bright water and milk. 5

May you bring near to us those who stand aloof; may you strike terror into our foes; O pure-flowing elixir, please transfer their riches to us. 6

O lord of bliss, destroy the vigour, the energy, the vital power of our enemy, whether he be close by or at a distance. 7

(२०) विंशं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१०॥ प्र कविर्देववीतयेऽव्यो वारेभिरर्षति । साह्वान्विश्वा अभि स्पृधः ॥१॥
स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति । पवमानः सहस्रिणम् ॥२॥
परि विश्वानि चेतसा मृशसे पवसे मती । स नः सोम श्रवो विदः ॥३॥

20

Prá kavír devávītayé 'vyo várebhir arshati | sāhvā́n víṣvā abhí spṛídhaḥ || 1 || sá hí shmā jaritṛíbhya ā́ vā́jam gómantam ínvati | pávamānaḥ sahasríṇam || 2 || pári víṣvāni cétasā mṛiṣáse pávase matí | sá naḥ soma ṣrávo vidaḥ || 3 ||

अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् । इषं स्तोतृभ्य आ भर ॥४॥
त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ । पुनानो वह्ने अद्भुत ॥५॥
स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः । सोमश्चमूषु सीदति ॥६॥
क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यम् ॥७॥

abhy àrsha bṛihád yáṣo maghávadbhyo dhruvā́ṃ rayím | íshaṃ stotṛíbhya ā́ bhara || 4 || tvā́ṃ rā́jeva suvrató gírah somā́ viveṣitha | punānó vahne adbhuta || 5 || sá váhnir apsú dushṭáro mṛijyámāno gábhastyoḥ | sómaṣ camū́shu sīdati || 6 || krīḷúr makhó ná maṅhayúḥ pavítraṃ soma gachasi | dádhat stotré suvī́ryam || 7 || 10 ||

20

The ambrosia passes through the texture of the ultra-psychic fleecy sieve to become the beverage of the organs of senses and actions, triumphing over all our adversaries. 1

Verily, it, the pure-flowing ambrosia, bestows upon its praisers thousandfold treasure in the shape of cattle, cow-products and food. 2

You give us all kinds of wealth with your intuition; you flow for us at our praises; as such, O elixir of bliss, grant us sustenance. 3

Bestow upon us great glory; grant durable riches to those who are rich and prosperous; bring food to your praisers. 4

O elixir of divine bliss, the purified and the one pledged for noble deeds, O wonderful bearer of our offerings, may you listen to our praises as a king. 5

O nectar of divine bliss, the bearer of oblations, you abide in the vapours of the firmament; you are difficult to be surpassed by any; we cleanse you by our hands. May you repose in the receptacles of our hearts. 6

O ambrosia, you proceed to the filtering ultra-psychic sieve sportingly; like a chief, you are liberal and generous, and give excellent vigour to him who praises you. 7

(२१) एकविंशं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥११॥ एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः । मत्सरासः स्वर्विदः ॥१॥
प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः । स्वयं स्तोत्रे वयस्कृतः ॥२॥
वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित् । सिन्धोरूर्मा व्यक्षरन् ॥३॥

21.

Eté dhāvantíndavaḥ sómā índrāya ghríshvayaḥ | matsa-rásaḥ svarvídaḥ || 1 || pravrinvánto abhiyújaḥ súshvaye va-rivovídaḥ | svayáṃ stotré vayaskrítaḥ || 2 || vríthā krílanta índavaḥ sadhástham abhy ékam ít | síndhor ūrmā́ vy àksharan || 3 ||

एते विश्वानि वार्या पवमानास आशत । हिता न सप्तयो रथे ॥४॥
आस्मिन्पिशङ्गमिन्दवो दधाता वेनमादिशे । यो अस्मभ्यमरावा ॥५॥
ऋभुर्न रथ्यं नवं दधाता केतमादिशे । शुक्राः पवध्वमर्णसा ॥६॥
एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत । सतः प्रासाविषुर्मतिम् ॥७॥

eté víṣvāni vā́ryā pávamānāsa āṣata | hitā́ ná sáptayo ráthe || 4 || ā́smin piṣáñgam indavo dádhātā venám ādíṣe | yó asmábhyam árāvā || 5 || ribhúr ná ráthyaṃ návaṃ dádhātā kétam ādíṣe | ṣukrā́ḥ pavadhvam árṇasā || 6 || etá u tyé avīvaṣan kā́shṭhāṃ vājíno akrata | satáḥ prā́sā-vishur matím || 7 || 11 ||

21

These flowing, encouraging (for contest), exhilarating, heaven-conferring streams of ambrosia rush toward the resplendent self. 1

(These elixirs are) graceful in awarding favours, useful in numerous ways, and are the givers of wealth to him, who rightly effuse them. They spontaneously bestow food and nourishment on their praisers. 2

The effused streams of ambrosia come sporting and are finally received in a common receptacle containing water of rivers. 3

Like horses harnessed to a car, these pure streams of nectar bring all desirable blessings to us. 4

O effused streams of love divine, bestow at our indication manifold blessings on pious devotees who may not have given us anything presently. 5

As a great man appoints a commendable charioteer, so may you grant knowledge to our superior and flow glistening with water. 6

These effused streams of joy have been keen at the sacrifice; powerful, they have made for themselves an abiding place; they have animated the intellect of the pious institutor of the sacrificial rite. 7

22

These streams of ambrosia when let out (for filtration), give a thrilling sound as they pass (through the ultra-psychic sieve). (In their movements, they resemble) chariots or the swift horses let loose. 1

Like the gushing winds, like the rain-storms or like the swift whirling flames of fire,— 2

—these pure streams of divine love, sagacious, and mixed with milk and curds, easily participate in our ceremonies performed with intelligence. 3

These elixirs, when purified, come down from the filters to the receptacles; thence they traverse along their assigned paths. They never get exhausted (in their incessant sojourn). 4

Spreading in various directions, they pervade the entire space, from earth to heaven. They extend to all the regions, the highest and the supreme ones. 5

Descending rivers follow this excellent ambrosia as it spreads out to our sacred works; these accomplishments are glorified thereby. 6

O elixir of bliss, you hold the wealth of kine which you win from the greedy persons; you are the force behind the extended thread (of creation). 7

(२३) त्रयोविंशं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१३॥ सोमा॑ असृग्रमा॒शवो॒ मधो॒र्मद॑स्य॒ धार॑या । अ॒भि विश्वा॑नि॒ काव्या॑ ॥१॥
अनु॑ प्र॒त्नास॒ आ॒यवः॑ प॒दं नवी॑यो अक्रमुः । रु॒चे ज॑नन्त॒ सूर्य॑म् ॥२॥
आ प॑वमान नो भराऱ्यो अदा॑शुषो॒ गय॑म् । कृ॒धि प्र॒जाव॑ती॒रिषः॑ ॥३॥
अ॒भि सोमा॑स आ॒यवः॒ पव॑न्ते॒ मद्यं॒ मद॑म् । अ॒भि कोशं॑ मधु॒श्चुत॑म् ॥४॥

23.

Sómā asrigram āsávo mádhor mádasya dhárayā | abhí vísvāni kávyā || 1 || ánu pratnása āyávaḥ padám náviyo akramuḥ | rucé jananta sũryam || 2 || á pavamāna no bharāryó ádāsusho gáyam | kridhí prajávatīr íshaḥ || 3 || abhí sómāsa āyávaḥ pávante mádyam mádam | abhí kósam madhuscútam || 4 ||

सोमो॑ अर्षति ध॒र्णसि॒र्दधा॑न इन्द्रि॒यं रस॑म् । सु॒वीरो॑ अभिशस्ति॒पाः ॥५॥
इन्द्रा॑य सोम पवसे दे॒वेभ्यः॑ सध॒माद्यः॑ । इन्दो॒ वाजं॑ सिषाससि ॥६॥
अ॒स्य पी॒त्वा मदा॑ना॒मिन्द्रो॑ वृ॒त्राण्य॑प्र॒ति । ज॒घान॑ ज॒घन॑च्च॒ नु ॥७॥

sómo arshati dharnasír dádhāna indriyám rásam | suvíro abhisastipáḥ || 5 || índrāya soma pavase devébhyaḥ sadhamádyaḥ | índo vájam sishāsasi || 6 || asyá pītvá mádānām índro vritrány aprati | jaghána jaghánac ca nú || 7 || १४ ||

23

The swift-flowing ambrosia issues forth in a stream, sweet and exhilarating, whilst the chanting of numerous praises by the sages goes on. 1

These swift-going cosmic horses (of the sun) have been traversing a new field since the eternal past; they as if, impel the sun to give light. 2

O purifier, acquire for us the property and possessions of such a miser landlord as is not liberal in munificience. May you bestow upon us progeny-abounding food. 3

The swift-flowing streams of divine love effuse exhilarating juices; they flow (after filtration) to the honey-storing receptacle. 4

The divine love, the sustainer (of the world), the giver of the sap of life to organs of senses and actions, heroic, a protector against calumny, flows forth (to the receptacles). 5

O nectar of divine love, worthy of worship, you flow forth for the sake of the resplendent soul and for the sake of sense organs (divines); O drop of ambrosia, you vouchsafe to give us food. 6

Having drunk of this divine supreme exhilarating draught, the soul, the irresistible, has been subduing the opponents; may he ever subdue them. 7

(२४) चतुर्विंशं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य काश्यपोऽसितो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१४॥ प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणाना अप्सु मृञ्जत ॥१॥
अभि गावो अधन्विषुरापो न प्रवता यतीः । पुनाना इन्द्रमाशत ॥२॥
प्र पवमान धन्वसि सोमेन्द्राय पातवे । नृभिर्यतो वि नीयसे ॥३॥
त्वं सोम नृमादनः पवस्व चर्षणीसहे । सस्निर्यो अनुमाद्यः ॥४॥

24.

Prá sómāso adhanvishuḥ pávamānāsa índavaḥ | srīṇāná apsú mriñjata || 1 || abhí gávo adhanvishur ápo ná pravátā yatíḥ | punāná índram āṣata || 2 || prá pavamāna dhanvasi sóméndrāya pátave | nṛíbhir yató ví nīyase || 3 || tvám soma nṛimádanaḥ pávasva carhaṇīsáhe | sásnir yó anumádyaḥ || 4 ||

इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि । अरमिन्द्रस्य धाम्ने ॥५॥
पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः । शुचिः पावको अद्भुतः ॥६॥
शुचिः पावक उच्यते सोमः सुतस्य मध्वः । देवावीरघशंसहा ॥७॥

índo yád ádribhiḥ sutáḥ pavítram paridhávasi | áram índrasya dhámne || 5 || pávasva vritrahantamokthébhir anumádyaḥ | ṣúciḥ pāvakó ádbhutaḥ || 6 || ṣúciḥ pāvaká ucyate sómaḥ sutásya mádhvaḥ | devāvír aghaṣaṅsahá || 7 || 14 ||

24

The purified streams of effused elixirs flow downwards through the ultra-psychic filters, mixed with water, milk and curds. 1

The flowing juices of ambrosia rush like waters flowing down a declivity; filtered and purified, they proceed to the resplendent self. 2

O filtrable ambrosia, you proceed to the resplendent self for his enjoyment. By the priests, you have been prepared and conveyed by them (to the self). 3

O ambrosia of divine love, you are the exhilarator of men; may you flow to the resplendent soul, who is the conqueror of adversaries. You (O elixir) are pure and worthy of adoration. 4

O nectar, when you are effused by crushing under stones, you hasten to the ultra-psychic sieve; verily, you are pure and of worth acceptance (or enjoyment) by the resplendent self. 5

Flow on, best destroyer of evils, to be propitiated by praises. Verily, you are pure, purifying and wonderful. 6

The ambrosia is said to be the yielder of the exhilarating effusion; it is known to be pure, shining and purifier, the gratifier of the enlightened persons and a dertroyer of the wicked. 7

[अथ द्वितीयोऽनुवाकः ॥]

(२५) पञ्चविंशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्यागस्त्यो दृळ्हच्युत ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१५॥ पर्वस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मदः ॥१॥
पर्वमान धिया हितो३ऽभि योनिं कनिक्रदत् । धर्मणा वायुमा विश ॥२॥
सं देवैः शोभते वृषा कविर्योनावधि प्रियः । वृत्रहा देववीतमः ॥३॥
विश्वा रूपाण्याविशन्पुनानो याति हर्यतः । यत्रामृतास आसते ॥४॥
अरुषो जनयन्गिरः सोमः पवत आयुषक् । इन्द्रं गच्छन्कविक्रतुः ॥५॥
आ पवस्व मदिन्तम पवित्रं धारया कवे । अर्कस्य योनिमासदम् ॥६॥

25.

Pávasva dakshasádhano devébhyaḥ pītáye hare | marúdbhyo vāyáve mádaḥ || 1 || pávamāna dhiyā́ hitó 'bhí yónim kánikradat | dhármaṇā vāyúm ā́ viṣa || 2 || sám devaíḥ ṣobhate vṛíshā kavír yónāv ádhi priyáḥ | vṛitrahā́ devavítamaḥ || 3 || víṣvā rūpā́ṇy āviṣán punānó yāti haryatáḥ | yátrāmṛítāsa ā́sate || 4 || arushó janáyan gíraḥ sómaḥ pavata āyushák | índram gáchan kavíkratuḥ || 5 || ā́ pavasva madintama pavítram dhárayā kave | arkásya yónim āsádam || 6 || 15 ||

(२६) षड्विंशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्य दार्ळ्हच्युत इध्मवाह ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१६॥ तममृक्षन्त वाजिनमुपस्थे अदितेरधि । विप्रासो अण्व्या धिया ॥१॥

26.

Tám amṛikshanta vājínam upásthe áditer ádhi | vípraso áṇvyā dhiyā́ || 1 ||

25

O green-hued ambrosia, the bestower of strength, may you flow for the enjoyment of divine powers such as vital principles and vital winds. 1

O purifying ambrosia, suitably placed by sacred rites, may you roaring enter the receiving pot, and come in contact with the wind by your natural rights. 2

This ambrosia, the showerer of benefits, the seer, the beloved, the destroyer of foes, most favourite among the divines, shines in its own home. 3

Pervading all beauteous forms, the pure, the desirable (elixir) goes to the place where the immortal ones abide. 4

Endowed with wisdom of the past, the brilliant nectar of divine love, generating sounds, flows forth continually, and finally it proceeds to the resplendent soul. 5

Most exhilarating and sagacious (elixir) flows through the filter in a stream, and attains its seat in the proximity of the adorable (resplendent soul). 6

26

The priests cleanse with utmost care (or with fingers) that ambrosia, vigorous and agile, on the lap of the mother earth. 1

तं गावो अभ्यनूषत सहस्रधारमक्षितम् । इन्दुं धर्तारमा दिवः ॥२॥
तं वेधां मेधयाह्यन्पवमानमधि द्यवि । धर्णसिं भूरिधायसम् ॥३॥
तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः । पतिं वाचो अदाभ्यम् ॥४॥
तं सानावधि जामयो हरिं हिन्वन्त्यद्रिभिः । हर्यतं भूरिचक्षसम् ॥५॥
तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् । इन्दविन्द्राय मत्सरम् ॥६॥

tám gávo abhy ànūshata sahásradhāram ákshitam | índum dhartáram á diváḥ || 2 || tám vedhám medháyahyan pávamānam ádhi dyávi | dharṇasím bhúridhāyasam || 3 || tám ahyan. bhuríjor dhiyá saṃvásānaṃ vivásvataḥ | pátiṃ vācó ádābhyam || 4 || táṃ sánāv ádhi jāmáyo hárim hinvanty ádribhiḥ | haryatám bhúricakshasam || 5 || táṃ tvā hinvanti vedhásaḥ pávamāna girāvṛ́dham | índav índrāya matsarám || 6 || 16 ||

(२७) सप्तविंशं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्याङ्गिरसो नृमेध ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१७॥ एष कविरभिष्टुतः पवित्रे अधि तोशते । पुनानो घ्नन्नप स्रिधः ॥१॥
एष इन्द्राय वायवे स्वर्जित्परि षिच्यते । पवित्रे दक्षसाधनः ॥२॥

27

Eshá kavír abhíshṭutaḥ pavítre ádhi toṣate | punānó ghnánn ápa srídhaḥ || 1 || eshá índrāya vāyáve svarjít pári shicyate | pavítre dakshasádhanaḥ || 2 ||

The sacred hymns propitiate that ambrosia flowing in a thousand streams, which is inexhaustible and is the sustainer of heaven. 2

They elevate to heaven by their keen intellect that creative (ambrosia), the purifier, the sustainer and the upholder of all. 3

The worshippers elevate by the fingers (by their arms) that unconquerable (ambrosia), the Lord of praise abiding (in receptacles). 4

The fingers effuse (from the plant) that green-tinted, desirable and far-beholding sap, after having crushed with stones the plant stems placed at a high level. 5

Men of intelligence invoke you, O pure and refined elixir; you provide exhilaration to the resplendent self, and all these praises are addressed to you. 6

27

This purifying ambrosia of divine love, lauded as if it is a sage, passes through the ultra-psychic fleecy filter. It drives away all the opponents. 1

This invigorating heaven-conquering ambrosia is poured upon the ultra psychic filter for the gratification of the cosmic forces as the sun and the wind. 2

एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः । सोमो वनेषु विश्ववित् ॥३॥
एष गव्युरचिक्रदत्पवमानो हिरण्ययुः । इन्दुः सत्राजिदस्तृतः ॥४॥
एष सूर्येण हासते पवमानो अधि द्यवि । पवित्रे मत्सरो मदः ॥५॥
एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः । पुनान इन्दुरिन्द्रमा ॥६॥

eshá nṛíbhir ví nī-yate divó mūrdhā́ vṛíshā sutáḥ | sómo vá́neshu viṣvavít || 3 || eshá gavyúr acikradat pávamāno hiraṇyayúḥ | índuḥ satrājíd ástṛitaḥ || 4 || eshá súryeṇa hāsate pávamāno ádhi dyávi | pavítre matsaró mádaḥ || 5 || eshá ṣushmy àsishya-dad antárikshe vṛíshā háriḥ | punāná índur índram á || 6 || 17 ||

(२८) अष्टाविंशं सूक्तम्

(१-६) षडृचस्यास्य सूक्तस्याङ्गिरसः प्रियमेध ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१८॥ एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः । अव्यो वारं वि धावति ॥१॥
एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः । विश्वा धामान्याविशन् ॥२॥
एष देवः शुभायतेऽधि योनावमर्त्यः । वृत्रहा देववीतमः ॥३॥

28.

Eshá vājí hitó nṛíbhir viṣvavín mánasas pátiḥ | ávyo vá́raṃ ví dhāvati || 1 || eshá pavítre aksharat sómo devé-bhyaḥ sutáḥ | víṣvā dhá́māny āviṣán || 2 || eshá deváḥ ṣu-bhayaté 'dhi yónav ámartyaḥ | vṛitrahá devavítamaḥ || 3 ||

This effused ambrosia, the elixir of divine love, is the showerer of benefits, the summit of heaven and prominent among forest produces. It is all-knowing and thus conducted by the pious men (to the spots of benevolent sacrifices). 3

This ambrosia resounds as it drops, yearning to give us cattle and gold and is the conqueror of foes, irresistible and purifier. 4

This pure-flowing exhilarating elixir of divine love mounts up with the Sun's rays to the sky and then drops on the ultra-psychic filter. 5

This powerful and purifying ambrosia, the showerer of blessings, green-tinted, shining when pure, flows through the firmament (the filter), is meant to be enjoyed by the resplendent self. 6

28

This swift-flowing ambrosia, placed in the vessel by pious men, runs to the fabric of ultra-psychic fleecy filter. It is omniscient and lord of mental complex. 1

This ambrosia has been effused for divines (all organs of senses and actions) and it flows into the ultra-psychic filter. It penetrates through all the functional spots. 2

This divine immortal ambrosia is brilliant in its own place, is the destroyer of evils and is the most devoted to divine functional organs. 3

एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः । अभि द्रोणानि धावति ॥४॥
एष सूर्यमरोचयत्पवमानो विचर्षणिः । विश्वा धामानि विश्ववित् ॥५॥
एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति । देवावीरघशंसहा ॥६॥

59.

Pávasva gojíd aṣvajíd viṣvajít soma raṇyajít | prajā̂vad rátnam ā́ bhara || 1 || pávasvādbhyó ádābhyaḥ pávasvaúshadhībhyaḥ | pávasva dhisháṇābhyaḥ || 2 || tváṃ soma pávamāno víṣvāni duritā́ tara | kavíḥ sīda ní barhíshi || 3 || pávamāna svàr vido jáyamāno 'bhavo mahā́n | índo víṣvāñ abhíd asi || 4 || 16 ||

We have received wealth in thousands from rescuers and peace lovers. Swiftly runs the rescuing elixir, the giver of delight. 3

We have received from those two (1. rescuers, 2. peace lovers), thirty robes and thousand cows. Swiftly runs the rescuing elixir, the giver of delight. 4

59

O nectar of divine bliss, restrainer of sense organs against malices, winner of vigour, conquerer of all things, including covetable wealth, may you flow forth and bring us riches with progeny. 1

May your blessings flow forth with waters, flow forth through the filaments (of the ultra-psychic woollen filter); flow out of the herbs, flow onward while crushed between the stones. 2

O elixir of divine bliss, the purifier, the sage, may you help us to overcome all hindrances and be enshrined in our hearts. 3

O purifying elixir of spiritual bliss, grant all boons; from the very beginning as soon as manifest, you are great; O blissful, you overcome all (vices and adversaries). 4

(६०) षष्टितमं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य काश्यपोऽवत्सार ऋषिः । पवमानः सोमो देवता । (१-२, ४) प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्याश्च गायत्री, (३) तृतीयायाश्च पुर उष्णिक् छन्दसी ॥

॥१७॥ प्र गायत्रेण गायत पवमानं विचर्षणिम् । इन्दुं सहस्रचक्षसम् ॥१॥
तं त्वा सहस्रचक्षसमथो सहस्रभर्णसम् । अति वारमपाविषुः ॥२॥
अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति । इन्द्रस्य हार्द्याविशन् ॥३॥
इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे । प्रजावद्रेत आ भर ॥४॥

60.

Prá gāyatréṇa gāyata pávamānaṃ vícarshaṇim | índuṃ sahásracakshasam || 1 || táṃ tvā sahásracakshasam átho sahásrabharṇasam | áti vā́ram apāvishuḥ || 2 || áti vā́rān pávamāno asishyadat kaláṣāñ abhí dhāvati | índrasya hā́rdy āviṣán || 3 || índrasya soma rā́dhase ṣáṃ pavasva vicarshaṇe | prajā́vad réta ā́ bhara || 4 || 17 ||

[अथ तृतीयोऽनुवाकः ॥] (६१) एकषष्टितमं सूक्तम्

(१-३०) त्रिंशदृचस्यास्य सूक्तस्याङ्गिरसोऽमहीयुर्ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१८॥ अया वीती परि स्रव यस्त इन्दो मदेष्वा । अवाहन्नवतीर्नव ॥१॥
पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् । अध त्यं तुर्वशं यदुम् ॥२॥
परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत् । क्षरा सहस्रिणीरिषः ॥३॥

61.

Ayā́ vītī́ pári srava yás ta indo mádeshv ā́ | avā́han navatír náva || 1 || púraḥ sadyá itthā́dhiye dívodāsāya ṣámbaram | ádha tyáṃ turváṣaṃ yádum || 2 || pári ṇo áṣvam aṣvavíd gómad indo híraṇyavat | ksharā́ sahasríṇīr íshaḥ || 3 ||

60

Sing forth the spiritual hymn, the GAYATRI, to adore the Lord, who is our purifier and who sees us all with thousand eyes. 1

O thousand-eyed, and the sustainer of thousands, the pious devotees make you, O elixir, flow through the ultra-psychic filter. 2

The purifier (the love divine) trickles through the fleecy ultra-psychic filter and hastens to the receptacles of the heart and then passes on to the resplendent soul. 3

The all-beholding divine bliss flows pleasantly for the delight of our soul and nourishment with progeny. 4

61

O love divine, may you flow with that nourshing spirituality which enables the resplendent self to subdue ninety and nine strongholds of nescience in the battle of life; 1 —

—which conquers the strongholds in an instant, in the interests of the seeker of truth, the devout, and subdues the malicious, obstinate and quarrelsome tendencies. 2

O love divine, the knower of the secrets of energy, may you shower forth vigour and wisdom, riches of gold and food in boundless measures. 3

पवमानस्य ते वयं पवित्रमभ्युन्दतः । सखित्वमा वृणीमहे ॥४॥
ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया । तेभिर्नः सोम मृळय ॥५॥

pávamānasya te vayám pavítram abhyundatáḥ | sakhi-tvám á vriṇīmahe || 4 || yé te pavítram ūrmáyo 'bhikshá-ranti dhárayā | tébhir naḥ soma mṛiḷaya || 5 || 18 ||

॥१९॥ स नः पुनान आ भर रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः ॥६॥
एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् । समादित्येभिरख्यत ॥७॥
समिन्द्रेणोत वायुना सुत एति पवित्र आ । सं सूर्यस्य रश्मिभिः ॥८॥
स नो भगाय वायवे पूष्णे पवस्व मधुमान् । चारुर्मित्रे वरुणे च ॥९॥
उच्चा ते जातमन्धसो दिवि षद्भूम्या ददे । उग्रं शर्म महि श्रवः ॥१०॥

sá naḥ punāná á bhara rayím vīrávatīm ísham | īṣānaḥ soma viṣvátaḥ || 6 || etám u tyám dáṣa kshípo mṛijánti sín-dhumataram | sám ādityébhir akhyata || 7 || sám índreṇotá vāyúnā sutá eti pavítra á | sám súryasya raṣmíbhiḥ || 8 || sá no bhágāya vāyáve pūshṇé pavasva mádhumān | cárur mitré váruṇe ca || 9 || uccá te jātám ándhaso diví shád bhúmy á dade | ugrám ṣárma máhi ṣrávaḥ || 10 || 19 ||

॥२०॥ एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ॥११॥
स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परि स्रव ॥१२॥

ená víṣvāny aryá á dyumnáni mánushāṇām | síshāsanto vanāmahe || 11 || sá na índrāya yájyave váruṇāya marúd-bhyaḥ | varivovít pári srava || 12 ||

We solicit your friendship; your affection over-flows beyond the limits of the ultra-psychic filter. 4

Delight us, O divine love, with those of your undulations which flow over the ultra-psychic sieve in a stream. 5

O divine love, lord over all, the purifier, bring us riches, food and heroic progeny. 6

The ten fingers cleanse and beautify this divine elixir; the cosmic oceans are the mother of this newborn babe, which along with other children is born of the mother Eternity. 7

When effused, it proceeds to the cleansing sieve with the lightning and the wind along the path of the sun's rays. 8

May you, O sweet-flavoured and beautiful nectar, flow for our splendour, for our virile strength, for our sustenance, for our friendship and venerability. 9

High is the birth of this sap of life; though set in heaven, it has come down to the earth with strong sheltering power renown and sustenance. 10

With the aid of this (divine elixir) alone, may we procure all the wealth that belongs to men, and enjoy it not alone but distributing it judiciously among ourselves. 11

O divine elixir, the possessor of wealth as you are, may you flow from all sides for our resplendence, for our venerability and for our humanitarian character. 12

उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् । इन्दुं देवा अयासिषुः ॥१३॥
तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव । य इन्द्रस्य हृदंसनिः ॥१४॥
अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम् । वर्धा समुद्रमुक्थ्यम् ॥१५॥

úpo shú jātám aptúram góbhir bhaṅgám párishkṛitam | índum devá ayāsishuḥ || 13 || tám íd vardhantu no gíro vatsám saṃśíśvarīr iva | yá índrasya hṛidaṃsániḥ || 14 || ársha ṇaḥ soma śáṃ gáve dhukshásva pipyúshīm ísham | várdhā samudrám ukthyàm || 15 || 20 ||

॥२१॥ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् ॥१६॥
पवमानस्य ते रसो मदो राजन्नदुच्छुनः । वि वारमव्यमर्षति ॥१७॥
पवमान रसस्तव दक्षो वि राजति द्युमान् । ज्योतिर्विश्वं स्वर्दृशे ॥१८॥
यस्ते मदो वरेण्यस्तेना पवस्वान्धसा । देवावीरघशंसहा ॥१९॥
जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे । गोषा उ अश्वसा असि ॥२०॥

pávamāno ajījanad diváś citrám ná tanyatúm | jyótir vaiśvānarám bṛihát || 16 || pávamānasya te ráso mádo rājann aduchhunáḥ | ví váram ávyam arshati || 17 || pávamāna rásas táva dáksho ví rājati dyumán | jyótir víśvaṃ svàr dṛiśé || 18 || yás te mádo várenyas ténā pavasvándhasā | devāvír aghaśaṅsahá || 19 || jághnir vṛitrám amitríyam sásnir vájaṃ divé-dive | goshá u aśvasá asi || 20 || 21 ||

Sent forth by sacred waters, Nature's bounties approach this divine elixir, which is born with fullness, and is the demolisher (of evils)—the one adorned with milk and curds. 13

May our praises foster him who wins the heart of the resplendent self, as the milch cows foster their young calf. 14

O elixir of divine love, pour prosperity upon our cattle, milk forth (for us) nutritious food and augment water that merits laudation. 15

The pure elixir generates in heaven the great light, the guide of all men, as it were the marvellous thunder. 16

O bright-shining elixir, as you flow, the juice of yours enters the cosmic woollen sieve, exhilarating and free from evil. 17

O purified elixir, your juice as it collects, shines bright; it makes the pervading universal light visible. 18

Flow onward with such of your juice as is exhilarating, most excellent, dear to Nature's bounties and slayer of wicked people. 19

You are the destroyer of the hostile nescience, the enjoyer of battle day by day, the giver of wisdom and the giver of vigour. 20

॥२२॥ संमिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः । सीदञ्छ्येनो न योनिमा ॥२१॥
स पवस्व य आविथेन्द्रं वृत्राय हन्तवे । वव्रिवांसं महीरपः ॥२२॥
सुवीरासो वयं धना जयेम सोम मीढ्वः । पुनानो वर्ध नो गिरः ॥२३॥
त्वोतासस्तवावसा स्याम वन्वन्त आमुरः । सोम व्रतेषु जागृहि ॥२४॥
अपघ्नन्पवते मृधोऽप सोमो अराव्णः । गच्छन्निन्द्रस्य निष्कृतम् ॥२५॥

sánmislo arusho bhava sūpasthábhir ná dhenúbhiḥ | sídañ chyenó ná yónim ā́ || 21 || sá pavasva yá ā́vithéndram vṛitrā́ya hántave | vavriváṅsam mahī́r apáḥ || 22 || suvī́rāso vayáṃ dhánā jáyema soma mīḍhvaḥ | punānó vardha no gíraḥ || 23 || tvótāsas távávasā syā́ma vanvánta āmúraḥ | sóma vratéshu jāgṛihi || 24 || apaghnán pavate mṛídhó 'pa sómo árāvṇaḥ | gáchann índrasya nishkṛitám || 25 || 22 ||

॥२३॥ महो नो राय आ भर पवमान जही मृधः । रास्वेन्दो वीरवद्यशः ॥२६॥
न त्वा शतं चन ह्रुतो राधो दित्सन्तमा मिनन् । यत्पुनानो मखस्यसे ॥२७॥
पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने । विश्वा अप द्विषो जहि ॥२८॥
अस्य ते सख्ये वयं तवेन्दो द्युम्न उत्तमे । सासह्याम पृतन्यतः ॥२९॥

mahó no rāyá ā́ bhara pávamāna jahí mṛídhaḥ | rā́svendo vīrávad yáṣaḥ || 26 || ná tvā ṣatáṃ caná hrúto rā́dho dítsantam ā́ minan | yát punānó makhasyáse || 27 || pávasvendo vṛíshā sutáḥ kṛidhí no yaṣáso jáne | víṣvā ápa dvísho jahi || 28 || ásya te sakhyé vayáṃ távendo dyumná uttamé | sāsahyā́ma pṛitanyatáḥ || 29 ||

May you now when blended with the milk of the kine become resplendent. You alight like a falcon on your own abode. 21

Flow onward, as you have been flowing, to help the resplendent self in slaying nescience, which obstructs the flow of the great streams of pious thoughts. 22

O divine elixir of bliss, showerer of blessings and purifier, may we win wealth, beget heroic children and may you augment and accept our praises. 23

Protected by you, through your grace may we be victorious over our adversaries. O blissful Lord, may you be vigilant at our worship. 24

The elixir of divine love flows onward, chasing the malignant, and driving off the withholders of wealth and thus it proceeds to the holy abode of the resplendent Lord. 25

O drops of ambrosia, the purifier, bring to us plenty of wealth; conquer our foes; grant us fame and brave offspring. 26

O love divine, none of the hundreds of hurdles can harm you when you, pure and neat, propose to give wealth to us, benevolently inclined. 27

O mighty love divine, the showerer of benefits, may you make us celebrated amongst men and drive away all our adversaries. 28

O divine love, may we overcome them who assail us; may we enjoy your friendship, lofty and glorious. 29

या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे । रक्षा समस्य नो निदः ॥३०॥

yā́ te bhīmā́ny ā́yu-
dhā tigmā́ni sánti dhū́rvaṇe | rákshā samasya no nidáḥ
|| 30 || 23 ||

(६२) द्विषष्टितमं सूक्तम्
(१-३०) त्रिंशदृचस्यास्य सूक्तस्य भार्गवो जमदग्निर्ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥२४॥ एते असृग्रमिन्दवस्तिरः पवित्रमाशवः । विश्वान्यभि सौभगा ॥१॥
विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः । तना कृण्वन्तो अर्वते ॥२॥
कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् । इळामस्मभ्यं संयतम् ॥३॥
असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः । श्येनो न योनिमासदत् ॥४॥
शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः । स्वदन्ति गावः पयोभिः ॥५॥

62.

Eté asṛigram índavas tiráḥ pavítram āṣávaḥ | víṣvāny abhí saúbhagā || 1 || vighnánto duritā́ purú sugā́ tokā́ya vājínaḥ | tánā kṛiṇvánto árvate || 2 || kṛiṇvánto várivo gáve 'bhy àrshanti sushṭutím | íḷām asmábhyaṃ saṃyátam || 3 || ā́sāvy aṅṣúr mádāyāpsú dáksho girishṭhā́ḥ | ṣyenó ná yónim ā́sadat || 4 || ṣubhrám ándho devávātam apsú dhūtó nṛíbhiḥ sutáḥ | svádanti gā́vaḥ páyobhiḥ || 5 || 24 ||

With your weapons which are formidable for destroying the wicked, please guard us from our every foe. 30

62

These rapid streams of divine love have been directed through the cosmic filter to bring us all felicities— 1

—repelling many evils, bestowing happiness and success upon our sons and warriors. 2

They flow towards our noble eulogy, granting to (us) our cattle-sustaining wealth and food. 3

This rapid (divine elixir) like mountain-born stream of water flows for exhilaration; it alights like a falcon on his own place of stay. 4

The cows sweeten this nourishing juice, cherished by divines, with their milk. The sap-plant before being effused by the priests is cleansed in the waters. 5

॥२५॥ आदीमश्वं न हेतारोऽशूशुभन्नमृताय । मध्वो रसं सधमादे ॥६॥
यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये । ताभिः पवित्रमासदः ॥७॥
सो अर्षेन्द्राय पीतये तिरो रोमाण्यव्यया । सीदन्योना वनेष्वा ॥८॥
त्वमिन्दो परि स्रव स्वादिष्ठो अङ्गिरोभ्यः । वरिवोविद्घृतं पयः ॥९॥
अयं विचर्षणिर्हितः पवमानः स चेतति । हिन्वान आप्यं बृहत् ॥१०॥

ád īm ásvaṃ ná hétāró 'sūsubhann amrítāya | mádhvo rásaṃ sadhamáde || 6 || yás te dhárā madhuṣcútó 'sṛigram inda utáye | tábhiḥ pavítram ásadaḥ || 7 || só arshéndrāya pītáye tiró rómāṇy avyáyā | sídan yónā váneshv á || 8 || tvám indo pári srava svádishṭho áñgirobhyaḥ | varivovíd ghṛitám páyaḥ || 9 || ayáṃ vícarshaṇir hitáḥ pávamānaḥ sá cetati | hinvāná ápyam bṛihát || 10 || 25 ||

॥२६॥ एष वृषा वृषव्रतः पवमानो अशस्तिहा । करद्वसूनि दाशुषे ॥११॥
आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम् । पुरुश्चन्द्रं पुरुस्पृहम् ॥१२॥
एष स्य परि षिच्यते मर्मृज्यमान आयुभिः । उरुगायः कविक्रतुः ॥१३॥
सहस्रोतिः शतामघो विमानो रजसः कविः । इन्द्राय पवते मदः ॥१४॥

eshá vṛísha vṛíshavrataḥ pávamāno aṣastihá | kárad vásuni dasúshe || 11 || á pavasva sahasríṇaṃ rayíṃ gómantam asvínam | puruṣcandráṃ puruspṛíham || 12 || eshá syá pári shicyate marmṛijyámāna āyúbhiḥ | urugāyáḥ kavíkratuḥ || 13 || sahásrotiḥ ṣatámagho vimáno rájasaḥ kavíḥ | índrāya pavate mádaḥ || 14 ||

Then the ministering priests in the ceremony adorn this juice of the exhilarating (ambrosia) for gaining immortality, as if they are decking a horse. 6

Settle down, O elixir of divine love, on the cosmic filter with those of your streams that shower sweetness and which are poured forth for our protection. 7

Staying for some time in the wooden vessels, may you pass obliquely through the filter of woollen hairs, and hasten (O divine sap) for the enjoyment of the resplendent self. 8

O elixir of divine love, sweet and flavoured, you are the bestower of riches. We mix you with butter and milk to be offered to the fire-technicians. 9

This all-seeing flowing divine elixir, deposited on the sides of the container, furnishes us with abundant food. As a product of waters, it is known by all. 10

The flowing divine elixir, the showerer of benefits, when engaged in showering, becomes the destroyer of the obstacles and bestows riches upon the offerer of worship. 11

Pour forth thousand-fold much desired and exceedingly glorious and gladdening wealth, both of cattle and steeds. 12

This divine elixir worthy of many praises and of wise designs is effused and beautified by men. 13

This sagacious exhilarating elixir, offering thousand-fold protections and having hundred-fold wealth, is the measure of all the regions. It flows for the resplendent Lord. 14

गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते । विर्योना वसताविव ॥१५॥

girá jātá ihá stutá índur índrāya dhī-yate | vír yónā vasatáv iva || 15 || 26 ||

॥२७॥ पवमानः सुतो नृभिः सोमो वाजमिवासरत् । चमूषु शक्मनासदम् ॥१६॥
तं त्रिपृष्ठे त्रिवन्धुरे रथे युञ्जन्ति यातवे । ऋषीणां सप्त धीतिभिः ॥१७॥
तं सोतारो धनस्पृतमाशुं वाजाय यातवे । हरिं हिनोत वाजिनम् ॥१८॥
आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥१९॥
आ त इन्दो मदाय कं पयो दुहन्त्यायवः । देवा देवेभ्यो मधु ॥२०॥

pávamānaḥ sutó nríbhiḥ sómo vā́jam ivāsarat | camū́shu ṣákmanāsádam || 16 || tám triprishṭhé trivandhuré ráthe yuñ-janti yā́tave | ríshīṇām saptá dhītíbhiḥ || 17 || tám sotāro dhanaspŗítam āṣúm vā́jāya yā́tave | hárim hinota vājínam || 18 || āviṣán kaláṣam sutó víṣvā árshann abhí ṣríyaḥ | ṣū́ro ná góshu tishṭhati || 19 || ā́ ta indo mádāya kám páyo du-hanty āyávaḥ | devā́ devébhyo mádhu || 20 || 27 ||

॥२८॥ आ नः सोमं पवित्र आ सृजता मधुमत्तमम् । देवेभ्यो देवश्रुत्तमम् ॥२१॥
एते सोमा असृक्षत गृणानाः श्रवसे महे । मदिन्तमस्य धारया ॥२२॥
अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि । सनद्वाजः परि स्रव ॥२३॥

ā́ naḥ sómam pavítra ā́ srijáta mádhumattamam | de-vébhyo devaṣrúttamam || 21 || eté sómā asrikshata griṇānā́ḥ ṣrávase mahé | madíntamasya dhā́raya || 22 || abhí gávyāni vītáye nrimṇā́ punānó arshasi | sanádvājaḥ pári srava || 23 ||

This divine elixir is generated and glorified by praises at this sacrifice. It is deposited in its abode, for the resplendent Lord like a bird on its sheltering nest. 15

The pure elixir expressed by the priests speedily alights upon the sacrificial ladles, as of to battle. 16

O devotees, yoke him to the three-benched, triple-seated sacrificial chariot of the seven sages to go to Nature's divine forces. 17

O effusers, urge forward that wealth-bestowing rapid vigorous steed-like divine elixir to go to the sacrificial battle-field. 18

This elixir while effused enters into the cosmic pitcher, brings us all success and stands like a hero amidst the kine. 19

O divine elixir, the devout priests milk out your sweet juice for Nature's bounties for the purpose of exhilaration. 20

May you pour upon the cosmic filter for us and for the sake of the divine forces the most sweet-flavoured elixir of devotion, which the divine forces hear and respond to most gladly. 21

These much-lauded divine elixirs are let flow in the most exhilarating stream for the sake of obtaining abundant food. 22

In the course of purification, you hasten to cherish the treasures of kine (of wisdom); may you flow hitherward to grant us nourishment. 23

उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः । गृणानो जमदग्निना ॥२४॥
पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः । अभि विश्वानि काव्या ॥२५॥

utá no gómatīr ísho víṣvā arsha parishṭúbhaḥ | griṇānó jamádagninā || 24 || pávasva vāćó agriyáḥ sóma citrábhir ūtíbhiḥ | abhí víṣvāni kávyā || 25 || 28 ||

॥२९॥ त्वं समुद्रिया अपोऽग्रियो वाच ईरयन् । पवस्व विश्वमेजय ॥२६॥
तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे । तुभ्यमर्षन्ति सिन्धवः ॥२७॥
प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः । अभि शुक्रामुपस्तिरम् ॥२८॥

tvam samudríyā apó 'griyó váca īráyan | pávasva viṣvamejaya || 26 || túbhyemá bhúvanā kave mahimné soma tasthire | túbhyam arshanti síndhavaḥ || 27 || prá te divó ná vrishṭáyo dhárā yanty asaṣcátaḥ | abhí ṣukrám upastíram || 28 ||

इन्द्रायेन्दुं पुनीतनोग्रं दक्षाय साधनम् । ईशानं वीतिराधसम् ॥२९॥
पवमान ऋतः कविः सोमः पवित्रमासदत् । दधत्स्तोत्रे सुवीर्यम् ॥३०॥

índrāyéndum punītanográm dákshāya sádhanam | īṣa-nám vītírādhasam || 29 || pávamana ritáḥ kavíḥ sómaḥ pavítram ásadat | dádhat stotré suvíryam || 30 || 29 ||

And being praised by a person of spiritual blaze, hasten towards us for giving all widely-renowned food and cattle. 24

O foremost leader, may your divine love flow with your marvellous protections towards our praises, towards all our hymns of praise. 25

May you, as a leading inspirer of the lyrics, raising your voice, pour forth the waters of the firmament. 26

O poet of penetrating vision, in your might, these worlds stand firm; and the cosmic rivers flow to pay homage to you. 27

Your streams perpetually flow like showers of rain that fall from heaven upon the white fleece spread under them. 28

May you purify the strong and effectual elixir, the lord of treasures, the giver of enjoyment to the person of resplendence. 29

The flowing divine love, the truth personified and of penetrating vision, is spread all over the cosmic filter, giving great vigour to the worshipper. 30

(६३) त्रिषष्टितमं सूक्तम्

(१-३०) त्रिंशदृचस्यास्य सूक्तस्य काश्यपो निध्रुविर्ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥३०॥ आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् । अस्मे श्रवांसि धारय ॥१॥
इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः । चमूष्वा नि षीदसि ॥२॥
सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् । मधुमाँ अस्तु वायवे ॥३॥
एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः । सोमा ऋतस्य धारया ॥४॥
इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्यम् । अपघ्नन्तो अराव्णः ॥५॥

63.

Ā́ pavasva sahasríṇam rayím soma suvíryam | asmé ṣrávāṅsi dhāraya || 1 || ísham ū́rjam ca pinvasa índrāya matsaríntamaḥ | camū́shv ā́ ní shīdasi || 2 || sutá índrāya víshṇave sómaḥ kaláṣe aksharat | mádhumāñ astu vāyáve || 3 || eté asṛigram āṣávó 'ti hvárāṅsi babhrávaḥ | sómā ṛitásya dhā́rayā || 4 || índram várdhanto aptúraḥ kṛiṇvánto víṣvam ā́ryam | apaghnánto árāvṇaḥ || 5 || ३० ||

॥३१॥ सुता अनु स्वमा रजोऽभ्यर्षन्ति बभ्रवः । इन्द्रं गच्छन्त इन्दवः ॥६॥
अया पवस्व धारया यया सूर्यमरोचयः । हिन्वानो मानुषीरपः ॥७॥
अयुक्त सूर एतशं पवमानो मनावधि । अन्तरिक्षेण यातवे ॥८॥

sutā́ ánu svám ā́ rájo 'bhy àrshanti babhrávaḥ | índram gáchanta índavaḥ || 6 || ayā́ pavasva dhā́rayā yáyā sū́ryam árocayaḥ | hinvānó mā́nushīr apáḥ || 7 || áyukta sū́ra étaṣam pávamāno manā́v ádhi | antárikshena yā́tave || 8 ||

63

O Lord of divine bliss, pour upon us thousand-fold wealth; grant excellent progeny and secure ample food for us. 1

You are most exhilarating, and effuse out nourishment and vigour for the resplendent self. You have your seat in the cups (of the worldly regions). 2

The elixir of divine love is effused for the sake of resplendence and omnipresence, as well as for superactivity; it drops into the cosmic pitcher in the most sweet-flavoured form. 3

These swift—flowing saps of elixir, brown in hue, associated with a stream of water, have been flowing ahead incessantly through obstinate channels. 4

Augmenting the strength of respledent self, urging the waters and rejuvenating all noble acts and destroying the infidels— 5

—the effused richly-coloured cosmic divine elixirs flow to the resplendent self and then hasten back to their place of origin. 6

O Lord of divine elixir, may your blessings flow with that stream wherewith you lighten up the sun and urge on the waters beneficial to man. 7

The purified elixir harnesses the courser of the sun to travel through the firmament, and reach man. 8

उत त्या हरितो दश सूरो अयुक्त यातवे । इन्दुरिन्द्र इति ब्रुवन् ॥९॥
परीतो वायवे सुतं गिर इन्द्राय मत्सरम् । अव्यो वारेषु सिञ्चत ॥१०॥

utá tyā́ haríto dáśa sū́ro ayukta yā́tave | índur índra ít bruván || 9 || párītó vāyáve sutám gíra índrāya matsarám | ávyo vā́reshu siñcata || 10 || 31 ||

॥३२॥ पवमान विदा रयिमस्मभ्यं सोम दुष्टरम् । यो दूणाशो वनुष्यता ॥११॥
अभ्यर्ष सहस्रिणं रयिं गोमन्तमश्विनम् । अभि वाजमुत श्रवः ॥१२॥
सोमो देवो न सूर्योऽद्रिभिः पवते सुतः । दधानः कलशे रसम् ॥१३॥
एते धामान्यार्या शुक्रा ऋतस्य धारया । वाजं गोमन्तमक्षरन् ॥१४॥
सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः । पवित्रमत्यक्षरन् ॥१५॥

pávamāna vidā́ rayím asmábhyaṃ soma dushṭáram | yó dūṇā́śo vanushyatā́ || 11 || abhy àrsha sahasríṇaṃ rayíṃ gómantam aśvínam | abhí vā́jam utá śrávaḥ || 12 || sómo devó ná sū́ryó 'dribhiḥ pavate sutáḥ | dádhānaḥ kaláśe rásam || 13 || eté dhā́māny ā́ryā śukrā́ ṛitásya dhā́rayā | vā́jaṃ gómantam aksharan || 14 || sutā́ índrāya vajríṇe sómāso dádhyāśiraḥ | pavítram áty aksharan || 15 || 32 ||

॥३३॥ प्र सोम मधुमत्तमो राये अर्ष पवित्र आ । मदो यो देववीतमः ॥१६॥
तमी मृजन्त्यायवो हरिं नदीषु वाजिनम् । इन्दुमिन्द्राय मत्सरम् ॥१७॥

prá soma mádhumattamo rāyé arsha pavítra ā́ | mádo yó devavī́tamaḥ || 16 || tám ī mṛijanty āyávo hárim nadī́shu vājínam | índum índrāya matsarám || 17 ||

The sweet-natured one harnesses the ten horses and exclaiming "O Indra! O Indra!" (O Lord of resplendence!) proceeds towards the sun. 9

O worshippers, pour the divine exhilarating elixir of devotion, effused althrough in all directions, upon the cosmic woollen filter for the sake of superactivity and resplendence. 10

O purified elixir, grant us unassailable wealth, not to be destroyed by our foes. 11

With your stream bring to us thousand-fold wealth of kine and steeds; bring us vigour and renown. 12

This divine elixir when effused flows on his way like the radiant sun pouring its divine essence in the cosmic bowl of universe. 13

These brilliant divine drops have poured for us the eternal truths in a stream of solemn sacrifice assuring for us the prosperity of food and cattle. 14

The divine elixir mixed with curds flows through the cosmic filter and is dedicated to the resplendent Lord, the wielder of the thunderbolt. 15

O Lord of divine elixir, pour into the cosmic filter (the sap of spirituality) to bring us wealth which is most sweet-flavoured, exhilarating and most desired by Nature's bounties. 16

The priests cleanse in the cosmic sacred waters the green-tinted, powerful, exhilarating elixir in dedication to the resplendent Lord. 17

आ पंवस्व हिरंण्यवदश्वांवत्सोम वीरवंत् । वाजं गोमंन्तमा भंर ॥१८॥
परिं वाजे न वाजयुमव्यो वारेंषु सिञ्चत । इन्द्रांय मधुमत्तमम् ॥१९॥
कविं मृजन्ति मर्ज्यं धीभिर्विप्रां अवस्यवंः । वृषा कनिक्रदर्षति ॥२०॥

á pavasva híranyavad áṣvavat soma vīrávat | vájam gómantam á bhara || 18 || pári váje ná vajayúm ávyo váreshu siñcata | índrāya mádhumattamam || 19 || kavím mṛijanti márjyam dhībhír vípra avasyávaḥ | vṛísha kánikrad arshati || 20 || ३ ||

॥३४॥ वृषंणं धीभिरप्तुरं सोमंमृतस्य धारंया । मती विप्राः समंस्वरन् ॥२१॥
पवंस्व देवायुषगिन्द्रं गच्छतु ते मदः । वायुमा रोंह धर्मणा ॥२२॥
पवंमान नि तोंशसे रयिं सोम श्रवाय्यंम् । प्रियः संमुद्रमा विंश ॥२३॥
अपघ्नन्पंवसे मृधः क्रतुवित्सोम मत्सरः । नुदस्वादेवयुं जनंम् ॥२४॥
पवंमाना असृक्षत सोमाः शुक्रास इन्दंवः । अभि विश्वानि काव्यां ॥२५॥

vṛíshaṇam dhībhír aptúram sómam ṛitásya dhárayā | matí víprāḥ sám asvaran || 21 || pávasva devāyushág índram gachatu te mádaḥ | vayúm á roha dhármaṇā || 22 || pávamāna ní toṣase rayím soma ṣraváyyam | priyáḥ samudrám á viṣa || 23 || apaghnán pavase mṛídhaḥ kratuvít soma matsaráḥ | nudásvádevayum jánam || 24 || pávamānā asṛikshata sómaḥ ṣukrása índavaḥ | abhí víṣvāni kávya || 25 || ४ ||

O Lord of divine elixir, may you grant wealth of gold, horses, and brave offspring; also bring us nourishment and cattle. 18

Sprinkle and filter the sweetest elixir upon the cosmic woollen sieve for the resplendent self, seeking success in a battle and the succeeding battles. 19

The worshippers desiring protection cleanse with their fingers and adorn the purifiable divine elixir of penetrating vision, and then, with characteristic sounds, the elixir, the showerer of blessings flows onwards. 20

The wise priests with their fingers cleanse under a stream of water (the stems of the elixir plant) and proceed further for the effusion of the sap with hymns of praise and the juice comes out with a roar. 21

Flow, O brilliant elixir; let your exhilarating juice proceed intermittently to the resplendent Lord and rise with your supporting juice to superactivity. 22

O purified divine elixir, you squeeze forth the celebrated riches of the enemy; may you, O beloved, enter the ocean. 23

O divine elixir, you who are exhilarating, flow onwards and defeat the enemies. Please bestow knowledge on us; may you drive off the people who do not respond to Nature's bounties (i. e. to law and order). 24

The brilliant purified divine elixirs have been pouring forth amidst divine praises. 25

॥३५॥ पर्वमानास आशर्वः शुभ्रा असृग्रमिन्दर्वः । घ्नन्तो विश्वा अप द्विषः ॥२६॥
पर्वमाना द्विवस्पर्यन्तरिक्षादसृक्षत । पृथिव्या अधि सानवि ॥२७॥
पुनानः सोम धारयेन्दो विश्वा अप स्रिधः । जहि रक्षांसि सुक्रतो ॥२८॥
अपघ्नन्त्सोम रक्षसोऽभ्यर्ष कनिक्रदत् । द्युमन्तं शुष्ममुत्तमम् ॥२९॥
अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा । इन्दो विश्वानि वार्या ॥३०॥

pávamānasa āṣávaḥ ṣubhrá asṛigram índavaḥ | ghnánto víṣvā ápa dvíshaḥ || 26 || pávamana divás páry antárikshad asṛikshata | pṛithivyá ádhi sánavi || 27 || punānáḥ soma dhárayéndo víṣvā ápa srídhaḥ | jahí rákshāṅsi sukrato || 28 || apaghnán soma rakshâso 'bhy àrsha kánikradat | dyumántam ṣúshmam uttamám || 29 || asmé vásūni dhāraya sóma divyáni párthivā | índo víṣvāni várya || 30 || 35 ||

(६४) चतुःषष्टितमं सूक्तम्

(१-३०) त्रिंशदृचस्यास्य सूक्तस्य मारीचः कश्यप ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥३६॥ वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥१॥
वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः । सत्यं वृषन्वृषेदसि ॥२॥
अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः । वि नो राये दुरो वृधि ॥३॥

64.

Vṛísha soma dyumáṅ asi vṛísha deva vṛíshavrataḥ | vṛíshā dhármāṇi dadhishe || 1 || vṛíshṇas te vṛíshṇyam ṣávo vṛíshā vánam vṛísha mádaḥ | satyám vṛishan vṛishéd asi || 2 || áṣvo ná cakrado vṛíshā sám gá indo sám árvataḥ | ví no rāyé dúro vṛidhi || 3 ||

The purified elixir, swift and bright, is flowing forth driving off all adversaries. 26

The purified elixirs are poured forth from heaven and from heaven and from the firmament upon the summit of the earth. 27

O brilliant divine Lord of elixir, may you let off the elixir purified in a stream, achieving great acts and may you destroy every adversity and obstacle. 28

Driving the evils far off, may you pour forth the divine brilliant and excellent elixir with splendid roar and strength. 29

Bestow upon us, O blissful Lord, the celestial and terrestrial treasures and give us, O benign and benevolent, all boons worth cherishing. 30

64

O Lord of divine love, you are bright and consecrating; O showerer, consecration by sprinkling is your sacred privilege; O showerer, you sustain eternal law and order. 1

O showerer, your strength consists in showering; your worship consists in showering; your joice consists in showing; O showerer, truly you alone are a 'showerer', a vṛsa. 2

O blissful Lord, the showerer, you neigh like a horse; you give us cattle; you give us horses and open the doors for our wealth. 3

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ॥४॥
शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः । पवन्ते वारे अव्यये ॥५॥

ásrikshata prá vājíno gavyá sómāso asvayá | ṣukráso vīrayáṣávaḥ || 4 || ṣumbhámānā ṛitāyúbhir mṛijyámānā gábhastyoḥ | pávante váre avyáye || 5 || 36 ||

॥३७॥ ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा । पवन्तामान्तरिक्ष्या ॥६॥
पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत । सूर्यस्येव न रश्मयः ॥७॥
केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि । समुद्रः सोम पिन्वसे ॥८॥
हिन्वानो वाचमिष्यसि पवमान विधर्मणि । अक्रान्देवो न सूर्यः ॥९॥
इन्दुः पविष्ट चेतनः प्रियः कवीनां मती । सृजदश्वं रथीरिव ॥१०॥

té víṣvā dāṣúshe vásu sóma divyáni párthivā | pávantām ántárikshyā || 6 || pávamanasya viṣvavit prá te sárga asṛikshata | sū́ryasyeva ná raṣmáyaḥ || 7 || ketúm kriṇván divás pári víṣvā rūpā́bhy àrshasi | samudráḥ soma pinvase || 8 || hinvānó vā́cam ishyasi pávamāna vídharmaṇi | ákrān devó ná sū́ryaḥ || 9 || índuḥ pavishṭa cétanaḥ priyáḥ kavīnā́m matí | sṛijád áṣvaṃ rathír iva || 10 || 37 ||

The powerful, brilliant, rapid divine elixirs are effused in the hope of obtaining cattle, horses and brave offspring. 4

The divine juices are beautified by holy worshippers engaged in selfless sacrifices and cleansed by their hands. May you flow through all the woollen ultra-psychic filters. 5

May those divine juices pour forth for the offerer of libations all the treasures of heaven and earth and of the firmament. 6

O all-beholding Lord of elixir, the streams of your divine sap is being constantly purified and is ever sent forth like the rays of the sun. 7

O Lord of elixir, the divine bliss, you are the ocean, bestowing knowledge; your elixir hastens from heaven to all our various forms and bestows (on us all types of blessings). 8

O Lord, when your purified elixir is poured forth in streams, it neighs in loving sounds; like the bright sun, it moves through the supporting filters. 9

This divine elixir, the enlightener, the beloved, flows forth, whilst the sages are reciting the praise-hymns; it lets loose (his wave) as a charioteer loosens his horse— 10

॥३८॥ ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत् । सीदन्नृतस्य योनिमा ॥११॥
स नो अर्ष पवित्र आ मदो यो देववीतमः । इन्दविन्द्राय पीतये ॥१२॥
इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ॥१३॥
पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः । हरे सृजान आशिरम् ॥१४॥
पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् । द्युतानो वाजिभिर्यतः ॥१५॥

ūrmír yás te pavítra ā́ devāvī́ḥ paryáksharat | sī́dann ṛitásya yónim ā́ || 11 || sá no arsha pavítra ā́ mádo yó devavī́tamaḥ | índav índrāya pītáye || 12 || ishé pavasva dhā́rayā mṛijyámāno manīshíbhiḥ | índo rucā́bhí gā́ ihi || 13 || punānó várivas kṛidhy ū́rjaṃ jánāya girvaṇaḥ | háre sṛijāná āṣíram || 14 || punānó devávītaya índrasya yāhi nishkṛitám | dyutānó vājíbhir yatáḥ || 15 || 38 ||

॥३९॥ प्र हिन्वानास इन्दवोऽच्छा समुद्रमाशवः । धिया जूता असृक्षत ॥१६॥
मर्मृजानास आयवो वृथा समुद्रमिन्दवः । अग्मन्नृतस्य योनिमा ॥१७॥
परि णो याह्यस्मयुर्विश्वा वसून्योजसा । पाहि नः शर्म वीरवत् ॥१८॥
मिमाति वह्निरेतशः पदं युजान ऋक्वभिः । प्र यत्समुद्र आहितः ॥१९॥

prá hinvānā́sa índavó 'chā samudrám āṣávaḥ | dhiyā́ jūtā́ asṛikshata || 16 || marmṛijānā́sa āyávo vṛíthā samudrám índavaḥ | ágmann ṛitásya yónim ā́ || 17 || pári ṇo yāhy asmayúr víṣvā vásūny ójasā | pāhí naḥ ṣárma vīrávat || 18 || mímāti váhnir étaṣaḥ padáṃ yujāná ṛíkvabhiḥ | prá yát samudrá ā́hitaḥ || 19 ||

—your wave which devoted to Nature's bounties flows to the cosmic filter, alighting upon the place of universal sacrifice. 11

O divine elixir, exhilarating and most devoted to the divine forces, hasten to the ultra-psychic filter for the resplendent self to assimilate. 12

O holy water, cleansed by the priests, may you flow a stream for our sustenance and with fodder go to the cattle. 13

The green-tinted blissful elixir, lauded by hymns, is mixed with the curds and milk and then purified; it bestows wealth and food upon the worshipper. 14

Purified for the banquet of Nature's bounties, go to the radiant region of the resplendent self, guided by the vigorous and strong. 15

The rapid saps of divine elixir are sent towards the firmament. They are effused by the fingers and thence poured forth. 16

The swift vapours being cleansed approach the firmament without any effort; they go to the original abode of the eternal truth. 17

O divine elixir, our faithful friend, gaurd all our treasures with your might; guard hero-like our sheltering home. 18

The horse of burden neighs, harnessed by the priests to the sacrifice. It moves well-guarded to the sea (the lake, vat or reservoir) 19

आ यद्योनिं हिरण्ययमाशुर्ऋतस्य सीदति । जहात्यप्रचेतसः ॥२०॥

á yád yónim hiraṇyáyam āṣúr ṛitásya sídati | jáhāty ápracetasaḥ || 20 || 39 ||

॥३८॥ अभि वेना अनूषतेयक्षन्ति प्रचेतसः । मज्जन्त्यविचेतसः ॥२१॥
इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः । ऋतस्य योनिमासदम् ॥२२॥
तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः । सं त्वा मृजन्त्यायवः ॥२३॥
रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे । पवमानस्य मरुतः ॥२४॥
त्वं सोम विपश्चितं पुनानो वाचमिष्यसि । इन्दो सहस्रभर्णसम् ॥२५॥

abhí vená anūshatéyakshanti prácetasaḥ | májjanty ávicetasaḥ || 21 || índrāyendo marútvate pávasva mádhumattamaḥ | ṛitásya yónim āsádam || 22 || táṃ tvā víprā vacovídaḥ párish kṛiṇvanti vedhásaḥ | sáṃ tvā mṛijanty āyávaḥ || 23 || rásaṃ te mitró aryamá píbanti váruṇaḥ kave | pávamānasya marútaḥ || 24 || tváṃ soma vipaṣcítam punānó vácam ishyasi | índo sahásrabharṇasam || 25 || 40 ||

॥३९॥ उतो सहस्रभर्णसं वाचं सोम मखस्युवम् । पुनान इन्दवा भर ॥२६॥
पुनान इन्दवेषां पुरुहूत जनानाम् । प्रियः समुद्रमा विश ॥२७॥
दविद्युतत्या रुचा परिष्टोभन्त्या कृपा । सोमाः शुक्रा गवाशिरः ॥२८॥
हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत् । सीदन्तो वनुषो यथा ॥२९॥

utó sahásrabharṇasaṃ vácaṃ soma makhasyúvam | punāná indav á bhara || 26 || punāná indav eshām púruhūta jánānām | priyáḥ samudrám á viṣa || 27 || dávidyutatyā rucá parishṭóbhantyā kṛipá | somáḥ ṣukrá gávāṣiraḥ || 28 || hinvānó hetṛíbhir yatá á vájaṃ vājy àkramīt | sídanto vanúsho yathā || 29 ||

whilst the swift elixir gladly accepts a place on the golden seat of the sacrificer devoted to truth, it leaves far away the foolish, the infidel. 20

Devoted worshippers glorify the divine elixir; the prudent persons cherish to perform the sacrifice; down sinks the one, mentally-perverted. 21

Flow, O drops of elixir, sweet-flavoured, for the resplendent self. Flow for men in general. Take your proper place in the spiritual sacrifice. 22

The wise performers of pious acts, well-acquainted with the holy love, adorn you; may men skilled in the art, consecrate you. 23

The supra-instincts of friendliness, justice, venerability and humanity, enjoy the holy spiritual sap whilst it drops. 24

Brilliant elixir of bliss, while being filtered and purified, you have been uttering words feeding thousands. 25

O brilliant elixir, when purified bring for our guidance a clear voice of conscience that may feed thousands craving for prosperity. 26

O elixir, invoked by many, you have been purified and are now cherished by these your worshippers; may you enter the firmament (of their hearts). 27

The bright holy juices with their shining radiance and resounding stream are blended with the milk and curds. 28

The powerful elixir urged by the enthusiast devotees goes collected to the battle like warriors as they stand arrayed. 29

ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः । पवस्व सूर्यो दृशे ॥३०॥

ṛidhák soma svastáye saṃjagmānó diváḥ ka-
víḥ | pávasva sū́ryo dṛiśé || 30 || 41 ||

(६५) पञ्चषष्टितमं सूक्तम्

(१-३०) त्रिंशदृचस्यास्य सूक्तस्य वारुणिर्भृगुर्भार्गवो जमदग्निर्वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

॥१॥ हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् । महामिन्दुं महीयुवः ॥१॥
पवमान रुचारुचा देवो देवेभ्यस्परि । विश्वा वसून्या विश ॥२॥
आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः । इषे पवस्व संयतम् ॥३॥

65.

Hinvánti sū́ram úsrayaḥ svásāro jāmáyas pátim | ma-
hā́m índum mahīyúvaḥ || 1 || pávamāna rucā́-rucā devó de-
vébhyas pári | víśva vásūny ā́ viśa || 2 || ā́ pavamāna sushṭu-
tíṃ vṛishṭíṃ devébhyo dúvaḥ | ishé pavasva saṃyátam
|| 3 ||

वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे । पवमान स्वाध्यः ॥४॥
आ पवस्व सुवीर्यं मन्दमानः स्वायुध । इहो ष्विन्दवा गहि ॥५॥

vṛíshā hy ási bhānúnā dyumántaṃ tvā havāmahe | pá-
vamāna svādhyàḥ || 4 || ā́ pavasva suvíryam mándamānaḥ
svāyudha | ihó shv indav ā́ gahi || 5 || 1 ||

O divine elixir of bliss, mighty and prospering, come like a sagacious blessing from heaven for our prosperity, like the sun for our vision. 30

65

The glittering-maidens, the (ten) sister-fingers, of close-birth work side by side for the effusion of bliss-giving elixir,—the impeller and invigorator, mighty and Lord of all. 1

O filtered and purified elixir, shining with reiterated radiance at the top of Nature's all bounties, may you enter into all blessings of prosperity. 2

O purified and filtered elixir, pour on us a well-praised shower in dedication to Nature's bounties: pour a continual shower for our nourishment. 3

We, the performers of noble selfless works, praise you, O purified elixir, brilliant with radiance. Verily, you are the showerer of blessings. 4

May you, O nobly-armed, pour upon us creative virility. O divine elixir, may you come to us with your favours. 5

॥२॥ यद॒द्भिः प॑रिषि॒च्यसे॑ मृ॒ज्यमा॑नो॒ गभ॑स्त्योः । द्रुणा॑ स॒धस्थ॑मश्नुषे ॥६॥
प्र सोमा॑य व्यश्व॒वत्पव॑मानाय गायत । म॒हे स॒हस्र॑चक्षसे ॥७॥
यस्य॒ वर्णं॑ मधु॒श्चुतं॒ हरिं॑ हि॒न्वन्त्यद्रि॑भिः । इन्दु॒मिन्द्रा॑य पी॒तये॑ ॥८॥
तस्य॑ ते वा॒जिनो॑ व॒यं विश्वा॒ धना॑नि जि॒ग्युषः॑ । स॒खि॒त्वमा वृ॑णीमहे ॥९॥
वृषा॑ पवस्व॒ धार॑या म॒रुत्व॑ते च मत्स॒रः । विश्वा॒ दधा॑न॒ ओज॑सा ॥१०॥

yád adbhíḥ parishicyáse mṛijyámāno gábhastyoḥ | drúṇā sadhástham aṣnushe || 6 || prá sómāya vyaṣvavát pávamānāya gāyata | mahé sahásracakshase || 7 || yásya várṇam madhuṣcútam hárim hinvánty ádribhiḥ | índum índrāya pītáye || 8 || táṣya te vājíno vayám víṣvā dhánāni jigyúshaḥ | sakhitvám ā́ vṛiṇīmahe || 9 || vṛíshā pavasva dhárayā marútvate ca matsaráḥ | víṣvā dádhāna ójasā || 10 || 2 ||

॥३॥ तं त्वा॑ ध॒र्तार॑मो॒ण्यो३॒ः पव॑मान स्व॒र्दृश॑म् । हि॒न्वे वाजे॑षु वा॒जिन॑म् ॥११॥
अ॒या चि॒त्तो वि॒पान॑या॒ हरिः॑ पवस्व॒ धार॑या । युजं॒ वाजे॑षु चोदय ॥१२॥
आ न॑ इन्दो म॒हीमिषं॒ पव॑स्व वि॒श्वद॑र्शतः । अ॒स्मभ्यं॑ सोम गातु॒वित् ॥१३॥

táṃ tvā dhartā́ram oṇyòḥ pávamāna svardṛíṣam | hinvé vā́jeshu vājínam || 11 || ayā́ cittó vipā́nayā háriḥ pavasva dhā́rayā | yújaṃ vā́jeshu codaya || 12 || ā́ na indo mahím ísham pávasva viṣvádarṣataḥ | asmábhyaṃ soma gātuvít || 13 ||

When rubbed and cleansed by the hands, you are blended with consecrated waters; you find your abode in the wooden vats in which you are collected. 6

May you like previous holy chanters sing to the glory of the supreme Lord of divine elixir, the Lord who is great, and all-beholding with his thousands of eyes— 7

—the elixir, honey-dropping, foe-repelling and of pleasing colour. Whom they squeeze out with stones (of hard work and perseverance) for the sake of the resplendent self. 8

We solicit the friendly love of you, O strong, mighty and winner of all the riches. 9

May you, O showerer of benefits, flow in a stream for inspiring mortal men in general and grant us riches by your superior might. 10

You are the sustainer of heaven and earth; O all pure and sanctified, you are the beholder of heaven and extremely powerful. I impel you to participate in our battle (against all odds of life). 11

Cleansed, effused and expressed by my tender fingers, you come out fresh and pleasing in colour, flow forth in a stream and impel (the resplendent self), our ally, for success in life's struggle. 12

O swift-flowing divine elixir, the illuminator of the universe, pour down upon us abundant food and be to us the revealer of the path (to heaven). 13

आ कलशा अनूषतेन्दो धाराभिरोजसा । एन्द्रस्य पीतये विश ॥१४॥
यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः । स पवस्वाभिमातिहा ॥१५॥

á kaláṣā anūshaténdo dhā́rābhir ójasā | éndrasya pītáye viṣa || 14 || yásya te mádyam rásam tīvrám duhánty ádribhiḥ | sá pavasvābhimātihā́ || 15 || 3 ||

॥३॥ राजा मेधाभिरीयते पवमानो मनावधि । अन्तरिक्षेण यातवे ॥१६॥
आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम् । वहा भगत्तिमूतये ॥१७॥
आ नः सोम सहो जुवो रूपं न वर्चसे भर । सुष्वाणो देववीतये ॥१८॥
अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् । सीदञ्छ्येनो न योनिमा ॥१९॥
अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः । सोमो अर्षति विष्णवे ॥२०॥

rā́jā medhā́bhir īyate pávamāno manā́v ádhi | antárikshena yā́tave || 16 || ā́ na indo ṣatagvínam gávām pósham svā́ṣvyam | váhā bhágattim ūtáye || 17 || ā́ naḥ soma sáho júvo rūpám ná várcase bhara | sushvāṇó devávītaye || 18 || árshā soma dyumáttamo 'bhí dróṇāni róruvat | sī́dañ chyenó ná yónim ā́ || 19 || apsā́ índrāya vāyáve váruṇāya marúdbhyaḥ | sómo arshati víshṇave || 20 || 4 ||

॥४॥ इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणम् ॥२१॥
ये सोमासः परावति ये अर्वावति सुन्विरे । ये वादः शर्यणावति ॥२२॥

ísham tokā́ya no dádhad asmábhyam soma viṣvátaḥ | ā́ pavasva sahasríṇam || 21 || yé sómāsaḥ parāváti yé arvāváti sunviré | yé vādáḥ ṣaryaṇā́vati || 22 ||

O elixir of divine love, they praise the ultra-psychic receptacles together with your sublime streams of elixir; may you enter the streams so that the resplendent self may relish it. 14

The priests express with stones of austerity the sharp exhilarating elixir, which is the destroyer of the evil-minded. 15

The radiant elixir purified at the place of worship is implored with holy songs by the priests to pass through the firmament (of inner consciousness). 16

O divine elixir, bring to us for our protection increase of kine with hundreds of other cattle including beautiful horses and a gift of prosperity. 17

O divine elixir, expressed for the banquet of our organs of sensation, bestow on us strength, speed and a form for brilliance. 18

Hasten, most radiant divine elixir, with a roar to the ultra-psychic receptacles, as a hawk flying to its nest. 19

The divine elixir, the enjoyer of the water, hastens to the ultra-psychic containers for resplendence, activity, venerability, for human characteristics, and for pervasiveness. 20

O elixir, bestowing food upon our children, may you pour from all quarters thousand-fold riches. 21

May those divine bliss-giving spiritual juices which are effused at a distance or nigh or in the ultra-conscious cavity of heart,— 22

य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् । ये वा जनेषु पञ्चसु ॥२३॥
ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ॥२४॥
पवते हर्यतो हरिर्गृणानो जमदग्निना । हिन्वानो गोरधि त्वचि ॥२५॥

yá ārjīkéshu kṛítvasu
yé mádhye pastyā̀nām | yé vā jáneshu pañcásu || 23 || té no vṛishṭíṃ divás pári pávantām ā́ suvíryam | suvānā́ devā́sa índavaḥ || 24 || pávate haryató hárir gṛiṇānó jamádagninā | hinvānó gór ádhi tvací || 25 || 5 ||

॥६॥ प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः । श्रीणाना अप्सु मृञ्जत ॥२६॥
तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये । स पवस्वानया रुचा ॥२७॥
आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पान्तमा पुरुस्पृहम् ॥२८॥
आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम् । पान्तमा पुरुस्पृहम् ॥२९॥
आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा । पान्तमा पुरुस्पृहम् ॥३०॥

prá ṣukrā́so vayojúvo hinvānā́so ná sáptayaḥ | ṣrīṇānā́ apsú mṛiñjata || 26 || táṃ tvā sutéshv ābhúvo hinviré devátātaye | sá pavasvānáyā rucā́ || 27 || ā́ te dáksham mayobhúvaṃ váhnim adyā́ vṛiṇīmahe | pā́ntam ā́ puruspṛ́ham || 28 || ā́ mandrám ā́ váreṇyam ā́ vípram ā́ manīshíṇam | pā́ntam ā́ puruspṛ́ham || 29 || ā́ rayím ā́ sucetúnam ā́ sukrato tanū́shv ā́ | pā́ntam ā́ puruspṛ́ham || 30 || 6 ||

—or amongst the straight forward tendencies, or in super-activity in the neighbourhood of the spiritual ultra-streams of consciousness or in the five categories of mankind— 23

—may those celestial elixirs when expressed, pour down upon us from celestial heavenly region and furnish us heroic children. 24

The delightful elixir of pleasing colour, admired by organs of eye, is impelled to flow on cow-hide filter to the receptacles. 25

The bright herbal plants of divine elixirs are the dispensers of food. They are cleansed under the waters iike horses urged by the charioteers, and the filtered juice is then mixed with the milk and curds for consecration. 26

The priests who are present send you forth at the rites at which you are effused for the entire divine forces; may you flow with this splendour. 27

We depend on your strength today and ever; you are the source of happiness, the bearer of good things, the defender (against evils) and evokedby many; — 28

—exhilarating, worthy of choice, the wise, the intelligent, the defender, and coveted by all—; 29

(We choose you; we come to you), O most efficient, for your wealth and spiritual wisdom; and for your posterity. You are the defender and coveted by all. 30

(६६) षट्षष्टितमं सूक्तम्

(१-३०) त्रिंशदृचस्यास्य सूक्तस्य शतं वैखानसा ऋषयः । (१-१८, २२-३०) प्रथमाद्यष्टादशर्चां द्वाविंश्यादि-
नवानाञ्च पवमानः सोमः, (१९-२१) एकोनविंश्यादितृचस्य च पवमानोऽग्निर्देवते ।
(१-१७, १९-३०) प्रथमादिसप्तदशर्चामेकोनविंश्यादिद्वादशानाञ्च गायत्री,
(१८) अष्टादश्याश्चानुष्टुप् छन्दसी ॥

॥७॥ पवस्व विश्वचर्षणेऽभि विश्वानि काव्या । सखा सखिभ्य ईड्यः ॥१॥
ताभ्यां विश्वस्य राजसि ये पवमान धामनी । प्रतीची सोम तस्थतुः ॥२॥
परि धामानि यानि ते त्वं सोमासि विश्वतः । पवमान ऋतुभिः कवे ॥३॥
पवस्व जनयन्निषोऽभि विश्वानि वार्या । सखा सखिभ्य ऊतये ॥४॥
तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते । पवित्रं सोम धामभिः ॥५॥

66.

Pávasva viṣvacarshaṇe 'bhí víṣvāni kā́vyā | sákhā sákhibhya ī́ḍyaḥ || 1 || tā́bhyām víṣvasya rājasi yé pavamāna dhā́manī | pratīcī́ soma tasthátuḥ || 2 || pári dhā́māni yā́ni te tvám somāsi viṣvátaḥ | pávamāna ṛitúbhiḥ kave || 3 || pávasva janáyann ísho 'bhí víṣvāni vā́ryā | sákhā sákhibhya ūtáye || 4 || táva ṣukráso arcáyo divás prishṭhé ví tanvate | pavítram soma dhā́mabhiḥ || 5 || 7 ||

॥८॥ तवेमे सप्त सिन्धवः प्रशिषं सोम सिस्रते । तुभ्यं धावन्ति धेनवः ॥६॥
प्र सोम याहि धारया सुत इन्द्राय मत्सरः । दधानो अक्षिति श्रवः ॥७॥
समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः । विप्रमाजा विवस्वतः ॥८॥
मृजन्ति त्वा समग्रुवोऽव्ये जीरावधि ष्वणि । रेभो यदज्यसे वने ॥९॥

távemé saptá síndhavaḥ praṣísham soma sisrate | túbhyam dhāvanti dhenávaḥ || 6 || prá soma yāhi dhā́rayā sutá índrāya matsaráḥ | dádhāno ákshiti ṣrávaḥ || 7 || sám u tvā dhībhír asvaran hinvatī́ḥ saptá jāmáyaḥ | vípram ājā́ vivásvataḥ || 8 || mṛijánti tvā sám agrúvó 'vye jīrā́v ádhi shváṇi | rebhó yád ajyáse váne || 9 ||

66

O all-beholding, you are adorable; a friend to be sought by friends; may you flow for all, our holy love. 1

O blissful Lord of purified elixir, rule over the universe by those two halves (the northern and southern solstices) which stand facing you. 2

O wise and pure lord of immortality, with your all-round splendour, you encompass on every side and everywhere with the seasons. 3

O blissful, you are a friend; may you for the sake of granting all precious boons of every kind flow onward, generating food for your friends and giving support to us all. 4

O blissful lord, your shining rays accompanied by brilliance, spread the purifying glory over the lofty ridge of heaven. 5

O blissful Lord, the seven rivers, as being yours, flow at your command; the milch-kine hasten to you. 6

Proceed, O Lord of blissful elixir, in a stream when effused; exhilarate the resplendent self and bestow upon us inexhaustible store of sustenance. 7

You, O sage, are invoked by the seven kindred (metres of divine speech) which utter the songs of praises at the worship. 8

The fingers cleanse (the stems squeeze out the juice and filter it) in quickly improvised loud sounding supra-psychic (woollen) filter, when with a noise you are sprinkled with water. 9

पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत । अर्वन्तो न श्रवस्यवः ॥१०॥

'pávamānasya te kave vájin sárgā asrikshata | árvanto ná sravasyávaḥ || 10 || 8 ||

॥९॥ अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये । अवावशन्त धीतयः ॥११॥
अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः । अग्मन्नृतस्य योनिमा ॥१२॥
प्र ण इन्दो महे रण आपो अर्षन्ति सिन्धवः । यद्गोभिर्वासयिष्यसे ॥१३॥
अस्य ते सख्ये वयमियक्षन्तस्त्वोतयः । इन्दो सखित्वमुश्मसि ॥१४॥
आ पवस्व गविष्टये महे सोम नृचक्षसे । एन्द्रस्य जठरे विश ॥१५॥

áchā kóṣam madhuṣcútam ásrigram **váre avyáye** | ávā**vaṣanta** dhītáyaḥ || 11 || áchā samudrám **índavó 'stam** gávo **ná dhenávaḥ** | ágmann ritásya yónim á || **12** || **prá ṇa** indo **mahé** **ráṇa** ápo arshanti síndhavaḥ | yád **góbhir vāsayishyáse** || 13 || ásya te sakhyé vayám íyakshantas **tvótayaḥ** | **índo** sakhitvám uṣmasi || 14 || á pavasva gávishṭaye mahé **soma** nricákshase | éndrasya jaṭháre viṣa || 15 || 9 ||

dıvó yá skambhó dharúṇaḥ svâtata ấpūrṇo aṅṣúḥ paryéti viṣvátaḥ | sémé mahí ródasī yakshad āvṛítā samīcīné dādhāra sám íshaḥ kavíḥ || 2 || máhi psáraḥ súkṛitaṃ somyám mádhūrví gávyūtir áditer ṛitáṃ yaté | íṣe yó vṛishṭér itá usríyo vṛíshāpấṃ netấ yá itáūtir ṛigmíyaḥ || 3 ||

आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।
समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव मेहन्ति पेरवः ॥४॥
अरावीदंशुः सचमान ऊर्मिणा देवाव्यं मनुषे पिन्वति त्वचम् ।
दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ॥५॥

ātmanván nábho duhyate ghṛitám páya ṛitásya nábhir amṛítaṃ ví jāyate | samīcīnấḥ sudánavaḥ prīṇanti táṃ náro hitám áva mehanti péravaḥ || 4 || árāvīd aṅṣúḥ sácamāna ūrmíṇā devāvyàm mánushe pinvati tvácam | dádhāti gárbham áditer upástha ấ yéna tokáṃ ca tánayaṃ ca dhấmahe || 5 || 31 ||

This elixir of divine love is the supporter of heaven, and the prop of the earth; it spreads widely and fills the vessels and flows in all directions. May it unite the two great worlds by its own strength; it upholds them combined; may it, the sage, bestow food upon its worshippers. 2

There is abundant and well prepared food, made of this divine elixir and sweetened for (the resplendent one) who is to be invoked at that time of worship. For him, the way to earth is broad. He is the Lord of the rain that falls here; he is the possessor of cattle, the showerer of water, and the leader. He helps us hence and thereby deserves our praises. 3

Water, the life sap, is milked from animated clouds of the firmament. Here is the centre of cosmic creation whence the nectar of immortality (the divine elixir) is generated. The most bounteous ones, ever united, love him. As our friend, as leader, as protector, he (the divine sap of bliss) showers down the accumulated (waters of happiness). 5

Combining with the radiant wave, the elixir of divine love roars loudly; it sprinkles its divine nectar for the benefit of the worshipper. It places the cosmic life germ upon the lap of the mother Infinity, whereby we acquire sons and grandsons. 5

॥३२॥ सहस्रधारेऽव ता असश्चतस्तृतीये सन्तु रजसि प्रजावतीः ।
चतस्रो नाभो निहिता अवो दिवो हविर्भरन्त्यमृतं घृतश्चुतः ॥६॥
श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः ।
धिया शमी सचते सेमभि प्रवद्दिवस्कवन्धमव दर्षदुद्रिणम् ॥७॥
अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्रमीत्ससवान् ।
आ हिन्विरे मनसा देवयन्तः कक्षीवते शतहिमाय गोनाम् ॥८॥
अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति ।
स मृज्यमानः कविभिर्मदिन्तम स्वदस्वेन्द्राय पवमान पीतये ॥९॥

sahásradhāré 'va ta asaṣcátas tṛitíye santu rájasi prajávatīḥ | cátasro nábho níhitā avó divó havír bharanty amṛítam ghṛitaṣcútaḥ || 6 || ṣvetám rūpám kriṇute yát síshāsati sómo mīḍhváñ ásuro veda bhúmanaḥ | dhiyá ṣámī sacate sém abhí pravád divás kávandham áva darshad udríṇam || 7 || ádha ṣvetám kaláṣam góbhir aktám kárshmann á vājy àkramīt sasaván | á hinvire mánasā devayántaḥ kakshívate ṣatáhimāya gónām || 8 || adbhíḥ soma papṛicānásya te rásó 'vyo váram ví pavamāna dhāvati | sá mṛijyámānaḥ kavíbhir madintama svádasvéndrāya pavamāna pītáye || 9 || 32 ||

(७५) पञ्चसप्ततितमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्य भार्गवः कविर्ऋषिः । पवमानः सोमो देवता । जगती छन्दः ॥

॥३॥ अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥१॥

75.

Abhí priyáṇi pavate cánohito námāni yahvó ádhi yéshu várdhate | á súryasya bṛiható bṛihánn ádhi rátham víshvañcam aruhad vicakshaṇáḥ || 1 ||

May those elixirs, which are in the third world, the celestial, descend with procreating power. The four brilliances have been sent down from heaven. They bear divine water, and bring elixir and sacred oblation. 6

When divine elixir seeks to gain heaven, it assumes a white colour. Powerful as it is, it showers benefits, and knows how to bestow abundant wealth. By its wisdom it is associated with excellent rites. It bursts asunder the rain cloud from heaven. 7

The divine elixir successfully reaches the white-sprinkled cosmic pitcher like a horse reaching the goal. The devout priests stimulate it with their praise. It bestows cattle upon seers rich with sacred love and who have seen a hundred winters. 8

O purified elixir, when you are diluted with the divine water, your juice passes through the ultra-psychic woollen fleece and thus cleansed by the sages. O exhilarating purified elixir, be sweet-flavoured, so that the resplendent self may gladly accept you. 9

75

The divine elixir is flowing to charming waters, with which it gets mingled and is fostered. He, the great, is beholder of all and mounts the mighty sun's chariot which goes everywhere. 1

ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।
दधाति पुत्रः पित्रोरपीच्यं नाम तृतीयमधि रोचने दिवः ॥२॥
अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिरण्यये ।
अभीमृतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजति ॥३॥
अद्रिभिः सुतो मतिभिश्चनोहितः प्ररोचयन्रोदसी मातरा शुचिः ।
रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिवेदिवे ॥४॥
परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम् ।
ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम् ॥५॥

ṛitásya jihvā́ pavate mádhu priyáṃ vaktā́ pátir dhiyó asyā́ ádābhyaḥ | dádhāti putráḥ pitrór apīcyàṃ nā́ma tṛitī́yam ádhi rocané diváḥ || 2 || áva dyutānáḥ kaláṣāñ acikradan nṛíbhir yemānáḥ kóṣa ā́ hiraṇyáye | abhī́m ṛitásya dohánā anūshatádhi tripṛishṭhá usháso ví rājati || 3 || ádribhiḥ sutó matíbhiṣ cánohitaḥ prarocáyan ródasī mātárā ṣúciḥ | rómāṇy ávyā samáyā ví dhāvati mádhor dhā́rā pínvamānā divé-dive || 4 || pári soma prá dhanvā svastáye nṛíbhiḥ punānó abhí vāsayāṣíram | yé te mádā āhanáso víhāyasas tébhir índraṃ codaya dā́tave maghám || 5 || 33 ||

(७६) षट्सप्ततितमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य भार्गवः कविर्ऋषिः । पवमानः सोमो देवता । जगती छन्दः ॥

॥१॥ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते नदीष्वा ॥१॥

76.

Dhartā́ diváḥ pavate kṛítvyo ráso dáksho devā́nām anumā́dyo nṛíbhiḥ | háriḥ sṛijānó átyo ná sátvabhir vṛíthā pājā́ṅsi kṛiṇute nadī́shv ā́ || 1 ||

This elixir is the tongue of the cosmic sacrifice, and is unassailable. It distils the delightful exhilarating (juice) within the lustrous region of the heavens; it (the elixir) assumes a third independent name, unknown even to its parents, the earth and heaven. 2

Shining, it roars aloud, descending into the ultra-psychic vessels, and is pressed by the priests into the golden receptacle; the milkers of the worship glorify it. It is the supporter of the three regions and shines brightly through the morning dawns. 3

It comes out effused when pressed through stones, whilst the priests sing the praises. It is fit for food, and illuminates both heaven and earth, the parents. The extract flows between the ultra-psychic woollen filter, and then diluted with water. The stream of the exhilarating beverage thus gets purified day by day. 4

O divine elixir, may you flow forth for our good. Purified by the priests, may you invest yourself with devotional love. May the exhilarating loud-sounding mighty juices, as are yours, inspire the resplendent self and bestow affluence upon us. 5

76

(The divine elixir), sustainer of all, powerful, the invigorator of the sense organs, worthy to be praised by the priests, golden—hued, flows onwards from the firmament (the ultra-psychic region). Like a horse let loose by brave persons, it without any effort, replenishes its vigour in the streams (of water). 1

Like a hero, he carries weapons in his hands, desiring to enjoy felicity. He mounts his chariot in quest of the lost cattle (or wisdom); the elixir of bliss stimulates the strength of the resplendent self; he is invoked by the performers of sacrifice; he (the elixir) is anointed with milk and curds. 2

O divine elixir of bliss, you have been duly purified. With your full exhilarating strength, may you enter the heart of the resplendent self and make both worlds yield milk for us, just as lightning milks the clouds. May you mete out inexhaustible strength into us as a result of our duty-bound performances. 3

Onwards flows (the divine bliss), the sovereign of all the creatures that see the light. He is known as the lord of seers and saints, who sing the praises at the sacrifice where the elixir is effused. He is cleansed by the ray of the sun; he is the burthen of the hymns of praise and his wisdom is beyond our reach. 4

Like a bull in the midst of the herd, you rush to the ultra-psychic receptacle, with a crying sound as you fall upon the water's lap. You effuse and flow for the enjoyment of the resplendent self. May we, under your care and protection, O blissful Lord, be victorious in battle against evils. 5

(७७) सप्तसप्ततितमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य भार्गवः कविर्ऋषिः । पवमानः सोमो देवता । जगती छन्दः ॥

॥२॥ एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टरः ।
अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः ॥१॥
स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः ।
स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ॥२॥

77.

Eshá prá kóse mádhumāñ acikradad índrasya vájro vápusho vápushtarah | abhím ritásya sudúghā ghritascúto vāsrá arshanti páyaseva dhenávah || 1 || sá pūrvyáh pavate yám divás pári syenó mathāyád ishitás tiró rájah | sá mádhva á yuvate vévijāna ít krisánor ástur mánasáha bibhyúshā || 2 ||

ते नः पूर्वास उपरास इन्दवो महे वाजाय धन्वन्तु गोमते ।
ईक्षेण्यासो अह्यो३ न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ॥३॥
अयं नो विद्वान्वनवद्वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः ।
इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजम् ॥४॥
चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते ।
असावि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत् ॥५॥

té nah púrvāsa úparāsa índavo mahé vájāya dhanvantu gómate | īkshenyàso ahyò ná cáravo bráhma-brahma yé jujushúr havír-havih || 3 || ayám no vidvấn vanavad vanushyatá índuh satrácā mánasā purushtutáh | inásya yáh sádane gárbham ādadhé gávām urubjám abhy árshati vrajám || 4 || cákrir diváh pavate krítvyo ráso maháñ ádabdho váruno hurúg yaté | ásāvi mitró vrijáneshu yajñíyó 'tyo ná yūthé vrishayúh kánikradat || 5 || 2 ||

77

The sweet-flavoured elixir sounds in the ultra-psychic pitcher. It is like a thunderbolt of the resplendent Lord, more beauteous than the beautiful. The streams of this veracious elixir mix up with water and a good quantity of milk and in the process, make a sound like lowing of kine laden with milk. 1

That ancient elixir effuses out which the hawk, commissioned for the purpose, brings down from heaven passing through the third world, though fully possessed of fear of the bow-armed protector, guarding this stock of bliss with caution. He flies downward, holding fast the blissful elixir, sweet and flavoured, (for the benefit of the resplendent self). 2

May those, first and foremost, fresh streams of divine elixirs flow on their way to give us abundant food and milk. They are pleasing to look upon like beautiful well-adorned women and whom not only our every prayer, even every oblation pleases. 3

May this drop of divine elixir, much lauded with full knowledge, slay them with united mind who desire to slay us. It (the elixir) dwells in the interior of our heart and deposits a germ in the cosmic herds and hastens to fertilize our milk-giving stall of kine. 4

The active, potent juice of heaven is flowing on; the mighty, unassailable and virtuous divine flows from heaven for the sake of him, who in search wanders hither and thither. It is a friend of every one. The adorable divine elixir is effused in affliction, uttering a sound like an ardent horse amidst a herd (of mares). 5

(७८) अष्टसप्ततितमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य भार्गवः कविर्ऋषिः । पवमानः सोमो देवता । जगती छन्दः ॥

॥३॥ प्र राजा वाचं जनयन्नसिष्यददपो वसानो अभि गा इयक्षति ।
गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतम् ॥१॥
इन्द्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने ।
पूर्वीर्हि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः ॥२॥
समुद्रिया अप्सरसो मनीषिणमासीना अन्तरभि सोममक्षरन् ।
ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम् ॥३॥

78.

Prá rā́jā vā́cam janáyann asishyadad apó vásāno abhí gā́ iyakshati | gribhṇā́ti riprám ávir asya tā́nvā ṣuddhó devā́nām úpa yāti nishkritám || 1 || índrāya soma pári shicyase nṛíbhir nṛicákshā ūrmíḥ kavír ajyase váne | pūrvī́r hí te srutáyaḥ sánti yā́tave sahásram áṣvā hárayaṣ camūsháadaḥ || 2 || samudríyā apsaráso manīshíṇam ā́sīnā antár abhí sómam aksharan | tā́ īm hinvanti harmyásya sakshánim yā́cante sumnám pávamānam ákshitam || 3 ||

गोजिन्नः सोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् ।
यं देवासश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम् ॥४॥
एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन्द्रविणान्यर्षसि ।
जहि शत्रुमन्तिके दूरके च य उर्वीं गव्यूतिमभयं च नस्कृधि ॥५॥

gojín naḥ sómo rathajíd dhiraṇyajít svarjíd abjít pavate sahasrajít | yám devā́saṣ cakriré pītáye mádam svā́dishṭham drapsám aruṇám mayobhúvam || 4 || etā́ni soma pávamāno asmayúḥ satyā́ni kriṇván dráviṇāny arshasi | jahí ṣátrum antiké dūraké ca yá urvī́m gávyūtim ábhayam ca nas kridhi || 5 || 3 ||

78

This royal divine elixir, raising its voice, flows forth on its way; it clothes itself with water and advances forward whilst the hymns of praises are sung. It then passes to the ultra-psychic woollen filter where its impure residue is retained (and the purified filtrate passes through). Henceforth purified, it passes on to the dwellings of the divine sense-organs. 1

O elixir of devotion, you are expressed by the priests for the resplendent self. You are the observer of men, stimulated, intelligent, and your stems are immersed in water (before effusion). Many are the paths for you to follow and infinite are the spreading green-tinted streams pouring down to the ultra-psychic receptacles. 2

The damsels of the firmament, seated in the midst, flow towards the sagacious elixir; they cherish the one who is the sprinkler of the hall of sacrifice; may, the worshippers, invoke the flowing undecaying elixir, and ask for a boon. 3

The elixir of divine love flows for us. It is the conqueror of cattle, of chariots, of gold, of heaven, of water, of thosand-fold wealth, whom the divinities, the sense organs, greet and accept as their drink for their exhilaration, since it is exceedingly sweet and flavoured. While it drops, it is purple in colour and is the source of happiness. 4

May you bestow all true riches to us. Loving as you are, may you flow on and on, O purified divine elixir of bliss. Destroy our enemy whether he be far or near; grant us a free road and freedom from danger. 5

(७९) एकोनाशीतितमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्य भार्गवः कविर्ऋषिः । पवमानः सोमो देवता । जगती छन्दः ॥

॥४॥ अचोदसो नो धन्वन्त्विन्दवः प्र सुवानासो बृहद्दिवेषु हरयः ।
वि च नशन्न इषो अरातयोऽर्यो नशन्त सनिषन्त नो धियः ॥१॥
प्र णो धन्वन्त्विन्दवो मदच्युतो धना वा येभिरर्वतो जुनीमसि ।
तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि विश्वधा भरेमहि ॥२॥
उत स्वस्या अरात्या अरिर्हि ष उतान्यस्या अरात्या वृको हि षः ।
धन्वन्न तृष्णा समरीत ताँ अभि सोम जहि पवमान दुराध्यः ॥३॥

79.

Accdáso no dhanvantv índavaḥ prá suvānáso briháddiveshu hárayaḥ | ví ca náṣan na ishó árātayo 'ryó naṣanta sánishanta no dhíyaḥ || 1 || prá ṇo dhanvantv índavo madacyúto dhánā vā yébhir árvato junīmási | tiró mártasya kásya cit párihvṛitim vayám dhánāni viṣvádhā bharemahi || 2 || utá svásyā árātyā arír hí shá utányásyā árātyā vṛíko hí sháḥ | dhánvan ná tṛíshṇā sám arīta táñ abhí sóma jahí pavamāna durādhyàḥ || 3 ||

दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।
अद्रयस्त्वा बप्सति गोरधि त्वच्य१प्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥४॥
एवा त इन्दो सुभ्वं सुपेशसं रसं तुञ्जन्ति प्रथमा अभिश्रियः ।
निदंनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ॥५॥

diví te nábhā paramó yá ādadé pṛithivyás te ruruhuḥ sánavi kshípaḥ | ádrayas tvā bapsati gór ádhi tvacy àpsú tvā hástair duduhur manīshíṇaḥ || 4 || evá ta indo subhvàṃ supéṣasaṃ rásaṃ tuñjanti prathamá abhiṣríyaḥ | nídam-nidam pavamāna ní tārisha āvís te ṣúshmo bhavatu priyó mádaḥ || 5 || 4 ||

79

May the spontaneously effused, green in hue, and fresh elixir of divine love flow to us during the brilliant (occasions of sacred acts). May they be destroyed who are the with-holders of food from us; may our adversaries be destroyed. May the words of wisdom inspire us for our noble acts. 1

May these honey-dropping elixirs flow to us. May they bring us riches; with their aid, may we encounter the powerful enemy. May we, overcoming everyone who is not friendly to us, deprive the opponent of his precious wealth for our enjoyment. 2

For verily the elixir is the foe of its own enemy and the destroyer of the enemy of another. As thirst overcomes one in a desert, so purified irresistible elixir slays both of them. 3

The best blissful juice, which persons of enlightenment invoke dwells in the navel of heaven. Its stems and offshoots grow upon the summit of the earth; the stones crush you upon the cowhide (or a hard surface of earth); the wise sages milk you with their hands under water. 4

O drops of resplendence, you are effused and pressed out by the leading priest. You when mingled are attractive in form and fully matured. O purified elixir of enlightenment, may you destroy all our reviling thoughts. May your powerful, blissful and rejuvenating (sap) be made available to us. 5

(८०) अशीतितमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजो वसुर्ऋषिः । पवमानः सोमो देवता । जगती छन्दः ॥

सोमस्य धारा पवते नृचक्षस ऋतेन देवान्हवते दिवस्परि ।
बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः ॥१॥
यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान् ।
मघोनामायुः प्रतिरन्महि श्रव इन्द्राय सोम पवसे वृषा मदः ॥२॥

80.

Sómasya dhārā pavate nṛicákshasa ṛiténa deván havate divás pári | bṛíhaspáte ravátheṇā ví didyute samudráso ná sávanāni vivyacuḥ || 1 || yáṃ tvā vājinn aghnyá abhy ánūshatáyohataṃ yónim á rohasi dyumán | maghónām áyuḥ pratirán máhi ṣráva índrāya soma pavase vṛíshā mádaḥ || 2 ||

एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः ।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन्हरिरत्यः स्यन्दते वृषा ॥३॥
तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।
नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित् ॥४॥
तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः ।
इन्द्रं सोम मादयन्दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ॥५॥

éndrasya kukshá pavate madíntama úrjaṃ vásānaḥ ṣrávase sumañgálaḥ | pratyáñ sá víṣvā bhúvanābhí paprathe kríḷan hárir átyaḥ syandate vṛíshā || 3 || táṃ tvā devébhyo mádhumattamaṃ náraḥ sahásradhāraṃ duhate dáṣa kshípaḥ | nṛíbhiḥ soma prácyuto grávabhiḥ sutó víṣvān deváñ á pavasvā sahasrajit || 4 || táṃ tvā hastíno mádhumantam ádribhir duhánty apsú vṛishabháṃ dáṣa kshípaḥ | índraṃ soma mādáyan daívyaṃ jánaṃ síndhor ivormíḥ pávamāno arshasi || 5 || 5 ||

80

The stream of this blissful elixir, the dream of man, flows forth. By the eternal truth, it invites the divinities from the region of enlightenment to the place of sacrifice. While it flows out with brilliance, the learned leading worshipper sings the hymns of praise in high pitch. The elixir flows in streams to the reservoirs like the rivers covering the land. 1

O divine elixir, the creative power, you are praised by the inviolable divine speech; you sustain the entire creation· your abode (in the innermost cavity) has been fashioned by golden hands; like the sun in the sky, you shine forth above all. You provide us health, wealth, food, long life and divine exhilaration. You flow forth for the sake of the resplendent self, and are the showerer of all benefits. 2

You, as elixir of life, the creative inspiration and power, flow for the satisfaction of the resplendent self and for his ample nourishment. You are clothed with vigour; you extend fortunes to all the beings. You are pleasingly green-tinted, sporting, swift-moving and showerer of benefits as you flow forth. 3

The ten fingers of the priest milk you forth for gods, the sense-organs; most sweet-flavoured, flowing in a thousand streams, poured out by the devotees, squeezed through stones, you, O divine elixir, the winner of thousand-fold wealth, flow to all the psychic powers. 4

You are skilfully milked by ten fingers; the stems of your plant are crushed between stones; the sap is mingled with water. You are sweet and flavoured, a showerer of benefits. You exhilarate the resplendent self, and all the celestial organs of the body. When squeezed and filtered, you rush forth like a wave of water. 5

(८१) एकाशीतितमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजो वसुर्ऋषिः । पवमानः सोमो देवता । (१–४) प्रथमादिचतुर्ऋचां जगती, (५) पञ्चम्याश्च त्रिष्टुप् छन्दसी ॥

॥६॥ प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः ।
दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः ॥१॥
अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळ्हा रघुवर्तनिर्वृषा ।
अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥२॥
आ नः सोम पवमानः किरा वस्विन्दो भव मघवा राधसो महः ।
शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥३॥

81.

Prá sómasya pávamānasyormáya índrasya yanti jaṭháraṃ supéṣasaḥ | dadhnā́ yád īm únnītā yaṣásā gávāṃ dānáya ṣū́ram udámandishuḥ sutā́ḥ || 1 || ácā hí sómaḥ kaláṣā̆ṅ ásishyadad átyo ná vóḷhā raghúvartanir vṛíshā | áthā devā́nām ubháyasya jánmano vidvā́ṅ aṣnoty amúta itáṣ ca yát || 2 || ā́ naḥ soma pávamānaḥ kirā́ vásv índo bháva maghávā rā́dhaso maháḥ | ṣíkshā vayodho vásave sú cetúnā mā́ no gáyam āré asmát párā sicaḥ || 3 ||

आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः ।
बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥४॥
उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।
भगो नृशंसं उर्वन्तरिक्षं विश्वे देवाः पवमानं जुषन्त ॥५॥

ā́ naḥ pūshā́ pávamānaḥ surātáyo mitró gachantu váruṇaḥ sajóshasaḥ | bṛíhaspátir marúto vāyúr aṣvínā tváshṭā savitā́ suyámā sárasvatī || 4 || ubhé dyā́vāpṛithiví viṣvaminvé aryamā́ devó áditir vidhātā́ | bhágo nṛiṣáṅsa urv àntáriksham víṣve devā́ḥ pávamānaṃ jushanta || 5 || 6 ||

81

The graceful waves of the purified spiritual bliss flow in the ultra-psychic region of the complex of the resplendent self. The elixir has been effused, filtered and mixed with milk and curds of kine,—all to exhilarate the hero, the bestower (of gifts to the devotees). 1

The bliss divine, the showerer, flows towards the pitchers of inner consciousness, like a draught horse, moving with sure and steady paces. It knows both, the ambrosia brought from the other world, the exterior, and also the one existing in this world, the interior (observations from the external and experiences from within). 2

The elixir of life, when effused and purified, enriches us with all sorts of wealth. The divine love is the possessor of affluence; may it also provide us with ample richness of divine experience. O dispenser of sustenance, may you bless this embodied soul with prosperity, along with discriminating faculty. Scatter not riches and blessings distant from us. 3

May the effused life-sustenance come to us. May also come venerability and friendliness, bountiful and of one accord come to us. May also come to us men of valour, the twins divine, the sense of superb activity, the divine knowledge, creativity and impulsion, technical skill, and tractable divine speech. 4

The elixir of life is honoured and loved by all bounties of Nature—be they existing in the pervading pair of earth and heaven. It is valued by people, just and kind, by those blessed by mother Infinity, by the possessors of the faculty of sustenance, and of effulgence, and by bounties in spacious firmament. 5

(८२) द्व्यशीतितमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्य भारद्वाजो वसुर्ऋषिः । पवमानः सोमो देवता । (१–४) प्रथमादिचतुरृचां जगती, (५) पञ्चम्याश्च त्रिष्टुप् छन्दसी ॥

॥७॥ असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् ॥१॥
कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् ॥२॥
पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसार आपो अभि गा उतासरन्त्सं ग्रावभिर्नसते वीते अध्वरे ॥३॥

82.

Ásāvi sómo arushó vríshā hárī rájeva dasmó abhí gá acikradat | punānó váram páry ety avyáyam ṣyenó ná yónim ghritávantam āsádam || 1 || kavír vedhasyá páry eshi máhinam átyo ná mrishtó abhí vájam arshasi | apasédhan duritá soma mrilaya ghritám vásānah pári yāsi nirníjam || 2 || parjányah pitá mahishásya parníno nábhā prithivyá giríshu ksháyam dadhe | svásāra ápo abhí gá utásaran sám grávabhir nasate vīté adhvaré || 3 ||

जायेव पत्यावधि शेव मंहसे पज्राया गर्भ शृणुहि ब्रवीमि ते ।
अन्तर्वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ॥४॥
यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिन्दो ।
एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचन्ते ॥५॥

jāyéva pátyāv ádhi ṣéva maṅhase pájrāyā garbha ṣrinuhí brávīmi te | antár vánīshu prá carā sú jīváse 'nindyó vrijáne soma jāgrihi || 4 || yáthā púrvebhyah ṣatasá ámridhrah sahasrasáh paryáyā vájam indo | evá pavasva suvitáya návyase táva vratám ánv ápah sacante || 5 || 7 ||

82

The effused elixir of love with all its radiance is a showerer of benefits; green-tinted; is like a king in magnanimity. The divine juice, as it proceeds to waters (to be mixed with) utters a thrilling sound. It passes through an ultra-psychic fleecy sieve for filtration and purification. Just as a hawk (coming back to its nest for rest), it alights on the water-moistened seat. 1

You, the wise one, pass through the adorable filter with the intent desire to participate in the noble sacrifice. Just as a horse, you, cleansed with water, proceed to the battle, i.e. to meet the struggles of life. May you drive away all our evils and troubles, and be kind and considerate to us. Clad with water, you, O elixir, pass through the filtering device. 2

The father of the broad-leafed (plant of divine elixir) is the divine cloud; the plant dwells on the navel of the earth among the mountains. The streams of waters are its sisters. The chants of hymns go on while the juice is squeezed out, and it meets the stones at the beloved sacrifice (which crush the stems of the plant). 3

You give delight to your devotee as wife to her husband. O child of cloud, listen to all that I address to you. Pleased with our adorations, may you favour us with full life. O irreproachable divine elixir, please be vigilant against our foes and miseries. 4

Just as you, the divine bliss, have been providing invulnerable strength and wisdom to our ancient sages hundred-fold and thousand-fold, favour us also with the same, and provide us with the latest prosperity. These sacred waters would bring success to all your pledges and functions. 5

(८३) त्र्यशीतितमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्याङ्गिरसः पवित्र ऋषिः । पवमानः सोमो देवता । जगती छन्दः ॥

॥८॥ प॒वित्रं॑ ते॒ वित॑तं ब्रह्मणस्पते प्र॒भुर्गात्रा॑णि॒ पर्ये॑षि वि॒श्वतः॑ ।
अत॑प्ततनू॒र्न तदा॒मो अ॑श्नुते शृ॒तास॒ इद्वह॑न्त॒स्तत्समा॑शत ॥१॥
तपो॑ष्प॒वित्रं॒ वित॑तं दि॒वस्प॒दे शोच॑न्तो अस्य॒ तन्त॑वो॒ व्य॑स्थिरन् ।
अव॑न्त्यस्य पवी॒तार॑मा॒शवो॑ दि॒वस्पृ॒ष्ठमधि॑ तिष्ठन्ति॒ चेत॑सा ॥२॥

83.

Pavítram te vítatam brahmanas pate prabhúr gấtrāṇi páry eshi viṣvátaḥ | átaptatanūr ná tád āmó aṣnute ṣritása íd váhantas tát sám āṣata || 1 || táposh pavítram vítatam divás padé ṣócanto asya tántavo vy àsthiran | ávantv asya pavītā́ram āṣávo divás prishṭhám ádhi tishṭhanti cétasā || 2 ||

अरू॑रुचदु॒षसः॒ पृश्नि॑रग्रि॒य उ॒क्षा बि॑भर्ति॒ भुव॑नानि वाज॒युः ।
मा॒या॒विनो॑ ममिरे अस्य मा॒यया॑ नृ॒चक्ष॑सः पि॒तरो॒ गर्भ॒मा द॑धुः ॥३॥
ग॒न्ध॒र्व इ॒त्था प॒दम॑स्य रक्षति॒ पाति॑ दे॒वानां॒ जनि॑मा॒न्यद्भु॑तः ।
गृ॒भ्णाति॑ रि॒पुं नि॒धया॑ नि॒धाप॑तिः सु॒कृत्त॑मा॒ मधु॑नो भ॒क्षमा॑शत ॥४॥
ह॒विर्ह॑विष्मो॒ महि॒ सद्म॒ दैव्यं॒ नभो॒ वसा॑नः॒ परि॑ यास्यध्व॒रम् ।
राजा॑ प॒वित्र॑रथो॒ वाज॒मारु॑हः स॒हस्र॑भृष्टिर्जयसि॒ श्रवो॑ बृ॒हत् ॥५॥

árūrucad ushásaḥ pṛ́ṣnir agriyá ukshā́ bibharti bhúvanāni vājayúḥ | māyāvíno mamire asya māyáyā nṛicákshasaḥ pitáro gárbham ā́ dadhuḥ || 3 || gandharvá itthā́ padám asya rakshati pā́ti devā́nām jánimāny ádbhutaḥ | gribhṇā́ti ripúm nidháyā nidhā́patiḥ sukṛ́ttamā mádhuno bhakshám āṣata || 4 || havír havishmo máhi sádma daívyam nábho vásānaḥ pári yāsy adhvarám | rā́jā pavítraratho vā́jam ā́ruhaḥ sahásrabhrishṭir jayasi ṣrávo brihát || 5 || 8 ||

83

O Lord of divine enlightenment, your processes of purification are widely stretched out (in cosmos); you are the sovereign, who rules over the entire creation from all sides; you never get tired (become hot) in your work; your divine bliss is not obtainable to those who are unripened. Only the mature ones receive the graces from you. 1

Your filter of the elixir that blazes all opposition (and destroys adversaries) lies at the summit of heaven. The shining filaments of this filter are separated. The brilliant swift-flowing juices protect the pious ones (or the worshippers). They with their supreme intellect attain the highest summit of aspirations. 2

The associate of dawn, and the sun (i.e. the divine elixir) shines forth; it sprinkles the dew drops to nourish the worlds with food and provisions; by its super—intellect, it supports the entire intelligentsia, the elders, the beholders of men; it supports the germ of entire activity in the world. 3

The sun verily preserves this station. The elixir of life preserves the races of sentient beings. The lord of nooses seizes our enemy with snare. They who are virtuous in actions have a right to enjoy the sweet-juiced elixir of life. 4

O elixir, you are mixed with water, i.e. you are clad in water, and thence you take the sacrifice to the celestial abode. As a king, you ascend to the battle, mounted on the chariot of your ultra— psychic filter and armed with a thousand weapons, you win abundant food for us. 5

(८४) चतुरशीतितमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य वाच्यः प्रजापतिर्ऋषिः । पवमानः सोमो देवता । जगती छन्दः ॥

॥९॥ पव॑स्व देव॒माद॑नो॒ विच॑र्षणिर॒प्सा इन्द्रा॑य॒ वरु॑णाय वा॒यवे॑ ।
कृ॒धी नो॑ अ॒द्य वरि॑वः स्वस्ति॒मदु॑रुक्षि॒तौ गृ॑णीहि॒ दैव्यं॒ जन॑म् ॥१॥
आ यस्त॒स्थौ भुव॑ना॒न्यम॑र्त्यो॒ विश्वा॑नि॒ सोम॒: परि॒ तान्य॑र्षति ।
कृ॒ण्वन्त्सं॑चृ॒तं वि॒चृतं॑म॒भिष्ट॑य॒ इन्दु॑: सिषक्त्यु॒षसं॒ न सूर्य॑: ॥२॥

84.

Pávasva devamádano vícarshanir apsá índrāya várunāya vāyáve | kridhí no adyá várivah svastimád urukshitaú griṇīhi daívyam jánam || 1 || á yás tasthaú bhúvanāny ámartyo víṣvāni sómah pári tány arshati | krinván samcrítam vicrítam abhíshṭaya índuḥ sishakty ushásam ná sū́ryaḥ || 2 ||

आ यो गोभि॑: सृ॒ज्यत॒ ओष॑धी॒ष्वा दे॒वानां॑ सु॒म्न इ॒षय॒न्नुपा॑वसुः ।
आ वि॒द्युता॑ पवते॒ धार॑या सु॒त इन्द्रं॒ सोमो॑ मा॒दय॒न्दैव्यं॒ जन॑म् ॥३॥
ए॒ष स्य सोम॑: पवते सहस्र॒जिद्धि॑न्वा॒नो वाच॑मिषि॒रामु॑ष॒र्बुध॑म् ।
इन्दु॑: समु॒द्रमुदि॑यर्ति वा॒युभि॒रेन्द्र॑स्य॒ हार्दि॑ क॒लशे॑षु सीदति ॥४॥
अ॒भि त्यं गाव॒: पय॑सा पयो॒वृधं॒ सोमं॑ श्रीणन्ति म॒तिभि॑: स्व॒र्विद॑म् ।
ध॒नं॒ज॒यः प॑वते॒ कृत्व्यो॒ रसो॒ विप्र॑: क॒विः काव्ये॑ना॒ स्व॑र्चनाः ॥५॥

á yó góbhiḥ srijyáta óshadhīshv á devánām sumná isháyann úpāvasuḥ | á vidyútā pavate dhárayā sutá índram sómo mādáyan daívyam jánam || 3 || eshá syá sómaḥ pavate sahasrajíd dhinvānó vácam ishirám usharbúdham | índuḥ samudrám úd iyarti vāyúbhir éndrasya hárdi kaláṣeshu sīdati || 4 || abhí tyám gávaḥ páyasā payovrídham sómam ṣrīṇanti matíbhiḥ svarvídam | dhanamjayáḥ pavate krítvyo ráso vípraḥ kavíḥ kávyenā svárcanāḥ || 5 || ९ ||

84

May you flow forth, the exhilarator of the cosmic bounties, the far-sighted, the giver of life-force to the sun, the ocean and the wind. Grant us this day wealth and health; call the celestial people on the auspicious ground of the sacrifice. 1

The immortal elixir of bliss, which is stationed upon the regions, goes about them all; the divine love brings us closer to divine virtues and takes us away from vices. It comes to the sacrifice for the fulfilment of our desires, like the sun following the dawn. 2

The elixir of life force which is created by the sun's rays, (or when mixed with cow's milk) is placed in the herbs for the gratification of the divine powers. It snatches away the property of the foes (to be given to virtuous people). Poured forth in a stream, it flows with the lightning's flash and gladdens the Lord of the sun and the people of heaven. 3

This is the elixir of divine love, the conqueror of thousands; awakened at dawn, it flows stimulating the priests to chant the divine praises. The elixir sends forth its ocean of divine love with the aid of the breathing winds; for the satisfaction of the resplendent self, it is received in the receptacles of hearts. 4

The milk of the cows, i.e. the wisdom of the sages, augments the exhilarating elixir. Mixed with that milk and invoked by praises, it awards us everything. The elixir of the life-force, the winner of wealth, flows forth, purified with wisdom, sacred acts and mature experience. 5

(८५) पञ्चाशीतितमं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य भार्गवो वेन ऋषिः । पवमानः सोमो देवता । (१-१०) प्रथमादि-दशर्चां जगती. (११-१२) एकादशीद्वादश्योश्च त्रिष्टुप् छन्दसी ॥

॥१०॥ इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥१॥
अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।
जहि शत्रूँरभ्या भन्दनायतः पिबेन्द्र सोममव नो मृधो जहि ॥२॥

85.

Índrāya soma súshutaḥ pári sravápāmīvā bhavatu rákshasā sahá | mā́ te rásasya matsata dvayāvíno dráviṇasvanta ihá santv índavaḥ || 1 || asmā́n samaryé pavamāna codaya dáksho devā́nām ási hí priyó mádaḥ | jahí ṣátrūn̐r abhy ā́ bhandanāyatáḥ píbendra sómam áva no mṛídho jahi || 2 ||

अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः ।
अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥३॥
सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु ।
जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥४॥
कनिक्रदत्कलशे गोभिरज्यसे व्यव्ययं समया वारमर्षसि ।
मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ॥५॥

ádabdha indo pavase madíntama ātméndrasya bhavasi dhāsír uttamáḥ | abhí svaranti bahávo manīshíṇo rā́jānam asyá bhúvanasya niṅsate || 3 || sahásraṇīthaḥ ṣatádhāro ádbhuta índrāyénduḥ pavate kā́myam mádhu | jáyan kshétram abhy àrshā jáyann apá urúṃ no gātúṃ kṛiṇu soma mīḍhvaḥ || 4 || kánikradat kaláṣe góbhir ajyase vy àvyáyaṃ samáyā vā́ram arshasi | marmṛijyámāno átyo ná sānasír índrasya soma jaṭháre sám aksharaḥ || 5 ||

85

Flow forth, O well-expressed melody of praises, for the resplendent self; may disease and the wicked spirit be kept far off; let not the double-dealers be delighted with your elixir; may your flowing drops be laden with opulence at this (sacrifice). 1

O purified elixir, urge us to victory in battles for you are powerful, dear to the divine powers and the exhilarator. Slay our foes; come to those who chant your praises. O radiant soul, drink the elixir of life-force and destroy the adversaries. 2

May you continue to flow, O elixir of divine love, the inviolable, the most exhilarating, the ruler of the world; you yourself are the best support of the resplendent self; all the sages verily approach and glorify you. 3

The marvellous divine elixir, brought to us in thousands of ways, flowing in a hundred streams, pours forth for the resplendent self, it being his most beloved beverage. May you approach, O elixir, the filter, winning land for us, winning water, and making our path broad and easy. 4

Roaring with thrill you are blended in the pitcher with milk and curds; you pass through the ultra-psychic fleecy filter in the midst. Being cleansed and decked like a prize-winning horse, you flow down, O elixir, (after filtration) in the belly of the resplendent self. 5

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥६॥

svādúḥ pavasva divyáya
jánmane svādúr índrāya suhávītunāmne | svādúr mitráya
váruṇāya vāyáve bṛíhaspátaye mádhumāñ ádābhyaḥ || 6 || 10 ||

॥११॥ अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते ।
पवमाना अभ्यर्षन्ति सुष्टुतिमेन्द्रं विशन्ति मदिरास इन्दवः ॥७॥
पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः ।
माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ॥८॥
अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः ।
राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥९॥
दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम् ।
अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोरूर्मा मधुमन्तं पवित्र आ ॥१०॥
नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः ।
शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम् ॥११॥

átyam mṛijanti kaláṣe dáṣa kshípaḥ prá víprāṇām matáyo vā́ca īrate | pávamānā abhy àrshanti sushṭutím éndram viṣanti madirā́sa índavaḥ || 7 || pávamāno abhy àrshā suvī́ryam urvī́ṃ gávyūtim máhi ṣárma saprá thaḥ | mā́kir no asyá párishūtir īṣaténdo jáyema tváyā dhánaṃ-dhanam || 8 || ádhi dyā́m asthād vṛishabhó vicakshaṇó 'rūrucad ví divó rocanā́ kavíḥ | rā́jā pavítram áty eti róruvad diváḥ pīyū́shaṃ duhate nṛicákshasaḥ || 9 || divó nā́ke mádhujihvā asaṣcáto venā́ duhanty ukshā́ṇaṃ girishṭhā́m | apsú drapsáṃ vāvṛidhānáṃ samudrá ā́ síndhor ūrmā́ mádhumantam pavítra ā́ || 10 || nā́ke suparṇám upapaptivā́ṅsaṃ gíro venā́nām akṛipanta pūrvī́ḥ | ṣíṣuṃ rihanti matáyaḥ pánipnataṃ hiraṇyáyaṃ ṣakunáṃ kshā́maṇi sthā́m || 11 ||

Flow onwards sweet for the celestial people; flow sweet for the resplendent self, whose name is worthily invoked; flow sweet for the sun, the ocean, the wind and cosmic intelligence; verily you are sweet-flavoured and inviolable. 6

The ten fingers clean the stems of the plant in the cosmic pitcher; the holy singers send forth their praises with hymns; the filtered elixir hastens to the fair praises; the exhilarating saps find their way to the core of the resplendent self. 7

While you are purified, pour on us heroic strengh, extensive pastures, a large and spacious mansion; let no oppressor be lord over us. O elixir, may we gain all opulence through you. 8

The showerer, the beholder has risen above the sky; the seer has illumined the luminaries of heaven; the king is passing through the ultra-psychic filter with a roar. The beholder of men milk forth the ambrosia of heaven. 9

In the heaven of the bright universal sacrifice, the sweet-voiced loving divine powers severally milk forth the mountain-haunting divine elixir; they sprinkle it with waters; it is nourished with waters, become juicy; it is strengthened in the ocean, in the waves of the streams. They sprinkle it sweet-flavoured as it passes through the ultra-psychic filter. 10

The prayers of the enlightened ones of noble desires praise (the divine elixir, which dwells) in heaven, well-winged, falling (to earth); praises give comfort to the crying infant, the golden bird, reposing on the earth. 11

ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य ।
भानुः शुक्रेण शोचिषा व्यद्योत्प्रारूरुचद्रोदसी मातरा शुचिः ॥१२॥

ūrdhvó gandharvó ádhi nāke asthād víṣvā rūpā́ praticákshāṇo asya | bhānúḥ ṣukréṇa ṣocíshā vy àdyaut prárūrucad ródasī mātárā ṣúciḥ || 12 || 11 ||

[अथ पञ्चमोऽनुवाकः ॥] (८६) षडशीतितमं सूक्तम्

(१-४८) अष्टचत्वारिंशदृचस्यास्य सूक्तस्य (१-१०) प्रथमादिदशर्चामकृष्टा माषाः, (११-२०) एकादश्यादिदशानां सिकता निवावरी, (२१-३०) एकविंश्यादिदशानां पृश्नयोऽजाः, (३१-४०) एकत्रिंश्यादिदशानामत्रयः, (४१-४५) एकचत्वारिंश्यादिपञ्चानां भौमोऽत्रिः, (४६-४८) षट्चत्वारिंश्यादितृचस्य च भार्गवः शौनको गृत्समद ऋषयः । पवमानः सोमो देवता । जगती छन्दः ॥

॥१२॥ प्र त आशवः पवमान धीजवो मदा अर्षन्ति रघुजा इव त्मना ।
दिव्याः सुपर्णा मधुमन्त इन्दवो मदिन्तमासः परि कोशमासते ॥१॥
प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक् ।
धेनुर्न वत्सं पयसाभि वज्रिणमिन्द्रमिन्दवो मधुमन्त ऊर्मयः ॥२॥

86.

Prá ta āṣávaḥ pavamāna dhījávo mádā arshanti raghujá iva tmánā | divyā́ḥ suparṇā́ mádhumanta índavo madíntamāsaḥ pári kóṣam āsate || 1 || prá te mádāso madirā́sa āṣávó 'srikshata ráthyāso yáthā príthak | dhenúr ná vatsám páyasābhí vajríṇam índram índavo mádhumanta ūrmáyaḥ || 2 ||

The divine plant of the elixir, the elevated one, has risen high to heaven's vault. From thence, it beholds all the varieties of forms. The sun shines in white light with gleaming splendour. Radiant, it illumines both the parents, heaven and earth. 12

86

The purified divine elixirs are all-pervading, quick as thoughts, exhilarating and swift like offsprings of mares; the celestial sweet flavoured elixirs, thrilling and exciting, alight in the cosmic receptacles. 1

Your exhilarating all-pervading elixirs are let loose separately like chariot-horses; the sweet-flavoured waves of spiritual thrill go to the resplendent self, the wielder of the thunderbolt, as a cow with her milk to the calf. 2

अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरम् ।
वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इन्द्रियाय धायसे ॥३॥
प्र त आश्विनीः पवमान धीजुवो दिव्या असृग्रन्पयसा धरीमणि ।
प्रान्तर्ऋषयः स्थाविरीरसृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥४॥
विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः ।
व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥५॥

átyo ná hiyānó abhí vájam arsha svarvít kóṣam divó ádrimātaram | vríshā pavítre ádhi sắno avyáye sómaḥ punāná indriyáya dhāyase || 3 || prá ta ắṣvinīḥ pavamāna dhījúvo divyā́ asṛigran páyasā dhárīmaṇi | prántár ṛíshaya stháviriīr asṛikshata yé tvā mṛijánty ṛishishāṇa vedhásaḥ || 4 || víṣvā dhā́māni viṣvacaksha ṛíbhvasaḥ prabhós te satáḥ pári yanti ketávaḥ | vyānaṣíḥ pavase soma dhármabhiḥ pátir víṣvasya bhúvanasya rājasi || 5 || 12 ||

॥१३॥ उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥६॥
यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।
सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥७॥
राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिन्धुषु श्रितः ।
अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः ॥८॥

६ ubhayátaḥ pávamānasya raṣmáyo dhruvásya satáḥ pári yanti ketávaḥ | yádī pavítre ádhi mṛijyáte háriḥ sáttā ní yónā kaláṣeshu sīdati || 6 || yajñásya ketúḥ pavate svadhvaráḥ sómo devā́nām úpa yāti nishkṛitám | sahásradhārah pári kóṣam arshati vríshā pavítram áty eti róruvat || 7 || rā́jā samudrám nadyò ví gāhate 'pā́m ūrmím sacate síndhushu ṣritáḥ | ádhy asthāt sā́nu pávamāno avyáyam nábhā pṛithivyā́ dharúṇo mahó diváḥ || 8 ||

Like a steed urged on to battle, may you, who are all-knowing, speed onward from heaven to the receptacle, as clouds descend from heaven. The elixir, the showerer of benefits, is being purified at the top upon the ultra-cosmic fleecy filter for the strength of the resplendent sun, who supports the world. 3

O purified elixir, your celestial steed-like streams, quick as thoughts, are poured along with the cosmic milk into the cosmic receptacle; the sages, the ordainers of the sacred traditions, cleanse you. O divine elixir, enjoyed by sages, may you pour your continuous streams in the midst (of the vessel). 4

O all-seeing sovereign, your mighty rays encompass all the spheres; pervading all things, you flow, O elixir, through your functions; and as a lord of the whole word, you rule over everyone. 5

The heralding rays of steady, purified, green-tinted elixir, cleansed upon the cosmic filter, circulate from both the sides. It is finally allowed to repose in the pitchers. 6

This elixir of divine love is the signal of cosmic sacrifice and an object of pious worship; it flows filtered; it approaches the abode of Nature's bounties. This thousand-streamed elixir, the showerer of blessings, rushes to the cosmic receptacle and passes roaring through the cosmic filter. 7

The royal elixir plunges into the firmament, and the rivers thereof; mixed with the streams, it associates with the wave of the waters; being filtered it stands upon the up-lifted cosmic fleecy filter on the navel of the earth. It is the upholder of the vast celestial region. 8

दिवो न सानु स्तनयन्नचिक्रदद्द्यौश्च यस्य पृथिवी च धर्मभिः ।
इन्द्रस्य सख्यं पवते विवेविदत्सोमः पुनानः कलशेषु सीदति ॥९॥
ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥१०॥

divó ná sā́nu stanáyann acikradad dyaúsh ca yásya prithiví́ ca dhármabhiḥ | índrasya sakhyám pavate vivévidat sómaḥ punānáḥ kaláseshu sīdati || 9 || jyótir yajñásya pavate mádhu priyám pitā́ devā́nām janitā́ vibhū́vasuḥ | dádhāti rátnam svadháyor apīcyàm madíntamo matsará indriyó rásaḥ || 10 || 13 ||

॥१४॥ अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥११॥
अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति ।
अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥१२॥
अयं मतवाञ्छकुनो यथा हितोऽव्ये ससार पवमान ऊर्मिणा ।
तव क्रत्वा रोदसी अन्तरा कवे शुचिर्धिया पवते सोम इन्द्र ते ॥१३॥
द्रापिं वसानो यजतो दिविस्पृशमन्तरिक्षप्रा भुवनेष्वर्पितः ।
स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितरमा विवासति ॥१४॥

abhikrándan kalásham vājy àrshati pátir diváḥ satádhāro vicakshaṇáḥ | hárir mitrásya sádaneshu sīdati marmrijānó 'vibhiḥ síndhubhir vríshā || 11 || ágre síndhūnām pávamāno arshaty ágre vācó agriyó góshu gachati | ágre vā́jasya bhajate mahādhanám svāyudháḥ sotríbhiḥ pūyate vríshā || 12 || ayám matávāñ chakunó yáthā hitó 'vye sasāra pávamāna ūrmíṇā | táva krátvā ródasī antarā́ kave súcir dhiyā́ pavate sóma indra te || 13 || drāpím vásāno yajató divisprísam antarikshaprā́ bhúvaneshv árpitaḥ | svàr jajñānó nábhasābhy àkramīt pratnám asya pitáram ā́ vivāsati || 14 ||

Thundering like the summit of the sky, the elixir, by whose support both heaven and earth are upheld, roars. The elixir flows acquiring friendship of the resplendent sun; purified, it alights upon the cosmic pitchers. 9

It (the elixir) is the light of the cosmic sacrifice; it distils sweet delightful juices. It is the parent of Nature's bounties, the generator of all. and the possessor of ample wealth. This, the most exhilarating, exciting and the nourishing elixir supports the hidden treasures of heaven and earth. 10

The rapid elixir, the lord of heaven, the thousand-streamed, the beholder of all, rushes roaring aloud to the cosmic reservoir; the green-tinted one alights on the place of sacrifice, its own friendly home. Mixed with waters. it is filtered pure through the cosmic fleecy hairs. 11

The filtered divine elixir runs in the forefront of the rivers; in the fore-front of the hymns, it goes amongst the rays; in front, it fights for obtaining food. This well-armed, the showerer of benefits, is purified by the worshippers who offer oblation. 12

This much praised, purified elixir is sent forth with the speed of a flying bird; it flows onward in streams of juices through the cosmic fleecy filter. O resplendent Lord, through your sustaining act, your intelligence, the pure elixir flows, purified through both heaven and earth. 13

The elixir, clad in a defensive armour that reaches heaven, fills the firmament (with rains). When mixed with waters, it generates heavenly bliss. Along with waters, it comes to the place of worship, and it invokes its ancient parent (the resplendent Lord). 14

सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे ।
पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः ॥१५॥

só asya visé máhi sárma yachati yó asya dhā́ma prathamám vyānasé | padám yád asya paramé vyòmany áto vísvā abhí sám yāti samyátah || 15 || 14 ||

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ॥१६॥
प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवसनेष्वक्रमुः ।
सोमं मनीषा अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः ॥१७॥
आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमानो अस्रिधम् ।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥१८॥
वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः ।
क्राणा सिन्धूनां कलशाँ अवीवशदिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥१९॥
मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् ।
त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोः सख्याय कर्तवे ॥२०॥

pró ayāsīd índur índrasya nishkritám sákhā sákhyur ná prá mināti samgíram | márya iva yuvatíbhih sám arshati sómah kaláse satáyāmnā pathā́ || 16 || prá vo dhíyo mandrayúvo vipanyúvah panasyúvah samvásaneshv akramuh | sómam manīshā́ abhy ànūshata stúbho 'bhí dhenávah páyasem asisrayuh || 17 || ā́ nah soma samyátam pipyúshīm ísham índo pávasva pávamāno asrídham | yā́ no dóhate trír áhann ásascushī kshumád vā́javan mádhumad suvíryam || 18 || vríshā matīnā́m pavate vicakshanáh sómo áhnah pratarītósháso diváh | krānā́ síndhūnām kalásāñ avīvasad índrasya hā́rdy āvisán manīshíbhih || 19 || manīshíbhih pavate pūrvyáh kavír nríbhir yatáh pári kósāñ acikradat | tritásya nā́ma janáyan mádhu ksharad índrasya vāyóh sakhyā́ya kártave || 20 || 15 ||

At first it genetrates the glorious body of the resplendent sun and gives great happiness to the sunshine. From that station, which is in the highest heaven, it comes victorious in all its encounters. 15

The divine elixir goes to the abode of the sun; as a friend, it does not betray the affection of his friend. As a young man meets maidens, so the effused elixir proceeds to meet by a hundred paths the cosmic pitcher. 16

Your exhilarating tuneful praises advance into the halls of worship; the praisers, the lords of intellect, invoke the elixir with their hymns and the milch kine approach it with their loving milk. 17

O radiant elixir, when purified, you pour upon us accumulated unwasting nutritious food, which without any hurdle is milked for us three times a day. Effusing out with sound, it yields for us the healthy strength, enriched with nourishment, sweetness, and virility. 18

The all-observant elixir is the showerer of blessings to its eulogists; it is the furtherer of the day, the dawn, and the sun, mixes with the waters of rivers and roars aloud; it enters the cosmic pitchers, penetrating the core of the sun. The wise invoke it with praises. 19

The ancient sage (the divine elixir) is purified by the wise guided by the priests, and it roars into the receptacles; eulogizing the name of the threefold (the sun or the resplendent Lord), it distils sweet juices to gain the friendship of the sun and wind. 20

॥१६॥ अ॒यं पु॑ना॒न उ॒षसो॒ वि रो॑चयद॒यं सिन्धु॑भ्यो अभवदु लोक॒कृत् ।
अ॒यं त्रिः स॒प्त दु॑दुहा॒न आ॒शिरं॒ सोमो॑ हृ॒दे प॑वते॒ चारु॑ मत्स॒रः ॥२१॥
पव॑स्व सोम दि॒व्येषु॒ धाम॑सु सृजा॒न इ॑न्दो क॒लशे॑ प॒वित्र॒ आ ।
सीद॒न्निन्द्र॑स्य ज॒ठरे॒ कनि॑क्रद॒न्नृभि॑र्य॒तः सूर्य॒मारो॑हयो दि॒वि ॥२२॥
अद्रि॑भिः सु॒तः प॑वसे प॒वित्र॒ आँ इन्द॒विन्द्र॑स्य ज॒ठरे॑ष्वावि॒शन् ।
त्वं नृ॒चक्षा॑ अभवो विचक्षण॒ सोम॑ गो॒त्रमङ्गि॑रोभ्योऽवृणो॒रप॑ ॥२३॥

ayám punāná usháso ví rocayad ayáṃ síndhubhyo abhavad u lokakṛít | ayáṃ tríḥ saptá duduhāná āṣíraṃ sómo hṛidé pavate cáru matsaráḥ || 21 || pávasva soma divyéshu dhámasu sṛijāná indo kaláṣe pavítra á | sídann índrasya jaṭháre kánikradan nṛíbhir yatáḥ sṻryam árohayo diví || 22 || ádribhiḥ sutáḥ pavase pavítra áñ índav índrasya jaṭháreshv āviṣán | tváṃ nṛicákshā abhavo vicakshaṇa sóma gotrám áṅgirobhyo 'vṛiṇor ápa || 23 ||

त्वां सो॑म॒ पव॑मानं स्वा॒ध्यो॒३॒॑ऽनु॒ विप्रा॑सो अमद॒न्नव॒स्यवः॑ ।
त्वां सु॑प॒र्ण आभ॑रद्दि॒वस्परी॑न्दो॒ विश्वा॑भिर्म॒तिभिः॒ परि॑ष्कृतम् ॥२४॥
अव्ये॑ पुना॒नं परि॒ वार॑ ऊ॒र्मिणा॒ हरिं॑ नवन्ते अ॒भि स॒प्त धे॒नवः॑ ।
अ॒पामु॒पस्थे॒ अध्या॒यवः॑ क॒विमृ॒तस्य॒ योना॑ महि॒षा अ॑हेषत ॥२५॥

tváṃ soma pávamānaṃ svādhyó 'nu víprāso amadann avasyávaḥ | tváṃ suparṇá ábharad divás paríndo víṣvābhir matíbhiḥ párishkṛitam || 24 || ávye punānáṃ pári vára ūrmíṇā háriṃ navante abhí saptá dhenávaḥ | apáṃ upásthe ádhy āyávaḥ kavím ṛitásya yónā mahishá aheshata || 25 || 16 ||

When purified, it is he who illumines the dawn; makes the path wide for the rivers to flow; this elixir makes three times seven celestial rivers pour out their curds and milk; it exhilarates and flows pleasantly to the heart. 21

Flow onward, O elixir, to your own heavenly abodes; flow, O sweet elixir, (proceed) to the cosmic pitcher, to the cosmic filter; may you, alighting upon the core of the sun with a roar, and in the midst of the chants of the priests, make the sun ascend the sky. 22

You are pressed out with the help of stones. O elixir, may you flow into the cosmic filter, and enter into the core of the resplendent. O elixir, the contemplator, you look upon mankind with affection, and you release the water (of the clouds) for the sustenance of cows and thus help the sacrificers. 23

O elixir, while being purified, the pious worshippers, desirous of preservation, glorify you (with their chants); the elegant falcon brings you from heaven; O elixir, meanwhile you are adorned with all praises. 24

The seven celestial rivers approach the green-tinted elixir, which flows purified in a stream through the cosmic fleecy filter. The enlightened men urge you, the sage, on the lap of the waters to the place of sacrifice (or mixed with water and milk, they offer your oblations). 25

॥१७॥ इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्त्सुपथानि यज्यवे ।
गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन्परि वारमर्षति ॥२६॥
असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः ।
क्षिपो मृजन्ति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥२७॥
तवेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि ।
अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामधा असि ॥२८॥

índuḥ punānó áti gāhate mṛidho víṣvāni kṛiṇván su-pát̄hāni yájyave | gáḥ kṛiṇvānó nirṇíjam haryatáḥ kavír átyo ná krīḷan pári vā́ram arshati || 26 || asaṣcátaḥ ṣatá-dhārā abhiṣríyo hárim navanté 'va tā́ udanyúvaḥ | kshípo mṛijanti pári góbhir ā́vṛitam tṛitī́ye pṛishṭhé ádhi rocané diváḥ || 27 || távemā́ḥ prajā́ divyásya rétasas tvám víṣvasya bhúvanasya rājasi | áthedám víṣvam pavamāna te váṣe tvám indo prathamó dhāmadhā́ asi || 28 ||

त्वं समुद्रो असि विश्ववित्कवे तवेमाः पञ्च प्रदिशो विधर्मणि ।
त्वं द्यां च पृथिवीं चाति जभ्रिषे तव ज्योतींषि पवमान सूर्यः ॥२९॥
त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे ।
त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ॥३०॥

tvám samudró asi viṣva-vit kave távemā́ḥ páñca pradíṣo vídharmaṇi | tvám dyā́m ca pṛithivī́m cāti jabhrishe táva jyótī́nshi pavamāna sū́ryaḥ || 29 || tvám pavítre rájaso vídharmaṇi devébhyaḥ soma pavamāna pūyase | tvā́m uṣíjaḥ prathamā́ agṛibhṇata túbhyemā́ víṣvā bhúvanāni yemire || 30 || 17 ||

The divine elixir, purified, goes across all obstructions, making its way easy for all worshippers; with its fluid body, lovable and wise, it rushes through the cosmic filter like a sporting courser. 26

The ceaseless watery fountains with their hundred streams, commingle with the elixir, ever-seeking to mix with water. The sun's rays approach the green-tinted (elixir) and the swift fingers beautify it in the third sphere illumined by the sun. 27

All these are the offspring of your celestial affluence; you are the ruler of the entire world; so, O purified elixir, this universe is in your control; the divine elixir is the foremost, the first establisher of the eternal law. 28

O sage, you are the ocean, you are omniscient; these five regions rest on your support; you sustain both heaven and earth and O pure-flowing elixir, you nourish the sun and other luminaries. 29

O effused elixir, you are purified for the divine forces in the cosmic filter; you are the supporter of the world. The chief priests desiring benefits look to you alone, and all these worlds offer themselves to your service. 30

॥१८॥ प्र रेभ एत्यति वारमव्ययं वृषा वनेष्वव चक्रदुद्धरिः ।
सं धीतयो वावशाना अनूषत शिशुं रिहन्ति मतयः पनिप्नतम् ॥३१॥
स सूर्यस्य रश्मिभिः परि व्यत तन्तुं तन्वानस्त्रिवृतं यथा विदे ।
नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतम् ॥३२॥
राजा सिन्धूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत् ।
सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ॥३३॥

prá rebhá ety áti vā́ram avyáyam vŕishā váneshv áva cakradad dhárih | sám dhītáyo vāvaśānā́ anūshata śíśum rihanti matáyah pánipnatam || 31 || sá sū́ryasya raśmíbhih pári vyata tántum tanvānás trivṛ́tam yáthā vidé | náyann ṛtásya praśísho návīyasīh pátir jánīnām úpa yāti nishkṛtám || 32 || rā́jā síndhūnām pavate pátir divá ṛtásya yāti pathíbhih kánikradat | sahásradhārah pári shicyate hárih punānó vā́cam janáyann úpāvasuh || 33 ||

पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया ।
गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ॥३४॥
इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि ।
इन्द्राय मद्वा मद्यो मदः सुतो दिवो विष्टम्भ उपमो विचक्षणः ॥३५॥

pávamāna máhy árno ví dhāvasi sū́ro ná citró ávyayāni pávyayā | gábhastipūto nṛ́bhir ádribhih sutó mahé vā́jāya dhányāya dhanvasi || 34 || ísham ū́rjam pavamānābhy àrshasi śyenó ná váṅsu kaláśeshu sīdasi | índrāya mádvā mádyo mádah sutó divó vishṭambhá upamó vicakshanáh || 35 || 18 ||

The hissing elixir passes through the cosmic fleecy filter; the green-tinted showerer mixes with water with a thrilling sound; hymns are chanted during the process and holy songs soothen the infant, as he cries. 31

It (the elixir) invests itself with the rays of the sun for its robe, stretching out the triple thread as it knows; guiding the recent adorations of the truthful (worshipper), the elixir, the protector of women, passes into the consecrated vessel. 32

The pure elixir, the sovereign of rivers, flows onward; the lord of heaven, it goes with a shout by the paths of the holy law; green-tinted and wealth-giver elixir is poured forth with its hundred streams, lifting up its voice while being filtered and purified. 33

O purified elixir, you pour forth abundant juice like the wonderful sun-rays, you approach the cosmic fleecy filter. Purified by the hands of the priests and expressed with the stones you flow forth for a mighty wealth-yielding struggle. 34

O flowing elixir, you grant abundant food and strength in streams. You alight on the cosmic pitchers like a falcon on its nest. Your exhilarating effused juice gives joy to the resplendent self and support to heaven, beholding (the entire world). 35

॥१९॥ सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।
अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥३६॥
ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥३७॥

saptá svásāro abhí mātárah̩ śíśum̩ návam̩ jajñānám̩ jényam̩ vipaścítam | apā́m̩ gandharvám̩ divyám̩ nr̩icákshasam̩ sómam̩ víśvasya bhúvanasya rājáse || 36 || īśāná imā́ bhúvanāni víyase yujāná indo harítah̩ suparn̩yàh̩ | tā́s te ksharantu mádhumad ghr̩itám̩ páyas táva vraté soma tishthantu kr̩ishtáyah̩ || 37 ||

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥३८॥
गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।
त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते ॥३९॥
उन्मध्व ऊर्मिर्वनना अतिष्ठिपदपो वसानो महिषो वि गाहते ।
राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत् ॥४०॥

tvám̩ nr̩icákshā asi soma viśvátah̩ pávamāna vr̩ishabha tā́ ví dhāvasi | sá nah̩ pavasva vásumad dhíranyavad vayám̩ syāma bhúvaneshu jīváse || 38 || govít pavasva vasuvíd dhiran̩yavíd retodhā́ indo bhúvaneshv árpitah̩ | tvám̩ suvíro asi soma viśvavít tám̩ tvā víprā úpa girémá āsate || 39 || ún mádhva ūrmír vanánā atishthipad apó vásāno mahishó ví gāhate | rā́jā pavítraratho vā́jam áruhat sahásrabhr̩ishtir jayati śrávo br̩ihát || 40 || 19 ||

The seven celestial sister mothers approach the new-born victorious sagacious infant, the spiritual elixir, abiding amidst the waters, supporter of water, divine, the beholder of men, so that he may become the ruler of the whole world. 36

O sovereign Lord, as you pass through these worlds, harnessing your well-winged steeds, let them pour forth sweet-flavoured shining sap; may all men, O spiritual elixir, abide in your decree. 37

O spiritual elixir, being everywhere, you behold men from every side; O purifier, the showerer, you wander through cosmic waters, may you pour forth upon us wealth, comprising various treasures and gold; may we have strength to live long in the worlds. 38

O divine elixir, the winner of cattle, wealth, and gold, the fructifier, may you, dressed with cosmic waters, flow onward. O elixir, you are a hero and omniscient; these sages invoke you with hymns of praises. 39

We are hearing the sound of the waves of sweet-flavoured elixir. Clothed in waters, the mighty one plunges (into the cosmic pitcher); the king, whose chariot is the cosmic filter, gets ready to proceed to battle, and armed with a thousand weapons, he wins ample sustenance (for us). 40

॥२०॥ स भन्दना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि ।
ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याचतात् ॥४१॥
सो अग्रे अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः ।
द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ॥४२॥

sá bhandánā úd iyarti prajávatīr viṣváyür víṣvāḥ subhárā áhardivi | bráhma prajávad rayím áṣvapastyam pītá **indav índram** asmábhyaṃ yācatāt || 41 || só ágre áhnām **hárir** haryató mádaḥ prá cétasā cetayate ánu dyúbhiḥ | dvá jána yātáyann antár īyate nárā ca ṣáṅsaṃ daívyaṃ ca dhartári || 42 ||

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥४३॥
विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।
अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः ॥४४॥
अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥४५॥

añjáte vy añjate sám añjate krátuṃ rihanti mádhunābhy àñjate | síndhor ucchvāsé patáyantam ukshánaṃ hiraṇyapāváḥ paṣúm āsu gribhṇate || 43 || vipaṣcíte pávamānāya gāyata mahí ná dhárāty ándho arshati | áhir ná jurṇám áti sarpati tvácam átyo ná krīḷann asarad vrísha háriḥ || 44 || agregó rájāpy as tavishyate vimáno áhnām bhúvaneshv árpitaḥ | hárir ghritásnuḥ sudríṣīko arṇavó jyotírathaḥ pavate rāyá okyàḥ || 45 || 20 ||

All the days and all the nights are chanted the glories and praises of this elixir; these praises are easily borne and productive of prosperity; O elixir, when delighted, may you solicit the resplendent Lord to give us food productive of progeny and riches filling our homes. 41

During the early hours of the day, the golden-hued delightful exhilarating elixir is specifically beneficial to intellectuals. It shines during these hours. It elevates to high positions both the participants, the sacrificer and the chanter. 42

They, the priests, smear and grease, and anoint the effused elixir with milk. Nature's bounties enjoy the sweetness of the original invigorating sap. They smear it over with sweetened milk. They filter it through sheepwool, and plunge it into those waters, the sprinkler, the beholder, falling into the seething torrent. 43

Sing forth (O priests) to the intelligent elixir, who sends forth food like a mighty stream; like a snake, he glides out of his old skin. He, the showerer and green-tinted, comes to the receptacle like a sporting horse. 44

The divine elixir, foremost, radiant, dweller in cosmic water, placed in the firmament as the measurer of the days, is glorified; it is golden-hued, shedder of rain, charming, source of moisture, borne as if in a chariot of light. It is friendly and flows giving wealth to all house-holders. 45

॥२१॥ असर्जि स्कम्भो दिव उद्यतो मदः परि त्रिधातुर्भुवनान्यर्षति ।
अंशुं रिहन्ति मतयः पनिप्नतं गिरा यदि निर्णिजमृग्मिणो ययुः ॥४६॥
प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यन्ति रंहयः ।
यद्गोभिरिन्दो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि ॥४७॥
पवस्व सोम क्रतुविन्न उक्थ्योऽव्यो वारे परि धाव मधु प्रियम् ।
जहि विश्वान्रक्षस इन्दो अत्रिणो बृहद्वदेम विदथे सुवीराः ॥४८॥

asarji skambhó divá údyato mádaḥ pári tridhátur bhúvanāny arshati | aṅsúṃ rihanti matáyaḥ pánipnatam girá yádi nirṇíjam ṛigmíṇo yayúḥ || 46 || prá te dhárā áty áṇvāni meshyàḥ punānásya saṃyáto yanti ráṅhayaḥ | yád góbhir indo camvòḥ samajyása á suvānáḥ soma kaláseshu sīdasi || 47 || pávasva soma kratuvín na ukthyó 'vyo váre pári dhāva mádhu priyám | jahí vísvān rakshása indo atríṇo bṛihád vadema vidáthe suvíraḥ || 48 || 21 ||

(८७) सप्ताशीतितमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य काव्य उशना ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥२२॥ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥१॥
स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥२॥

87.

Prá tú drava pári kóṣaṃ ní shīda nṛíbhiḥ punānó abhí vájam arsha | áṣvaṃ ná tvā vājínam marjáyantó 'cha barhí raṣanábhir nayanti || 1 || svayudháḥ pavate devá índur aṣastihá vṛijánaṃ rákshamāṇaḥ | pitá devánaṃ janitá sudáksho vishṭambhó divó dharúṇaḥ pṛithivyáḥ || 2 ||

This divine exhilarating elixir, the supporter of heaven, has been let loose. The triply-mingled juice rushes to the waters; the intelligent worshippers caress the elixir which comes out with a hissing sound, and recite hymns in his praise. The chanters of verses approach the embodied beverage with songs and prayers. 46

The rapid streams that flow forth are collected together, and allowed to pass through the interstices of the cosmic fleecy filter. After effusion, O elixir, you are mixed with water in the ladles and come down to the pitchers (and stored and stocked there). 47

Flow for us, O elixir of divine love, cognizant of our worship and deserving praise; pour your beloved, sweet-flavoured juice upon the cosmic fleecy texture for filtration, O elixir, destroy all the voracious wicked forces. Blessed with excellent male offsprings, may we offer ample praises at the congregational gathering. 48

87

Flow fast, O elixir, and settle down in the cosmic receptacle. Purified by the priests, come forward to provide us with food. They cleanse you like a strong courser and lead you to the place of worship with fingers as if a horse led with reins. 1

The divine well-armed elixir flows onward, it destroys the wicked and guards us from trecherous onslaught. It is the protector of the divine powers, the progenitor, powerful prop of heaven and earth's support. 2

ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।
स चिद्विवेद निहितं यदासामपीच्यं१ गुह्यं नाम गोनाम् ॥३॥
एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।
सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥४॥
एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।
पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः ॥५॥

ríshir vípraḥ puraetá jánānām ribhúr dhíra uṣána kávyena | sá cid viveda níhitam yád āsām apīcyàm gúhyam náma gónām || 3 || eshá syá te mádhumāñ indra sómo vríshā vríshṇe pári pavítre akshāḥ | sahasrasáḥ ṣatasá bhūridávā ṣaṣvattamám barhír á vājy àsthāt || 4 || eté sómā abhí gavyá sahásrā mahé vájāyāmrítāya ṣrávāṅsi | pavítrebhiḥ pávamānā asrigrañ chravasyávo ná pritanájo átyāḥ || 5 || 22 ||

॥२३॥ परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना पूयमानः ।
अथा भर श्येनभृत प्रयांसि रयिं तुञ्जानो अभि वाजमर्ष ॥६॥
एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।
तिग्मे शिशानो महिषो न शृङ्गे गा गव्यन्नभि शूरो न सत्वा ॥७॥
एषा ययौ परमादन्तरद्रेः कूचित्सतीरूर्वे गा विवेद ।
दिवो न विद्युत्स्तनयन्त्यभ्रैः सोमस्य ते पवत इन्द्र धारा ॥८॥

pári hí shmā puruhūtó jánānām víṣvásarad bhójanā pūyámānaḥ | áthā bhara ṣyenabhrita práyāṅsi rayím túñjāno abhí vájam arsha || 6 || eshá suvānáḥ pári sómaḥ pavítre sárgo ná srishṭó adadhāvad árvā | tigmé ṣiṣāno mahishó ná ṣríṅge gá gavyánn abhí ṣúro ná sátvā || 7 || eshá yayau paramád antár ádreḥ kúcit satír ūrvé gá viveda | divó ná vidyút stanáyanty abhraíḥ sómasya te pavata indra dhárā || 8 ||

The seer, the sage, the champion of men, deft and sagacious, and brilliantly intelligent, such a poet by his poetic gift, (or a seer by the divine enlightenment) discovers the secret knowledge of those Vedic hymns, the socalled secret milk of those cows, which lies hidden and concealed. 3

For you, O resplendent self, the showerer, this sweet-flavoured elixir, has been poured into the cosmic filter; the giver of thousand-fold wealth, the giver of hundred-fold wealth, the giver of abundant wealth, the liberal and powerful is present at the eternal cosmic sacrifice. 4

These divine elixirs, moving in the direction of thousand viands produced by kine, are purified at the cosmic filter. They are let loose for securing ample food and ambrosia, like horses rushing to the battle for glorious victory. 5

Invoked by many, the elixir under-going purification pours forth all food and sustenance (for everyone of us). Brought on the earth by a divine falcon, may you bring us dainty viands and wealth from all sides. May you send forth such a juice of yours. 6

When effused, this quick-flowing elixir hastens to the cosmic filter, like a steed let loose; whilst alighting, it rushes like a buffalo sharpening his pointed horns, or like a brave warrior in search of cattle. 7

This stream of elixir issues forth from a high region and finds treasure of kine hidden somewhere in the self, the cave within the mountain. The stream of elixir flows for you, O resplendent self, like lightning thundering through the clouds of the midspace. 8

उत स्म राशिं परि यासि गोनामिन्द्रेण सोम सरथं पुनानः ।
पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत् ॥९॥

utá sma rāṣím pári yāsi gónām índreṇa soma sarátham punānáḥ | pūrvír ísho brihatír jīradāno ṣíkshā ṣacīvas táva tá upashṭút || 9 || 23 ||

(८८) अष्टाशीतितमं सूक्तम्

(१-८) अष्टर्चस्यास्य सूक्तस्य काव्य उशना ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥२४॥ अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥१॥
स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥२॥
वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शंभविष्ठः ।
विश्ववारो द्रविणोदा इव त्मन्पूषेव धीजवनोऽसि सोम ॥३॥
इन्द्रो न यो महा कर्माणि चक्रिर्हन्ता वृत्राणामसि सोम पूर्भित् ।
पैद्वो न हि त्वमहिनाम्नां हन्ता विश्वस्यासि सोम दस्योः ॥४॥

88.

Ayáṃ sóma indra túbhyaṃ sunve túbhyam pavate tvám asya pāhi | tváṃ ha yáṃ cakrishé tváṃ vavrishá índum mádāya yújyāya sómam || 1 || sá īṃ rátho ná bhurisháḷ ayoji maháḥ purúṇi sātáye vásūni | ád īṃ víṣvā nahushyāṇi jatá svàrshātā vána ūrdhvá navanta || 2 || vāyúr ná yó niyútvāñ ishṭáyamā násatyeva háva á ṣámbhavishṭhaḥ | viṣvávaro draviṇodá iva tmán pushéva dhījávano 'si soma || 3 || índro ná yó mahá kármāṇi cákrir hantá vritráṇām asi soma pur-bhít | paidvó ná hí tvám áhinamnāṃ hantá víṣvasyasi soma dásyoḥ || 4 ||

And being purified, O elixir, you go to the herd of cattle. You and the resplendent self are seated in the same chariot. O prompt-giver, give us, when invoked, plentiful and abundant food, as you are the master of all viands. 9

88

The elixir is expressed for you, O resplendent self; for you it is filtered; may you drink it; it is the delightful elixir, which you yourself have prepared; you have chosen for your exhilaration; it is verily your companion. 1

It has been harnessed like a capacious car that bears abundant treasures to be given to us; it helps everyone of us among men to triumph in the great struggles of life; there it helps its votaries. 2

O elixir, like the wind with its steeds, you go to your destination at pleasure, and like evertrue divines, you grant your devotees abundant felicity when invoked. You have been accepted by all of us as the giver of wealth. Like the supreme nourisher, you are always prompt to help the needy with the speed of mind. 3

O elixir, like the resplendent self, you perform mighty acts; you are the slayer of the wicked and the destroyer of their strongholds. Like the horse of an adventure, you are the killer of serpent, the nescience; you are the eliminator of every evil. 4

अग्निर्न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु ।
जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिम् ॥५॥
एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।
वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥६॥
शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥७॥
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥८॥

agnír ná yó vána ā́ sṛijyámāno vṛ́ithā pā́jāṅsi kṛiṇute nadī́shu | jáno ná yúdhvā mahatá upabdír íyarti sómaḥ pávamāna ūrmím || 5 || eté sómā áti vā́rāṇy ávyā divyā́ ná kóṣāso abhrávarshāḥ | vṛ́ithā samudrám síndhavo ná nī́cīḥ sutā́so abhí kaláṣāñ asṛigran || 6 || ṣushmī́ ṣárdho ná mā́rutam pavasvā́nabhiṣastā divyā́ yáthā víṭ | ā́po ná makshū́ sumatír bhavā naḥ sahásrāpsāḥ pṛitanāshā́ṇ ná yajñáḥ || 7 || rā́jño nú te váruṇasya vratā́ni — || 8 || २४ ||

(८९) एकोननवतितमं सूक्तम्

(१–७) सप्तर्चस्यास्य सूक्तस्य काव्य उशना ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥२५॥ प्रो स्य वह्निः पथ्याभिरस्यान्दिवो न वृष्टिः पवमानो अक्षाः ।
सहस्रधारो असदन्न्य१स्मे मातुरुपस्थे वन आ च सोमः ॥१॥

89.

Pró syá váhniḥ pathyā̀bhir asyān divó ná vṛishṭíḥ pávamāno akshāḥ | sahásradhāro asadan ny àsmé mātúr upásthe vána ā́ ca sómaḥ || 1 ||

O elixir, you are born in a forest like fire; you easily manifest your might in the running waters; you are like a warrior who fights roaring against his mighty foe; O elixir, you give rise to ripples while being purified and filtered. 5

These elixir-juices pass through the cosmic fleecy filter. Like rains from heaven, they are showered from the height. The effused juices flow promptly to the cosmic pitchers, as rivers running downwards flow into the ocean. 6

O elixir, strong as you are like the army of the cloud-bearing winds, may you flow forth. You are blameless as innocent folk. May you become quickly favourable to us like waters. You are verily of a thousand forms, adorable like the resplendent self and the victor in battle. 7

Your acts are like those of the royal sovereign, vast and profound; nectar is your abode; you are pure as the beloved sun, and munificent, O elixir, like a great ordainer. 8

89

This effused elixir moves forth along the cosmic paths like a horse of burden; when purified, you, O elixir, flow like the rain from heaven; the thousand-streamed elixir rests in the cosmic family as if on its mother's lap in the cosmic water. 1

राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठाम् ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाम् ॥२॥
सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ॥३॥
मधुपृष्ठं घोरमयासमश्वं रथे युञ्जन्त्युरुचक्र ऋष्वम् ।
स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनमूर्जयन्ति ॥४॥

rā́jā síndhūnām avasishṭa vā́sa ṛitásya nā́vam ā́ruhad rájishṭhām | apsú drapsó vāvṛidhe ṣyenájūto duhá īm pitā́ duhá īm pitúr jā́m || 2 || siṅhám nasanta mádhvo ayā́saṃ hárim arushám divó asyá pátim | ṣū́ro yutsú prathamáḥ pṛichate gā́ ásya cákshasā pári pāty ukshā́ || 3 || mádhupṛishṭham ghorám ayā́sam áṣvaṃ ráthe yuñjanty urucakrá ṛishvám | ṣvásāra īṃ jāmáyo marjayanti sánābhayo vājínam ūrjayanti || 4 ||

चतस्र ईं घृतदुहः सचन्ते समाने अन्तर्धरुणे निषत्ताः ।
ता ईमर्षन्ति नमसा पुनानास्ता ईं विश्वतः परि षन्ति पूर्वीः ॥५॥
विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य ।
असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इन्द्रियाय ॥६॥
वन्वन्नवातो अभि देववीतिमिन्द्राय सोम वृत्रहा पवस्व ।
शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम ॥७॥

cátasra īṃ ghṛitadúhaḥ sacante samāné antár dharúṇe níshattāḥ | tā́ īm arshanti námasā punānā́s tā́ īṃ viṣvátaḥ pári shanti pūrvī́ḥ || 5 || vishṭambhó divó dharúṇaḥ pṛithivyā́ víṣvā utá kshitáyo háste asya | ásat ta útso gṛiṇaté niyútvān mádhvo aṅṣúḥ pavata indriyā́ya || 6 || vanvánn ávāto abhí devávītim índrāya soma vṛitrahā́ pavasva | ṣagdhí maháḥ puruṣcandrásya rāyáḥ suvī́ryasya pátayaḥ syāma || 7 || 25 ||

The sovereign divine elixir has put on the vestment of the cosmic vapours. The ship it ascends constitutes of eternal truth in matters of sacrifice; the dripping juice, brought by the celestial falcon, mixes with waters; the *father*, the heavenly Lord, milks him-milks him, the son of the father firmament. 2

The worshippers press out the lion-like elixir, which mixes with water, is green-tinted, shining and the protector of this heaven; it is a foremost hero in battles; among the divinities, it is the first to recover the stolen cows (the lost wisdom); by his might, the showerer, the resplendent Lord, is our protector. 3

The priests harness to the broad-wheeled car of universe, the glossy-backed, terrible, active, graceful courser—the sun; sister fingers, ten in number, cleanse him, and men strengthen this vigorous car of the sun by invocations. 4

The four yielders of butter (the cows) wait upon it, staying in a common shed; being purified, these cows approach the elixir with food and they surround it in numbers from every side. 5

(The elixir is) the prop of heaven, supporter of earth and in its hands, lies the well-being of us all. May you, the fountain (of prosperity) be possessed of energy (or horses), to be awarded to your adorers. The filament of the sweet-flavoured elixir is purified for our winning strength. 6

O elixir, ever victorious, never accepting a defeat, may you approach the congregation of friendship with divine forces; you are the destroyer of evils. May you flow for the satisfaction of the resplendent Lord; grant us abundant and splendid wealth. May we be masters of heroic vigour. 7

(९०) नवतितमं सूक्तम्

(१–६) षडृचस्यास्य सूक्तस्य मैत्रावरुणिर्वसिष्ठ ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥२६॥ प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिष्यन्नयासीत् ।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥१॥
अभि त्रिपृष्ठं वृषणं वयोधामाङ्गूषाणामवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धून्वि रत्नधा दयते वार्याणि ॥२॥
शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः साह्वान्पृतनासु शत्रून् ॥३॥

90.

Prá hinvānó janitá ródasyo rátho ná vájam sanishyánn ayāsīt | índram gáchann áyudhā samsísano vísvā vásu hástayor ādádhānaḥ || 1 || abhí triprishthám vríshaṇam vayodhám āṅgūshánām avāvaṣanta vánīḥ | vánā vásāno váruṇo ná síndhūn ví ratnadhá dayate váryāṇi || 2 || ṣúragrāmaḥ sárvavīraḥ sáhāvāñ jétā pavasva sánitā dhánāni | tigmáyudhaḥ kshiprádhanvā samátsv áshāḷhaḥ sāhván prítanāsu ṣátrūn || 3 ||

उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी ।
अपः सिषासन्नुषसः स्व१र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥४॥
मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिन्द्रमिन्दो मदाय ॥५॥
एवा राजेव क्रतुमाँ अमेन विश्वा घनिघ्नद्दुरिता पवस्व ।
इन्दो सूक्ताय वचसे वयो धा यूयं पात स्वस्तिभिः सदा नः ॥६॥

urúgavyūtir ábhayāni krinván samīciné á pavasvā púramdhī | apáḥ síshāsann ushásaḥ svàr gáḥ sám cikrado mahó asmábhyam vájān || 4 || mátsi soma váruṇam mátsi mitrám mátsíndram indo pavamāna víshṇum | mátsi ṣárdho márutam mátsi deván mátsi mahám índram indo mádāya || 5 || evá rájeva krátumāñ ámena víṣvā ghánighnad duritá pavasva | índo sūktáya vácase váyo dhā yūyám pāta svastíbhiḥ sádā naḥ || 6 || 26 ||

90

Urged and invoked, the elixir is the generator of heaven andearth; always keen to distribute food, it moves forward. Sharpening its weapons, it takes the control of the entire wealth in its hands, and goes to the resplendent self. 1

The voices of the worshippers resound about this divine, who is triple-backed, is the showerer of benefits and is the giver of food. It is arrayed in waters (i.e. the elixir is mixed with water) as if the rivers meeting the ocean. May the elixir, the possessor of precious gems and jewels, bestow on us much desired riches. 2

Flow on your way as a leader of a host of warriors, all ardent and heroic; the elixir is full of strength, victorious, giver of riches, sharp-weaponed, a bowman efficient and quick, irresistible in battle, and who overthrows the hostile army. 3

Flow on your way as the one whose paths are broad, who gives security and unites heaven and earth. It keeps well in order and discipline the dawns, the sun, the radiations. For this it cries aloud. May he, the elixir, give us ample food. 4

O elixir, may you exhilarate ocean, exhilarate the sun; O flowing elixir, exhilarate lightning and wind, exhilarate the company of clouds, exhilarate all the divines; may you glorify the mighty universal self for his rejoicing. 5

Thus like a king, performing your functions, flow on, O elixir, destroying all evils by your might: O elixlr, give food in response to our well-recited praises; may you cherish us ever with your blessings. 6

(९१) एकनवतितमं सूक्तम्

(१–६) षड्डचस्यास्य सूक्तस्य मारीचः कश्यप ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी ।
दश स्वसारो अधि सानो अव्येऽजन्ति वह्निं सदनान्यच्छ ॥१॥
वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुष्येभिरिन्दुः ।
प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः ॥२॥

91.

Asarji vákvā ráthye yáthājaú dhiyá manótā prathamó manīshí | dáṣa svásāro ádhi sā́no ávyé 'janti váhnim sáda nāny ácha || 1 || vītí jánasya divyásya kavyaír ádhi suvānó nahushyèbhir índuḥ | prá yó nṛíbhir amṛíto mártyebhir marmṛijānó 'vibhir góbhir adbhíḥ || 2 ||

वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः ।
सहस्रमृक्वा पथिभिर्वचोविदध्वस्मभिः सूरो अण्वं वि याति ॥३॥
रुजा दृळ्हा चिद्रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान् ।
वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ॥४॥
स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः ।
ये दुष्षहासो वनुषा बृहन्तस्तांस्ते अश्याम पुरुकृत्पुरुक्षो ॥५॥

vṛíshā vṛíshṇe ró-ruvad aṅṣúr asmai pávamāno rúṣad īrte páyo góḥ | sa-hásram ṛíkvā pathíbhir vacovíd adhvasmábhiḥ sū́ro áṇvaṃ ví yāti || 3 || rujá dṛiḷhá cid rakshásaḥ sádāṅsi punāná inda urṇuhi ví vájān | vṛiṣcópárishṭāt tujatá vadhéna yé ánti durád upanāyám eshām || 4 || sá pratnaván návyase viṣva-vara suktáya patháḥ kṛiṇuhi prácaḥ | yé duḥsháhāso va-núshā bṛihántas tā́ṅs te aṣyāma purukṛit puruksho || 5 ||

91

Just as in a race, the chariots are let loose at the signal of a sound, so during the sacrifice, the sap from the stems of the elixir is effused out after the recitation of certain hymns of prayers. The sacrifice is led by a chosen learned priest. The ten fingers cleanse the plant, and the extract of the stems is brought to the fleecy filter, and the purified shining juice is carried to the properly assigned place. 1

The purified juice of the elixir, effused out by enlightened mortals is brought to the place of sacrifice to be used as a nourishing food of the celestial people (i.e. for nourishing the participants in the sacrifice, as well as for sustaining divine natural forces in cosmos). The elixir is divine and immortal though effused and purified by mortal (priests). It has been filtered through the cosmic fleecy filter, mixed with water and strengthened with milk and curds. 2

The divine elixir, the showerer of blessings, while being purified, goes roaring to mix with the shining milk of cow. Greeted with laudation, cognizant of sacred praise, the elixir passes through the filter by a thousand imperishable pathways. 3

O divine elixir, when purified, put on the strength and demolish the strong dwellings of demoniac adversaries, whether they come from above, from near or from far; destroy their leaders as well, destroy all their forces. 4

O universally adorable, may you as of old rennovate old paths on new lines, teach old traditions to your new worshippers. O doer of many acts, praised through numerous hymns, may we obtain such blessings and portions from you as are difficult to defeat, and being mighty, may you inflict injury on our foes. 5

एवा पुनानो अपः स्वर्गा अस्मभ्यं तोका तनयानि भूरि ।
शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ॥६॥

evá punānó apáḥ svàr gā́ asmábhyam toká tánayāni bhū́ri | śáṃ naḥ kshétram urú jyótīṅshi soma jyóṅ naḥ sū́ryaṃ driśáye rirīhi || 6 || 1 ||

(९२) द्विनवतितमं सूक्तम्

(१–६) षड्ृचस्यास्य सूक्तस्य मारीचः कश्यप ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥२॥ परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये हियानः ।
आपच्छ्लोकमिन्द्रियं पूयमानः प्रति देवाँ अजुषत प्रयोभिः ॥१॥
अच्छा नृचक्षा असरत्पवित्रे नाम दधानः कविरस्य योनौ ।
सीदन्होतेव सदने चमूषूपेमग्मन्नृषयः सप्त विप्राः ॥२॥
प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सद एति नित्यम् ।
भुवद्विश्वेषु काव्येषु रन्तानु जनान्यतते पञ्च धीरः ॥३॥
तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः ।
दश स्वधाभिरधि सानो अव्ये मृजन्ति त्वा नद्यः सप्त यह्वीः ॥४॥

92

Pári suvānó hárir aṅśúḥ pavítre rátho ná sarji sanáye hiyānáḥ | ápac chlókam indriyám pūyámānaḥ práti devā́ñ ajushata práyobhiḥ || 1 || áchā nricákshā asarat pavítre nā́ma dádhānaḥ kavír asya yónau | sī́dan hóteva sádane camū́shū́pem agmann ríshayaḥ saptá víprāḥ || 2 || prá sumedhā́ gātuvíd viśvádevaḥ sómaḥ punānáḥ sáda eti nítyam | bhúvad víśveshu kā́vyeshu rántānu jánān yatate páñca dhī́raḥ || 3 || táva tyé soma pavamāna niṇyé víśve devā́s tráya ekādaśā́saḥ | dáśa svadhā́bhir ádhi sā́no ávye mrijánti tvā nadyàḥ saptá yahvī́ḥ || 4 ||

Thus being purified, bestow upon us the light of heaven and earth, and grant many sons and grandsons; give us health, ample land and bright luminaries and grant us long life to see the sunshine years after years. 6

92

The golden-hued elixir, effused, activated and urged, comes to the cosmic filter as a chariot to the battle-field for the acquisition of riches; being filtered, it listens to the praise of the resplendent self and gratifies Nature's bounties with sustenance. 1

He who beholds men and retains the water, proceeds to his place on the cosmic filter like a ministrant priest sitting at the worship. The elixir flows to its cups; the seven wise seers approach it with praise. 2

The elixir, the intelligent, the knower of the right path, accompanied by all divine forces, goes to its abode (the receptacle) after purification. Let it rejoice in all sacred praises. The sage elixir endeavours to satisfy all the five classes of beings (the intelligentsia, the warriors, the traders, the labour, and the unclassified). 3

O flowing elixir, the thrice eleven (33) universal divine entities live in your secret heaven, the ten fingers cleanse you with the waters upon the elevated cosmic fleecy filter; the seven great rivers provide water (for cleansing purposes). 4

तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त ।
ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकम् ॥५॥
परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीरियानः ।
सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु ॥६॥

tán nú satyám pávamānasyāstu yátra víṣve kārávaḥ saṃnásanta | jyótir yád áhne ákriṇod u lokám právan mánuṃ dásyave kar abhíkam || 5 || pári sádmeva paṣumánti hótā rája ná satyáḥ sámitīr iyānáḥ | sómaḥ punānáḥ kaláṣāñ ayāsīt sídan mrigó ná mahishó vánesliu || 6 || २ ||

(९.३) त्रिनवतितमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्य गोतमो नोधा ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥३॥ साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥१॥
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः ॥२॥
उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥३॥

93.

Sākamúksho marjayanta svásāro dáṣa dhírasya dhītáyo dhánutrīḥ | háriḥ páry adravaj jáḥ sū́ryasya drónaṃ nanakshe átyo ná vājí || 1 || sám mātríbhir ná ṣíṣur vāvaṣānó vríshā dadhanve puruváro adbhíḥ | máryo ná yóshām abhí nishkritám yán sám gachate kaláṣa usríyābhiḥ || 2 || utá prá pipya ū́dhar ághnyāyā índur dhárābhiḥ sacate sumedháḥ | mūrdhánam gávaḥ páyasā camū́shv abhí ṣrīṇanti vásubhir ná niktaíḥ || 3 ||

May that truthful place (i.e. the sacrifice) of the flowing elixir be quickly ours, where all the worshippers assemble. That very light which brightens the day protects the mankind also. The elixir utilizes its effulgence for the destruction of non-believers and malicious persons. 5

As the ministrant priest proceeds to the house, full of kine and cattle, or just as the king, pledged for truth and justice, comes to parliament, or just as a buffalo comes to waters, so the divine elixir comes to the pitchers. 6

93

Ten sister-like fingers, ten in number, of cosmic hand, sprinkling together, are the cleanser and effuser of this sagacious elixir, which flows round in the entire space (along all the cardinal points). Born of the sun, the elixir hastens to the pitcher like a swift horse. 1

The showerer of blessings (the divine elixir), loved by all and longing to meet divines, is sustained by the consecrated waters as the infant by its mother. Going to its resting place, like a youth to meet his damsel, it mixes in the cosmic reservoir with milk and curds. 2

And it nourishes the milch-cow's udder; the sagacious elixir is poured down in streams; the cows clothe the elevated elixir in the ladles with their milk as with newly washed dresses. 3

स नो॑ दे॒वेभि॑ः पवमान र॒देन्दो॑ र॒यिम॒श्विनं॑ वावशा॒नः ।
र॒थि॒रा॒य॒तामु॑श॒ती पुर॑न्धिरस्म॒द्र्य१॒॑गा दा॒वने॒ वसू॑नाम् ॥४॥
नू नो॑ र॒यिमुप॑ मास्व नृ॒वन्तं॑ पुना॒नो वा॒ताप्यं॑ वि॒श्वश्च॑न्द्रम् ।
प्र व॑न्दि॒तुरि॑न्दो ता॒र्यायु॑ः प्रा॒तर्म॒क्षू धि॒याव॑सुर्जगम्यात् ॥५॥

sá no devébhiḥ pavamāna radéndo rayím aṣvínam vāvaṣānáḥ | rathirāyátām uṣatí púraṃdhir asmadryàg ā́ dāváne vásūnām || 4 || nū́ no rayím úpa māsva nṛivántam punānó vātápyam viṣváṣcandram | prá vanditúr indo tāry ā́yuḥ prātár makshū́ dhiyā́vasur jagamyāt || 5 || 3 ||

(९४) चतुर्नवतितमं सूक्तम्
(१-५) पञ्चर्चस्यास्य सूक्तस्याङ्गिरसः कण्व ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥४॥

अधि॒ यद॑स्मिन्वा॒जिनी॑व॒ शुभ॒ः स्पर्ध॑न्ते॒ धिय॒ः सूर्ये॒ न विश॑ः ।
अ॒पो वृ॑णा॒नः प॑वते कवी॒यन्व्र॒जं न प॑शु॒वर्ध॑नाय॒ मन्म॑ ॥१॥
द्वि॒ता व्यू॒र्ण्वन्न॒मृत॑स्य॒ धाम॑ स्व॒र्विदे॒ भुव॑नानि प्रथन्त ।
धिय॑ः पिन्वा॒नाः स्वस॑रे॒ न गाव॑ ऋता॒यन्ती॑र॒भि वा॑वश्र॒ इन्दु॑म् ॥२॥

94.

Ádhi yád asmin vājínīva ṣúbha spárdhante dhíyaḥ sū́rye ná víṣaḥ | apó vriṇānáḥ pavate kavīyán vrajám ná paṣuvárdhanāya mánma || 1 || dvitā́ vyūrṇuvánn amṛítasya dhā́ma svarvíde bhúvanāni prathanta | dhíyaḥ pinvānā́ḥ svásare ná gā́va ṛitāyántīr abhí vāvaṣra índum || 2 ||

O flowing elixir, may you, associated with Nature's bounties, our well-wishers, bestow upon us wealth and vigour; may your capacious mind, speeding on cosmic chariots come towards us to give us treasures. 4

O divine elixir, while being sanctified, measure out to us riches and a large family of men and also universally loving waters. O elixir, may the life of your praiser be prolonged; may he, rich in intelligence, flourish every morn from day to day. 5

94

The fingers vie with each other (when they cleanse) the plants of the divine elixir. They look charming as the trappings on a horse or the rays in the sun. The elixir, clothed in the waters, flows eager to meet its worshippers, like a cowherd going to a pleasant cow-stall for the nourishment of his cattle. 1

(The ambrosia is mixed twice with waters), thus the elixir, twice opens the abode of water. During that period, for it, the omniscient, all the worlds expand. The gratifying laudations, appropriate for the worship, invoke the divine elixir, which stays at the place of sacrifice, just as the kine staying and lowing in their stalls. 2

परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा ।
देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः ॥३॥
श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ ॥४॥
इषमूर्जमभ्य१र्षाश्वं गामुरु ज्योतिः कृणुहि मत्सि देवान् ।
विश्वानि हि सुषहा तानि तुभ्यं पवमान बाधसे सोम शत्रून् ॥५॥

pári yát **kavíḥ** **kā́vyā** **bhárate** **ṣū́ro** ná rátho bhúvanāni víṣvā | de**véshu** **yáṣo** **mártāya** bhū́shan dákshāya rāyáḥ purubhū́shu **návyaḥ** || 3 || **ṣriyé** jātáḥ ṣriyá ā́ nír iyāya ṣríyaṃ **váyo** **ja-ritríbhyo** dadhāti | ṣríyaṃ vásānā amṛitatvám **āyan** **bhá-vanti** satyā́ samithā́ mitádrau || 4 || **ísham** **ū́rjam** **abhy** **àr-shā́ṣvam** gā́m ur‘ jyótiḥ **kṛiṇuhi** **mátsi** **devā́n** | **víṣvāni** **hí** **su-shā́hā** tā́ni **túbhyam** **pávamāna** **bā́dhase** **soma** **ṣátrūn** || 5 || ४ ||

(९५) पञ्चनवतितमं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्य काण्वः प्रस्कण्व ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥५॥ कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः ॥१॥
हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम् ।
देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे ॥२॥

95.

Kánikranti hárir ā́ sṛijyámānaḥ sídan vánasya jaṭháre punānáḥ | nṛíbhir yatáḥ kṛiṇute nirṇíjaṃ gā́ áto matír ja-nayata svadhā́bhiḥ || 1 || háriḥ sṛijānáḥ pathyā̀m ṛitásyéyarti vā́cam aritéva nā́vam | devó devā́nāṃ gúhyāni nā́māvísh kṛiṇoti barhíshi pravā́ce || 2 ||

The enlightened divine cosmic elixir listens to the invocations of the priests. Like a chariot, it goes round all the regions and gains popularity. Whatsoever wealth abides with immortals, it brings to the mortal-man. It is to be glorified at the place of universal sacrifice for the procurement of fresh and the preservation of the riches already bestowed. 3

It is generated for prosperity; it issues forth; it gives prosperity and sustenance to those who praise him. Clothing themselves in its prosperity, they obtain immortality, it moves with measured tread in its course and makes the struggles of life successful and victorious. 4

Bring to us food and fuel, horses and cattle; give us ample light. May all bounties of Nature be endowed with exhilaration. On your accounts, the devils have all been killed. O flowing elixir, subdue all our adversaries. 5

95

The golden-hued elixir roars aloud when it comes out of the plant. After filtration, it rests in the centre of cosmic pitcher; collected by the priests, it is mixed with cow's milk and curds. Chant hymns of praises and give offering of the elixir. 1

The golden-hued elixir, when let loose, sends forth its thrilling voice that indicates the path of truth as the boatman propels his boat; the bright elixir reveals to its worshippers squatting on the green lawns the secret names of the Lord. 2

अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥३॥
तं मर्मृजानं महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम् ।
तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ॥४॥
इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।
इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥५॥

apā́m ivéd ūrmáyas tárturā-ṇāḥ prá manīshā́ īrate sómam ácha | namasyántīr úpa ca yánti sáṃ cā́ ca viṣanty uṣatír uṣántam || 3 || tám marmṛi-jānám mahishám ná sā́nāv aṅśúṃ duhanty ukshá̄ṇam gi-rishṭhā́m | táṃ vāvaṣānā́m matáyaḥ sacante tritó bibharti váruṇaṃ samudré || 4 || íshyan vā́cam upavaktéva hótuḥ pu-nānā́ indo ví shya manīshā́m | índraṣ ca yát ksháyathaḥ saúbhagāya suvíryasya pátayaḥ syāma || 5 || 5 ||

(९६) षण्णवतितमं सूक्तम्

(१–२४) चतुर्विंशत्यृचस्यास्य सूक्तस्य दैवोदासिः प्रतर्दन ऋषिः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

।६॥ प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥१॥
समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः ।
आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥२॥

96.

Prá senānī́ḥ ṣū́ro ágre ráthānāṃ gavyánn eti hárshate asya sénā | bhadrā́n kriṇvánn indrahavā́n sákhibhya ā́ sómo vástrā rabhasā́ni datte || 1 || sám asya hárim hárayo mṛijanty aṣvahayaír ániṣitaṃ námobhiḥ | ā́ tishṭhati rátham índrasya sákhā vidvā́ṅ ena sumatíṃ yāty ácha || 2 ||

It is true that the priests hurrying like the waves of the waters despatch praises towards divine elixir. Adoring it, they, the priests, approach and come up together; they long for him who longs for them (such is the affection between the elixir and the hymns of praise). The praises finally merge in the divine elixir. 3

They, the devotees, milk forth like a buffalo the cleansed divine elixir, who dwells on a high place, who is the showerer, the sprinkler, and is placed between the two hemispheres; hymns follow and attend it as it roars; the sun, who dwells in the three abodes, supports it. The elixir is the defeater of adversaries in the firmament. 4

O elixir, while being purified you encourage us to offer prayers; may you direct us to sacred duties like an invoking priest. May you evoke our intellect, while you and the resplendent Lord, are present together. May we be prosperous; may we become the possessors of heroic vigour. 5

96

In front of the chariots, the brave leader, the general of an army, the divine elixir, advances ahead to catch hold of the lost cattle of enemy. Its army rejoices, as the hero assumes the white robes, The oblations and invocations are for the resplendent self to bring prosperity to friends. 1

The priests, decked with gold, express its green-tinted juice. The elixir mounts the chariot unyoked with horses and proceeds to the place of sacrifice (where hymns are chanted in its praise). The wise elixir is friendly to the resplendent self and meets the worshippers with affection 2

स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः ।
कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः ॥३॥
अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते ।
तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम ॥४॥
सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥५॥

sá no deva devátāte pavasva mahé soma psárasa indrapánaḥ | kriṇvánn apó varsháyan dyā́m utémā́m urór ā́ no varivasyā punānáḥ || 3 || ájītayé 'hataye pavasva svastáye sarvátātaye brihaté | tád uṣanti víṣva imé sákhāyas tád ahám vaṣmi pavamāna soma || 4 || sómaḥ pavate janitā́ matīnā́m janitā́ divó janitā́ prithivyā́ḥ | janitā́gnér janitā́ sū́ryasya janiténdrasya janitótá víshṇoḥ || 5 || 6 ||

॥७॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥६॥
प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः ।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥७॥

brahmā́ devā́nām padavī́ḥ kavīnā́m ṛ́shir víprāṇām mahishó mrigā́ṇām | ṣyenó grídhrāṇām svádhitir vánānām sómaḥ pavítram áty eti rébhan || 6 || právīvipad vācá ūrmím ná síndhur gíraḥ sómaḥ pávamāno manīshā́ḥ | antáḥ páṣyan vrijánemā́varāṇy ā́ tishṭhati vrishabhó góshu jānán || 7 ||

O divine elixir, the beverage of the resplendent self, flow onward to bless our sacrifice conducted to invoke all Nature's bounties. Activating water, you cause rain to fall across the midspace down upon this earth. May you come from the wide firmament, pure in form, to bestow upon us wealth. 3

Flow onward for our immunity from defeat and slaughter; flow on for our happiness and for the great universal sacrifice invoking Nature's all bounties. This is the wish of these friends assembled; even mine is this wish, O flowing divine elixir. 4

The divine elixir is the generator of discriminating intellect, the generator of heaven, the generator of the earth, the generator of the fire divine, the generator of the sun, the generator of lightning and the generator of the omnipresent life-force. May this divine elixir flow forth. 5

The divine elixir, as it passes with the thrilling sound through the ultra-psychic filter is supreme and superb among Nature's bounties, the foremost guide among the sages, the seer among the pious, the mightiest bull among wild animals, an eagle among the birds, and the hatchet of deadly weapons. 6

The purified elixir, like a river, stirs the wave of sound (i.e., it evokes for a chant of hymns). Beholding the hidden treasure and knowing all about the concealed knowledge, it presides over these irresistible powers. 7

स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष ।
इन्द्रायेन्दो पवमानो मनीष्यं१शोरूर्मिमीरय गा इषण्यन् ॥८॥
परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय ।
सहस्रधारः शतवाज इन्दुर्वाजी न सप्तिः समना जिगाति ॥९॥
स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ ।
अभिशस्तिपा भुवनस्य राजा विदद्गातुं ब्रह्मणे पूयमानः ॥१०॥

sá matsaráḥ pritsú vanvánn ávātaḥ sahásraretā abhí vájam arsha | índrāyendo pávamāno manīshy àṅsór ūrmím īraya gá ishaṇyán || 8 || pári priyáḥ kaláṣe devávāta índrāya sómo ráṇyo mádāya | sahásradhāraḥ ṣatávāja índur vājí ná sáptiḥ sámanā jigāti || 9 || sá pūrvyó vasuvíj jáyamāno mṛijānó apsú duduhānó ádrau | abhiṣastipá bhúvanasya rájā vidád gātúm bráhmaṇe pūyámānaḥ || 10 || 7 ||

॥८॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥११॥
यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् ।
एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ॥१२॥
पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः ॥१३॥

tváyā hí naḥ pitáraḥ soma púrve kármāṇi cakrúḥ pavamāna dhírāḥ | vanvánn ávātaḥ paridhíṅr áporṇu vīrébhir áṣvair maghávā bhavā naḥ || 11 || yáthápavathā mánave vayodhá amitrahá varivovíd dhavíshmān | evá pavasva dráviṇaṃ dádhāna índre sáṃ tishṭha janáyáyudhāni || 12 || pávasva soma mádhumāṅ ṛitávāpó vásāno ádhi sáno ávye | áva dróṇāni ghṛitávānti sīda madíntamo matsará indrapáṇaḥ || 13 ||

The elixir is the exhilarator; it harms the foes in battles, and yet itself never harmed. It flows through a thousand streams; it resists strength and vigour of the enemy. Being purified, O sage-like flowing elixir, may you mixed with milk send waves of thrill for the resplendent self. 8

The pleasing delightful elixir approached by divine powers, proceeds to the cosmos to exhilarate the resplendent self; the thousand-streamed and vigorous, the divine elixir proceeds like a strong horse to battle. 9

The eternal divine elixir, from its inception, is the finder of the hidden treasure; it is cleaned in the waters and milked under the pressing stones. It is the defender against enemies, and is the sovereign of the world; when purified for the worship, it leads the worshipper along the right path. 10

O flowing elixir, with your assistance, our ancient and wise sages have been performing their sacred duties; may you, fighting the foes and remaining unvanquished, slay the wicked enemies, open the enclosures and enrich us with large gifts of wealth, vigour and children. 11

As you have been flowing to the earliest man, flow onward now possessing food, slaying enemies, acquiring wealth, having oblations, and bringing riches to us. May you abide yourself in the resplendent self and manifest your power of weapons. 12

Flow onward, O elixir, rich in sweetness, holy and enrobed in the waters; flow across the elevated fleecy filter, then come down to the water-holding vessels. You are exhilarating thought-evoking and gladdening, and as such a special beverage of the resplendent self. 13

वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ ।
सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥१४॥
एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः ।
पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळ्हा ॥१५॥

vrishṭím diváḥ ṣatádhāraḥ pavasva sahasrasá vājayúr devávītau | sáṃ síndhubhiḥ kaláṣe vāvaṣānáḥ sám usríyābhiḥ pratirán na áyuḥ || 14 || eshá syá sómo matíbhiḥ punānó 'tyo ná vājí táratíd árātīḥ | páyo ná dugdhám áditer ishirám urv ìva gātúḥ suyámo ná vóḷha || 15 || 8 ||

॥९॥ स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम ।
अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ॥१६॥
शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति वह्निं मरुतो गणेन ।
कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥१७॥
ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥१८॥

svāyudháḥ sotríbhiḥ pūyámāno 'bhy àrsha gúhyaṃ cáru náma | abhí vájaṃ sáptir iva ṣravasyábhí vayúm abhí gá deva soma || 16 || ṣíṣuṃ jajñānáṃ haryatáṃ mrijanti ṣumbhánti váhnim marúto gaṇéna | kavír gīrbhíḥ kávyena kavíḥ sán sómaḥ pavítram áty eti rébhan || 17 || ríshimanā yá rishikrít svarsháḥ sahásraṇīthaḥ padavíḥ kavīnám | tritíyaṃ dháma mahisháḥ síshāsan sómo virájam ánu rājati shṭúp || 18 ||

It is the one, that flows in a hundred streams, pours rain from the firmament. It is the one, who is the giver of hundred-fold wealth, and the bestower of food at the assembly of the divine powers; it is always eager to mix with the waters in the pitchers and reservoirs, and also with milk and curds. May it prolong our life. 14

This divine elixir, sanctified with praises, moves like a strong horse and overthrows adversities; it is strong like the pure milk freshly taken from the cow; it is enjoyable like a broad road, easily controllable like a docile well-trained horse. 15

O divine elixir, purified by the divine pressers, armed with noble weapons, may you send your secret desirable form (into the pitcher). May you like a horse bring us food in fulfilment of our desire for nourishment; grant us life and bring us wisdom. 16

They cleanse the charming infant elixir at its birth; the vital elements adorn its chariot with their associates. Being wise with songs, wise with wisdom, the elixir passes through the ultra-psychic filter. 17

The mighty divine elixir, with the mind of a seer and with actions of a sage, praised by thousands of hymns, and a leader of the wise, stays in the superlative (i.e. the third) region. Being praised, it adds lustre to the resplendent self. 18

चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥१९॥
मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानाम् ।
वृषेव यूथा परि कोशमर्षन्कनिक्रदच्चम्वोरा विवेश ॥२०॥

camūsháe chyenáḥ ṣakunó vibhrítvā govindúr drapsá áyudhāni bíbhrat | apā́m ūrmíṃ sáeamānaḥ samudráṃ turíyaṃ dháma mahishó vivakti || 19 || máryo ná ṣubhrás tanvàm mṛijānó 'tyo ná sṛítvā sanáye dhánānām | vṛísheva yūthá pári kóṣam árshan kánikradac camvòr ā́ viveṣa || 20 || 9 ||

॥१०॥ पवस्वेन्दो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष ।
क्रीळञ्चम्वोरा विश पूयमान इन्द्रं ते रसो मदिरो ममत्तु ॥२१॥
प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः कलशाँ आ विवेश ।
साम कृण्वन्त्सामन्यो विपश्चित्क्रन्दन्नेत्यभि सख्युर्न जामिम् ॥२२॥
अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इन्दुः ।
सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥२३॥
आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः ।
हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनाम् ॥२४॥

pávasvendo pávamāno máhobhiḥ kánikradat pári vā́rāṇy arsha | krílañ camvòr ā́ viṣa pūyámāna índraṃ te ráso madiró mamattu || 21 || prásya dhárā bṛihatír asṛigrann aktó góbhiḥ kalásāñ ā́ viveṣa | sáma kṛiṇván samanyò vipaṣcít krándann ety abhí sákhyur ná jāmím || 22 || apaghnánn eshi pavamāna ṣátrūn priyā́ṃ ná jāró abhígīta índuḥ | sídan váneshu ṣakunó ná pátvā sómaḥ punānáḥ kaláṣeshu sáttā || 23 || ā́ te rúcaḥ pávamānasya soma yósheva yanti sudúghāḥ sudhā́rāḥ | hárir ánītaḥ puruvā́ro apsv ácikradat kaláṣe devayūnā́m || 24 || 10 ||

The mighty elixir, seated on the bowl of universe, is praiseworthy, competent, kept in the sacrificial vessels, ready to mix with milk flowing and staying in utensils. It mixes with the waters and extending its form in the firmament; it adorns the fourth abode (the bliss-sheath). 19

Cleansing its body like a richly-decorated man, flowing to acquire riches like a rapid horse, rushing to the receptacle like a bull to the herd, the elixir repeatedly enters the cosmic reservoir with a roar. 20

O divine elixir, purified by the venerable priests, rush through the cosmic filter, crying repeatedly, may you after purification, sportingly rest in the pitcher. Let your exhilarating ambrosia put the resplendent self into the ecstasy of bliss. 21

Its copious streams are effusing in all their fulness. They are blended with milk and curds. Finally they flow onward and enter the cosmic pitchers; uttering the Saman chants, the elixir, skilful and omniscient, hastens onwards, just as a lover to a friendly beloved. 22

O flowing elixir, eulogized, you come chasing our foes, as a lover to his darling, or as a bird flies back to her nest. You finally settle in the reservoirs, having been mixed with water. 23

O elixir, effused and purified, your lustres emerge out with abundant sweetness and in copious streams like a woman (feeding the child with her breast milk). The golden-hued elixir, loved by all, has been brought to the altar and roars repeatedly in the goblet of the God-loving worshippers. 24

[अथ षष्ठोऽनुवाकः ॥]

(९७) सप्तनवतितमं सूक्तम्

(१–५८) अष्टपञ्चाशदृचस्यास्य सूक्तस्य (१–३) प्रथमादितृचस्य मैत्रावरुणिर्वसिष्ठः, (४–६) चतुर्थ्यादितृचस्य वासिष्ठ इन्द्रप्रमतिः, (७–९) सप्तम्यादितृचस्य वासिष्ठो वृषगणः, (१०–१२) दशम्यादितृचस्य वासिष्ठो मन्युः, (१३–१५) त्रयोदश्यादितृचस्य वासिष्ठ उपमन्युः, (१६–१८) षोडश्यादितृचस्य वासिष्ठो व्याघ्रपात्, (१९–२१) एकोनविंश्यादितृचस्य वासिष्ठः शक्तिः, (२२–२४) द्वाविंश्यादितृचस्य वासिष्ठः कर्णश्रुत्, (२५–२७) पञ्चविंश्यादितृचस्य वासिष्ठो मृळीकः, (२८–३०) अष्टाविंश्यादितृचस्य वासिष्ठो वसुक्रः, (३१–४४) एकत्रिंश्यादिचतुर्दशर्चां शाक्त्यः पराशरः, (४५–५८) पञ्चचत्वारिंश्यादिचतुर्दशानामाङ्गिरसः कुत्स ऋषयः । पवमानः सोमो देवता । त्रिष्टुप् छन्दः ॥

॥११॥ अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमान्ति होता ॥१॥
भद्रा वस्त्रा समन्या३ वसानो महान्कविर्निवचनानि शंसन् ।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥२॥
समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥३॥
प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय ।
स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः ॥४॥
इन्दुर्देवानामुप सख्यमायन्त्सहस्रधारः पवते मदाय ।
नृभिः स्तवानो अनु धाम पूर्वमगन्निन्द्रं महते सौभगाय ॥५॥

97.

Asyá preshā́ hemánā pūyámāno devó devébhiḥ sám aprikta rásam | sutáḥ pavítram páry eti rébhan mitéva sádma paśumánti hótā || 1 || bhadrā́ vástrā samanyā̀ vásāno mahā́n kavír nivácanāni śáṁsan | ā́ vacyasva camvòḥ pūyámāno vicakshaṇó jā́grivir devávītau || 2 || sám u priyó mrijyate sā́no ávye yaśástaro yaśásāṃ kshaíto asmé | abhí svara dhánvā pūyámāno yūyám pāta svastíbhiḥ sádā naḥ || 3 || prá gāyatābhy àrcāma devā́n sómaṃ hinota mahaté dhánāya | svādúḥ pavāte áti vā́ram ávyam ā́ sīdāti kaláśaṃ devayúr naḥ || 4 || índur devā́nām úpa sakhyám āyán sahásradhāraḥ pavate mádāya | nríbhi stávāno ánu dhā́ma pū́rvam áganm índram mahaté saúbhagāya || 5 || 11 ||

97

The potency of the effused pure shining elixir is further activated by the touch of gold (from the rings in the fingers of priests), and the juice assumes from several contacts other divine characteristics. It then proceeds with a thrilling sound to the ultra-psychic filter, like the ministrant priest moving to the hall where domestic animals are kept with care. 1

O great wise divine elixir, clothed in its auspicious vestments, the inspirer of praises, may you flow on into the cosmic vessels when purified. You are sagacious and vigilant at the divine scarifice. 2

(The elixir is) most famous of the famous, the earth-born, and the conciliator; it is cleansed for us by passing through fleecy filter placed at a high level; it roars aloud in the firmament when clarified; may you protect us now and ever with blessings. 3

We shall now sing praises to Nature's bounties; may you specially pay compliments to the elixir for the acqirement of great wealth. The sweet-flavoured elixir passes through the fleecy cosmic filter. Beloved of Nature's bounties, it alights on and stays in the cosmic pitcher. 4

The divine elixir, desirous of entering into the friendship of Nature's bounties, flows in a thousand streams for their exhilaration. Glorified by the priests, it proceeds to its initial place. It goes to the resplendent self for the prosperity (of the entire family). 5

॥१२॥ स्तोत्रे राये हरिरर्षा पुनान इन्द्रं मदो गच्छतु ते भराय ।
देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः ॥६॥
प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥७॥
प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः ।
आङ्गूष्यं१ पवमानं सखायो दुर्मर्षं साकं प्र वदन्ति वाणम् ॥८॥

stotré rāyé hárir arshā punāná índram mádo gachatu te bhárāya | devaír yāhi sarátham rádho áchā yūyám pāta svastíbhiḥ sádā naḥ || 6 || prá kā́vyam uṣáneva bruvāṇó devó devā́nām jánimā vivakti | máhivrataḥ ṣúcibandhuḥ pāvakáḥ padā́ varāhó abhy èti rébhan || 7 || prá haṅsā́sas tṛipálam manyúm áchāmā́d ástam vṛíshagaṇā ayāsuḥ | āṅgūshyàm pávamānam sákhāyo durmársham sākám prá vadanti vāṇám || 8 ||

स रंहत उरुगायस्य जूतिं वृथा क्रीळन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः ॥९॥
इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ॥१०॥

sá raṅhata urugāyásya jūtím vṛíthā krīḷantam mimate ná gā́vaḥ | parīṇasám kṛiṇute tigmáṣṛiṅgo dívā hárir dádṛiṣe náktam ṛijráḥ || 9 || índur vājī́ pavate gónyoghā índre sómaḥ sáha ínvan mádāya | hánti ráksho bā́dhate páry árātīr várivaḥ kṛiṇván vṛijánasya rā́jā || 10 || 12 ||

Along with our chant of hymns, O green-tinted and purified, may you flow onward for our riches. May your exhilarating beverage animate the soul to a victory in a battle. May you share the chariot with Nature's other bounties to procure us wealth; may you protect us now and ever with blessing. 6

The divine seer, the chanter and the poet knows the entire geneology of the divine creation, which he proclaims. Assiduous in pious observances, possessor of brilliant radiance and brightened, the elixir of bliss approaches the vessels, making a roar like a wild boar with its foot. 7

Hosts of heroes assailed by enemies come to the divine elixir for final help and protection, for it is swift-shooting and foe-despising. Friends come and play on musical instruments in honour of the praiseworthy irresistible elixir. 8

Praised by many, the elixir moves rapidly on its path; other speedy bodies cannot overtake it; it is moving and smoothly and steadily. The elixir with sharp-horns (or penetrating brilliance) displays manifold radiance; the elixir appears golden-hued by day and shines silvery by night. 9

The powerful flowing elixir, with copious juice flowing down, streams forth, infusing strength into the resplendent soul for exhilaration. It is the conferer of wealth, the king of vigour; it crushes malignities and harasses the enemies. 10

॥१३॥

अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥११॥
अभि प्रियाणि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन् ।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥१२॥
वृषा शोणो अभिकनिक्रदद्गा नदयन्नेति पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेमाम् ॥१३॥

ádha dhárayā mádhvā pṛicānás tiró róma pavate ádri-dugdhaḥ | índur índrasya sakhyáṃ jushāṇó devó devásya matsaró mádāya || 11 || abhí priyáṇi pavate punānó devó deván svéna rásena pṛiñcán | índur dhármāṇy ṛituthá vásāno dáṣa kshípo avyata sáno ávye || 12 || vṛíshā ṣóṇo abhi-kánikradad gá nadáyann eti pṛithivím utá dyám | índra-syeva vagnúr á ṣṛiṇva ājaú pracetáyann arshati vácam émám || 13 ||

रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।
पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥१४॥
एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नैः ।
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥१५॥

rasáyyaḥ páyasā pínvamāna īráyann eshi má-dhumantam aṅṣúm | pávamānaḥ saṃtaním eshi kṛiṇvánn índrāya soma parishicyámānaḥ || 14 || evá pavasva madiró mádāyodagrābhásya namáyan vadhasnaíḥ | pári várṇam bháramāṇo rúṣantaṃ gavyúr no arsha pári soma siktáḥ || 15 || 12 ||

Milked forth by the stones, the divine elixir flows through the cosmic filter with its sweet-flavoured streams; the holy exhilarating elixir rejoices in the company of the resplendent self. It gives out the divine sap for the enjoyment of every element that is divine in us. 11

Clad in pleasing radiance, suited to every season, the sportive divine elixir flows brightened; in its own essence, it goes to every easy element divine in us. The ten fingers help it in the fleecy cosmic filter placed at a high level. 12

The red bull, the mighty divine elixir, bellowing after the kine, goes with a roar through heaven and earth; its voice is heard as the voice of the resplendent self engaged in battle; encouraging and manifesting itself, it raises this voice. 13

Sweet and flavoured, and dripping with milk, the elixir, when expressed, purified and brightened, goes onward for the resplendent self in a continuous stream. 14

O divine elixir, may you, the exhilarator, flow on; for smiting the water-holding clouds with weapons, flow to us. Assuming all your brilliant forms, with a desire to mix with milk and curds, may you come to us in the sacrificial vessels. 15

॥१४॥ जुष्टी न इन्दो सुपथा सुगान्युरौ पवस्व वरिवांसि कृण्वन् ।
घनेव विष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥१६॥
वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुम् ।
स्तुकेव वीता धन्वा विचिन्वन्बन्धूँरिमाँ अवराँ इन्दो वायून् ॥१७॥

jushṭví na indo supáthā sugány uraú pavasva várivāṅsi kriṇván | ghanéva víshvag duritáni vighnánn ádhi shṇúnā dhanva sáno ávye || 16 || vrishṭím no arsha divyám jigatnúm íḷāvatīm ṣaṃgáyīṃ jīrádānum | stúkeva vītá dhanvā vicinván bándhūṅr imáṅ ávarāṅ indo vāyúṅ || 17 ||

ग्रन्थिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम ।
अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् ॥१८॥
जुष्टो मदाय देवतात इन्दो परि ष्णुना धन्व सानो अव्ये ।
सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये ॥१९॥
अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।
एते शुक्रासो धन्वन्ति सोमा देवासस्ताँ उप याता पिबध्यै ॥२०॥

granthím ná ví shya grathitám punāná rijúm ca gātúm vrijinám ca soma | átyo ná krado hárir á srijānó máryo deva dhanva pastyàvān || 18 || júshṭo mádāya devátāta indo pári shṇúnā dhanva sáno ávye | sahásradhārah surabhír ádabdhaḥ pári srava vájasātau nrisháhye || 19 || araṣmáno yè 'rathá áyuktā átyāso ná sasrijānása ājaú | eté ṣukráso dhanvanti sómā dévāsas táṅ úpa yātā píbadhyai || 20 || 14 ||

Pleased with our invocations, O elixir, flow to us. Granting us riches, may you come by holy paths and be easily acquired; may you beat down the demoniac obstacles on every side as with a club; run over the fleecy filter placed at an elevation. 16

Pour on us celestial rains, quick-falling, food-giving, health-providing, and promptly munificent. O elixir, send these breezes of lower regions which move like a kinsman seeking beloved infants. 17

O divine elixir, while being brightened and filtered, liberate me from knotted tangles of the world; grant me a straight path and strength. O golden-hued divine-elixir, when you flow, you spell out a sound as that of a moving horse. Flow on and on, O elixir, and stay in your receptacle which is your final dwelling. 18

O divine elixir, flow onward in a stream from the fleecy filter placed at an elevated summit for our delight. O inviolate, fragrant, irresistible, flow on for the acquisition of food that causes victory in the battle. 19

These brilliant divine elixirs flow like horses let loose in the battle without reins, without chariots, and unharnessed; (they finally come to the vessels and stored). May you, O Nature's bounties, come near to enjoy them. 20

So, O divine elixir, pour the water from the firmament into the cosmic vessels; may the elixir bestow upon us desirable riches in abundance, brave offspring and strength. 21

The zealous worshippers utter hymns in the praises of the elixir just as a vociferous (crowd) praises a distinguished prince and places the demands for fulfilment. Milk from the aspirant cows is mixed with the elixir in the pitcher for its gratification. 22

The divine elixir is the benefactor of givers; it pours blessings on the liberal givers. The intelligent elixir distils its true beverage for the truth-abiding resplendent self. The radiant elixir is the sustainer of strength; it is carefully handled by the ten fingers (when the herbal plant is cleansed and squeezed for its sap). 23

The elixir is purified through the cosmic filters. It is the observer of man and the sovereign of immortal Nature as well as mortals; it stays both in the organic and inorganic worlds. The elixir mixes completely in a nice form with clear and pleasing waters. 24

Hasten, O divine elixir, to give nourishing food to the self and to our vital organs. Come to us like a horse; brings us food; may we acquire wealth; give us abundant thousand-fold food; O elixir, when adorned, may you become the dispenser of riches. 25

When mixed with waters, may the juices of divine elixir, delightful to natural forces, bring us a dwelling and brave children. The elixir is rich in all boons. They, the juices, guide us like the ministrant priests. These elixirs are the precursors of divine favours; they are ever used in every sacrifice; they are acceptable to all; they are the performers of celestial sacrifice and the givers of superb bliss. 26

Divine elixir is the beverage of Nature's bounties; may it flow at the cosmic sacrifice for our abundant food; urged on by you, may we overcome even mighty adversaries in battle; may you render heaven and earth happy abodes for us. 27

Yoked by priests (strong men), may you, O elixir, neighing like a horse, terrible as a lion, swifter than thought, pour happiness upon us. May you flow forth and be directed hitherward by those paths, which are the most direct, most up to date, for our happiness and concord. 28

O elixir, you are issuing forth through hundred streams for nourishing Nature's bounties. The sages brighten these thousand streams. O elixir, pour wealth upon us from heaven; you are the precursor of abundant riches. 29

The streams of divine elixir descend from heaven as the rays of the sun. Like a prudent king, the elixir does not abandon his friend at all. As a virtuous son engaged in pious acts gives comforts to the family, so may our mankind receive your blessings for success and victory and immunity from defeat. 30

७॥ प्र ते धारा मधुमतीरसृग्रन्वारान्यत्पूतो अत्येष्यव्यान् ।
पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः ॥३१॥
कनिक्रददनु पन्थामृतस्य शुक्रो वि भास्यमृतस्य धाम ।
स इन्द्राय पवसे मत्सरवान्हिन्वानो वाचं मतिभिः कवीनाम् ॥३२॥
दिव्यः सुपर्णोऽव चक्षि सोम पिन्वन्धाराः कर्मणा देववीतौ ।
एन्दो विश कलशं सोमधानं क्रन्दन्निहि सूर्यस्योप रश्मिम् ॥३३॥

prá te dhā́rā mádhumatīr asṛigran vā́rān yát pūtó atyéshy ávyān | pávamāna pávase dhā́ma gónāṃ jajñānáḥ sū́ryam apinvo arkaíḥ || 31 || kánikradad ánu pánthām ṛitásya ṣukró ví bhāsy amṛítasya dhā́ma | sá índrāya pavase matsarávān hinvānó vā́cam matíbhiḥ kavīnā́m || 32 || divyáḥ suparṇó 'va cakshi soma pínvan dhā́rāḥ kármaṇā devávītau | éndo viṣa kaláṣaṃ somadhā́naṃ krándann ihi sū́ryasyópa raṣmím || 33 ||

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥३४॥
सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥३५॥

tisró vā́ca īrayati prá váhnir ṛitásya dhītím bráhmaṇo manīshā́m | gā́vo yanti gópatim pṛichámānāḥ sómaṃ yanti matáyo vāvaṣānā́ḥ || 34 || sómaṃ gā́vo dhenávo vāvaṣānā́ḥ sómaṃ víprā matíbhiḥ pṛichámānāḥ | sómaḥ sutáḥ pūyate ajyámānaḥ sóme arkā́s trishṭúbhaḥ sáṃ navante || 35 || 17 ||

Your exhilarating streams with all their sweetness are let loose when you pass purified through the cosmic fleecy filter; O divine elixir, may you flow supported by the milk of cattle; as soon as generated, you fill the sun with your radiance. 31

Roaring repeatedly along the path of truth and eternal order, may you shine as the banner of immortality. May you flow, providing exhilaration to the resplendent self. May you send forth your voice while the sages are engaged in chanting hymns of praise. 32

O divine elixir, you are celestial and with attractive leaves (or feathers) you look down upon us from all sides. May you pour forth your streams of bliss during the sacred works of the pious; may you enter into the cosmic reser-vior and roaring aloud approach the rays of the radiant sun. 33

The sage, radiant like fire, utters the triple speech (Rk, Yajus, Saman); he speaks the wisdom of the supreme Lord, who sustains the universal order; the praises, the channels of intellect, come to the divine elixir with eager-ness, as if the cows come to the cowherd, their master. 34

The milch-kine come to this divine elixir with eagerness: sages come to it with inquisitive mind; the elixir, effused and filtered, is brightened and blended with milk; The divine elixir is invoked by chanting hymns in Tristup (and other metres). 35

॥१८॥ एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
इन्द्रमा विश बृहता रवेण वर्धया वाचं जनया पुरन्धिम् ॥३६॥
आ जागृविर्विप्र ऋता मतीनां सोमः पुनानो असदच्चमूषु ।
सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥३७॥
स पुनान उप सूरे न धातोभे अप्रा रोदसी वि ष आवः ।
प्रिया चिद्यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ॥३८॥

evā́ naḥ soma parishicyámāna ā́ pavasva pūyámānaḥ svastí | índram ā́ viṣa brihatā́ rávena vardháyā vā́cam janáyā púramdhim || 36 || ā́ jā́grivir vípra ritā́ matīnā́m sómaḥ punānó asadac camū́shu | sápanti yám mithunā́so níkāmā adhvaryávo rathirā́saḥ suhástāḥ || 37 || sá punāná úpa sū́re ná dhā́tóbhé aprā ródasī ví shá āvaḥ | priyā́ cid yásya priyasā́sa ūtí sá tū́ dhánam kāríṇe ná prá yaṅṣat || 38 ||

स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत् ।
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ॥३९॥
अक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः ॥४०॥

sá vardhitā́ várdhanaḥ pūyámānaḥ sómo mīḍhvā́ṅ abhí no jyótishāvīt | yénā naḥ pū́rve pitáraḥ padajñā́ḥ svarvído abhí gā́ ádrim ushṇán || 39 || ákrān samudráḥ prathamé vídharmañ janáyan prajā́ bhúvanasya rā́jā | vríshā pavítre ádhi sā́no ávye brihát sómo vāvridhe suvāná índuḥ || 40 || 18 ||

O elixir of the life-force, while being filtered and purified, may you flow for our welfare. May you enter with a great roar and zeal into the soul; please foster our praise, and generate abundant understanding in us. 36

The vigilant elixir of life force, the knower of true praises, (the possessor of superb intellects) after purification stays in vessels. The auspicious pious priests, the leaders of the worship, working in collaboration, are pleased to touch by their hands this elixir. 37

The purified brightened elixir goes to the resplendent self, as the year approaches the sun; it fills both heaven and earth with radiance; it drives away the darkness with its light; may it, the beloved elixir, whose streams are for our preservation, bestow upon us wealth like wages given to a labourer. 38

May the divine elixir, the augmenter and self-augmenting, the showerer of benefits, being purified protect us with his radiance; through it our forefathers, tracing the foot-marks, cognizant of all things, have been finding the stolen cows concealed in the caves behind the rocks. 39

The divine elixir, the king of all beings, holds water in the outstretched ocean of firmament. Having generated its progeny here, it traverses further across. The brilliant elixir, the showerer of benefits, when effused is mixed with water, where it effervesces to abundance. Then it is made to pass through the cosmic fleecy filter, placed at an elevation. 40

॥१०॥ महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥४१॥
मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः ।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ॥४२॥
ऋजुः पवस्व वृजिनस्य हन्तापामीवां बाधमानो मृधश्च ।
अभिश्रीणन्पयः पयसाभि गोनामिन्द्रस्य त्वं तव वयं सखायः ॥४३॥

mahát tát sómo mahishás cakārāpám yád gárbhó 'vriṇīta devā́n | ádadhād índre pávamāna ójó 'janayat sū́rye jyótir índuḥ || 41 || mátsi vāyúm ishṭáye rā́dhase ca mátsi mitrā́váruṇā pūyámānaḥ | mátsi sárdho mā́rutam mátsi devā́n mátsi dyā́vāprithivī́ deva soma || 42 || rijúḥ pavasva vrijinásya hantā́pā́mīvām bā́dhamāno mrídhas ca | abhisrīṇán páyaḥ páyasābhí gónām índrasya tvám táva vayám sákhāyaḥ || 43 ||

मध्वः सूदं पवस्व वस्व उत्सं वीरं च न आ पवस्वा भगं च ।
स्वदस्वेन्द्राय पवमान इन्दो रयिं च न आ पवस्वा समुद्रात् ॥४४॥
सोमः सुतो धारयात्यो न हित्वा सिन्धुर्न निम्नमभि वाज्यक्षाः ।
आ योनिं वन्यमसदत्पुनानः समिन्दुर्गोभिरसरत्समद्भिः ॥४५॥

mádhvaḥ sū́dam pavasva vásva útsam vīrám ca na ā́ pavasvā bhágam ca | svádasvéndrāya pávamāna indo rayím ca na ā́ pavasvā samudrā́t || 44 || sómaḥ sutó dhā́rayā́tyo ná hítvā síndhur ná nimnám abhí vājy àkshāḥ | ā́ yónim ványam asadat punānáḥ sám índur góbhir asarat sám adbhíḥ || 45 || 19 ||

The mighty elixir achieves the mighty work. Being the germ of the waters, it nourishes Nature's bounties. In its pure form, it gives vigour to the resplendent self and generates radiance in the sun. 41

Exhilarate wind for our food and wealth, exhilarate the sun and ocean as soon as you are filtered; exhilarate the troop of the vital principles; exhilarate all the divine powers; exhilarate heaven and earth, O divine elixir. 42

O divine bliss, you flow out straight-way with ease; you are the slayer of the crooked and the wicked; you drive away diseases, ills and malices. May you flow onward; your juice is mixed with the milk of cows. And then you become the friend of the resplendent self, the aspirant, and we are your friends. 43

Pour forth a spring of treasure; provide us sweetness, grant us brave offspring and happy fortune; may sweetness flow for the aspirant, the resplendent self, O elixir, when purified; pour riches upon us from the firmament. 44

The divine elixir of life force, effused in a stream, speeds up like a courser. It flows out forcefully (from a filter) like a river speeding downward; purified, it rests in the wooden vessel; the elixir mixes with the waters, milk and curds. 45

॥२०॥ एष स्य ते पवत इन्द्र सोमश्चमूषु धीर उशते तवस्वान् ।
स्वर्चक्षा रथिरः सत्यशुष्मः कामो न यो देवयतामसर्जि ॥४६॥
एष प्रत्नेन वयसा पुनानस्तिरो वर्पांसि दुहितुर्दधानः ।
वसानः शर्म त्रिवरूथमप्सु होतेव याति समनेषु रेभन् ॥४७॥
नू नस्त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः ।
अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा ॥४८॥

eshá syá te pavata indra sómaṣ camúshu dhíra uṣaté távasvān | svàrcakshā rathiráḥ satyáṣushmaḥ kámo ná yó devayatám ásarji || 46 || eshá pratnéna váyasa punānás tiró várpāṅsi duhitúr dádhanaḥ | vásānaḥ ṣárma trivárūtham apsú hóteva yāti sámaneshu rébhan || 47 || nú nas tvám rathiró deva soma pári srava camvòḥ pūyámanaḥ | apsú svádishṭho mádhumāṅ ṛitávā devó ná yáḥ savitá satyámanmā || 48 ||

अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः ।
अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥४९॥
अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।
अभि चन्द्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥५०॥

abhí vayúm vīty àrshā gṛiṇanò 'bhí mitrávárunā pūyámānaḥ | abhí náraṃ dhījávanaṃ ratheshṭhám abhíndraṃ vṛíshaṇaṃ vájrabahum || 49 || abhí vástra suvasanány arshabhí dhenúḥ sudúghāḥ pūyámanaḥ | abhí candrá bhártave no híranyābhy áṣvān rathíno deva soma || 50 || 20 ||

The filtered sagacious elixir flows into the receptacles for your sake, O aspirant, the resplendent soul, since you crave for it; it is all-seeing, car-borne, truly potent, and has been sent forth to fulfil the wish of true devotees and sacrificers. 46

The divine elixir, that comes to the sacrifice has the following characteristics: from the earliest times, the practice has been to mix it with nutrients and filter; in spite of the land and climatic variations, it remains uninfluenced; it acclimatizes itself in respect to three variations: hot, cold and moisture; with a thrilling sound it mixes with waters. 47

The elixir of divine force in flow is speedy like a chariot, it is filtered through sacrificial strainers, and is instilled into waters with which it mixes; it is sweet, tasting like honey, it is sweet stimulator and impeller; like other divinities, it responds to sincere praises. 48

Being eulogized, may it hasten to the wind: being purified, hasten to the sun and ocean; hasten to the twin divines. The leader, quick as thought and mounted on a car, may you quickly approach the resplendent self, the showerer and the wielder of the thunderbolt. 49

O divine elixir, while being filtered proceed to handsome garments, proceed to cows to be milked; proceed to silver and gold for maintenance; proceed to horses fit for chariots. 50

॥२१॥ अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।
अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥५१॥
अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिदत्र वातो न जूतः पुरुमेधश्चित्तकवे नरं दात् ॥५२॥

abhi no arsha divyá vásuny abhí víṣvá párthivá puyámánaḥ | abhí yéna dráviṇam aṣnávamabhy àrsheyáṃ jamadagniván naḥ || 51 || ayá pavá pavasvainá vásuni maṅṣcatvá indo sárasi prá dhanva | bradhnáṣ cid átra váto ná jutáḥ purumédhaṣ cit tákave náraṃ dat || 52 ||

उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥५३॥
महीमे अस्य वृषनाम शूषे माँश्चत्वे वा पृशने वा वधत्रे ।
अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥५४॥
सं त्री पवित्रा विततान्येष्यन्वेकं धावसि पूयमानः ।
असि भगो असि दात्रस्य दातासि मघवा मघवद्भ्य इन्दो ॥५५॥

utá na ená pavayá pavasvádhi ṣruté ṣraváyyasya tírthé | shashṭíṃ sahásra naigutó vásūni vrikshámṃ ná pakváṃ dhūnavad ráṇāya || 53 || máhimé asya vríshanáma ṣushé maṅṣcatve vá príṣane vā vádhatre | ásvāpayan nigútaḥ snehá yac cápamítrañ ápācíto acetáḥ || 54 || sáṃ trí pavítra vítatāny eshy ánv ékaṃ dhāvasi pūyámānaḥ | ási bhágo ási datrásya dātási maghávā maghávadbhya indo || 55 || 21 ||

While being filtered and purified, bring us celestial treasures; bring us all earthly treasures, so that we may acquire riches and divinity and become brilliantly blazing. 51

O divine elixir, neat and pure, pour on us all these treasures; flow onward and mix with sacred waters; may you grant the house-holder a son, full of enlightenment, speedy like the wind, and distinguished for numerous dedicated services. 52

O worthy of renown, flow on for us, pure and filtered, at this renowned resting place. May this destroyer of evils drop down for us sixty thousand (countless) treasures, as one shakes a tree whose fruit is ripe, so that we may be victorious in the struggles of life against adversaries. 53

Eagerly do we pray for these two great rewards : the rain of arrows and humiliation of foes; these are the givers of happiness; they are deadly either in a fight on horse-back or in a hand-to-hand fight; it puts the foes to sleep and drives them away; may you, O divine elixir, drive away the unfriendly and unbelievers. 54

You flow forth unto three outstretched filters; you hasten to all of them, one by one in turn; you are auspicious; you are donor of gifts, O divine elixir; you are much more liberal and munificient than any other affluent. 55

॥२२॥ एष विश्ववित्पवते मनीषी सोमो विश्वस्य भुवनस्य राजा ।
द्रप्साँ ईरयन्विदथेष्विन्दुर्वि वारमव्यं समयाति याति ॥५६॥
इन्दुं रिहन्ति महिषा अदब्धाः पदे रेभन्ति कवयो न गृध्राः ।
हिन्वन्ति धीरा दशभिः क्षिपाभिः समञ्जते रूपमपां रसेन ॥५७॥
त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥५८॥

eshá visvavít pavate manīshí sómo vísvasya bhúvanasya rājā | drapsán īráyan vidátheshv índur ví váram ávyam samáyáti yāti || 56 || índum rihanti mahishá ádabdhāḥ padé rebhanti kaváyo ná grídhrāḥ | hinvánti dhírā daśábhiḥ kshípābhiḥ sám añjate rūpám apáṃ rásena || 57 || tváyā vayáṃ pávamānena soma bháre kritáṃ ví cinuyāma śá-śvat | tán no mitró váruṇo māmahantām áditiḥ síndhuḥ prithiví utá dyaúḥ || 58 || 22 ||

(९८) अष्टनवतितमं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य वार्षागिरोऽम्बरीषो भारद्वाज ऋजिश्वा च ऋषी । पवमानः सोमो देवता । (१-१०, १२) प्रथमादिदशर्चां द्वादश्याश्चानुष्टुप्, (११) एकादश्याश्च बृहती छन्दसी ॥

॥२३॥ अभि नो वाजसातमं रयिमर्ष पुरुस्पृहम् ।
इन्दो सहस्रभर्णसं तुविद्युम्नं विभ्वासहम् ॥१॥
परि ष्य सुवानो अव्ययं रथे न वर्माव्यत ।
इन्दुरभि द्रुणा हितो हियानो धाराभिरक्षाः ॥२॥

98.

Abhí no vājasátamaṃ rayím arsha puruspríham | índo sahásrabharṇasaṃ tuvidyumnáṃ vibhvāsáham || 1 || pári shyá suvanó avyáyaṃ ráthe ná vármāvyata | índur abhí drúṇa hitó hiyanó dhárābhir akshāḥ || 2 ||

This all-knowing sage, the elixir of divine life force, the sovereign of the whole world, flows forth; distilling its drops at the holy places this elixir passes to the cosmic fleecy filter from both sides. 56

The adorable, unassailable divine elements sip the divine elixir; they hail it at its station like worshippers coveting for wealth; the skilful priests send forth the elixir after cleansing them with ten fingers : they anoint its body with waters (i.e. the effused elixir is mixed with waters). 57

O elixir, may we ever, with you, effused, pure and filtered, as our ally, win glory and copious wealth in battle; so may the sun, the ocean, our mother Eternity, the lord of rivers, heaven and earth as well enrich us. 58

98

Bring us, O elixir of divine love, strength-bestowing riches, desired by many, supporting thousands, far-celebrated and renowned and overcoming even the mighty foes. 1

When effused, the elixir of divine life force, flows to the cosmic woollen filter, as a well-protected warrior in a chariot covered in mail. In the midst of chants of hymns the wooden casks pour it on the filter and the clear sap flows out in streams. 2

परि ष्य सुवानो अक्षा इन्दुरव्ये मदच्युतः ।
धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः ॥३॥
स हि त्वं देव शश्वते वसु मर्ताय दाशुषे ।
इन्दो सहस्रिणं रयिं शतात्मानं विवाससि ॥४॥
वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः ।
नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ॥५॥
द्विर्यं पञ्च स्वयशसं स्वसारो अद्रिसंहतम् ।
प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त्यूर्मिणम् ॥६॥

pári shyá suvānó aksha índur ávye mádacyutaḥ | dhárā yá ūrdhvó adhvaré bhrajá naíti gavyayúḥ || 3 || sá hí tvám deva ṣáṣvate vásu mártaya daṣúshe | índo sahasríṇam rayím ṣatátmānam vivasasi || 4 || vayám te asyá vritrahan váso vásvaḥ puruspríhaḥ | ní nédishṭhatamā isháḥ syáma sumnásyādhrigo || 5 || dvír yám páñca sváyaṣasam svásāro ádrisaṃhatam | priyám índrasya kámyam prasnāpáyanty ūrmíṇam || 6 || 21 ||

॥२४॥

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥७॥
अस्य वो ह्यवसा पान्तो दक्षसाधनम् ।
यः सूरिषु श्रवो बृहद्दधे स्वर्ण हर्यतः ॥८॥
स वां यज्ञेषु मानवी इन्दुर्जनिष्ट रोदसी ।
देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि ॥९॥

pari tyám haryatám hárim babhrúm punanti várena | yó deván víṣvāñ ít pári mádena sahá gáchati || 7 || asyá vo hy ávasā pánto dakshasádhanam | yáḥ sūríshu ṣrávo brihád dadhé svàr ṇá haryatáḥ || 8 || sá vāṃ yajñéshu mānavī índur janishṭa rodasī | devó devī girishṭhá ásredhan táṃ tuvishváṇi || 9 ||

The shining elixir, being effused, flows through the cosmos, i.e. fleecy filter, diffusing exhilaration all around. Being exalted, it goes in streams to the place of sacrifice, for being mixed with milk and curds. 3

O divine elixir, you grant riches, thousand-fold and hundred-fold treasure, to every one who offers libations. 4

O slayer of wicked, O lord of riches, we are yours; may we be very much close to your much-coveted wealth; O irresistible, may we be near happiness and worthy of sustenance. 5

The elixir is such as is expressed under the self-renowned stones with the waves of thrills. It is dear to the self, loved by all, and flows in streams. The twice-five (i.e. ten) sister-fingers give bath to the elixir plant. 6

It is golden-hued and brown (attractive and nutritious) and coveted by all; they purify it and filter across the filters (attractive and nutritious); it goes to Nature's all bounties with exhilaration. 7

May you drink this strengthening elixir which is loved by all and is brilliant like the sun, and which bestows abundant strength upon its worshippers and enlightened persons. 8

O divine heaven and earth, the well-wisher of the mankind, this elixir plant grows at your sacrifice; it is radiant and abides in hilly tracts; priests express it at the ceremony, where hymns are chanted with sweet rhythm. 9

इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
नरे च दक्षिणावते देवाय सदनासदे ॥१०॥
ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन् ।
अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः ॥११॥
तं सखायः पुरोरुचं यूयं वयं च सूरयः ।
अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥१२॥

índrāya soma pátave vṛitraghné pári shicyase | náre ca dákshiṇāvate deváya sadanāsáde || 10 || té pratnáso vyùshṭishu sómāḥ pavítre aksharan | apaprothantaḥ sanutár hurascítaḥ prātás tā́ñ ápracetasaḥ || 11 || tám sakhāyaḥ purorúcam yūyám vayám ca sūráyaḥ | aṣyáma vájagandhyam sanéma vájapastyam || 12 || 24 ||

(९९) नवनवतितमं सूक्तम्

(१–८) अष्टर्चस्यास्य सूक्तस्य काश्यपौ रेभसूनू ऋषी । पवमानः सोमो देवता । (१) प्रथमर्चो बृहती, (२–८) द्वितीयादिसप्तानाञ्चानुष्टुप् छन्दसी ॥

॥२५॥

आ हर्यताय धृष्णवे धनुस्तन्वन्ति पौंस्यम् ।
शुक्रां वयन्त्यसुराय निर्णिजं विपामग्रे महीयुवः ॥१॥
अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते ।
यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥२॥

99.

Á haryatáya dhṛishṇáve dhánus tanvanti paúṁsyam | ṣukrám vayanty ásurāya nirṇíjam vipám ágrē mahīyúvaḥ || 1 || ádha kshapá párishkṛito vájāñ abhí prá gāhate | yádī vivásvato dhíyo hárim hinvánti yátave || 2 ||

O elixir, you as a beverage, are poured forth for the aspirant, the resplendent self, the crusher of nescience, and for the exhilaration of the munificent worshipper, who sits in the assembly of worship and offers homage. 10

Those eternal elixirs flow into the cosmos at the morning hours, driving away the evil-minded wicked; these elixirs are filtered at the early dawn. 11

May you and we, O friends, enjoy the bright, fragrant and envigorating elixir; may we have the comforts of boarding and lodging. 12

99

People stretch the bow of manly vigour to obtain the blessings of this beloved courageous elixir and worshippers spread out the bright cosmic filter in front of the enlightened wise persons to clarify the mighty elixir. 1

And (the elixir), consecrated by the end of night, plunges into the strengthening food, while the prayers of the worshippers impel the golden-hued elixir to effuse and proceed (to the receiving pitchers). 2

तम॑स्य मर्जयामसि॒ मदो॒ य इ॑न्द्र॒पात॑मः ।
यं गाव॑ आ॒सभि॑र्द॒धुः पु॒रा नू॒नं च॑ सू॒रयः॑ ॥३॥
तं गाथ॑या पुरा॒ण्या पु॑ना॒नम॒भ्य॑नूषत ।
उ॒तो कृ॑पन्त धी॒तयो॑ दे॒वानां॒ नाम॒ बिभ्र॑तीः ॥४॥
तमु॒क्षमा॑णम॒व्यये॒ वारे॑ पुनन्ति धर्ण॒सिम् ।
दू॒तं न पू॒र्वचि॑त्तय॒ आ शा॑सते मनी॒षिणः॑ ॥५॥

tám asya marjayāmasi mádo yá indrapā́tamaḥ | yám gā́va āsábhir dadhúḥ purā́ nūnám ca sūráyaḥ || 3 || tám gā́thayā purāṇyā́ punānám abhy ànūshata | utó kripanta dhītáyo devā́nām nā́ma bíbhratīḥ || 4 || tám ukshámāṇam avyáye vā́re punanti dharṇasím | dūtám ná pūrvácittaya ā́ ṣāsate manīshíṇaḥ || 5 || 25 ||

॥२६॥

स पु॑ना॒नो म॒दिन्त॑मः॒ सोम॑श्च॒मूषु॑ सीदति ।
प॒शौ न रेत॑ आ॒दध॒त्पति॑र्वचस्यते धि॒यः ॥६॥
स मृ॑ज्यते सु॒कर्म॑भिर्दे॒वो दे॒वेभ्यः॑ सु॒तः ।
वि॒दे यदा॑सु संद॒दिर्म॒हीर॒पो वि गा॑हते ॥७॥
सुत॒ इन्दो॑ प॒वित्र॒ आ नृभि॑र्य॒तो वि नी॑यसे ।
इन्द्रा॑य मत्स॒रिन्त॑मश्च॒मूष्वा नि षी॑दसि ॥८॥

sá punānó madíntamaḥ sómaṣ camū́shu sīdati | paṣaú ná réta ādádhat pátir vacasyate dhiyáḥ || 6 || sá mrijyate sukármabhir devó devébhyaḥ sutáḥ | vidé yád āsu saṃdadír mahī́r apó ví gāhate || 7 || sutá indo pavítra ā́ nríbhir yató ví nīyase | índrāya matsaríntamaṣ camū́shv ā́ ní shīdasi || 8 || 26 ||

We purify the sap of that elixir which is exhilarating and fit for the assimilation of the resplendent self and which the cows and men of wisdom have been now and of old taking up by their mouths (cows provide milk to be mixed with the elixir, and wise men chant hymns of praise). 3

They have been celebrating the purified elixir with the ancient hymn of praise, and the sacred songs, bearing the names of divine powers, supplicate it. 4

They, the men of thinking, purify through the cosmic woollen filter the elixir, supporter of all, and sprinkled with milk and waters. They instruct it in advance, as a fore-thought, as taking it to be a messenger to bear their names in the morning prayers. 5

The most exhilarating elixir, being purified, alights on the cosmic vessels; it puts its seed (in the cosmic vessels) as it were to impregnate the heifer. Placed in the pitchers, as this protector of intellect is invoked by the hymns. 6

Effused for the divines, the Lord elixir is cleansed by the skilful priests; it is recognised amongst the people as the giver of riches, and as such, it plunges into the mighty cosmic waters. 7

When effused, and collected by the priests, O elixir, you are taken to the cosmic filter; you are poured in the cups for the aspirant, giving him the sublimest joy. 8

(१००) शततमं सूक्तम्

(१-९) नवर्चस्यास्य सूक्तस्य काश्यपौ रेभसूनू ऋषी । पवमानः सोमो देवता । अनुष्टुप् छन्दः ॥

॥२७॥

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।
वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥१॥
पुनान इन्दवा भर सोम द्विबर्हसं रयिम् ।
त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ॥२॥

100

Abhí navante adrúhaḥ priyám índrasya kā́myam | vatsáṃ ná pū́rva ā́yuni jātáṃ rihanti mātáraḥ || 1 || punāná indav ā́ bhara sóma dvibárhasaṃ rayíṃ | tváṃ vásūni pushyasi víṣvāni dāṣúsho gṛihé || 2 ||

त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः ।
त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥३॥
परि ते जिग्युषो यथा धारा सुतस्य धावति ।
रंहमाणा व्य१व्ययं वारं वाजीव सानसिः ॥४॥
क्रत्वे दक्षाय नः कवे पवस्व सोम धारया ।
इन्द्राय पातवे सुतो मित्राय वरुणाय च ॥५॥

tváṃ dhíyam manoyújaṃ sṛijá vṛishṭíṃ ná tanyatúḥ | tváṃ vásūni pā́rthivā divyā́ ca soma pushyasi || 3 || pári te jigyúsho yathā dhā́rā sutásya dhāvati | ráṅhamāṇā vy àvyáyaṃ vā́raṃ vājíva sāsíḥ || 4 || krátve dákshāya naḥ kave pávasva soma dhā́rayā | índrāya pā́tave sutó mitrā́ya várunāya ca || 5 || 27 ||

100

The faultless cosmic waters approach the elixir, which is dear to the sun and beloved of all; just as the mothers (the cows) like the new-born calf at the early part of the life, similarly, the enlightened persons, free from malice, enjoy the elixir, the favourite of the aspirant and liked by all. 1

O divine elixir, when purified, bring us the riches of both worlds; may you foster all treasures in the house of the donor. 2

May you set free the stream of the elixir, rapid as thought, just as the cloud releases the rain; O elixir, may you foster the treasures, terrestrial and celestial both. 3

Your stream, when effused, is swift-flowing and bountiful; it rushes through the cosmic filter like a swift horse who wins prize on a chariot-race). 4

O sagacious cosmic elixir, flow in a stream for our enlightenment and invigoration; you are poured forth for the joy of lightning, the sun and the ocean. 5

॥२८॥

पव॑स्व वाज॒सात॑मः प॒वित्रे॒ धार॑या सु॒तः ।
इन्द्रा॑य सोम॒ विष्ण॑वे दे॒वेभ्यो॒ मधु॑मत्तमः ॥६॥
त्वां रि॑हन्ति मा॒तरो॒ हरिं॑ प॒वित्रे॑ अ॒द्रुहः॑ ।
व॒त्सं जा॒तं न धे॒नवः॒ पव॑मान॒ विध॑र्मणि ॥७॥
पव॑मान॒ महि॒ श्रव॑श्चि॒त्रेभि॑र्यासि र॒श्मिभिः॑ ।
शर्ध॒न्तमां॑सि जिघ्नसे॒ विश्वा॑नि दा॒शुषो॑ गृ॒हे ॥८॥
त्वं द्यां च॑ महिव्रत पृथि॒वीं चाति॑ जभ्रिषे ।
प्रति॑ द्रा॒पिम॑मुञ्चथाः॒ पव॑मान महित्व॒ना ॥९॥

pávasva vājasátamaḥ pavítre dhárayā sutáḥ | índrāya soma víshṇave devébhyo mádhumattamaḥ || 6 || tvā́ṃ rihanti mātáro hárim pavítre adrúhaḥ | vatsáṃ jātáṃ ná dhenávaḥ pávamāna vídharmaṇi || 7 || pávamāna máhi ṣrávaṣ citrébhir yāsi raṣmíbhiḥ | ṣárdhan támāṅsi jighnase víṣvāni dāṣúsho gṛihé || 8 || tvā́ṃ dyā́ṃ ca mahivrata pṛithivī́ṃ cáti jabhrishe | práti drāpím amuñcathāḥ pávamāna mahitvanā́ || 9 || 28 ||

(१०१) एकोत्तरशततमं सूक्तम्

(१-१६) षोडशर्चस्यास्य सूक्तस्य (१-३) प्रथमादितृचस्य श्यावाश्विरन्धीगुः, (४-६) चतुर्थ्यादितृचस्य नाहुषो ययातिः, (७-९) सप्तम्यादितृचस्य राजर्षिर्मानवो नहुषः, (१०-१२) दशम्यादितृचस्य सांवरणो मनुः, (१३-१६) त्रयोदश्यादिचतुर्ऋचस्य च वैश्वामित्रो वाच्यो वा प्रजापतिर्ऋषयः । पवमानः सोमो देवता । (१, ४-१६) प्रथमर्चश्चतुर्थ्यादित्रयोदशानाञ्चानुष्टुप्, (२-३) द्वितीयातृतीययोश्च गायत्री छन्दसी ॥

॥१॥ पु॒रोजि॑ती वो॒ अन्ध॑सः सु॒ताय॑ मादयि॒त्नवे॑ । अप॒ श्वानं॑ श्नथिष्टन॒ सखा॑यो दीर्घजि॒ह्व्य॑म् ॥१॥

101.

Purójitī vo ándhasaḥ sutā́ya mādayitnáve | ápa ṣvā́naṃ ṣnathishṭana sákhāyo dīrghajihvyàm || 1 ||

Flow onward, O elixir, the giver of food; flow on to the cosmic filter in a stress, when effused; O elixir, you are most sweet for the soul, for the omnipresent Lord and for all other divine powers or men of enlightenment. 6

O golden-hued flowing elixirs, the faultless cosmic mothers caress you upon the cosmic filter at the place of worship, as the milch kine like the new-born calf. 7

O flowing elixir, you traverse the vast firmament with a variety of rays, that surround you; you drive with valour all the glooms away at the house of the liberal donor. 8

O elixir, strong of determinations, you support both heaven and earth; O flowing elixir, endowed with greatness, you put on your coat of mail in majesty. 9

101

O friends, please drive away far from here the long-tongued dog who is looking for an opportunity to share the effused exhilarating divine elixir, the sure granter of victory. 1

The elixir, effused and active, flows in a purifying stream; like a speedy horse, it comes flowing hitherwards. 2

The priests, with all comprehending intelligence, express and squeeze out under stones, the elixir, adorable and unassailable. 3

The expressed and sanctified sweet-flavoured exhilarating juices of divine elixir flow onward for the aspirant, the resplendent self; may you, O exhilarating elixir, proceed to other divine elements also. 4

The devout worshippers say, "O divine elixir, flow forth for the aspirant, the resplendent self"; it is the lord of speech, sovereign of all by its might, and worthy of our adoration. 5

The thousand-streamed ocean of the elixir, the inspirer of hymns, the lord of riches, the devoted friend of the aspirant flows day by day. 6

This divine elixir, being purified, hastens (to the pitcher): it is the provider of nutrition and wealth; it is delightful; it is the lord of the multitude; it illuminates both heaven and earth. 7

The affectionate emulous cows are eager to enjoy the elixir for their exhilaration; the brilliant filtered elixir juices make paths (for themselves to flow). 8

य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् ।
यः पञ्च चर्षणीरभि रयिं येन वनामहे ॥९॥
सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।
मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥१०॥

yá ójishṭhas tám á bhara pávamāna ṣravayyam | yáḥ páñca carshaṇír abhí rayím yéna vánamahai || 9 || sómāḥ pavanta índavo 'smábhyam gatuvíttamaḥ | mitráḥ suvāná arepásaḥ svadhyàḥ svarvídaḥ || 10 || 2 ||

॥३॥

सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि ।
इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥११॥
एते पूता विपश्चितः सोमासो दध्याशिरः ।
सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥१२॥
प्र सुन्वानस्यान्धसो मर्तो न वृत तद्वचः ।
अप श्वानमराधसं हता मखं न भृगवः ॥१३॥
आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।
सरज्जारो न योषणां वरो न योनिमासदम् ॥१४॥

In another passage Max Muller argued persuasively how a comparative study of the religions of mankind would be of the greatest assistance to the missionary and footnoted the statement of a native Indian convert to Christianity who said: "Now I am not going to India to injure their feelings by saying your scripture is all nonsense, is good for nothing; anything outside the old and New Testament is a humbug. No, I tell you I will appeal to the Hindu philosophers, and moralists, and poets, at the same time bringing to them my light, and reasoning with them in the spirit of Christ." In a letter Max Muller is believed to have written to his wife in 1868, he wrote...." yet this edition of mine and the translation of the Vedas will hereafter tell to a great extent on the fate of India and on the growth of millions of souls in that country. It is the root of their religion, and to show them what the root is, is, I feel sure, the only way of uprooting all that has been sprung from it during the last three thousand years." In the context, I find the attitudinal stance of Max Muller's intimate

epistolary expression baffling, and his "chips from a German workshop" somewhat wanting in that standard of objectivity and empathy which we have been accustomed to associate with him and some of the leading nineteenth century western scholars of ancient oriental heritage.

All this is neither to question the undoubted contribution of Christian religion to world culture, nor to raise a polemical debate about missionary precepts and practices, nor to detract from the epoch-making scholarly work of Max Muller and other Western scholars in the field of Vedic studies. We need, however, to put ourselves on guard against denominational or colonial imposition in any guise. We must endeavour in all humility to achieve a more complete and comprehensive understanding of the Vedic traditions, culture and literature in a holistic perspective.

VII

There are no doubt many unanswered questions in Vedic scholarship. What we know in our limited understanding of the Vedas is perhaps no more than a fraction of the totality of the Vedic universe , of ideas, values, institutions, culture and language. We do know, however, that the subtle and sophisticated philosophical efflorescence of Upanishads and Buddhist and Jain philosophies was intimately intertwined with the Vedic roots. As Shri Aurobindo put it:

"Such profound and ultimate thoughts, such systems of subtle and elaborate psychology as are found in the substance of the Upanishads, do not spring out of a previous void. The human mind in its progress marches from knowledge to knowledge, or it renews and enlarges previous knowledge that has been obscured and overlaid, or it seizes on old imperfect clues and is led by them to new discoveries. The thought of the Upanishads supposes great origins anterior to itself....... ."

There is eloquent awareness and acknowledgement of that Vedic "anterior" throughout the history of Indian thought but its

radiant richness was lost on those who either saw the Vedas only as pristine pastoral poetry or as a sourcebook of ritual incantation of elemental gods. Interestingly, Max Muller came to the conclusion that "the authors of the Brahmanas were blinded by theology, the authors of the still later Niruktas were deceived by etymological fictions, and both conspired to mislead by their authority later and more sensible commentators such as Sayana". Adding that Sayana's scholastic notions did not allow him to accept "the free interpretation which comparative study of these venerable documents forces upon the unprejudiced scholar", Max Muller said meaningfully: "We must therefore discover ourselves the real vestiges of these ancient poets". And that is truly the task to which we should address ourselves in the best traditions or the Vedic heritage, always remembering that to commune with the Vedas is to share in a cosmic vision and a universal faith, that what we do know of the Vedas at present may only be a small part of what we may yet discover, and that we are nowhere near the end of the road.

VIII

To revered Swamiji, and the intrepid team of translators including Pandit Satyakam Vidyalankar and Shri Udaivir Viraj Vidyalankar, who have assisted Swamiji, we owe the quality and the steady progress of this work. To my colleagues, Shri Shiv Kumar Shastri, Professor Ved Vyasji, Shri Vishwa Nathji, Shri Naunitlal advocate, Shri Subhash Vidyalankar, I convey my cordial thanks for their unfailing support in our labour of love. There are many other friends and workers of the project who have quietly and unobtrusively extended a helping hand and to whom I owe a word of appreciation. On this occasion my thoughts go to the late Dr. G.L. Datta and the late Dr. Suraj Bhan who were associated with the project closely. An affectionate homage is due in particular to the everlasting memory of my dearest friend, the late Shri Prakash Vir Shastri who was the principal architect and prime mover of this project.

I close my prayerful thanksgiving on this happy occasion by invoking the luminous vastness of Truth in the form of Saraswati, the goddess of learning and inspiration, who awakens our consciousness, enlightens our understanding of the universe, and showers her bountiful blessings on noble pursuits.

"Kamlalaya"
B-8, South Extension-11,
New Delhi-110049.
Pitrismriti, June 21, 1986.

L.M. SINGHVI

ṚGVEDA SAMHITA

ऋग्वेद संहिता

ऋग्वेद संहिता

दशमं मण्डलम्

---

(८७) सप्ताशीतितमं सूक्तम्

(१–२५) पञ्चविंशत्यृचस्यास्य सूक्तस्य भारद्वाजः पायुर्ऋषिः । रक्षोहाग्निर्देवता । (१–२१) प्रथमाद्येकविंशत्यृचां त्रिष्टुप्, (२२–२५) द्वाविंश्यादिचतसृणाञ्चानुष्टुप् छन्दसी ॥

॥५॥

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥१॥
अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः ।
आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन् ॥२॥
उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च ।
उतान्तरिक्षे परि याहि राजञ्जम्भैः सं धेह्यभि यातुधानान् ॥३॥

87.

Rakshohaṇam vājinamājigharmi mitram prathishṭhamupa yāmi ṣarma | ṣiṣāno agniḥ kratubhiḥ samiddhaḥ sa no divā sa rishaḥ pātu naktam ||1|| ayodaṁshṭro arcishā yātudhānānupa spṛiṣa jātavedaḥ samiddhaḥ | ā jihvayā mūradevānrabhasva kravyādo vṛikt-vyapi dhatsvāsan ||2|| ubhobhayā vinnupa dhehi daṁshṭra hiṃsraḥ ṣiṣāno'varam param ca | utāntarikshe pari yāhi rā-mbhaiḥ sam dhehyabhi yatudhānān ||3||

ṚGVEDA SAMHITĀ

BOOK TEN

87

I offer clarified butter to the powerful fire-divine, the destroyer of the wicked. I approach the friendly (fire-divine) for obtaining comfort. Enkindled, sharpened (and thus aroused) by our pious devotees, may the fire divine guard us from evils, by day and by night. 1

O all-knowing, the one with the teeth, as if, of iron, consume with your kindled flame, the malignant germs of diseases; destroy the destructive elements with your tongue; cut up the eaters of flesh and put them within your mouth. 2

The fire-divine is the destroyer of the wicked; it has two rows of teeth. May it sharpen them both, apply them to the wicked elements; and thereby, preserve both the upper and the lower worlds. May you, the radiant fire-divine, march against the wicked in the firmament, and seize the malignant germs of disease with your jaws. 3

यज्ञैरिषूः संनमंमानो अग्ने वाचा शल्यौं अशनिभिर्दिहानः ।
ताभिर्विध्य हृदये यातुधानान्प्रतीचो बाहून्प्रति भङ्ग्ध्येषाम् ॥४॥
अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम् ।
प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णम् ॥५॥

yajnairishūḥ samnamamāno agne vācā ṣalyām aṣanibhirdihānaḥ | tābhir vidhya hridaye yātudhānān pratīco bāhūnprati bhañ dhyeshām ||4|| agne tvacam yātudhānasya bhindhi himsrāṣanir harasā hantvenam | pra parvāṇi jātavedaḥ ṣriṇīhi kravyāt kravishṇur vi cinotu vrikṇam ||5||

॥६॥ यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम् ।
यद्वान्तरिक्षे पथिभिः पतन्तं तमस्ता विध्य शर्वा शिशानः ॥६॥
उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातुधानात् ।
अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विङ्कास्तमदन्त्वेनीः ॥७॥
इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति ।
तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रन्धयैनम् ॥८॥
तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्राञ्चं वसुभ्यः प्र णय प्रचेतः ।
हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधाना नृचक्षः ॥९॥
नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्रा ।
तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥१०॥

yatredānīm paṣyasi jātavedas tishṭhanta magna uta vā carantam | yadvāntarikshe pathibhiḥ patantam tamastā vidhya ṣarvā ṣiṣānaḥ ||6|| ut-ālabdham spriṇuhi jātaveda ālebhānā drishṭibhir yātudhānāt | agne pūrvo ni jahi ṣoṣucāna āmādaḥ kshviṅkās tamadantve-nīḥ ||7|| iha pra brūhi yatamah so agne yo yātudhāno ya idam kriṇoti | tamā rabhasva samidhā yavishṭha nricakshasas cakshushe randhayainam ||8|| tīkshṇenāgne cakshushā raksha yajñam prāñcam vasubhyaḥ pra ṇaya pracetaḥ | himsram rakshāmsyabhi ṣoṣucānam mā tvā dabhanyātudh-ānā nricakshaḥ ||9|| nricakshā rakshaḥ pari paṣya vikshu tasya triṇi prati ṣriṇīhyagrā | tasyāgne prishṭīrharasā ṣriṇīhi tredhā mūlam yātudhānasya vriṣca ||10||

O fire-divine, may you, bending your arrows by means of our offerings at the sacrifices and by our praises, and sharpening the javelins with your splendour, pierce with them the hearts of the malignant elements and break their arms when raised against you. 4

O fire-divine, knower of all, may you cut through the skin of the malignant elements; let your thunder-bolt consume them with its flames; may you sever their joints. May the flesh-desiring, flesh-eater devour their mutilated body. 5

O all-knowing fire-divine, wherever and whenever, whether standing or moving, or traversing along the paths in midregion, you behold a malignant and wicked, may you, like an archer, sharpen your weapon and transfix him with your shaft. 6

And defend me, O all-knowing, with your darts when I am seized. Defend me from malignant germs of disease, who so often seize me. May you, O fire-divine, blazing fiercely, slay the wicked elements. May the swift-flying vultures, the flesh-eaters, devour the wicked element. 7

O fire-divine, youngest of Nature's bounties, may you at this place of worship, tell me which that malignant element is that seizes me. Catch hold of him and destroy him with your kindled flame; O beholder of men, consume him with your brilliance. 8

Protect this place of worship, O sage, with your keen insight; lead it forward to the acquisition of riches; let not the evil spirit, O beholder of men, O destroyer of wicked, harm you while you blaze fiercely. 9

O beholder of men, take due cognition of the wicked element in the surroundings; cut off his three heads; demolish with your flames his flanks; cut off his triple foot. 10

॥७॥ त्रिर्यातुधानः प्रसितिं त एत्वृतं यो अग्ने अनृतेन हन्ति ।
तमर्चिषा स्फूर्जयञ्जातवेदः समक्षमेनं गृणते नि वृङ्धि ॥११॥
तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानम् ।
अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वन्तमचितं न्योष ॥१२॥
यदग्ने अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयन्त रेभाः ।
मन्योर्मनसः शरव्या३ जायते या तया विध्य हृदये यातुधानान् ॥१३॥
परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि ।
परार्चिषा मूरदेवाञ्छृणीहि परासुतृपो अभि शोशुचानः ॥१४॥
पराद्य देवा वृजिनं शृणन्तु प्रत्यगेनं शपथा यन्तु तृष्टाः ।
वाचास्तेनं शरव ऋच्छन्तु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः ॥१५॥

trir yātudhānaḥ prasitiṃ ta etvṛitaṃ yo agne anritena hanti | tamarcishā sphūrjayañjātavedaḥ samakshamenaṃ grinate ni vrindhi ||11|| tadagne cakshuḥ prati dhehi rebhe ṣaphārujaṃ yena paṣyasi yātudhānam | atharvavajjyotishā daivyena satyaṃ dhūrvantamacitaṃ nyosha ||12||yadagne adya mithunā ṣapāto yadvācas trishṭaṃ janayanta rebhāḥ | manyormanasaḥ ṣaravyā jāyate yā tayā vidhya hṛidaye yātudhānān ||13|| parā ṣṛṇīhi tapasā yātudhānān parāgne raksho harasā ṣriṇīhi | parārcishā mūradevāñ chriṇīhi parāsutripo abhi ṣoṣucānaḥ ||14|| parādya devā vṛijinaṃ ṣriṇantu pratyagenam ṣapathā yantu trishṭaḥ | vācāstenam ṣarava ṛicchantu marman viṣvasyaitu prasitiṃ yātudhānaḥ ||15||

॥८॥ यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः ।
यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च ॥१६॥
संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः ।
पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यञ्चमर्चिषा विध्य मर्मन् ॥१७॥

yáḥ paúrusheyeṇa kravíshā samaṅkté yó áṣveyena paṣúnā yātudhánaḥ | yó aghnyáyā bhárati kshīrám agne téshāṃ ṣīrsháṇi hárasápi vṛiṣca || 16 || saṃvatsarīṇam páya usríyāyās tásya másīd yātudháno nṛicakshaḥ | pīyúsham agne yatamás títṛipsāt tám pratyáñcam arcíshā vidhya márman || 17 ||

O all-knowing fire-divine, let the evil spirit, who defeats your truth (health) with falsehood (i.e. poison), come thrice into the confinement of your flames; you crush him with your might, and cast him down in presence of your worshipper. 11

O fire-divine, may you cast upon the two roaring demons (the wicked biting creatures, worms or insects) that eye, wherewith you behold that evil creature who strikes you with hoofs or nails. May you, like the physician with celestial radiance burn down the fool, who assails truth (or peace) with falsehood (wickedness). 12

May you, O fire-divine, pierce the heart of the wicked with your arrow, as to give that pain which is experienced by a married couple, when in discord, start quarelling and cursing each other, or when the praisers (or singers) in annoyance address to each other while in a wrathful mood. 13

Destroy the evil-spirited creatures with your scorching fire; exterminate the wicked, O fire-divine, with your heat; destroy with your blazing flame those who believe in vain gods, and fiercely blazing destroy the insatiable (monsters). 14

Let all the divine forces (or your heat radiations) today destroy the wicked worms and germs; may our bitter feelings blast him; may the arrows hit the person of undependable words in his vital part; may the evil-doer be caught into the trap of the all-pervading fire-divine. 15

O fire-divine, may you tear off the heads of the evil-spirited cannibal who lives on the flesh of men and who satisfies himself with the flesh of horses and cattle and who steals for himself the milk of milch-cow. 16

O fire-divine, the beholder of men, let not the devil, the wicked, consume the milk of the cow, which she gives all the year round. Whosoever usurps this embrosia to satiate himself, may you, O fire-divine, pierce his vital parts with your flames. 17

विषं गवां यातुधानाः पिबन्त्वा वृश्च्यन्तामदितये दुरेवाः ।
परैनान्देवः सविता ददातु परा भागमोषधीनां जयन्ताम् ॥१८॥
सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः ।
अनु दह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥१९॥
त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात् ।
प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहन्तु ॥२०॥

vishám gávām yātudhā́nāḥ pibantv á vriṣcyantām áditaye durévāḥ | párainān deváḥ savitá dadātu párā bhāgám óshadhīnām jayantām || 18 || sā́nād agne mriṇasi yātudhā́nān ná tvā rákshāṅsi prítanāsu jigyuḥ | ánu daha sahámūrān kravyā́do mā́ te hetyā́ mukshata daívyāyāḥ || 19 || tvám no agne adharā́d údaktāt tvám paṣcā́d utá rakshā purástāt | práti té te ajárāsas tápishṭhā aghásaṅsam sóṣucato dahantu || 20 || 8 ||

॥९॥ पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन् ।
सखे सखायमजरो जरिम्णेऽग्ने मर्ताँ अमर्त्यस्त्वं नः ॥२१॥
परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।
धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावताम् ॥२२॥
विषेण भङ्गुरावतः प्रति ष्म रक्षसो दह ।
अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः ॥२३॥

paṣcā́t purástād adharā́d údaktāt kavíḥ kā́vyena pári pāhi rājan | sákhe sákhāyam ajáro jarimné 'gne mártāñ ámartyas tvám naḥ || 21 || pári tvāgne púram vayám vípram sahasya dhīmahi | dhrishádvarṇam divé-dive hantā́ram bhaṅgurā́vatām || 22 || vishéṇa bhaṅgurā́vataḥ práti shma rakshá́so daha | ágne tigména ṣocíshā tápuragrābhir rishṭíbhiḥ || 23 ||

Let the fiends drink poison from the cattle; may you cast off the evil-doers, difficult to be brought into control, for the sake of mother eternity; may the divine creator give them over to destruction; may they be deprived of the food of herbs. 18

O fire-divine, from the days of yore, you have been destroying the evil-doers; these wicked ones have never overcome you in fight; burn the murderous flesh-eating creatures one by one; let none of them escape your divine weapons. 19

May you, O fire-divine, protect us from below, from above, from behind us and from the front. May your fervent heat, undecaying, scorching and glowing consume the perpetuator of wickedness. 20

O royal fire-divine, sagacious and wise, protect us by your wisdom on the west, on the east, on the south, and on the north; may you, O our undecaying friend, preserve us, your friends, for a long long period, to our old age; O immortal, protect us who are mortals. 21

O fire-divine, the strength born, the accomplisher (of sacred works), the sage, possessor of fearful form, the day-to-day destroyer of the treacherous beings, we accept you with full reliance. 22

O fire-divine, consume the treacherous crooked devils with your all-pervading sharp flame, with your flame-pointed darts. 23

प्रत्य॑ग्ने मिथु॒ना द॑ह यातु॒धाना॑ किमी॒दिना॑ ।
सं त्वा॑ शिशामि जागृ॒ह्यद॑ब्धं विप्र॒ मन्म॑भिः ॥२४॥
प्रत्य॑ग्ने॒ हर॑सा॒ हरः॑ शृणी॒हि वि॒श्वतः॒ प्रति॑ ।
या॒तु॒धान॑स्य र॒क्षसो॒ बलं॒ वि रु॑ज वी॒र्य॑म् ॥२५॥

práty agne mithuná daha yātudhánā kimīdínā | sáṃ tvā śiśāmi jāgrihy ádabdhaṃ vipra mánmabhiḥ || 24 || práty agne hárasā háraḥ śriṇīhí viśvátaḥ práti | yātudhánasya rakshásо bálaṃ ví ruja vīryàm || 25 || 9 ||

(८८) अष्टाशीतितमं सूक्तम्
(१-१९) एकोनविंशत्यृचस्यास्य सूक्तस्याङ्गिरसो वामदेव्यो वा मूर्धन्वानृषिः ।
सूर्यो वैश्वानरोऽग्निश्च देवते । त्रिष्टुप् छन्दः ॥

॥१०॥ ह॒वि॒ष्पान्त॑म॒जरं॑ स्व॒र्विदि॑ दिवि॒स्पृश्याहु॑तं॒ जुष्ट॑म॒ग्नौ ।
तस्य॒ भर्म॑णे॒ भुव॑नाय दे॒वा धर्म॑णे॒ कं स्व॒धया॑ पप्रथन्त ॥१॥
गी॒र्णं भुव॑नं॒ तम॒साप॑गूळ्हमा॒विः स्व॑रभवज्जा॒ते अ॒ग्नौ ।
तस्य॑ दे॒वाः पृ॑थि॒वी द्यौरु॒तापोऽर॑णय॒न्नोष॑धीः स॒ख्ये अ॑स्य ॥२॥
दे॒वेभि॒र्न्वि॑षि॒तो य॒ज्ञिये॑भिर॒ग्निं स्तो॑षाण्य॒जरं॑ बृ॒हन्त॑म् ।
यो भा॒नुना॑ पृथि॒वीं द्यामु॒तेमामा॑तता॒न रोद॑सी अ॒न्तरि॑क्षम् ॥३॥
यो होता॒सीत्प्र॑थ॒मो दे॒वजु॑ष्टो॒ यं स॒माञ्ज॒न्नाज्ये॑ना वृणा॒नाः ।
स प॑त॒त्रीत्व॒रं स्था जग॒द्यच्छ्वा॒त्रम॒ग्निर॑कृणोज्जा॒तवे॑दाः ॥४॥

88.

Havísh pántam ajáraṃ svarvídi divispríśy áhutaṃ júshṭam agnaú | tásya bhármaṇe bhúvanāya devá dhármaṇe káṃ svadháyā paprathanta || 1 || gīrṇáṃ bhúvanaṃ támasápagūḷham āvíḥ svàr abhavaj jaté agnaú | tásya deváḥ prithiví dyaúr utápó 'raṇayann óshadhīḥ sakhyé asya || 2 || devébhir nv ìshitó yajñíyebhir agníṃ stoshāṇy ajáram brihántam | yó bhānúnā prithivíṃ dyám utémám ātatána ródasī antáriksham || 3 || yó hótásīt prathamó devájushṭo yáṃ samáñjann ájyenā vriṇānáḥ | sá patatrítvaráṃ sthá jágad yác chvātráṃ agnír akriṇoj jātávedāḥ || 4 ||

O fire-divine, may you consume these pairs of germs (*yatudhanas*) and worms (*kimidins*). I incite you, O sage, the invincible, with my praises; please wake up. 24

Shoot forth, O fire-divine, with your flame, to demolish the impetuous strength of the devil; break the vigour of the wicked. 25

88

The herbal libation, undecaying and agreeable to Nature's bounties, is offered to the fire-divine, which knows the sun and touches or extends high to the distant sky. For its maintenance, existence and support, people of enlightenment feed the fire-divine, the giver of happiness, with food. 1

The whole world (at its initial stages), as if swallowed up and hidden in darkness, comes in visibility only after when fire-divine, the cosmic fire, is born. The divine powers, broad earth and heaven, the waters and the plants rejoice in his friendship and association. 2

Inspired by adorable divines, I praise the mighty fire-divine, free from ageing and decay, who by his radiance has spread forth the earth and this heaven, a pair of these two worlds, and the inter-space. 3

He, the fire-divine, is propitiated by Nature's bounties; he has been the first recipient of oblations. His worshippers anoint him with clarified butter. To, the winged-one, the "omniscient fire", who has all created beings as his property, we owe the quick creation of all that is full of activity, which is stationary, and which suffers change. 4

यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन ।
तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः ॥५॥

yáj jatavedo bhúvanasya mūrdhánn átishṭho agne sahá rocanéna | tám tvahema matibhir girbhír ukthaíḥ sá yajñíyo abhavo rodasipráḥ || 5 || 10 ||

॥११॥

मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।
मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥६॥
दृशेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा ।
तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः ॥७॥
सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयन्त देवाः ।
स एषां यज्ञो अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ॥८॥
यं देवासोऽजनयन्ताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा ।
सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ॥९॥
स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्राम् ।
तमू अकृण्वन्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥१०॥

múrdhá bhuvó bhavati náktam agnís tátaḥ súryo jāyate prātár udyán | mayám u tú yajñíyanām etám ápo yát túrṇiṣ cárati prajanán || 6 || driṣényo yó mahiná sámiddhó 'rocata diviyonir vibháva | tásminn agnaú sūktavakéna devá havír víṣva ájuhavus tanupáḥ || 7 || sūktavakám prathamám ád íd agním ád íd dhavír ajanayanta deváḥ | sá esham yajñó abhavat tanūpás tám dyaúr veda tám prithivi tám ápaḥ || 8 || yám deváso 'janayantagním yásminn ájuhavur bhúvanāni víṣvā | só arcíshā prithivím dyám utémám rijūyámāno atapan mahitvá || 9 || stómena hí diví deváso agním ájījanañ cháktibhī rodasiprám | tám ū akriṇvan tredhá bhuvé kám sá óshadhīḥ pacati viṣvárūpāḥ || 10 || 11 ||

O omniscient fire-divine, cognizant of all, you abide on the brow of the universe, with the sun, the refulgent one. We come to you with praises, with hymns and with prayers. You fill heaven and earth, and verily you alone deserve adoration. 5

The fire-divine is of supreme importance during the night-time; in the form of the sun, it rises early morning. According to the wise (men), it is considered to be an act of great wisdom that the divine powers have made the sun appear to move with precision across the vastness of the firmament. 6

He is visible to all who shine through his greatness. Seated in the heaven, he is resplendent with his own refulgence. The universal cosmic powers, the guardians of men's bodies, present oblation with resonant hymns to this cosmic fire. 7

Natural forces first create the divine words of hymns; this is followed by the creation of the fire (by attrition), and lastly the creation of the material oblation. The fire-divine is the object of sacrifice of these Nature's bounties. The fire promotes and protects the body. Him the heaven knows; him the earth and waters know. 8

The fire-divine, whom the enlightened sages generate, in whom all beings offer oblations, and who is ever straight-going — he, by his radiance and by his grandeur, warms the earth and this heaven too. 9

Nature's bounties, by their planning enkindle fire-divine in sky; it is he (the fire-divine) that fills heaven and earth by his strength and vigour. They (the bounties) assign joy-bestowing fire-divine his three-fold functions (as the terrestrial fire, as the lightning and as the sun). He, verily, ripens plants to their maturity. 10

॥१२॥ यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम् ।
यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ॥११॥
विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् ।
आ यस्ततानोषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन् ॥१२॥
वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यम् ।
नक्षत्रं प्रत्नममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहन्तम् ॥१३॥
वैश्वानरं विश्वहा दीदिवांसं मन्त्रैरग्निं कविमच्छा वदामः ।
यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् ॥१४॥
द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥१५॥

yadéd enam ádadhur yajñíyāso diví deváḥ sū́ryam āditeyám | yadā́ carishṇū́ mithunā́v ábhūtām ā́d ít prā́paṣyan bhúvanāni víṣvā || 11 || víṣvasmā agním bhúvanāya devā́ vaiṣvānarám ketúm áhnām akriṇvan | ā́ yás tatā́nosháso vibhātī́r ápo ūrṇoti támo arcíshā yán || 12 || vaiṣvānarám kaváyo yajñíyāso 'gním devā́ ajanayann ajuryám | nákshatram pratnám áminac carishṇú yakshásyā́dhyaksham tavishám bṛihántam || 13 || vaiṣvānarám viṣváhā dīdivā́ṅsam mántrair agním kavím áchā vadāmaḥ | yó mahimnā́ paribabhū́vorví utā́vástād utá deváḥ parástāt || 14 || dvé srutí aṣṛiṇavam pitṛīṇā́m ahám devā́nām utá mártyānām | tā́bhyām idám víṣvam éjat sám eti yád antarā́ pitáram mātáram ca || 15 || 12 ||

॥१३॥ द्वे समीची बिभृतश्चरन्तं शीर्षतो जातं मनसा विमृष्टम् ।
स प्रत्यङ्विश्वा भुवनानि तस्थावप्रयुच्छन्तरणिर्भ्राजमानः ॥१६॥

dvé samīcī́ bibhṛitaṣ cárantam ṣīrsható jātám mánasā vímṛishṭam | sá pratyáñ víṣvā bhúvanāni tasthāv áprayuchan tarániṛ bhrā́jamānaḥ || 16 |

When the adorable divine powers place him (the terrestrial fire) and the sun, the son of Mother Eternity, in heaven, when the swift-moving pair (of celestial and the terrestrial fires) is born, then the entire creation looks upon them (with astonishment and admiration). 11

The divine powers make the fire-divine the leader of the whole universe and the indicator of days, for the sake of the whole world; he spreads out the radiant dawns; and as he moves along, he dispels and disperses darkness with his light. 12

The wise and adorable divine powers engender the imperishable fire-divine, who is the leader of the universal cosmic forces; he overcomes with his light the eternal ever-wandering galaxy of constellations; he is the presiding lord of the living beings, also mighty and great. 13

We glorify daily with holy verses the sage and ever-beaming fire-divine, the leader-in-chief, who surpasses by his might both heaven and earth in strength and greatness. He scorches and dries up both the worlds, below and above. 14

I have heard that there are two pathways open to the experienced elders (fathers), to enlightened persons (divines), and to ordinary mortals. All this universe which is between the paternal heaven and the maternal earth, proceeds on its way by these two paths. 15

These associated two (i.e. heaven and earth) support him (the fire) in motion, born from the sun, the head of all and glorified by praises. He stands distinct from all existing things — ever in action, quick to act and effulgent. 16

यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद ।
आ शेकुरित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत् ॥१७॥
कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः ।
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम् ॥१८॥
यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः ।
तावद्दधात्युप यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन् ॥१९॥

yátrā vádete ávaraḥ páraş ca yajñanyòḥ kataró nau ví veda | á ṣekur ít sadhamádam sákhāyo nákshanta yajñám ká idám ví vocat || 17 || káty agnáyaḥ káti sū́ryāsaḥ káty ushásaḥ káty u svid ápaḥ | nópaspíjam vaḥ pitaro vadāmi pṛichámi vaḥ kavayo vidmáne kám || 18 || yāvanmātrám usháso ná prátīkam suparṇyò vásate mātariṣvaḥ | távad dadhāty úpa yajñám āyán brāhmaṇó hótur ávaro nishídan || 19 || 13 ||

(८९) एकोननवतितमं सूक्तम्

(१-१८) अष्टादशर्चस्यास्य सूक्तस्य वैश्वामित्रो रेणुर्ऋषिः । (१-४, ६-१८) प्रथमादिचतुर्ऋचां षष्ठ्यादित्रयोदशानाञ्चेन्द्रः, (५) पञ्चम्याश्चेन्द्रासोमौ देवते । त्रिष्टुप् छन्दः ॥

॥१४॥ इन्द्रं स्तवा नृतमं यस्य मह्ना विबबाधे रोचना वि ज्मो अन्तान् ।
आ यः पप्रौ चर्षणीधृद्वरोभिः प्र सिन्धुभ्यो रिरिचानो महित्वा ॥१॥
स सूर्यः पर्युरू वरांस्येन्द्रो ववृत्याद्रथ्येव चक्रा ।
अतिष्ठन्तमपस्यं१ न सर्गं कृष्णा तमांसि त्विष्या जघान ॥२॥
समानमस्मा अनपावृदर्च क्ष्मया दिवो असमं ब्रह्म नव्यम् ।
वि यः पृष्ठेव जनिमान्यर्य इन्द्रश्चिकाय न सखायमीषे ॥३॥

89.

Índram stavā nṛítamam yásya mahná vibabādhé rocaná ví jmó ántān | á yáḥ papraú carshaṇīdhṛ́d várobhiḥ prá síndhubhyo riricānó mahitvá || 1 || sá sū́ryaḥ páry urū́ várāṅsy éndro vavṛityād ráthyeva cakrá | átishṭhantam apasyàm ná sárgam kṛishṇá támāṅsi tvíshyā jaghāna || 2 || samānám asmā ánapāvṛid arca kshmayá divó ásamam bráhma návyam | ví yáḥ pṛishṭhéva jánimāny aryá índraṣ cikāya ná sákhāyam īshé || 3 ||

When the fires of lower and upper regions (terrestrial and celestial) dispute, as to "which of us, the twain leaders of cosmic worship, knows the secrets of sacrifice the best," the priests, the friends, competent to offer sacrifice, come to the place of worship, but none can give satisfactory answer to the question. 17

How many fires are there? how many are the suns in number? how many dawns? how many waters?— I address you, O elders, not jestingly, neither with rivalry, nor with jealousy; I ask you, O sages, (I ask you) in order to know the truth. 18

As long as the cosmic wind moves and as long as the swiftly moving (nights) cover the face of the dawn, till then the *Brahman*, the inferior priest, would sit down to work as invoker and, coming to the place of worship, conduct the ceremony. 19

89

May you glorify the resplendent sun, whose glory surpasses the lustre of others, and extends to the limits of the earth and beyond; who is the sustainer of man, and who surpassing the ocean in his magnitude, fills heaven and earth with his radiance. 1

The heroic sun-divine causes beams of light to revolve as a charioteer (effects the rotation of) the wheels of the chariot. He, by his radiance, destroys the black-hued darkness like a restless vigorous horse (in enthusiasm). 2

May you adore Him (the Sun or resplendent Lord) with ever-new songs, who is mighty, matchless and in extension, surpasses heaven and earth; He, like the sacred *pṛṣṭha* praises, (associated with particular sacrifices) overcomes enemies; the resplendent one desires no friend (though He is friendly to all). 3

इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥४॥
आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी ।
सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥५॥

indrāya gíro ánisitasargā apáḥ préra-yam ságarasya budhnā́t | yó ákshepeva cakríyā ṣácībhir víshvak tastámbha pṛithivī́m utá dyā́m || 4 || ā́pāntamanyus tṛipálaprabharmā dhúniḥ ṣímīvāñ chárumā́ñ ṛijīshī́ | sómo víṣvāny atasā́ vánāni nā́rvā́g índram pratimā́nāni debhuḥ || 5 || 14 ||

॥१५॥ न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः ।
यदस्य मन्युरधिनीयमानः शृणाति वीळु रुजति स्थिराणि ॥६॥
जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिन्धून् ।
बिभेद गिरिं नवमिन्न कुम्भमा गा इन्द्रो अकृणुत स्वयुग्भिः ॥७॥
त्वं ह त्यदृणया इन्द्र धीरोऽसिर्न पर्व वृजिना शृणासि ।
प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनन्ति मित्रम् ॥८॥
प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणं मिनन्ति ।
न्यमित्रेषु वधमिन्द्र तुम्रं वृषन्वृषाणमरुषं शिशीहि ॥९॥

ná yásya dyā́vāpṛithiví ná dhánva nántárikshaṃ nā́dra-yaḥ sómo akshāḥ | yád asya manyúr adhinīyámānaḥ ṣṛi-ṇā́ti vīḷú rujáti sthirā́ṇi || 6 || jaghā́na vṛitrám svádhitir vá-neva rurója púro áradan ná síndhūn | bibhéda girím návam ín ná kumbhám ā́ gā́ índro akṛiṇuta svayúgbhiḥ || 7 || tvám ha tyád ṛiṇayā́ indra dhíro 'sír ná párva vṛijinā́ ṣṛiṇāsi | prá yé mitrásya váruṇasya dhā́ma yújam ná jánā minánti mitrám || 8 || prá yé mitrám prā́ryamáṇam durévāḥ prá saṃgírah prá váruṇam minánti | ny àmítreshu vadhám indra túmram vṛíshan vṛíshāṇam arushám ṣiṣīhi || 9 ||

I will send forth praises to the resplendent Lord in unceasing flow, like waters from the depth of an ocean (or the firmament). He has fixed heaven and earth to His both sides like the wheels of a chariot fixed at the ends of an axle. 4

This exhilarating elixir of herbs, active with infused energy, shaker, rushing to the attack, intimidating foes, a great hero, and forming and leaving a stale residue, surpasses all plants and trees. None of the counter measures can deceive the resplendent Lord. 5

May the exhilarating elixir flow to him, whom neither heaven nor earth, nor the waters, nor the firmament, nor the mountains dare oppose; when heightened in his wrath, he breaks the firm and destroys the strong. 6

The resplendent Lord destroys evil nescience as an axe cuts down a tree; he demolishes the strongholds of the foes; he digs out the rivers; he shatters the cloud to pieces like a new pitcher; with his vital energies, he restores the light of wisdom. 7

O resplendent Lord, you, who are all-wise, punish the guilt of worshippers; you cut off their sins as a sword cuts off the limbs of victims; you cut off the people who ignorantly go against the established tradition based on benevolence and justice. Besides you, who else could be their close friend! 8

Against those enemies who sinfully offend against benevolence, against justice, against friendliness, against all that is vital and virtuous, may you sharpen, O resplendent Lord, the showerer of benefits, your rapid showering radiant thunder-bolt. 9

इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम् ।
इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः ॥१०॥

índro divá índra īṣe prithivyā́ índro apā́m índra ít párvatānām | índro vridhā́m índra ín médhirāṇām índraḥ kshéme yóge hávya índraḥ || 10 || 15 ||

॥१६॥ प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः प्रान्तरिक्षात्प्र समुद्रस्य धासेः ।
प्र वातस्य प्रथसः प्र ज्मो अन्तात्प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः ॥११॥
प्र शोशुचत्या उषसो न केतुरसिन्वा ते वर्ततामिन्द्र हेतिः ।
अश्मेव विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान् ॥१२॥
अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः ।
अन्विन्द्रं रोदसी वावशाने अन्वापो अजिहत जायमानम् ॥१३॥
कर्हि स्वित्सा त इन्द्र चेत्यासदघस्य यद्भिनदो रक्ष एषत् ।
मित्रक्रुवो यच्छसने न गावः पृथिव्या आपृगमुया शयन्ते ॥१४॥
शत्रूयन्तो अभि ये नस्ततस्रे महि व्राधन्त ओगणास इन्द्र ।
अन्धेनामित्रास्तमसा सचन्तां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥१५॥

prā́ktúbhya índraḥ prá vridhó áhabhyaḥ prā́ntárikshāt prá samudrásya dhāséḥ | prá vā́tasya práthasaḥ prá jmó ántāt prá síndhubhyo ririce prá kshitíbhyaḥ || 11 || prá ṣóṣucatyā usháso ná ketúr asinvā́ te vartatām indra hetíḥ | áṣmeva vidhya divá ā́ srijānás tápishṭhena héshasā drógha-mitrān || 12 || ánv áha mā́sā ánv íd vánāny ánv óshadhīr ánu párvatāsaḥ | ánv índram ródasī vāvaṣāné ánv ā́po ajihata jā́yamānam || 13 || kárhi svit sā́ ta indra cetyā́sad aghásya yád bhinádo ráksha éshat | mitrakrúvo yác chá-sane ná gā́vaḥ prithivyā́ āpríg amuyā́ ṣáyante || 14 || ṣatrū-yánto abhí yé nas tatasré máhi vrā́dhanta oganā́sa indra | andhénāmítrās támasā sacantām sujyotíṣho aktávas tā́ñ abhí shyuḥ || 15 ||

The resplendent Lord rules over heaven, rules over earth, over waters, and over the clouds; the Lord rules over the great and over the wise; the resplendent Lord is to be invoked for the acquirement and preservation of wealth. 10

The resplendent Lord is vaster than the nights, vaster than the days, vaster than the firmament or the receptacle of the ocean, vaster than the wind, or space and extension; He is vaster than the bounds of the earth; the resplendent Lord is vaster than the rivers and our lands. 11

O resplendent Lord, may your invincible arrow proceed, like the banner of the shining dawn, and like a stone cast down from heaven. May this loud-sounding weapon pierce those whose friendship is deceitful. 12

The months fully depend on the course of the resplendent sun; the forests, plants, and the mountains also follow his course; and verily the affectionate or illumined heaven and earth follow him, and the waters or oceans also attend upon him. 13

O resplendent Lord, when would your sin-destroying shaft of justice shall be hurled to exterminate the evil forces bent on outraging and when will the enemies of friendly people lay on the ground there in confusion like cattle at the place of immolation. 14

O resplendent Lord, may those adversaries, who gather in groups and create enmity among us, and who fiercely oppose us, be over-whelmed with gloom and darkness, and may the bright shining days and dull nights go against them in the fulfilment of their mal-intentions. 15

पुरूणि हि त्वा सवना जनानां ब्रह्माणि मन्दन्गृणतामृषीणाम् ।
इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् ॥१६॥
एवा ते वयमिन्द्र भुञ्जतीनां विद्याम सुमतीनां नवानाम् ।
विद्याम वस्तोरवसा गृणन्तो विश्वामित्रा उत त इन्द्र नूनम् ॥१७॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥१८॥

purūṇi hí tvā sávanā jánānām bráhmāṇi mándan gṛiṇatā́m ṛíshīṇām | imā́m āghóshann ávasā sáhūtiṃ tiró víṣvāñ árcato yāhy arvā́ṅ || 16 || evā́ te vayám indra bhuñjatīnā́ṃ vidyā́ma sumatīnā́ṃ návānām | vidyā́ma vástor ávasā gṛiṇánto viṣvā́mitrā utá ta indra nūnám || 17 || ṣunā́ṃ huvema maghávānam — || 18 || 16 ||

(९०) नवतितमं सूक्तम्

(१–१६) षोडशर्चस्यास्य सूक्तस्य नारायण ऋषिः । पुरुषो देवता । (१–१५) प्रथमादिपञ्चदशर्चामनुष्टुप्, (१६) षोडश्याश्च त्रिष्टुप् छन्दसी ॥

॥१७॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥

90.

Sahásraṣīrshā púrushaḥ sahasrāksháḥ sahásrapāt | sá bhū́miṃ viṣváto vṛitváty atishṭhad daṣāñgulám || 1 || púrusha evédáṃ sárvaṃ yád bhūtáṃ yác ca bhávyam | utámṛitatvásyéṣāno yád ánnenātiróhati || 2 || etávān asya mahimáto jyā́yāṅṣ ca pū́rushaḥ | pádo 'sya víṣvā bhūtáni tripád asyāmṛ́tam diví || 3 ||

May plentiful oblations and praises of men and invocations of the wise seers, who sing sacred hymns, rejoice you, and may you, disregarding all other faithless worshippers, come to us with your protective measures (to help us). 16

O resplendent Lord, may we be able to avail all your fresh favours and benefits; and may we, the friends of all, who sincerely praise you with love and devotion, obtain your blessings, and day to day protections. 17

In this world of conflicts, we invoke the bounteous resplendent Lord, who, as a hero, is most reliable and strong in fights, who listens to our invocations, and destroys evil tendencies in life-conflicts, and who takes away riches from the wicked to give to the needy and virtuous. 18

90

The Cosmic Man has thousands of heads, thousands of eyes, and thousands of feet. Enveloping this whole universe, He exceeds by ten finger-breadths all around. 1

Whatever all this is, whatever has been in the past, and whatever is going to be in future, all that is in fact, the Cosmic Man himself. He is the Lord of Immortality, and of all what grows by food. 2

Such is His grandeur. But in fact, the Cosmic Man is greater even than this. The entire creation is only a quarter part of His being; other three quarters are immortal in heaven. 3

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥४॥
तस्माद्विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥

tripád ūrdhvá úd ait púrushaḥ pádo 'syehábhavat púnaḥ | táto víshvañ vy àkrāmat sāṣanānaṣané abhí || 4 || tásmād virā́ḷ ajāyata virā́jo ádhi pū́rushaḥ | sá jātó áty aricyata paṣcā́d bhū́mim átho puráḥ || 5 || 17 ||

॥१८॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥६॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥७॥
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशून्ताँश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥८॥
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥९॥
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥१०॥

yát púrushena havíshā devā́ yajñám átanvata | vasantó asyāsīd ā́jyam grīshmá idhmáḥ ṣarád dhavíḥ || 6 || tám yajñám barhíshi praúkshan púrusham jātám agratáḥ | téna devā́ ayajanta sādhyā́ ṛíshayaṣ ca yé || 7 || tásmād yajñā́t sarvahútaḥ sámbhṛitam pṛishadājyám | paṣū́n tā́ṅṣ cakre vāyavyā̀n āraṇyā́n grāmyā́ṣ ca yé || 8 || tásmād yajñā́t sarvahúta ṛ́caḥ sā́māni jajñire | chándāṅsi jajñire tásmād yájus tásmād ajāyata || 9 || tásmād áṣvā ajāyanta yé ké cobhayā́dataḥ | gā́vo ha jajñire tásmāt tásmāj jātā́ ajāváyaḥ || 10 || 18 ||

Three-fourths of that Cosmic Man rises above the heaven. The one-fourth is still here on the earth. Then He starts spreading in all directions towards all that eats and eats not. 4

From that Cosmic Man, super-luminiscence is born and from super-luminiscence again the creative factor is born. Expanding, He exceeds the earth backward and forward both. 5

In the Cosmic Sacrifice arranged by Nature's Bounties with the Cosmic Man as an oblation, spring is the melted butter, summer the fire wood, and autumn is the offering. 6

The Cosmic Man, who is born earliest of all, is placed on the Cosmic Sacrificial altar, and is anointed. With Him, the enlightened ones, the realized ones, and the sages perform the sacrifice. 7

From that Cosmic Sacrifice, to which all things have been offered as oblations, milk, curd (sustaining food) are obtained. Thereon He makes creatures that fly in the air and the animals, wild and domestic. 8

From that Cosmic Sacrifice, in which everything has been offered as oblations, the *Ṛks* (verses), and the *Samans* (songs) were born. The *Chandas* (metres) of the *Atharva* and the *Yajuh* are also born from that Sacrifice. 9

From that Cosmic Sacrifice horses are born, and all other cattle having two rows of teeth. Cows are born out of it and so are goats and sheep. 10

॥१९॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥११॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥१२॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥१३॥
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥१५॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥

yát púrusham vy ádadhuḥ katidhā́ vy àkalpayan | múkham kím asya kaú bāhū́ kā́ ūrū́ pā́dā ucyete || 11 || brāhmaṇò 'sya múkham āsīd bāhū́ rājanyàḥ kṛitáḥ | ūrū́ tád asya yád vaíśyaḥ padbhyā́m śūdró ajāyata || 12 || candrámā mánaso jātás cákshoḥ sū́ryo ajāyata | múkhād índraś cāgníś ca prāṇā́d vāyúr ajāyata || 13 || nā́bhyā āsīd antáriksham śīrshṇó dyaúḥ sám avartata | padbhyā́m bhū́mir díśaḥ śrótrāt táthā lokā́ñ akalpayan || 14 || saptā́syāsan paridháyas tríḥ saptá samídhaḥ kṛitā́ḥ | devā́ yád yajñám tanvānā́ ábadhnan púrusham paśúm || 15 || yajñéna yajñám ayajanta devā́s tā́ni dhármāṇi prathamā́ny āsan | té ha nā́kam mahimā́naḥ sacanta yátra pū́rve sādhyā́ḥ sánti devā́ḥ || 16 || 19 ||

The Man (the mankind) they create, in what portions do they figurize it? What is His mouth? Which the two arms, which the two thighs and which are said to be His feet? 11

The *Brahmana* (the intellectual) is His mouth, the *Ksattriya* (*Rajanya* or administrator) is made His two arms; what is the *Vaiśya* (producer of wealth) is His two thighs and *Śudra* (labourer) is born of His two feet. 12

The moon is created from His mind and the sun is born from His eyes. The wind and the life-breath are born from His ear and the fire from His mouth. 13

The mid-space is created from His navel, and the sky from His head; the earth from His feet; various quarters from His ear, and in this way, all these worlds are formed. 14

Seven are the enclosing pillars and thrice seven (3 x 7 + 21) the pieces of fire-wood, when the enlightened ones preparing for the sacrifice, tie up the Cosmic Man as an offering. 15

Gods (Nature's Bounties) worshipped the Supreme Lord with the sacrifice. These have been the earliest ordinances. They, the great ones, thus attain heaven, where the earlier realized ones dwell in their resplendence. 16

[अथाष्टमोऽनुवाकः ॥] (९१) एकनवतितमं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य वैतहव्योऽरुण ऋषिः । अग्निर्देवता । (१-१४) प्रथमादिचतुर्दशर्चां जगती, (१५) पञ्चदश्याश्च त्रिष्टुप् छन्दसी ॥

॥२०॥ सं जागृवद्भिर्जरमाण इध्यते दमे दमूना इषयन्निळस्पदे ।
विश्वस्य होता हविषो वरेण्यो विभुर्विभावा सुषखा सखीयते ॥१॥
स दर्शतश्रीरतिथिर्गृहेगृहे वनेवने शिश्रिये तक्ववीरिव ।
जनंजनं जन्यो नाति मन्यते विश आ क्षेति विश्यो३ विशंविशम् ॥२॥
सुदक्षो दक्षैः क्रतुनासि सुक्रतुरग्ने कविः काव्येनासि विश्ववित् ।
वसुर्वसूनां क्षयसि त्वमेक इद्द्यावा च यानि पृथिवी च पुष्यतः ॥३॥
प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवन्तमासदः ।
आ ते चिकित्र उषसामिवेतयोऽरेपसः सूर्यस्येव रश्मयः ॥४॥
तव श्रियो वर्ष्यस्येव विद्युतश्चित्राश्चिकित्र उषसां न केतवः ।
यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमास्ये ॥५॥

91.

Sám̩ jāgr̩ivádbhir járamāṇa idhyate dáme dámūnā isháyann il̩ás padé | vísvasya hótā havísho váreṇyo vibhúr vibhā́vā sushákhā sakhīyaté || 1 || sá darsatasrír átithir gr̩ihé-gr̩ihe váne-vane sisriye takvavír iva | jánam̩-janam̩ jányo nā́ti manyate vísa ā́ ksheti visyò vísam̩-visam || 2 || sudáksho dákshaiḥ krátunāsi sukrátur ágne kavíḥ kā́vyenāsi visvavít | vásur vásūnām̩ kshayasi tvám éka íd dyā́vā ca yā́ni pr̩ithiví ca púshyataḥ || 3 || prajānánn agne táva yónim r̩itvíyam íl̩āyās padé ghr̩itávantam ā́sadaḥ | ā́ te cikitra ushásām ivétayo 'repásaḥ sū́ryasyeva rasmáyaḥ || 4 || táva sríyo varshyàsyeva vidyútas citrā́s cikitra ushásām̩ ná ketávaḥ | yád óshadhīr abhísr̩ishṭo vánāni ca pári svayám̩ cinushé ánnam āsyè || 5 || 20 ||

91

The fire-divine, the generous giver (of blessings), the object of veneration of the conscientious sacrificers (or the public workers), the acceptor of homage (or libations) at the altar of sacrifice performed on the base of earth, is kindled in the chamber; he is the lord, effulgent, and friend of all who crave for his friendship. 1

Evidently full of glory, he resorts as a guest to every house (of his worshippers); he is friendly to men, friendly to every one who lives in sundry forests, friendly to every one in our society; he disregards none; he is kind to all; he is like one, who goes revivifying every one. He dwells among all men, presiding over every one, every individual. 2

O fire-divine, you are most vigorous for those who are with vigour; you are active with those who act; you are very wise to them who work with wisdom and insight; you know everything. You are the dispenser of wealth; and you abide alone. You are lord of the treasures which exist in heaven and are on earth. 3

O sagacious fire-divine, you sit at your altar with earth as the base suited for worship and anointed with purified butter. Your quick-moving rays are manifested like those of the dawns, beautifully shining as those of the sun. 4

Your glories, O fire-divine, are like the lightnings from the rain-cloud and are manifested many-tinted, like the multi-coloured rays of the beautiful dawns. When you march in the midst of plants and trees in forests, you gather on all sides food for your mouth i.e. for your flames. 5

॥२१॥ तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः ।
तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥६॥
वातोपधूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे ।
आ ते यतन्ते रथ्यो३ यथा पृथक्छर्धांस्यग्ने अजराणि धक्षतः ॥७॥
मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिम् ।
तमिदर्भे हविष्या समानमित्तमिन्महे वृणते नान्यं त्वत् ॥८॥
त्वामिदत्र वृणते त्वायवो होतारमग्ने विदथेषु वेधसः ।
यद्देवयन्तो दधति प्रयांसि ते हविष्मन्तो मनवो वृक्तबर्हिषः ॥९॥
तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥१०॥

tám óshadhīr dadhire gárbham ṛitvíyam tám ā́po agním janayanta mātáraḥ | tám ít samānám vanínaṣ ca vīrúdho 'ntárvatīṣ ca súvate ca viṣváhā || 6 || vā́topadhūta ishitó vá-ṣā̃ń ánu tṛishú yád ánnā vévishad vitíshṭhase | ā́ te yatante rathyò yáthā príthak chárdhāṅsy agne ajárāṇi dhákshataḥ || 7 || medhākārám vidáthasya prasā́dhanam agním hótāram paribhū́tamam matím | tám íd árbhe havíshy ā́ samānám ít tám ín mahé vṛiṇate nā́nyám tvát || 8 || tvā́m íd átra vṛi-ṇate tvāyávo hótāram agne vidátheshu vedhásaḥ | yád de-vayánto dádhati práyāṅsi te havíshmanto mánavo vṛiktá-barhishaḥ || 9 || távāgne hotrám táva potrám ṛitvíyam táva neshṭrám tvám agníd ṛitāyatáḥ | táva praṣāstrám tvám adhvarīyasi brahmā́ cā́si gṛihápatiṣ ca no dáme || 10 || 21 ||

॥२२॥ यस्तुभ्यमग्ने अमृताय मर्त्यः समिधा दाशदुत वा हविष्कृति ।
तस्य होता भवसि यासि दूत्य१मुप ब्रूषे यजस्यध्वरीयसि ॥११॥

yás túbhyam agne amṛítāya mártyaḥ samídhā dā́ṣad utá vā havíshkṛiti | tásya hótā bhavasi yā́si dūtyàm úpa brūshe yájasy adhvarīyási || 11 ||

The plants bear the fire-divine like an embryo (conceived) in due season; the maternal waters bring him to life; in the like manner, the trees and the creepers bear him within themselves every day as they grow. 6

When agitated by the wind, and when quickly moving through the beloved trees, you spread about, devouring your food according to your liking, you possess imperishable energies, O fire-divine, the devourer; you rush forth on every side like men driving chariots. 7

You are the giver of intelligence to the priests who invoke you. You are the accomplisher of worship, the invoker of Nature's bounties, the chief overcomer of foes, and the counsellor (for sound advice). You equally respond to the offerings, small or great. One would like to invoke you alone, and none else. 8

O fire-divine, the performers of sacred rites, with all devotions to you, would select you alone as the ministrant priest at the place of worship in this world. The devout worshippers, bearing oblations and strewing the clipt sacred grass offer you and none else the sacrificial food. 9

O fire-divine, yours is the function of the invoker (*hotṛ*); you perform the duty of the sanctifier (*potṛ*); you perform the function of the conveyor or leader (*neṣṭr*); you are the fire-kindler (*agnīdhra*); you act as conductor (*adhvaryu*); you are the priest-in-chief, the *Brahman*; you are the master of the home, the host or the *Yajamāna*. 10

O immortal fire-divine, when the mortal man presents to you his fuel or his sacred oblation, then you become his invoker of the sacred worship; you go on his errand (to Nature's bounties); you direct the details of the ceremony and offer the sacrifice. In fact, you act as the officiating priest. 11

इमा अस्मै मतयो वाचो अस्मदाँ ऋचो गिरः सुष्टुतयः समग्मत ।
वसूयवो वसवे जातवेदसे वृद्धासु चिद्वर्धनो यासु चाकनत् ॥१२॥
इमां प्रत्नाय सुष्टुतिं नवीयसीं वोचेयमस्मा उशते शृणोतु नः ।
भूया अन्तरा हृद्यस्य निस्पृशे जायेव पत्य उशती सुवासाः ॥१३॥
यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥१४॥
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥१५॥

imā́ asmai matáyo vā́co asmád ā́ñ ṛíco gíraḥ sushṭutáyaḥ sám agmata | vasūyávo vásave jātávedase vṛiddhā́su cid várdhano yā́su cākánat || 12 || imā́m pratnā́ya sushṭutím návīyasīm vocéyam asmā uṣaté ṣṛiṇótu naḥ | bhūyā́ ántarā hṛidy àsya nispṛíṣe jāyéva pátya uṣatī́ suvā́sāḥ || 13 || yásminn áṣvāsa ṛishabhā́sa ukshā́ṇo vaṣā́ meshā́ avasṛishṭā́sa ā́hutāḥ | kīlālapé sómapṛishṭhāya vedháse hṛidā́ matím janaye cā́rum agnáye || 14 || áhāvy agne havír āsyè te srucīva ghṛitám camvī̀va sómaḥ | vājasánim rayím asmé suvī́ram praṣastám dhehi yaṣásam bṛihántam || 15 || 22 ||

(९२) द्विनवतितमं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य मानवः शार्यात ऋषिः । विश्वे देवा देवताः । जगती छन्दः ॥

॥२३॥ यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरतिथिं विभावसुम् ।
शोचञ्छुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो द्यामशायत ॥१॥

92.

Yajñásya vo rathyàm viṣpátim viṣā́m hótāram aktór átithim vibhā́vasum | ṣócañ chúshkāsu háriṇīshu járbhurad vṛíshā ketúr yajató dyā́m aṣāyata || 1 ||

May these holy hymns, these songs and eulogistic verses, reach him, who is the giver of wealth, and cognizant of all things; when all these sacred devotional words expressed for gaining prosperity are perfected, the perfecter Lord is pleased. 12

I address this new laudatory hymn, with all sincerity of heart to the fire-divine or the eternal adorable Lord, who loves it; and appreciates; may He hear our voice; may I be in the centre of His heart; may my words move Him with love, like a loving well-attired wife meeting her husband. 13

I offer my words of appreciation with all sincerity at my heart to the fire-divine, the absorber of water, to whom the oblations of herbal juices (mixed with curds) are offered and to whom every living being like vigorous horses, bulls, milching cows and barren ones, sheep and goat (and even men) are consigned after their death (i.e. to the *Kravya-agni*, the cremating fire). 14

O fire-divine, the oblations have been offered into your mouth, like butter taken into the ladle or like the herbal juice in a spoon; may you confer on us the rich food; bless us with male children, and award us fame and excellence, and every type of prosperity in abundance. 15

92

I praise (the fire), the charioteer of cosmic sacrifice (O Nature's bounties), who is the lord of men, the invoker of all forces, and the guest of night. Blazing amid the dry plants and preying upon the green, he, the showerer of desires, the banner of light, and the adorable; his domain extends to the celestial region. 1

इमर्मञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।
अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते ॥२॥
बळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरत्तवे ।
यदा घोरासो अमृतत्वमाशतादिज्जनस्य दैव्यस्य चर्किरन् ॥३॥
ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्य१रमतिः पनीयसी ।
इन्द्रो मित्रो वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः ॥४॥
प्र रुद्रेण ययिना यन्ति सिन्धवस्तिरो महीमरमतिं दधन्विरे ।
येभिः परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते ॥५॥

imám añjaspám ubháye akriṇvata dharmā́ṇam agním vidáthasya sā́dhanam | aktúṃ ná yahvám ushásaḥ puróhitaṃ tánūnápātam arushásya niṅsate || 2 || báḷ asya nīthā́ ví paṇéṣ ca manmahe vayā́ asya práhutā āsur áttave | yadā́ ghoráso amṛitatvám ā́ṣatā́d íj jánasya daívyasya carkiran || 3 || ṛitásya hí prá·sitir dyaúr urú vyáco námo mahy àrámatiḥ pánīyasī | índro **mitró váruṇaḥ sáṃ cikitriré 'tho bhágaḥ savitā́ pūtádaksha-saḥ** || 4 || **prá rudréṇa yayínā yanti síndhavas tiró mahī́m arámatiṃ** dadhanvire | **yébhiḥ párijmā pariyánn urú jráyo ví róruvaj jaṭháre víṣvam ukṣháte** || 5 || 23 ||

॥२४॥ क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः ।
तेभिश्चष्टे वरुणो मित्रो अर्यमेन्द्रो देवेभिरर्वशेभिरर्वशः ॥६॥
इन्द्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च पौंस्ये ।
प्र ये न्वस्याहणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः ॥७॥

krāṇā́ rudrā́ marúto viṣvákṛishṭayo diváḥ ṣyenā́so ásurasya nīḷáyaḥ | tébhiṣ cashṭe váruṇo mitró aryaméndro devébhir arvaṣébhir árvaṣaḥ || 6 || índre bhújaṃ ṣaṣamānā́sa āṣata sū́ro dṛíṣīke vṛíshaṇaṣ ca paúṅsye | prá yé nv àsyā-rháṇā tatakshiré yújaṃ vájraṃ nṛishádaneshu **kārávaḥ** || 7 ||

Both (men and divine powers) make this fire-divine the chief protector, the upholder of all works, and the accomplisher of the sacred worship. They have recourse to him, who is great, is the precursor of the dawn, and the offspring of the brilliant (cosmic wind). 2

We very much wish that our notions regarding that adorable (fire-divine) come to be true. May our oblations, presented to him, be rightly consumed. While the formidable flames (of the fire) reach the immortal world, may our priests extoll the divine being. 3

The vast heaven, the spacious firmament, and the glorious unbounded earth, pay homage to the fire-divine, Lord of the cosmic sacrifice; and Nature's bounties, such as the lightning, the sun, the water, the wind, and the cosmic intelligence, with potentialities purified, recognize him with one accord. 4

The rivers flow along with the dashing storms (and the cloudy winds) and sweep over the boundless earth; with them the circumambient lightning, spreading over a wide space, thundering in the belly (of the firmament), bedews every thing that lies within. 5

The cloud-bearing winds, the offspring of the mighty storms, mixing with every one, flying like the hawks, high in the sky, the co-residents of the same firmament, are engaged in their function. With these swift-moving powers, may our bounties, like waters, the fire, and the sun, look on us with favour (and be of timely use to us). 6

They who love Lord and Nature's bounties, are blessed with protection under the resplendent Lord; the sun also blesses them with fine vision; they are also blessed with manly vigour received from the vigorous forces. These worshippers, who diligently offer adoration to Lord, get full protection from the thunderbolt of Lord's justice and they prosper amidst the assemblies of men. 7

सूरश्चिदा हरितो अस्य रीरमदिन्द्रादा कश्चिद्भयते तवीयसः ।
भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरिः स्तन्नबाधितः ॥८॥
स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन ।
येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः ॥९॥
ते हि प्रजाया अभरन्त वि श्रवो बृहस्पतिर्वृषभः सोमजामयः ।
यज्ञैरथर्वा प्रथमो वि धारयद्देवा दक्षैर्भृगवः सं चिकित्रिरे ॥१०॥

súraṣ cid á haríto asya rīramad índrād á káṣ cid bhayate távīyasaḥ | bhīmásya vríshṇo jaṭhárād abhiṣváso divé-dive sáhuri stann ábādhitaḥ || 8 || stómam vo adyá rudráya ṣíkvase kshayádvīrāya námasā didishṭana | yébhiḥ ṣiváḥ svávāñ evayávabhir diváḥ síshakti sváyaṣā níkāmabhiḥ || 9 || té hí prajáyā ábharanta ví ṣrávo bṛíhaspátir vṛishabháḥ sómajāmayaḥ | yajñaír átharvā prathamó ví dhārayad devá dákshair bhṛígavaḥ sáṃ cikitrire || 10 || 24 ||

॥२५॥ ते हि द्यावापृथिवी भूरिरेतसा नराशंसश्चतुरङ्गो यमोऽदितिः ।
देवस्त्वष्टा द्रविणोदा ऋभुक्षणः प्र रोदसी मरुतो विष्णुरर्हिरे ॥११॥
उत स्य न उशिजामुर्विया कविरहिः शृणोतु बुध्न्यो३ हवीमनि ।
सूर्यामासा विचरन्ता दिविक्षिता धिया शमीनहुषी अस्य बोधतम् ॥१२॥
प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये ।
आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम् ॥१३॥

té hí dyávāpṛithiví bhúriretasā nárāṣáṅsaṣ cáturaṅgo yamó 'ditiḥ | devás tváshṭā draviṇodá ṛibhukshánaḥ prá rodasí marúto víshṇur arhire || 11 || utá syá na uṣíjām urviyá kavír áhiḥ ṣriṇotu budhnyò hávīmani | sūryámásā vicárantā divikshítā dhiyá ṣamīnahushī asyá bodhatam || 12 || prá naḥ pūshá caráthaṃ viṣvádevyo 'páṃ nápād avatu vāyúr ishṭáye | ātmánaṃ vásyo abhí vátam arcata tád aṣvinā ṣuhavā yámani ṣrutam || 13 ||

Sun's radiations are under His full control; every divine power fears the resplendent Lord and accepts Him as the mightiest of all. From the vault of the firmament thunders day by day the loud triumphant breathing of the mighty Lord, the showerer of blessings. 8

With humility and reverence, pay your homage to the Lord of mighty forces, the powerful, the subduer of all the heroic powers of obstruction and accompanied by the mounted cavalry of forces. Under His care, the devotees go ahead. He, our Lord, the self-bright, auspicious and strong comes to our help (unheard and unseen as if) from the distant heaven. 9

Verily, the Lord of this vast universe, the showerer of benefits, and the close associate of the divine elixir, bestows food for the support of people. The steadfast seers of the by-gone age have churned out the fire for the first time, and so long as this fire is preserved by the offer of oblations, the society shall prosper (with wealth and cattle, harnessing the blessings of Nature). 10

They, the earth and heaven, with their abundant waters, the wind, the Mother Infinity, the divine architect, the wealth-givers, the solar rays, the attributes of cosmic vital principles, and the sun are worshipped by us in the fourfold fire ritual. 11

And may the vigilant fire of the firmament hear the copious praise of our ardent worshippers at the offering of oblations; may the revolving sun and moon resting in celestial region, the earth and sky, comprehend by their intelligence the contents of our this praise. 12

May the universal nourisher protect all our moveable property; may the wind, the friend of all universal powers, the offsprings of the waters, preserve us for the celebration of the worship. May you worship air, the life-principle, to obtain excellent food. May the twin divines, who are worthy to be invoked, hear us on their way. 13

विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि ।
ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिम् ॥१४॥
रेभदत्र जनुषा पूर्वो अङ्गिरा ग्रावाण ऊर्ध्वा अभि चक्षुरध्वरम् ।
येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्वनन्वति ॥१५॥

visám āsám ábhayā-
nām adhikshítam gīrbhír u sváyasasam grinīmasi | gnábhir vísvābhir áditim anarvánam aktór yúvānam nrimáná ádhā pátim || 14 || rébhad átra janúshā pūrvo áñgirā grávāna ūrdhvá abhí cakshur adhvarám | yébhir víhāyā ábhavad vicakshanáh páthah sumékam svádhitir vánanvati || 15 || ** ||

(९३) त्रिनवतितमं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य पार्थ्यस्तान्व ऋषिः । विश्वे देवा देवताः । (१, ४-८, १०, १२, १४) प्रथमर्चश्चतुर्थ्यादिपञ्चानां दशमीद्वादशीचतुर्दशीनाञ्च प्रस्तारपङ्क्तिः, (२, ३, १३) द्वितीयातृतीयात्रयोदशीनामनुष्टुप्, (९) नवम्या अक्षरैः पङ्क्तिः, (११) एकादश्या न्यङ्कुसारिणी, (१५) पञ्चदश्याश्च पुरस्ताद्बृहती छन्दांसि ॥

॥२६॥ महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं नः ।
तेभिर्नः पातं सह्यस एभिर्नः पातं शूषणि ॥१॥
यज्ञेयज्ञे स मर्त्यो देवान्त्सपर्यति । यः सुम्नैर्दीर्घश्रुत्तम आविवासात्येनान् ॥२॥
विश्वेषामिरज्यवो देवानां वार्महः । विश्वे हि विश्वमहसो विश्वे यज्ञेषु यज्ञियाः ॥३॥
ते घा राजानो अमृतस्य मन्द्रा अर्यमा मित्रो वरुणः परिज्मा ।
कद्रुद्रो नृणां स्तुतो मरुतः पूषणो भगः ॥४॥

93.

Máhi dyāvāprithivī bhūtam urví nárī yahví ná ródasī sádam nah | tébhir nah pātam sáhyasa ebhír nah pātam sūsháni || 1 || yajñé-yajñe sá mártyo deván saparyati | yáh sumnaír dīrghasrúttama āvívāsaty enān || 2 || vísveshām irajyavo devánām vár maháh | vísve hí visvámahaso vísve yajñéshu yajñíyāh || 3 || té ghā rájāno amrítasya mandrá aryamá mitró várunah párijmā | kád rudró nrinám stutó marútah pūsháno bhágah || 4 ||

We glorify with praises the fire-divine, the self-famous, who dwells amongst these fearless beings; we praise the irresistible Mother Infinity, together with all creativities of Nature's bounties; we praise the young Lord of night, the moon; we praise the sun, the friend of men and above all, we praise the over-all Lord. 14

There, at first the churner of the fire proclaims the initial rites; then the highly lifted clouds exalt the sacrifice, and invoke the Lord and His lightning with thunder brings forth the excellent water, and produces food on the water-drenched fields. 15

93

O heaven and earth, please be mighty and far-extended; may both of these worlds be gracious to us like the young dames. May you with your protections bring security to us against our strong adversaries; and may you protect us by giving us full strength. 1

That man pleases the divine powers at every service, who being most versed in the inner meanings of texts, serves people with gratifying offerings. 2

O Nature's bounties, give us, to one and all, physical and spiritual powers. Verily, all of you are endowed with great glory. All of you are to be invoked at the time of our sacred acts of benevolence. 3

These Nature's bounties are the joyful lords of ambrosia and are adorable. They are known under different names: *Aryaman* (being the regulator of cosmic order), *Mitra* (the principle of effulgence behind the sun), cirumambient *Varuṇa* (being the master of oceanic forces), *Rudra* (the mighty forces behind the storms), *Maruts* (the cloud-bearing winds), *Pūṣan* (the nourishing principles), and *Bhaga* (the power behind prosperity). 4

उत नो नक्तमपां वृषण्वसू सूर्यामासा सदनाय सधन्या ।
सचा यत्साद्येषामहिर्बुध्नेषु बुध्न्यः ॥५॥

utá no náktam apā́ṃ vṛishaṇvasū sū́ryāmā́sā sádanāya sadhanyā̀ | sácā yát sā́dy eshām áhir budhnéshu budhnyàḥ || 5 || 26 ||

॥२७॥ उत नो देवावश्विना शुभस्पती धामभिर्मित्रावरुणा उरुष्यताम् ।
महः स राय एषतेऽति धन्वेव दुरिता ॥६॥
उत नो रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथस्पतिर्भगः ।
ऋभुर्वाज ऋभुक्षणः परिज्मा विश्ववेदसः ॥७॥
ऋभुर्ऋभुक्षा ऋभुर्विधतो मद आ ते हरी जूजुवानस्य वाजिना ।
दुष्टरं यस्य साम चिदृधग्यज्ञो न मानुषः ॥८॥
कृधी नो अह्रयो देव सवितः स च स्तुषे मघोनाम् ।
सहो न इन्द्रो वह्निभिर्न्येषां चर्षणीनां चक्रं रश्मिं न योयुवे ॥९॥
ऐषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्षणि श्रवः ।
पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे ॥१०॥

utá no devā́v aṣvínā ṣubhás pátī dhā́mabhir mitrā́váruṇā urushyatām | maháḥ sá rāyá éshaté 'ti dhánveva duritá || 6 || utá no rudrā́ cin mṛiḷatām aṣvínā víṣve devā́so ráthaspátir bhágaḥ | ṛibhúr vā́ja ṛibhukshaṇaḥ párijmā viṣvavedasaḥ || 7 || ṛibhúr ṛibhukshā́ ṛibhúr vidható máda ā́ te hárī jūjuvānásya vājínā | dushṭáram yásya sā́ma cid ṛídhag yajñó ná mā́nushaḥ || 8 || kṛidhí no áhrayo deva savitaḥ sá ca stushe maghónām | sahó na índro váhnibhir ny èshāṃ carshaṇīnā́ṃ cakrā́ṃ raṣmím ná yoyuve || 9 || aíshu dyā́vāpṛithivī dhātam mahád asmé vīréshu viṣvácarshaṇi ṣrávaḥ | **pṛikshā́ṃ vā́jasya sātáye pṛikshā́ṃ rāyótá turváṇe || 10 || 27 ||**

May you, the twin divines, the showerers of wealth, and may you, the sun and moon, and may you, the lords of our waters, come by day and night to our dwellings, whilst clouds set themselves in the firmament in clusters of different shades. 5

And may the twin divines (food and fuel), the lord of water, and the sun and ocean protect us with their benevolence. The one, whom they offer protection, gets ample opulence even through adversities, as a traveller goes safe across a desert. 6

And may the terrible bounties and twin divines make us happy, O omniscient one of universal approach, great and gracious bounties; may the factors leading to sustenance, prosperity, wisdom, strength and also the circumambient wind make us happy. 7

Great is the force of lightning; great is the joy of the worshipper; vigorous are the two driving energies of yours, O rapidly approaching divines. This sacrifice is different; it is divine, not human and its hymn of reverence is unassailable. 8

O the impeller Lord, make us divine and free from shame and faults; you are praised by the priests of nobility. May the resplendent Lord accompanied by the vital forces guide the reins and the chariot-wheel of our life. 9

O heaven and earth, may you grant to our sons name and fame, extending to all quarters of people; may you grant them sustenance for the acquisition of strength; grant them sustenance and wealth for gaining victory over adversaries. 10

॥२८॥ एतं शंसमिन्द्रास्मयुष्ट्वं कूचित्सन्तं सहसावन्नभिष्टये सदा पाह्यभिष्टये ।
मेदतां वेदता वसो ॥११॥
एतं मे स्तोमं तना न सूर्ये द्युतद्यामानं वावृधन्त नृणाम् ।
संवननं नाश्व्यं तष्टेवानपच्युतम् ॥१२॥
वावर्त येषां राया युक्तैषां हिरण्ययी ।
नेमधिता न पौंस्या वृथेव विष्टान्ता ॥१३॥
प्र तद्दुःशीमे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु ।
ये युक्त्वाय पञ्च शतास्मयु पथा विश्राव्येषाम् ॥१४॥
अधीन्न्वत्र सप्ततिं च सप्त च ।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट माय्वः ॥१५॥

etám ṣánsam indrāsmayúsh ṭvám kūcit sántaṃ sahasāvann abhíshṭaye sádā pāhy abhíshṭaye | medátāṃ vedátā vaso || 11 || etám me stómaṃ taná ná sū́rye dyutádyāmānaṃ vāvṛidhanta nṛiṇā́m | saṃvánanaṃ nā́ṣvyaṃ táshṭevánapacyutam || 12 || vāvárta yéshāṃ rāyā́ yuktaíshāṃ hiraṇyáyī | nemádhitā ná paúnsyā vṛítheva vishṭā́ntā || 13 || prá tád duḥṣíme príthavāne vené prá rāmé vocam ásure maghávatsu | yé yuktvā́ya páñca ṣatā́smayú pathā́ viṣrā́vy eshām || 14 || ádhīn nv átra saptatíṃ ca saptá ca | sadyó didishṭa tā́nvaḥ sadyó didishṭa pārthyáḥ sadyó didishṭa māyaváḥ || 15 || 28 ||

(९४) चतुर्नवतितमं सूक्तम्

(१–१४) चतुर्दशर्चस्यास्य सूक्तस्य काद्रवेयः सर्पोऽर्बुद ऋषिः । ग्रावाणो देवताः । (१–४, ६, ८–१३) प्रथमादिचतुर्ऋचां षष्ठ्या अष्टम्यादिषण्णाञ्च जगती, (५, ७, १४) पञ्चमी-सप्तमीचतुर्दशीनाञ्च त्रिष्टुप् छन्दसी ॥

॥२९॥ प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः ।
यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः ॥१॥

94.

Praíté vadantu prá vayáṃ vadāma grā́vabhyo vā́caṃ vadatā vádadbhyaḥ | yád adrayaḥ parvatāḥ sākám āṣávaḥ ṣlókaṃ ghósham bhárathéndrāya somínaḥ || 1 ||

O mighty resplendent Lord, (we know that) you are favourably inclined towards us; may you ever protect us, your worshippers, wherever you may be; so that your devotees attain their desires; Award me wisdom, O Lord of riches, for my prosperity. 11

May the priests strengthen this my hymn, which is the destroyer of the enemies and which guides us on brilliant path right up to the sun, and as the carpenter constructs the yokes, firmly set in a horse-driven car. 12

The chariot car has come full of wealth, and laden with gold indicating that many powers have fought the battle to the finish, attaining victory, as if, without an effort. 13

I am seeing before me the vast heaven extending to limitless distances; the sun also rises high to its zenith, then sets into the darkness of nights, and so often the demons of clouds keep it in hiding. In the midst of all this, I proclaim the glory of Nature's bounties, who have come yoked with five hundred chariots, and their affection for us is renowned on the road (which they have traversed). 14

The devotee of extensive noble acts promptly implores for seven-and-seventy cows, the devotee possessing vast lands also prays for it and the one who has keen intellect also prays for it with the same promptness. 15

94

Whilst the venerable priest recites the sacred hymns of praises addressed to the resplendent Lord, we have all around us a serene atmosphere of divine bliss; in response to him, let these other learned sages also speak; let us also speak to the preaching learned sages, and may you also sing praises. 1

एते वदन्ति शतवत्सहस्रवदभि क्रन्दन्ति हरितेभिरासभिः ।
विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत ॥२॥
एते वदन्त्यविदन्नना मधु न्यूङ्खयन्ते अधि पक्व आमिषि ।
वृक्षस्य शाखामरुणस्य बप्सतस्ते सूभर्वा वृषभाः प्रेमराविषुः ॥३॥
बृहद्वदन्ति मदिरेण मन्दिनेन्द्रं क्रोशन्तोऽविदन्नना मधु ।
संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः ॥४॥
सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
न्यङ्नि यन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः ॥५॥

eté vadanti
ṣatávat sahásravad abhí krandanti háritebhir āsábhiḥ | vishṭví grâvāṇaḥ sukrítaḥ sukrityáyā hótuṣ cit pûrve havirádyam āṣata || 2 || eté vadanty ávidann anâ mádhu ny ûñkhayante ádhi pakvá âmishi | vrikshásya ṣâkhām aruṇásya bápsatas té sûbharvā vrishabhâḥ prém arāvishuḥ || 3 || brihád vadanti madiréṇa mandínéndram króṣanto 'vidann anâ mádhu | saṃrábhyā dhîrāḥ svásribhir anartishur āghosháyantaḥ prithivím upabdíbhiḥ || 4 || suparṇâ vâcam akratópa dyávy ākharé kríshṇā ishirâ anartishuḥ | nyàñ ní yanty úparasya nishkritám purû réto dadhire sūryaṣvítaḥ || 5 || 29 ||

॥३०॥ उग्रा इव प्रवहन्तः समायमुः साकं युक्ता वृषणो बिभ्रतो धुरः ।
यच्छ्वसन्तो जग्रसाना अराविषुः शृण्व एषां प्रोथथो अर्वतामिव ॥६॥
दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः ।
दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः ॥७॥

ugrâ iva praváhantaḥ samâyamuḥ sākáṃ yuktâ vríshaṇo bíbhrato dhúraḥ | yác chvasánto jagrasānâ árāvishuḥ ṣriṇvá eshām prothátho árvatām iva || 6 || dáṣāvanibhyo dáṣakakshyebhyo dáṣayoktrebhyo dáṣayojanebhyaḥ | dáṣābhīṣubhyo arcatājárebhyo dáṣa dhúro dáṣa yuktâ váhadbhyaḥ || 7 ||

They recite loudly like a hundred, like a thousand men; they sing aloud with bright faces, and obtain the sacrificial food. The pious priests through their piety partake of the sacrificial food, even before the invoker (the fire divine). 2

They speak; they receive into their mouths the sweet elixir; they enjoy it just as people enjoy the sweet juices of the ripened fruits; and then continue recitations of the devotional Vedic hymns with the vigour of a bull. 3

They chant aloud the glory of the resplendent Lord with the exhilarating hymns of praises. They grasp the sweet elixir (the herbal juices mixed with milk) by their fingers and tongue, and through ecstasy of joy dance filling the earth with chants. 4

The well-gliding clouds roar in the firmament; they dance like the black deer in the stall; they shower down the expressed ambrosia (of rains) from the upper layers and becoming bright as the sun shines, they yield abundant moisture. 5

Bearing the burthen of the cosmic sacrifice, yoked with the divine love, they (the clouds) exert themselves like spirited horses; when panting and expressing devotion, they cry aloud and their snorting is heard like that of horses. 6

Honour those formidable equipments of performing cosmic sacrifice which have ten workers, ten girths, ten yokes, ten agents, ten encompassers, which are possessed of ten burthens used in performing the sacrifice. 7

ते अद्रयो दशयन्त्रास आशवस्तेषामाधानं पर्येति हर्यतम् ।
त ऊं सुतस्य सोम्यस्यान्धसोंशोः पीयूषं प्रथमस्य भेजिरे ॥८॥
ते सोमादो हरी इन्द्रस्य निंसतेंशुं दुहन्तो अध्यासते गवि ।
तेभिर्दुग्धं पपिवान्त्सोम्यं मध्विन्द्रो वर्धते प्रथते वृषायते ॥९॥
वृषा वो अंशुर्न किला रिषाथनेळावन्तः सदमित्स्थनाशिताः ।
रैवत्येव महसा चारवः स्थन यस्य ग्रावाणो अजुषध्वमध्वरम् ॥१०॥

té ádrayo dáṣayantrāsa āṣávas téshām ādhánam páry eti haryatám | tá ū sutásya somyásyándhaso 'ṅṣóḥ pīyū́sham prathamásya bhejire || 8 || té somā́do hárī índrasya niṅsate 'ṅṣúṃ duhánto ádhy āsate gávi | tébhir dugdhám papiván somyám mádhv índro vardhate práthate vṛishāyáte || 9 || vṛ́íshā vo aṅṣúr ná kílā rishāthanélāvantaḥ sádam ít sthanā́ṣitāḥ | raivatyéva máhasā cā́rava sthana yásya grāvāṇo ájushadhvam adhvarám || 10 || 30 ||

॥२१॥ तृदिला अतृदिलासो अद्रयोऽश्रमणा अश्टृथिता अमृत्यवः ।
अनातुरा अजराः स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः ॥११॥
ध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युञ्जते ।
अजुर्यासो हरिषाचो हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः ॥१२॥
तदिद्वदन्त्यद्रयो विमोचने यामन्नञ्जस्पा इव घेदुपब्दिभिः ।
वपन्तो बीजमिव धान्याकृतः पृञ्चन्ति सोमं न मिनन्ति बप्सतः ॥१३॥

tṛidilā́ átṛidilāso ádrayo 'ṣramaṇā́ áṣṛithitā ámṛityavaḥ | anāturā́ ajárā sthā́mavishṇavaḥ supīváso átṛishitā átṛishṇajaḥ || 11 || dhruvā́ evá vaḥ pitáro yugé-yuge kshémakāmāsaḥ sádaso ná yuñjate | ajuryā́so harishā́co harídrava ā́ dyā́ṃ rávena pṛithivī́m aṣuṣravuḥ || 12 || tád íd vadanty ádrayo vimócane yā́mann añjaspā́ iva ghéd upabdíbhiḥ | vápanto bī́jam iva dhānyākṛ́taḥ pṛiñcánti sómaṃ ná minanti bápsataḥ || 13 ||

These stones (of pressing juices) having ten reins, swiftly moving, their delightful whirling goes round; they first taste the ambrosia of the fragment of food of the expressed elixir. 8

These devourers of the divine elixir kiss the horses of the resplendent sun. They mix in it the milk, taken from the cosmic cow. It is the privilege of the resplendent self to quaff the sweet elixir juice milked forth by them. Thereupon he increases, waxes broad and grows vigorous. 9

The divine elixir is your showerer (O stones) of benefits; you are unharmed, and abound in food. You are constantly feeding, like the wealthy possessed of splendour. You, O stones, are charming. You make that person happy for whom you perform cosmic sacrifice. 10

Splitting, but unsplit, you, O sacred stones, are untiring, never weary, immortal, free from disease, undecaying, rising and falling, powerful, unthirsting, but generating thirst in others. 11

O stones, your progenitors (the mountains) verily stand firm from age to age; they though desirous of rest, are not displaced from their seat; they are exempt from decay. Enjoying the elixir, they do not lack flowing green juice, and with their voice they make heaven and earth resound with their clamour. 12

These sacred stones proclaim it with their clamour at the time of extracting elixir, like the quick-protecting chariots on the road; and like cultivators of the land when they are sowing seed, they relish the elixir without devouring. 13

सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं तुदन्तः ।
वि षू मुञ्चा सुषुवुषो मनीषां वि वर्तन्तामद्रयश्चायमानाः ॥१४॥

॥ ॐ ॥

॥ इत्यष्टमाष्टके चतुर्थोऽध्यायः ॥

[चतुर्थाध्याये वर्गाः ३१, सूक्तानि ९, ऋचः १६०]

suté adhvaré ádhi vácam akratá krīḷáyo ná mātáram tudántaḥ | ví shú muñcā sushuvúsho manīshám ví vartantām ádrayaṣ cáyamānāḥ || 14 || 31 ||

Caturtho 'dhyāyaḥ.

अथ पञ्चमोऽध्यायः ॥

(९५) पञ्चनवतितमं सूक्तम्

(१–१८) अष्टादशर्चस्यास्य सूक्तस्य (१, ३, ६, ८–१०, १२, १४, १७) प्रथमातृतीयाषष्ठीनामृचामष्टम्यादितृचस्य द्वादशीचतुर्दशीसप्तदशीनाञ्चैळः पुरूरवा ऋषिः, (२, ४–५, ७, ११, १३, १५–१६, १८) द्वितीयाचतुर्थीपञ्चमीसप्तम्येकादशीत्रयोदशीपञ्चदशीषोडश्यष्टादशीनाञ्चोर्वशी ऋषिका । (१, ३, ६, ८–१०, १२, १४, १७) प्रथमातृतीयाषष्ठीनामृचामष्टम्यादितृचस्य द्वादशीचतुर्दशीसप्तदशीनाञ्चोर्वशी, (२, ४–५, ७, ११, १३, १५–१६, १८) द्वितीयाचतुर्थीपञ्चमीसप्तम्येकादशीत्रयोदशीपञ्चदशीषोडश्यष्टादशीनाञ्च पुरूरवा देवते । त्रिष्टुप् छन्दः ॥

॥ हरिःॐ ॥

॥१॥ हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मन्त्रा अनुदितास एते मयस्करन्परतरे चनाहन् ॥१॥
किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वातइवाहमस्मि ॥२॥

95.

Hayé jáye mánasā tíshṭha ghore vácāṅsi miṣrá kriṇavāvahai nú | ná nau mántrā ánuditāsa eté máyas karan páratare canáhan || 1 || kím etá vācá kriṇavā távāhám prákramisham ushásām agriyéva | púrūravaḥ púnar ástam párehi durāpaná váta ivāhám asmi || 2 ||

They being effused at the sacrifice, raise their voice for elixir like children at play, striking their mother. They proclaim the praise of the stones, which have effused the elixir. Let the honoured stones revolve. 14

95

[P = *Pururavas* = cloud, loud sounding; and lover
U = *Urvasi* = Lightning; and beloved.
The sun is cloud's father and hence is Urvasi's father-in-law.]

O my indignant lady, turbulent in mind, keep yourself calm. Let us coolly talk to each other. How long shall we keep our thoughts secret? Let us talk them out, since the unspoken words shall not provide us happiness even up to the last day. 1

What shall we achieve by such a dialogue? I had to fly away from thee like the first of the dawn, O highly sounding cloud, go back to your home. You cannot catch me as none can catch wind. 2

इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः ॥३॥
सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात् ।
अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्नथिता वैतसेन ॥४॥
त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि ।
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व१स्तदासीः ॥५॥

[1]íshur ná ṣriyá ishudhér asanā́ goshā́ḥ ṣatasā́ ná ráṅhiḥ | avíre krátau ví davidyutan nórā ná māyúm citayanta dhúnayaḥ || 3 || sā́ vásu dádhatī ṣváṣurāya váya úsho yádi váshṭy ántigṛihāt | ástam nanakshe yásmiñ cākán dívā náktam ṣnathitā́ vaitaséna || 4 || tríḥ sma mā́hnaḥ ṣnathayo vaitasénotá sma mé 'vyatyai pṛiṇāsi | púrūravó 'nu te kétam āyam rā́jā me vīra tanvàs tád āsīḥ || 5 || 1 ||

॥२॥ या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेचक्षुर्न ग्रन्थिनी चरण्युः ।
ता अञ्जयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवन्त ॥६॥
समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्य१ः स्वगूर्ताः ।
महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥७॥
सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे ।
अप स्म मत्तरसन्ती न भुज्युस्ता अत्रसन्रथस्पृशो नाश्वाः ॥८॥

yā́ sujūrṇíḥ ṣréṇiḥ sumnáāpir hradécakshur ná granthínī caraṇyúḥ | tā́ añjáyo 'ruṇáyo ná sasruḥ ṣriyé gā́vo ná dhenávo 'navanta || 6 || sám asmiñ jā́yamāna āsata gnā́ utém avardhan nadyàḥ svágūrtāḥ | mahé yát tvā purūravo ráṇāyā́vardhayan dasyuhátyāya devā́ḥ || 7 || sácā yád āsu jáhatīshv átkam ámānushīshu mā́nusho nishéve | ápa sma mát tarásantī ná bhujyús tā́ atrasan rathaspṛíṣo nā́ṣvāḥ || 8 ||

My arrow is not to be cast from the quiver for obtaining glory; no desires are left in me to capture cattle (of enemy). I am no longer keen to make hundredfold riches. My prowess, having lost its strength, no longer flashes forth; my warriors, the terrifiers of the foes, are not able to shout in the firmament. 3

O dawns, if the lightning, offering food and wealth to father-in-law (the sun), loves her husband (the cloud), she has repaired from the neighbouring house to her husband's home, where she loves (her lord), being delighted by his embraces night and day. 4

O loud-sounding clouds, you embrace me thrice a day; you love me without a rival; I have followed you to your dwelling; you have been the sovereign of my person. 5

The lightnings are of different characteristics; they are known as *Sujurni* (swift in flash), *Sreni* (moving in progression), *Sumna-Api* (of high potential), *Hrde-Caksu* (water-nymph), *Granthinc* (Knot-like), and *Caranyu* (serpentile). They are bright decorative, flashing and flickering and like milch-kine, they love to stay for protection. 6

As soon as he is born, the wives, i.e. all the creativities surround him, the spontaneously flowing rivers nourish him, and the divine powers rear you, O loud-sounding clouds, for a mighty conflict, for destroying the wicked and infidels. 7

When I, a mortal, make love, these immortal nymphs, having abandoned their bodies, flee from me like a timid snake, like horses harnessed to a chariot. 8

यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते ।
ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः ॥९॥
विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि ।
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥१०॥

yád āsu márto amrítasu nisprik sám kshonibhih krátubhir ná priñkté | tá ātáyo ná tanvàh sumbhata svá ásvāso ná **krīḷáyo dándaṣānāḥ || 9 || vidyún ná yá pátantī dávidyod bhárantī me ápyā kámyāni | jánishṭo apó náryaḥ sújātaḥ prórváṣī tirata dīrghám áyuḥ || 10 || 2 ||**

॥३॥ जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः ।
अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि ॥११॥
कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन् ।
को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥१२॥
प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रन्ददाध्ये शिवायै ।
प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ॥१३॥
सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥१४॥

jajñishá itthá gopíthyāya hí dadhátha tát purūravo ma ójaḥ | ásāsam tvā vidúshī sásminn áhan ná ma áṣriṇoḥ kím abhúg vadāsi || 11 || kadá sūnúḥ pitáram jātá ichāc cakrán náṣru vartayad vijānán | kó dámpatī sámanasā ví yūyod ádha yád agníḥ ṣváṣureshu dídayat || 12 || práti bravāṇi vartáyate áṣru cakrán ná krandad ādhyè ṣivāyai | prá tát te hinavā yát te asmé páreby ástam nahí mūra mápaḥ || 13 || sudevó adyá prapáted ánāvṛit parāvátam paramám gántavá u | ádhā ṣáyīta nírriter upásthé 'dhainam vṛíkā rabhasáso adyúḥ || 14 ||

When a mortal mixing with these immortal nymphs has conversed with them with words and actions, they becoming ducks do not show the beauty of their bodies, and like playful horses in their play, they bite and nibble. 9

She, who flashes brilliant like the lightning, bringing me the desirable dews of heaven, appears; then from waters a son, strong and sturdy and friendly to man, is born; may lightning prolong my life for long long times. 10

You have been born thus to protect the earth; you have deposited this vigour in me; why do you now address me, neglectful of my instructions? 11

When shall a son born of you claim me as a father, and, crying, shed drops of tear on recognizing me? What son shall sever husband and wife who are of one mind, now that the fire shines upon your husband's parents? 12

Let me reply. Your son will shed tears, crying out and calling aloud when the expected auspicious moment arrives; I will send you that child which is yours in me. Now please depart to your house; you cannot, O simpleton, detain me further. 13

Your lover, who sports with you, may now depart, never to return, depart to proceed to a distant region. Either let him sleep upon the lap of misfortune, or let the swift-moving wolves devour him. 14

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥१५॥

púrūravo mā́ mṛithā mā́ prá papto mā́ tvā vṛikāso áṣivāsa u kshan | ná vaí straíṇāni sakhyā́ni santi sālāvṛikā́ṇām hṛ́dayāny etā́ || 15 || 3 ||

॥४॥ यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥१६॥
अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः ।
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥१७॥
इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबन्धुः ।
प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥१८॥

yád vírūpā́caram mártyeshv ávasam rā́trīḥ ṣarádaṣ cátasraḥ | ghṛitásya stokám sakṛíd áhna āṣnām tā́d evédám tātṛipāṇā́ carāmi || 16 || antarikshaprā́m rájaso vimā́nīm úpa ṣikshāmy urváṣīm vásishṭhaḥ | úpa tvā rātíḥ sukṛitásya tíshṭhān ní vartasva hṛ́dayam tapyate me || 17 || íti tvā devā́ imá āhur aiḷa yáthem etád bhávasi mṛityúbandhuḥ | prajā́ te devā́n havíshā yajāti svargá u tvám ápi mādayāse || 18 || 4 ||

(९६) षण्णवतितमं सूक्तम्
(१-१३) त्रयोदशर्चस्यास्य सूक्तस्याङ्गिरसो बरुरैन्द्रः सर्वहरिर्वा ऋषिः । हरिर्देवता । (१-११) प्रथमाद्येकादशर्चां जगती, (१२-१३) द्वादशीत्रयोदश्योश्च त्रिष्टुप् छन्दसी ॥

॥५॥ प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदम् ।
घृतं न यो हरिभिश्चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः ॥१॥

96.

Prá te mahé vidáthe ṣaṅsisham hárī prá te vanve vanúsho haryatám mádam | ghṛitám ná yó háribhiṣ cā́ru sécata ā́ tvā viṣantu hárivarpasam gíraḥ || 1 ||

Die not, O clouds, nor vanish; let not the hideous wolves devour you. (Please remember that) with women there can be no lasting friendship; their hearts are the hearts of jackals. 15

When changed in form I wandered amongst mortals, I spent four delightful years. I for my meals took once a day a bit of butter; satisfied with that I now depart. 16

I, her best lover, bring under subjection the lightning who fills the firmament with lustre and measures out the region. May the bestower of the auspicisous rite, abide near you; come back — my heart is bruning. 17

O Aila, the loud-sounding clouds, these divines say to you, since you are indeed subject to death, "let your progeny propitiate your revered cosmic forces with oblations, then alone you shall rejoice (with me) in heaven". 18

96

(O Sun), I glorify your two vigorous steeds (the mighty driving forces of repulsion and attraction) at the cosmic sacrifice. May we be exhilarated by your blessings. You drive away, and even destroy, the demon clouds. What a wonder, that the bright-tinted clouds shower the torrents of pure water from above like beautiful butter! may my praises reach you. 1

हरिं हि योनिमभि ये समस्वरन्हिन्वन्तो हरी दिव्यं यथा सदः ।
आ यं पृणन्ति हरिभिर्न धेनव इन्द्राय शूषं हरिवन्तमर्चत ॥२॥
सो अस्य वज्रो हरितो य आयसो हरिर्निकामो हरिरा गभस्त्योः ।
द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता मिमिक्षिरे ॥३॥
दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या ।
तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिंभरः ॥४॥
त्वंत्वमहर्यथा उपस्तुतः पूर्वेभिरिन्द्र हरिकेश यज्वभिः ।
त्वं हर्यसि तव विश्वमुक्थ्य१मसामि राधो हरिजात हर्यतम् ॥५॥

hárim̥ hí yó-nim abhí yé samásvaran hinvánto hárī divyám̥ yáthā sádaḥ | á yám priṇánti háribhir ná dhenáva índrāya sūshám̥ hárivantam arcata || 2 || só asya vájro hárito yá āyasó hárir níkāmo hárir á gábhastyoḥ | dyumní suṣipró hárimanyusāyaka índre ní rūpá háritā mimikshire || 3 || diví ná ketúr ádhi dhāyi haryató vivyácad vájro hárito ná ráṅhyā | tudád áhim̥ háriṣipro yá āyasáḥ sahásraṣokā abhavad dharimbharáḥ || 4 || tvám̥-tvam aharyathā úpastutaḥ pū́rvebhir indra harikeṣa yájvabhiḥ | tvám̥ haryasi táva víṣvam ukthyàm ásāmi rádho harijāta haryatám || 5 || 6 ||

॥६॥ ता वज्रिणं मन्दिनं स्तोम्यं मद इन्द्रं रथे वहतो हर्यता हरी ।
पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे ॥६॥
अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरी तुरा ।
अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवन्तमानशे ॥७॥

tá vajríṇam mandínam̥ stómyam máda índram̥ ráthe vahato haryatá hárī | purū́ṇy asmai sávanāni háryata índrāya sómā hárayo dadhanvire || 6 || áram̥ kámāya hárayo dadhanvire sthiráya hinvan hárayo hárī turá | árvadbhir yó háribhir jósham íyate só asya kámam̥ hárivantam ānaṣe || 7 ||

May you all priase the vigour of the two horses of the Sun, who drive the chariot in the firmament. These horses take the Sun to the assembly of the great Cosmic Sacrifice. May you all worship the Sun, who derives his might from his horses who drive his chariot. At this sacrifice, the entire creation, every one, participates in the enjoyment of the golden-tinted blissful elixir, just as milch-kine are satisfied with their milk. 2

That is his thunderbolt, yellow, made of iron, the destroyer of foes, desirable, it is in his hands; he is possessed of riches, handsome-jawed, possessed of a shaft and anger which destroys enemies—many golden-tinted forms are mixed in our resplendent Lord (or the Sun). 3

He has been placed by His worshippers in the sky, like the banner of light, the sun. His desirable bolt reaches the foe, as the bay horses (of the sun attain their final goal) through speed. The iron thunderbolt, with yellow jaws smites the nescience, the wicked; He, our resplendent Lord, Lord of horses, shines with thousand lustres. 4

O resplendent Lord (or the sun) with yellow locks, when praised by ancient worshippers, you are pleased to receive the oblation. You, who are manifested of a golden hue, deserve your universal praise. These praises are your superb and delightful sustenance. 5

These two delightful horses yoked to the sun bring the thunderer, the rejoicing and laudable radiant sun, in his car to the place of blissful activities. For him, the beloved one, many libations of the brilliant devotional offerings are stored up (at the cosmic sacrifice). 6

The golden-hued cosmic exhilarating elixirs are stored up to furnish him full satisfaction. The golden-hued saps urge the two swift-horses to serve the stalwart (sun). The chariot rushes with spirited vigour to the place of conflict, reaches the destination, where the sweet devotional elixir is being presented. 7

हरिश्मशारुर्हरिकेश आयसस्तुरस्पेये यो हरिपा अवर्धत ।
अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी ॥८॥
स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः ।
प्र यत्कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यान्धसः ॥९॥
उत स्म सद्म हर्यतस्य पस्त्योऽरत्यो न वाजं हरिवाँ अचिक्रदत् ।
मही चिद्धि धिषणाहर्यदोजसा बृहद्वयो दधिषे हर्यतश्चिदा ॥१०॥

hárismasārur hárikesa āyasás turaspéye yó haripā́ ávardhata | árvadbhir yó háribhir vājínīvasur áti víṣvā duritā́ pā́rishad dhárī || 8 || srúveva yásya hárinī vipetátuḥ ṣípre vā́jāya hárinī dávidhvataḥ | prá yát kritḗ camasé mármrijad dhárī pītvā́ mádasya haryatásyā́ndhasaḥ || 9 || utá sma sádma haryatásya pastyòr átyo ná vā́jam hárivām̐ acikradat | mahí cid dhí dhisháṇā́haryad ójasā bṛihád váyo dadhishe haryatás cid ā́ || 10 || 6 ||

॥७॥ आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियम् ।
प्र पस्त्यमसुर हर्यतं गोराविष्कृधि हरये सूर्याय ॥११॥
आ त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र ।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिम् ॥१२॥
अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ।
ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व ॥१३॥

ā́ ródasī háryamāṇo mahitvā́ návyam-navyam haryasi mánma nú priyám | prá pastyàm asura haryatám gór āvísh kṛidhi háraye sū́ryāya || 11 || ā́ tvā haryántam prayújo jánānām ráthe vahantu hárisipram indra | píbā yáthā prátibhṛitasya mádhvo háryan yajñám sadhamā́de dáṣoṇim || 12 || ápāḥ pū́rveshām harivaḥ sutā́nām átho idám sávanam kévalam te | mamaddhí sómam mádhumantam indra satrā́ vṛishañ jaṭhára ā́ vṛishasva || 13 || 7 ||

The golden-bearded, golden-haired, iron-hearted resplendent sun, the drinker of the golden elixir, has been invigorated by the elixir, which he has quickly quaffed. The elixir is rich in sacrificial food brought by the swift vigorous horses; may the sun drive his two bay horses safe through all possible difficulties. 8

He (the sun) is praised, whose driving horses alight (upon the elixir) like two ladles, whose yellow and bright jaws tremble with eagerness for the sacrificial food, who tastes the delicious exhilarating beverage in the appropriate cup, and who rubs down the sturdy horses (yoked to his chariot). 9

The dwelling of the gracious (sun) is in heaven down to the earth. Exhilarated by the divine elixir, he rushes impetuously as a charger to battle. The earnest prayer for the fulfilment of his desires invokes him (endowed with) strength. (O sun), you amply provide food to your ardent and sincere (devotee). 10

You (O sun, or the resplendent Lord), who are the object of love, fill the entire space from heaven to earth with your glory and greatness. You are worthy of tributes ever new and new. O powerful one, you are always quick in finding out the stores of water for the sake of the water-seizing sun. 11

Let your horses yoked to the cosmic chariot bring you, O sun, (or O Lord of resplendence), the yelow-jawed, ever desirous of sacrifice, in the midst of the other cosmic participants. (O Sun), fully taking part in the cosmic sacrifice, you enjoy the divine elixir, sweetly flavoured, and pressed by ten fingers. May you be fully invoked in the cosmic activity. 12

O sun, lord of divine horses, you have been accepting previous libations. This sacrifice is also exclusively for you. O resplendent sun, exhilarate yourself, with the sweet elixir. O showerer of copious rains, shower it on the lands over which you are supreme. 13

(९७) सप्तनवतितमं सूक्तम्

(१-२३) त्रयोविंशत्यृचस्यास्य सूक्तस्याथर्वणो भिषगृषिः । ओषधयो देवताः । अनुष्टुप् छन्दः ॥

॥८॥

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥१॥
शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥२॥
ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्ण्वः ॥३॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।
सनेयमश्वं गां वास आत्मानं तव पूरुष ॥४॥
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥५॥

97.

Yá óshadhīḥ pū́rvā jātā́ devébhyas triyugám purā́ | mánai nú babhrū́ṇām ahám ṣatám dhā́māni saptá ca || 1 || ṣatám vo amba dhā́māni sahásram utá vo rúhaḥ | ádhā ṣatakratvo yūyám imám me agadám krita || 2 || óshadhīḥ práti modadhvam púshpavatīḥ prasū́varīḥ | áṣvā iva sajítvarīr vīrúdhaḥ pārayishṇvàḥ || 3 || óshadhīr íti mātaras tád vo devīr úpa bruve | sanéyam áṣvam gā́m vā́sa ātmā́nam táva pūrusha || 4 || aṣvatthé vo nishádanam parṇé vo vasatísh kritā́ | gobhā́ja ít kílāsatha yát sanávatha pū́rusham || 5 || 8 ||

॥९॥

यत्रौषधीः समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥६॥

yátraúshadhīḥ samágmata rā́jānaḥ sámitāv iva | vípraḥ sá ucyate bhishág rakshohā́mīvacā́tanaḥ || 6 ||

97

I know the hundred and seven applications of the brown-tinted plants, which have been growing since ancient times, much before men were born and thriving during the three seasons (spring, rains and autumn). 1

You are like mothers of mankind; a hundred are your applications, a thousandfold is your growth; may you who fulfil a hundred functions make this my (man) free from disease. 2

Rejoice, plants, bearing abundant flowers and fruit, triumphing together (over disease) like victorious horses, sprouting forth, bearing men safe beyond disease. 3

"Plants!" thus I hail you; you are the divine mothers of mankind. Oh physician, I shall give you a horse, a cow, and a garment, even myself (in case you cure the sick). 4

Your abode is in the holy tree *(aśvattha)*, your dwelling is established in the *palaśa* leaves; you shall assuredly become the winner of cattle, if you could effectively cure and thus save this man for me. 5

Where, plants, you are congregated like princes in battle, thereby the sage is designated a physician, the destroyer of evil infections and extirpator of virus disease. 6

अ॒श्वा॒व॒तीं सो॑माव॒तीमू॒र्जय॑न्ती॒मुदो॑जसम् ।
आवि॑त्सि॒ सर्वा॒ ओष॑धीर॒स्मा अ॑रि॒ष्टता॑तये ॥७॥
उच्छुष्मा॒ ओष॑धीनां॒ गावो॑ गो॒ष्ठादि॑वेरते ।
धनं॑ सनि॒ष्यन्ती॑नामा॒त्मानं॒ तव॑ पूरुष ॥८॥
इष्कृ॑ति॒र्नाम॑ वो मा॒ताथो॑ यू॒यं स्थ॒ निष्कृ॑तीः ।
सी॒राः प॑त॒त्रिणी॑ स्थन॒ यदा॒मय॑ति॒ निष्कृ॑थ ॥९॥
अति॒ विश्वाः॑ परि॒ष्ठाः स्ते॒न इ॑व व्र॒जम॑क्रमुः ।
ओष॑धीः॒ प्राचु॑च्यवु॒र्यत्किं च॑ त॒न्वो॒३॒॑ रपः॑ ॥१०॥

asvāyatím so-
māvatím ūrjáyantīm údojasam | ávitsi sárvā óshadhīr **asmá arishṭátātaye** || 7 || úc chúshmā óshadhīnām gávo goshṭ**hád iverate** | dhánam sanishyántīnām ātmánam táva pūrusha || 8 || **íshkritir** náma vo mātátho yūyám stha níshkritīh | sī**ráh patatrínī** sthana yád āmáyati nísh kritha || 9 || **áti vísvāh** parishṭhá stená iva vraján akramuh | **óshadhīh prácucyavur** yát kím ca tanvò rápah || 10 || 9 ||

॥१०॥

यदि॒मा वा॒जय॑न्न॒हमोष॑धी॒र्हस्त॑ आद॒धे ।
आ॒त्मा यक्ष्म॑स्य नश्यति पु॒रा जी॑व॒गृभो॑ यथा ॥११॥
यस्यौ॑षधीः प्र॒सर्प॒थाङ्ग॑मङ्गं॒ परु॑ष्परुः ।
ततो॒ यक्ष्मं॒ वि बा॑धध्व उ॒ग्रो म॑ध्यम॒शीरि॑व ॥१२॥
सा॒कं य॑क्ष्म॒ प्र प॑त॒ चाषे॑ण किकिदी॒विना॑ ।
सा॒कं वात॑स्य॒ ध्राज्या॑ सा॒कं न॑श्य नि॒हाक॑या ॥१३॥

yád imá vājáyann ahám óshadhīr hásta ādadhé | ātmá yákshmasya nasyati purá jīvagríbho yathā || 11 || **yásyau-shadhīh** prasárpathāṅgam-aṅgam párush-paruh | táto **yáksh-mam** ví bādhadhva ugró madhyamasír iva || 12 || **sākám yakshma** prá pata cáshena kikidīvínā | sākám **vátasya dhrá-jyā sākám** nasya nihákayā || 13 ||

I praise here the virtues of belonging to four categories: (i) *asvavati,* the curatives; (ii) *somavati,* the sedatives, (iii) *urjayanti,* the energizing and (iv) *ud-ojasa,* the rejuvenating. All these plants, I praise for the purpose of overcoming this disease. 7

O man, the healing virtues of the plants stream forth (from these herbs) like cattle from the stall; they have the competency of restoring the richness of health to you. 8

(O plants), verily your mother is *Iṣkṛti,* the Reliever, and therefore, you are called *Niṣkṛti,* the restorer; whensoever a man is ill, you cure him. 9

The universal all-pervading plants assail diseases as a thief attacks a cow-shed; they drive out all types of infirmities of body whichsoever. 10

As soon as I take these plants in my hand, the vanished strength is restored, and the soul or the root of the malady perishes before the sick succumbs to disease. 11

From him, O plants, in whom you creep from limb to limb, from joint to joint, you drive away disease like some strong arbiter of strife. 12

Fly forth, sickness, with the jay, with the blue jay, with the velocity of the wind; vanish together with the iguana. 13

अ॒न्या वो॑ अ॒न्याम॑वत्व॒न्यान्यस्या॒ उपा॑वत ।
ताः सर्वाः॑ संविदा॒ना इ॒दं मे॒ प्राव॑ता॒ वचः॑ ॥१४॥
याः फ॒लिनी॒र्या अ॑फ॒ला अ॑पु॒ष्पा याश्च॑ पु॒ष्पिणीः॑ ।
बृह॒स्पति॑प्रसूता॒स्ता नो॑ मुञ्च॒न्त्वंह॑सः ॥१५॥

anyā́ vo anyā́m avatv anyā́nyásyā úpāvata | tā́ḥ sárvāḥ saṃvidānā́ idám me prā́vatā vácaḥ || 14 || yā́ḥ phalínīr yā́ aphalā́ apushpā́ yā́ṣ ca pushpíṇīḥ | bṛíhaspátiprasūtās tā́ no muñcantv áṅhasaḥ || 15 || 10 ||

॥११॥ मु॒ञ्चन्तु॑ मा शप॒थ्या॒३॒॑दथो॑ वरु॒ण्या॑दु॒त ।
अथो॑ य॒मस्य॒ पड्वी॑शा॒त्सर्व॑स्माद्देवकिल्बि॒षात् ॥१६॥
अ॒व॒पत॑न्तीरवदन्दि॒व ओष॑धय॒स्परि॑ ।
यं जी॒वम॒श्नवा॑महै॒ न स रि॑ष्याति॒ पूरु॑षः ॥१७॥
या ओष॑धीः॒ सोम॑राज्ञीर्ब॒ह्वीः श॒तवि॑चक्षणाः ।
तासां॒ त्वम॑स्युत्त॒मारं॒ कामा॑य॒ शं हृ॒दे ॥१८॥
या ओष॑धीः॒ सोम॑राज्ञी॒र्विष्ठि॑ताः पृथि॒वीमनु॑ ।
बृह॒स्पति॑प्रसूता अ॒स्यै सं द॑त्त वी॒र्य॑म् ॥१९॥
मा वो॑ रिषत्खनि॒ता यस्मै॑ चा॒हं खना॑मि वः ।
द्वि॒पच्चतु॑ष्पद॒स्माकं॒ सर्व॑मस्त्वनातु॒रम् ॥२०॥

muñcántu mā ṣapathyā̀d átho varuṇyā̀d utá | átho yamásya páḍbīṣāt sárvasmād devakilbishā́t || 16 || avapátantīr avadan divá óshadhayas pári | yáṃ jīvám aṣnávāmahai ná sá rishyāti pū́rushaḥ || 17 || yā́ óshadhīḥ sómarājñīr bahvī́ḥ ṣatávicakshaṇāḥ | tā́sāṃ tvám asy uttamā́raṃ kā́māya ṣáṃ hṛidé || 18 || yā́ óshadhīḥ sómarājñīr víshṭhitāḥ pṛithivī́m ánu | bṛíhaspátiprasūtā asyaí sáṃ datta vīryàm || 19 || mā́ vo rishat khanitā́ yásmai cāhám khánāmi vaḥ | dvipác cátushpad asmā́kaṃ sárvam astv anāturám || 20 ||

O plants, let each of you go to the other, lend assistance to the other; thus being all mutually joined together, attend to this my invocation. 14

Whether bearing fruit or barren, whether flowering or flowerless, may they, the progeny of the supreme protector, liberate us from our pain and grief. 15

May they liberate me from the pain and sickness produced by negligence and ignorance, from the sin caused by a disregard to natural ways of life. May they liberate us from the fetters of death, and from all guilt caused by disobeying Nature's bounties. 16

The plants, descending from heaven, said, "no evil shall befall a man, whom, while he lives, we nourish." 17

Of all the plants, which have the divine elixir, the Master Cure, for their king, which are numerous and all-seeking, you, O divine elixir, are the best; be prompt to the wishful and sweet to the heart. 18

May the plants, which have the divine elixir, the Master Cure, for their king, which are scattered all over the earth, which are the offspring of our supreme protector, give vigour to this infirm body. 19

Let not the digger hurt you, nor the sick person for whom I dig you up; may all my bipeds and quadrupeds be free from disease. 20

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यम् ॥२१॥
ओषधयः सं वदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि ॥२२॥
त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सो३ऽस्माकं यो अस्माँ अभिदासति ॥२३॥

yā́ṣ cedā́m upaṣriṇvánti yā́ṣ ca dūrā́m párāgatāḥ | sárvāḥ saṃgátya vīrudho 'syaí sā́ṃ datta vīryàm || 21 || óshadhayaḥ sā́ṃ vadante sómena sahá rā́jñā | yásmai kriṇóti brāhmaṇás tā́ṃ rājan pārayāmasi || 22 || tvā́m uttamā́sy oshadhe táva vrikshā́ úpastayaḥ | úpastir astu sò 'smā́kaṃ yó asmā́ñ abhidā́sati || 23 || 11 ||

(९८) अष्टनवतितमं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्यार्ष्टिषेणो देवापिर्ऋषिः । देवा देवताः । त्रिष्टुप् छन्दः ॥

॥१२॥ बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा ।
आदित्यैर्वा यद्वसुभिर्मरुत्वान्त्स पर्जन्यं शंतनवे वृषाय ॥१॥
आ देवो दूतो अजिरश्चिकित्वान्त्वद्देवापे अभि मामगच्छत् ।
प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन् ॥२॥
अस्मे धेहि द्युमतीं वाचमासन्बृहस्पते अनमीवामिषिराम् ।

98.

Brı́haspate prā́ti me devátām ihi mitró vā yád várụṇo vā́si pūshā́ | ādityaír vā yád vásubhir marútvān sá parjányaṃ ṣā́ṃtanave vrishā́ya || 1 || ā́ devó dūtó ajirā́ṣ cikitvā́n tvád devāpe abhí mā́m agachat | praticīnā́ḥ prā́ti mā́m ā́ vavritsva dā́dhāmi te dyumā́tīṃ vā́cam āsā́n || 2 ||

All the plants that hear this invocation and those which are removed far off, come together and give vigour and health to this (sick body). 21

All the plants, in the presence of the divine elixir, the king, declare, "O king, we save him who on the advice of the expert physician, takes us as medicine." 22

O divine herb, Soma, you are the best of the plants; to you other plants pay obeisance and salute. Let him be subject to us whosoever attacks us. 23

98

O Lord Supreme, may you on my behalf, approach Nature's bounties, such as the sun, the ocean, or nourishing elements. May you come with vital principles, solar rays, natural resources of wealth, cosmic vital elements, and let the clouds pour rain water for the thirsty lands. 1

Let a divine messenger, quick and intelligent, the meteorologist, i.e., the foreteller of rains and thunder, send light and come to me. Come, O Lord Supreme to me, turning towards me; I have reverential words of brilliant eulogium for you. 2

यया॑ वृ॒ष्टिं शं॒तन॑वे॒ वना॑व दि॒वो द्र॒प्सो मधु॑माँ॒ आ वि॑वेश ॥३॥
आ नो॑ द्र॒प्सा मधु॑मन्तो विश॒न्त्विन्द्र॑ दे॒ह्यधि॑रथं स॒हस्र॑म् ।
नि षी॑द हो॒त्रमृ॑तु॒था य॑जस्व दे॒वान्दे॑वापे ह॒विषा॑ सपर्य ॥४॥
आ॒र्ष्टि॒षे॒णो हो॒त्रमृषि॑र्नि॒षीद॑न्दे॒वापि॑र्देवसुम॒तिं चि॑कि॒त्वान् ।
स उत्त॑रस्मा॒दध॑रं समु॒द्रम॒पो दि॒व्या अ॑सृजद्व॒र्ष्या॑ अ॒भि ॥५॥
अ॒स्मिन्त्स॑मु॒द्रे अध्युत्त॑रस्मि॒न्नापो॑ दे॒वेभि॒र्निवृ॑ता अतिष्ठन् ।
ता अ॑द्रवन्नार्ष्टिषे॒णेन॑ सृ॒ष्टा दे॒वापि॑ना॒ प्रेषि॑ता मृ॒क्षिणी॑षु ॥६॥

asmé
dhehi dyumátīm vácam āsán bríhaspate anamīvám ishirám | yáyā vrishtím sámtanave vánāva divó drapsó mádhumāñ á vivesa || 3 || á no drapsá mádhumanto visantv índra dehy ádhiratham sahásram | ní shīda hotrám rituthá yajasva deván devāpe havíshā saparya || 4 || ārshtishenó hotrám ríshir nishídan devápir devasumatím cikitván | sá úttarasmād ádharam samudrám apó divyá asrijad varshyà abhí || 5 || asmín samudré ádhy úttarasminn ápo devébhir nívritā atishthan | tá adravann ārshtishenéna srishtá devápinā préshitā mrikshínīshu || 6 || 12 ||

॥१३॥ यद्दे॒वापिः॑ शं॒तन॑वे पु॒रोहि॑तो हो॒त्राय॑ वृ॒तः कृ॒पय॒न्नदी॑धेत् ।
दे॒व॒श्रुतं॑ वृष्टि॒वनिं॒ ररा॑णो बृह॒स्पति॒र्वाच॑मस्मा अयच्छत् ॥७॥
यं त्वा॑ दे॒वापिः॑ शुशुचा॒नो अ॑ग्न आर्ष्टिषे॒णो म॑नु॒ष्यः॑ समी॒धे ।
विश्वे॑भिर्दे॒वैर॑नुम॒द्यमा॑नः॒ प्र प॒र्जन्य॑मीरया वृष्टि॒मन्त॑म् ॥८॥

yád devápih sámtanave puróhito hotráya vritáh kripáyann ádīdhet | devasrútam vrishtivánim rárāno bríhaspátir vácam asmā ayachat || 7 || yám tvā devápih susucānó agna ārshtishenó manushyàh samīdhé | vísvebhir devaír anumadyámānah prá parjányam īrayā vrishtimántam || 8 ||

O Lord Supreme, may I have reverential words of a brilliant eulogium, prompt and free from defect, by which we two may obtain rain from heaven for the thrirsty lands; the sweet rain drops sent by you (from heaven) have come down and entered into realm of the earth. 3

May the sweet drops of rain fall upon us. Grant us, OLord of resplendence, a thousand chariot-loads (of harvest). Sit down, O foreteller of rains and thunder, to your duties as a priest. At the proper season, offer sacrifiece to the Nature's bounties, and worship them with oblations (i.e. in due seasons, cultivate the land. and give water and maure to it). 4

The sage, *Devapi,* i.e., the forteller of rains and thunder (the rain-scientist or meteorologist), the son of the weather-scientist *(Ṛṣṭiṣeṇa)*, knowing how to propititate the divine powers, has sat down to his functions as priest. He has brought down the rain waters from high heaven, from the upper to the lower regions of midspace. 5

In this upper region of space, the waters stand dammed up by Nature's forces; set free by *Devapi,* i.e. the rain meteorologist, the disciple of a weather-scientist *(Ṛṣṭiṣeṇa)* the water-bearing clouds are sent forth over the plains. 6

When the cosmic meteorologist *(Devapi)*, the expert adviser in respect to dry lands, coolly gives advice to Him, the Supreme Lord listens and thereon commands rains to come down and they obey His words. 7

O fire-divine, when the mortal meteorologist, the son of weather-scientist, has kindled you, and when all Nature's bounties have been invoked, you send down the rain-laden clouds. 8

त्वां पूर्व ऋषयो गीर्भिरायन्त्वामध्वरेषु पुरुहूत विश्वे ।
सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि ॥९॥
एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा ।
तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि ॥१०॥
एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इन्द्राय भागम् ।
विद्वान्पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि ॥११॥
अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध ।
अस्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह ॥१२॥

tvā́m pū́rva ṛíshayo gīrbhír āyan tvā́m adhvaréshu puruhūta víśve | sahásrāṇy ádhirathāny asmé ā́ no yajñám rohidaśvópa yāhi || 9 || etā́ny agne navatír náva tvé ā́hutāny ádhirathā sahásra | tébhir vardhasva tanvàḥ śūra pūrvī́r divó no vṛishṭím ishitó rirīhi || 10 || etā́ny agne navatím sahásrā sám prá yacha vṛíshṇa índrāya bhāgám | vidvā́n pathá ṛitusó devayā́nān ápy aulānám diví devéshu dhehi || 11 || ágne bā́dhasva ví mṛídho ví durgáhā́pā́mīvām ápa rákshāṅsi sedha | asmā́t samudrā́d bṛiható divó no 'pā́m bhūmā́nam úpa naḥ sṛijehá || 12 || 13 ||

(९९) नवनवतितमं सूक्तम्
(१-१२) द्वादशर्चस्यास्य सूक्तस्य वैखानसो वम्र ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१४॥ कं नश्चित्रमिषण्यसि चिकित्वान्पृथुग्मानं वाश्रं वावृधध्यै ।
कत्तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत् ॥१॥

99.

Kā́m naś citrám ishaṇyasi cikitvā́n pṛithugmā́nam vāśrám vāvṛidhádhyai | kát tásya dā́tu śávaso vyùshṭau tákshad vájram vṛitratúram ápinvat || 1 ||

The ancient sages have been approaching you with hymns; O invoked of many, O Lord of radiant energies, all worshippers address you at worship. May you grant us thousands of chariot-loads (of grain), and may you come to our sacrifices (i.e. bless us in all our efforts of public service). 9

O fire-divine, ninety-and-nine thousands of chariot-loads of harvest have been offered to you; with them, O hero, the fire-divine, nourish all your flames; and thus solicited, send us rains from heaven. 10

O fire-divine, give these ninety thousands to the showerer, as his share; knowing the paths traversed by Nature's forces in due seasons, may you place our water resources in heaven amongst the divine powers. 11

O fire-divine, demolish our enemies, demolish their strongholds, drive away disease, drive away the wicked from this ocean; from vast heaven, may you send down upon us here abundance of rain. 12

99

O resplendent Lord, knowing our needs, what marvellous, comprehensive laudable wealth do you bestow upon us for our advantage. With all His strength at the maximum, He fabricated the wicked-slaying thunderbolt, and let the waters flow (from the clouds). That has been His wonderful gift to us. 1

स हि द्युता विद्युता वेति साम पृथुं योनिमसुरत्वा ससाद ।
स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः ॥२॥
स वाजं यातापदुष्पदा यन्त्स्वर्षाता परि षदत्सनिष्यन् ।
अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत् ॥३॥
स यह्व्योऽवनीर्गोष्वर्वा जुहोति प्रधन्यासु सस्त्रिः ।
अपादो यत्र युज्यासोऽरथा द्रोण्यश्वास ईरते घृतं वाः ॥४॥
स रुद्रेभिरशस्तवार ऋभ्वा हित्वी गयमारेअवद्य आगात् ।
वम्रस्य मन्ये मिथुना विवव्री अन्नमभीत्यारोदयन्मुषायन् ॥५॥
स इद्दासं तुवीरवं पतिर्दन्षळक्षं त्रिशीर्षाणं दमन्यत् ।
अस्य त्रितो न्वोजसा वृधानो विपा वराहमयोअग्रया हन् ॥६॥

sá hí dyutā́ vidyútā véti sā́ma prithúm yónim asuratvā́ sasāda | sá sánīḷebhiḥ prasahānó asya bhrā́tur ná rité saptáthasya māyā́ḥ || 2 || sá vā́jam yātā́padushpadā yán svàrshātā pári shadat sanishyán | anarvā́ yác chatádurasya védo ghnáñ chiṣnádevāñ abhí várpasā bhū́t || 3 || sá yahvyò 'vánīr góshv árvā́ juhoti pradhanyā̀su sásriḥ | apā́do yátra yújyāso 'rathā́ droṇyàṣvāsa írate ghritám vā́ḥ || 4 || sá rudrébhir áṣastavāra ríbhvā hitví gáyam āréavadya ā́gāt | vamrásya manye mithunā́ vívavrī ánnam abhítyārodayan mushāyán || 5 || sá íd dā́sam tuvīrávam pátir dán shaḷakshám triṣīrshā́ṇam damanyat | asyá tritó nv ójasā vridhānó vipā́ varāhám áyoagrayā han || 6 || 14 ||

॥१५॥ स द्रुह्वणे मनुष ऊर्ध्वसान आ साविषदर्शसानाय शरुम् ।
स नृतमो नहुषोऽस्मत्सुजातः पुरोऽभिनदर्हन्दस्युहत्ये ॥७॥

sá drúhvaṇe mánusha ūrdhvasāná ā́ sāvishad arṣasā́nāya ṣárum | sá nrítamo náhusho 'smát sújātaḥ púro 'bhinad árhan dasyuhátye || 7 ||

Armed with lightning and thunder, he (the resplendent Sun) goes to accomplish his task; endowed with might, he establishes Himself in the spacious cosmic space. He is triumphant with His associates (the cloud-bearing winds). With them and with all his helping hands, He, the seventh (or the sliding) Sun counter-acts the tricky talents of His wicked opponents. 2

Marching with ease and prestige, he goes to battle; he toils to get hold of the spoils; he, the invincible, destroys the lust-worshipping demons and seizes by his prowess whatever wealth is concealed in the strongholds of the demons with hundred gates. 3

The victorious resplendent Sun, roaming amongst the dark clouds, quickly moves and releases torrents of water for the rich fields. He associates (with rivers), which are fast moving and which without conveyance pour out pitchers of water and yet keep moving with the speed of a horse. 4

May he, (the Cosmic Sun), our unsolicited benefactor, the mighty one, the blameless, having left his dwelling, come with the cosmic vital elements. I think of the two (i.e. parents) of this wise (Cosmic Divine), who are free from infirmity. He conquers the food of enemy (the Demon of Cosmic Darkness) and roars while winning it. 5

The sovereign Lord of resplendence, attacking him, subdues the loud-shouting, six-eyed, three-headed enemy and the three-fold Cosmic Divinity; invigorated by His stength, He smites the water-laden cloud with his iron-tipped finger. 6

Raising himself on high, he launches his arrow against the malignant aggressive foe. He, the Cosmic Sun, the Chief Leader of men emerges out from the invisibility, for the sake of our help, shatters the strongholds of adversaries while destroying the wicked niggards, the malevolent elements. 7

सो अभ्रियो न यवस उदन्यन्क्षयाय गातुं विदन्नो अस्मे ।
उप यत्सीददिन्दुं शरीरैः श्येनोऽयोपाष्टिर्हन्ति दस्यून् ॥८॥
स व्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात् ।
अयं कविमनयच्छस्यमानमत्कं यो अस्य सनितोत नृणाम् ॥९॥
अयं दशस्यन्नर्येभिरस्य दस्मो देवेभिर्वरुणो न मायी ।
अयं कनीन ऋतुपा अवेद्यमिमीताररुं यश्चतुष्पात् ॥१०॥
अस्य स्तोमेभिरौशिज ऋजिश्वा व्रजं दरयद्वृषभेण पिप्रोः ।
सुत्वा यद्यजतो दीदयद्गीः पुर इयानो अभि वर्पसा भूत् ॥११॥
एवा महो असुर वक्षथाय वम्रकः पड्भिरुप सर्पदिन्द्रम् ।
स इयानः करति स्वस्तिमस्मा इषमूर्जं सुक्षितिं विश्वमाभाः ॥१२॥

só abhríyo ná yávasa udanyán kshá́yāya gātúṃ vidán no asmé | úpa yát sī́dad índuṃ śárīraiḥ śyenó 'yopāshṭir hanti dásyūn || 8 || sá vrā́dhataḥ śavasānébhir asya kútsāya śúshṇaṃ kṛipáṇe párādāt | ayáṃ kavím anayac chasyámānam átkaṃ yó asya sánitotá nṛiṇā́m || 9 || ayáṃ daśasyán náryebhir asya dasmó devébhir váruṇo ná māyī́ | ayáṃ kanī́na ṛitupā́ avedy ámimītārárum yáś cátushpāt || 10 || asyá stómebhir auśijá ṛijíśvā vrajáṃ darayad vṛishabhéṇa píproḥ | sútvā yád yajató dīdáyad gī́ḥ púra iyānó abhí várpasā bhū́t || 11 || evá mahó asura vakshátháya vamrakáḥ paḍbhír úpa sarpad índram | sá iyānáḥ karati svastím asmā́ ísham ū́rjaṃ sukshitíṃ víśvam ā́bhāḥ || 12 || 15 ||

Ashṭamo 'nuvākaḥ.

Like the aggregated cloud, that rains on the pasturage, he finds the way to our dwelling. When he gets exhilarated with divine elixir, he, like a hawk with heel of iron, smites the wicked niggards, the malevolent elements. 8

He overthrows the formidable (adversary) with powerful weapons; he destroys the exploiter in the interests of the liberal devotee; he humiliates the leader poet who offers praises. He is the giver of form to the brave leader and his fellow-men. 9

Bountiful to his worshippers, and his associates, friendly to men, and wonderful with his brilliance, having benign power like the venerable Lord, he is known as wise and as guardian of the seasons. He destroys the obstructive force, which assails from all the four directions. 10

Through his lauds, the wise sincere sage (fire or the Sun) shatters the strongholds of greedy man. When the sage sings praises and shines as singer, he seizes the hiding places of evil elements and subdues them with his craft. 11

In this manner, O mighty Lord, the devotee approaches the inner soul step by step, to offer a big oblation. May he, being approached, grant us prosperity; may he bring us food, drink, a secure dwelling and all (desirable and appropriate things). 12

अथ नवमोऽनुवाकः ॥]

(१००) शततमं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य वान्दनो दुवस्युर्ऋषिः । विश्वे देवा देवताः । (१-११) प्रथमाद्येकादशर्चां जगती, (१२) द्वादश्याश्च त्रिष्टुप् छन्दसी ॥

॥१६॥ इन्द्र दृह्य मघवन्त्वावदिद्भुज इह स्तुतः सुतपा बोधि नो वृधे ।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे ॥१॥
भराय सु भरत भागमृत्वियं प्र वायवे शुचिपे क्रन्ददिष्टये ।
गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे ॥२॥
आ नो देवः सविता साविषद्वय ऋजूयते यजमानाय सुन्वते ।
यथा देवान्प्रतिभूषेम पाकवदा सर्वतातिमदितिं वृणीमहे ॥३॥
इन्द्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः ।
यथायथा मित्रधितानि संदधुरा सर्वतातिमदितिं वृणीमहे ॥४॥
इन्द्र उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः ।
यज्ञो मनुः प्रमतिर्नः पिता हि कमा सर्वतातिमदितिं वृणीमहे ॥५॥
इन्द्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः ।
यज्ञश्च भूद्विदथे चारुरन्तम आ सर्वतातिमदितिं वृणीमहे ॥६॥

100.

Índra dṛíhya maghavan tvā́vad íd bhujá ihá stutáḥ sutapā́ bodhi no vṛidhé | devébhir naḥ savitā́ prā́vatu ṣrutám ā́ sarvátātim áditiṃ vṛiṇīmahe || 1 || bhárāya sú bharata bhāgám ṛitvíyam prá vāyáve ṣucipé krandádishṭaye | gaurásya yáḥ páyasaḥ pītím ānaṣá ā́ sarvátātim áditiṃ vṛiṇīmahe || 2 || ā́ no deváḥ savitā́ sāvishad váya ṛijūyaté yájamānāya sunvaté | yáthā devā́n pratibhū́shema pākavád ā́ sarvátātim áditiṃ vṛiṇīmahe || 3 || índro asmé sumánā astu viṣváhā rā́jā sómaḥ suvitásyā́dhy etu naḥ | yáthā-yathā mitrádhitāni saṃdadhúr ā́ sarvátātim áditiṃ vṛiṇīmahe || 4 || índra ukthéna ṣávasā párur dadhe bṛíhaspate prataritā́sy ā́yushaḥ | yajñó mánuḥ prámatir naḥ pitā́ hí kam ā́ sarvátātim áditiṃ vṛiṇīmahe || 5 || índrasya nú súkṛitaṃ daívyaṃ sáho 'gnír gṛihé jaritā́ médhiraḥ kavíḥ | yajñáṣ ca bhūd vidáthe cā́rur ántama ā́ sarvátātim áditiṃ vṛiṇīmahe || 6 || 16 ||

100

O affluent resplendent Lord, well-known as acceptor of devotional prayers, praised on this occasion, may you be favourable to our progress. May the impeller, associated with other divine powers, hear us and protect us. We love all-pervading Infinity, the common mother of us all. 1

Offer to the resplendent Lord, the cherisher of all, the share appropriate to the season: offer it to the divine wind, the drinker of the pure elixir, who clamours as he travels, who obtains a draught of pure milk. We love the all-pervading Infinity, the common mother of us all. 2

May the divine impeller generate well-dressed food for every one of our devoted house-holders, who serve with libations, and thereby are in good favour with Nature's bounties. We love the all-pervading Infinity, the common mother of us all. 3

May the Lord of resplendence be favourably disposed towards us every day; may the sovereign blissful Lord accept our praises, and be pleased to bestow upon us friendly treasure. We love the all-pervading Infinity, the common mother of us all. 4

By His laudable strength, the Lord of resplendence sustains every limb of mine; O Lord Supreme, you are the lengthener of my life. May the devotion, may the intellect and wisdom grant us happiness. We love the all-pervading Infinity, the common mother of us all. 5

The divine force of the Lord of resplendence is just and appropriate; the fire-divine abides in our dwelling. He is the praiser of Nature's bounties, the receiver of oblations, the sage, and is worhty of sacrifice at the altar, beautiful, and most near. We love the all-pervading Infinity, the common mother of us all. 6

॥१७॥ न वो गुहा चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनम् ।
माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ॥७॥
अपामीवां सविता साविषन्न्य१ग्वरीय इदप सेधन्त्वद्रयः ।
ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥८॥
ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत ।
स नो देवः सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे ॥९॥
ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ग्ध्वे ।
तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ॥१०॥
क्रतुप्रावा जरिता शश्वतामव इन्द्र इद्भद्रा प्रमतिः सुतावताम् ।
पूर्णमूधर्दिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ॥११॥
चित्रस्ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।
रजिष्ठया रज्या पश्व आ गोस्तूतुर्षति पर्यग्रं दुवस्युः ॥१२॥

ná vo gúhā cakṛima bhū́ri dushkṛitám̱ nā́víshṭyam̱ vasavo devahéḷanam | mā́kir no devā ánṛitasya várpasa ā́ sarvátātim áditim̱ vṛiṇīmahe || 7 || ápā́mīvām̱ savitā́ sāvishan nyàg vā́rīya íd ápa sedhantv ádrayaḥ | grā́vā yátra madhushúd ucyáte bṛihád ā́ sarvátātim áditim̱ vṛiṇīmahe || 8 || ūrdhvó grā́vā vasavo 'stu sotári víṣvā dvéshāṅsi sanutár yuyota | sá no deváḥ savitā́ pāyúr íḍya ā́ sarvátātim áditim̱ vṛiṇīmahe || 9 || ū́rjam̱ gāvo yávase pívo attana ṛitásya yā́ḥ sádane kóṣe aṅgdhvé | tanū́r evá tanvò astu bheshajám ā́ sarvátātim̱ áditim̱ vṛiṇīmahe || 10 || kratuprā́vā jaritā́ ṣáṣvatām áva índra íd bhadrā́ prámatiḥ sutā́vatām | pūrṇám ū́dhar divyám̱ yásya siktáya ā́ sarvátātim áditim̱ vṛiṇīmahe || 11 || citrás te bhānúḥ kratuprā́ abhishṭíḥ sánti spṛídho jaraṇiprā́ ádhṛishṭāḥ | rájishṭhayā rájyā paṣvá ā́ gós tū́tūrshaty páry ágram̱ duvasyúḥ || 12 || 17 ||

O Lord of wealth, we have not committed any great sin against you secretly, nor any open action causing the anger of Nature's forces; let not, O divine powers, any of us adopt falsehood of any form in our life. We love the all-pervading universal Infinity, the common mother of us all. 7

May the divine sun drive away our disease; may the mountains ward off our most heinous (crimes); may we live there where the austere enlightened sages sing praises in loud voice. We love the all-pervading Infinity, the common mother of us all. 8

O possessor of wealth and wisdom, may our prestige be high in our sacred selfless offerings; may you disperse all my secret adversaries; the divine impeller is our adorable protector. We love the all-prevading Infinity, the common mother of us all. 9

O cows, revered and respected in the cow-stall, on sacred occasions, may you eat abundant fodder in the pasture; may your body be the remedy for our body. We love the all-pervading Infinity, the common mother of us all. 10

The Lord of resplendence is the fulfiller of pious acts, the glorifier of all, the guardian of the offerers of libations, and the auspicious forethought. For his libation the heavenly pitcher is filled (with divine elixir of sweetness). We love the all-pervading Infinity, the common mother of us all. 11

O resplendent Lord, your splendour is wonderful, is fulfiller of our pious aspirations, and is most desirable; your divine actions are capable of replenishing the wealth of your worshippers and are irresistible; therefore, may you lead us, as a servant (the bullock driver) leads a bullock on a straight path by fastening a pain-giving rope through his nostrils. 12

(१०१) एकोत्तरशततमं सूक्तम्

(१-१२) द्वादशर्चस्यास्य सूक्तस्य सौम्यो बुध ऋषिः । विश्वे देवा ऋत्विजो वा देवताः ।
(१-३, ७-८, १०-११) प्रथमादितृचस्य सप्तम्यष्टमीदशम्येकादशीनामृचाञ्च
त्रिष्टुप्, (४, ६) चतुर्थीषष्ठ्योर्गायत्री, (५) पञ्चम्या बृहती, (९, १२)
नवमीद्वादश्योश्च जगती छन्दांसि ॥

॥१८॥ उद्बुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः ।
दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः ॥१॥
मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।
इष्कृणुध्वमायुधारं कृणुध्वं प्राञ्चं यज्ञं प्र णयता सखायः ॥२॥
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥३॥
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ॥४॥
निराहावान्कृणोतन सं वरत्रा दधातन ।
सिञ्चामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम् ॥५॥
इष्कृताहावमवतं सुवरत्रं सुषेचनम् । उद्रिणं सिञ्चे अक्षितम् ॥६॥

101.

Úd budhyadhvam̩ sámanasah̩ sakhāyah̩ sám agním indhvam bahávah̩ sánīlāh̩ | dadhikrā́m agním ushásam̩ ca devī́m índrāvató 'vase ní hvaye vah̩ || 1 || mandrā́ krin̩udhvam̩ dhíya ā́ tanudhvam̩ nā́vam aritrapáran̩īm̩ krin̩udhvam | íshkrin̩udhvam ā́yudhāram krin̩udhvam prā́ñcam̩ yajñám prá n̩ayatā sakhāyah̩ || 2 || yunákta sī́rā ví yugā́ tanudhvam̩ krité yónau vapatehá bī́jam | girā́ ca srushtíh̩ sábharā ásan no nédīya ít srin̩yàh̩ pakvám éyāt || 3 || sī́rā yuñjanti kaváyo yugā́ ví tanvate príthak | dhī́rā devéshu sumnayā́ || 4 || nír āhāvā́n krin̩otana sám̩ varatrā́ dadhātana | siñcā́mahā avatám udrín̩am̩ vayám̩ sushékam ánupakshitam || 5 || íshkritāhāvam avatám̩ suvaratrám̩ sushecanám | udrín̩am̩ siñce ákshitam || 6 || 18 ||

101

Awake friends, and kindle fire-divine; may you be of one mind — you, who are many in number, and dwell together under one-roof; I invoke you, O vital breath, fire-divine, and dawn; may you be associated with radiant sun for our protection. 1

Compose pleasant hymns, spin out your songs and praises, construct the ship which is propelled by oars, prepare your weapons, make all things ready, and let the sacrifical fire be enkindled. 2

May you harness the ploughs, and fit on the yokes; now that the womb of earth is ready, sow the seed therein, and through our benedictions may there be abundant food; may the grain fall ripe towards the sickle. 3

The wise farmers, aspiring happiness with reliance in Nature's bounties, harness the ploughs, and lay the yokes apart. 4

May we set up the cattle-troughs, and securely fasten on the straps to it; let us supply water in copious streams (to our fields), from our wells, unfailing and full. 5

I pour out water from the well, whose cattle-troughs are ready for the purpose—water that is nice for watering the fields and taken from wells not to be exhausted. 6

॥१९॥ प्रीणीताश्वान्हितं जंयाथ स्वस्तिवाहं रथमित्कृणुध्वम् ।
द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम् ॥७॥
व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि ।
पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ॥८॥
आ वो धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियामिह ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥९॥
आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।
परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वह्निं युनक्त ॥१०॥
उभे धुरौ वह्निरापिब्दमानोऽन्तर्योनेव चरति द्विजानिः ।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ॥११॥
कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ॥१२॥

prīṇītáśvān hitám jayātha svastiváham rátham ít **kṛiṇudhvam** | drónāhāvam avatám áśmacakram áṅsatrakośam **siñcatā** nṛipáṇam | 7 || vrajám kṛiṇudhvam sá hí vo nṛipáṇo **várma** sīvyadhvam bahulā́ pṛithū́ni | púraḥ kṛiṇudhvam ā́ya-**sīr** **ádhṛishṭā** mā́ vaḥ susroc camasó dṛíṅhatā tám || 8 || ā́ **vo** **dhíyam** yajñíyām varta ūtáye dévā devím yajatā́m ya-**jñíyām** ihá | sá no duhīyad yávaseva gatví sahásradhārā pá-**yasā** **mahí** gaúḥ || 9 || ā́ tū́ shiñca hárim īm drór upásthe **vā́sībhis** takshatāśmanmáyībhiḥ | pári shvajadhvam dáśa **kakshyā̀bhir** ubhé dhúrau práti váhnim yunakta || 10 || ubhé **dhúrau** **váhnir** āpíbdamāno 'ntár yóneva carati dvijā́niḥ | **vánaspátim** vána ā́sthāpayadhvam ní shū́ dadhidhvam **ákhananta** útsam || 11 || **káprin** naraḥ kapṛithám úd **dadhā-tana** **codáyata** khudáta vā́jasātaye | nishṭigryàḥ putrám ā́ cyāvayotáya índram sabā́dha ihá sómapītaye || 12 || 19 ||

Refresh the horses, and take from them the good work of ploughing. Equip a chariot laden with gcod fortune. Give water to your fields taken from wells, having wooden cattle troughs and a stone rim along with a receptacle like armour. Sweet water (of well is) for the drinking of men also. 7

Construct the cow-stall, for that is the drinking place of your leaders (of your men), fabricate armour, manifold and ample. Make cities of iron strong and impregnable; let not your ladle leak; make it strong and unbreakable. 8

O holy divine powers, I would like to draw your attention at this place of dedication and worship towards me for my protection. Our sacrifice pours milk for us, like a stately cow, yielding thousand streams of milk after having eaten fodder in plenty and having returned to their home (in the evenings). 9

Pour out the golden-tinted elixir into the wooden pitcher, fabricated with axes forged out of stones and girded one by one; fill up the herbal elixir in ten pitchers and process the juice. May you also harness the beast of burden (ox or horse) to the two poles of the chariot. 10

Within the two chariot-poles beast of burden, the car-horse goes pressed closely, as in his dwelling or at the sacrifice moves the person with two wives. May you place the "Lord of Forests" (the herbal elixir) in a wooden pot, and store up the juice in it without digging. (The wooden pot full of elixir is like a well which has not been dug). 11

O men, Lord of resplendence is the giver of happiness. May you invoke and evoke this giver of bliss and pleasure; love Him, be sportive with Him and then He would provide all food and sustenance. Invoke Him that He, the son of the suns, comes to you here in your closest proximity to your sacrifice and accepts your devotional expressions. 12

(१०२) द्व्युत्तरशततमं सूक्तम्

(१–१२) द्वादशर्चस्यास्य सूक्तस्य भार्म्यश्वो मुद्गल ऋषिः । द्रुघण इन्द्रो वा देवता । (१, ३, १२) प्रथमातृतीयाद्वादशीनामृचां बृहती, (२, ४–११) द्वितीयायाश्चतुर्थ्याद्यष्टानाञ्च त्रिष्टुप् छन्दसी ॥

२०॥ प्र ते रथं मिथूकृतमिन्द्रोऽवतु धृष्णुया ।
अस्मिन्नाजौ पुरुहूत श्रवाय्ये धनभक्षेषु नोऽव ॥१॥
उत्स्म वातो वहति वासो अस्या अधिरथं यदजयत्सहस्रम् ।
रथीरभून्मुद्गलानी गविष्टौ भरे कृतं व्यचेदिन्द्रसेना ॥२॥
अन्तर्यच्छ जिघांसतो वज्रमिन्द्राभिदासतः ।
दासस्य वा मघवन्नार्यस्य वा सनुतर्यवया वधम् ॥३॥
उद्नो ह्रदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति ।
प्र मुष्कभारः श्रव इच्छमानोऽजिरं बाहू अभरत्सिषासन् ॥४॥
न्यक्रन्दयन्नुपयन्त एनममेहयन्वृषभं मध्य आजेः ।
तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥५॥
ककर्दवे वृषभो युक्त आसीदवावचीत्सारथिरस्य केशी ।
दुधेर्युक्तस्य द्रवतः सहानस ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् ॥६॥

102.

Prá te rátham mithūkṛ́tam índro 'vatu dhṛishṇuyā́ asmínn ājaú puruhūta ṣravā́yye dhanabhakshéshu no 'va || 1 || út sma vā́to vahati vā́so 'syā adhiratham yád ájayat sahásram | rathī́r abhūn mudgalā́nī gávishṭau bháre kṛitáṃ vy àced indrasenā || 2 || antár yacha jíghāṅsato vájram in-drā́bhidā́satah | dasasya vā maghavann ā́ryasya vā sanutár yavayā vadhám || 3 || udnó hradám apibaj járhṛishāṇaḥ kū́-ṭaṃ sma tṛiṅhád abhímātim eti | prá mushkábhāraḥ ṣráva ichámāno 'jirám bāhū́ abharat síshāsan || 4 || ny àkranda-yann upayánta enam ámehayan vṛishabhám mádhya ājéḥ téna sū́bharvaṃ ṣatávat sahásraṃ gávām múdgalaḥ pra-dháne jigāya || 5 || kakárdave vṛishabhó yuktá āsīd ávāvacīt sā́rathir asya keṣí | dúdher yuktásya drávataḥ sahā́nasa ṛi-chánti shmā nishpádo mudgalā́nīm || 6 || 20 ||

102

May the resplendent head or leader, by His powers protect your chariot that has been left alone. Defend us, O much invoked, in this glorious fight against the raiders for the recovery of our wealth. 1

The wind makes her garments flap, when she, the prowess of our resplendent Lord, wins a cart-load worth a thousand. In the quest of cattle, Mudgalani, the prowess of our Lord, has been the charioteer. The army of the resplendent king recovers the wealth seized in battles. 2

O resplendent king, please strike with your bolt the assailants, who would kill us otherwise; ward off, O bounteous, the secret weapon of our foe, be he a heathen or one of our cultured race. 3

Rejoicing, it (the bull yoked or the armoured tank or car) drinks to its full a pool of waters or liquid fuel; it cleaves the mountain peak, it goes against the enemy. Endowed with vigour, eager for fame, assailing the quick-moving foe, it seizes him, the foe, with both of its mechanized arms. (A conflict between the sun and clouds, or the soul and the evil tendencies). 4

They approach the bull and make him roar in the midst of the battle. I, the resplendent sun, the subduer of the high spirits of the foes or clouds *(mudgala)*, thereby gain in war hundreds and thousands of milch-cattle, well-nourished. 5

The bull (or the armoured car) has been yoked for the destruction of the enemy; his long-haired, well-trained driver, the yoke-fellow, makes him roar; rushing on with the wagon of the irresistible yoked armoured car, the warriors coming forth go to pay tributes to the prowess of the king *(mudgalani)*. 6

॥२१॥ उत प्रधिमुदहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन् ।
इन्द्र उदावत्पतिमघ्न्यानामरंहत पद्याभिः ककुद्मान् ॥७॥
शुनमष्ट्राव्यचरत्कपर्दी वरत्रायां दार्वानह्यमानः ।
नृम्णानि कृण्वन्बहवे जनाय गाः पस्पशानस्तविषीरधत्त ॥८॥
इमं तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम् ।
येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु ॥९॥
आरे अघा को न्वित्था ददर्श यं युञ्जन्ति तम्वा स्थापयन्ति ।
नास्मै तृणं नोदकमा भरन्त्युत्तरो धुरो वहति प्रदेदिशत् ॥१०॥
परिवृक्तेव पतिविद्यमानट् पीप्याना कूचक्रेणेव सिञ्चन् ।
एषैष्या चिद्रथ्या जयेम सुमङ्गलं सिनवदस्तु सातम् ॥११॥
त्वं विश्वस्य जगतश्चक्षुरिन्द्रासि चक्षुषः ।
वृषा यदाजिं वृषणा सिषाससि चोदयन्वध्रिणा युजा ॥१२॥

utá pradhím úd ahann asya vidván úpāyunag váṅsagam átra ṣíkshan | índra úd ầvat pátim ághnyānām áraṅhata pádyābhiḥ kakúdmān || 7 || ṣunám ashṭrāvy ầcarat kapardí varatráyāṃ dáıv ānáhyamānaḥ | nṛimṇáni kṛiṇván baháve jánāya gáḥ paspaṣānás távishīr adhatta || 8 || imáṃ tám paṣya vṛishabhásya yúñjaṃ káshṭhāyā mádhye drughaṇáṃ ṣáyānam | yéna jigáya ṣatávat sahásraṃ gávām múdgalaḥ pṛitanájyeshu || 9 || āré aghá kó nv itthá dadarṣa yáṃ yuñjánti tám v á sthāpayanti | násmai tṛ́ṇaṃ nódakám á bharanty úttaro dhuró vahati pradédiṣat || 10 || parivṛiktéva patividyam ānaṭ pípyānā kúcakreṇeva siñcán | eshaishyầ cid rathyầ jayema sumaṅgálaṃ sínavad astu sātám || 11 || tvám víṣvasya jágataṣ cákshur indrāsi cákshushaḥ | vṛíshā yád ājím vṛíshaṇā síshāsasi codáyan vádhriṇā yujá || 12 || 21 ||

The sage (the King) has fitted up the frames of the car, has also harnessed the bull, and has trained him for his work. The resplendent king protects the lord of the inviolable (cows), and the bull or buffalo, rushes along with speed. 7

Wielding the goad, (the resplendent king) with the braided hairs proceeds happily, fastening the strap to the wooden pole of the car or waggon, and distributing riches to many people, and caressing the oxen he acquires vigour. 8

Behold this mace, the ally of the bull car, lying midway in the field of the battle, with which I, the swallower of passions and pride, have won hundreds and thousands of riches in war. 9

Who sees the evils near so closely? They stop the bull which they yoke; they stop; to him they provide neither fodder nor water. Being above (the bull), he bears the chariot-pole of the car and declares (victory of his lord on the opponents). 10

Just as a wife, who has been abandoned, rejoices to find her husband coming back again; and as a cloud expanding when pouring forth rain with the aid of the earth's disc, fully determined to succeed for our charioteer in the conflicts, may we win (the award). May good fortune (peace and prosperity), together with food, be given to all of us. 11

O resplendent Lord (or O resplendent sun), you are the eye of the whole world, when, O showerer (of benefits), urging on your two vigorous steeds, yoked to your car, you proceed to win battle with full confidence. 12

(१०३) त्र्युत्तरशततमं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्यैन्द्रोऽप्रतिरथ ऋषिः । (१-३, ५-११) प्रथमादितृचस्य पञ्चम्यादिसप्तर्चाश्चेन्द्रः, (४) चतुर्थ्या बृहस्पतिः, (१२) द्वादश्या अप्वा देवी, (१३) त्रयोदश्याश्चेन्द्रो मरुतो वा देवता । (१-१२) प्रथमादिद्वादशर्चां त्रिष्टुप्, (१३) त्रयोदश्याश्चानुष्टुप् छन्दसी ॥

॥२२॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥१॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥
स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥
बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥४॥
बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥५॥
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वम् ॥६॥

103.

Āṣúḥ ṣíṣāno vṛishabhó ná bhīmó ghanāghanáḥ kshóbhaṇaṣ carshaṇīnám | saṃkrándano 'nimishá ekavīráḥ ṣatáṃ sénā ajayat sākám índraḥ || 1 || saṃkrándanenānimishéṇa jishṇúnā yutkāréṇa duṣcyavanéna dhṛishṇúnā | tád índreṇa jayata tát sahadhvaṃ yúdho nara íshuhastena vṛíshṇā || 2 || sá íshuhastaiḥ sá nishaṅgíbhir vaṣí sáṃsrashṭā sá yúdha índro gaṇéna | saṃsṛishṭajít somapá bāhuṣardhy ùgrádhanvā prátihitābhir ástā || 3 || bṛíhaspate pári dīyā ráthena rakshohámítrāñ apabádhamānaḥ | prabhañján séṇāḥ pramṛiṇó yudhá jáyann asmákam edhy avitá ráthānām || 4 || balavijñāyá sthávirah právīraḥ sáhasvān vājí sáhamāna ugráḥ | abhívīro abhísatvā sahojá jaítram indra rátham á tishṭha govít || 5 || gotrábhídaṃ govídaṃ vájrabāhuṃ jáyantam ájma pramṛiṇántam ójasā | imáṃ sajātā ánu vīrayadhvam índraṃ sakhāyo ánu sáṃ rabhadhvam || 6 || 22 ||

103

The powerful king is swift. He, like a formidable bull sharpens his horns; he is terrific; he stirs up the people, and slays his foes. He is loud-shouting, ever-vigilant, the chief of heroes; he conquers at once a hundred hosts. 1

With the powerful king, who is loud-roaring, ever vigilant, the victorious, the warlike, the unconquerable, the daring, the hurler of arrows, the showerer, may you, O warriors, and leaders, overcome enemies in the combat. 2

The king rules with the help of arrow-bearing warriors who are armed with swords. He is the subduer, the warrior, and is one who encounters a multitude of foes. He conquers those who encounter him. He is the drinker of the elixir. Being strong-armed and having a powerful bow, he shoots with well-aimed arrows. 3

Come with your chariot, O Lord of vast kingdom, the slayer of wicked, driving off your enemies, crushing off enemies and demolishing them. O victorious in battle, may you be the defender of our chariots. 4

O glorious king, you are known by the strength; you are mighty, herioc, overpowering, vigorous, enduring, and fierce. You are attended by heroes; assisted by mighty men, you are source of strength and the winner of wealth; may you ascend your triumphant chariot. 5

O kindred warriors, fellow friends, follow the powerful king, who is the breaker of mountains, and the acquirer of water; who is armed with the thunderbolt, and who conquers the swift foe and destroying the enemy by his might, shows his zeal and courage. 6

॥२३॥ अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाळयुध्योऽस्माकं सेना अवतु प्र युत्सु ॥७॥
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥८॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥१०॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥११॥
अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥
प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥१३॥

abhí gotrā́ṇi sáhasā gā́hamāno 'dayó vīráḥ ṣatámanyur índraḥ | duṣcyavanáḥ pṛitanāshā́ḷ ayudhyò 'smā́kam sénā avatu prá yutsú || 7 || índra āsām netā́ bṛíhaspátir dákshiṇā yajñáḥ purá etu sómaḥ | devasenā́nām abhibhañjatīnā́m jáyantīnām marúto yantv ágram || 8 || índrasya vṛíshṇo váruṇasya rā́jña ādityā́nām marútām ṣárdha ugrám | mahā́manasām bhuvanacyavā́nām ghósho devā́nām jáyatām úd asthāt || 9 || úd dharshaya maghavann ā́yudhāny út sátvanām māmakā́nām mánāṅsi | úd vṛitrahan vājínām vā́jināny úd ráthānām jáyatām yantu ghóshāḥ || 10 || asmā́kam índraḥ sámṛiteshu dhvajéshv asmā́kam yā́ íshavas tā́ jayantu | asmā́kam vīrā́ úttare bhavantv asmā́ñ u devā avatā háveshu || 11 || amī́shām cittám pratilobháyantī gṛihāṇā́ṅgāny apve párehi | abhí préhi nír daha hṛitsú ṣókair andhénāmítrās támasā sacantām || 12 || prétā jáyatā nara índro vaḥ ṣárma yachatu | ugrā́ vaḥ santu bāhávo 'nādhṛishyā́ yáthā́satha || 13 || 23 ||

May the king, who is pitiless and heroic, who is invincible and irresitible, with hundredfold powers. and who .overthrows armies, destroy the strongholds of enemies, and protect our armies in battles. 7

May the powerful king, the leader of these armies, may the spirit of wise and wealthy worshippers, and well-wishers be aroused; let the warriors march in the van of the destroying and victorious armies of divine powers. 8

May the mighty force of the showerer king, and of the royal protector, of the enlightened sages and brave soldiers, be ours. Very much high is the tempo of the magnanimous and high-minded warriors who cause the worlds tremble. 9

Bristle up, O bounteous; our weapons excite the spirits of our heroes; O slayer of evils, let the speed of the horses be accelerated; let the noises of the conquering chariots be increased. 10

When our banners and flags are raised high in concurrence, may the powerful king be our defender; may the arrows shot from our side be victorious; may our warriors be triumphant; O enlightened powers, protect us in battles. 11

Bewildering the senses of our foes, O poison-fed wind, seize their limbs and depart, attack them, causing injury to their hearts, with burns and pains; let our enemies be submerged in utter darkness. 12

Advance, O warriors, advance and conquer; the resplendent king is your sure repose and happiness. May your arms be strong, so that none injures you and victory becomes yours. 13

(१०४) चतुरुत्तरशततमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य वैश्वामित्रोऽष्टक ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२४॥ असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयम् ।
तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इन्द्र पिबा सुतस्य ॥१॥
अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।
मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥२॥
प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यम् ।
इन्द्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ॥३॥
ऊती शचीवस्तव वीर्येण वयो दधाना उशिज ऋतज्ञाः ।
प्रजावदिन्द्र मनुषो दुरोणे तस्थुर्गृणन्तः सधमाद्यासः ॥४॥
प्रणीतिभिष्टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः ।
मंहिष्ठामूतिं वितिरे दधानाः स्तोतार इन्द्र तव सूनृताभिः ॥५॥

104.

Ásāvi sómaḥ puruhūta túbhyam háribhyām yajñám úpa yāhi tū́yam | túbhyam gíro vípravīrā iyāná dadhanvirá indra píbā sutásya || 1 | apsú dhūtásya harivaḥ píbehá nṛ́bhiḥ sutásya jaṭháram pṛiṇasva | mimikshúr yám ádraya indra túbhyam tébhir vardhasva mádam ukthavāhaḥ || 2 || prógrā́m pītím vṛ́ishṇa iyarmi satyā́m prayaí sutásya haryaṣva túbhyam | índra dhénābhir ihá mādayasva dhībhír víṣvābhiḥ ṣácyā gṛiṇānáḥ || 3 || ūtí ṣacīvas táva vīryèṇa váyo dádhānā uṣíja ṛitajñā́ḥ | prajā́vad indra mánusho duroṇé tasthúr gṛiṇántaḥ sadhamā́dyāsaḥ || 4 || práṇītibhish ṭe haryaṣva sushṭóḥ sushumnásya pururúco jánāsaḥ | máṅhishṭhām ūtím vitíre dádhānā stotā́ra indra táva sūnṛ́itābhiḥ || 5 || 24 ||

104

O much-invoked effulgent Lord (or the Sun), the elixir has been effused for you; please come quickly to this place of sacrifice with your two steeds—the two energies to cherish our offerings; our praises recited by the mighty singers are flowing to you; may you accept our homage. 1

O Lord of vigorous energies, at this ceremony, accept our offerings of divine elixir mixed with water (homage supplemented with a will to act), and fill your belly with the libation offered by the sages, which the constant efforts have expressed out for you (just as juice of a plant extracted with stones). May those of you who are carried by hymns enhance their exhilaration with (our words of praise accompanied with sacred rites). 2

(O resplendent sire) of vigorous energies, showerer of benefits, I send you strong exhilarating elixirs that you may proceed (forward on your assignments). O resplendent, so well known for your prowess, be exhilarated at this ceremony with praises and with all customary rites. 3

O powerful resplendent sire, people have assembled here in the house of the person (who is the institutor of the sacred public rite); these people are such noble persons as enjoy food, not alone, but along with their offsprings (and dependents), and are cognizant with the knowledge of eternal law and they have a full reliance in your protection and prowess. They glorify you and share your exhilaration. 4

O Lord of vigour and energy, you are deservedly praised for your generosity as a bestower of wealth and happiness; through your guidance and munificence, people obtain most liberal help; every one praises you for your excellent favours, given to all and sundry without discrimination. 5

॥२५॥ उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य ।
इन्द्र त्वा यज्ञः क्षममाणमानड् दाश्वाँ अस्यध्वरस्य प्रकेतः ॥६॥
सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिम् ।
उप भूषन्ति गिरो अप्रतीतमिन्द्रं नमस्या जरितुः पनन्त ॥७॥
सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुमतर इन्द्र पूर्भित् ।
नवतिं स्रोत्या नव च स्रवन्तीर्देवेभ्यो गातुं मनुषे च विन्दः ॥८॥
अपो महीरभिशस्तेरमुञ्चोऽजागरास्वधि देव एकः ।
इन्द्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः ॥९॥
वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे ।
आर्दयद्वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः ॥१०॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥

úpa bráhmāṇi harivo háribhyāṃ sómasya yāhi pītáye **sutásya | índra tvā yajñáḥ kshámamāṇam ānaḍ dāṣvā́n asy adhvarásya praketáḥ** || 6 || **sahásravājam abhimātisháhaṃ sutéraṇam maghávānaṃ suvṛiktím** | úpa bhūshanti gíro ápra**tītam índraṃ** namasyā́ jaritúḥ pananta || 7 || saptápo devíḥ **suráṇā ámṛiktā yā́bhiḥ** síndhum átara indra pūrbhít | na**vatíṃ srotyā́ náva** ca srávantīr **devébhyo gātúm mánushe ca vindaḥ** || 8 || apó **mahír abhíṣaster amuñcó 'jāgar āsv ádhi devá ékaḥ** | índra yā́s tvā́ṃ vṛitratū́rye cakártha tā́bhir **viṣvā́yus tanvàm pupushyāḥ** || 9 || vīréṇyaḥ krátur índraḥ **uṣastír utápi dhénā** puruhūtám īṭṭe | ā́rdayad vṛitrám ákṛi**od u lokáṃ** sasāhé ṣakráḥ pṛítanā' abhishṭíḥ || 10 || ṣunáṃ ıvema maghávānam índram — || 11 || 25 ||

Lord of vigour and energy, come with your two powers to our adorations to accept our elixir of love and homage; O effulgent, the offering reaches you, who are enduring; cognizant of worship; you are the donor of the reward. 6

Our praises celebrate the irresistible resplendent sire (Lord, or sun or the sire), the dispenser of abundant food, the overcomer of enemies, the delighter in the libation, the possessor of opulence, the well-praised; the adorations of the worshipper glorify him. 7

The seven divine meandering rivers with which you, O resplendent sire, the destroyer of cities, replenish the ocean, flow unimpeded; you discover the nine and ninety flowing rivers and their path for Nature's bounties and men. 8

You release the great waters from the malignant obstructer; you have been the only divine who watches over them; with those waters which you have employed for the destruction of darknesses, may you, all-vivifying resplendent sire, cherish your own glory. 9

The radiant sun, the resplendent sire, is the chief of heroes, the accomplisher of great deeds, to whom praise is well-offered; the voice of praise lauds him, the invoked of many. He destroys devil of darknesses and creates light; he is radiant, the conqueror and overcomer of hostile forces. 10

We invoke for our protection the opulent radiant sun, distinguished in this combat; he is the leader in the food-bestowing conflicts; he is terrible in battles, the destroyer of foes, and the conqueror of wealth. 11

(१०५) पञ्चोत्तरशततमं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्य कौत्सो दुर्मित्रः सुमित्रो गुणतः, विपर्यस्तनामा वा ऋषिः । इन्द्रो देवता ।
(१) प्रथमर्चो गायत्र्युष्णिग्वा, (२, ७) द्वितीयासप्तम्योः पिपीलिकमध्या, (३–६, ८–१०) तृतीयादिचतसृणामष्टम्यादितृचस्य चोष्णिक्, (११) एकादश्याश्च त्रिष्टुप् छन्दांसि ॥

॥२६॥

कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद्वाः ।
दीर्घं सुतं वाताप्याय ॥१॥
हरी यस्य सुयुजा विव्रता वेरर्वन्तानु शेपा ।
उभा रजी न केशिना पतिर्दन् ॥२॥
अप योरिन्द्रः पापज आ मर्तो न शश्रमाणो बिभीवान् ।
शुभे यद्युयुजे तविषीवान् ॥३॥
सचायोरिन्द्रश्चर्कृष आँ उपानसः सपर्यन् ।
नदयोर्विव्रतयोः शूर इन्द्रः ॥४॥
अधि यस्तस्थौ केशवन्ता व्यचस्वन्ता न पुष्ट्यै ।
वनोति शिप्राभ्यां शिप्रिणीवान् ॥५॥

105.

Kadá vaso stotrám háryata ā́va ṣmaṣā́ rudhad vā́ḥ | **dīrghám sutám vātā́pyāya** || 1 || hárī yásya suyújā vívratā **vér árvantā́nu** ṣépā | **ubhā́** rajī́ ná keṣínā pátir dán || 2 || **ápa yór** índraḥ pā́paja ā́ márto ná ṣaṣramāṇó bibhīvā́n | ṣubhé yád yuyujé távishīvān || 3 || sácāyór índraṣ cárkṛisha ā́ñ upānasáḥ saparyán | nadáyor vívratayoḥ ṣū́ra índraḥ || 4 || ádhi yás tasthaú késavantā vyácasvantā ná pushṭyaí | vanóti ṣíprābhyāṃ ṣipríṇīvān || 5 || 26 ||

॥२७॥

प्रास्तौदृष्वौजा ऋष्वेभिस्ततक्ष शूरः शवसा ।
ऋभुर्न क्रतुभिर्मातरिश्वा ॥६॥
वज्रं यश्चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान् ।
अरुतहनुरद्भुतं न रजः ॥७॥

prástaud ṛishvaújā ṛishvébhis tatáksha ṣū́raḥ ṣávasā | ṛibhúr ná krátubhir mātaríṣvā || 6 || vájraṃ yáṣ cakré suhánāya dásyave hirīmaṣó hírīmān | árutahanur ádbhutaṃ ná rájaḥ || 7 ||

105

When will our praise reach you, O Lord of wealth, O lover of praises? When will you accept it and let loose the long-protracted blessings for showering rain? 1

To you belong the two vital energies, which like war-steeds, are well-trained, active, swift, courageous, brilliant as the two worlds. May you, O Lord of vital energies, bestow wealth upon us. 2

The sun repels obstructions and like a mortal tired and affrighted in the combat with the obstructive force (i.e. with dark clouds) and being associated with the forces of vital energies prepares for glorious victory. 3

The sun, the hero, the possessor of two energies, neighing and prancing like horses, the friend of man, for his exhilaration, comes mounted in his chariot, granting him prosperity. 4

He, who has mounted the two long-maned and all-pervading steed-like energies for the nourishment of the sacrificer, asks for love and devotional praise. The sun roars as if with his mighty jaws. 5

Possessor of glorious strength and associated with the glorious vital winds he inspires adoration; the hero abiding in the firmament works with his strength as the wise architects with their supreme designs and structures. 6

He is golden-bearded and Lord of vital powers, who makes the thunderbolt for the easy destruction of the demon of darkness, and who has irresistible jaws like the vast firmament. 7

अवं नो वृजिना शिशीह्यृचा वनेमानृचः ।
नाब्रह्मा यज्ञ ऋधग्जोषति त्वे ॥८॥
ऊर्ध्वा यत्ते त्रेतिनी भूद्यज्ञस्य धूर्षु सद्मन् ।
सजूर्नावं स्वयशसं सचायोः ॥९॥
श्रिये ते पृश्निरुपसेचनी भूच्छ्रिये दर्विररेपाः ।
यया स्वे पात्रे सिञ्चस उत् ॥१०॥
शतं वा यदसुर्य प्रति त्वा सुमित्र इत्थास्तौद्दुर्मित्र इत्थास्तौत् ।
आवो यद्दस्युहत्ये कुत्सपुत्रं प्रावो यद्दस्युहत्ये कुत्सवत्सम् ॥११॥

॥ इत्यष्टमाष्टके पञ्चमोऽध्यायः ॥

[पञ्चमाध्याये वर्गाः २७, सूक्तानि ९९, ऋचः २४९]

---

nábrahmā yajñá ṛídhag jóshati tvé || 8 || urdhvā́ yát te tretínī bhū́d yajñásya dhūrshú sádman | sajū́r nā́vam sváyaṣasam sácāyóḥ || 9 || ṣriyé te pṛíṣnir upasécanī bhūc chriyé dárvir arepā́ḥ | yáyā své pā́tre siñcása út || 10 || ṣatám vā yád asurya práti tvā sumitrá itthā́staud durmitrá itthā́staut | ā́vo yád dasyuhátye kutsaputrám prā́vo yád dasyuhátye kutsavatsám || 11 || 27 ||

Pañcamo 'dhyāyaḥ.

अथ षष्ठोऽध्यायः ॥

(१०६) षडुत्तरशततमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य काश्यपो भूतांश ऋषिः । अश्विनौ देवते । त्रिष्टुप् छन्दः ॥

॥१॥ उभा उ नूनं तदिदर्थयेथे वि तन्वाथे धियो वस्त्रापसेव ।
सध्रीचीना यातवे प्रेमजीगः सुदिनेव पृक्ष आ तंसयेथे ॥१॥

106.

Ubhā́ u nūnám tád íd arthayethe ví tanvāthe dhíyo vástrāpáseva | sadhrīcī́nā yā́tave prém ajīgaḥ sudíneva pṛíksha ā́ taṅsayethe || 1 ||

Comminute, O the resplendent, our sins and shortcomings; may we by our hymns win over those who offer no hymns. The offering unaccompanied by sincere prayer and a will to exert accordingly, is not acceptable to you. 8

When three-fold fire burns high for you and rises up and rests on the top of cosmos, then accompanied by the sacrifice, you, the friend of man, ascend with joy on the glorious boat of heaven. 9

May the earth yield water (or may the cow furnish milk) for mixing with your love, the elixir; may the ladle for the mixture wherewith you pour it into your own vessel be free from defect. 10

When you, O mighty, give hundredfold riches, believers or the friendly ones praise you thus; unbelievers or unfriendly ones also praise you thus; you help the wise man, and destroy the wicked. 11

106

You both, twin divines (pair of day and night), hold the time-space creation (the ceremonials) spread out as two weavers weave cloths. The institutor of the rites praises you for the fulfilment of his desires. May both of you come united and hence this reminding. Please spread out food for us on this charming day. 1

उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव श्वात्र्या शासुरेथः ।
दूतेव हि ष्ठो यशसा जनेषु माप स्थातं महिषेवावपानात् ॥२॥
साकंयुजा शकुनस्येव पक्षा पश्वेव चित्रा यजुरा गमिष्टम् ।
अग्निरिव देवयोर्दीदिवांसा परिज्मानेव यजथः पुरुत्रा ॥३॥
आपी वो अस्मे पितरेव पुत्रोग्रेव रुचा नृपतीव तुर्यै ।
इर्येव पुष्ट्यै किरणेव भुज्यै श्रुष्टीवानेव हवमा गमिष्टम् ॥४॥
वंसगेव पूषर्या शिम्बाता मित्रेव ऋता शतरा शातपन्ता ।
वाजेवोच्चा वयसा घर्म्येष्ठा मेषेवेषा सपर्या३ पुरीषा ॥५॥

ushṭáreva phárvareshu ṣrayethe prāyogéva ṣvātryā ṣā́sur éthaḥ | dūtéva hí shṭhó yaṣásā jáneshu mā́pa sthātam mahishévāpā́nāt || 2 || sākaṃyújā ṣakunásyeva pakshā́ paṣvéva citrā́ yájur ā́ gamishṭam | agnír iva devayór dīdivā́ṅsā párijmāneva yajathaḥ purutrā́ || 3 || āpí vo asmé pitáreva putrógréva rucā́ nṛipátīva turyaí | íryeva pushṭyaí kiráṇeva bhujyaí ṣrushṭīvā́neva hávam ā́ gamishṭam || 4 || vā́ṅsageva pūsharyā̀ ṣimbā́tā mitréva ṛitā́ ṣatárā ṣā́tapantā | vā́jevoccā́ váyasā gharmyeshṭhā́ méshevéshā́ saparyā̀ púrīshā || 5 || 1 ||

॥२॥ सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु ॥६॥
पज्रेव चर्चरं जारं मरायु क्षद्मेवार्थेषु तर्तरीथ उग्रा ।
ऋभू नापत्खरमज्रा खरज्रुर्वायुर्न पर्फरत्क्षयद्रयीणाम् ॥७॥

sṛiṇyèva jarbhárī turphárītū naitoṣéva turphárī parpharíkā | udanyajéva jémanā maderū́ tā́ me jarā́yv ajáram marā́yu || 6 || pajréva cárcaraṃ jā́ram marā́yu kshádmevā́rtheshu tartarītha ugrā́ | ṛibhū́ nā́pat kharamajrā́ kharā́jrur vāyúr ná parpharat kshayad rayīṇā́m || 7 ||

Like two plough bulls, you move towards those who fill you with oblations; you approach like two horses prepared for the fray in order to bring treasure; you are like two glorious messengers among the people. Please do not refuse to accept our offerings like two buffaloes forcibly taken away from the drinking trough. 2

Connected together like the two wings of a bird, you come to our place of noble acts. Like two beautiful animals, you visit our place again and again. You are radiant as fire of the devout worshipper. Like two perambulating priests, you simultaneously bless many of our noble performances at several places. 3

You are our kinsmen. Like two sons, or like two ferocious or fierce shining fires, or like two princes hastening to give protection, or like two bestowers of food you come to feed us. And again, like two luminaries for our joy and like two quick listners, you come to our invocation. 4

You are like two pleasantly moving well-fed bulls. You are like two bestowers of comforts. You are veracious; you are possessors of infinite wealth and you are happy. You may be compared to two horses plump with fodder or to two rams abiding in the firmament. You are to be nourished with food of knowledge and to be cherished with oblations. 5

You are like two mad elephants bending their forequarters and smiting the foe, or you are like the two sons of brave men destroying foes, and cherishing friends; you are as bright as two water-born jewels; may you, O twin divines, render my decaying mortal body free from decay. 6

Fierce twin divines, like two powerful heroes, you enable this moving, perishable mortal frame to cross over the obstructions as over water; extremely intelligent, like two artisans, your chariot, swift as the wind, attains its destination; it pervades all space and it freelv distributes riches. -

घर्मेव मधु जठरे सनेरू भगेविता तुर्फरी फारिवारम् ।
पतरेव चचरा चन्द्रनिर्णिङ्मनऋङ्गा मनन्या३ न जग्मी ॥८॥
बृहन्तेव गम्भरेषु प्रतिष्ठां पादेव गाधं तरते विदाथः ।
कर्णेव शासुरनु हि स्मराथोंशेव नो भजतं चित्रमप्नः ॥९॥
आरङ्गरेव मध्वेरयेथे सारघेव गवि नीचीनबारे ।
कीनारेव स्वेदमासिष्विदाना क्षामेवोर्जा सूयवसात्सचेथे ॥१०॥
ऋध्याम स्तोमं सनुयाम वाजमा नो मन्त्रं सरथेहोप यातम् ।
यशो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोः काममप्राः ॥११॥

gharmeva madhu jathare saneru bhagevita turphari pharivaram | patareva cacara candranirnin manaringa mananya na jagmī || 8 || brihanteva gambhareshu pratishtham padeva gadham tarate vidāthah | karneva sasur anu hí smaratho ’nseva no bhajatam citram apnah || 9 || arangareva madhv erayethe sara ghéva gavi nicinabare | kinareva svedam asishvidana kshamevorja suyavasát sacethe || 10 || ridhyáma stómam sanúyama vajam a no mantram sarathehopa yatam | yaso na pakvam madhu góshv antar a bhutanso asvínoh kamam aprāḥ || 11 || 2 ||

(१०७) सप्तोत्तरशततमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्याङ्गिरसो दिव्य ऋषिः, प्राजापत्या दक्षिणा वा ऋषिका । दक्षिणा दक्षिणादातारो वा देवताः । (१-३, ५-११) प्रथमादितृचस्य पञ्चम्यादिसप्तर्चांश्च त्रिष्टुप्, (४) चतुर्थ्याश्च जगती छन्दसी ॥

॥३॥ आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि ।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि ॥१॥

107.

Avír abhūn mahi mághonam esham visvam jivam támaso nír amoci | mahi jyotiḥ pitríbhir dattam agad urúḥ pantha dákshinaya adarṣi || 1 ||

With your bellies full of heavenly elixir, and like two sauce-pans, you preserve wealth. You are the destroyer of enemies. Armed with hatchets, moving like two flying birds, and with forms, beautifully shining like the moon, with speed of the mind, and both of you laudable, may you come forward to bless our benevolent deeds. 8

Like two expert swimmers (men) in deep waters, you find a resting place. Like two feet crossing a ford you find the fording place. Like two ears you recognize the voice of the reciter of your praises. Like two shoulders supporting the sacred works, come to attend and assist our sacred undertakings. 9

Like two loud-sounding clouds, you send forth the sweet rain. Like two bees, you bring to us your honey to bee-hive, which has its opening turned downwards. Like two labourers, you are dripping with perspiration and like a tired cow eating sweet herbage, you obtain strength. 10

May we have more and more of our praises. May we earn and give nourishing wealth and wisdom to others. May you come hither in the same chariot to our worship; and accept the sweet sacred oblations prepared out of milk products. Thus, a great naturist fulfils the aspirations of the seekers. 11

107

The great splendour of the bounteous Lord (the sun) has become manifest for the rites of these pious men; the whole world (a part of this globe) is set free from the darkness; the vast light, bestowed by our ancestors, has come to us well in time. A clear gesture for the award of remunerative honorarium or charity has been made. 1

उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण ।
हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्र तिरन्त आयुः ॥२॥
दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति ।
अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणन्ति ॥३॥
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः ।
ये पृणन्ति प्र च यच्छन्ति संगमे ते दक्षिणां दुहते सप्तमातरम् ॥४॥
दक्षिणावान्प्रथमो हूत एति दक्षिणावान्ग्रामणीरग्रमेति ।
तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय ॥५॥

ucca diví dákshinavanto asthur ye asvadah saha te suryena | hiranyadá amritatvam bhajante vasodah soma pra tiranta ayuh || 2 || daivi purtír dakshina devayajya na kavaribhyo nahi té prinanti | atha narah prayatadakshinaso 'vadyabhiya bahavah prinanti || 3 || satadharam vayum arkam svarvidam nricákshasas té abhí cakshate havíh | ye prinanti pra ca yáchanti samgamé te dákshinam duhate saptamataram || 4 || dákshinavan prathamo huta eti dakshinavan gramanir agram eti | tam evá manye nripatim jananam yáh prathamó dákshinam avivaya || 5 || ३ ||

॥४॥ तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम् ।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ॥६॥
दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम् ।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ॥७॥

tam eva rishim tam u brahmanam ahur yajnanyam samagam ukthasasam | sá sukrasya tanvò veda tisro yah prathamo dákshinaya raradha || 6 || dákshinasvam dákshinā gam dadati dákshina candrám utá yád dhíranyam | dákshinannam vanute yó na atmā dákshinam várma krinute vijanán || 7 ||

The donors of charity rise high up in the society and are thus blessed in heaven. Those who give speed-horses in charity dwell with the sun; the givers of gold obtain immortality, and the givers of raimant prolong their life, O Dear. 2

The divine nourishing charity, which is a part of the sacrifice and public duty to the enlightened ones is not for those who go wrong and are sinful, for they do not gratify (any one with sacrifice). However, there are many men who through fear of incurring sin liberally give charity, and thereby gratify the divine ones. 3

Many of them out of the worshippers rightly offer oblation to the wind of the hundred streams, and several of them to the all conscious sun, and to the men-beholding divine ones. Many persons give charity in plenty at the time of festivities. This category of charity has been said to be the mother of seven i.e. the sustainer of seven priests. 4

He who brings charity is invited first; the head of a village bearing charity goes in front. I regard him as a king amongst men who initiates or first offers charity. 5

They call such a person a Ṛṣi (the seer), the Brahmana, (the learned), the leader of the sacred work, the chanter of the hymns, the reciter of the prayer; knower of the three forms of light, who while participating in any public activity starts with charity. 6

The one who gives horses in charity, gives cows in charity, gives gold and also silver in charity and bestows food, he himself, knowing the value of charity, puts on charity as his armour. 7

न भोजा मंम्रुर्न न्यर्थमीयुर्न रिष्यन्ति न व्यथन्ते ह भोजाः ।
इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणैभ्यो ददाति ॥८॥
भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं१ या सुवासाः ।
भोजा जिग्युरन्तःपेयं सुराया भोजा जिग्युर्ये अहूताः प्रयन्ति ॥९॥
भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या३ शुम्भमाना ।
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम् ॥१०॥
भोजमश्वाः सुष्टुवाहो वहन्ति सुवृद्रथो वर्तते दक्षिणायाः ।
भोजं देवासोऽवता भरेषु भोजः शत्रून्त्समनीकेषु जेता ॥११॥

ná bhoja mamrur na nyartham īyur na rishyanti na vyathante ha bhojah | idam yad vísvam bhuvanam svas caitat sarvam dákshinaibhyo dadati || 8 || bhojá jigyuh surabhím yónim agre bhojá jigyur vadhvam yá suvásah | bhojá jigyur antahpeyam suraya bhojá jigyur yé áhutah prayanti || 9 || bhojayasvam sam mrijanty asum bhojáyaste kanya sumbhamana | bhojasyedám pushkarinīva vesma parishkritam devamaneva citram || 10 || bhojam asvah sushthuváho vahanti suvríd ratho vartate dákshinayah | bhojám devāso vata bhareshu bhojah satrun samanīkeshu jeta || 11 || 4 ||

(१०८) अष्टोत्तरशततमं सूक्तम्

(१–११) एकादशर्चस्यास्य सूक्तस्य (१, ३, ५, ७, ९) प्रथमातृतीयापञ्चमीसप्तमीनवमीनामृचां पणयोऽसुरा ऋषयः, (२, ४, ६, ८, १०–११) द्वितीयाचतुर्थीषष्ठ्यष्टमीदशम्येकादशीनाञ्च सरमा ऋषिका । (१, ३, ५, ७, ९) प्रथमातृतीयापञ्चमीसप्तमीनवमीनामृचां सरमा, (२, ४, ६, ८, १०–११) द्वितीयाचतुर्थीषष्ठ्यष्टमीदशम्येकादशीनाञ्च पणयो देवताः । त्रिष्टुप् छन्दः ॥

॥५॥ किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः ।
कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि ॥१॥

108.

Kím ichántī sarámā prédám ānaḍ dūré hy ádhvā jáguriḥ parācaíḥ | kásméhitih ká páritakmyāsīt katháṃ rasáyā ataraḥ páyāṅsi || 1 ||

The givers of charity meet no death; they do not face destruction; they suffer no injury; the givers of charity suffer no pain. Charity gives them all this world and the world beyond. 8

The givers (of charity) obtain fragrant home in the first priority; and then they win the cow and other sources of food. The givers win a bride who is beautifully attired. In the enjoyment provided to others verily lies the enjoyment of the givers. Such givers of enjoyment win the affection of those who might not have been cordial and friendly to them. 9

For the giver of enjoyment, they deck out a fleet horse; such a giver verily gets a bride beautifully adorned; to the giver of enjoyment belongs this dwelling, adorned like a lake full of lotus flowers, delightful like a dwelling of the divine ones. 10

Giver of enjoyments to others verily gets the horses capable of bearing heavy burdens. Highly prized luxury chariots and cars adorn the premises of the givers of charity. O divine, protect such a liberal giver in combats; may the giver be the victor over his foes in battles. 11

108

(A dialogue between Saramā, the Intuitional Faculty, a messenger of the Self, and Paṇis, the hoarders of wealth, the plunderers of divine cows, the obscurers of right understanding; Indra may be the Sun; cows may be the sun-rays and clouds, the obstructors of the sun rays, are the Paṇis).

(Paṇis:) With what objective has the Intuitional Faculty come to this place? Verily, the way is long and difficult to be traversed by the persevering. What is the mission of your coming to us? What sort of wandering has been yours? How have you crossed the waters of the roaring firmament, the region of inner-most conflicts? 1

इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः ।
अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ॥२॥
कीदृङ्ङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात् ।
आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति ॥३॥
नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात् ।
न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे ॥४॥
इमा गावः सरमे या ऐच्छः परि दिवो अन्तान्सुभगे पतन्ती ।
कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा ॥५॥

índrasya dūtír ishita carami maha ichanti panayo nidhin vah | atishkado bhiyasa tán na avat tátha rasaya ataram payansi || 2 || kīdrinn índrah sarame ka drisika yásyedam dutir ásarah parakat | á ca gachan mitram ena dadhamatha gavam gopatir no bhavāti || 3 || naham tam veda dabhyam dabhat sa yasyedam dutir asaram parakat | na tam guhanti sraváto gabhira hata indrena panayah sayadhve || 4 || ima gavah sarame ya aíchah pari divo antan subhage patantī | kas ta ena ava srijad áyudhvy utásmákam áyudhā santi tigmá || 5 || 6 ||

॥६॥ असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः सन्तु पापीः ।
अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर्व उभया न मृळात् ॥६॥
अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिन्यृष्टः ।
रक्षन्ति तं पणयो ये सुगोपा रेकु पदमलकमा जगन्थ ॥७॥

asenya vah panayo vacansy anishavyas tanvah santu papih | ádhrishto va étavá astu pantha bríhaspátir va ubhayā na mrilāt || 6 || ayam nidhíh sarame adribudhno gobhir asvebhir vasubhir nyrishtah | rákshanti tam panayo ye sugopa reku padám álakam a jagantha || 7 ||

(Saramā:) I have come as the appointed messenger of the Lord of resplendence, seeking our great treasures forcibly taken by you. O dark clouds of evil thoughts, my strong determination has sustained me all through the danger involved in crossing the waters. And thus I have passed over the waters of the river. 2

(Paṇis:) O messenger, O Sarama, what this resplendent Lord is like? What is the appearance of that person as whose messenger you have come to this place from afar? (Now Panis say to one another:) Let her approach; let us make friends with her, and let her be the Lord of our cattle. 3

(Saramā:) I do not believe that he can be subdued; he as whose messenger I have come to this place from afar, can defeat all of you. The deep rivers do not conceal him. You, O Panis, when slain by Him, shall all of you sleep eternally (i.e. shall die). 4

(Paṇis:) O auspicious envoy, here are the cows, the rays, which you seek, stretching to the extremities of the sky. Who would give them up to you without resistance, without a combat? And (may you know) our weapons are sharp. 5

(Saramā:) Your words, O Panis, are not sufficient to defend you; your sinful bodies will not be equal to his arrows. May you have innumerable hurdles in your path. May our Lord of vast universe show no favour to either your words or to your persons. 6

(Paṇis:) O envoy, this treasure, secured in the (cave of the) mountain consists of cows, horses and riches; We, Panis, protect it who are good watchers. All in vain, shall be your approach to this solitary spot. 7

एह गमन्नृषयः सोमशिता अयास्यो अङ्गिरसो नवग्वाः ।
त एतमूर्वं वि भजन्त गोनामथैतद्वचः पणयो वमन्नित् ॥८॥
एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन ।
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ॥९॥
नाहं वेद भ्रातृत्वं नो स्वसृत्वमिन्द्रो विदुराङ्गिरसश्च घोराः ।
गोकामा मे अच्छदयन्यदायमपात इत पणयो वरीयः ॥१०॥
दूरमित पणयो वरीय उद्गावो यन्तु मिनतीर्ऋतेन ।
बृहस्पतिर्या अविन्दन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ॥११॥

éhá gamann rishayah sómasita ayasyo angiraso navagvāh | tá etam urvam ví bhajanta gonam áthaitad vacah panayo vamann ít || 8 || eva ca tvam sarama ajagantha prabadhitá sahasa daívyena | svasaram tva krinavai ma púnar ga apa te gavam subhage bhajama || 9 || naham veda bhratritvam no svasritvám índro vidur angirasas ca ghoráh | gokāma me achadayan yád ayam apata ita panayó varıyah || 10 || duram ita panayo varıya ud gāvo yantu minatír riténa | bríhaspatir ya ávindan nıgulhah somo gravana ríshayas ca víprāh || 11 || 6 ||

(१०९) नवोत्तरशततमं सूक्तम्

(१-७) सप्तर्चस्यास्य सूक्तस्य जुहूर्नाम्नी ब्रह्मवादिनी ब्रह्मजाया ऋषिका, ब्राह्म ऊर्ध्वनाभा वा ऋषिः। विश्वे देवा देवताः। (१-५) प्रथमादिपञ्चर्चां त्रिष्टुप्, (६-७) षष्ठीसप्तम्योश्चानुष्टुप् छन्दसी ॥

॥७॥ तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ।
वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन ॥१॥

109.

Tė 'vadan prathamā brahmakilbishé 'kuparah salilo matarísvə | vīluharas tapa ugró mayobhur apo devíh prathamajá riténa || 1 ||

(Saramā:) Inspirited with the celestial elixir, the seers, the fire-born enlightened ones of profound wisdom, acquainted with the intricacies of Nine Month's rites, led by a person of strong determination, shall come hither; they will divide this herd of cattle; then you, Panis, shall realize that you should not have spoken these words. 8

(Paṇis:) You have indeed come hither, O divine messenger, constrained by divine power; we will share the wealth with you, O auspicious one. 9

(Saramā:) I know neither fraternity nor sisterhood; the resplendent Lord and the fire-born know (my kindred); my masters, seeking the treasure, have, in fact, by now taken full control of your habitation when I have come; depart hence, O Panis; depart to a distant land. 10

Go hence, O Paṇis, to a far-off distant land; please let the concealed cattle be now free; let them come forth in due order. No more their concealment, no further hiding. All of us, the Preceptor, the Lord of universe, the blissful, the seers of wisdom and the men of determination have found out their place of hiding. 11

109

(Brahma = Bṛhaspati = Vacaspati = Lord Supreme, the same as Lord of Divine Speech. The latent, unmanifest or unspoken speach is called *Brahmajaya,* literally meaning the wife of Brahma. During the period of dissolution or *pralaya,* the speech left the husband or Brahma, as if the dissolution had been a sin on behalf of Brahma. The speech was restored to Brahma in a form which was audible and intelligible; this speech is known as *juhu,* and is used as the Vedic verses in the performance of *yajnas* or sacrificial rituals).

Several prime powers, e.g. the boundless one (*akuparah* or the Sun), the fluid plasma *(salilah),* the cosmic wind, the wide-consuming fire *(viduhara)*; the intense heat, the bliss-bestowers, the divine or cosmic waters, who are the first-born sons of the Law-Born, discussed and reconsidered about the sin of Brahma (i.e. the entire ethics of *pralaya*). 1

सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ॥२॥
हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेदवोचन् ।
न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥
देवा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसे ये निषेदुः ।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥४॥
ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम् ।
तेन जायामन्वविन्दद्बृहस्पतिः सोमेन नीतां जुह्वं न देवाः ॥५॥
पुनर्वै देवा अददुः पुनर्मनुष्या उत ।
राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः ॥६॥
पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्त्वायोरुगायमुपासते ॥७॥

somo raja prathamo brahmajayam punah prayachad áhriniyamanah | anvartita varuno mitrá āsīd agnir hòta hastagríhyá ninaya || 2 || hástenaiva grahya adhír asya brahmajayéyam íti céd avocan | ná dutaya prahye tastha esha tatha rashtram gupitám kshatriyasya || 3 || deva etasyām avadanta púrve saptarishayas tapase ye nisheduh | bhima jaya brahmanasyòpanita durdham dadhati paramé vyòman || 4 || brahmacari carati vevishad víshah sá devanam bhavaty ékam angam | téna jāyám anv avindad bríhaspatih somena nītám juhvam ná devah || 5 || púnar vaí deva adaduh punar manushya utá | rajanaḥ satyam krinvana brahmajayám púnar daduh || 6 || punardáya brahmajayam kritví devaír nikilbisham | úrjam prithivyá bhaktváyorugayám úpāsate || 7 || 7 ||

First, Divine Love *(Soma)* without hesitation restored unspoken speech (Brahmajaya); in this supreme performance or sacrifice the cosmic water *(Varuna)* becomes the inviter, the pair of sun and fire (Mitra-Agni) become the ministrant priests, and they take her (the Speech, the bride of Lord Supreme) by the hand, and lead her (to her hansband). 2

They, the divine powers speak to Supreme Lord: "This pledge of hers is to be taken by the hand. She is the wife of Lord Supreme *(Brahmajaya)*. She has not made herself known to the messenger sent to seek her, so is the kingdom of ruling clan, the *ksattriya,* protected." 3

The ancient divine powers again speak about her; the seven seers are engaged in penance. She, the terrible and yet dear to God like wife, has been brought back (to her husband). The penance elevates sin to the highest heaven. 4

He leads the life of a Brahmacarin (life of celibacy) even adoring all Gods; he becomes a portion of the Gods; therefore, the Great Priest, the Lord Supreme, obtained his wife, brought to him first by Divine Love (Soma), as the Gods receive an offering. 5

The divine powers give her back again; men also give her back, and kings confirming the gift restore the lady of divine speech back again. 6

The divine powers, having given back God's speech, made her free from obscurity, and having partaken of the food of the earth, they sit down in the cosmic sacrifice where hymns and lyrics are sung in the praise of Lord Supreme. 7

(११०) दशोत्तरशततमं सूक्तम्

(१-११) एकादशर्चस्यास्य सूक्तस्य भार्गवो जमदग्निर्जामदग्न्यो रामो वा ऋषिः । (१) प्रथमर्च इध्मः समिद्धो वाग्निः, (२) द्वितीयायास्तनूनपात्, (३) तृतीयाया इळः, (४) चतुर्थ्या बर्हिः, (५) पञ्चम्या देवीर्द्वारः, (६) षष्ठ्या उषासानक्ता, (७) सप्तम्या दैव्यौ होतारौ प्रचेतसौ, (८) अष्टम्यास्तिस्रो देव्यः सरस्वतीळाभारत्यः, (९) नवम्यास्त्वष्टा, (१०) दशम्या वनस्पतिः, (११) एकादश्याश्च स्वाहाकृतयो देवताः । त्रिष्टुप् छन्दः ॥

॥८॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥१॥
तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥२॥
आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥३॥
प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥४॥
व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥५॥

110.

Samiddho adya manusho duroné devo devan yajasi jatavedah | a ca vaha mitramahas cikitvan tvam dutáh kavír asi pracetah || 1 || tanunapat pathá ṛitasya yanan madhva samañján svadaya sujihva | manmani dhībhír utá yajnam ṛindhan devatra ca krinuhy adhvaram nah || 2 || ājúhvāna ídyo vándyaṣ ca yahy agne vasubhih sajóshāh | tvam devanam asi yahva hota sá enan yakshīshito yajīyan || 3 || pracínam barhíh pradísa prithivya vastor asya vṛijyate agre ahnam | vy u prathate vitaram varīyo devébhyo aditaye syonam || 4 || vyacasvatīr urviya ví ṣrayantām pátibhyo na janayah súmbhamanah | devır dvaro bṛihatır viṣvaminvā devébhyo bhavata suprayanah || 5 || 8 ||

110

You have been kindled today, O all-pervading fire-divine, in the dwelling of the worshipper; you are divine; you sacrifice to the divine powers. Bearing oblation you pay respect to your intelligent friends; you are the wise; you are the far-seeing messenger (of the cosmic forces). *(Idhma).* 1

O pure-tongued eternal fire-divine, may you flavour the paths of the sacrifice (that leads to success) and moisten them with the sweet elixir; elevating our praises and our ceremony by good understandings, convey our sacrifice to Nature's bounties. *(Tanunapat).* 2

O fire-divine, you deserve praises and adoration; you are the invoker. Please come, being propitiated, along with wealth and treasure. O mighty, you are the invoker of Nature's bounties; may you, who deserve most our worship, carry our oblations to other Nature's bounties also. We solicit you for this favour. *(Idyah).* 3

In the early hours of the day, the sacred grass, pointing eastwards, is strewn with the prescribed text as a covering for the earth (of the altar); then they spread it out far and wide as a pleasant seat for the divinities and the Mother Eternity to sit on. *(Barhis).* 4

Expanding wide, throw the doors open to receive Nature's bounties, just as gracefully decorated wives receive their husbands. May these doors be spacious and wide capable of admitting all, and of giving them easy entrance. *(Devirdvarah).* 5

॥९॥ आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥६॥
दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥७॥
आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ॥८॥
य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥९॥
उपावसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥१०॥
सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥११॥

a sushvayantī yajate upake ushasanáktā sadatam ní yonau | divye yoshane brihatí surukmé ádhi srīyam sukrapísam dádhāne || 6 || daivya hotara prathama suvaca mí mana yajnam manusho yájadhyai | pracodayanta vidatheshu karu prācinam jyotih pradísa disánta || 7 || á no yajnam bharati tūyam etv íla manushvad ihá cetayanti | tisro devir barhír edam syonam sarasvati svápasah sadantu || 8 || yá ime dyavaprithivi jánitrī rupaír ápinsad bhuvanani visva | tám adya hotar ishito yajiyan devám tváshtaram ihá yakshi vidvan || 9 || upavasrija tmanya samanján devanam patha ritutha havinshi | vanaspatih samita devo agníh svádantu havyam madhunā ghriténa || 10 || sadyó jató vy amimīta yajnam agnír devanam abhavat purogaḥ | asya hotuh pradísy ritásya vací svahakritam havír adantu devah || 11 || ९ ||

Pouring sweet dews, may the sacred day and night, even quite close to each other, sit down in the assigned place, like two celestial, majestic and richly ornamented damsels bearing beauty of glittering brilliance. *(Usasa-nakta)*. 6

May the two celestial divine ministers, prior (to the terrestrial ones), instituting sacrifice, come and sit down to inspire us at our place of worship. They are the composers and reciters of praises and the invokers of the eastern fire with fine verses. *(Daivyau-Hotarau)*. 7

May *Bharati* (Goddess of Enlightenment) and *Ida* (Divine Speech) come quickly to our place of worship, personified in features, and may *Sarasvati* (Divine Knowledge) also—the three gracious goddesses — sit down on their assigned seats. *(Tisro devih)*. 8

To the Divine Architect, whom we have solicited here today, may you wise and venerable priests, offer oblations. He is the one who has decked the parental heaven and earth, and all the worlds with living forms. *(Tvaṣṭṛ)*. 9

May you offer on your own initiative, at the proper season the anointed food and oblations invoking Nature's bounties. Let our Lord of Forests, the Immolator and the fire divine sweeten the oblation with honey and butter. *(Vanaspatih)*. 10

The fire-divine, as soon as he is born, constructs a sacrifice. He has been the preceder of Nature's bounties. May the bounties partake of the oblation presented with the utterance of the syllable *svaha* through the voice of the invoker of the worship in the eastern direction. *(Svahakṛti)*. 11

(१११) एकादशोत्तरशततमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैरूपोऽष्ट्रादंष्ट्र ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥१०॥ मनीषिणः प्र भरध्वं मनीषां यथायथा मतयः सन्ति नृणाम् ।
इन्द्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः ॥१॥
ऋतस्य हि सदसो धीतिरद्यौत्सं गार्ष्टेयो वृषभो गोभिरानट् ।
उदतिष्ठत्तविषेणा रवेण महान्ति चित्सं विव्याचा रजांसि ॥२॥
इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय ।
आन्मेनां कृण्वन्नच्युतो भुवद्गोः पतिर्दिवः सनजा अप्रतीतः ॥३॥
इन्द्रो मह्ना महतो अर्णवस्य व्रतामिनादङ्गिरोभिर्गृणानः ।
पुरूणि चिन्नि तताना रजांसि दाधार यो धरुणं सत्यताता ॥४॥
इन्द्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हन्ति शुष्णम् ।
महीं चिद्द्यामातनोत्सूर्येण चास्कम्भ चित्कम्भनेन स्कभीयान् ॥५॥

111.

Manīshinah pra bharadhvam manīsham yatha-yatha matayah santi nrinam | índram satyaír erayama kritébhih sa hí viro girvanasyur vídanah || 1 || ritasya hí sadaso dhītír ádyaut sam garshteyo vrishabhó gobhir anat | úd atishthat tavishena ravena mahanti cit sam vivyaca rajansi || 2 || índrah kíla srutya asya veda sa hí jishnúh pathikrít súryaya | an menam krinvann acyuto bhuvad goh patir divák sanaja ápratītah || 3 || índro mahna maható arnavasya vratamināk angirobhir grinanah | puruni cin ní tatana rájansi dadhara yo dharuṇam satyatata || 4 || índro diváḥ pratimáṇam prithivya víṣva veda savana hanti ṣúshṇam | mahım cid dyam atanot suryena caskambha cit kámbhanena skábhıyan || 5 || 10 ||

111

O worshippers, offer your devotion to resplendent Lord in accord with your thoughts. Let us invoke our Lord with sincere adoration, for He loves songs of praise and is capable of granting our wishes. 1

Sustainer of the firmament, the sun shines brightly, like the offspring of a cow which has borne only once, (and never the second time). He, the showerer of benefits, arises with loud roar and pervades the spacious regions. 2

When He hears our praise, the resplendent Lord knows our wishes. He, the victorious, opens a path for the sun. Revealing the sacred knowledge, He, the unassailable, becomes the sovereign lord of the eternal earth, the sky and the whole universe. 3

Sustained by the numerous energy principles, the resplendent sun by his might disperses the shrouding clouds, or makes them pour down abundant rain. He supports the wide-spread clouds also in the midspace. 4

The resplendent Lord is verily the counterpart of heaven and earth; he is cognizant of all cosmic sacrifices. He is the slayer of obstructive forces (or clouds); He spreads out the spacious heaven, and illumes it with the light of the sun. Best of proppers, he props up the heaven with a prop, a beam of support. 5

॥११॥ वज्रेण हि वृत्रहा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः ।
वि धृष्णो अत्र धृषता जघन्थाथाभवो मघवन्बाह्वोजाः ॥६॥
सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन् ।
आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद ॥७॥
दूरं किल प्रथमा जग्मुरासामिन्द्रस्य याः प्रसवे सस्रुरापः ।
क्व स्विदग्रं क्व बुध्न आसामापो मध्यं क्व वो नूनमन्तः ॥८॥
सृजः सिन्धूँरहिना जग्रसानाँ आदिदेताः प्र विविज्रे जवेन ।
मुमुक्षमाणा उत या मुमुच्रेऽधेदेता न रमन्ते नितिक्ताः ॥९॥
सध्रीचीः सिन्धुमुशतीरिवायन्त्सनाज्जार आरितः पूर्भिदासाम् ।
अस्तमा ते पार्थिवा वसून्यस्मे जग्मुः सूनृता इन्द्र पूर्वीः ॥१०॥

vájrena hí vritraha vritram astar adevasya susuvanasya mayah | ví dhrishno átra dhrishata jaghanthathabhavo maghavan bahvójah || 6 || sacanta yád ushasah suryena citram asya ketavo ram avindan | a yan nakshatram dádrise divo na punar yató nákir addha nu veda || 7 || duram kíla prathamá jagmur asām índrasya yáh prasave sasrúr ápah | kvà svid ágram kva budhna asam ápo mádhyam kva vo nūnám ántah || 8 || srijáh síndhuñr ahina jagrasanan ad íd etah pra vivijre javena | mumukshamana uta ya mumucré dhéd etá na ramante nítiktāh || 9 || sadhrícīh síndhum usatīr ivayan sanaj jará aritah purbhíd asam | ástam á te parthiva vasuny asmé jagmuh sunríta indra pūrvíh || 10 || 11 ||

The slayer of the cloud of Nescience, you lay him low with the bolt of justice; O resolute supreme Lord, you always overcome by your powerful bolt, the devices of the impious wicked. Sure of your own strength, O bounteous Lord, you are verily strong-armed. 6

When the dawns are associated with the sun, his rays acquire wonderful beauty; but when (during the day-hours) the constellations of heaven are not seen, no one really knows his rays as he moves (across the space). 7

The first of those waters, which issue forth at the resplendent Lord's command, run away very far. Where is your beginning, O waters? Tell me as to where your root is and where your centre. Where indeed is your termination? 8

You set at liberty the streams ot water which have been swallowed by serpentine clouds. These streams rush forth with rapidity; the waters which verily long to be liberated are set free, and thenceforth, the pure streams never come to a stop. 9

Combined into one, these streams hasten to the ocean, like loving wives to their husbands; the resplendent Lord, the witherer of foes, the demolisher of cities, has been their impeller from ancient times. May our oblations, the treasures of earth, and our copious praises proceed to the dwelling of the resplendent Lord. 10

(११२) द्वादशोत्तरशततमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैरूपो नभःप्रभेदन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ॥

॥२२॥ इन्द्र पिब प्रतिकामं सुतस्य प्रातःसावस्तव हि पूर्वपीतिः ।
हर्षस्व हन्तवे शूर शत्रूनुक्थेभिष्टे वीर्या३ प्र ब्रवाम ॥१॥
यस्ते रथो मनसो जवीयानेन्द्र तेन सोमपेयाय याहि ।
तूयमा ते हरयः प्र द्रवन्तु येभिर्यासि वृषभिर्मन्दमानः ॥२॥
हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व ।
अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य ॥३॥
यस्य त्यत्ते महिमानं मदेष्विमे मही रोदसी नाविविक्ताम् ।
तदोक आ हरिभिरिन्द्र युक्तैः प्रियेभिर्याहि प्रियमन्नमच्छ ॥४॥
यस्य शश्वत्पपिवाँ इन्द्र शत्रूननानुकृत्या रण्या चकर्थ ।
स ते पुरंधिं तविषीमियर्ति स ते मदाय सुत इन्द्र सोमः ॥५॥

112.

Indra píba pratikāmám sutásya pratahsavas tava hí purvapitiḥ | harshasva hantave sura satrun ukthebhish te virya prá bravāma || 1 || yás te ratho manaso javiyan endra tena somapeyaya yāhi | tuyam a te harayah pra dravantu yébhir yasi vrishabhir mandamanah || 2 || haritvata varcasa sūryasya sreshthai rupaís tanvam sparsayasva | asmabhir indra sákhibhir huvanah sadhricino madayasva nishadya || 3 || yasya tyát te mahimanam madeshv imé mahi rodasī náviviktām | tád óka á háribhir indra yuktaíh priyébhir yāhi priyám ánnam ácha || 4 || yasya sasvat papivañ indra satrun anānukritya ranyā cakartha | sa te puramdhim tavishim iyarti sa te madaya suta indra somaḥ || 5 || 12 ||

112

O resplendent Lord, accept our laudations or loving praises, expressed at our morning prayers. You are the first to be thus invoked. O brave Lord, you verily rejoice in slaying your foes. We shall glorify your heroic deeds with hymns. 1

Come, O resplendent Lord, to our place of worship with your chariot, which is swifter than thought. Let your rays, the vigorous steeds, with whom you move delighted with good speed, hasten hither. 2

Decorate your form with most beautiful colours—with the golden radiance of the sun. Invoked by us, your friends, O resplendent Lord, please come with your associates, the vital elements, and be seated; please come here and be exhilarated. 3

O Lord, the vast heaven and earth cannot comprehend your exhilarating grandness. With your beloved strong bay-horses, harnessed to your chariot, you please come to our dwelling to partake of the sacrificial food that you love to have. 4

O resplendent Lord, you have ever been enjoying the elixir of joy, and in that exhilaration, you have been constantly destroying you. enemies with your inimitable weapon. All glory to ır divine elixir of love; it has been effused for you, for your exhilaration. 5

॥१३॥ इदं ते पात्रं सनवित्तमिन्द्र पिबा सोममेना शतक्रतो ।
पूर्ण आहावो मदिरस्य मध्वो यं विश्व इदभिहर्यन्ति देवाः ॥६॥
वि हि त्वामिन्द्र पुरुधा जनासो हितप्रयसो वृषभ ह्वयन्ते ।
अस्माकं ते मधुमत्तमानीमा भुवन्त्सवना तेषु हर्य ॥७॥
प्र त इन्द्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि ।
सतीनमन्युरश्रथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गाम् ॥८॥
नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥९॥
अभिख्या नो मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनाम् ।
रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥१०॥

idam te patram sanavittam indra piba somam ena satakrato | purna ahavo madirasya madhvo yam vísva íd abhiháryanti devah || 6 || ví hí tvam indra purudha janaso hitáprayaso vrishabha hváyante | asmakam te madhumattamānima bhuvan savana teshu harya || 7 || pra ta indra purvyani pra nunam virya vocam prathama kritani | satinamanyur asrathayo ádrim suvedanam akrinor bráhmane gam || 8 || ní shu sīda ganapate ganeshu tvam ahur vípratamam kavinam | na rité tvát kriyate kím canare maham arkám maghavan citram arca || 9 || abhikhya no maghavan nádhamānān sákhe bodhí vasupate sakhinam | ranam kridhi ranakrit satyasushmabhakte cid a bhaja rayé asman || 10 || 13 ||

Navamo 'nuvākah.

O resplendent Lord, your cup of devotional elixir, full of our love, has been long since provided by us; please drink the elixir from it; O performer of cent per cent selfless deeds, the goblet is full of the sweet elixir, a favourite of all divinities. 6

O resplendent Lord, showerer of benefits, men in so many places offer sacrificial food for your acceptance and invoke you. At all these sacrifices, you are invariably offered the sweet devotional elixir. May you take pleasure in them. 7

I will proclaim now, O resplendent Lord, your ancient first-achieved laurels. Determined to send rain to us, you do cleave the cloud; you make the (stolen) kine easily discoverable for the Supreme Lord. 8

O Lord of the mortals, please be seated among the associates. They regard you as the supreme sage among sages; without you, nothing is done here or at a distance; O bounteous Lord, listen to our great and wondrous adoration. 9

O bounteous Lord, friend of friends, Lord of treasure, we implore you; make us your devotee, make us wise, and be kind to us. O warrior, you are endowed with real strength; please fight for us and give us a share in the undivided riches. 10

[अथ दशमोऽनुवाकः ॥] (११३) त्रयोदशोत्तरशततमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैरूपः शतप्रभेदन ऋषिः । इन्द्रो देवता । (१-९) प्रथमादिनवर्चां जगती, (१०) दशम्याश्च त्रिष्टुप् छन्दसी ॥

॥१४॥ तम॑स्य॒ द्यावा॑पृथि॒वी सचे॑तसा॒ विश्वे॑भिर्दे॒वैरनु॒ शुष्म॑मावताम् ।
यदैत्कृ॑ण्वा॒नो म॑हि॒मान॑मिन्द्रि॒यं पी॒त्वी सोम॑स्य॒ क्रतु॑माँ अवर्धत ॥१॥
तम॑स्य॒ विष्णु॑र्महि॒मान॒मोज॑सां॒शुं द॑ध॒न्वान्मधु॑नो॒ वि र॑प्शते ।
दे॒वेभि॒रिन्द्रो॑ म॒घवा॑ स॒यावभि॑र्वृ॒त्रं ज॑घ॒न्वाँ अ॑भव॒द्वरे॑ण्यः ॥२॥
वृ॒त्रेण॒ यदहि॑ना॒ बिभ्र॒दायु॑धा स॒मस्थि॑था यु॒धये॑ शंस॑मा॒विदे॑ ।
विश्वे॑ ते॒ अत्र॑ म॒रुतः॑ स॒ह त्मनावर्ध॑न्नुग्र महि॒मान॑मिन्द्रि॒यम् ॥३॥
ज॒ज्ञा॒न ए॒व व्य॑बाधत॒ स्पृधः॒ प्राप॑श्यद्वी॒रो अ॒भि पौंस्यं॒ रण॑म् ।
अवृ॑श्च॒दद्रि॒मव॑ स॒स्यदः॑ सृ॒जद॒स्त॑भ्ना॒न्नाकं॑ स्वप॒स्यया॑ पृ॒थुम् ॥४॥
आदिन्द्रः॑ स॒त्रा तवि॑षीरपत्यत॒ वरी॑यो॒ द्यावा॑पृथि॒वी अ॑बाधत ।
अवा॑भरद्धृषि॒तो वज्र॑माय॒सं शेवं॑ मि॒त्राय॒ वरु॑णाय दा॒शुषे॑ ॥५॥

113

Tám asya dyavaprithivı sacetasa víṣvebhir devaír ánu susbmam avatam | yád aít krinvanó mahimanam indriyam pıtvı somasya krátumañ avardhata || 1 || tam asya víshnur mahimanam ojasansum dadhanvan madhuno ví rapsate | devébhir índro maghava sayavabhir vritram jaghanvañ abhavad varenyah || 2 || vritrena yad ahina bíbhrad ayudha samasthitha yudhaye sansam avíde | víṣve te átra marutah saha tmanavardhann ugra mahimanam indriyam || 3 || jajnaná evá vy abadhata sprıdhah prapaṣyad vıro abhí paunsyam ranam | ávriscad adrim ava sasyádah srijad ástabhnan nakam svapasyaya prithum || 4 || ad índrah satra tavishīr apatyata vanyo dyavaprithivı abadhata | avabharad dhrishito vajram ayasam sevam mitraya varunaya dasushe || 5 || 14 ||

113

May the concurring heaven and earth, together with all the bounties, preserve that strength of the sun, whereby he obtained his vigorous might. When he comes showing his majesty and power, he drinks the elixir and becomes exceedingly strong. 1

The divine all-pervading luminary (the sun), offering the portion of the life-giving elixir, glorifies his own vigour and greatness. The sun, the Lord of wealth, with the associated cosmic forces, having slain the clouds, becomes deserving of honour. 2

When you encounter the indestructible dark cloud, wielding your weapons for combat, you acquire renown. All the associated vital principles of their own accord magnify the appropriate might, which rightly is yours, the resplendent sun. 3

As soon as he comes to life, he encounters his assailants; the great hero entirely relies on his own manly prowess in war; he divides the cloud, sends forth the flowing waters, and with the determination to accomplish his benevolent assignments, sustains the vast celestial region. 4

The sun advances with his vast forces; he overcomes with his might the foes, stationed far from each other between heaven and earth; with confidence, he wields his iron thunderbolt to do good to friendly and virtuous people, and the liberal donors. 5

॥१५॥ इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे ।
वृत्रं यदुग्रो व्यवृश्चदोजसापो बिभ्रतं तमसा परीवृतम् ॥६॥
या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर्यतमानौ समीयतुः ।
ध्वान्तं तमोऽव दध्वसे हत इन्द्रो मह्ना पूर्वहूतावपत्यत ॥७॥
विश्वे देवासो अध वृष्ण्यानि तेऽवर्धयन्त्सोमवत्या वचस्यया ।
रद्धं वृत्रमहिमिन्द्रस्य हन्मनाग्निर्न जम्भैस्तृष्वन्नमावयत् ॥८॥
भूरि दक्षेभिर्वचनेभिर्ऋक्वभिः सख्येभिः सख्यानि प्र वोचत ।
इन्द्रो धुनिं च चुमुरिं च दम्भयञ्छ्रद्धामनस्या शृणुते दभीतये ॥९॥
त्वं पुरूण्या भरा स्वश्व्या येभिर्मंसै निवचनानि शंसन् ।
सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य ॥१०॥

índrasyatra tavishībhyo virapsína ṛighāyato aranhayanta manyave | vritram yad ugro vy ávriścad ojasāpo bíbhratam tamasā parīvritam || 6 || yā vīryāṇi prathamāni kártva mahitvébhir yátamānau samīyatuḥ | dhvāntam tamo 'va dadhvase hata índro mahnā pūrvahūtāv apatyata || 7 || víśve devāso adha vrishṇyāni té 'vardhayan somavatyā vacasyayā | raddhám vritrám ahim índrasya hánmanāgnír ná jambhais trishv annam āvayat || 8 || bhūri dakshebhir vacanébhir ríkvabhiḥ sakhyébhiḥ sakhyáni pra vocata | índro dhúnim ca cúmurim ca dambháyañ chraddhāmanasyā śriṇute dabhītaye || 9 || tvam purūṇy á bharā svásvyā yébhir máṅsai nivácanāni śaṅsan | sugebhir viśvā duritá tarema vido shu ṇa urviyā gādham adya || 10 || 15 ||

Then the waters rush forth to proclaim the might of the sun shouting loudly, and crushing (his foes), when fiercely he cuts such devilish forces to pieces by his strength as try to obstruct the water, and are encompassed by darkness. 6

In the first of those heroic acts performed by them both the groups (the sun and the clouds) make every effort to win with their utmost might. The sun wins and the devil cloud is slain; the thick darkness is destroyed. Verily, the sun through his might comes out victorious at the first challenge. 7

Then all Nature's bounties, magnify (O sun) your efforts with praise; they offer libations of loving elixir; and quickly defeat the devil, who is the obstructer of water. He is crushed by the slaughtering weapon of the sun, the supreme luminary just like the fire devours food with his teeth. 8

Celebrate the numerous benevolent acts of the resplendent sun, with clever affectionate praises, together with sacred hymns. May the resplendent sun always subdue the wicked, the cruel and the oppressor. He verily deserves the praise offered to him for glorification. 9

May you, O resplendent sun, (or the Supreme Lord) grant me ample riches and excellent horses (food and fuel) with which I may honour divine powers, proffering praise. With properly earned riches, let us cross over all our troubles and handicaps. May you accept our well-composed praises today. 10

(११४) चतुर्दशोत्तरशततमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैरूपः सध्रिस्तापसो घर्मो वा ऋषिः । विश्वे देवा देवताः । (१-३, ५-१०) प्रथमादितृचस्य पञ्चम्यादिषड्चाश्च त्रिष्टुप्, (४) चतुर्थ्याश्च जगती छन्दसी ॥

॥१६॥ घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।
दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कम् ॥१॥
तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानन्ति वह्नयः ।
तासां नि चिक्युः कवयो निदानं परेषु या गुह्येषु व्रतेषु ॥२॥
चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ।
तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम् ॥३॥
एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसापश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम् ॥४॥
सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।
छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश ॥५॥

114

Gharmá sámantā trivŕ́tam vy āpatus tayor jushtim matarísva jagama | divas payo didhishana aveshan vidur deváḥ sahasamanam arkam || 1 || tisró deshtraya nirritır upasate dīrghasruto ví hí jananti vahnayah | tasam ní cikyuḥ kavayo nidanam pareshu ya gúhyeshu vratéshu || 2 || catushkaparda yuvatíḥ supeṣa ghritápratıka vayunani vaste | tásyāṃ suparṇá vríshana nı shedatur yatra devá dadhiré bhagadhéyam || 3 || ékah suparnah sá samudrám á vivesa sa idam vısvam bhuvanam ví cashte | tam pakena manasapasyam antitas tam mata relhi sa u relhi mataraṃ || 4 || suparnam vıprah kavayo vacobhir ekam santam bahudha kalpayanti | chandaṅsi ca dadhato adhvareshu grahan somasya mimate dvadasa || 5 || 16 ||

114

The two sources of heat, fire and the sun, spreading to the limits of the horizon, have pervaded the threefold universe; the cosmic wind has come to give them service. The shining rays with the brilliance of the *Saman,* reach the adorable sun as well as they water the heaven (resulting in ṛainfall). 1

Three types of forces[1] are operative in this universe: disruptive, conjunctive and motivating. This fact is so well known to the widely-enlightened learned persons. The poet sages also verily know the source of generation of these forces—some of them are potential (or hidden), and the others active and kinetic. 2

The quadrangular altar, (as if, a maiden) youthful, handsome and decorated, bright with oblations, clothes herself in pious rites; the two birds (soul and the universal self)[2], the showerers of oblations, sit down thereon where the cosmic forces receive their share. 3

One of the birds passes across the firmament; he looks around and takes an integral view of this whole world; with innocent heart, I behold him from close quarters; his mother[3] kisses him, and he kisses the mother. 4

The wise seers through their art, portray the bird[4] into many forms, though he is only one and holding the seven metres at the sacrifice worship, they measure twelve community-cups of divine elixir. 5

1. *Three Nirṛtis:* three regions, earth, midspace and heaven or three forces: disruptive, conjunctive and motivating (rotational, vibrational and translatory energies) or three deities Agni, Vayu and Aditya.

2. Two birds: Supreme Self and lower self; *Brahman* and + *jiva,* or husband and wife, or the pair of yajamana (householder) and priest.

3. Mother = Madhyamika vac—sound of mid heaven; thunder.

4. One bird = Ekam Suparnam = Supreme Self, Paramatman.

॥१७॥ षट्त्रिंशाँश्च चतुरः कल्पयन्तश्छन्दांसि च दधत आद्वादशम् ।
यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयन्ति ॥६॥
चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त ।
आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबन्ते सुतस्य ॥७॥
सहस्रधा पञ्चदशान्युक्था यावद्द्यावापृथिवी तावदित्तत् ।
सहस्रधा महिमानः सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् ॥८॥
कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद ।
कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित् ॥९॥
भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः ।
श्रमस्य दायं वि भजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः ॥१०॥

shattrinsans ca caturah kalpayantas chándānsi ca dádhata advadasam | yajnam vimaya kavayo manisha riksamabhyam pra rátham vartayanti || 6 || cáturdasanyé mahimano asya tam dhira vaca pra nayanti sapta | apnanam tirtham ka iha pra vocad yena patha prapíbante sutasya || 7 || sahasradha pancadasany uktha yavad dyavaprithivi távad ít tát | sahasradha mahimanah sahasram yavad brahma víshthitam távatī vak || 8 || kas chandasam yogam a veda dhirah ko dhíshnyam prati vacam papada | kam ritvijam ashtamam suram ahur hárī índrasya ní cikāya kah svit || 9 || bhumya antam pary eke caranti rathasya dhurshu yuktaso asthuh | sramasya dāyam ví bhajanty ebhyo yada yamo bhávati harmye hitah || 10 || 17 ||

Filling thirty-six and four[1] vessels, and holding the metres as far as twelve, detailing out the ceremony by their intelligence, the sages complete sacred Yajna with the verses of *Ṛc* and *Saman*. 6

There are fourteen others in his magistracy; seven sages conduct him by prayer who may declare to us the vast place of sanctity at this ceremony, and which is the path whereby they drink this life-giving elixir. 7

